श्रीः ।

शास्त्रमुक्तावळी – ६

# ॥ श्री भगवद्गीता ॥

श्रीम द्यामुनाचार्य विरचितया

गीतार्थसंग्रहाख्यया

प्रतिपदव्याख्ययासह

श्री काञ्ची प्रतिवादिभयंकर अनन्ताचार्येण

परिशोधिता

श्री सुदर्शनमुद्राक्षरशालायां

॥ अ मु द्रि त ॥

॥ श्रीकांची ॥

इदानी मेतन्मूल्यम् — १ - १४ - ०

१९०१

श्रीः

श्रीहयग्रीवायनमः ।

॥ श्रीमतेरामानुजायनमः ॥

# शास्त्रमुक्तावळी ॥

(१) श्रीमद्यामुनाचार्यप्रणीत गीतार्थसंग्रहसहिता

## श्रीभगवद्गीता ॥

श्रुतिशिखरसमधिगम्यं शोभितमूर्द्धन्य बर्हिबर्हचयम् । मायागोपकिशोरं म्मनसावाचात्मनाकलये ॥ श्रियःपति रखिलहेयप्रत्यनीककल्याणैकतानः स्वेतरसमस्त चिदचिद्वस्तुशेषीश्रीभूनीलादि दिव्यमहिषीभि स्सहनित्य सूरिभिरनवरतमभिष्टूयमान चरणकमलः परमव्योमनिलयो निखिल जगदुदयविभवलयलीलो वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धावस्थावस्थितः परमकारुणिकोभगवान्महीप्रार्थित कंसचैद्यादि भूभारभूत दुर्वर्गनिबर्हण व्याजेन " ततोखिलजगत्पद्मबोधायाच्युतभानुना । देवकीपूर्वसन्ध्याया माविर्भूतम्महात्मना " इत्युक्तरीत्या देवकीतनयतयावतीर्य कुरुपाण्डवानां युद्धे प्रसक्ते समाश्रितवात्सल्यातिशयात्पार्थस्य रथिनः स्वयं सारथिसमा वस्थाय अस्थानस्नेहकारुण्याभ्यांयुद्धान्निवृत्तव्यापारस्यतस्ययुद्धोत्साह जननव्याजेन सकलमुमुक्षुजनानुजिघृक्षया परमपुरुषार्थलक्षणमोक्षसाधन भूतंसकलवेदान्तसारतममर्थं प्रकाशयाञ्चकार ॥ ... ... ...

---

(१) इदञ्चगीतार्थसंग्रहाभिधानं श्रीभगवद्गीताव्याख्यानं श्रीमद्यामुनाचार्यप्रणीतमिति तत्तदध्यायसमाप्तिस्थपङ्क्त्या " श्रीमद्यामुनाचार्यप्रणीते गीतार्थसंग्रहे " इत्याकारयावगम्यते । ग्रन्थशैलीपर्यालोचनञ्च व्याख्यानकर्तायं विशिष्टाद्वैतमतानुयायीत्येवोपलभ्यते । द्वौतावद्यामुनाचार्यौपूर्वमभूताम् । एकस्तावत्सुप्रसिद्धयोगिवरस्य नाथमुनेःपौत्रः - ईश्वरमुनेःपुत्रः - आगमप्रामाण्यादिग्रन्थनिर्माता - श्रीभगवद्भाष्यकारस्य श्रीरामानुजमुनेः परमाचार्यभूतः । द्वितीयश्च - सहस्रगीतिव्याख्यायाः चतुर्विंशतिसाहस्र्याः प्रणेतुः श्रीकृष्णसुरेःपिता । अत्र प्रथमस्य एतद्ग्रन्थ-

धृतराष्ट्रउवाच ॥

धर्मक्षेत्रेकुरुक्षेत्रे समवेतायुयुत्सवः ।
मामकाःपाण्डवाश्चैव किमकुर्वतसञ्जय ॥ १ ॥

एवंरूपभगवत्प्रवृत्तिं जानन्नपि धृतराष्ट्रः प्रबलतरपापवासनाप्रभ्रष्टविवेकः सुयोधनविजयबुभुत्सयासञ्जयंपृच्छति (धर्मक्षेत्रइति) हेसञ्जय धर्मक्षेत्रे - धर्मानुष्ठानोपयोगिविशिष्टदेशभूते । कुरुक्षेत्रे - कुरुर्नामपाण्डवधार्तराष्ट्राणांकूटस्थोराजा, तस्यक्षेत्रं, तस्मिन् कुरुक्षेत्राख्ये देशे । युयुत्सवः योद्धुमिच्छवस्सन्तः । समवेताः-सम्मिलिताः । मामकाः-मदीयादुर्योधनादयः । पाण्डवाः - पाण्डुतनयायुधिष्ठिरादयश्च । किमकुर्वत - किंकृतवन्तः? ॥ १ ॥

संजयउवाच ॥

दृष्ट्वातुपाण्डवानीकं व्यूढंदुर्योधनस्तदा ।
आचार्यमुपसङ्गम्य राजावचनमब्रवीत् ॥ २ ॥

राजादुर्योधनः । व्यूढं-पद्मशकटादिव्यूहरचनया निवेशितम् । पाण्डवानीकम् - पाण्डवानां - धर्मराजादीनां, अनीकं - सैन्यन्तु । दृष्ट्वा - विलोक्य । आचार्यं-द्रोणं । उपसङ्गम्य-समीपङ्गत्वा । वचनं-वक्ष्यमाणंवाक्यम् । अब्रवीत् - उक्तवान् ॥ २ ॥ ... ... ... ... ...

---

कर्तृत्वविषये सन्देहः । यद्यपितत्प्रणीतेषु ग्रन्थेषुगीतार्थसंग्रहइति कस्यचिद्ग्रन्थस्यनामास्ति । " मानत्वंभगवन्मतस्यमहतः पुंसस्तथानिर्णयः - तिस्रस्सिद्धयआत्मसंविदखिलाधीशानतत्वाश्रयाः । गीतार्थस्यचसंग्रहःस्तुतिपुगंश्रीश्रीशयोरित्यमून्यद्ग्रन्थाननुसन्दधेयतिपतिस्तंयामुनेयंनुमः ॥ " इतिश्रीमद्वेदान्ताचार्यैरेतत्प्रणीत ग्रन्थपरिगणनसमये गीतार्थसंग्रहोपिपरिगणितः । तथापि - सगीतार्थसंग्रहः श्लोकरूपोऽन्यएवास्मात - अद्यावधिश्लोकरूपस्य गीतार्थसंग्रहस्य श्रीभगवद्यामुनमुनिप्रणीतताप्रसिद्धेः - श्रीमद्वेदान्ताचार्यैस्तस्यैवव्याख्यातत्वात् - पूर्वाचार्यैस्तदष्टकश्लोकानामेव तत्र तत्रोदाहरणाच्च । द्वितीयस्याप्येतद्ग्रन्थकर्तृत्वं बलादनुमेयमेव । तस्याप्येतादृश ग्रन्थकर्तृताया अप्रसिद्धेः - तत्प्रणीतग्रन्थान्तरानुपलम्भाच्च । अत्रयद्युक्तन्तद्ग्राह्यम् ॥

अस्यचैकमेवपुस्तक मस्मदीय " श्रीहयवदनलीलासदन " पुस्तकालयस्थमवलम्ब्य यथामतिशोधनंप्रतिपदव्याख्यानरूपत्वाच्चास्य मुद्रणमकारीत्यलम् ॥ इति निवेदयिता ॥

प. गा. अनन्ताचार्यः ॥

पश्यैतांपाण्डुपुत्राणामाचार्यमहतींचमूम् ।
व्यूढांद्रुपदपुत्रेणतवशिष्येणधीमता ॥ ३ ॥

हेआचार्य । तवशिष्येण - अन्तेवासिना । धीमता-बुद्धिमता । द्रुपदपुत्रेण-धृष्टद्युम्नेन । व्यूढाम्-व्यूहरूपेणस्थापिताम् । महतीम्-अधिकाम् । एताम्-पुरःस्थिताम् । पाण्डुपुत्राणाम् - पाण्डुतनयानाम् । चमूम् - सेनाम् । पश्य - अवलोकय ॥३॥ ... ... ... ... ... ...

अत्रशूरामहेष्वासा भीमार्जुनसमायुधि ।
युयुधानोविराटश्च द्रुपदश्चमहारथः ॥ ४ ॥
धृष्टकेतुश्चेकितानः काशिराजश्चवीर्यवान् ।
पुरुजित्कुन्तिभोजश्च शैब्यश्चनरपुङ्गवः ॥ ५ ॥
युधामन्युश्चविक्रान्त उत्तमौजाश्चवीर्यवान् ।
सौभद्रोद्रौपदेयाश्च सर्वएवमहारथाः ॥ ६ ॥



महेष्वासामहाधन्विनः। युधि-युद्धे। भीमार्जुनसमाः-भीमश्चअर्जुनश्च भीमार्जुनौ, ताभ्यां समाः-तुल्याः । राजानः। अत्रास्यांसेनायां। सन्तीतिशेषः, तानेवनामभिर्निर्दिशति.युयुधानः-सात्यकिः । विराटोमत्स्यदेशाधीश्वरो - राजा । महान्उन्नतोरथोयस्यसः - महारथः द्रुपदः, पाञ्चालदेशाधीशश्च धृष्टकेतुर्नाम कश्चिद्राजा । वीर्यवान् विक्रमशाली । काशिराजश्च । पुरुजित् । सचकश्चित् । कुन्तिभोजोनामकश्चित् । नरपुङ्गवः । नरश्रेष्ठः। शैब्यश्चविक्रांतः विक्रमशाली । युधामन्युर्नामकश्चित् । वीर्यवान्धीरः । उत्तमौजानामकश्चित् । सौभद्रः - अभिमन्युः । द्रौपद्याअपत्यानि पुंमांसौद्रौपदेयाः, प्रतिविन्ध्यादयःपञ्च । अत्रसन्तीतिपूर्वेणान्वयः. सर्वेसात्यकिप्रमुखामहारथाएवाधिपः।६॥

अस्माकन्तुविशिष्टाये तान्निबोधद्विजोत्तम ।
नायकाममसैन्यस्य संज्ञार्थंतान्ब्रवीमिते ॥ ७ ॥

हेद्विजोत्तम । अस्माकन्तु-अस्मन्मध्येतु । मम । सैन्यस्य-सेनायाः । नायकाः - नेतारः । येविशिष्टाःशूराः । सन्ति । ते - तव । संज्ञार्थं - सम्यक्ज्ञानार्थं । ब्रवीमि - वदामि । तान्विशिष्टान् । निबोध - बुध्यस्व ॥७॥ ... ...

भवान्भीष्मश्चकर्णश्च कृपश्चसमितिञ्जयः ।
अश्वत्थामाविकर्णश्च सौमदत्तिस्तथैवच ॥ ८ ॥

भवान् - त्वम् । भीष्मः-गङ्गातनयश्च । कर्णः - राधेयश्च । समितौ-युद्धे

जयतीतिसमितिञ्जयः। कृपः - कृपाचार्यश्च । अश्वत्थामा - भवत्सुतः । विकर्णोमदनुजश्च । तथैवसौमदत्तिः-भूरिश्रवाः ॥ ८ ॥ ... ... ...

अन्येचबहवश्शूरामदर्थेत्यक्तजीविताः ।

नानाशस्त्रप्रहरणास्सर्वेयुद्धविशारदाः ॥ ९॥

अन्येचबहवो - भूयांसः। मदर्थे-ममप्रयोजननिमित्ते । त्यक्तजीविताः - त्यक्तुमध्यवसितजीवाः । नानाशस्त्रप्रहरणाः - शस्त्राण्याग्नेयादीनि अस्त्राणि , प्रहरणानि - खड्गादीनि , नानाविधानि , शस्त्रप्रहरणानि , येषांतेतथोक्ताः । युद्धविशारदाः - समरचतुराः । शूराः - शल्यादयः । सन्तीतिशेषः ॥ ९ ॥ ... ... ... ... ... ...

अपर्याप्तन्तदस्माकं बलंभीष्माभिरक्षितम् ।

पर्याप्तन्त्विदमेतेषां बलंभीमाभिरक्षितम् ॥ १० ॥

तत्तस्मात् - शूरजनसंख्यान्यूनाधिक्यादिहेतोरित्यर्थः । अस्माकं । बलं-सैन्यम् । भीष्माभिरक्षितम् - भीष्मेणअभिरक्षितंसत् । अपर्याप्तम् - अनलं। इदमेतेषांपाण्डवानाम् । बलम् । भीमाभिरक्षितम् - भीमसेनेन - अभिरक्षितंसत् । पर्याप्तम् - अस्मद्विजयायालम् । भीष्मस्यपाण्डवपक्षपातित्वात् । भीमस्यसमस्त धार्तराष्ट्रवध दीक्षितत्वाच्चेतिभावः ॥ १० ॥ ...

अयनेषुचसर्वेषु यथाभागमवस्थिताः ।

भीष्ममेवाभिरक्षन्तु भवन्तस्सर्वएवहि ॥ ११ ॥

सर्वएव - सर्वेपि । भवन्तोयूयम् । सर्वेष्वयनेषु-व्यूहप्रवेशमार्गेषु । यथाभागम् - स्वस्वविभक्तदेशमनतिक्रम्य । अवस्थिताः - वर्तमानास्सन्तः । भीष्ममेव - सेनापतिंगाङ्गेयमेव । अभिरक्षन्तु-अभितोरक्षन्तु ॥ ११ ॥ ...

तस्यसंजनयन्हर्षं कुरुवृद्धःपितामहः ।

सिंहनादंविनद्योच्चैः शंखंदध्मौप्रतापवान् ॥ १२ ॥

प्रतापवान् - प्रशस्तपराक्रमः । कुरुवृद्धः - कुरुषुवयसाज्ञानेनशौर्येणवा-अधिकः । पितामहोभीष्मः । तस्य-दुर्योधनस्य । हर्षम् - सन्तोषम् । संजनयन्-सम्यग्जनयितुम् । उच्चैरधिकम् । सिंहनादम् । विनद्य - कृत्वा । शङ्खं। दध्मौ - पूरयामास ॥ १२ ॥ ... ... ... ... ...

ततःशंखाश्चभेर्यश्चपणवानकगोमुखाः ।

सहसैवाभ्यहन्यंत सशब्दस्तुमुलोभवत् ॥ १३ ॥

ततः-अनन्तरम् । शङ्खाश्च भेर्यश्च पणवा आनकाः गोमुखाश्च वाद्यवि

शेषाः । सहसा - तत्क्षणमेव । अभ्यहन्यन्त - वादिताः । सैनिकैरिति शेषः । तद्धिशङ्खादिजन्यःशब्दः-ध्वनिः । तुमुलः-संकुलः । अभवत् ॥ १३ ॥

ततःश्वेतैर्हयैर्युक्ते महतिस्यंदनेस्थितौ ।
माधवःपांडवश्चैव दिव्यौशंखौप्रदध्मतुः ॥ १४ ॥

ततः - अनन्तरम् । माधवः - श्रीकृष्णः । पाण्डवोऽर्जुनश्च । श्वेतैः - धवलैः । हयैरश्वैः । युक्ते - योजिते । महति - उन्नते । स्यन्दने - रथे । स्थितौ सन्तौ । दिव्यौ - अप्राकृतौ । शङ्खौ । प्रदध्मतुः - पूरयामासतुः ॥ १४ ॥

पांचजन्यंहृषीकेशो देवदत्तंधनञ्जयः ।
पौण्ड्रंदध्मौमहाशंखं भीमकर्मावृकोदरः ॥ १५ ॥

हृषीकेशः - श्रीकृष्णः । पाञ्चजन्यम् - पाञ्चजन्याख्यम्महाशङ्खम् । दध्मौ । धनञ्जयः - अर्जुनः । देवदत्तन्नामशङ्खम् । दध्मौ । भीमकर्मा - भयङ्करव्यापारः । वृकोदरः-भीमसेनः । पौंड्रनाम । महाशङ्खम् । दध्मौ ॥ १५ ॥

अनंतविजयंराजा कुंतीपुत्रोयुधिष्ठिरः ।
नकुलःसहदेवश्च सुघोषमणिपुष्पकौ ॥ १६ ॥

कुन्तीपुत्रोराजायुधिष्ठिरः । अनन्तविजयन्नाम महाशङ्खम् । दध्मौ । नकुलः सहदेवश्च । माद्रीतनयौ । सुघोषमणिपुष्पकौ-तन्नामकौ । शङ्खौ । प्रदध्मतुः ॥ १६ ॥ ... ... ... ... ... ...

काश्यश्चपरमेष्वासः शिखण्डीचमहारथः ।
धृष्टद्युम्नोविराटश्चसात्यकिश्चापराजितः ॥ १७ ॥
द्रुपदोद्रौपदेयाश्च सर्वशःपृथिवीपते ।
सौभद्रश्चमहाबाहुः शंखान्दध्मुःपृथक्पृथक् ॥ १८ ॥

परमेष्वासः - प्रकृष्टधनुर्धरः । काश्यः - काशिराजश्च । महारथः - शिखण्डीच । धृष्टद्युम्नः । विराटश्च । अपराजितः - युद्धेशत्रुभिरपरिभूतः । सात्यकिश्च । द्रुपदः । द्रौपदेयाः - प्रतिविन्ध्यादयश्च । महाबाहुः - बलवान् । सौभद्रः - अभिमन्युश्च । सर्वशः - सर्वेपि । हेपृथिवीपते - धृतराष्ट्र । पृथक्पृथक् - प्रत्येकम् । शङ्खान् । दध्मुः - पूरयामासुः ॥ १७ ॥ १८ ॥

सघोषोधार्त्तराष्ट्राणां हृदयानिव्यदारयत् ।
नभश्चपृथिवींचैवतुमुलोव्यनुनादयन् ॥ १९ ॥

सः - पाण्डवसैन्यशङ्खध्मानादिजनितः । घोषः - ध्वनिः । तुमुलः - सं

कुलःसन् । नभः - आकाशश्च । पृथिवीम् - भूमिंच । अनुनादयन् - प्रतिध्वनियुतंकुर्वन् । धार्तराष्ट्राणाम्-दुर्योधनादीना मेव । हृदयानि - मनांसि । व्यदारयत् - बिभेद ॥ १९ ॥ ... ... ... ...

अथव्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः ।

प्रवृत्तेशस्त्रसंपाते धनुरुद्यम्यपांडवः ॥ २० ॥

हृषीकेशंतदावाक्य मिदमाहमहीपते ।

अर्जुनउवाच ॥

सेनयोरुभयोर्मध्ये रथंस्थापयमेच्युत ॥ २१ ॥

हेमहीपते - धृतराष्ट्र । कपिध्वजः - हनुमत्केतुः । पाण्डवोर्जुनः । अथ - अनन्तरम् । शस्त्रसम्पाते - युद्धे । प्रवृत्ते - आरब्धेसति । व्यवस्थितान् - सन्नद्धान् । धार्तराष्ट्रान् - दुर्योधनादीन् । दृष्ट्वा - विलोक्य । धनुः - गाण्डीवम् । उद्यम्य - उद्धृत्य । तदा - तस्मिन्समये । हृषीकेशं - श्रीकृष्णम् । इदम् - वक्ष्यमाणम् । वाक्यम् । आह - अब्रवीत् । किमिति । हेअच्युत । उभयोः - सेनयोर्मध्ये । मे - मम । रथम् । स्थापय - निवेशय ॥ २० ॥ २१ ॥

यावदेतान्निरीक्षेहं योद्धुकामानवस्थितान् ॥

कैर्मयासहयोद्धव्य मस्मिन्रणसमुद्यमे ॥ २२ ॥

योद्धुम् - कामो येषां ते योद्धुकामाः तान् योद्धुकामान् सतः । अवस्थितान्-पुरतोवर्त्तमानान् । एतान् - धार्तराष्ट्रान् । यावत्पर्यन्तम् । अहंनिरीक्षे - पश्यामि । अस्मिन् - रणसमुद्यमेयुद्धोद्योगे । मया । कैः - शूरैस्सह । योद्धव्यम् - युद्धःकर्तव्यः ॥२२॥ ... ... ... ...

योत्स्यमानानवेक्षेहं यएतेत्रसमागताः ।

धार्त्तराष्ट्रस्यदुर्बुद्धे र्युद्धेप्रियचिकीर्षवः ॥ २३ ॥

अहम् । योत्स्यमानान् - अस्माभिस्सहयुद्धंकरिष्यमाणान् । अवेक्षे - अवलोकयामि । एते - पुरतोदृश्यमानाः । येभीष्मद्रोणादयः । युद्धे - समरे । दुर्बुद्धेः - दुष्टबुद्धेः । धार्तराष्ट्रस्य - दुर्योधनस्य । प्रियचिकीर्षवः - प्रियंकर्तुमिच्छन्तः । अत्र - रणभूमौ । समागताः - सम्यग्जयविषयागनिश्चयपूर्वकमागताः ॥२३॥ ... ... ... ... ... ...

संजयउवाच ॥

एवमुक्तोहृषीकेशो गुडाकेशेनभारत ।

सेनयोरुभयोर्मध्ये स्थापयित्वारथोत्तमम् ॥ २४ ॥

भीष्मद्रोण प्रमुखतः सर्वेषांचमहीक्षिताम् ।

उवाचपार्थपश्यैतान् समवेतान्कुरूनिति ॥ २३ ॥

हेभारत - धृतराष्ट्र । हृषीकेशः - कृष्णः । गुडाकेशेन - अर्जुनेन । एवम् - अनेनप्रकारेण । उक्तस्सन् । उभयोः सेनयोर्मध्ये । भीष्मद्रोणप्रमुखतः - भीष्मद्रोणयोरग्रतः । सर्वेषाम् - महीक्षिताम् - महीपालानाम् । प्रमुखतः - पुरतः । रथोत्तमम् - रथश्रेष्ठम् । स्थापयित्वा - निवेश्य । पार्थ - अर्जुन । समवेतान् - सम्मिलितान् । एतान् - कुरून् - धार्तराष्ट्रान् । पश्य - अवलोकय । इत्युवाच - उक्तवान् ॥ २४ ॥ २५ ॥ ... ... ...

तत्रापश्यत्स्थितान्पार्थः पितॄनथपितामहान् ।

आचार्यान्मातुलान्भ्रातॄन् पुत्रान्पौत्रान्सखींस्तथा ॥ २६ ॥

श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि ॥

अथ- अनन्तरम् । तत्र-सेनाद्वयमध्ये । पार्थः - अर्जुनः । उभयोः - द्वयोरपिसेनयोः । स्थितान् - वर्तमानान्- पितॄन् , पितामहान् , आचार्यान् , मातुलान् , भ्रातॄन् , पुत्रान् , पौत्रान् , तथा सखीन्-मित्राणि, श्वशुरान् , सुहृदः - कृतोपकारांश्च । अपश्यत्- ददर्श ॥ २६ ॥ ... ...

तान् समीक्ष्य स कौंतेयः सर्वान् बन्धूनवस्थितान् ॥ २७ ॥

कृपया परयाविष्टो विषीदन्निदमब्रवीत् ।

कौन्तेयः - अर्जुनः । अवस्थितान् - समरस्थलेवर्तमानान् । तान्सर्वान् - बन्धून् । समीक्ष्य - सम्यग्विलोक्य । परया - महत्या । कृपया । आविष्टो - व्याप्तः । विषीदन् - दुःखितःसन् । इदम् - वक्ष्यमाणंवचनम् । अब्रवीत् ॥२७॥ ... ... ... ... ...

अर्जुनः ॥

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुंसमुपस्थितम् ॥ २८ ॥

सीदंति मम गात्राणिमुखं च परिशुष्यति ।

वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥ २९ ॥

हेकृष्ण । युयुत्सुम् - योद्धुमिच्छुम् । समुपस्थितम् - सम्यक्पुरतोवर्तमानम् । इमं-स्वजनं-बन्धुजनम् । दृष्ट्वा । मम । गात्राणि - करचरणाद्यवयवाः । सीदन्ति- कृशीभवन्ति । वक्त्रञ्च परिशुष्यति-शुष्कंभवति । मे-मम । शरीरे । वेपथुः - कम्पश्च । जायते । रोमहर्षः - रोमाञ्चश्च । जायते ॥२८॥२९॥

गांडीवं स्रसंत हस्तात् त्वक् चैव परदह्यते ।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥ ३० ॥

**हस्तात् - करात् । गाण्डीवं - धनुः । स्रंसते - भ्रश्यति । त्वक् - चर्म । परिदह्यति - परितस्तप्यते । अवस्थातुं - स्थित्यावर्तितुश्च । नशक्नोमि - शक्तोनभवामि । मे - मम । मनश्च - स्वान्तम् । भ्रमतीव - विघूर्णतीव ॥ ३० ॥**

निमित्तानि च पश्यामि विपरीतानि केशव ।
न च श्रेयोऽनुपश्यामि हत्वास्वजनमाहवे ॥ ३१ ॥

**विपरीतानि-अरिष्टसूचकानि । निमित्तानि-शकुनानिच । पश्यामि । आहवे-युद्धे । स्वजनं - बन्धुजनम् । हत्वा । श्रेयः - फलम् । नानुपश्यामि ॥ ३१ ॥**

नकांक्षे विजयं कृष्ण न च राज्यं सुखानि च ।
किंनो राज्येन गोविन्द किं भेगैर्जीवितेनवा ॥ ३२ ॥

**हेकृष्ण विजयम् । नकांक्षे नेच्छामि । राज्यश्च नकांक्षे ॥ सुखानिच नकांक्षे । हेगोविन्द । नः–अस्माकम् । राज्येनकिम् । जीवितेनवाकिम् ॥ ३२॥**

येषामर्थे कांक्षितं नोराज्यं भोगाः सुखानि च ।
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥ ३३ ॥
आचार्याः पितरः पुत्रास्तथैव च पितामहाः ।
मातुलाः श्वशुरा पौत्राः स्यालाः संबंधिनस्तथा ॥ ३४ ॥

**येषां आचार्यादीनाम् । अर्थे–प्रयोजने निमित्ते । नः - अस्माकम् । राज्यम्-कांक्षितं । भोगाः–भोग्यपदार्थाः । कांक्षिताः । सुखानिच । कांक्षितानि । इमे । आचार्यादयः । प्राणान् । धनानिच । त्यक्त्वा - त्यक्तुमङ्गीकृत्य । युद्धेऽवस्थिताः ॥३३॥३४॥ ... ... ... ... ...**

एतान्न हंतुमिच्छामि घ्नतोपि मधुसूदन ॥
अपि त्रैलोक्यराज्यस्य हेतोः किंनु महीकृते ॥ ३५ ॥

**हेमधुसूदन । घ्नतोपि - अस्मान्हिंसतोपि । एतान् - धार्तराष्ट्रान् । त्रैलोक्यराज्यस्यापिहेतोः - त्रिलोक्याधिपत्यार्थमपि । हन्तुं - हिंसितुम् । नेच्छामि । महीकृते - महीमात्रप्रयोजनायतु । किमुवक्तव्यम् ॥३५॥**

निहत्य धार्तराष्ट्रान्नःका प्रीतिः स्याज्जनार्दन ।
पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः ॥ ३६ ॥

**हेजनार्दन । धार्तराष्ट्रान् । निहत्य-संहृत्य । नः-अस्माकम् । काप्रीतिःस्यात्-**

कावा प्रीतिर्भवेत्। "अग्निदोगरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारापह र्ताच षडेतेह्याततायिनः॥ सदापानरतायेच सदाकामरतास्तथा। सदाद्यूतक्रियासक्ताः सदासद्वचनप्रियाः॥ सदापैशुन्यसक्ताश्च सदामांसप्रियाअपि। शास्त्रज्ञाअपिलोकेऽस्मि स्तएतेत्वाततायिनः।" इत्यादिप्रकारेण-आततायिनोप्येतान् हत्वा। अस्मान्। पापमाश्रयेदेव ॥३६॥ ...

तस्मान्नार्हा वयं हन्तुंधार्तराष्ट्रान् स्वबांधवान्।
स्वजनं हि कथं हत्वासुखिनः स्याम माधव ॥३७॥

तस्मात् - कारणात्। वयम्। स्वबान्धवान् - बन्धुभिस्सहितान्। धार्तराष्ट्रान्। हन्तुम्। नार्हाः। हेमाधव। स्वजनम्। हत्वा। कथम्। सुखिनः। स्याम - भवेम ॥३७॥ ... ... ... ...

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥३८॥
कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम्।
कुलक्षयकृतं दोषम्प्रपश्यद्भिर्जनार्दन ॥ ३९ ॥

हेजनार्दन। लोभोपहतचेतसः - राज्यलोभेननष्टविवेकाः। एते - धार्तराष्ट्राः। कुलक्षयकृतन्दोषम्। मित्रद्रोहेपातकञ्च। नपश्यन्तियद्यपि – न जानन्त्येव। तथापि। कुलक्षयकृतम् - कुलक्षयेन - स्वजननाशेन, कृतमागतम्। दोषं - पातकम्। प्रपश्यद्भिः - जानद्भिः। अस्मात्पापान्निवर्तितुम्। कथम्। नज्ञेयं - नविचारणीयम् ॥ ३८ ॥ ३९ ॥ ...

कुलक्षयेप्रणश्यन्ति कुलधर्मास्सनातनाः।
धर्मेनष्टेकुलंकृत्स्नमधर्मोभिभवत्युत ॥४०॥

कुलक्षयेसति। सनातनाः - शाश्वताः। कुलधर्माः। प्रणश्यन्ति। धर्मे-नष्टेसति। कृत्स्नं - समस्तम्। कुलं-नष्टावशिष्टंकुलम्। अधर्मः - अनाचारः। अभिभवत्युत - व्याप्नोत्येव ॥४०॥ ... ... ... ... ...

अधर्माभिभवात्कृष्ण प्रदुष्यन्तिकुलस्त्रियः।
स्त्रीषुदुष्टासुवार्ष्णेय जायतेवर्णसंकरः ॥४१॥

हेवार्ष्णेय - कृष्ण। अधर्माभिभवात् - अधर्मव्याप्तिहेतोः। कुलस्त्रियः - कुलाङ्गनाः। प्रदुष्यन्ति - प्रकर्षेणदुष्टाभवन्ति। स्त्रीषु। दुष्टासुसतीषु।

**वर्णसङ्करः - जातिसाङ्कर्य्यम् । जायते ॥ ४१ ॥ ... ... ...**

संकरोनरकायैव कुलघ्नानांकुलस्यच ।

पतन्तिपितरोह्येषां लुप्तपिण्डोदकक्रियाः ॥ ४२ ॥

**सङ्करोवर्णसङ्करः–जातिसाङ्कार्य्यम् । कुलघ्नानां - कुलक्षयकारिणाम् । कुलस्यचनरकायैवभवति । एषां - कुलघ्नानाम् । पितरः - लोकान्तरवासिनः । लुप्तपिण्डोदकक्रियाः - लुप्ताः–दातुरभावान्नष्टाः, पिण्डोदकानां - क्रियायेषान्ते - तथोक्ताः सन्तः । पतन्ति - अधोगतिम्प्राप्नुवन्ति ॥ ४२ ॥**

दोषैरेतैःकुलघ्नानां वर्णसंकरकारकैः ।

उत्साद्यन्तेजातिधर्माः कुलधर्माश्चशाश्वताः ॥ ४३ ॥

**कुलघ्नानाम् । वर्णसंकरकारकैः - जातिसांकर्यकरैः ॥ एतैर्दोषैः। शाश्वताः । जातिधर्माः, कुलधर्माश्च । उत्साद्यन्ते ॥ ४३ ॥ ... ...**

उत्सन्नकुलधर्माणां मनुष्याणांजनार्दन ।

नरकेनियतंवासो भवतीत्यनुशुश्रुम ॥ ४४ ॥

**उत्सन्नकुलधर्माणाम् - प्रणष्टकुलाचाराणां । मनुष्याणाम् । हेजनार्दन। नरके - कुम्भीपाकादौ । नियतं - निश्चयेन। वासोभवति । इति-अनेनप्रकारेण । अनुशुश्रुम - वयंश्रुतवन्तः ॥४४॥ ... ... ... ...**

अहोबतमहत्पापं कर्तुंव्यवसितावयम्

यद्राज्यसुखलोभेन हन्तुंस्वजनमुद्यताः ॥ ४५ ॥

**वयम् । राज्यसुखलोभेन - राज्यसुखेच्छया । स्वजनं - बन्धुजनम् । हन्तुं - संहर्तुम् । उद्यताः - उद्युक्ताः । इतियत् । एतन्महदतिदारुणम् - पापम् । कर्तुम् । व्यवसिताः - व्यवसायंकृतवन्तः । अहो - आश्चर्यम् । बत - कष्टम् ॥४५॥ ... ... ... ... ... ...**

यदिमामप्रतीकारमशस्त्रंशस्त्रपाणयः

धार्त्तराष्ट्रारणेहन्युस्तन्मेक्षेमतरंभवेत् ॥ ४६ ॥

**रणे - समरे। अप्रतीकारं - अकृतप्रतिक्रियम् । अशस्त्रं - आयुधरहितं । माम्। शस्त्रपाणयः-आयुधहस्ताः। धार्त्तराष्ट्राः। हन्युर्यदि । तद्धननमेव । मे - मम । क्षेमतरं - अत्यन्ताहितम्। भवेत् ॥ ४६ ॥ ... ...**

सञ्जय उवाच ॥

एवमुक्त्वाऽर्जुनः संख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥ ४७ ॥

इति श्री भगवद्गीतायां प्रथमोऽध्यायः ॥ १ ॥

**अर्जुनः। एवं - अनेनप्रकारेण । उक्त्वा। सशरं - बाणसहितम्। चापं- धनुः। विसृज्य - विहाय। शोकसंविग्नमानसः - शोकेन – दुःखेन,-संविग्नं- अत्यन्तवलितं, मानसं -मनोव्यापारो,यस्यसतथोक्तःसन्। संख्ये-युद्धरङ्गे। रथोपस्थे - रथस्योपरि। उपाविशत - उपविवेश ॥४७॥ ... ...**

**इति श्रीमद्यामुनाचार्य विरचिते गीतार्थसंग्रहे अर्जुनविषादोनाम प्रथमोध्यायः ॥ १ ॥**

श्रीः

## ॥ द्वितीयोध्यायः ॥

सञ्जय उवाच ॥

तं तथा कृपयाविष्ट मश्रुपूर्णाकुलेक्षणं ।
विषीदंतमिदं वाक्य मुवाच मधुसूदनः ॥ १ ॥

**तथा-तेनप्रकारेण। कृपया-दयया। आविष्टं - व्याप्तम्। अश्रुपूर्णाकुलेक्षणम् - अश्रुभिर्बाष्पैः,पूर्णे - समग्ने, आकुले-चंचले, ईक्षणे-नेत्रे, यस्यतं- तथोक्तं। विषीदन्तं- शोचन्तम् अर्जुनं प्रति। मधुसूदनः-कृष्णः। इदं-वक्ष्य माणवाक्यं। उवाच ॥ १ ॥ ... ... ...**

श्रीभगवानुवाच ॥

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २ ॥

**हेअर्जुन। अनार्यजुष्टम् - अनार्यैरविद्वद्भिः, जुष्टम् - सेवितम्। अस्व र्ग्यं - परलोकविरोधि। अकीर्तिकरं - अयशस्करम्। इदं कश्मलं - शोकः**

विषमे-सङ्कटे। कुतः - कस्माद्धेतोः । त्वां- भवंतम् । समुपस्थितं- प्राप्तम्॥

क्लैब्यं मा स्म गमः पार्थनैतत्त्वय्युपपद्यते ।

क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥ ३ ॥

हेपार्थ । क्लैब्यम् - दैन्यम् । मास्मगमः- नप्राप्नुहि । त्वय्येतत्- क्लैब्यम्। नोपपद्यते- नयुज्यते । अतः । हेपरन्तप- शत्रुतापकर । क्षुद्रम्-तुछं। हृदय दौर्बल्यं- मनोदैन्यम् । त्यक्त्वा- विहाय। उत्तिष्ठ ॥ ... ...

अर्जुनउवाच ॥

कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ।

इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ ४ ॥

हेअरिसूदन- आश्रितशत्रुनिरासक । मधुसूदन- हेकृष्ण। अहं । संख्ये- युद्धे। पूजार्हौ-पुष्पादिभिः,पूजनीयौ । भीष्मम्,द्रोणञ्च-पितामहमाचार्यञ्चप्रति इषुभिः- बाणैः । कथम् योत्स्यामि- कथं युद्धम् करिष्यामि ॥४॥ ...

गुरूनहत्वाहि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके ।

हत्वाऽर्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान् रुधिरप्रदिग्धान् ॥ ५ ॥

महानुभावान् । गुरून्- भीष्मद्रोणादीन् । अहत्वा-अनिहत्य । इहैव- लोके भैक्ष्यं- भिक्षान्नम् । भोक्तुमपि । श्रेयोहि-उचितंहि । अर्थकामान् - अर्थकांक्षिणः । गुरून् । हत्वा । रुधिरप्रदिग्धान्- रक्तोपसिक्तान् । भोगान्- भुज्यमानान् - पदार्थान् । इहैव- तदुपदिष्टस्थानएवास्थित्वा। कथंभुञ्जीय - अनुभवेयम् ॥५॥ ... ... ... ...

न चैतद्विद्मः कतरन्नो गरीयोयद्वा जयेम यदि वा नो जयेयुः ।

यानेव हत्वा नजिजीविषामस्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥ ६ ॥

वयं। यद्वाजयेम-तान् वाजेष्यामः । नः-अस्मान्। यदिवाजयेयुः-तेवाजेष्यंति । अनयोर्मध्ये । नः-अस्माकं। कतरत् - किंवा। गरीयः-श्रेष्टं। एतन्नविद्मः नजानीमः । वयं। यानेवहत्वा। नजिजीविषामः - जिवितुं नेछामः । ते-धार्तराष्ट्रा एव । प्रमुखे -पुरतः । अवस्थिताः - युद्धार्थमुपस्थिताः ॥ ६ ॥

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वा धर्मसंमूढचेताः ।

यच्छ्रेयःस्यान्निश्चितंब्रूहितन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥ ७ ॥

कार्पण्यदोषोपहतस्वभावः – कार्पण्येन - स्वजनं कथम् हनिष्यामीति

**मनोदैन्येन, दोषेण- कुलक्षयकृतेनच, उपहतः - अभिभूतः, स्वभावोधै र्यादिर्यस्यतथोक्तः । धर्मसम्मूढचेताः- धर्मसंदिग्धमानसस्सन् । त्वां- भव न्तम् । पृच्छामि। यत् निश्चितंश्रेयस्स्यात् । तत् । मे- मह्यम् । ब्रूहि- वद् । अ हं । ते- तव । शिष्यः- शासनार्हः । त्वां । प्रपन्नम्-शरणागतम् । मां । शा धि- शिक्षय ॥ ७ ॥** ... ... ...

न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिंद्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् ॥ ८ ॥

**इन्द्रियाणां - चक्षुरादीनां । उच्छोषणम्- अत्यन्तशोषकरम् । मम । शोकम् । यत्कर्म । अपनुद्यात्- निवर्तयेत् । तत्कर्म । अहं । भूमौ । अ सपत्नम्-निष्कण्टकम् । ऋद्धम्-समृद्धम् । राज्यम्। सुराणां-देवानां आधि पत्यं - इन्द्रत्वमपि । अवाप्य-लब्ध्वा । नप्रपश्यामि ॥ ८ ॥**

सञ्जय उवाच ॥

एवमुक्त्वाहृषीकेशं गुडाकेशः परंतप ।
न योत्स्य इति गोविंदमुक्त्वातूष्णीं बभूव ह ॥ ९ ॥

**परन्तपः । गुडाकेशः-अर्जुनः । हृषीकेशम्- श्रीकृष्णंप्रति । एवमुक्त्वा । अहं । नयोत्स्ये- युद्धंनकरिष्यामीति । गोविंदंप्रत्युक्त्वा । तूष्णींबभूव- निर्व्यापारोभूत । ह-आश्चर्यं ॥ ९ ॥** ... ... ...

तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदंतमिदं वचः ॥ १० ॥

**हेभारत । श्रीहृषीकेशः । प्रहसन्निव । उभयोस्सेनयोर्मध्ये । विषीदन्त मर्जुनंप्रति । इदम्-वक्ष्यमाणं । वचः- वाक्यम् । उवाच ॥ १० ॥**

श्रीभगवानुवाच ॥

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचंति पंडिताः ॥ ११ ॥

**हेअर्जुन । त्वं। अशोच्यान् - शोचितुमनर्हान् बन्धून्प्रति । अन्वशोचः- शोचितवानसि। प्रज्ञावादांश्च-देहातिरिक्तात्मज्ञानवादांश्च । भाषसे। देहातिरि क्तात्मज्ञानवतामत्रनकिंचिदपिशोकनिमित्तमस्ति । गतासून्- नश्वरान् दे हान् । अगतासून् - नित्यानात्मनश्चप्रति । पण्डिताः - ज्ञानिनः । नानु**

**शोचन्ति- शोकन्नकुर्वन्ति ॥ ११ ॥**

न त्वेवाहंजातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतःपरम् ॥ १२ ॥

**अहं । जातु-कदाचिदपिपूर्वं । नासमितिन- नाभूवमितिन, किंत्वासमेव । त्वं । जातुनासीरितिन, किंत्वासीरेव । इमे । जनाधिपाः - राजानः । जातुनासन्नितिन, किंत्वासन्नेव । सर्वेवयम्- अहंच, त्वंच इमेच । अतः परम्- आगामिनिकालेच । जातुनभविष्यामइतिनैव, किंतुभविष्यामएव । यथाअहन्नित्यस्तथासर्वेप्यात्मानोनित्याएव ॥ १२ ॥**

देहिनोऽस्मिम् यथा देहे कौमारं यौवनं जरा ।
तथा देहांतरप्राप्तिर्धीरस्तत्र न मुह्यति ॥ १३ ॥

**देहेदेहिनः- शरीरेवर्तमानस्यात्मनः । कौमारम् - बाल्यम् । यौवनं, जरा - वार्द्धकंच । यथा । भवति । तथा - तेनप्रकारेण । देहान्तरप्राप्तिः पूर्वदेहंविहायान्यदेहप्राप्तिश्चभवति । तत्र - तस्मिन्नर्थे । धीरः - बुद्धिमान् । नमुह्यति - नशोचति ॥ १३ ॥ ... ... ...**

मात्रा स्पर्शास्तुकौंतेय शीतोष्णसुखदुःखदाः ।
अगामापायिनोनित्यास्तांस्तितिक्षस्व भारत ॥ १४ ॥

**हेकौंतेय - अर्जुन । मात्रास्पर्शाः - मात्राणां, स्पर्शाः-अनुभवाः । शीतोष्णसुखदुःखदाः - शीतोष्णादिरूपसुखदुःखप्रदाः । आगमापायिनः - उत्पत्तिविनाशवन्तः । अतएव, अनित्याः । हेभरतकुलाग्रगण्य । तान्- तितिक्षस्व । कर्मकृतशरीरिणो, जीवस्य - सुखदुःखयोरवर्जनीयत्वादित्यर्थः ॥ १४ ॥ ... ... ... ...**

यं हि न व्यथयंत्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥ १५ ॥

**हेपुरुषर्षभ । एते – मात्रास्पर्शाः । समदुःखसुखं - दुःखसुखयोरवि कृतचित्तं । धीरं - धैर्यवन्तं । यं पुरुषं । नव्यथयन्ति - नपीडयन्ति । सः अमृतत्वाय - मोक्षाय । कल्पते - समर्थोभवतिहि ॥ १५ ॥ ...**

नासतो विद्यते भावोनाभावो विद्यते सतः ।
उभयोरपि दृष्टोंतस्त्वनयोस्तत्वदर्शिभिः ॥ १६ ॥

**असतोदेहस्य। भावः - सत्त्वं। नविद्यते। सतश्चात्मनोऽ भावः - असत्त्वं। नविद्यते। अनयोरुभयोर्देहात्मनोः। अन्तः - सत्त्वासत्त्वनिर्णयस्तु। तत्त्वदर्शिभिः - तत्त्वज्ञैः। दृष्टः ॥ ... ... ...**

अविनाशि तु तद्विद्धियेन सर्वमिदं ततम्।

विनाशमव्ययस्यास्य नकश्चित् कर्तुमर्हति ॥ १७ ॥

**तत् - आत्मवस्तु। अविनाशि विनाशरहितं। विद्धि। येनात्मवस्तुना। इदंसर्वमचेतनजातं। ततं – अतिसूक्ष्मतया अन्तरनुप्रविष्टं। अव्ययस्य– अतिसूक्ष्मतया विनाशरहितस्य। अस्य – आत्मनः। कश्चिदपि। विनाशंकर्तुंनार्हति - समर्थोनभवति ॥ ... ... ...**

अंतवंत इमे देहानित्यस्योक्ताः शरीरिणः।

अनाशिनोऽप्रमेयस्यतस्माद्युद्धयस्व भारत ॥ १८ ॥

**अन्तवन्तः - विनाशवन्तः। इमे परिदृश्यमानदेहाः। नित्यस्य - उत्पत्तिरहितस्य। अनाशिनः – नाशरहितस्य। अप्रमेयस्य – प्रमेयविलक्षणस्य। उक्ताः – कर्मकृतभोगार्थतया शास्त्रैः प्रतिपादिताः। तस्मात्कारणात्। हेभारत। युद्धयस्व – युद्धंकुरु ॥ १८ ॥ ...**

य एनं वेत्ति हन्तारंयश्चैनं मन्यते हतम्।

उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥ १९ ॥

**यः। एनमात्मानं। हन्तारं – अन्यहननकर्तारं। हतं – हननकर्मीभूतं। मन्यते – जानाति। तावुभावपि - नविजानीतः। अयमात्मा - नहन्ति। तथानहन्यते – केनापिपदार्थेननहिंस्यते ॥ १९ ॥ ... ...**

नजायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।

अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥ २० ॥

**अयमात्मा। कदाचिदपि। नजायते - नोत्पद्यते। नम्रियतेवा - ननश्यतिच। अयं। नित्यः - विनाशाभाववान्। अत्रच - नैमित्तिकोत्पत्तिविनाशाभावउच्यते। अयमात्मा भूत्वा – कल्पादावुत्पद्य। भूयः – कल्पान्ते। नभविता – भविष्यमाणोन। अतः। अयं। अजः - उत्पत्तिरहितः। नित्यः नाशरहितः। शाश्वतः - परिणामरहितः। पुराणः–सततैकरूपः। शरीरे हन्यमानेसति नहन्यते ॥ २० ॥ ... ... ...**

वेदाविनाशिनं नित्यं य एनमजमव्ययम्।
कथं स पुरुषः पार्थ कं घातयति हंति कम् ॥ २१ ॥

यः। एनमात्मानं। अविनाशिनं। अजं-उत्पत्तिरहितं। अव्ययं-अनाशयोग्यं। नित्यंच। वेद-जानाति। हेपार्थ। सपुरुषः। कमात्मान कथंघातयति। कमात्मानंकथं हन्ति-स्वयंहिनास्ति ॥ २१ ॥ ... ... ...

वासांसि जीर्णानि यथा विहाय नवानिगृह्णाति नरो पराणि।
तथा शरीराणि विहायजीर्णा न्यन्यानि संयाति नवानि देही ॥ २२ ॥

नरः- मनुष्यः। यथा जीर्णनि वासांसि विहाय। अपराणि नवानि- मनोहराणि। वासांसि - वस्त्राणि। गृह्णाति-स्वीकरोति। तथा। देही-आत्मा। जीर्णानि - धर्मयुद्धादिनाशिथिलानि। शरीराणि। विहाय। अन्यानि-इतराणि। नवानि त्यक्तशरीरादपि रमणीयानि। संयाति - सम्यक्-अनायासं प्राप्नोति ॥ २२ ॥ ... ... ...

नैनं छिंदंति शस्त्राणिनैनं दहति पावकः।
न चैनं क्लेदयंत्यापो न शोषयति मारुतः ॥ २३ ॥

शस्त्राणि - खड्गादीनि। एनमात्मानं। नछिन्दन्ति - नखण्डयन्ति। पावकोऽग्निः। एनं। नदहति, नभस्मीकरोति। आपः – जलानि। एनं। नक्लेदयन्ति - नशिथिलीकुर्वन्ति। मारुतः - वायुः। एनं। नशोषयति - नशुष्कं करोति ॥२३॥

अच्छेद्योयमदाह्यो य मक्लेद्यो शोष्य एव च।
नित्यःसर्वगतःस्थाणु रचलो यं सनातनः ॥ २४ ॥

अयमात्मा। अछेद्यः - छेदनानर्हः। अदाह्यः - दाहनानर्हः। अक्लेद्यः - शिथिलीकरणानर्हः। एवं कुतइत्युक्ते। सर्वगतः - समस्तमचिद्वस्तुजातं सूक्ष्मतयान्तरनुप्रविश्यस्थितः। अतोयन्नित्यः। स्थाणुः-स्थिरस्वभावः। अचलः - अकम्पः। सनातनः - पुरातनश्च ॥ २४ ॥

अव्यक्तोयमचिंत्योय मविकार्यो यमुच्यते।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ २५ ॥

अयमात्मा। अव्यक्तः–चक्षुराद्यगोचरः। अयं। अचिन्त्यः-मनसोप्यविषयः। अयमविकार्यः विकारयितुमशक्यः। उच्यते - शास्त्रेषुप्रतिपाद्यते। तस्मादेनमात्मानं। एवं। विदित्वा-ज्ञात्वा। अनुशोचितुं। नार्हसि ॥ २५ ॥

अथचैनं नित्यजातं नित्यंवा मन्यसेमृतम् ।
तथापि त्वं महाबाहो नैनं शोचितुमर्हसि ॥ २६ ॥

**अथच - अथवा । एनं - आत्मानम् । नित्यजातं, नित्यं मृतंवा । मन्यसे - जानासि । तथापि । हेमहाबाहो । त्वं अनेन प्रकारेण शोचितुं नार्हसि ॥२६॥ ... ... ... ...**

जातस्यहि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्यच ।
तस्मादपरिहार्येऽर्थे नत्वं शोचितुमर्हसि ॥ २७ ॥

**जातस्य । मृत्युः - विनाशः । ध्रुवः - अवर्जनीयः । मृतस्य जन्म । ध्रुवं- अवर्जनीयंहि । तस्मात् । अपरिहार्ये - परिहर्तुमशक्ये । अर्थे । त्वं । शोचितुं नार्हसि ॥२७॥ ... ... ... ...**

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २८ ॥

**हेभारत । भूतानि - देवमनुष्यादिशरीराणि । अव्यक्तादीनि - अनुपलब्धपूर्वावस्थानि । व्यक्तमध्यानि - उपलब्धमध्यावस्थानि । अव्यक्तनिधनानि - अनुपलब्धोत्तरावस्थान्येव । तत्र - जन्म मरणादि रूप तत्स्वभावे । परिदेवना - शोकः । का ॥२८॥ ... ... ...**

आश्चर्यवत्पश्यतिकश्चिदेन माश्चर्यवद्वदति तथैवचान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेदनचैवकश्चित् ॥ २९ ॥

**आश्चर्यवत् - समस्तवस्तुविलक्षणतया अत्यद्भुतवत् । अवस्थितम् । एनमात्मानं । कश्चिदेव - सुकृती । पश्यति । तथा । आश्चर्यवत् । एनमन्यः कश्चिदेव वदति । आश्चर्यवत् एनमन्यः कश्चिदेवशृणोतिच । कश्चित् । एनं - आत्मानं । श्रुत्वापिच । नवेद - नजानात्येव ॥ २९ ॥ ...**

देहीनित्यमवध्योऽयं देहेसर्वस्यभारत ।
तस्मात्सर्वाणिभूतानि नत्वंशोचितुमर्हसि ॥ ३० ॥

**सर्वस्य - देवमनुष्यादेः । देहे वर्तमानोऽयं, देही - आत्मा । नित्यं सर्वदा । अवध्यः - वधानर्हः । तस्मात् । हेभारत । सर्वाणि - भूतानिप्रति । शोचितुं । नार्हसि ॥३०॥ ... ... ...**

स्वधर्ममपिचावेक्ष्य नविकंपितुमर्हसि ।

धर्म्याद्धि युद्धाच्छ्रेयोन्यत्क्षत्रियस्य नविद्यते ॥ ३१ ॥

किञ्च । स्वधर्मं - क्षत्रियधर्मं । अवेक्ष्यापि । विकंपितुं नार्हसि । हि - यस्मात् कारणात् । क्षत्रियस्य । धर्म्यात् - न्यायतः प्रवृत्तात् । युद्धात् । अन्यत् । श्रेयोनविद्यते ॥३१॥ ... ... ...

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।

सुखिनः क्षत्रियाः पार्थ लभन्तेयुद्धमीदृशम ॥ ३२ ॥

किञ्च । हेपार्थ । यदृच्छया-स्वयमेव । उपपन्नं - प्राप्तं । अपावृतं- आवरणरहितं । स्वर्गद्वारं - स्वर्गसाधनभूतम् । ईदृशं युद्धं । सुखिनः - भाग्यवन्तः । क्षत्रियाः । लभन्ते - प्राप्नुवन्ति ॥३२॥ ... ...

अथचेत्त्वमिमं धर्म्यं संग्रामं नकरिष्यसि ।

ततः स्वधर्मं कीर्तिंच हित्वा पापमवाप्स्यसि ॥ ३३ ॥

अथ - अथवा । त्वं । धर्म्यं - न्याय्यं । इमं । संग्रामं न करिष्यसिचेत् । ततः - तस्मात् । स्वधर्मं - क्षत्रियधर्मं । कीर्तिं - यशश्च । हित्वा - विहाय । पापं - दुरितं । अवाप्स्यसि ॥ ३३ ॥

अकीर्तिंचापिभूतानि कथयिष्यन्तिते व्ययां ।

संभावितस्यचाकीर्तिः मरणादतिरिच्यते ॥ ३४ ॥

भयाद्रणाद्दुपरतं मंस्यन्तेत्वां महारथाः ।

येषांचत्वंबहुमतो भूत्वा यास्यसि लाघवम् ॥ ३५ ॥

किंच । भूतानि - सर्वप्राणिनः । ते - तव । अव्ययां - सर्वदेशकालव्यापिनीं । अकीर्तिमपि । कथयिष्यंति । संभावितस्य - शौर्यादिभिः बहुमतस्य । अकीर्तिः - अपकीर्तिः । मरणात् । अतिरिच्यते - अधिकाभवति । महारथाः - कर्णादयः । त्वां । भयाद्धेतोः । रणात् - युद्धात् । उपरतं - निवृत्तव्यापारं । मंस्यंते - मन्येरन् । त्वं । येषां - कर्णादीनां । बहुमतः - बहुमानविषयोभूत्वा अतिष्ठः । इदानीं । लाघवं - लघुत्वं । यास्यसि - गमिष्यसि ॥ ३४ ॥ ३५ ॥ ... ... ...

अवाच्यवादांश्चबहून् वदिष्यन्ति तवाहिताः ।

निन्दन्तस्तवसामर्थ्यं ततोदुःखतरंनुकिम् ॥ ३६ ॥

तव । अहिताः - शत्रवः । तव । सामर्थ्यं । निंदंतः - गर्हमाणाःसंतः । बहून् - अपरिमितान् । अवाच्यवादान् - वक्तुमनुचितवाक्यानि । वदिष्यंति । ततः - तस्मादपि । दुःखतरंनु । किं - किमस्ति ॥ ३६ ॥

हतोवाप्राप्स्यसिस्वर्गं जित्वावाभोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥ ३७ ॥

हतोवा - धर्मयुद्धे शत्रुभिर्हतश्चेत् । स्वर्गमवाप्स्यसि । जित्वा - परान् विजित्यतु । महीं । भोक्ष्यसे - अनुभविष्यसि । तस्मात् । कौंतेय । कृतनिश्चयस्सन् । युद्धायोत्तिष्ठ ॥ ३७ ॥ ... ...

सुखदुःखेसमेकृत्वा लाभालाभौ जयाजयौ ।
ततोयुद्धाययुज्यस्व नैवंपापमवाप्स्यसि ॥ ३८ ॥

सुखदुःखे - हर्षविषादौ । समे कृत्वा । लाभालाभौ जयाजयौच समौ कृत्वा । ततः - तदनंतरं । युद्धाय । युज्यस्व - सन्नद्धोभव । एवं -सति । पापं नावाप्स्यसि ॥ ३८ ॥ ... ... ...

एषातेभिहिता सांख्ये बुद्धिर्योगेत्विमां शृणु ।
बुद्ध्यायुक्तो ययापार्थ कर्मबन्धं प्रहास्यसि ॥ ३९ ॥

एवमात्मयाथात्म्य ज्ञानमुपदिश्य तत्पूर्वककर्मयोगं वक्तुमुपक्रमते ।– हेपार्थ । संख्या – ज्ञानं, तस्य इदं – सांख्यं, तस्मिन्सांख्ये - ज्ञातव्यात्मतत्वविषये । एषा - पूर्वोक्ता । बुद्धिः - ज्ञानं । ते - तव । अभिहिता-कथिता । योगे - आत्मज्ञानपूर्वक मोक्षसाधन कर्मयोगविषये । इमां– अभिधीयमानां । बुद्धिं । शृणु । यया - कर्मयोगबुद्ध्या । युक्तस्त्वं । कर्मबंधं – कर्मकृतसंसारसंबंधं । प्रहास्यसि - त्यक्ष्यसि ॥ ३९ ॥

नेहाभिक्रमनाशोस्ति प्रत्यवायो नविद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतोभयात् ॥ ४० ॥

इह - वक्ष्यमाणे कर्मयोगे । अभिक्रमनाशः - अभिक्रमस्य - आरंभमात्रस्यापि, नाशः - निष्फलत्वम् । नास्ति । विच्छेदे, प्रत्यवायो नविद्यते । अस्य -कर्मयोगाख्यस्य । धर्मस्य । स्वल्पमपि - स्वल्पांशोपि । मह

तः - अधिकात्। भयात्। त्रायते - रक्षते ॥४०॥ ... ...

व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन।
बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनाम् ॥ ४१ ॥

हेकुरुनन्दन - अर्जुन। इह - कर्मयोगविषये। व्यवसायात्मिका - आत्मस्वरूपनिश्चयरूपा। बुद्धिः। एका – मोक्षरूपैकफलविषयत्वादेकविधा। अव्यवसायिनां - आत्मस्वरूपनिश्चयरहितानां। बुद्धयः। अनन्ताः- स्वर्गादिरूपप्रधानफलानंत्यात बहुविधाः। बहुशाखाः - अवान्तरफलभेदात् बहुप्रकाराश्च। अतः काम्यकर्मापेक्षया मोक्षसाधनभूतकर्मयोगो ज्यायानिति भावः ॥४१॥ ... ... ...

यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः॥ ४२ ॥
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदां।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४३ ॥

अथ काम्यकर्माणि निन्दति "यामिमा" मित्यादि श्लोकत्रयेण। हेपार्थ। वेदवादरताः - स्वर्गादिफलविषयक वेदवादासक्ताः। कामात्मानः - कामपुरुषार्थविषयक मनसः। स्वर्गपराः - स्वर्गपरायणाः। नान्यदस्तीति वादिनः - अन्यत् - स्वर्गादधिकं फलं, नास्तीति वादिनः। अविपश्चितः - अल्पज्ञानाः। भोगैश्वर्यगतिं प्रति–स्वर्गानुभवाद्यैश्वर्यप्राप्तिं प्रति। पुष्पितां - पुष्पितमात्रां। आपातरमणीयामित्यर्थः। जन्मकर्मफलप्रदां - स्वर्गादिफलावसाने पुनःपुनःकर्मभूमौ जन्मरूपकर्मफलप्रदां। क्रियाविशेषबहुलां - कर्मविशेषप्रचुरां। यामिमां। वाचं - स्वर्गादिफलश्रुतिं। प्रवदन्ति - प्रकर्षेण वदन्ति ॥ ४२ ॥ ४३ ॥ ... ...

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसां।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥ ४४ ॥

तया - वाचा। अपहृतचेतसां - अभिभूतमनसां। भोगैश्वर्यप्रसक्तानां - स्वर्गाद्यनुभवैश्वर्यप्रवणानां। समाधौ - मनसि। व्यवसायात्मिका बुद्धिः। नविधीयते - नोपपद्यते ॥४४॥ ... ... ...

त्रैगुण्यविषया वेदानिस्त्रैगुण्यो भवार्जुन ।
निर्द्वंद्वो नित्यसत्वस्थो निर्योगक्षेम आत्मवान् ॥ ४५ ॥

**वेदाः । त्रैगुण्यविषयाः - सत्वरजस्तमोमिश्रपुरुषविषयाः । तत्तद्गुणानुगुणहितप्रतिपादकाइत्यर्थः । हेअर्जुन । त्वन्तु । निस्त्रैगुण्यः - गुणत्रय सांकर्यरहितः । भव । निर्द्वंद्वः - शीतोष्णादिद्वंद्वरहितः । भव - तत्त्व हस्वेत्यर्थः । नित्यसत्वस्थः - नित्यप्रवृद्धसत्वगुणप्रधानः । निर्योगक्षेमः अप्राप्तस्वीकार प्राप्तपरिपालनरूप योगक्षेमरहितः । आत्मवान् - आत्म स्वरूपान्वेषणपरश्च । भव ॥ ४५ ॥ ... ... ...**

यावानर्थ उदपाने सर्वतःसंप्लुतोदके ।
तावान् सर्वेषु वेदेषु ब्राह्मणस्यविजानतः ॥ ४६ ॥

**यथा । सर्वतः - समंतात् । संप्लुतोदके - संपूर्णजले । उदपाने- तटाकादौ । पिपासोः । यावानर्थः - यावदेवप्रयोजनंजलं ग्राह्यंभवति । तथा । सर्वेषु वेदेषु । विजानतः- ज्ञानिनः । ब्राह्मणस्य । यावानर्थस्तावानेवग्राह्यः ॥ ४६ ॥ ... ... ... ...**

कर्मण्येवाधिकारस्ते मा फलेषुकदाचन ।
माकर्मफलहेतुर्भूर्माते संगोऽस्त्वकर्मणि ॥ ४७ ॥

**ते - तव मुमुक्षोः । कर्मण्येव - नित्यनैमित्तिकादिरूपकर्मस्वरूपएव । अधिकारः । फलेषु - तत्साध्येषु । कदाचन । मा-अधिकारोमाभूदित्यर्थः । कर्मफलहेतुः - कर्मच फलंच कर्मफले तयोर्हेतुः - कर्ता । माभूः । अकर्मणि - अननुष्ठानेच । ते - तव । संगः - कामः । मास्तु ॥ ४७ ॥ ... ... ... ...**

योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योगउच्यते ॥ ४८ ॥

**हेधनंजय । संगं- आसक्तिं । त्यक्त्वा । सिद्ध्यसिद्ध्योः - प्राप्त्यप्राप्त्योः । समोभूत्वा । योगस्थः - योगनिष्ठःसन् । कर्माणि - नित्यनैमित्तिकादीनि । कुरु । समत्वं - सिद्ध्यसिद्ध्योरविकृतचित्तत्वं । योग इत्युच्यते ॥ ४८ ॥ ... ... ... ...**

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥ ४९ ॥

हे धनंजय । बुद्धियोगात् - बुद्ध्या योगो यस्य तद्बुद्धियोगं तस्माद्बुद्धियोगात् – बुद्धिर्नाम प्रधानफलत्यागविषयिणी अवांतरफलसिद्ध्यसिद्धिसमत्वविषयिणीच धीः, तद्युक्तात्कर्मण इत्यर्थः । कर्म - काम्यंकर्म-दूरेणावरं – अत्यन्तनिकृष्टमित्यर्थः । अतः बुद्धौ । शरणं - वासस्थानं । अन्विच्छ - तस्यामेव वर्तस्वेत्यर्थः । फलं हेतुर्येषां ते फलहेतवः - फलप्रसङ्गेन कर्म कुर्वाणाः । कृपणाः - संसारिणोभवेयुरित्यर्थः ॥ ४९॥

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥ ५० ॥

बुद्धियुक्तः - पूर्वोक्तबुद्धिसहितः पुरुषः । इह – अस्मिन्नेव जन्मनि । उभे सुकृतदुष्कृते । जहाति - त्यजति । तस्मात् - कारणात् । योगाय - पूर्वोक्तबुद्धियोगाय । युज्यस्व - यतस्व । योगः । कर्मसु । कौशलं – अतिसामर्थ्यं ॥ ५० ॥ ... ... ...

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबंधविनिर्मुक्ताः पदं गच्छंत्यनामयं ॥ ५१ ॥

मनीषिणः – ज्ञानिनः । बुद्धियुक्ताः - पूर्वोक्तबुद्धिसहिताः संतः । कर्मजं – कर्मसाध्यं । फलं । त्यक्त्वा । जन्मबन्धविनिर्मुक्ताः - जन्मरूपबन्धनेन विमुक्ताः संतः । अनामयं - निरुपद्रवं । पदं – स्थानं । गच्छंति – प्राप्नुवंति ॥ ५१ ॥ ... ... ...

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥ ५२ ॥

यदा - यस्मिन् काले । उक्तप्रकारेण कर्म कुर्वतस्तव । बुद्धिः - चित्तं । मोहकलिलं – मोहरूपकलुषं । व्यतितरिष्यति । तदा । श्रुतस्य, श्रोतव्यस्यचार्थस्य कृते । निर्वेदं – विरागं । गंतासि - गमिष्यसि ॥ ५२ ॥ ... ... ... ...

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।

समाधावचलाबुद्धि स्तदायोगमवाप्स्यसि ॥ ५३ ॥

**श्रुत्या - श्रवणेन, विप्रतिपन्ना- विशेषेण प्रतिपन्ना। अचला - एकरूपा । ते- तव । बुद्धिः। समाधौ- निश्चलासती । यदा।स्थास्यति-स्थिराभविष्यति । तदा । योगं - आत्मावलोकनं । अवाप्स्यसि - प्राप्स्यसि ॥ ५३ ॥ ... ... ...**

अर्जुनउवाच

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किंप्रभाषेत किमासीत व्रजेत किं ॥ ५४ ॥

**हेकेशव । समाधिस्थस्य- पूर्वोक्तप्रकारेण समाधिनिष्ठस्य । स्थितप्रज्ञस्य पुरुषस्य। काभाषा- स्वरूपवाचकः शब्दःकः । स्थितधीः- निश्चलप्रज्ञः । किं प्रभाषेत- किं भाषणं कुर्यात् । किमासीत-किमासनादिकंकुर्यात् । किं व्रजेत - किं गमनं कुर्यात् ॥ ५४ ॥ ...**

श्रीभगवानुवाच ॥

प्रजहाति यदा कामान् सर्वान् पार्थमनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ५५ ॥

**हेपार्थ - आत्मना - मनसा। आत्मन्येव -स्वात्मन्येव। तुष्टः सन्। मनोगतान् सर्वान् कामान् । यदा । प्रजहाति - प्रकर्षेण त्यजति । तदा । स्थितप्रज्ञ इत्युच्यते ॥ ५५ ॥**

दुःखेष्वनुद्विग्नमनाः सुखेषुविगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ ५६ ॥

**दुःखेषु- प्रतिकूलेषु । अनुद्विग्नमनाः - अदुःखितमनस्कः । सुखेषु- अनुकूलेषु । विगतस्पृहः । वीतरागभयक्रोधः - रागभयद्वेषरहितः । एवंभूतोमुनिः - आत्ममननशीलः । स्थितधीरित्युच्यते ॥ ५६ ॥**

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं ।
नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७ ॥

**यः । सर्वत्र - सर्वेष्वपिवस्तुषु । अनभिस्नेहः- स्नेहशून्यः । तत्तत शुभाशुभं प्राप्य। नाभिनन्दति नद्वेष्टि - शुभं न प्रशंसन्ति, अशुभं न नि**

दति । किंतु केवलं उदासीन इव भाषते । तस्य- पुरुषस्य । प्रज्ञा । प्रतिष्ठिता भवति । इदं "किं प्रभाषते" इत्यस्योत्तरम् ॥ ५७ ॥

यदा संहरते चायं कूर्मोंगानीवसर्वशः ।
इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ५८ ॥

यदा । अयं योगी । इन्द्रियाणि- विषयाभिमुखानि चक्षुरादीनि । कूर्मः- कमठः । अङ्गानि- अवयवानीव । सर्वशः- सर्वेभ्यः । इन्द्रियार्थेभ्यः- शब्दादिविषयेभ्यः । संहरते । तदा तस्य प्रज्ञा प्रतिष्ठिता भवति ॥५८॥

विषया विनिवर्तंते निराहारस्यदेहिनः ।
रसवंर्जं रसोप्यस्य परं दृष्ट्वा निवर्तते ॥ ५९ ॥

निराहारस्य- विषयेभ्यो निवर्त्तितेंद्रियस्य । देहिनः- पुरुषस्य । विषयाः- शब्दादयः । रसवर्जं । विनिवर्तंते । रसस्तु न निवर्त्तते । अस्य ज्ञानिनः । रसोपि रागोपि । परं- निरतिशयसुखं आत्मस्वरूपम् । दृष्ट्वा- विलोक्य । निवर्तते ॥ ५९ ॥ ... ...

यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः ।
इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः ॥ ६० ॥

हेकौन्तेय । यततोपि - आत्मावलोकनाय यत्नं कुर्वतोपि । विपश्चितः - ज्ञानिनः । प्रमाथीनि - बलवन्ति । इन्द्रियाणि - चक्षुरादीनि । मनः - चेतः । प्रसभं - बलात्कृत्य । हरन्ति - विषयेषु निबध्नन्ति हि ॥६०॥

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशेहि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥

तानि - दुर्जयानि इन्द्रियाणि । संयम्य - नियम्य । मत्परः - मदेकलक्षः । युक्तः - समत्वरूपयोगनिष्ठः । आसीत - वसेदित्यर्थः । इदं "किमासीते" त्यस्योत्तरम् । यस्य - योगिनः । इन्द्रियाणि । वशे वर्तन्ते । तस्य प्रज्ञाप्रतिष्ठिता भवति ॥ ६१ ॥ ... ... ...

ध्यायतो विषयान् पुंसः संगस्तेषूपजायते ।
संगात्संजायते कामःकामात्क्रोधोऽभिजायते ॥ ६२ ॥
क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।

स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥ ६३ ॥

**विषयान् - शब्दादीन् । ध्यायतः - अनुचिन्तयतः । पुंसः - पुरुषस्य तेषु - विषयेषु । सङ्गः। उपजायते -प्रवृद्धो भवति। संगात्कामः संजायते कामात् क्रोधोऽभिजायते । क्रोधात्, संमोहः - कृत्याकृत्यविवेकशून्यता । भवति । संमोहात् । स्मृतिविभ्रमः - स्मृतेरात्मविषयायाः, विभ्रमोभवति । स्मृतिभ्रंशात् । बुद्धिनाशः - बुद्धेः - व्यवसायात्मिकायाः, नाशो-भवति । बुद्धिनाशाद्धेतोः । प्रणश्यति - पुनरपि संसारसागरे निमग्नोभवतीत्यर्थः ॥ ६२ ॥ ॥ ६३ ॥**

रागद्वेषवियुक्तैस्तु विषयानिंद्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ ६४ ॥

**रागद्वेषवियुक्तैः - रागद्वेषरहितैः । आत्मवश्यैः - आत्माधीनैः । इन्द्रियैः । विषयान् प्रति चरन् । विधेयात्मा - जितमनस्कः पुरुषः । प्रसादं नैर्मल्यम् । अधिगच्छति - प्राप्नोति । इदं " व्रजेत किं " मित्यस्योत्तरम् ॥ ६४ ॥**

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिःपर्यवतिष्ठति ॥ ६५ ॥

**प्रसादेसति । अस्य - पुरुषस्य । सर्वदुःखानां । हानिः -नाशः । उपजायते । प्रसन्नचेतसः - निर्मलान्तःकरणस्य । आशु - शीघ्रं । बुद्धिः- प्रज्ञा । पर्यवतिष्ठते - प्रतिष्ठिताभवति ॥ ६५ ॥**

नास्तिबुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शांतिरशांतस्य कुतः सुखं ॥ ६६ ॥

**अयुक्तस्य – मय्यनिवेशितचित्तस्य । बुद्धिः – प्रज्ञा । नास्ति । अतएवायुक्तस्य । भावना – विविक्तात्मविषयकचिंता । नास्ति । अभावयतः - आत्मानमचिंतयतः । शांतिः – स्पृहानिवृत्तिः । नास्ति । अशांतस्य । सुखं - निरतिशयसुखप्राप्तिः । कुतः ॥ ६६ ॥ ... ...**

इंद्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि ॥ ६७ ॥

**चरतां - अनिग्रहेण विषयेषु संचरतां । इन्द्रियाणां - चक्षुरादीनां ।**

**यन्मनः। अनुविधीयते- तदनुसारिक्रियते। तन्मनः। अस्य- पुरुषस्य प्रज्ञां- बुद्धिं। वायुः-प्रतिकूलवातः। अंभसा नीयमानां नावमिव हरति॥ ६७॥ ... ...**

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः।
इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥ ६८॥

**तस्मात् कारणात्। हेमहाबाहो। यस्य- पुरुषस्य। सर्वशः - सर्वाणि। इंद्रियाणि। इन्द्रियार्थेभ्यः- विषयेभ्यः। निगृहीतानि। तस्य प्रज्ञा प्रतिष्ठिता भवति॥ ६८॥ ... ...**

यानिशा सर्वभूतानां तस्यां जागर्ति संयमी।
यस्यांजाग्रति भूतानि सा निशा पश्यतो मुनेः॥ ६९॥

**या- आत्मविषया बुद्धिः। सर्वभूतानां। निशा- रात्रिः,निशेवाप्रकाशाभवति। तस्यां- बुद्धौ। संयमी- योगी। जागर्ति- आत्मानमवलोकयन् प्रबुद्धो वर्तते। यस्यां- शब्दादिविषयायां बुद्धौ। सर्वाणिभूतानि। जाग्रति-प्रबुद्धानि भवन्ति। सा-शब्दादिविषया बुद्धिः। पश्यतः-आत्मानमवलोकयतः। मुनेः - मननशीलस्य। निशा - रात्रिः, निशेवाप्रकाशाभवति॥ ६९॥**

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशंतियद्वत्।
तद्वत्कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न कामकामी॥ ७०॥

**यद्वत्-यथा। आपूर्यमाणं- स्वैनैव पूर्णं।अचलप्रतिष्ठं -एकरूपस्थितिं। समुद्रं। आपः-नदीजलानि। प्रविशंति। तद्वत्-तथा। सर्वे, कामाः- शब्दादिविषयाः। यं संयमिनं प्रविशंति-यदिन्द्रियगोचरतां गच्छंति। सएव। शांतिं-स्पृहानिवृत्तिं। आप्नोति। कामकामी शब्दादिभिर्विकृतचित्तः पुरुषः। शांतिं। नाप्नोति। यस्यावर्जनीयविषयस्पर्शः- समुद्रस्य नदीजलप्रवेश इव नकिंचिदपि विकारमावहति, स एव शांतिमान् भवति नान्य इति भावः॥ ७०॥**

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः।
निर्ममो निरहंकारः स शांतिमधिगच्छति॥ ७१॥

**यःपुमान्। सर्वान् कामान् विहाय। निःस्पृहः-तेषु स्पृहारहितः। नि**

**ममः-ममतारहितः । निरहंकारः-अहंकाररहितः । चरति- स्वच्छन्दम् संचरति । सहि । शांतिम् । अधिगच्छति – प्राप्नोति ॥ ७१ ॥**

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामंतकालेऽपि ब्रह्म निर्वाणमृच्छति ॥ ७२ ॥

इतिश्रीभगवद्गीतायां द्वितीयोऽध्यायः ॥ २ ॥

**हेपार्थ । एषा- आत्मज्ञानपूर्विका । ब्राह्मी- ब्रह्मप्रापिका । स्थितिः- ज्ञाननिष्ठा । एनां - स्थितिम् । प्राप्य–लब्ध्वा । पुमान् । नमुह्यति–पुनः संसारं नाप्नोति । अस्यां- निष्ठायां । अन्तकाले- प्रयाणकालेपि । स्थित्वा । निर्वाणं- सुखरूपं ब्रह्म । ऋच्छति– प्राप्नोति ॥ ७२ ॥**

**इति श्रीमद्यामुनाचार्य विरचिते गीतार्थसंग्रहे सांख्ययोगोनाम द्वितीयोऽध्यायः ॥ २ ॥**

श्रीः ।

## ॥ तृतीयोध्यायः ॥

अर्जुनउवाच ।

ज्यायसीचेत्कर्मणस्ते मताबुद्धिर्जनार्दन ।
तत्किंकर्मणि घोरेमां नियोजयसिं केशव ॥ १ ॥

**हेजनार्दन । कर्मणः - कर्मापेक्षया । बुद्धिः - ज्ञाननिष्ठा । ज्यायसी - श्रेष्ठा । ते-तव । मता-संमता चेत । तर्हि । केशव । घोरे भयंकरे।कर्मणि-युद्धादिरूपे । मां । किं नियोजयसि - किमर्थं प्रवर्तयसि ॥ १ ॥**

व्यामिश्रेणैव वाक्येन बुद्धिमोहयसीवमे ।
तदेकंवद निश्चित्य येनश्रेयोहमाप्नुयाम् ॥ २ ॥

**हेकृष्ण । व्यामिश्रेण- क्वचिज्ज्ञानप्रशंसा, क्वचित् कर्मप्रशंसाचेत्येवं परस्परविरुद्धेन । वाक्येन । मे - मम । बुद्धिं - मनः । मोहयसीव- भ्रमयन्निव प्रतिभासि । तत् - तस्मात् कारणात् । एकं - परस्पराविरुद्धं । वद । येन - वाक्येन । अहं । निश्चित्य - अनुष्ठेयमर्थं निर्णीय । श्रेयः- परमपुरुषार्थं । आप्नुयां - प्राप्स्यामि ॥ २ ॥**

श्रीभगवानुवाच ।

लोकेस्मिन् द्विविधानिष्ठा पुराप्रोक्तामयानघ ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥ ३ ॥

हेअनघ । अस्मिन् लोके । मया । द्विविधा - द्विप्रकारा । निष्ठा - स्थितिः । पुरा- पूर्वं । प्रोक्ता- प्रकर्षेणाभिहिता, यथाधिकारमुक्तेत्यर्थः । तदेवाह-सांख्यानां - ज्ञानयोगाधिकारिणां । ज्ञानयोगेन । योगिनां - कर्मयोगाधिकारिणां ।कर्मयोगेनच । इति द्विविधा निष्ठा मया प्रोक्ता इति पूर्वेणान्वयः ॥ ३ ॥

नकर्मणामनारंभा न्नैष्कर्म्यं पुरुषोश्नुते ।
नचसंन्यसनादेव सिद्धिंसमधिगच्छति ॥ ४ ॥

पुरुषः । कर्मणां - नित्यनैमित्तिकादीनां । अनारंभात् - अनुपक्रमादेव । नैष्कर्म्यं - ज्ञाननिष्ठां । नाश्नुते - नप्राप्नोति । सन्न्यसनात्- आरब्धानां कर्मणां त्यागमात्रेणैव । सिद्धिं - निष्ठां । नसमधिगच्छतिच ॥ ४ ॥

नहि कश्चित्क्षणमपि जातुतिष्ठत्यकर्मकृत् ।
कार्यतेह्यवशःकर्म सर्वः प्रकृतिजैर्गुणैः ॥ ५ ॥

कश्चित - पुरुषः । जातु - कदाचित् । क्षणमपि । अकर्मकृत् - कर्माकुर्वाणः । नतिष्ठति । हि - यस्मात्कारणात् । सर्वोपि - पुरुषः । प्रकृतिजैः प्रकृतिसंभवैः । गुणैः - सत्वरजस्तमोभिः । अवशः - परवशएव । कर्म । कार्यते ॥ ५ ॥

कर्मेन्द्रियाणि संयम्य यआस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः सउच्यते ॥ ६ ॥

ज्ञानयोगेप्रवृत्तः । कर्मेन्द्रियाणि । संयम्य - निगृह्य । विमूढात्मा- अविदितात्मस्वरूपः । यः। मनसा । इन्द्रियार्थान् - विषयान् । स्मरन् । आस्ते - तिष्ठति । सः । मिथ्याचारइत्युच्यते ॥ ६ ॥

यस्त्विन्द्रियाणि मनसा नियम्यारभते र्जुन ।
कर्मेन्द्रियैः कर्मयोग मसक्तः सविशिष्यते ॥ ७ ॥

हेअर्जुन । यः-पुरुषः । मनसा । इन्द्रियाणि । नियम्य । कर्मेन्द्रियैः-वागा

**दिभिः । असक्तः - फलाभिसन्धिरहितः सन् । कर्मयोगमारभते । सः । विशिष्यते - विशिष्टोभवति ॥ ७ ॥**

नियतं कुरुकर्मत्वं कर्मज्यायोह्यकर्मणः ।
शरीरयात्रापिचते नप्रसिद्ध्येदकर्मणः ॥ ८ ॥

**त्वं । नियतं कर्म – नित्यनैमित्तिकादिकं । कुरु – समाचर । हि– यस्मात् कारणात् । अकर्मणः- ज्ञानयोगादपि । कर्म- फलाभिसन्धिर हितं कर्मैव । ज्यायः–श्रेष्ठं । किंच । अकर्मणः- त्यक्तकर्मणः । ते–त– व । शरीरयात्रापि - ज्ञानसंपादनोपयोगिदेहधारणमपि । नप्रसिद्ध्ये- त्- नसेत्स्यति ॥ ८ ॥ ... ...**

यज्ञार्थात्कर्मणोन्यत्र लोकोयं कर्मबन्धनः ।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥ ९ ॥

**यज्ञार्थात्-यज्ञनिमित्तात।कर्मणः। अन्यत्र-स्वप्रयोजननिमित्तेकर्मणि,क्रिय- माणेसति । अयं- लोकः । कर्मबन्धनः- कर्मबद्धोभवति । अतः । हेकौंते य- । तदर्थं - यज्ञादिशेषभूतं । कर्म । मुक्तसङ्ग स्सन् । स- माचर ॥ ९ ॥ ... ... ...**

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्व मेषवोस्त्विष्टकामधुक् ॥ १० ॥

**प्रजापतिः- परमात्मा । पुरा- सर्गकाले । सहयज्ञाः- यज्ञसहिताः । प्रजाः । सृष्ट्वा । उवाच । किमिति – हेप्रजाः । अनेन - यज्ञेन । प्रस- विष्यध्वं- उत्तरोत्तराभिवृद्धिं लभध्वं । एषः - यज्ञः । वः - युष्माकं इष्टान् कामान्-मनोरथान्, दोग्धि- पूरयतीति, इष्टकामधुक् । अस्तु-भू यात् । इत्युवाचेत्यन्वयः ॥ १० ॥ ... ...**

देवान्भावयतानेन तेदेवाभावयन्तुवः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ ११ ॥

**हेप्रजाः । अनेन- यज्ञेन । देवान्- मदात्मकान् इन्द्रादीन् । भावय त- आराधयत । ते देवाः । युष्मान् । भावयन्तु - वर्धयन्तु । परस्परं– अन्योन्यम् । भावयन्तः । परं श्रेयः– मोक्षं । अवाप्स्यथ ॥ ११ ॥**

इष्टान्भोगान्हिवोदेवा दास्यंते यज्ञभाविताः ।
तै र्दत्ता नप्रदायैभ्यो यो भुङ्क्ते स्तेन एवसः ॥ १२ ॥

यज्ञभाविताः- यज्ञैराराधिताः । देवाः। वः- युष्माकं । इष्टान्भोगान् । दास्यन्ते- वितरिष्यन्ति । तैर्देवैः । दत्तान्- वितीर्णान् । भोगान्- भोग्यपदार्थान् । एभ्यः- देवेभ्यः । अप्रदाय- अदत्त्वा । यः । भुङ्क्ते । सः। स्तेनः- चोरएव ॥ १२ ॥

यज्ञशिष्टाशिनः संतो मुच्यंते सर्व किल्बिषैः ।
भुंजते ते त्वघं पापायेपचंत्यात्मकारणात् ॥ १३ ॥

यज्ञस्य-परमपुरुषाराधनरूपस्य, शिष्टं- शेषभूतं अन्नादिकं, अश्नंतीति यज्ञशिष्टाशिनः । सन्तः-सत्पुरुषाः । सर्वकिल्बिषैः – प्राप्तिप्रतिबंधकैः समस्तदुरितैः । मुच्यन्ते । येतुपुरुषाः । आत्मकारणात्– केवलमात्मार्थं । पचन्ति । ते । पापाः–पापात्मानः । अघं - पापमेव । भुञ्जते ॥ १३ ॥ ... ...

अन्नाद्भवंति भूतानि पर्जन्यादन्नसंभवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ १४ ॥

अन्नात् । भूतानि– देवमनुष्यादिसमस्तभूतानि । भवंति–जायंते । अन्नसंभवः- अन्नस्योत्पत्तिः । पर्जन्याद्भवति । पर्जन्यः । यज्ञाद्भवति । यज्ञः । कर्मसमुद्भवः-द्रव्यार्जनादिरूपकर्मजन्योभवति ॥ १४ ॥

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात्सर्वगतं ब्रह्म नित्यंयज्ञे प्रतिष्ठितम् ॥ १५ ॥

कर्म - द्रव्यार्जनादिकं । ब्रह्मोद्भवं - प्रकृतिपरिणामरूप शरीरसंभवं । विद्धि - जानीहि । ब्रह्म - शरीरं । अक्षरसमुद्भवं - अक्षरोजीवः, तत्समुद्भवं - अन्नपानादिना तृप्ताक्षराधिष्ठितं शरीरंकर्मणे प्रभवति । तस्मात् । सर्वगतं - समस्तपुरुषार्थसाधनाधिकृतं । ब्रह्म - शरीरं । नित्यं -सततं । यज्ञे । प्रतिष्ठितं -यज्ञमूलकमित्यर्थः ॥ १५ ॥

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिंद्रियारामो मोघं पार्थ स जीवति ॥ १६ ॥

**एवं - अनेनप्रकारेण । परमपुरुषेण प्रवर्तितम् । चक्रं । इह - लोके । यः । नानुवर्त्तयति - नप्रवर्तयति । सः । अघायुः - अघस्वरूपायुः । इंद्रियारामः - विषयभोगैकरसिकः सन् । मोघं - व्यर्थमेव । जीवति ॥१६॥**

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च संतुष्टस्तस्य कार्यंनविद्यते ॥ १७ ॥

**यस्तु मानवः - मनुष्यः । आत्मरतिः - आत्मन्येव रति राभिमुख्यं यस्य स तथोक्त एव स्यात । आत्मतृप्तः - आत्मन्येवनिर्वृतः । आत्मन्येव सन्तुष्टः स्यात् । तस्य पुरुस्य । कार्यं - कर्त्तव्यं कर्म । नविद्यते ॥ १७ ॥**

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८ ॥

**तस्य – पुरुषस्य । कृतेन - अनुष्ठितेन कर्मणा । अर्थः- प्रयोजनं । नास्ति । अकृतेन – कर्माकरणेन । कश्चन - कश्चिदर्थोन । इह - लोके । अस्य - पुरुषस्य । सर्वभूतेषु । कश्चित् । अर्थव्यपाश्रयः – अर्थः - प्रयोजनभूतः, व्यपाश्रयः - समाश्रयणीयः । कश्चिदपिपदार्थोनविद्यते ॥ १८ ॥**

तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषम् ॥ १९ ॥

**तस्मात् - कारणात् । असक्तः - सङ्गरहितः सन् । सततं - यावदात्मप्राप्तेः । कार्यं - अवश्यं कर्तव्यम् । कर्म । समाचर । असक्तः कर्माचरन् पुरुषः । परं - परमात्मानं । आप्नोति ॥ १९ ॥**

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि ॥ २० ॥

**जनकादयः – राजर्षयः । कर्मणैव - कर्मयोगेनैव । संसिद्धिं - मोक्षं । आस्थिताः – प्राप्तवन्तः । हीतिप्रसिद्धौ । लोकसंग्रहं - स्वानुष्ठानप्रदर्शनेन सद्धर्मप्रवर्तनं । संपश्यन्नपि । कर्तुमेवार्हसि ॥ २० ॥**

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ २१ ॥

**श्रेष्ठः - प्रसिद्धः पुरुषः। यद्यत्कर्माचरति । इतरः - अकृत्स्नवित । जनः । तत्तदेवाचरति । सः - श्रेष्ठः । यत्प्रमाणं - यावदङ्गयुक्तं । कुरु ते - अनुतिष्ठति । लोकः । तदेव - तावदङ्गयुक्तमेव । अनुवर्तते - अनु तिष्ठति ॥ २१ ॥**

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ २२ ॥

**हे पार्थ । मे - सर्वेश्वरस्य मम । कर्तव्यं - अनुष्ठेयं कर्म । नास्ति । त्रिषु लोकेषु । अनवाप्तं – अप्राप्तं । अवाप्तव्यं – कर्मणाप्राप्तव्यं । किञ्चन-कि ञ्चिदपि । नविद्यते । तथापि । कर्मणि - वर्णाश्रमोचितनित्यनैमित्तिका दौ । वर्तएव - तत्करोम्येवेत्यर्थः ॥ २२ ॥**

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ २३ ॥

**हे पार्थ । अहं- शिष्टाग्रेसरः वसुदेवगृहेऽवतीर्णः । जातु–कदाचित् । अतन्द्रितः- अनलसःसन् । कर्मणि न वर्तेयं यदि । सर्वशः सर्वे । म नुष्याः-कर्माधिकारिणः । मम–श्रेष्ठतमस्य । वर्त्म - मार्गं । अनुवर्त्तन्ते–अयमे व धर्म इत्यनुसरेयुः ॥ २३ ॥**

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहं ।
संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥ २४ ॥

**अहं । कर्म- कुलोचितं । न कुर्यांचेत् । इमे लोकाः । उत्सीदेयुः-शा स्त्रीयकर्माकरणजनितप्रत्यवायेन नष्टा भवेयुः । संकरस्यच । कर्त्ता । स्यां – भवेयम् । अतएव, इमाः प्रजाः । उपहन्यां– निरयगामि नः कुर्यामित्यर्थः ॥ २४ ॥**

सक्ताः कर्मण्यविद्वांसो यथा कुर्वंति भारत ।
कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम् ॥ २५ ॥

**अविद्वांसः– अल्पज्ञाः । कर्मणि सक्ताः संतः । यथा–येन प्रकारे– ण । कुर्वंति । तथा-तेन प्रकारेण । विद्वान्– आत्मविदपि । अस– क्तः- संगरहितः सन् । लोकसंग्रहम् । चिकीर्षुः- कर्तुमिच्छुः । कुर्यात्- कर्मयोगमाचरेत् ॥ २५ ॥ ... ...**

न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥ २६ ॥

**अज्ञानां–आत्मज्ञानरहितानां । कर्मसंगिनां– कर्माधिकारिणां । बुद्धिभेदं । न जनयेत् । किंतु विद्वानपि । युक्तः- अवश्यंकर्तव्यमित्येवं रूपबुद्धियुक्तः । कर्माणि । समाचरन् - सम्यक् आचरन् । जोषयेत् –प्रीतिंजनयेत् ॥ २६ ॥ ... ...**

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ताऽहमिति मन्यते ॥ २७ ॥

**अहंकारविमूढात्मा- अहंकारेण विमूढ आत्मा यस्य स तथोक्तःपुरुषः । प्रकृतेः संबंधिभिः । गुणैः–सत्वरजस्तमोभिः । क्रियमाणानि । सर्वशः– सर्वाणि । कर्माणि प्रति । अहं कर्तेति । मन्यते–भ्रमतीत्यर्थः ॥ २७ ॥ ... ...**

तत्ववित्तु महाबाहो गुणकर्म विभागयोः ।
गुणागुणेषु वर्तंत इति मत्वा न सज्जते ॥ २८ ॥

**हेमहाबाहो । गुणकर्मविभागयोः–गुणाः– सत्वादयः, कर्माणि– तत्प्रयुक्तानि, तेषां विभागौ, तयोः।तत्ववित् – तत्वज्ञस्तु । गुणाः – सत्वादयः । गुणेषु– स्वकार्येषु ।वर्तंते। इति - अनेनप्रकारेण। मत्वा-ज्ञात्वा नसज्जते - सक्तो न भवति ॥ २८ ॥ ... ...**

प्रकृते गुणसंमूढाः सज्जंते गुणकर्मसु ।
तानकृत्स्नविदो मंदान्कृत्स्नविन्न विचालयेत् ॥ २९ ॥

**प्रकृतेः- शरीरस्य । गुणसंमूढाः–गुणैः-सत्वादिभिः, संमूढाः- अविदितात्मस्वरूपाः । गुणकर्मसु- गुणप्रयुक्तकर्मस्वेव । सजन्ते–सक्ताभवन्ति । अतः । अकृत्स्नविदः - अल्पज्ञान् । तान् । मन्दान्-मन्दमतीन् । कृत्स्नवित्-साकल्येन विदितात्मस्वरूपः पुरुषः । नविचालयेत् कर्मयोगात्नच्यावयेत् ॥ २९ ॥ ... ...**

मयि सर्वाणि कर्माणि संन्यस्या ध्यात्मचेतसा ।
निराशी र्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३० ॥

अध्यात्मचेतसा- आत्मैकविषयेण मनसा । सर्वाणि कर्माणि । मयि- सर्वभूतात्मभूते । संन्यस्य- समर्प्य । निराशीः - निष्कामः । निर्ममः- ममतारहितः । भूत्वा । विगतज्वरः- विषयनिमित्तसंसारतापरहितःसन् । युध्यस्व-युद्धंकुरु ॥ ३० ॥ ... ...

ये मे मतमिदं नित्यमनुतिष्ठंति मानवाः ।
श्रद्धावंतोऽनसूयंतो मुच्यंते ते पि कर्मभिः ॥ ३१ ॥

ये-मानवाः । मे - मम । इदं । मतं - सिद्धान्तं । नित्यं । अनुतिष्ठं ति - आचरन्ति । ये । श्रद्धावन्तः - अननुतिष्ठन्तोपि अस्मिन्नर्थे आस्तिक्यबुद्धिमन्तः । येप्यनसूयन्तः - श्रद्धारहिता अपि अस्मिन्नर्थे दोषमनाविष्कुर्वन्तः । तेपि । कर्मभिः - संसारहेतुभिः पुण्यपापरूपैः । मुच्यन्ते- मुक्ताभवन्ति ॥३१ ॥

ये त्वे तदभ्यसूयंतो नानुतिष्ठंति मे मतम् ।
सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः ॥ ३२ ॥

येतुपुरुषाः । एतन्मेमतं- अभिमतमर्थं । नानुतिष्ठन्ति - नकुर्वन्ति । येचाभ्यसूयन्तोवर्तन्ते । तान् । सर्वज्ञानविमूढान् - सर्वेषु ज्ञानेषु विशेषेणमूढान् । अतएवनष्टान् तान् । अचेतसः - ज्ञानाभावादमनस्कान् । विद्धि - जानीहि ॥ ३२ ॥

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यांति भूतानि निग्रहः किं करिष्यति ॥ ३३ ॥

ज्ञानवानपि । स्वस्याः - स्वकीयायाः । प्रकृतेः - प्राचीनवासनायाः । सदृशं - अनुरूपं । चेष्टते - विषयेषुव्याप्नोति । कुतइत्युक्ते । भूतानि - अचित्संसृष्टजन्तवः । प्रकृतिं - प्राचीनवासनामेव । यांति - अनुवर्तन्ते । निग्रहः । किंकरिष्यति - किंकर्तुंसमर्थः ॥ ३३ ॥

इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छे त्तौ ह्यस्य परिपन्थिनौ ॥ ३४ ॥

इन्द्रियस्य - श्रोत्रादिज्ञानेन्द्रियस्य । इन्द्रियस्यच - वागादिकर्मेन्द्रियस्यच । अर्थे - शब्दादिरूपे वचनादिरूपेच्च विषये । रागद्वेषौ - कामक्रोधौ । व्यवस्थितौ - नियतौ । अतः । तयोः - रागद्वेषयोः । वशं - अधी

नतां । नागच्छेत् । हि - यस्मात् कारणात् । रागद्वेषौ । अस्य - ज्ञानिनः । परिपन्थिनौ - प्रतिपक्षौ ॥ ३४ ॥

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५ ॥

स्वधर्मः - कर्मयोगः । विगुणोपि - अङ्गविकलोपि । स्वनुष्ठितात् - सांगमनुष्ठितात् । परधर्मात् - ज्ञानयोगादपि । श्रेयान् - श्रेष्ठः । स्वधर्मे - कर्मयोगे । निधनं - तस्मिन्जन्मनि फलमनवाप्यैव मरणमपि । श्रेयः - श्रेष्ठं । परधर्मः - ज्ञानयोगस्तु । भयावहः - सप्रमादत्वात् भयंकरः ॥ ३५ ॥

अर्जुन उवाच ।

अथ केन प्रयुक्तो यं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ ३६ ॥

हेवार्ष्णेय । अथ - अनन्तरं । अयं - ज्ञानयोगेप्रवृत्तः पुरुषः । अनिच्छन्नपि - अनाकांक्षन्नपि । केन - हेतुना । प्रयुक्तः प्रेरितः सन् । बलान्नियोजितइव-बलात्कारेण नियोजितइव । पापं - विषयानुभवरूपं अनर्थं । चरति ॥ ३६ ॥

श्रीभगवानुवाच ।

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ ३७ ॥

एवं त्वया पृष्टोहेतुः । रजोगुणसमुद्भवः - रजोगुणजनितः । कामएव । एषः - कामः । क्रोधः - कामएव क्रोधः - क्रोधाकारेण परिणमतइत्यर्थः । महाशनः-सकृद्विषयानुभवेन समाधातुमशक्यः । महापाप्मा-अतिक्रूरइत्यर्थः । अतः । एनं - काममेव । इह । ज्ञानयोगिनः । वैरिणं - विरोधिनं । विद्धि - जानीहि ॥ ३७ ॥

धूमेनाव्रियते वह्निर्यथाऽऽदर्शो मलेन च
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८ ॥

यथा । वह्निः - अग्निः । धूमेन आव्रियते - आवृतो भवति । यथा । आदर्शः-

**मुकुरः । मलेन - मालिन्येन । आव्रियते । यथा । गर्भः । उल्बेन- जरायुणा । आवृतः - आच्छादितः । तथा - तेन प्रकारेण । इदं - जन्तुजातं । तेन - कामेन । आवृतम् ॥ ३८ ॥**

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौंतेय दुष्पूरेणानलेन च ॥ ३९ ॥

**हेकौन्तेय । ज्ञानिनः - ज्ञानगुणकस्य जन्तोः । ज्ञानं - आत्मविषयज्ञानं । दुष्पूरेण - पूरयितुमशक्येन । अनलेन - पर्याप्तिरहितेनच । कामरूपेण । एतेन । नित्यवैरिणा – सन्ततविरोधिना । आवृतं – आच्छादितम् ॥ ३९ ॥**

इंद्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४० ॥

**अस्य - कामस्य । इन्द्रियाणि – चक्षुरादीनि । मनः – अन्तःकरणं । बुद्धिः - अध्यवसायश्च । अधिष्ठानं – आत्माधिष्ठानोपकरणं । उच्यते । एषः - कामः । एतैः - इन्द्रियादिभिरुपकरणैः । ज्ञानं – आत्मविषयं । आवृत्य - आच्छाद्य । देहिनं - शरीरिणं । विमोहयति – विविधंमोहयति ॥ ४० ॥**

तस्मात्त्वमिंद्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥ ४१ ॥

**हेभरतर्षभ । तस्मात् - कारणात् । त्वं । आदौ - आरंभसमयएव । इंद्रियाणि - श्रोत्रादीनि । नियम्य । ज्ञानविज्ञाननाशनं - ज्ञानं - आत्मस्वरूपविषयं , विज्ञानं - तद्विवेकविषयं , तयोर्नाशनं - नाशकरं । एनं - कामरूपं । पाप्मानं - वैरिणं । प्रजहि - प्रकर्षेण त्यज ॥ ४१ ॥**

इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्योबुद्धेः परतस्तु सः ॥ ४२ ॥

**इन्द्रियाणि - श्रोत्रादीनि । पराणि - ज्ञानविधिषु प्रधानान्याहुः । इंद्रियेभ्योपि । मनः । परं - प्रधानं । मनसोपि । बुद्धिः - अध्यवसायस्तु । परा - प्रधानभूता । यः । बुद्धेरपि । परतः - प्रधानभूतः । सतु । कामए**

**व । सर्वेषु ज्ञानविरोधिषु प्रधानइत्यर्थः ॥ ५२ ॥**

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।

जहिशत्रुं महाबाहो कामरूपं दुरासदम् ॥ ४३ ॥

॥ इतिश्रीभगवद्गीतायां तृतीयो ध्यायः ॥

**हेमहाबाहो । एवं - उक्तप्रकारेण । बुद्धेरपिं परं कामं । बुध्वा - ज्ञात्वा । आत्मानं - मनः । आत्मना - अध्यवसायेन । संस्तभ्य - निश्चलं कृत्वा । दुरासदं - दुर्जयं । कामरूपं । शत्रुं - वैरिणं । जहि - संहर ॥४३॥**

**इति श्रीमद्यामुनाचार्यविरचिते गीतार्थसंगूहे कर्मयोगोनाम**

**॥ तृतीयोध्यायः ॥**

॥ श्रीः ॥

## ॥ चतुर्थोऽध्यायः ॥

श्रीभगवानुवाच ।

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।

विवस्वान्मनवे प्राह मनुरिक्ष्वाकवे ब्रवीत् ॥ १ ॥

**एवमध्यायद्वयेन कर्मयोगस्य मोक्षसाधनत्वमुक्त्वा तमेव सत्संप्रदायप्राप्तत्वेन प्रशंसति --**

**अहं - सर्वेश्वरः परमकारुणिकोहं । अव्ययं - अपायरहितं । इमं - पूर्वोक्तयोगं । विवस्वते - सूर्याय । प्रोक्तवान् - उपदिष्टवान् । विवस्वान् - सूर्यः । मनवे - वैवस्वताय । प्राह । मनुः - वैवस्वतः । इक्ष्वाकवे - स्वपुत्राय । अब्रवीत् - उपदिष्टवान् ॥ १ ॥**

एवं परंपराप्राप्तमिमंराजर्षयो विदुः ।

स कालेनेह महता योगो नष्टः परंतप ॥ २ ॥

**हेपरन्तप । एवं - उक्तप्रकारेण । परंपराप्राप्तं - संप्रदायागतं । इमं- कर्मयोगम् । राजर्षयः । विदुः - जानन्ति । सः - कर्मयोगः । इह - लोके । महता - दीर्घेण । कालेन । नष्टः - विच्छिन्नः ॥ २ ॥**

स एवायं मया ते द्य योगः प्रोक्तः पुरातनः ।

श्रेष्ठः - प्रसिद्धः पुरुषः । यद्यत्कर्माचरति । इतरः - अकृत्स्नवित । जनः । तत्तदेवाचरति । सः - श्रेष्ठः । यत्प्रमाणं - यावदङ्गयुक्तं । कुरुते - अनुतिष्ठति । लोकः । तदेव - तावदङ्गयुक्तमेव । अनुवर्तते - अनुतिष्ठति ॥ २१ ॥

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ २२ ॥

हेपार्थ । मे - सर्वेश्वरस्य मम । कर्तव्यं - अनुष्ठेयं कर्म । नास्ति । त्रिषु लोकेषु । अनवाप्तं – अप्राप्तं । अवाप्तव्यं – कर्मणाप्राप्तव्यं । किञ्चन-किञ्चिदपि । नविद्यते । तथापि । कर्मणि - वर्णाश्रमोचितनित्यनैमित्तिकादौ । वर्तएव - तत्करोम्येवेत्यर्थः ॥ २२ ॥

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः ॥ २३ ॥

हेपार्थ । अहं- शिष्टाग्रेसरः वसुदेवगृहेऽवतीर्णः । जातु–कदाचित् । अतन्द्रितः- अनलसःसन् । कर्मणि न वर्तेयं यदि । सर्वशः सर्वे । मनुष्याः-कर्माधिकारिणः । मम–श्रेष्ठतमस्य । वर्त्म - मार्गं । अनुवर्त्तंते–अयमेव धर्म इत्यनुसरेयुः ॥ २३ ॥

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहं ।
संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥ २४ ॥

अहं । कर्म- कुलोचितं । न कुर्यांचेत् । इमे लोकाः । उत्सीदेयुः-शास्त्रीयकर्माकरणजनितप्रत्यवायेन नष्टा भवेयुः । संकरस्यच । कर्त्ता । स्यां – भवेयम् । अतएव, इमाः प्रजाः । उपहन्यां– निरयगामिनः कुर्यामित्यर्थः ॥ २४ ॥

सक्ताः कर्मण्यविद्वांसो यथा कुर्वंति भारत ।
कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम् ॥ २५ ॥

अविद्वांसः– अल्पज्ञाः । कर्मणि सक्ताः संतः । यथा–येन प्रकारेण । कुर्वंति । तथा-तेन प्रकारेण । विद्वान्– आत्मविदपि । असक्तः- संगरहितः सन् । लोकसंग्रहम् । चिकीर्षुः- कर्तुमिच्छुः । कुर्यात्- कर्मयोगमाचरेत् ॥ २५ ॥ ... ...

न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥ २६ ॥

**अज्ञानां–आत्मज्ञानरहितानां । कर्मसंगिनां– कर्माधिकारिणां । बुद्धिभेदं । न जनयेत् । किंतु विद्वानपि । युक्तः- अवश्यंकर्तव्यमित्येवं रूपबुद्धियुक्तः । कर्माणि । समाचरन् - सम्यक् आचरन् । जोषयेत् –प्रीतिंजनयेत् ॥ २६ ॥ ... ...**

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ताऽहमिति मन्यते ॥ २७ ॥

**अहंकारविमूढात्मा- अहंकारेण विमूढ आत्मा यस्य स तथोक्तःपुरुषः । प्रकृतेः संबंधिभिः । गुणैः–सत्वरजस्तमोभिः । क्रियमाणानि । सर्वशः– सर्वाणि । कर्माणि प्रति । अहं कर्तेति । मन्यते–भ्रमतीत्यर्थः ॥ २७ ॥ ... ...**

तत्ववित्तु महाबाहो गुणकर्म विभागयोः ।
गुणागुणेषु वर्तंत इति मत्वा न सज्जते ॥ २८ ॥

**हेमहाबाहो । गुणकर्मविभागयोः–गुणाः– सत्वादयः, कर्माणि– तत्प्रयुक्तानि, तेषां विभागौ, तयोः।तत्ववित् – तत्वज्ञस्तु । गुणाः – सत्वादयः । गुणेषु– स्वकार्येषु ।वर्तंते। इति - अनेनप्रकारेण। मत्वा-ज्ञात्वा नसज्जते - सक्तो न भवति ॥ २८ ॥ ... ...**

प्रकृते र्गुणसंमूढाः सज्जंते गुणकर्मसु ।
तानकृत्स्नविदो मंदान्कृत्स्नविन्न विचालयेत् ॥ २९ ॥

**प्रकृतेः- शरीरस्य । गुणसंमूढाः–गुणैः-सत्वादिभिः, संमूढाः- अविदितात्मस्वरूपाः । गुणकर्मसु- गुणप्रयुक्तकर्मस्वेव । सजन्ते– सक्ताभवन्ति । अतः । अकृत्स्नविदः - अल्पज्ञान् । तान् । मन्दान्- मन्दमतीन्। कृत्स्नवित्-साकल्येन विदितात्मस्वरूपः पुरुषः। नविचालयेत् कर्मयोगान्नच्यावयेत् ॥ २९ ॥ ... ...**

मयि सर्वाणि कर्माणि संन्यस्या ध्यात्मचेतसा ।
निराशी र्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३० ॥

कांक्षन्तः कर्मणां सिद्धिं यजंत इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ १२ ॥

**इह - लोके । सर्वे - पुरुषाः । कर्मणां । सिद्धिं - फलं । कांक्षन्तः - कामयमानाः सन्तः । देवताः - इन्द्रादिदेवान् । यजन्ते – कर्मभिः आराधयन्ति । हि – यस्मात्कारणात् । मानुषेलोके । कर्मजा - कर्मजन्या । सिद्धिः - फलं । क्षिप्रं – शीघ्रमेव । भवति । अतो न कश्चिदपि मुमुक्षुः सन्मदाराधनैकरूपं कर्मयोगमारभत इति भावः ॥ १२ ॥**

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ १३ ॥

**चत्वारोवर्णाश्चातुर्वर्ण्यं । गुणकर्मविभागशः – गुणाः - सत्वादयः, कर्माणि - तदनुगुणानि , तेषां विभागशः - विभागेनसह । मया - सर्वेश्वरेण । सृष्टं । तस्य - जगत्सृष्ट्यादेः । कर्तारमपि । अव्ययं - विकाररहितं । अतएव । अकर्तारं - फलतःकर्तृत्वरहितमेव । मां । विद्धि - जानीहि ॥ १३ ॥**

नमां कर्माणि लिंपंति न मे कर्मफले स्पृहा ।
इति मां यो भिजानाति कर्मभिर्न स बध्यते ॥ १४ ॥

**कर्माणि - सृष्ट्यादीनि । मां । नलिंपन्ति - नबध्नन्ति । मे - अवाप्तसमस्तकामस्य मम । कर्मफले । स्पृहा नास्ति । इति - अनेन प्रकारेण । यः । मामभिजानाति । सः । कर्मभिः -- पुण्यपापरूपैः । नबध्यते ॥ १४ ॥**

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ १५ ॥

**एवं - उक्तप्रकारेण । ज्ञात्वा । पूर्वैः - प्राचीनैः । मुमुक्षुभिः - इक्ष्वाकुप्रभृतिभिरपि । कर्म । कृतं - आचरितम् । तस्मात् - कारणात् । त्वं । पूर्वैः । कृतं - अनुष्ठितं । पूर्वतरं - प्राचीनं । कर्मैव । समाचर ॥ १५ ॥**

किंकर्म किमकर्मेति कवयोप्यत्र मोहिताः।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेशुभात् ॥ १६ ॥

**कर्म- मुमुक्षुभिरनुष्ठेयंकर्म । किं- किंरूपं । अकर्म- ज्ञानञ्च । किं- किंरूपं । इत्यनेनप्रकारेण । अत्र- अस्मिन्नर्थे । कवयः- विद्वांसोपि । मोहिताः ॥ तत्- तादृशं ज्ञानगर्भं । कर्म । ते - तव । प्रवक्ष्यामि । यत्कर्म । ज्ञात्वा-अनुष्ठाय । अशुभात् - संसारबंधनरूपात् अनर्थात् । मोक्ष्यसे मुक्तोभविष्यसि ॥ १६ ॥ ... ... ...**

कर्मणोह्यपि बोद्धव्यं बोद्धव्यंच विकर्मणः।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ १७ ॥

**हि- यस्मात्कारणात् । कर्मणः- कर्मयोगस्य । बोद्धव्यं- ज्ञातव्यंस्वरूपं । अस्ति । विकर्मणः- तत्साधनभूतद्रव्यार्जनादिरूपद्विविधकर्मणश्च । बोद्धव्यमस्ति । अकर्मणः- ज्ञानस्यच । बोद्धव्यमस्ति । कर्मणः । गतिः प्रकारः । गहना-दुर्ज्ञेया ॥ १७ ॥ ... ...**

कर्मण्यकर्मयः पश्येदकर्मणिच कर्म यः।
स बुद्धिमान्मनुष्येषु सयुक्तः कृत्स्नकर्मकृत् ॥ १८ ॥

**यः । कर्मणि- कर्मयोगे । अकर्म - आत्मज्ञानं । पश्येत् । यः । अकर्मणि - ज्ञानेच । कर्म पश्येत् । सएव । बुद्धिमान् - शास्त्रार्थवित् । स हि । मनुष्येषु । युक्तः- मोक्षयोग्यः । सएव । कृत्स्नकर्मकृत् - सर्वशास्त्रार्थकृत् ॥ १८ ॥ ... ... ...**

यस्य सर्वेसमारंभाः कामसंकल्पवर्जिताः।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥ १९ ॥

**यस्य- मुमुक्षोः । सर्वे- समस्ताः । समारंभाः- कर्माणि । कामसंकल्पवर्जिताः - फलोद्देशरहिताः । तं - तादृशकर्म कुर्वाणं पुरुषं । बुधाः- तत्वज्ञाः । पण्डितं - विद्वांसं । ज्ञानाग्निदग्धकर्माणं - ज्ञानरूपेणाग्निना भस्मीकृतसकलपापं । आहुः - वदन्ति ॥ १९ ॥ ...**

त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः।
कर्मण्यभिप्रवृत्तोपि नैव किंचित्करोति सः ॥ २० ॥

यः । कर्मफलासंगं--कर्मफलासक्तिम् । त्यक्त्वा । नित्यतृप्तः - नित्ये-स्वात्मन्येव,तृप्तः - तृप्तिंगतः । निराश्रयः –शरीरादावाश्रयताबुद्धिरहितः । भवति । सः । कर्मणि । अभिप्रवृत्तोपि– आभिमुख्येन वर्तमानोपि। किंचिदपि । नकरोत्येव । नबध्यतइत्यर्थः ॥ २० ॥ ...

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम ॥ २१ ॥

निराशीः - निष्कामः । यतचित्तात्मा – चित्तं - मनः, आत्मा- शरीरं,यतौ - नियमितौ, चितात्मानौ उभौ यस्य स तथोक्तः । त्यक्तसर्वपरिग्रहः – त्यक्ताः, सर्वपरिग्रहाः–प्राकृतवस्तुविषयकममकाराः, येन स तथोक्तः । केवलं । शारीरं - शरीरमात्रसाध्यम् । कर्म । कुर्वन्नपि । किल्बिषं - संसारबन्धनम् । नाप्नोति – नप्राप्नोति ॥ २१ ॥ ...

यदृच्छालाभसन्तुष्टो द्वंद्वातीतो विमत्सरः ।
समस्सिद्धावसिद्धौच कृत्वापि ननिबध्यते ॥ २२ ॥

यदृच्छालाभसन्तुष्टः - यदृच्छया - अप्रयत्नेन, यो लाभः - द्रव्यादिप्राप्तिः, तेन सन्तुष्टः । द्वन्द्वातीतः - अवर्जनीयसुखदुःखादिसहिष्णुः । विमत्सरः - विगतमत्सरः । सिद्धौ - लाभे । असिद्धौ - अलाभेच । समः - तुल्यः । पुरुषः । कृत्वापि - केवलं कर्म कुर्वाणोऽपि । ननिबध्यते ॥ २२ ॥

गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ २३ ॥

ज्ञानावस्थितचेतसः - ज्ञाने - आत्मस्वरूपविषयके , अवस्थितं-नियतं, चेतः - मनः, यस्य तस्य तथोक्तस्य । अतएव गतसंगस्य - विषयासक्तिरहितस्य परिशुद्धस्य । यज्ञाय - यज्ञार्थं । आचरतः–वर्तमानस्य पुरुषस्य । कर्म - पुण्यपापरूपम् । समग्रम् - निःशेषं । प्रविलीयते ॥२३॥

ब्रह्मार्पणं ब्रह्महविः ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ २४ ॥

ब्रह्मार्पणम् - अर्प्यते अनेन हविरित्यर्पणं - स्रुगादिकं,ब्रह्मात्मकमर्पणं यस्य तं तथोक्तं । ब्रह्महविः । ब्रह्मणा - ब्रह्मात्मकेन कर्त्रा । ब्रह्माग्नौ-

ब्रह्मात्मकेऽग्नौ। हुतं-त्यक्तं। इत्यनेन प्रकारेण। ब्रह्मकर्मसमाधिना - ब्रह्मात्मककर्मानुसन्धानवता। तेन - कर्त्रा। ब्रह्मैव - ब्रह्मभूतमात्मस्वरूपमेव। गन्तव्यं- प्राप्तव्यम् ॥ २४ ॥ ... ...

दैवमेवापरे यज्ञं योगिनः पर्युपासते।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥ २५ ॥

अपरे- केचिद्योगिनः कर्मनिष्ठाः। दैवमेव - इन्द्रादिदेवार्चनरूपमेव। यज्ञम्। पर्युपासते-सेवन्ते। अपरेकेचित्। यज्ञं - यज्ञसाधनं हविः। यज्ञेन - यज्ञोपकरणेन स्रुगादिनैव। ब्रह्माग्नौ। उपजुह्वति - होमं कुर्वंति ॥ २५ ॥ ... ...

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषुजुह्वति।
शब्दादीन्विषयानन्ये इन्द्रियाग्निषु जुह्वति ॥ २६ ॥

अन्ये· कर्मयोगिनः। श्रोत्रादीनीन्द्रियाणि। संयमाग्निषु - नियमरूपाग्निषु। जुह्वति। अन्ये। शब्दादीन्। विषयान्। इन्द्रियाग्निषु जुह्वति। यादृच्छिकविषयानुभवेपि आसक्तिरहिताभवन्तीत्यर्थः ॥ २६ ॥

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ २७ ॥

अपरे - योगिनः। सर्वाणीन्द्रियकर्माणि - सर्वानिन्द्रियव्यापारान्। प्राणकर्माणि - प्राणापानादिव्यापारांश्च। ज्ञानदीपिते - ज्ञानप्रज्वलिते। आत्मसंयमयोगाग्नौ - मनोनिग्रहरूपाग्नौ। जुह्वति - प्रवेशयन्ति ॥ २७ ॥ ... ... ...

द्रव्ययज्ञा स्तपोयज्ञा योगयज्ञा स्तथापरे।
स्वाध्यायज्ञानयज्ञाश्च यतयस्संशितव्रताः ॥ २८ ॥

संशितव्रताः- दृढसंकल्पाः। यतयः- कर्मयोगिनः। केचित्। द्रव्ययज्ञाः- द्रव्येण न्यायार्जितेन यज्ञो येषां ते तथोक्ताः। केचित्। तपोयज्ञाः - तपांस्येव यज्ञा येषां ते तथोक्ताः। अपरे केचित। योगयज्ञाः - योगः - पुण्यक्षेत्रादिप्राप्तिरेव, यज्ञो येषांते तथोक्ताः।

अपरे - केचित । स्वाध्यायज्ञानयज्ञाः - स्वाध्यायो - वेदाभ्यासः, ज्ञानं तदर्थविचाररूपं, तौ यज्ञौ येषां ते तथोक्ताः ॥ २८ ॥ ...

अपाने जुह्वतिप्राणं प्राणेपानं तथापरे ।
प्राणापानगतीरुध्वा प्राणायामपरायणाः ॥ २९ ॥
अपरेनियताहाराः प्राणान्प्राणेषु जुह्वति ।

अपरे- केचित् । नियताहाराः- संकुचिताहाराः । प्राणायामपरायणाः - प्राणायामनिष्ठाः सन्तः । अपाने प्राणं जुह्वति - अपानप्राणयोरैकीकरणरूपं रेचकं कुर्वन्ति । तथा अपरे- केचित् । प्राणे अपानं जुह्वति- प्राणापानयोरैकीकरणरूपं पूरकं कुर्वन्ति । अपरे । प्राणापानगती - प्राणापानमार्गौ । रुध्वा - निरुध्य । प्राणेष्वेव प्राणान् जुह्वति-सर्वप्राणानामेकीकरणरूपं कुम्भकं कुर्वंति ॥ २९ ॥ ...

सर्वेप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥
यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।
नायं लोकोस्त्ययज्ञस्य कुतोन्यः कुरुसत्तम ॥ ३१ ॥

एते-पूर्वोक्ताः । सर्वे - कर्मयोगिनः । यज्ञविदः - यज्ञनिष्ठाः । यज्ञक्षपितकल्मषाः- यज्ञैरुक्तरूपैः, क्षपितानि - निःशेषविनाशितानि, कल्मषानि - पुरुषार्थप्रतिबन्धकपापानि, येषां ते तथोक्ताः । हेकुरुसत्तम । यज्ञशिष्टामृतभुजः - यज्ञावशिष्टान्नादिरूपामृतभुजःसन्तः । सनातनं-शाश्वतं । ब्रह्म । यान्ति- प्राप्नुवन्ति । अयज्ञस्य - यज्ञविहीनस्य । अयं-स्वर्गादिरूपः । लोकः - पुरुषार्थः । नास्ति । अन्यः एतद्विलक्षणो मोक्षरूपः पुरुषार्थः । कुतः - कस्माद्धेतोः । प्रसिद्ध्यति ॥३०॥३१॥

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान् सर्वान् एवं ज्ञात्वा विमोक्ष्यसे ॥ ३२ ॥

एवं - उक्तरीत्या । बहुविधाः- बहुप्रकाराः । यज्ञाः । ब्रह्मणः- वेदस्य । मुखे - वेदान्ते । विततः - विस्तृताः । तान् सर्वान् - यज्ञान् । कर्मजान् - कर्मजनितान् । विद्धि - जानीहि । एवं - उक्तरीत्या । ज्ञात्वा- ज्ञानपूर्वकमनुष्ठाय । विमोक्ष्यसे-संसारान्मुक्तोभविष्यसि ॥ ३२ ॥

श्रेयान्द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परंतप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥

हेपरन्तप । द्रव्यमयात् - द्रव्यप्रचुरात् । यज्ञात् । ज्ञानयज्ञः - ज्ञानप्रचुरो यज्ञः । श्रेयान् - श्रेष्ठः । तत्रहेतुमाह । हेपार्थ । सर्वं - सर्वप्रकारं । अखिलम् । कर्म । ज्ञाने - आत्मयाथात्म्यज्ञाने । परिसमाप्यते -पर्यवस्यति ॥ ३३ ॥ ... ... ...

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः ॥ ३४ ॥

तत- आत्मविषयकं ज्ञानं । प्रणिपातेन - नमस्कारेण । परिप्रश्नेन - जिज्ञासितसर्वप्रकारकप्रश्नेन । सेवया- शिश्रूषयाच । विद्धि-जानीहि । तत्वदर्शिनः- तत्वज्ञाः । ज्ञानिनः पण्डिताः । ते - तव । ज्ञानं । उपदेक्ष्यंति - उपदेश्यं प्रत्यक्षवत् विशदीकरिष्यन्ति ॥ ३४ ॥ ...

यज्ज्ञात्वा नपुनर्मोहमेवं यास्यसिपाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ ३५ ॥

हेपाण्डव । यत । ज्ञात्वा । पुनः – भूयः । एवं - इत्थं । मोहं देहात्मभ्रमं । नयास्यसि । येन - ज्ञानेन । सर्वाणि भूतानि – आत्मवस्तूनि । अशेषेण - कात्स्न्येन । आत्मनि–स्वस्मिन्नेवं । द्रक्ष्यसि-ज्ञानैकाकारतया स्वात्मसमतयैव प्रत्यक्षीकरिष्यसि । अथो-अनन्तरं । सर्वभूतानि । मयि द्रक्ष्यसि–मत्समाकारतया प्रत्यक्षीकरिष्यसि ॥ ३५ ॥

अपिचेदसि पापेभ्यस्सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥ ३६ ॥

त्वं । सर्वेभ्यः । पापेभ्यः - पापकृद्भ्यः । पापकृत्तमः-पापिष्ठः । असिचेत् – भवसियदि । सर्वं । वृजिनं - पापसमुद्रं । ज्ञानप्लवेनैव । सन्तरिष्यसि- सम्यक्तरिष्यसि ॥ ३६ ॥ ... ...

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ३७ ॥

हेअर्जुन । यथा । समिद्धः - सम्यक्प्रज्वलितः । अग्निः - एधांसि । इन्धनानि । भस्मसात्कुरुते - भस्मीकरोति । तथा । ज्ञानाग्निः । सर्वकर्माणि - प्राप्तिप्रतिबन्धकानि । भस्मसात्कुरुते ॥ ३७ ॥ ...

नहि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥ ३८ ॥

हि · यस्मातकारणात् । इह - जगति । ज्ञानेन । सदृशं–समानं । पवित्रं - शुद्धिकरं वस्तु । नविद्यते । तत्पवित्रं ज्ञानं । योगसंसिद्धः - योगेन - कर्मयोगेन, संसिद्धः- निर्मलांतः करणः, पुरुषः । कालेन- अचिरेण । आत्मनि- विषये । स्वयमेव । विन्दति ॥ ३८ ॥

श्रद्धावान् लभते ज्ञानं तत्परस्संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्ति अचिरेणाधिगच्छति ॥ ३९ ॥

श्रद्धावान् - उपदिष्टेर्थे विश्वासशाली । तत्परः- तस्मिन्नेवार्थे नियतमनाः । तदितरविषयात्संयतेन्द्रियः । स्वयमेव । परां शांतिं - परंनिर्वाणम् । अधिगच्छति - प्राप्नोति ॥ ३९ ॥ ... ...

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।
नायंलोकोस्तिनपरो नसुखं संशयात्मनः ॥ ४० ॥

अज्ञः - पूर्वोक्तज्ञानरहितः । अश्रद्दधानः–विश्वासरहितः । संशयात्मा - विधिविहितगुरूपदिष्टार्थे सन्दिग्धमनाश्च । विनश्यति – नष्टोभवति । संशयात्मनः । अयं लोकोपि नास्ति । परोलोकोपि नास्ति । सुखं - मोक्षरूपनिरतिशयसुखश्च । नास्ति ॥ ४० ॥ ...

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम्।
आत्मवन्तं नकर्माणि निबध्नन्ति धनञ्जय ॥ ४१ ॥

योगसंन्यस्तकर्माणम्–योगेन - सर्वस्य कर्मणः ब्रह्मात्मकत्वानुसंधानरूपयोगेन , संन्यस्तानि कर्माणि यस्य तं तथोक्तं । ज्ञानसंछिन्नसंशयं - ज्ञानेन- आत्मविषयकेण, संछिन्नाः संशया यस्य तं तथोक्तं । आत्मवन्तम् - प्रशस्तमनसं पुरुषं । हेधनञ्जय । कर्माणि - पुण्यपापरूपाणि । ननिबध्नन्ति बद्धं न कुर्वंति ॥ ४१ ॥ ... ...

तस्मादज्ञानसंभूतं हृत्स्थंज्ञानासिनात्मनः ।
छित्वैनं संशयं योग मातिष्ठोत्तिष्ठ भारत ॥ ४२ ॥

॥ इतिश्री भगवद्गीतायां चतुर्थोध्यायः ॥

**हेभारत । तस्मात्- कारणात् । अज्ञानसम्भूतं - देहानतिरिक्तात्मज्ञानबीजसमुत्पन्नं । हृत्स्थं - हृदिस्थितं । एनं - जनकं । आत्मनः संशयं - आत्मविषयकसंदेहं । ज्ञानासिना - ज्ञानखड्गेन । छित्वा । योगम् - मदुपदिष्टकर्म योगं । आतिष्ठ - अनुतिष्ठ । तदर्थं । उत्तिष्ठ ॥ ४२ ॥ ... ... ...**

**इति श्रीमद्यामुनाचार्य विरचिते श्रीगीतार्थ संग्रहे**

चतुर्थोध्यायः ॥ ४ ॥

॥ श्रीः ॥

## ॥ अथ पंचमोध्यायः ॥

॥ अर्जुनउवाच ॥

संन्यासं कर्मणां कृष्ण पुनर्योगंच शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ १ ॥

**एवं चतुर्थे कर्मयोगस्य ज्ञानगर्भत्वम् तत्स्वरूपभेदः ज्ञानप्राधान्यश्चोक्तं । इदानीं कर्मयोगस्य ज्ञाननिष्ठापेक्षया शैघ्र्यं तत्राकर्तृत्वानुसन्धानश्चास्मिन्नध्यायेवदति ॥ ... ...**

**हेकृष्ण । कर्मणां । संन्यासं - त्यागंच । शंससि । पुनः । योगं - कर्मयोगंच । शंससि । एतयोः - ज्ञानयोगकर्मयोगयोर्मध्ये । श्रेयः–श्रेष्ठं । यदेकमस्ति । तदेकं । मे- मम । सुनिश्चितं यथा भवति तथा ब्रूहि ॥ १ ॥**

॥ श्रीभगवानुवाच ॥

संन्यासः कर्मयोगश्च निश्श्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ॥ २ ॥

संन्यासः-ज्ञानयोगः । कर्मयोगश्च । उभावपि । निःश्रेयसकरौ - मोक्षसाधनभूतौ । तयोर्मध्येतु । कर्मसंन्यासात् - ज्ञानयोगात् । कर्मयोगएव । विशिष्यते - अतिशेते ॥ २ ॥ ... ...

ज्ञेयस्सनित्यसंन्यासी यो नद्वेष्टिन कांक्षति ।
निर्द्वन्द्वोहि महाबाहो सुखं बन्धात्प्रमुच्यते ॥ ३ ॥

हेमहाबाहो । यः -कर्मयोगी । नकांक्षति - आत्मव्यतिरिक्तमनुकूलन्नेच्छति । नद्वेष्टि - प्रतिकूलद्वेषन्नकरोति । अतएव । निर्द्वन्द्वः- शीतोष्णादिसहिष्णुर्भवति । सः । नित्यसंन्यासी - नित्यंज्ञानयोगनिष्ठः । इतिज्ञेयः । हि - यस्मात्कारणात् । सः । सुखं - अनायासेन । बन्धात्- संसारात् । प्रमुच्यते- मुक्तोभवति ॥ ३ ॥ ...

सांख्ययोगौपृथग्बालाः प्रवदन्तिनपण्डिताः ।
एकमप्यास्थितस्सम्य गुभयोर्विन्दतेफलम् ॥ ४ ॥

बालाः- अकृत्स्नविदः । सांख्ययोगौ- ज्ञानयोगकर्मयोगौ । पृथक्- फलभेदेन परस्परं भिन्नौ । प्रवदन्ति । पण्डितास्तु । नवदन्ति । कुतइत्युक्ते । उभयोर्मध्ये । एकं । आस्थितः- अनुतिष्ठन्नपि । सम्यक्-समीचीनं । फलम्- आत्मावलोकन रूपं । विन्दते - लभते ॥ ४ ॥

यत्सांख्यैः प्राप्यतेस्थानं तद्योगैरपिगम्यते ।
एकं सांख्यञ्च योगञ्च यःपश्यति सपश्यति ॥ ५ ॥

सांख्यैः - ज्ञानयोगिभिः । यत् स्थानं । प्राप्यते । तत् । योगैः - कर्मयोगिभिरपि । गम्यते - प्राप्यते । सांख्यंच । योगंच । एकं-आत्मावलोकनरूपफलैक्यादभिन्नं । यःपश्यति । सएव । पश्यति जानाति । नान्यइत्यर्थः ॥ ५ ॥ ... ...

सन्नयासस्तुमहाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तोमुनिर्ब्रह्म नचिरेणाधिगच्छति ॥ ६ ॥

महाबाहो । सन्यासः - ज्ञानयोगस्तु । अयोगतः - कर्मयोगंविना । आप्तुं - साधयितुं । दुःखं – अशक्यः । योगयुक्तः – ब्रह्मयोगनिष्ठः । मुनिः-आत्ममननशीलः । नचिरेण – शीघ्रमेव । ब्रह्म - आत्मानं । अधिगच्छति–प्राप्नोति ॥ ६ ॥ ... ... ...

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपिनलिप्यते ॥ ७ ॥

योगयुक्तः - योगेन परमपुरुषाराधनवेषेण कर्मयोगेन युक्तः । विशुद्धात्मा - निर्मलांतःकरणः । विजितात्मा - वशीकृतमनस्कः । जितेन्द्रियः - निर्जितबाह्येन्द्रियः । सर्वभूतात्मभूतात्मा-सर्वेषां भूताना मात्मभूतः - समाविना ज्ञानैकाकारतया अभिन्नत्वेन अनुसंधीयमानः, आत्मा, यस्य स तथोक्तः, पुरुषः । कुर्वन्नपि – कर्मकुर्वाणोपि । न लिप्यते– नबध्यते ॥ ७ ॥ ... ...

नैवकिंचित्करोमीति युक्तोमन्येततत्ववित् ।
पश्यंच्छृण्वन्स्पृशञ्जिघ्र नश्नन्गच्छन् स्वपंच्छ्वसन् ॥ ८ ॥

प्रलपन् विसृजन् गृह्णन्नुन्मिष न्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्तइतिधारयन् ॥ ९ ॥

तत्ववित् - आत्मस्वरूपज्ञः । युक्तः - कर्मयोगनिष्ठः । पश्यन्–रूपादिकमवलोकयन्नपि । शृण्वन् – शब्दमाकर्णयन्नपि । स्पृशन् - मृदुपरुषादिस्पर्शं कुर्वन्नपि । जिघ्रन् - गन्धघ्राणंकुर्वन्नपि । अश्नन्- मधुरादिरसमनुभवन्नपि । गच्छन् - गमनं कुर्वन्नपि । स्वपन् - निद्रां कुर्वन्नपि । निश्वसन्- श्वासादिकं कुर्वन्नपि ॥ ...

प्रलपन् संभाषणंकुर्वन्नपि । विसृजन् - मूत्रोत्सर्जनादिकं कुर्वन्नपि । गृह्णन् - आदानं कुर्वन्नपि । उन्मिषन् - उन्मीलनं कुर्वन्नपि । निमिषन्- निमीलनं कुर्वन्नपि । इन्द्रियार्थेषु - विषयेषु । इन्द्रियाण्येव । वर्तन्ते-

प्रवर्तते । इति-अनेनप्रकारेण । धारयन् - बुध्यानिश्चिन्वन् । अहं । किंचिदपि कर्म । नैवकरोमीति । मन्येत - अनुसन्दधीत । इन्द्रियेषु कर्तृत्वमारोप्य स्वात्मन्यकर्तृत्व मनुसंदधीतेत्यर्थः ॥ ८ ॥ ९ ॥

ब्रह्मण्याधायकर्माणि संगन्त्यक्त्वाकरोतियः ।
लिप्यतेनसपापेन पद्मपत्रमिवांभसा ॥ १० ॥

यः । सर्वाणि कर्माणि । ब्रह्मणि - प्रकृतिपरिणामविशेषरूपेन्द्रियवर्गे । आधाय-पूर्वोक्तरीत्या संन्यस्य । संगं – तत्रफलासक्तिं । त्यक्त्वा । करोति - अनुतिष्ठति । सः । अम्भसा - जलेन । पद्मपत्रमिव । पापेन - बंधहेतुना । नलिप्यते ॥ १० ॥ ... ...

कायेन मनसा बुद्ध्या केवलैरिंद्रियैरपि ।
योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये ॥ ११ ॥

योगिनः - कर्मयोगिनः । संगं - फलासक्तिम् । त्यक्त्वा । आत्मशुद्धये - बन्धनिवृत्तये । कायेन - शरीरेण । मनसा - चित्तेन । बुद्ध्या - अध्यवसायेन । केवलैः - अभिनिवेशरहितैः । इन्द्रियैः - श्रोत्रादिभिः, वागादिभिरपि । कर्म । कुर्वन्ति ॥ ११ ॥ ...

युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीम् ।
अयुक्तःकामकारेण फले सक्तो निबध्यते ॥ १२ ॥

युक्तः–योगी । कर्मफलं । त्यक्त्वा । कर्म अनुतिष्ठन् । नैष्ठिकीं-स्थिराम् । शान्ति - निर्वृतिम् , आत्मानुभवरूपां । आप्नोति । अयुक्तः - आत्मानुभवविमुखः । कामकारेण - कामतः प्रवृत्त्या । फले - स्वर्गादिरूपे । सक्तः - आसक्तः । कर्म कुर्वन् । निबध्यते - नित्य संसारी भवति ॥ १२ ॥

सर्वकर्माणि मनसा सन्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैवकुर्व न्न कारयन् ॥ १३ ॥

वशी - जितेन्द्रियः । देही । मनसा । सर्वकर्माणि - अहरहरनुष्ठीयमानानि । नवद्वारे पुरे - शरीरे । संन्यस्य - कर्तव्यत्वमारोप्य । नैवकुर्वन् - स्वयमकुर्वन्नेव । नकारयन् - अन्येनापि न कारयन्नेव । सुखं । आस्ते - वसति ॥ १३ ॥ ... ... ...

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ १४ ॥

**प्रभुः - स्वरूपेणावस्थितोजीवः । लोकस्य – जनस्य । कर्तृत्वं । न सृजति । कर्माणिच नसृजति । कर्मफलसंयोगं – तत्कर्मफलसंबन्धंच । नसृजति - नोत्पादयति । किन्तु । स्वभावः - प्रकृतिसंबन्धः । प्रवर्तते - कर्तृत्वादौ प्रवृत्तिं करोति ॥ १४ ॥ ... ...**

नादत्ते कस्यचित्पापं नचैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥ १५ ॥

**विभुः - विविक्तस्वरूपआत्मा । कस्यचित् - कस्यापि । पापम् । नादत्ते । कस्यचित । सुकृतश्च । नैवादत्ते - न गृह्णाति । किन्तु । अज्ञानेन - ज्ञानविरोधिप्राचीनकर्मणा । ज्ञानं - आत्मस्वरूपविषयकम् । आवृतं - आच्छादितम् । तेन – कारणेन । जन्तवः - जीवाः । मुह्यन्ति - मोहं प्राप्नुवन्ति ॥ १५ ॥ ... ...**

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनां ।
तेषा मादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥ १६ ॥

**येषां । आत्मनां । ज्ञानेन - आत्मज्ञानेन स्वरूपविषयकेण । तत् - ज्ञानावरणभूतम् । अज्ञानं । नाशितम् । तेषां । तत् - स्वाभाविकम् । परं - अपरिच्छिन्नं । ज्ञानम् । आदित्यवत - सूर्यइव । प्रकाशयति - सर्वं यथावत् प्रत्यक्षीकरोति ॥ १६ ॥... ...**

तद्बुद्धय स्तदात्मान स्तन्निष्ठा स्तत्परायणाः ।
गच्छ न्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ १७ ॥

**तद्बुद्धयः - तस्मिन् आत्मविषये ज्ञाने, बुद्धिः - अध्यवसायः, येषां ते तथोक्ताः । तदात्मानः – तदेकमनसः । तन्निष्ठाः - तस्मिन्नेवनिष्ठावन्तः । तत्परायणाः - तदेकप्रयोजनाः । अतएव । ज्ञाननिर्धूतकल्मषाः – ज्ञानाग्निदग्धकर्माणः पुरुषाः । अपुनरावृत्तिं - पुनः प्रकृतिसंबन्धरहितं आत्मस्वरूपं । गच्छन्ति – प्राप्नुवन्ति ॥ १७ ॥ ... ...**

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनिचैव श्वपाकेच पण्डितास्समदर्शिनः ॥ १८ ॥

पण्डिताः - आत्मयाथात्म्यविदः । विद्याविनयसंपन्ने । ब्राह्मणे । गवि - धेनौ । हस्तिनि - गजे । शुनि - शुनके । श्वपाके - चण्डाले च । विद्यमाने आत्मस्वरूपे । समदर्शिनः - समं ज्ञानैकाकारतया - समानं यथा तथा पश्यन्तीति तथोक्ताः । प्रकृतिविविक्तात्मस्वरूपे सर्वत्र समबुद्धयो भवन्तीत्यर्थः ॥ १८ ॥ ... ...

इहैव तैर्जितस्सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषंहि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥ १९ ॥

येषां - पुरुषाणां । मनः - चित्तं । साम्ये - सर्वेष्वात्मसु समत्वे । स्थितम् । तैः । इहैव - लोके । सर्गः - संसारः । जितः - विमुक्तः । हि- यस्मात । निर्दोषं - प्रकृतिसंबन्धरहितम् । समं - समाकारं । आत्मवस्तु । ब्रह्म । तस्मात । ते - साम्यनिष्ठाः । ब्रह्मणि । स्थिताः । एवं - संसारे वर्तमानाअपि मुक्ताएवेत्यर्थः ॥ १९ ॥ ... ...

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥ २० ॥

पुमान् । प्रियं - अनुकूलम् । प्राप्य । न प्रहृष्येत् - हर्षं न प्राप्नुयात । अप्रियं - प्रतिकूलंच । प्राप्य । नोद्विजेत् - भयं न प्राप्नुयात । तत्र हेतुः । स्थिरबुद्धिः - आत्मन्येवासक्तबुद्धिः । असंमूढः । मोहरहितः । ब्रह्मवित् - ब्रह्मज्ञानवान् । ब्रह्मणि स्थितः - ब्रह्मनिष्ठश्च भवेदित्यर्थः ॥ २० ॥ ... ... ...

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यस्सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥ २१ ॥

यः । बाह्यस्पर्शेषु - बहिर्विषयानुभवेषु । असक्तात्मा - आसक्तिरहितमनाः । आत्मन्येव । सुखम् । विन्दति - लभते । सः । ब्रह्मयोगयुक्तात्मा - ब्रह्माभ्यासयुक्तमनस्कस्सन् । अक्षयंसुखं - मोक्षरूपम् । अश्नुते - अनुभवति ॥ २१ ॥ ... ...

ये हि संस्पर्शजाभोगा दुःखयोनयएव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥ २२ ॥

संस्पर्शजाः - विषयेन्द्रियसन्निकर्षजाः । ये योगाः । आद्यन्तवन्तः - उत्पत्तिविनाशवन्तस्सन्ति । ते - भोगाः । दुःखयोनयः - दुःखकारणान्येवहि । अतः । हेकौन्तेय । तेषु - भोगेषु । पण्डितः । न रमते - नक्रीडति ॥ २२ ॥ ... ... ...

शक्नोतीहैव य स्सोढुं प्राक्शरीरविमोक्षणात ।
कामक्रोधोद्भवं वेगं सयुक्त स्स सुखीनरः ॥ २३ ॥

यः - नरः । शरीरमोक्षणात् – शरीरत्यागात् । प्राक् – पूर्वम् । इहैव - साधनानुष्ठानदशायामेव । कामक्रोधोद्भवं - कामक्रोधजनितम् । वेगं । सोढुं – निरोद्धुं । शक्नोति – समर्थोभवति । स युक्तः– योगी सएव । सुखी - आत्मानुभवसुखयोग्यश्च । भवति ॥ २३ ॥

योन्त स्सुखोन्तराराम स्तथान्तर्ज्योतिरेव यः ।
सयोगी ब्रह्मनिर्वाणं ब्रह्मभूतोधिगच्छति ॥ २४ ॥

यः - योगी । अन्तस्सुखः - अन्तरात्मन्येव सुखं यस्य स तथोक्तः । अन्तरारामः - अन्तरेव आरामः क्रीडास्थानं यस्य स तथोक्तः । तथा । यः । अन्तर्ज्योतिः - अन्तरेव ज्योतिः ज्ञानं यस्य स तथोक्तः । सः ब्रह्मभूतः - ब्रह्मनिष्ठः । योगी । ब्रह्मनिर्वाणं – आत्मानुभवसुखं । अधिगच्छति - प्राप्नोति ॥ २४ ॥ ... ...

लभन्तेब्रह्मनिर्वाण मृषयःक्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मान स्सर्वभूतहिते रताः ॥ २५ ॥

छिन्नाः द्वैधाः-छिन्नानि शीतोष्णादिकानि द्वंद्वानि, येषां ते तथोक्ताः । यतात्मानः - नियतमनसः । सर्वभूतहिते - सर्वेषां भूतानां हिते, साधने । रताः - आसक्ताः । ऋषयः - आत्मावलोकनपराः पुरुषाः । क्षीणकल्मषाः - निश्शेषविनष्टमनस्तापा स्सन्तः । ब्रह्मनिर्वाणं । लभन्ते- प्राप्नुवन्ति ॥ २५ ॥ ... ... ...

कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्म निर्वाणं वर्तते विजितात्मनाम् ॥ २६ ॥

**कामक्रोधवियुक्तानां - रागद्वेषरहितानां । यतीनां - यतनशीलानां । यतचेतसां - नियमितचेतसां । अतएव । विजितात्मनां - जित मनस्कानां पुरुषाणां । निर्वाणं-सुखरूपम् । ब्रह्म । अभितो वर्तते - करस्थमेवेत्यर्थः ॥ २६ ॥ ... ... ...**

स्पर्शान्कृत्वा बहिर्बाह्यां श्चक्षुश्चैवांतरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥ २७ ॥
यतेंद्रियमनोबुद्धि र्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो य स्सदा मुक्त एव सः ॥ २८ ॥

**यः - योगी । बाह्यान् - बहिर्भवान् । स्पर्शान् - विषयान् । बहिःकृत्वा - बहिःकृत्य । चक्षुश्च । भ्रुवोः । अन्तरे-मध्येच । कृत्वा । नासाभ्यन्तरचारिणौ - नासिकान्तरे उच्छ्वासनिश्वासरूपेण संचरन्तौ । प्राणापानौ । समौ - समगती कृत्वा । यतेन्द्रियमनोबुद्धिः - यता विषयेभ्योनिवृत्ता इन्द्रियाणि बाह्येन्द्रियाणि मनश्चितं बुद्धिरध्यवसायश्च यस्य स तथोक्तः । अतएव । विगतेच्छाभयक्रोधः - रागभयद्वेषरहितः । मोक्षपरायणः - मोक्षैकप्रयोजनः । मुनिः - आत्मावलोकनशीलश्च भवति । सः । सदा - सन्ततम् । मुक्तएव - निवृत्तसंसारएव ॥२७॥२८॥**

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छति ॥ २९ ।
इति भगवद्गीतायां पंचमोध्यायः ॥

**सर्वलोकमहेश्वरं-सर्वलोकमहानियन्तारं । सर्वभूतानां । सुहृदं-परम मित्रं । यज्ञतपसां-यज्ञानांतपसांच । भोक्तारं-आराध्यंच । ज्ञात्व.-विदित्वा । शांतिं-परमनिर्वृतिं[मनःक्लेशशान्त्यादिरूपंसुखं] ऋच्छति । प्राप्नोति ॥२९॥**

**इति श्रीमद्यामुनाचार्यविरचिते गीतार्थसंग्रहे**

**पंचमोध्यायः ॥ ५ ॥**

॥ श्रीः ॥

# ॥ अथषष्ठोध्यायः ॥

श्रीभगवानुवाच।

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स सन्यासी च योगी च न निरग्नि र्नचाक्रियः ॥ १ ॥

**एवं कर्मयोगमुक्त्वा इदानीं कर्मज्ञानयोगसाध्यात्मावलोकनरूपयोगाभ्यासमभिधास्यन् आदौ कर्मयोगमेव निरपेक्षसाधनत्वेन प्रशंसति अनाश्रित इत्यादिना ॥ यः । कर्मफलं - स्वर्गादिरूपं । अनाश्रितः-अनपेक्षमाणः सन् । कार्यं - भगवदाराधनरूपत्वेन स्वतःप्रयोजनभूतं । कर्म- ज्ञानादिकं । करोति अनुतिष्ठति । सः । सन्यासी-ज्ञाननिष्ठश्च । योगी - कर्मनिष्ठश्च । निरग्निः- अग्निसाध्यकर्मरहितः । अक्रियः-अनग्निसाध्यकर्मरहितश्च । नच सन्यासीभवति ॥ १ ॥ ... ...**

यं सन्नयासमिति प्राहु र्योगंतं विद्धि पाण्डव ।
न ह्यसन्नयस्तसंकल्पो योगी भवति कश्चन ॥ २ ॥

**यं । सन्नयासमिति - ज्ञानयोगमिति । प्राहुः । पण्डिताः प्रवदन्ति । हेपाण्डव ! तं । योगं - कर्मयोगमेव । विद्धि । हिं – यस्मात् । कश्चन - कश्चिदपि । योगी । असन्यस्तसंकल्पः - अपरित्यक्तदेहाभिमानः । न भवति । सर्वेप्यात्मज्ञानपूर्वकमेव कर्माचरन्तीत्यर्थः ॥ २ ॥ ...**

आरुरुक्षो र्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ ३ ॥

**योगं - आत्मावलोकनं । आरुरुक्षोः - आरोढुमिच्छोः । मुनेः-मुमुक्षोः । कर्म - कर्मयोगएव । कारणं- साधनं । उच्यते । योगारूढस्य - लब्धयोगस्य । तस्यैव - मुमुक्षोः । शमः- कर्मनिर्वृत्तिः । कारणं - साधनम् । उच्यते ॥ ३ ॥ ... ... ...**

यदा हि नेंद्रियार्थेषु न कर्म स्वनुपज्जते ।
सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥ ४ ॥

**यदा । योगी । इन्द्रियार्थेषु - विषयेषु । कर्मसु - तत्साधभूतेषु- च । नानुषज्जते - सक्तोनभवति । तदाहि । सर्वसंकल्पसन्यासी- सर्व कामविवर्जितः । योगारूढः - प्रतिष्ठितयोगइति । उच्यते ॥ ४ ॥**

उद्धरेदात्मनाऽऽत्मानं नात्मान मवसादयेत् ।
आत्मैव ह्यात्मनो बन्धु रात्मैव रिपुरात्मनः ॥ ५ ॥

**आत्मना- मनसा । आत्मानं- स्वात्मानम् । उद्धरेत् - संसारादुत्तारये- त् । आत्मानम् । नावसादयेत् - विषयासक्तेनमनसा नक्लेशयेत् । हि- यस्मात् । आत्मनः- स्वस्य । आत्मैव - विषयाऽननुषक्तं मनएव । बंधुः । आत्मनः । आत्मैव - विषयप्रवणंमनएव । रिपुः शत्रुः ॥ ५ ॥**

बंधुरात्मा त्मनस्तस्य येनात्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥ ६ ॥

**येन - पुरुषेण । आत्मना - स्वेनैव । आत्मा - मनः । जितः - विषयविमुखीकृतं । तस्य - आत्मनः । आत्मा । बन्धुः-सुहृत् । अना- त्मनः - अजितमनस्कस्यतु । आत्मैव - मनएव । शत्रुवत् । शत्रुत्वे - स्वाभीष्टप्रतिबन्धकरूपशत्रुत्वे । वर्तेत ॥ ६ ॥ ... ...**

जितात्मनः प्रशांतस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथामानाबमानयोः ॥ ७ ॥

**शी···योः–एवंरूपद्वंद्वेषु । जितात्मनः-निर्विकारचित्तस्य । प्रशान्तस्य निर्दुःखस्य पुरुषस्य । परं - अत्यन्तम् । आत्मा - शुद्धस्वरूपो जीवः । समाहितः – ध्यानविषयीकृतः, [ विशदानुन्धानयोग्योजातः । ] ॥ ७ ॥**

ज्ञान विज्ञान तृप्तात्मा कूटस्थो विजितेंद्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः ॥ ८ ॥

**ज्ञानं - आत्मस्वरूपविषयकज्ञानं, विज्ञानं - प्रकृतिविविक्ता- कारविषयकज्ञानं, ताभ्यां, तृप्तः - निर्वृतः, आत्मा - मनो यस्य सः, ज्ञा- नविज्ञानतृप्तात्मा । कूटस्थः - कूटे - देवत्व मनुष्यत्वादि सकलावस्थास्वनु**

वर्तमाने ज्ञानैकाकारे स्वात्मनि तिष्ठतीति तथोक्तः। विजितेन्द्रियः- विनिर्जितसकलेन्द्रियः। समलोष्टाश्मकाञ्चनः - लोष्टे - घटशकले, अश्मनि - पाषाणे, काञ्चने - स्वर्णेच, समबुद्धिः। एवं विधः। योगी। युक्त इति-आत्मावलोकनयोग्यइति। उच्यते॥ ८ ॥ ...

सुहृन्मित्रार्युदासीन मध्यस्थद्वेष्यबन्धुषु।
साधुष्वपि च पापेषु समबुद्धि र्विशिष्यते ॥ ९ ॥

सुहृदः - हितैषिणः, मित्राणि - वयस्थाः, अरयः - नैमित्तिकशत्रवः, उदासीनाः - निमित्ताभावेन हिताहित रूपोभयरहिताः, मध्यस्थाः - जन्मतएवतदुभयरहिताः, द्वेष्याः - नित्यद्वेषिणः, बन्धवः - स्वाभाविक सुहृदः, तेषु। साधुषु - धर्मशीलेषु। पापेषु- पापकर्मसु। [एतेषु सर्वेष्वपि]। समबुद्धिः - समा - तारतम्यरहिता बुद्धिः यस्य स पुरुषः। विशिष्यते - सर्वस्मादप्यतिशेते ॥ ९ ॥

योगी युंजीत सतत मात्मानं रहसि स्थितः।
एकाकी यतचित्तात्मा निराशी रपरिग्रहः ॥ १० ॥

यतचित्तात्मा - नियतमनस्कः। निराशीः - निरपेक्षः। अपरिग्रहः। आत्मव्यतिरिक्तपरिग्रहरहितः। योगी - कर्मयोगनिष्ठः। रहसि - विजने। एकाकी - असहायं। स्थित स्सन्। सततं। आत्मानं। युंजीत - दर्शनविषयं कुर्यात् ॥ १० ॥

शुचौ देशे प्रतिष्ठाप्य स्थिर मासन मात्मनः।
नात्युच्छ्रितं नातिनीचं चेलाजिनकुशोत्तरम् ॥ ११ ॥
तत्रैकाग्रं मनः कृत्वा यतचित्तेंद्रियक्रियः।
उपविश्यासने युंज्या द्योग मात्मविशुद्धये ॥ १२ ॥

शुचौ-पवित्रे। देशे। आत्मनः - स्वस्य। नात्युच्छ्रितं - नात्युन्नतं। नातिनीचं - नातिनिम्नम्। चेलाजिनकुशोत्तरं- चेलं- वस्त्रं, अजिनं-व्याघ्रादिचर्म, ते, कुशोत्तरे- कुशोपरिस्थिते, यस्मिन् तथोक्तं, कुशोपरि अजिनं अजिनस्योपरिचेल श्चास्तीर्येत्यर्थः। स्थिरं- अचलम्। आसनं। प्रतिष्ठाप्य॥ तत्र - तस्मिन्नासने। उपविश्य - उपविष्टः। मनः। एकाग्रं- योगैकप्रवणम्। कृत्वा-विधाय। यतचित्तेन्द्रियक्रियः - उपसंहृतांतर्बाह्ये

न्द्रियव्यापारस्सन् । आत्मविशुद्धये - आत्मनस्संसारसंबंधनिवृत्तये । योगं - आत्मावलोकनरूपं । युंज्यात् - कुर्यादित्यर्थः ॥ ११ ॥ १२ ॥

समं कायशिरोग्रीवं धारय न्नचलं स्थिरं ।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चा नवलोकयन् ॥ १३ ॥
प्रशान्तात्मा विगतभी र्ब्रह्मचारिव्रते स्थितः ।
मन स्संयम्य मच्चित्तो युक्त आसीत मत्परः ॥ १४ ॥

कायशिरोग्रीवं-कायोमध्यदेहः, शिरो मूर्द्धा, ग्रीवाकण्ठः, तेषांद्वंद्वैकवच्चनं, तत् । समं – अवक्रं । अचलं - निश्चलं । स्थिरं - स्वाश्रयत्वेन दृढश्चयथातथा । धारयन् । दिशश्च । अनवलोकयन् - अपश्यन् । स्वं-स्वकीयं । नासिकाग्रं - नासाग्रभागं । संप्रेक्ष्य - सम्यक्पश्यन् ॥ प्रशांतात्मा - शांतमनस्कः । विगतभीः - विगतभयः । ब्रह्मचारिव्रते - ब्रह्मचर्ये । स्थितः - वर्तमानः । मनः । संयम्य - नियम्य । मच्चित्तः - मदासक्तमनाः । युक्तः - अवहितः । मत्परः - मदेकप्रयोजनस्सन् । आसीत - वर्तेत ॥ १३ ॥ २४ ॥ ...

युंजन्नेवं सदात्मानं योगी नियतमानसः ।
शान्तिं निर्वाणपरमां मत्संस्थामाधिगच्छति ॥ १५ ॥

एवं- उक्तरीत्यामपि । सदा । आत्मानं - मनः । युञ्जन् - समाहितंकुर्वन् । नियतमानसः - निश्चलचित्तः । योगी । मत्संस्थां - मयि संस्था संपत्तिः यस्यांताम् । निर्वाणपरमां- सुखकाष्ठारूपां । शांतिं- निर्वृतिं । अधिगच्छति - प्राप्नोति ॥ १५ ॥ ... ...

नात्यश्नतस्तु योगोस्ति नचैकान्त मनश्नतः ।
नचातिस्वप्नशीलस्य जाग्रतो नैवचार्जुन ॥ १६ ॥

हेअर्जुन ! अत्यश्नतः - अतिभुञ्जानस्यपुरुषस्यतु । योगः । नास्ति–नसिद्ध्यति । एकान्तं । अनश्नतः - अभुंजानस्यच । नास्ति । अतिस्वप्नशीलस्य - अमितनिद्रास्वभावस्यच । योगोनास्ति । जाग्रतः - अत्यंत जागरणशीलस्य । योगोनास्त्येव ॥ १६ ॥ ...

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७ ॥

**किन्तु । युक्ताहारविहारस्य - मिताहारविहारस्य । कर्मसु - कार्येषु । युक्तचेष्टस्य - मितायासस्य । युक्तस्वप्नावबोधस्य - मितनिद्राजागरणस्य पुरुषस्यच । दुःखहा - बन्धनिवर्तकः । योगः । भवति - सिद्ध्यति ॥ १७ ॥**

यदा विनियतं चित्त मात्मन्येवा वतिष्ठते ।
निस्पृह स्सर्वकामेभ्यो युक्तइत्युच्यते तदा ॥ १८ ॥

**यदा । चित्तम् । आत्मन्येव । विनियतं - निश्चलं । अवतिष्ठते - प्रतिष्ठितंभवति । तदा । सर्वकामेभ्यः – निखिलबहिर्विषयेभ्यः । निस्पृहः - निवृत्तस्सन् । युक्तः- योगार्ह इति । उच्यते ॥ १८ ॥**

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
योगिनो यतचित्तस्य युंजतो योग मात्मनः ॥ १९ ॥

**यथा । दीपः । निवातस्थः-वातरहितप्रदेशेस्थितस्सन् । नेंगते-नचलति । यतचित्तस्य - नियतमनसः । योगिनः । योगं - आत्मावलोकनाभ्यासं । युंजतः-कुर्वतः । आत्मनः-आत्मस्वरूपस्य । सा । उपमा - दृष्टांतइति । स्मृता ॥ १९ ॥**

यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
तत्रचैवात्मनात्मानं पश्य न्नात्मनि तुष्यति ॥ २० ॥

**योगसेवया - योगाभ्यासेन । निरुद्धं - विषयेभ्योनिवर्तितं । चित्तं । यत्र - योगे । उपरमते - लीनंभवति । तत्रच - योगे । आत्मना - मनसा । आत्मानं । पश्यन् - अवलोकयन् । आत्मन्येव । तुष्यति ॥ २० ॥**

सुख मात्यन्तिकं यत्त द्बुद्धिग्राह्य मतीन्द्रियम् ।
वेत्ति यत्र नचैवायं स्थितश्चलति तत्त्वतः ॥ २१ ॥

**यत्र – योगे । अतीन्द्रियं – इन्द्रियार्थसन्निकर्षाजन्यं । बुद्धिग्राह्यं - बुद्ध्येकविषयं । आत्यंतिकं - नित्यं । यत्तत् - किमप्यनिर्वाच्यं । सुखं । वेत्ति - अनुभवति । यत्रच । स्थितः - अयं - पुरुषः । तत्त्वतः तद्भावात् । नचलत्येव ॥ २१ ॥ ...**

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते ॥ २२ ॥

**यं । लाभं । लब्ध्वा । ततः - योगात् । अधिकं - अतिशयितं । अपरं - अन्यं । लाभंच । नमन्यते । यस्मिन् - योगे । स्थितः । गुरुणा - अधिकेन । दुःखेनापि । नविचाल्यते - नप्रकंप्यते ॥ २२ ॥**

तं विद्या दुःखसंयोग वियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यो योगो निर्विण्णचेतसा ॥ २३ ॥

**तं । दुःखसंयोगवियोगं - दुःखसंयोगस्य दुःखसंबंधस्य वियोगं प्रत्यनीकं । योगसंज्ञितं - योगशब्दवाच्यं । विद्यात् । जानीयात् । सः - योगः । निश्चयेन - अयमीदृशइतिनिर्णयेन । अनिर्विण्णचेतसा - निर्वेदरहितमनसा । योक्तव्यः - कर्तव्यः ॥ २३ ॥**

संकल्पप्रभवा न्कामां स्त्यक्त्वा सर्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥ २४ ॥
शनैश्शनै रुपरमे द्बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनःकृत्वा न किंचिदपि चिन्तयेत् ॥ २५ ॥

**संकल्पप्रभवान् - देहात्माभिमानरूपसंकल्पजातान् । सर्वान्-समस्तान् । कामान्-मनोरथान् । अशेषतः - सवासनं । त्यक्त्वा । समंततः - सर्वस्माद्विषयात् । इंद्रियग्रामं - इंद्रियसमूहं । मनसैव । विनियम्य-उपसंहृत्य ॥ धृतिग्रहीतया-ग्रहीतविवेकया । बुद्ध्या - अध्यवसायेन । शनैः - मंदम्मंदं । उपरमेत - बहिर्विषयेभ्योनिवृत्तोभवेत । मनः चित्तं । आत्मसंस्थं -आत्मैकनिष्ठं । कृत्वा । किंचिदपि-अत्मव्यतिरिक्तम् । नचिन्तयेत् ॥ २४ ॥ २५ ॥ ... ...**

यतोयतो निश्चरति मन श्चंचल मस्थिरम् ।
ततस्ततो नियम्यैत दात्मन्येव वशं नयेत ॥ २६ ॥

**चञ्चलं - चलस्वभावं । अस्थिरं-आत्मनिस्थितिरहितं । मनः।**

**यतोयतः-विषये । निश्चरति - निर्गच्छति । ततस्ततः - वि-षयात् । एतत् - मनः । नियम्य । आत्मन्येव । वशं- अधीनं । नयेत्- प्रापयेत् ॥ २६ ॥ ... ... ...**

प्रशांतमनसं ह्येनं योगिनं सुख मुत्तमम् ।
उपैति शांतरजसं ब्रह्मभूत मकल्मषम् ॥ २७ ॥

**हि - यस्मात्कारणात् । अकल्मषं - योगेनविनष्टपापं । शांतरजसं - नष्टरजोगुणं । प्रशांतमनसं - निर्मलांतःकरणं । अतएव । ब्रह्मभूतं-स्वस्वरूपेणावस्थितं । एनं । योगिनं । उत्तमं - निर तिशयं । सुखं । उपैति- प्राप्नोति ॥ २७ ॥**

एवं युंजन् सदात्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्श मत्यंतं सुखमश्नुते ॥ २८ ॥

**एवं- उक्तप्रकारेण । आत्मानं । युंजन् । विगतकल्मषः - विगतस मस्तपापः । योगी । ब्रह्मसंस्पर्शं- ब्रह्मानुभवरूपं । अत्यन्तं- निर तिशयं । सुखं - आनन्दं । सुखेन- अनायासेन । सदा-सततं । अ श्नुते- अनुभवति ॥ २८ ॥**

सर्वभूतस्थ मात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ २९ ॥

**योगयुक्तात्मा- योगासक्तमनाः पुरुषः । सर्वत्र-सर्वेष्वात्मवस्तुषु । समदर्शनः- तुल्यबुद्धि स्सन् । आत्मानं- स्वस्वरूपं । सर्वभूतस्थं - सर्वात्मसमानाकारं । सर्वभूतानि- सर्वात्मस्वरूपाणि । आत्मनि - स्वात्म समानाकारेणचेत्यर्थः । ईक्षते- पश्यति ॥ २९ ॥**

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ ३० ॥

**यः- योगी । मां- मत्स्वरूपं । सर्वत्र- सर्वेष्वात्मसु । पश्यति । सर्वं-वस्तु । मयि । पश्यति । अहं । तस्य-योगिनः । नप्रणश्यामि - अदृश्यो नभवामि । मे ममच । सः- योगी । नप्रणश्यति । [किंतु सर्वदा तत्कृपावलोकनविषयो भवतीत्यर्थः] ॥ ३० ॥**

सर्वभूतस्थितं यो मां भजत्येकत्व मास्थितः।
सर्वथा वर्तमानोपि सयोगी मयिवर्तते ॥ ३१ ॥

**यः - योगी। सर्वभूतस्थितं - सर्वेषु भूतेषु अन्तर्यामितयान्तस्स्थितं। मां- । एकत्वं -ऐक्यं । आस्थितः-अंगीकृतवान् । भजति । सर्वथा - सर्वप्रकारेण। वर्तमानोपि-। मयि वर्तते-मय्येवसक्तोवर्तते॥ ३१॥**

आत्मौपम्येन सर्वत्र समं पश्यति योर्जुन।
सुखंवा यदिवा दुःखं सयोगीपरमोमतः॥ ३२ ॥

**हे अर्जुन! यः- योगी। आत्मौपम्येन - आत्मनामौपम्येन ज्ञानै काकारत्वसाम्येन। सर्वत्र - स्वात्मन्यन्येषुच । सुखंवायदिवा दुःखं समं पश्यति - परकीयसुखदुःखे स्वकीयतया पश्यति । सयोगी। परमः - उत्कृष्टः। मतः-सम्मतः॥ ३२॥ ... ...**

॥ अर्जुनउवाच ॥

योयं योग स्त्वया प्रोक्तस्साम्येन मधुसूदन
एतस्याहं नपश्यामि चञ्चलत्वात् स्थितिं स्थिरां॥ ३३ ॥

**हेमधुसूदन! त्वया। साम्येन - समत्वेन। यः - उक्तस्वरूपो योगः । प्रोक्तः । चञ्चलत्वात् - मनसश्चलस्वभावत्वाद्धेतोः । एतस्य । स्थिरां अचञ्चलां । स्थितिं- निष्ठाम् । अहं । नप-श्यामि॥ ३३॥ ... ... ...**

चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥ ३४॥

**हेकृष्ण! मनः - चित्तं। चञ्चलं- स्वतएवचञ्चलं-चलस्वभावंहि। किंच। प्रमाथि-प्रकर्षेणशरीरेंद्रियमथनशीलं । अतएव। बलवत् - जेतुमशक्यं। दृढं-विषयांतरादनिवृत्तस्वभावं। अतः। तस्य - मनसः। वायोरिव - प्रतिकूलवातस्येव । निग्रहं-नियमनं। सुदुष्करं - अतिदुष्करं। अहं। मन्ये - जानामि॥ ३४॥ ...**

॥ श्रीभगवानुवाच ॥

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेनतु कौन्तेय वैराग्येणच गृह्यते ॥ ३५ ॥

**हेमहाबाहो ! चलं-चंचलस्वभावं - । मनः । दुर्निग्रहं - निग्रहीतुमशक्यं । असंशयं - अत्रसंशयोन । किंतु । हेकौंतेय ! अभ्यासेन-योगाभ्यासेन । वैराग्येणच । कथंचित् । गृह्यते नियम्यते ॥ ३५ ॥**

असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मनातु यतता शक्योवाप्तु मुपायतः ॥ ३६ ॥

**असंयतात्मना । अनिर्जितमनसापुंसा । योगः । दुष्प्रापः - सर्वथाप्राप्तुमशक्यः । इति । मे - मम । मतिः - निश्चयः । किंतु । उपायतः- कर्मयोगेन । वश्यात्मना- वशीकृतमनसा । यतता-यत्नं कुर्वता पुरुषेण । अवाप्तुं । शक्यः ॥ ३६ ॥**

॥ अर्जुनउवाच ॥

अयति श्श्रद्धयोपेतो योगा च्चलितमानसः ।
अप्राप्य योगसंसिद्धिं कांगतिं कृष्ण गच्छति ॥ ३७ ॥

**हेकृष्ण ! श्रद्धया- विश्वासेन । उपेतः-योगी । अयतिः - दृढप्रयत्न रहितः । योगसंसिद्धिं -योगस्य समदर्शनरूपस्य संसिद्धिं । अप्राप्य- अलब्ध्वा । योगात । चलितमानसः - च्युतमनस्कःपुमान् । कां । गतिं । गच्छति- प्राप्नोति ॥ ३७ ॥ ... ...**

कच्चिन्नोभयविभ्रष्ट श्छिन्नाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥ ३८ ॥

**हेमहाबाहो ! अप्रतिष्ठः - क्रियमाणे कर्मणि फलाभिसंधि रहितः । ब्रह्मणःपथि- ब्रह्मप्राप्ति साधनभूते योगमार्गे । विमूढः- प्रच्युतः । अतएव । उभयविभ्रष्टः-भोगमोक्षरूपपुरुषार्थ द्वयरहितस्सन् । छिन्नाभ्रमिव- मेघशकलमिव । ननश्यतिकच्चित्-नष्टोनभवतिकिम् ? ॥ ३८ ॥**

एतन्मे संशयं कृष्ण च्छेतु मर्हस्य शेषतः ।
त्वदन्य स्संशयस्यास्य च्छेत्ता नह्युपपद्यते ॥ ३९ ॥

हेकृष्ण ! मे- मम । एतं । संशयं- सन्देहं । अशेषतः - सवासनं । छेतुं- परिहर्तुं । अर्हसि । हि- यस्मात् - त्वदन्यः -त्वद्व्यतिरिक्तः । अस्य । संशयस्य । छेत्ता- परिहर्ता । नोपपद्यते- नसंभवति ॥ ३९ ॥ ... ... ...

॥ श्रीभगवानुवाच ॥

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।
न हि कल्याणकृत्कश्चित् दुर्गतिं तात गच्छति ॥ ४० ॥

हेपार्थ ! तस्य- श्रद्धयायोगप्रवृत्तस्य । इह-स्वर्गाद्यनुभवे । अमुत्र - ब्रह्मानुभवेच । विनाशः-अलाभरूपोनाशः । नास्त्येव । हि-यस्मात् । तात-हेवत्स ! । कल्याणकृत्-शुभतरयोगानुष्ठाता । कश्चिदपि । दुर्गतिं । नगच्छति-नप्राप्नोति ॥ ४० ॥ ... ...

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वती स्समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टो भिजायते ॥ ४१ ॥

योगभ्रष्टः - योगप्रच्युतःपुरुषः । पुण्यकृतां - सुकृतीनां । लोकान् - स्वर्गादिलोकान् । प्राप्य । तत्र । शाश्वतीः । समाः - संवत्सरान् । उषित्वा - स्थित्वा । ततः । शुचीनां - शुद्धानां । श्रीमतां - ऐश्वर्यसंपन्नानां । गेहे - गृहे । अभिजायते - अभिजातोभवति ॥ ४१ ॥ ... ... ...

अथवा योगिनामेव कुले भवति धीमताम् ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥ ४२ ॥

अथवेति - पक्षांतरं । धीमतां - योगोपदेशसमर्थानां । योगिनां-योगं कुर्वतामेव । कुले । भवति - जायते । ईदृशं - एवंविधं । यत-जन्म । एतत् । लोके । दुर्लभतरं । अत्यंतंदुर्लभंहि ॥ ४२ ॥ ...

तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकम् ।
यततेच ततो भूयः संसिद्धौ कुरुनन्दन ॥ ४३ ॥

हेकुरुनन्दन! तत्र-तस्मिन्जन्मनि । पौर्वदैहिकं पूर्वदेहाभ्यस्तं

तं । बुद्धिसंयोगं - योगविषयबुद्धिसंबंधं । लभते - प्राप्नोति । ततः - तदनंतरं । भूयः-पुनरपि । [सुप्तप्रबुद्धइव] संसिद्धौ–संसिद्धिविषये । यतते-यत्नंकरोति ॥ ४३ ॥ ... ... ...

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोपि सः ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥ ४४ ॥

सः - योगभ्रष्टः । अवशोपि-अनिच्छन्नपि । तेन । पूर्वाभ्यासेनैव । ह्रियते - योगेआकृष्यतेहि । योगस्य जिज्ञासुरपि - योगस्वरूपं ज्ञातु मिच्छन्नपि पुरुषः । शब्दब्रह्म - देवमनुष्यादिशब्दाद्यभिलापयोग्यप्रकृतिसंबंधं । अतिवर्तते - अतिक्रामति । (योगारूढस्तु किमुतेति भावः) ॥ ४४ ॥ ... ...

प्रयत्ना द्यतमानस्तु योगी संशुद्धकिल्बिषः ।
अनेकजन्मसंसिद्ध स्ततो याति परां गतिम् ॥ ४५ ॥

योगी - चलितयोगस्तु । प्रयत्नात् । यतमानः-योगविषृद्धौयत्नंकुर्वन् । संशुद्धकिल्बिषः - विधूतसमस्तपापः । अनेकजन्मसंसिद्धः - अनेकेषु जन्मसु अभ्यासेन लब्धयोगस्सन् । ततएव । परां-उत्कृष्टां । गतिं । याति-प्राप्नोति ॥ ४५ ॥ ... ...

तपस्विभ्योऽधिकोयोगी ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्य श्चाधिकोयोगी तस्माद्योगी भवार्जुन ॥ ४६ ॥

योगी । तपस्विभ्यः - तपोनिष्ठेभ्योपि । अधिकः - श्रेष्ठः । ज्ञानिभ्योपि-ज्ञाननिष्ठेभ्योपि । अधिकः । कर्मिभ्यः-कर्मनिष्ठेभ्योपि । अधिकः । मतः-संमतः । तस्मात्-कारणात् । हेअर्जुन ? त्वं । योगी-योगनिष्ठः । भव ॥ ४६ ॥ ... ...

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान् भजते योमां स मे युक्ततमो मतः ॥ ४७ ॥

॥ इति श्रीभगवद्गीतायां षष्ठोऽध्यायः ॥

यः - योगी । मद्गतेन - मदेकप्रवणेन । अंतरात्मना - मनसा । श्रद्धावाम्-मत्प्राप्तिविषयकत्वरा युक्तस्सन् । मां- अखिलहेयप्रत्यनीक कल्याणैकतानं । भजते- उपास्ते । सः । सर्वेषां-योगिनांमध्ये । युक्ततमः- श्रेष्ठतमः । मे- मम । मतः- संमतः ॥ ४७ ॥

इति श्रीमद्यामुनाचार्यविरचिते भगद्गीतार्थ संग्रहे

## षष्ठोध्यायः ॥ ६ ॥

## अथसप्तमोध्यायः ॥

॥ श्रीभगवानुवाच ॥

मय्यासक्तमनाः पार्थ योगं युंजन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १ ॥

एवं प्रथमेनाध्यायषट्केन परब्रह्म प्राप्त्युपायभूतस्यो पासनस्य अङ्गभूत मात्मज्ञानपूर्वककर्मानुष्ठानसाध्यं प्रत्यगात्मयाथात्म्यदर्शन मुक्तम्। इदानीं अध्यायषट्केनपरब्रह्मस्वरूपं भक्तिशब्दवाच्यंतदुपासनंचोच्यते । तत्र सप्तमेध्याये भगवतस्स्वरूपयाथात्म्यं, तस्य प्रकृत्यातिरोधानं, तन्निवृत्तये भगवत्प्रपत्ति रुपासकचतुर्विधाभेदो ज्ञानिनः श्रैष्ठ्यंचोच्यते ।

हेपार्थ । मदाश्रयः-अहमेवाश्रयोयस्यसमदाश्रयः, मदेकधारकः । मयि- सर्वेश्वरे । आसक्तमनाः-संसक्तचित्तः । योगं । युञ्जन्-कर्तुंप्रवृत्तस्सन् । समग्रं संपूर्णं । यथा-येन ज्ञानेन । असंशयं- संशयरहितंयथा तथा । ज्ञास्यसि । तज्ज्ञानं । शृणु-सावधानमाकर्णय ॥ १ ॥

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥ २ ॥

सविज्ञानं-समस्तचिदचिद्वस्तुविविक्ताकारविषयज्ञानसहितं । अशे-

षतः-समस्तं । इदं - वक्ष्यमाणं । ज्ञानं - मत्स्वरूपविषयज्ञानं । ते - तव । अहं । वक्ष्यामि । यत् - ज्ञानं । ज्ञात्वा । इह - मत्स्वरूपे । भूयः- पुनरपि । ज्ञातव्यं । अन्यत् । नावशिष्यते - अवशिष्टंनास्ति ॥ २ ॥

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥ ३ ॥

मनुष्याणां - अधिकारिणां । सहस्रेषु - मध्ये । कश्चिदेव । सिद्धये- फलसिद्धिपर्यन्तं । यतति - यत्नंकरोति । यततां-यत्नंकुर्वता मपि । सहस्रेषु-मध्ये । कश्चिदेव । मां । वेत्ति-जानाति । सिद्धानां - मद्विषयक- ज्ञानवतां । सहस्रेषु । कश्चिदेव । मां । तत्त्वतः-यथावत् । वेत्ति ॥ ३ ॥

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ॥
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४ ॥

भूमिः - पृथ्वी । आपः-जलं । अनलः-तेजः । वायुः- मरुत् । खं- आकाशं । मनः-इन्द्रियवर्गः । बुद्धिः- महत्तत्वं । अहंकारः- सात्विका दिभेदेनत्रिविधोहंकारश्च । इति-अनेनप्रकारेण । अष्टधा - अष्टभिःप्रकारैः । भिन्ना । प्रकृतिः । मे-मदीया ॥ ४ ॥

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ ५ ॥

इयं-अष्टधाभिन्ना मे प्रकृतिः । अपरा-जडत्वान्निकृष्टा । हेमहाबा हो । इतः-अचेतनभूतायाःप्रकृतेः । अन्यां-विलक्षणां । जीवभूतां-जीवरूपां । मे प्रकृतिंतु । परां-अजडत्वादुत्कृष्टतरां । विद्धि-जानीहि । यया-जीवभूतया । प्रकृत्या । इदं-स्थावरजङ्गमात्मकं जगत । धार्यते ॥ ५ ॥

एतद्योनीनि भूतानि सर्वाणीत्युपधारय ।
अहं कृत्स्नस्यजगतः प्रभवः प्रलयस्तथा ॥ ६ ॥

सर्वाणि - ब्रह्मादिस्तंबपर्यंतानि । भूतानि । एतद्योनीनि-एतत् - प्रकृतिद्वयं,योनिः उपादानकारणं,येषांतानितथोक्तानि। इति-अनेनप्रकारेण। उपधारय-जानीहि । अतएव । कृत्स्नस्य - मदीयप्रकृतिद्वयविशिष्टस्य सर्व

स्य । जगतः । अहं । प्रभवः-उत्पत्तिकारणम् । तथा । प्रलयः - लयकारणंच ॥ ६ ॥

मत्तः परतरंनान्यत्किंचिदस्ति धनंजय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ ७ ॥

हेधनंजय ! मत्तः-मदपेक्षया । अन्यत् – किंचदपि । परतरं-उत्कृष्टतरं । नास्ति । सर्वं इदं - चिदचिद्वस्तुजातं । सूत्रे-तन्तौ । मणिगणाः-रत्नसमूहाइव । मयि । प्रोतं- स्यूतम् ॥ ७ ॥

रसोऽहमप्सु कौंतेय प्रभा स्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ८ ॥

हेकौन्तेय ! अप्सु–जलेषु। रसः-मधुरादिः । अहमेव । शशिसूर्ययोः । प्रभा–कांतिः । अहमेव । अस्मि । सर्ववेदेषु । प्रणवोहं । खे-आकाशे । शब्दोहं । नृषु-मनुष्येषु । पौरुषं - उद्योगोहम् ॥ ८ ॥

पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ ।
जीवनं सर्व भूतेषु तपश्चास्मि तपस्विषु ॥ ९ ॥

पृथिव्यां- भूमौ । पुण्यः-सुरभिः । गन्धश्चाहं । विभावसौ–वह्नौ । तेजश्चाहमस्मि । सर्वभूतेषु । जीवनं–प्राणधारणं । अहं । तपस्विषु-वानप्रस्थादिषु । तपश्चाहं । अस्मीतिसर्वत्रसम्बन्धः ॥ ९ ॥

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥ १० ॥

हेपार्थः ! सर्वभूतानां । सनातनं-नित्यं । बीजं-कार्यारम्भसमर्थं । मां । विद्धि - जानीहि । बुद्धिमतां । बुद्धिः–प्रज्ञा । अहमस्मि । तेजस्विनां । तेजः-पराभिभवनसामर्थ्यं । अहमस्मि ॥ १० ॥

बलं बलवतां चाहं कामरागविवर्जितम् ।
धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥ ११ ॥

कामरागविवर्जितं - कामः–अप्राप्तवस्तुन्यभिलाषः, रागः–अभिलषितार्थलाभेपिपुनरधिकार्थेतृष्णा, ताभ्यांविवर्जितम् । बलवतां जनानां

बलं-सामर्थ्यञ्च । अहं । हेभरतर्षभ ! भूतेषु-प्राणिषु । धर्माविरुद्धः-धर्मस्याप्रतिकूलः । कामश्चाहमस्मि ॥ ११ ॥

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये।
मत्त एवेतितान् विद्धि नत्वहं तेषु ते मयि ॥ १२ ॥

सात्विकाः-सत्वप्रधानाः । येभावाः-शमादयः। संति । राजसाः-रजोगुणप्रधानाः । येचभावाः-हर्षादयः । सन्ति । तामसाः - तमोगुणप्रधानाः। येचभावाः-शोकमोहादयः। सन्ति। तान्सर्वान् । मत्तएवेति विद्धि - मत्सकाशादेवजातान् जानीहि । अहं । तेषु न-तदायत्तोन । तेतु। मयि-मदायत्ताः ॥ १२ ॥

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥ १३ ॥

गुणमयैः - सत्वादिगुणप्रचुरैः । एभिः-पूर्वोक्तैः । त्रिभिः भावैः। इदं । सर्वं । जगत्। मोहितम् । एभ्यः-सात्विकराजसतामसेभ्योभावेभ्यः । परं-विप्रकृष्टं । अव्ययं-सदैकरूपं । मां । नाभिजानाति - ज्ञातुंनशक्नोति ॥ १३ ॥

दैवीह्येषा गुणमयी मम माया दुरत्यया ।
मामेवये प्रपद्यन्ते मायामेतां तरंति ते ॥ १४ ॥

गुणमयी - सत्वरजस्तमोगुणमयी । दैवी-देवेनमयानिर्मिता। एषा । मम। माया । दुरत्यया - दुरतिक्रमा । ये । मामेव । प्रपद्यन्ते । ते । एतां-मायां। तरन्ति-क्रामन्ति ॥ १४ ॥

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
मायया पहृतज्ञाना आसुरं भावमाश्रिताः ॥ १५ ॥

दुष्कृतिनः - पापकर्माणः । अतएव। मूढाः - अविदितमत्स्वरूपाः। मायया - विपरीतवासनया। अपहृतज्ञानाः। आसुरं - असुरसंबन्धिनम्। भावम्। आश्रिताः। एते। नराधमाः-चत्वारः। मां न प्रपद्यन्ते ॥ १५ ॥

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तोजिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ १६ ॥

**हे भरतर्षभ - भरतकुलावतंस । हे अर्जुन । सुकृतिनः - पुण्यकर्माणः । चतुर्विधाः । जनाः । मां । भजन्ते - उपासते । तानेवाह-आर्त्तः-नष्टैश्वर्यपुनः प्राप्तिकामः । अर्थार्थी-अप्राप्तैश्वर्यकामः । जिज्ञासुः -आत्मदर्शनकामः । ज्ञानी - मत्प्राप्तिदर्शनकामश्च ॥ १६ ॥**

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रियः ॥ १७ ॥

**तेषां-पूर्वोक्तानांमध्ये । ज्ञानी - भगवच्छेषतैकरसात्मस्वरूपवित् । यतः नित्ययुक्तः, एकभक्तिश्च-यतस्तस्यमदेकप्राप्यस्यमयायोगोनित्यः, इतरयोश्चयावत्स्वाभिलषितप्राप्तिमयायोगः, यतश्च तस्य मय्येकस्मिन्नेवमुख्याभक्तिः, इतरयोश्च स्वाभिलाषिते तत्साधनत्वेनमयिच । अतोहेतोः । सः - ज्ञानी । विशिष्यते-उत्कृष्टोभवति । किंच । अहं । ज्ञानिनः । अत्यर्थं-अतीव । प्रियः-प्रीतिविषयः । सः - ज्ञानीच । मम प्रियोहि ॥ १७ ॥**

उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥ १८ ॥

**एते-पूर्वोक्ताः । सर्वे । उदाराः - मदौदार्यप्रकाशकत्वेनममवदान्याः । एवं । ज्ञानीतु । मे - मम । आत्मैव । इति । मे । मतं- सिद्धांतः । हि - यस्मात् कारणात् । सः - ज्ञानी । युक्तात्मा - मदेकायत्तस्वरूपः । मामेव । अनुत्तमां- परमां । गतिं । आस्थितः - समाश्रितः ॥ १८ ॥ ... ... ...**

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥ १९ ॥

**बहूनाम्-भूयसां । जन्मनां - पुण्यजन्मनां । अंते - अवसाने । ज्ञानवान् - मच्छेषतैकस्वरूपज्ञानसंपन्नोभूत्वा । सर्वं - प्राप्यप्रापकमन्यच्चमनीषितंसर्वमपि । वासुदेवएवेति । मां । प्रपद्यते - भजते । सः । महात्मा । सुदुर्लभः - अत्यंतदुर्लभः ॥ १९ ॥ ... ...**

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्ते न्यदेवताः ।
तं तं नियममास्थाय प्रकृत्यानियताः स्वया॥ २० ॥

सर्वे लौकिकाः पुरुषाः । स्वया – स्वकीयया । प्रकृत्या – वासनया । नियताः – समन्विताः । तैस्तैः – स्वस्ववासनानुगुणैः । कामैः – विषयैः । हृतज्ञानाः – प्रतिबद्धमद्विषयज्ञानास्संतः । अन्यदेवताः- केवलमिंद्रादीनेव । तंतं - तत्तद्देवताराधनानुगुणं । नियमं । आस्थाय- आश्रित्य । प्रपद्यंते – भजंते ॥ २० ॥ ... ...

योयो यांयां तनुं भक्तः श्रद्धया र्चितुमिच्छति ।
तस्यतस्याचलांश्रद्धां तामेव विदधाम्यहम् ॥ २१ ॥

योयः – पुरुषः । यांयांतनुं – इंद्रादिरूपांमदीयांतनुं । भक्तः – भक्तियुक्तः सन् । श्रद्धया - विश्वासेन । अर्चितुं - आराधयितुं । इच्छति । तस्यतस्य-मत्तनुत्वेनजानतोपिपुरुषस्य । अहं । तामेव श्रद्धां । अचलां - निर्विघ्नां । विदधामि - करोमि ॥ २१ ॥ ...

स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान् मयैव विहितान् हितान् ॥ २२ ॥

सः - पुरुषः । तया - श्रद्धया । युक्तः - सहितस्सन् । तस्य - मच्छरीरभूतेंद्रादेः । आराधनं–अर्चनं । ईहते–अनुतिष्ठति । ततः-तस्मात् । मया–तत्तदंतर्यामिणैवहि । विहितान् - वितीर्णान् । तान् – स्वाभिलषितान् । कामान् –विषयान् । लभते - प्राप्नोति ॥ २२ ॥ ...

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ।
देवान्देवयजो यांति मद्भक्ता यांति मामपि ॥ २३ ॥

तेषां । अल्पमेधसां - अल्पबुद्धीनां । तत् – फलम् । अन्तवत् – नाशवद्भवति । देवयजः – केवलेन्द्रादिदेवताराधनपराः । देवान् यांति – तत्तद्देवतासायुज्यं प्राप्नुवन्ति । मद्भक्तास्तु । मामपि यान्ति- पुनरावृत्तिरहितं मत्सायुज्यमेव प्राप्नुवन्ति ॥ २३ ॥

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः ।
परंभावमजानन्तो ममाव्ययमनुत्तमम् ॥ २४ ॥

अबुद्धयः - मद्विषयकज्ञानशून्याः । अव्ययं - सततैकरूपम् । अनुत्तमं - उत्कृष्टतमं । मम - सर्वेश्वरस्य । भावं - अप्राकृतरूपं । अजानन्तः । मां मायामानुषं । अव्यक्तं-पूर्वमनभिव्यक्तम् । व्यक्तिमापन्नं-इदानीं कर्मविशेषादभिव्यक्तिमापन्नम् । मन्यन्ते-अवबुद्ध्यन्ते ॥ २४ ॥

नाहं प्रकाशः सर्वस्य योगमायासमावृतः
मूढो यं नाभिजानाति लोको मामजमव्ययम् ॥ २५ ॥

योगमायासमावृतः - योगः - देवमनुष्यादि समानशरीरसंयोगः, सएव माया, तया समावृतः - तिरोहितस्वरूपोऽहम् । सर्वस्य-जनस्य । नप्रकाशः - प्रकाशो नभवामि । अतः । मूढः - अज्ञः । अयम् । लोकः - जनः । अजं - उत्पत्तिरहितम् । अव्ययं - नाशरहितश्च । मां नाभिजानाति - नवेत्ति ॥ २५ ॥

वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥ २६ ॥

हे अर्जुन । समतीतानि - अतिक्रान्तानि । वर्तमानानि - इदानीं वर्तमानानि । भविष्याणि- अनागतानि सर्वाणि । भूतानि । अहम् । वेद - जानामि । मान्तु । कश्चन-कश्चिदपि । न वेद - न जानाति ॥ २६ ॥

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत ।
सर्वभूतानि संमोहं सर्गे यांति परंतप ॥ २७ ॥

हे परन्तप - शत्रुसन्तापकर । हे भारत । सर्वभूतानि । इच्छाद्वेषसमुत्थेन । द्वन्द्वमोहेन - सुखदुःखादिद्वन्द्वरूपमोहहेतुना । सर्गे - जन्मकालएव । मोहम् । यान्ति - प्राप्नुवन्ति॥ २७ ॥

येषां त्वंतगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वंद्वमोहनिर्मुक्ता भजंते मां दृढव्रताः ॥ २८ ॥

पुण्यकृतां - सुकृतिनां । येषां । जनानान्तु । पापं - अनादिका-लप्रवृत्तं पापकर्म । अन्तगतं - विनष्टं । ते - जनाः । द्वन्द्वमोहनिर्मुक्ताः । दृढव्रताश्चसन्तः । मामेव । भजन्ते ॥ २८ ॥

जरामरणमोक्षाय मामाश्रित्य यतन्तिये ।
तेब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥ २९ ॥

ये - जनाः । जरामरणमोक्षाय - जरामरणादिरूपसर्वदुःखनिवृत्तये । । मां । आश्रित्य । यतन्ति - यत्नंकुर्वन्ति । ते । तद्ब्रह्म । कृत्स्नं - अध्यात्मं । अखिलं । कर्मच । विदुः - जानीयुः ॥ २९ ॥

साधिभूताधिदैवं मां साधियज्ञंच ये विदुः ।
प्रयाणकालेपिचमां ते विदु र्युक्तचेतसः ॥ ३० ॥

इति सप्तमोध्यायः ॥

ये - जनाः । साधिभूताधिदैवं - अधिभूताधिदेवाभ्यां सहितं । मां । विदुः - जानन्ति । तथा । साधियज्ञं - अधियज्ञसहितश्च । मां । विदुः । तेच । प्रयाणकालेपि - चरमप्रयाणसमयेपि । युक्तचेतसः - मदासक्तमनसः सन्तः । मां । विदुः - स्वस्वपुरुषार्थानुगुणं जानीयुरित्यर्थः ॥ ३० ॥

इति श्रीमद्यामुनाचार्य विरचिते भगवद्गीतार्थसंग्रहे

## सप्तमोध्यायः ॥ ७ ॥

## ॥ अथ अष्टमोऽध्यायः ॥

अर्जुनउवाच ॥

किं तद्ब्रह्म? किमध्यात्मं? किं कर्म? पुरुषोत्तम ।
अधिभूतंच किंप्रोक्त? मधिदैवं किमुच्यते? ॥ १ ॥

अथाष्टमे ध्याये पूर्वाध्यायप्रस्तुता एव ज्ञातव्योपायभेदा विवि-

च्यन्ते । हेपुरुषोत्तम । जरामरणमोक्षाय । (यतमानानां ज्ञातव्यतयोक्तं) तत् । ब्रह्म । किं । अध्यात्मंच । किं । कर्मंच । किं । अधिभूतश्च । किं प्रोक्तम् । अधिदैवं । किं । उच्यते ॥ १ ॥

अधियज्ञः कथं कोत्र? देहेऽस्मिन् मधुसूदन ।
प्रयाणकालेच कथं ज्ञेयोसि नियतात्मभिः? ॥ २ ॥

हे मधुसूदन । अत्र–यो यो यां यां तनुमिति पूर्वं त्वयानिर्दिष्टे । अस्मिन्- दृश्यमाने । देहे–इन्द्रियादिरूपे । अधियज्ञः । कः [ सच ] कथं - किंप्रकारः । प्रयाणकालेच । नियतात्मभिः – नियतमनस्कैः । कथं । ज्ञेयोसि–ज्ञातव्योसि ॥ २ ॥

श्रीभगवानुवाच ॥

अक्षरंब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो विसर्गः कर्म संज्ञितः ॥ ३ ॥

अक्षरं – नाशरहितम् प्रत्यगात्मस्वरूपं । ब्रह्म – ब्रह्मेति पूर्वनिर्दिष्टम् । स्वभावः – प्रकृतिसंबन्धादिः । अध्यात्मं । भूतभावोद्भवकरः । देवमनुष्यादिभावोत्पत्तिकरः । विसर्गः – योषाग्नौ रेतो रूपाद्गति त्यागः । कर्म संज्ञितः - कर्मशब्द निर्दिष्टः । एतत्त्रितयमपि मुमुक्षोः प्राप्यतया परिहरणीयतयाच ज्ञातव्यमित्यर्थः ॥ ३ ॥

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।
अधियज्ञोहमेवात्र देहे देहभृतांवर ॥ ४ ॥

क्षरः–क्षरणं । भावः–स्वभावः । शब्दादिविषयः । अधिभूतं । पुरुषः – भोक्तृत्वावस्थापन्नो जीवः । अधिदैवतं । देहभृतां–शरीरधारिणां मध्ये । वर–श्रेष्ठ हेअर्जुन । अत्र – अस्मिन् इन्द्रादिरूपे । देहे – मच्छरीरे [ विद्यमानः ] । अहमेव । अधियज्ञः यज्ञैराराध्यतया अधियज्ञशब्दनिर्दिष्ट इत्यर्थः ॥ ४ ॥

अन्तकालेच मामेव स्मरन् मुक्त्वा कळेबरम् ।
यः प्रयाति समद्भावं याति नास्त्यत्र संशयः ॥ ५ ॥

यः। अन्तकाले - शरीरावसानसमये। मां - सर्वात्मभूतं। स्मरन्नेव। कळेबरम्। मुक्त्वा - विहाय । प्रयाति - गच्छति। सः। मद्भावं। याति - प्राप्नोति । अत्र - अस्मिन्नर्थे । संशयो न - सन्देहो नास्त्येव ॥ ५ ॥

यंयं वापि स्मरन् भावं त्यजत्यन्ते कलेबरम् ।
तन्तमेवै तिकौन्तेय सदा तद्भावभावितः ॥ ६ ॥

हे कौन्तेय। अन्ते – अन्तकाले । यं यं वापि भावं - देवतिर्यङ्मनुष्यादिस्वभावं। स्मरन् – अनुचिन्तयन् । कळेबरम् । त्यजति - मुंचति। सदा – जीवनकाले, निरन्तरम्। तद्भावभावितः – तस्य- अन्तकाले स्मर्यमाणस्य, भावस्य, भावेन–अनुचिन्तनेन, भावितः–वशीकृतान्तःकरणः सन् । तं तमेव। भावम्। एति - प्राप्नोति ॥ ६ ॥

तस्मात्सर्वेषुकालेषु मामनुस्मर युद्धयच ।
मय्यर्पितमनोबुद्धि र्मामेवैष्यस्य संशयः ॥ ७ ॥

तस्मात् - हेतोः । सर्वेषु कालेषु - आप्रयाणमहरहः। मां–परमप्राप्यभूतम्। अनुस्मर - अनुचिन्तय । युद्धयच - वर्णाश्रमोचितं युद्धादिक कर्म कुरु। तथासति। मयि–विषये। अर्पितमनोबुद्धिः – अर्पिते - निवेशिते, मनोबुद्धी – मनोध्यावसायौ, येन स तथोक्तः सन्। [अन्तकाले मामेव स्मरन्नित्यर्थः] मामेव। एष्यसि - प्राप्स्यसि। असंशयः - अस्मिन्नर्थे संशयो नास्ति ॥ ७ ॥

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ।
परमं पुरुषं दिव्यं याति पार्थानुचिंतयन् ॥ ८ ॥

हेपार्थ ! अभ्यासयोगयुक्तेन – अभ्यासः – प्रत्यहं मनसा उपास्य वस्तु संशीलनं, योगः – " शुचौ देशे प्रतिष्ठाप्ये " त्यायुक्तरीत्या उपासनं, ताभ्यां युक्तेन – सहितेन । अतएव, नान्यगामिना – अन्यविषयविमुखेन । चेतसा – मनसा । दिव्यं – अप्राकृतं । परमं – सर्वस्मात्परमं । पुरुषं – मां । अनुचिन्तयन्। याति– मामेव प्राप्नोति ॥ ८ ॥

कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः।
सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात् ॥ ९ ॥
प्रयाणकाले मनसाऽचलेन भक्त्या युक्तो योगबलेन चैव।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यं ॥ १० ॥

**यः। भक्त्या। योगबलेनच। युक्तस्सन्। प्रयाणकाले – चरमप्रयाणसमये। भ्रुवोर्मध्ये। प्राणं। सम्यक्। आवेश्य– संस्थाप्य। तत्र। कविं – सर्वज्ञं। पुराणं – पुरातनं। अनुशासितारं –सर्वस्य- नियन्तारं। अणोरणीयांसं - जीवादपिसूक्ष्मतरं। सर्वस्य। धातारं – स्रष्टारं। अचिन्त्यरूपं - चिन्तयितुमशक्यरूपं। तमसः - प्रकृतेः। परस्तात् - परमप्राकृतं। आदित्यवर्णं – सूर्यवर्चसं। दिव्यं। परंपुरुषं - परमात्मानं। अचलेन। मनसा। अनुस्मरेत् –अनुचिन्तयेत्। सः। तमेव - पुरुषं। उपैति ॥ ९ ॥ १० ॥**

यदक्षरं वेदविदो वदंति विशंति यद्यतयो वीतरागाः।
यदिच्छन्तो ब्रह्मचर्यं चरंति तत्तेपदं संग्रहेण प्रवक्ष्ये ॥ ११ ॥

**वेदविदः - वेदार्थवेदिनः। यदक्षरं। वदन्ति। वीतरागाः– विषयांतरविरक्ताः। यतयः - मुनयः। यत् - विशन्ति - प्राप्नुवन्ति। यत्। इच्छन्तः – प्राप्तुमिच्छन्तः। ब्रह्मचर्यं - ऊर्ध्वरेतः स्वरूपं। चरन्ति। तं – निखिलवेदान्तप्रसिद्धं। पदं - प्राप्यं। ते - तुभ्यं। संग्रहेण। प्रवक्ष्ये - वक्ष्यामि ॥ ११ ॥**

सर्वद्वाराणि संयम्यमनो हृदि निरुध्य च।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणां ॥ १२ ॥
ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥ १३ ॥

**सर्वद्वाराणि – श्रोत्रादीन्द्रियाणि। संयम्य - सर्वव्यापारेभ्यो निवर्त्य। मनः। हृदि - हृदयकमलांतस्स्थिते मयि। निरुध्य - नियम्य। योगधारणां – योगस्थितिं। आस्थितः – समाश्रितः। ब्रह्म –ब्रह्म**

**स्वरूपवाचकं । ओमित्येकाक्षरं । व्याहरन् - उच्चारयन् । मां - तद्वाच्यभूतं । अनुस्मरन् - अनुसंदधानः । आत्मनः - स्वस्य । प्राणं । मूर्ध्नि - ब्रह्मरन्ध्रे । आधाय - प्रवेश्य । देहं । त्यजन् । यः । प्रयाति - अर्चिरादिमार्गेण गच्छति ! सः । परमां पुनरावृत्तिरहितां । गतिं - प्राप्यं । याति - गच्छति ॥ १२ ॥ १३ ॥**

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ १४ ॥

**हेपार्थ ! यः । नित्यशः - प्रत्यहं । सततं - सर्वावस्थासु । अनन्यचेताः - अनन्यमनस्कः । मां । स्मरति । नित्ययुक्तस्य - मयि नित्ययोगवतः । तस्य - योगिनः । अहं । सुलभः - सुखेन लब्धुं शक्यः ॥ १४ ॥**

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवंति महात्मानः संसिद्धिं परमां गताः ॥ १५ ॥

**मां - अखिलहेयप्रत्यनीकं । उपेत्य - प्राप्य । पुनः - भूयोपि । दुःखालयं - दुःखास्पदं । अशाश्वतं - अस्थिरं । जन्म । नाप्नुवंति । यतः । ते । महात्मानः - यत्थावस्थितमत्स्वरूपज्ञानाः । परमां - निरतिशयां । संसिद्धिं - गतिं । गताः - प्राप्ताः ॥ १५ ॥**

आब्रह्मभुवनाल्लोकाः पुनरावृत्तिनोऽर्जुन ।
मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यते ॥ १६ ॥

**हेअर्जुन ? आब्रह्मभुवनात् - ब्रह्मलोकपर्यंताः । लोकाः । पुनरावर्तिनः - विनाशिनः । हेकौन्तेय ? मां । उपेत्यतु - प्राप्यतु । पुनर्जन्म - पुनरावृत्तिः । नविद्यते ॥ १६ ॥**

सहस्रयुगपर्यंतमहर्यद्ब्रह्मणो विदुः ।
रात्रिं युगसहस्रां तां तेऽहोरात्रविदो जनाः ॥ १७ ॥

**अहोरात्रविदः - अहोरात्ररूपकालव्यवस्थावेदिनः । ते-प्रसिद्धाः । जनाः । ब्रह्मणः - चतुर्मुखस्य । अहः - दिनं, यदस्ति । तत् सहस्त्रयुगपर्यंतं - सहस्त्रयुगावसानं । विदुः-जानन्ति । ब्रह्मणः । रात्रिं । युगसहस्त्रान्तां • सहस्त्रयुगपर्यंतां । विदुः ॥ १७ ॥**

अव्यक्ताद्व्यक्तयः सर्वाः प्रभवंत्यहरागमे ।
रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके ॥ १८ ॥

**अहरागमे - ब्रह्मणोदिनागमे सति । सर्वाः - समस्ताः । व्यक्तयः - कार्यपदार्थाः । अव्यक्तात् - चतुर्मुखदेहात्मना परिणतायाः प्रकृतेः । प्रभवन्ति - उत्पद्यंते । ब्रह्मणः राज्यागमेसति । तत्रैव - उत्पत्ति स्थाने । अव्यक्तसंज्ञके - अव्यक्तनामके । प्रलीयन्ते - लीना भवन्ति ॥ १८ ॥**

भूतग्रामः सएवायं भूत्वाभूत्वा प्रलीयते ।
रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥ १९ ॥

**हेपार्थ । सएव - प्रागपि विद्यमान एव । अयं । अवशः - कर्मपरवशोभूत्वा । भूतग्रामः - देवमनुष्यादिभूतसमूहः । अहरागमे । भूत्वा भूत्वा - पुनःपुनरुत्पाद्य । राज्यागमे । प्रलीयते - पुनः पुनः लयं प्राप्नोति । अहरागमे । पुनः । प्रभवति - जायते ॥ १९ ॥**

परस्तस्मात्तु भावोन्यो व्यक्तोऽव्यक्तात्सनातनः ।
यः स सर्वेषु भूतेषु नश्यत्सु न विनशयति ॥ २० ॥

**तस्मात्-व्यक्तात् । परः-ज्ञानस्वरूपतया विलक्षणः । अव्यक्तः-केनापि प्रमाणेन अनभिव्यंज्यमानः । सनातनः - नित्यः । यः । भावः - पदार्थः । अस्ति । सः । सर्वेषु । भूतेषु - वियदादिषु । नश्यत्सु सत्सु । नविनश्यति - नाशंनप्राप्नोति ॥ २० ॥**

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य ननिवर्तन्ते तद्धाम परमं मम ॥ २१ ॥

**अतएव । अव्यक्तः । अक्षरइत्युक्तः । तं - अक्षरशब्द-**

**निर्दिष्टं प्रकृतिविविक्त मात्मस्वरूपं । परमां गतिं – परमप्राप्यं । आहुः । यं – आत्मानं । प्राप्य । ननिवर्तते – पुनरावृत्तिं न लभन्ते । तत् – आत्मस्वरूपं । मम - सर्वनियंतुः । परमं - अत्यन्तविलक्षणं । धाम - नियमनस्थानम् ॥ २१ ॥**

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यांतस्स्थानि भूतानि येन सर्वमिदं ततम् ॥ २२ ॥

**यस्य – जगत्कारणभूतपुरुषस्य । भूतानि - देवमनुष्यादिसमस्तकार्याणि । अंतस्स्थानि - अंतर्गतानि । येन–पुरुषेण । सर्वं - कारणावस्थं कार्यावस्थंच समस्तं । इदं – चेतनाचेतनजातं । ततं - व्याप्तं । हेपार्थ ? सः । परः - सर्वस्मात्परः । पुरुषस्तु । अनन्यया - अव्यभिचारिण्या । भक्त्या । लभ्यः – प्राप्यः ॥ २२ ॥**

यत्र काले त्वनावृत्ति मावृत्तिं चैव योगिनः ।
प्रयाता यांति तं कालं वक्ष्यामि भरतर्षभ ॥ २३ ॥

**योगिनः - उपायनिष्ठः । यत्रकाले – यस्मिन्मार्गइत्यर्थः । प्रयाताः - गच्छंतः । अनावृत्तिं - अपुनरावृत्तिं । आवृत्तिंच । प्राप्नुवन्ति । तं । कालं - मार्गं । वक्ष्यामि-ज्ञानिनां जिज्ञासूनांच अपुनरावृत्तिमार्गं तदितरपुण्यकर्मणां पुनरावृत्तिमार्गंच प्रसंगात् कथयामीति भावः ॥ २३ ॥**

अग्नि ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छंति ब्रह्म ब्रह्म विदो जनाः ॥ २४ ॥

**अग्निः – अग्निरूपं । ज्योतिः - तेजः । अहः – दिनं । शुक्लः– शुक्लपक्षः । उत्तरायणं षण्मासाः - मकरादयः । एवमाद्योमार्गः । तत्र – तस्मिन्मार्गे । प्रयाताः । ब्रह्मविदोजनाः । ब्रह्म । गच्छंति - प्राप्नुवंति । [ज्ञानिनः परं ब्रह्म गछंति , जिज्ञासवः विविक्तात्मस्वरूपं ब्रह्म गच्छंतीति विवेकः ] ॥ २४ ॥**

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योति र्योगी प्राप्य निवर्तते ॥ २५ ॥

धूमः । रात्रिः । तथा । कृष्णः – कृष्णपक्षः । दक्षिणायनं षण्मासाः – कर्कटादयः । एवमाद्य मार्गः । तत्रप्रयातः । योगी– पुण्यकर्मा चांद्रमसं–चंद्रसंमन्धि । ज्योतिः – तेजः । प्राप्य । निवर्तते । [ तत्र स्वर्गादिसुख मनुभूय पुण्यक्षये पुनरावर्तत इत्यर्थः ।।२५ ।।

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्ति मन्यया वर्तते पुनः ।। २३ ।।

एते – पूर्वोक्ते । शुक्लकृष्णे – शुक्लपक्ष कृष्णपक्षान्विते । गती – मार्गौ । जगतः – ज्ञानिनां त्वद्विधानां पुण्यकर्मणांच । श्रुतौ शाश्वते - नित्ये । मते । सम्मते । तयोर्मध्ये । एकया – अर्चिरादिगत्या । अनावृत्तिं याति । अन्यया – धूमादिगत्या । पुनरावर्तते ।। २६ ।।

नैते सृती पार्थ जानन्योगी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ।। २७ ।।

हेपार्थ । एते । सृती । मार्गे । जानन् । कश्चन - कश्चिदपि । योगी - उपासकः । नमुह्यति - प्रयाणसमये मोहं नप्राप्नोति । तस्मा । हे अर्जुन । सर्वेषु । कालेषु । प्रत्यहं । योगयुक्तः – अर्चिरादि गत्यनुचिन्तनरूप योगसहितः । भव ।। २७ ।।

वेदेषु यज्ञेषु तपस्सु चैव दानेषु यत्पुण्यफलं प्रदिष्टम् ।
अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम् ।। २८ ।।

इति श्रीमद्भगवद्गीतायां अष्टमोऽध्यायः ।। ८ ।।

वेदेषु – वेदाभ्यासेषु । यज्ञेषु-अग्निष्टोमादिषु । तपस्सु --चान्द्रायणादिषु । दानेषुच । पुण्यफलं पुण्यकर्म फलं । यत् । प्रदिष्टं- शास्त्रैरुपदिष्टं । इदं – अध्यायोदितभगवन्माहात्म्यं । विदित्वा । तत्सर्वं - पुण्यफलं । अत्येति । अतिक्रामति, तृणवन्मन्यत इत्यर्थः । योगी – ज्ञानीच भूत्वा । परं सर्वोत्कृष्टं । दिव्यं - अप्राकृतम् । स्थानं उपैति - प्राप्नोति ।। २८ ।।

इति श्रीमद्यामुनाचार्यविरचिते भगवद्गीतार्थसंग्रहे

अष्टमोध्यायः ।। ८ ।।

# अथ नवमोध्यायः ॥

श्रीभगवानुवाच ।

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वामोक्ष्यसेऽशुभात् ॥ १ ॥

उपास्यस्य भगवतोमाहात्म्यं ज्ञानिनां विशेषंच शोधयन् भक्तिरूपोपासनस्य स्वरूपमाह । हेअर्जुन । विज्ञानसहितं - उपासनविषज्ञानसहितं । गुह्यतमं - अतिरहस्यं । इदंतु - विलक्षणं । ज्ञानं-भक्तिरूपोपासनाख्यं । अनसूयवे - असूयारहिताय । ते - तुभ्यं । प्रवक्ष्यामि । यत् - ज्ञानं । ज्ञात्वा - अनुष्ठाय । अशुभात् - संसारात् । मोक्ष्यसे - मुक्तो भविष्यसि ॥ १ ॥

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥ २ ॥

इदं - वक्ष्यमाणं ज्ञानं । राजविद्या - विद्याश्रेष्ठं । राजगुह्यं - रहस्यश्रेष्ठं । उत्तमं पवित्रं - परमपवित्रं । प्रत्यक्षावगमं - प्रत्यक्षविषयकं । धर्म्यं - धर्मादनपेतं । अतएव । कर्तुं-अनुष्ठातुं । सुसुखं । अव्ययं - यावदात्मभावित्वादक्षयंच ॥ २ ॥

अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥ ३ ॥

हेपरंतप । अस्य - निरतिशयस्य । धर्मस्य - भक्तिरूपोपासनस्य । अश्रद्दधानाः-अविश्वसन्तः पुरुषाः । मां-अखिलहेयप्रत्यनीकं । अप्राप्य । मृत्युसंसारवर्त्मनि - मृत्युरूपसंसारमार्गे । निवर्तन्ते - नितरां-वर्तन्ते ॥ ३ ॥

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहंतेष्ववस्थितः ॥ ४ ॥

इदं । सर्वं । जगत् । अव्यक्तमूर्तिना - अप्रकाशितस्वरूपेण ।

मया । ततं - व्याप्तं । अतः । सर्वभूतानि । मत्स्थानि - मदायत्तस्थितिप्रवृत्तिकानि । अहंतु । तेषु - भूतेषु । नावस्थितः-तदायत्तस्थितिर्नभवामि ॥ ४ ॥

न च मत्स्थानि भूतानि पश्यमे योगमैश्वरम् ।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥ ५ ॥

भूतानि । मत्स्थानि नच - जलादिकं घटादाविव मयि स्थितानि न भवन्ति । तर्हि धारकत्वव्यापकत्वे कथं तवेत्यत्राह, मे - मम । ऐश्वरं - ईश्वरसंबन्धिनं । योगं -अघटितघटनाचातुर्यम् । पश्य - अवलोकय । अहम् । भूतभृत् - भूतानां धारकः । नचभूतस्थः - भूतेषु स्थितोन । किन्तु, मम । आत्मा- संकल्पएव । भूतभावनः - भूतानां धारणादिहेतुः ॥ ५ ॥

यथाऽऽकाशस्थितोनित्यं वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥ ६ ॥

नित्यम् । आकाशस्थितः - अनालम्बनेविद्यमानः । सर्वत्रगः -सर्वत्रवर्तमानः । महान् वायुः यथा । तथैव । सर्वाणि । भूतानि । मत्स्थानि - मदायत्तस्थितिकानि ।इति। उपधारय - निश्चिनु ॥ ६ ॥

सर्वभूतानि कौंतेय प्रकृतिं यांति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ ७ ॥

हेकौन्तेय । सर्वभूतानि । कल्पक्षये- कल्पान्ते । मामिकां - मच्छरीरभूताम् । प्रकृतिं - तमःशब्दवाच्यां । यान्ति - प्रविशंति। तान्येव - भूतानि । कल्पादौ - कल्पारम्भे । पुनरहं । विसृजामि - प्रकृतेर्विभज्य सृजामि ॥ ७ ॥

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८ ॥

स्वां - स्वकीयां । प्रकृतिं विचित्रपरिणामिनीम् । अवष्टभ्य - भूमिराप इत्युक्तरीत्या अष्टधा परिणमय्य । प्रकृतेः - महामोहिन्याः ।

वशात् - अधीनत्वाद्धेतोः । अवशं - अस्वतन्त्रम् । इमम् । भूतग्रामम्-भूतसमूहं । पुनःपुनः । विसृजामि - विचित्रं सृजामि ॥ ८ ॥

न च मां तानि कर्माणि निबध्नंति धनंजय ।
उदासीनवदासीन मसक्तं तेषु कर्मसु ॥ ९ ॥

हेधनञ्जय । तानि-विषमसृष्ट्यादीनि । कर्माणि । मां । ननिबध्नन्ति-वैषम्यादिदोषेण नबन्धयन्ति । तत्र हेतुमाह । तेषु कर्मसु । असक्तं-सङ्गरहितम् । उदासीनवत् । आसीनं - वर्तमानम् । इति पूर्वेणान्वयः ॥ ९ ॥

मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनाऽनेन कौंतेय जगद्विपरिवर्तते ॥ १० ॥

हेकौन्तेय । अध्यक्षेण - प्रत्यक्षमीक्षमाणेन । मया । प्रकृतिः । सचराचरं - स्थावरजंगमसहितम् जगत् । सूयते - जनयते । अनेन । हेतुना - कारणेन । जगत् । परिवर्तते - कुलालचक्रवत् पुनःपुनरावर्तते ॥ १० ॥

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानंतो मम भूतमहेश्वरम् ॥ ११ ॥

मूढाः - संकुचितज्ञाना जनाः । भूतमहेश्वरं - सर्वभूतनियन्तारम् । मानुषीं - मनुष्यसजातीयां । तनुं - विग्रहम् । आश्रितम् । मां । मम । परं - विलक्षणम् । भावं - स्वरूपं । अजानन्तःसन्तः । अवजानंति -प्राकृतं मनुष्यं मन्यन्ते ॥ ११ ॥

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसी मासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥ १२ ॥

राक्षसीं - रक्षःसम्बन्धिनीं । आसुरीं - असुरसम्बन्धिनीं । रजस्तमःप्रचुरां । मोहिनीं - मोहकरीं । प्रकृतिं - स्वभावम् । श्रिता जनाः । मोघाशाः- विफलाभिलाषाः । मोघकर्माणः - व्यर्थारम्भाः । मोघज्ञानाः - विफलज्ञानाः । विचेतसः-विमनस्काश्च । भविष्यन्तीति शेषः॥१२॥

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ १३ ॥

**हेपार्थ । दैवीं - देवसंबन्धिनीं, सत्वप्रचुराम् । प्रकृतिम् । आश्रिताः । महात्मानः - महानुभावास्तु । भूतादिं - भूतानां - देवमनुष्यादीनां, आदिं - कारणभूतम् । अव्ययं - विकाररहितम् । माम् । ज्ञात्वा । अनन्यमनसः - मदेकचित्ताःसन्तः । भजन्ति ॥ १३ ॥**

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥ १४ ॥

**ते । भक्त्या-मयि निरतिशयप्रीत्या । सततम् । मां कीर्तयन्तः । दृढव्रताः - दृढसंकल्पाःसन्तः । यतंतः - मत्कर्मसु यतमानाः । नमस्यन्तः - दण्डवत प्रणिपतन्तः । नित्ययुक्ताः- मद्यानित्ययोगमाश्रित्यदास्यभावनासक्ताः । सततम् उपासते ॥ १४ ॥**

ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ १५ ॥

**अन्येपि केचिन्महात्मानः । ज्ञानयज्ञेन - मत्स्वरूपगुणविषयज्ञानरूपयज्ञेनच । माम् । यजंतः - प्रीणयन्तः । विश्वतोमुखं - विश्वप्रकारकं माम् । बहुधा - बहुप्रकारेण । पृथक्त्वेन, एकत्वेनच - कार्यकारणोभयावस्थजगदाकारेणेत्यर्थः । उपासते ॥ १५ ॥**

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् ।
मंत्रो हमहमेवाज्यमहमग्निरहं हुतम् ॥ १६ ॥

**अहमेव । क्रतुः - ज्योतिष्टोमादिः । अहमेव । यज्ञः - ब्रह्मयज्ञादिः । अहमेव । स्वधा । अहमेवौषधम् । अहमेव मन्त्रः । अहमेवाज्यम् । अहमेवाग्निः । अहमेव । हुतं - होमश्च ॥ १६ ॥**

पिताहमस्य जगतो माता धाता पितामहः ।
वेद्यंपवित्रमोंकार ऋक् साम यजुरेव च ॥ १७ ॥

**अस्य - ब्रह्मादिस्तम्बपर्यन्तस्य । जगतः । पिता । माता ।**

**धाता - स्रष्टा । पितामहः - जनकस्यापि जनकः । पवित्रं - पावनम् । वेद्यं - ज्ञेयम् । ओंकारः - प्रणवः । ऋक् । साम । यजुश्च । अहमेव ॥ १७ ॥**

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् ।
प्रभवप्रलयस्थानं निधानम् बीजमव्ययम् ॥ १८ ॥

**गतिः - प्राप्यम् । भर्ता - धारयिता । प्रभुः - शासिता । साक्षी - अध्यक्षः । निवासः - वासस्थानम् । शरणं - उपायः । सुहृत - हितैषी । प्रभवप्रलयस्थानं - उत्पत्तिविनाशयोः स्थानम् - उपादानकारणमित्यर्थः । निधानं - कारणेलीयमानं वस्तु । अव्ययं - विकाररहितम् । बीजं - कारणंच । अहमेव ॥ १८ ॥**

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामिच ।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥ १९ ॥

**अहमेव । तपामि - आदित्यरूपेण स्थित्वा तापं करोमि । अहमेव । वर्षं - जलम् । निगृह्णामि - पर्जन्यादिरूपेण - स्वीकरोमि । अहमेव । उत्सृजामि - वर्षामि । अमृतं - जीवनसाधनम् । मृत्युं - मरणसाधनम् । अहमेव ! किंबहुना । सत् - वर्तमानम् । असत् - अतीतमनागतंच सर्वं वस्तु । अहमेव ॥ १९ ॥**

त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यमासाद्य सुरेंद्रलोकमश्नंति दिव्यान् दिवि देवभोगान् ॥ २० ॥

**त्रैविद्याः - ऋग्यजुः सामरूपवेदत्रयप्रतिपाद्यकर्मनिष्ठाः । यज्ञैः - यागैः । मां - इन्द्रादिरूपेणास्थितम् । इष्ट्वा - आराध्य । सोमं पिबंतीति सोमपाः । अतएव, पूतपापाः - निवृत्तप्रतिबन्धकाः संतः । स्वर्गतिं । प्रार्थयन्ते । तेजनाः । पुण्यं - सुखरूपं । सुरेन्द्रलोकं - स्वर्गलोकं । आसाद्य - प्राप्य । दिवि - स्वर्गे । दिव्यान् - अमानुषान् देवभोगान् । अश्नन्ति - भुञ्जते ॥ २० ॥**

ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंति ।
एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते ॥ २१ ॥

ते – स्वर्गभोक्तारः । विशालं – विस्तृतं । तं प्रार्थितम् । स्वर्गलोकं – स्वर्गसुखं । भुक्त्वा–अनुभूय । पुण्ये - सुकृते । क्षीणेसति । मर्त्यलोकं - भुवं । विशंति । एवं प्रकारेण । कामकामाः- शब्दादिविषयाभिलाषिणः । त्रयीधर्मं–वेदप्रतिपाद्यं कर्म । अनुप्रपन्नाः – अनुसरंतः । गतागतं – यातायातम् । लभन्ते ॥ २१ ॥

अनन्याश्चिंतयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ २२ ॥

अनन्याः – प्रयोजनांतरविमुखाः । मां । चिन्तयन्तः - सततं परिशीलयन्तः । ये जनाः । मां – आश्रितवात्सल्यैकजलधिम् । पर्युपासते - स्वरूपरूपगुणविभूतिभिः सर्वैः प्रकारै रुपासते । नित्याभियुक्तानां - मयानित्याभियोगमाकांक्षतां । तेषां । अहं – सर्वेश्वरः । योगक्षेमं–अप्राप्तलाभोयोगः, क्षेमः - तत्परिपानं, तौ । वहामि–प्रापयामि ॥ २२ ॥

येप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।
तेपि मामेव कौंतेय यजन्त्यविधिपूर्वकं ॥ २३ ॥

हेकौंतेय । ये । अन्यदेवताभक्ताः - इन्द्रादिदेवतासुभक्तिमन्तःपुरुषाः । श्रद्धया । युक्तास्सन्तः । यजन्ति–तादेवताः पूजयन्ति । तेपि । मामेव – सर्वस्य मदात्मकत्वेन तत्तच्छब्दवाच्यम् मामेव । यजन्ति । किंतु । तत् । विधिपूर्वकं - विध्यर्थयाथात्म्यज्ञानपूर्वकम् । न ॥२३ ॥

अहंहि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मामभिजानन्ति तत्वेनातश्च्यवंति ते ॥ २४ ॥

अहं– सर्वस्य शरीरतया इन्द्रादिरूपोहमेव । सर्वयज्ञानां । भोक्ता प्रभुश्च । हीतिप्रसिद्धौ । किंतु । मां । तत्वेन–सर्वकर्मणामिंद्रादिशरीरकः परमात्मैवाराध्यः फलप्रदश्चेत्येवंरूपेण याथार्थ्येन । नाभिजानन्ति । अतः । च्यवन्तिं - भ्रश्यंति ॥ २४ ॥

यांति देवव्रता देवान् पितॄन् यांति पितृव्रताः ।
भूतानि यांति भूतेज्या यांति मद्याजिनोऽपि माम् ॥ २५ ॥

**देवव्रताः –व्रतशब्दः संकल्पवाची, देवेष्विन्द्रादिषु , व्रतं - देवान् यजाम इति यजनसंकल्पः,येषांते तथोक्ताः । देवान् । यांति । पितृव्रताः पितॄन् यांति । भूतेज्याः - भूतेषु– यक्षादिषु, इज्या-संकल्पपूर्वकम् यजनं, येषां ते तथोक्ताः । भूतानि । यांति । मद्याजिनः -अनेन कर्मणा परमात्मानं ईजे इति संकल्प्य देवर्षिपितृभूतादिशरीरकं मामाराधयन्तः पुरुषाः। मामेव । यांति ॥ २५ ॥**

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मानः ॥ २६ ॥

**यः । भक्त्या । मे – मह्यम् । पत्रं पुष्पंवा । तदभावे तोयं वा । प्रयच्छति – समर्पयति । प्रयतात्मनः - परिशुद्धांतःकरणस्य । तस्य । भक्त्युपहृतं – भक्त्या समर्पितम् । तत् – पत्रादिकम् । अहं – अवाप्तसमस्तकामः । अश्नामि - अनुभवामि ॥ २६ ॥**

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणम् ॥ २७ ॥

**हेकौंतेय । यत्-देहयात्रानिमित्तं लौकिकं कर्म । करोषि । यदश्नासि – देहधारणार्थं यदशनं करोषि । यज्जुहोषि– होमरूपंयद्वैदिकं कर्मकरोषि । यत् – दानम् । ददासि - दानंकरोषि । यत्तपस्यसि – तपःकरोषि । तत्सर्वम् । मदर्पणं कुरुष्व ॥ २७ ॥**

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
सन्नयासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ २८ ॥

**एवम् – उक्तरीत्या । संन्यासयोगयुक्तः – मयि सर्वकर्मसमर्पणम् – सन्न्यासः , सएव योगो - अनुसन्धानं ,तेन युक्तः , आत्मा-मनः , यस्य सतथोक्तः । त्वम् । शुभाशुभफलैः - शुभानि – अनुकूलानि , अशुभानि - प्रतिकूलानि , फलानि , येषां , तैः - तथो**

क्तैः । कर्मबन्धनैः - कर्मरूपप्राप्तिप्रतिबन्धकैः । मोक्ष्यसे - मुक्तो भविष्यसि । विमुक्तस्सन् । मामेव , उपैष्यसि - प्राप्स्यसि ॥ २८ ॥

समो हं सर्वभूतेषु न मे द्वेष्योस्ति न प्रियः ।
ये भजंति तु मां भक्त्या मयिते तेषु चाप्यहम् ॥ २९ ॥

अहम् । सर्वभूतेषु-देवमनुष्यादिसर्वभूतेषु । समः-समाश्रयणीयत्वेन तुल्यः । मे - मम । द्वेष्यः - जात्यादिनिकर्षेण परिहरणीयः । न । प्रियः - जात्याद्युत्कर्षेण परिग्राह्योपि । न । किंतु । ये । माम् । भक्त्या , भजन्ति । ते । मयि वर्तन्ते - मत्समा इव मया सह विहरन्ति । तेषुच अहमपि वर्ते - मदुत्कृष्टैरिव तैःसह विहरामि ॥ २९ ॥

अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥ ३० ॥

सुदुराचारः-अकृत्यकरणरूपदुराचारयुक्तोपि । अनन्यभाक्-मदेकप्रवणः । माम् । भजतेचेत् । सः । साधुरेव - समीचीन एव । मन्तव्यः-बहुमन्तव्यः । सः । सम्यक् -समीचीनं यथा तथा । व्यवसितः-श्रियःपतिरखिलहेयप्रत्यनीको भगवान् नारायण एव मत्स्वामीत्येवंरूपाध्यवसायं कृतवान् ॥ ३० ॥

क्षिप्रं भवति धर्मात्मा शश्वच्छांतिं निगच्छति ।
कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ ३१ ॥

दुराचारोपि । क्षिप्रं - शीघ्रमेव । धर्मात्मा - अनन्यमद्भजनरूपधर्मनिरतान्तःकरणः । भवति । शश्वत । शाश्वतीं - विरुद्धाचारनिवृत्तिम् । निगछति । हेकौन्तेय । प्रतिजानीहि - त्वमेवास्मिन्नर्थे प्रतिज्ञां कुरु । मे भक्तः । नप्रणश्यति ॥ ३१ ॥

मां हि पार्थ व्यपाश्रित्य ये पि स्युः पापयोनयः ।
स्त्रियोवैश्यास्तथा शूद्रास्तेपि यांति परां गतिं ॥ ३२ ॥

हेपार्थ । पापयोनयोपि - पापजन्मानोपि । स्त्रियः , वैश्याः, शूद्राश्च । ये सन्ति । तेपि । मां व्यपाश्रित्य । परां -उत्कृष्टां । गतिं । यान्ति - प्राप्नुवन्ति ॥ ३२ ॥

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥ ३३ ॥

**पुण्याः - पुण्यजन्मानः । भक्ताः-मयि भक्तिमन्तः । ब्राह्मणाः राजर्षयश्च । किंपुनः - किंवक्तव्यम् । अतः । अनित्यं - अस्थिरं । असुखं - सुखरहितम् । इमं - अतिक्षुद्रम् । लोकं । प्राप्य, वर्तमानस्त्वमपि । मां भजस्व ॥ ३३ ॥**

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ ३४ ॥

इति श्रीमद्भगवद्गीतायां नवमोऽध्यायः ॥ ९ ॥

**भक्तेः स्वरूपमाह । हे अर्जुन । मद्भक्तः - मय्यत्यन्तप्रीतियुक्तः सन् । मन्मनाः भव- मय्येव तैलधारावदविच्छिन्न स्मृतिसन्तानरूप मनोवृत्तियुक्तो भव । मद्याजी - मद्यजनशीलः । भव । मां । नमस्कुरु । एवं - अनेन प्रकारेण । आत्मानं । युक्त्वा - लब्ध्वा । मत्परायणः - मदेकाश्रयः । मामेव । एष्यसि - प्राप्स्यसि ॥ ३४ ॥**

**इति श्रीमद्यामुनाचार्यविरचिते गीतार्थसंग्रहे**

## ॥ नवमोऽध्यायः ॥ ९ ॥

## अथ दशमोऽध्यायः ।

श्रीभगवानुवाच ।

भूय एव महाबाहो शृणु मे परमं वचः ।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥ १ ॥

**एवं सपरिकरं भक्तियोगमुक्त्वा इदानीं तदुत्पत्तये तद्विवृद्धये च भगवतो निरंकुशैश्वर्यादि कल्याणगुणानंत्यं प्रपंचयति । हेमहाबा-**

हो । मे-मम । परं-उत्कृष्टं । वचः । भूयएव । शृणु-सावधान माकर्णय । किं तद्वच इत्यत्राह । प्रीयमाणाय - मदीयमाहात्म्यश्रवणे अत्यंतप्रीति-युक्ताय। ते-तुभ्यं। हितकाम्यया-हितेच्छया । अहं । यद्वचः । वक्ष्यामि-कथयिष्यामि ॥ १ ॥

न मे विदुः सुरगणाः प्रभवं न महर्षयः ।
अह मादिर्हि देवानां महर्षीणां च सर्वशः ॥ २ ॥

मे-मम । प्रभवं-प्रभावं । सुरगणाः-ब्रह्मादिदेवगणाः। नविदुः-नजानंति । महर्षयश्च,नजानंति । तत्रहेतुमाह । अहं । देवानां महर्षीणांच - संबन्धिनः । सर्वशः - सर्वस्यज्ञानशक्त्यादेः । आदिः-कारणंहि । तेषां मया दत्तं ज्ञानशक्त्यादिकं परिमितं, अतो मां यथावन्न जानंति, इतिभावः ॥२॥

योमामजमनादिं च वेत्ति लोकमहेश्वरम् ।
असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥ ३ ॥

मर्त्येषु - मनुष्येषु मध्ये । असंमूढः-मोहरहितः । यः-मनुष्यः । माम् । अजं-उत्पत्तिरहितं । अतएव अनादिं । लोकमहेश्वरं -सर्वलोकनियंतारंच । वेत्ति । सः । सर्वपातकैः प्रमुच्यते ॥ ३ ॥

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ।
सुखं दुःखं भवो भावो भयं चाभयमेव च ॥ ४ ॥

अहिंसा समता तुष्टिस्तपोदानं यशोऽयशः ।
भवंति भावाभूतानां मत्त एव पृथग्विधाः ॥ ५ ॥

बुद्धिः - अध्यवसायः । ज्ञानं - चिदचिद्वस्तुनिश्चयः । असंमोहः - मोहाभावः । क्षमा - सहनं । सत्यं - यथार्थविषयकभूत-हितरूपवचनस्वभावत्वं । दमः - बाह्येन्द्रियनिग्रहः । शमः - अन्तरिन्द्रियनिग्रहः । सुखं - अनुकूलानुभवः । दुःखं - प्रतिकूलानुभवः । भवः- स्वस्थता । अभावः - अस्वस्थता । भयं - भीतिः । अभयं - भयाभावः । अहिंसा - हिंसानिवृत्तिः । समता - सर्वत्रसमदर्शित्वं । तुष्टिः - सन्तोषः । तपः - कायक्लेशः । दानं - वितरणं । यशः -

कीर्तिः । अयशः - अपकीर्तिः । एवमाद्याः । भावाः - धर्माः । मत्तएव - मत्संकल्पादेव । भवंति ॥ ४ ॥ ५ ॥

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसाजाता येषां लोक इमाः प्रजाः ॥ ६ ॥

पूर्वे - प्राचीनाः । मानसाः - ब्रह्मणो मनःसंभूताः । सप्त महर्षयः । चत्वारोमनवश्च । मद्भावाः - मत्संकल्पानुवर्तिनएव । येषां - मनुमहर्षीणां । लोके - संतानरूपे । इमाः - परिदृश्यमानाः । प्रजाः । जाताः - संभूताः ॥ ६ ॥

एतां विभूतिं योगं च मम यो वेत्ति तत्वतः ।
सोऽविकंप्येन योगेन युज्यते नात्र संशयः ॥ ७ ॥

एतां । मम । विभूतिं - ऐश्वर्यं । योगं - कल्याणगुणयोगंच । तत्वतः - यथावत् । यः । वेत्ति - जानाति । सः । अविकंप्येन- अविचाल्येन । योगेन - भक्तियोगेन । युज्यते - संबध्यते । अत्रसंशयोनास्ति ॥ ७ ॥

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजंतेमां बुधा भावसमन्विताः ॥ ८ ॥

अहं । सर्वस्य - चिदचित्प्रपंचस्य । प्रभवः - उत्पत्तिकारणं । मत्तएव । सर्वं प्रवर्तते । इति - एवंरूपं मदैश्वर्यं । मत्वा - ज्ञात्वा । बुधाः - ज्ञानिनः । भावसमन्विताः - मय्यभिप्रायवंतःसंतः । मांभजंते ॥ ८ ॥

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमंति च॥ ९ ॥

मच्चित्ताः - मय्यर्पितचित्ताः । मद्गतप्राणाः - मदेकाश्रयजीविताः । परस्परं - अन्योन्यं । बोधयंतः - स्वस्वविदितमत्कल्याणगुणविशेषान् ज्ञापयन्तः । मां । नित्यं - अनवरतं । कथयन्तः ।

**तुष्यंतिच रमन्तिच - वक्तारः श्रोतृप्रश्नेनानन्यप्रयोजनेन तुष्यन्ति, श्रोतारश्च श्रवणेनानवधिकातिशयप्रियेण रमंते ॥ ९ ॥**

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ १० ॥

**सततयुक्तानां-मयानित्ययोगमांकांक्षमाणानां । भजतां - भक्तिकुर्वतां । तेषां - बुधानां । अहं । तं - तादृशं । बुद्धियोगं - बुद्धिरूपमुपायं । प्रीतिपूर्वकं । ददामि । येन - योगेन । ते । मामुपयान्ति ॥ १० ॥**

तेषामेवानुकम्पार्थ महमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११ ॥

**तेषां - बुधानां । अनुकम्पार्थं - अनुग्रहाय । अहं । आत्मभावस्थः- तेषां मनोवृत्ति विषयतयाऽ वस्थितः सन् । भास्वता-परितः प्रकाशमानेन । ज्ञानदीपेन - मद्विषयज्ञानप्रदीपेन । अज्ञानजं - ज्ञानविरोधिप्राचीनकर्मजनितं । तमः - विषयप्रावण्यरूप मन्धकारं । नाशयामि ॥ ११ ॥**

अर्जुन उवाच ।

परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥ १२ ॥
आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।
असितोदेवलो व्यासः स्वयं चैव ब्रवीषि मे ॥ १३ ॥

**परं - जगत्कारणभूतं । ब्रह्म । परं-सर्वोत्कृष्टं । धाम - ज्योतिः । परमं - उत्कृष्टतमं । पवित्रं - शुद्धिकरं । वस्तुच । भवानेव । किमत्र प्रमाणमित्यत्राह । सर्वे ऋषयः । त्वां - देवकीतनयतयावतीर्णं भवन्तमेव । शाश्वतं - सनातनं । दिव्यं - तमसःपरस्तात् वर्तमानं । पुरुषं- पुरुषसूक्तप्रतिपाद्यं महापुरुषम् । आदिदेवं - जगत्सृष्ट्यादिरूपक्रीडा**

**परं । अजं - कर्मकृतोत्पत्तिरहितं । विभुं - सर्वव्यापकंच । आहुः - प्रवदन्ति । तथा । विशिष्टोदेवर्षिर्नारदः, असितदेवलव्यासाश्च । आहुः - एकैकं वदन्ति । किञ्च । स्वयमेव - ब्रह्मादीनामपि गुरुस्त्वमेव । मे - मह्यम् । ब्रवीषि ॥ १२ ॥ १३ ॥**

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।
नहिते भगवन् व्यक्तिं विदुर्देवा न दानवाः ॥ १४ ॥

**हे केशव ? मां - शिष्यम् शरणागतं प्रति । यत् - त्वदसाधारणं निरंकुशमैश्वर्यं । वदसि । तत । ऋतं - सत्यं । मन्ये । हेभगवन् । ते - तव । व्यक्तिं - वैभवप्रतिपादनप्रकारं । देवाः - ब्रह्मादयः । दानवाः - असुराश्च ! न विदुः - न जानन्ति ॥ १४ ॥**

स्वयमेवात्मनाऽऽत्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देवदेव जगत्पते ॥ १५ ॥

**भूतभावन - भूतसमुत्पादक । भूतेश - सर्वभूतनियामक । देवदेव - सर्वदेवशिखामणे । जगत्पते - अखिलजगत्स्वामिन् । हे पुरुषोत्तम । त्वं । स्वयमेव । आत्मना - आत्मभावभूतज्ञानेन । आत्मानं - उक्तैश्वर्यविशिष्टं । त्वं । वेत्थ - जानासि । भवद्वैभवं वक्तुं भवानेव - समर्थः नान्य इति भावः ॥ १५ ॥**

वक्तुमर्हस्यशेषेण दिव्याह्यात्मविभूतयः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥ १६ ॥

**हेभगवन् । अशेषेण - अखिलं त्वदैश्वर्यं । त्वमेव । वक्तुं - प्रतिपादयितुं । अर्हसि । हि - यस्मात्कारणात् । आत्मविभूतयः - भवदैश्वर्याणि । दिव्याः - अद्भुतानि । याभिर्विभूतिभिः । त्वं । इमान् - अखिलान् । लोकान् । व्याप्य । तिष्ठसि - वर्तसे ॥ १६ ॥**

कथं विद्यामहं योगीत्वां सदा परिचिन्तयन् ।
केषुकेषुच भावेषु चिन्त्योऽसि भगवन्मया ॥ १७ ॥

हे भगवन् । अहम् । योगी - भक्तियोगनिष्ठः सन् । त्वां । सदा । परिचिन्तयन् - परितः चिन्तयितुं । कथं - केन प्रकारेण - विद्यां-जानीयाम् । किञ्च । मया । त्वं । केषुकेषु । भावेषु · मनोवृत्तिषु । चिन्त्यः - चिन्तनीयः । असि ॥ १७ ॥

विस्तरेणात्मनो योगं विभूतिं च जनार्दन ।
भूयः कथय तृप्तिर्हि शृण्वतो नास्तिमेऽमृतम् ॥ १८ ॥

हेजनार्दन । आत्मनः - तव । योगं - स्रष्टृत्वादिगुणयोगं । विभूतिं -ऐश्वर्यञ्च । भूयः - पुनः । विस्तरेण । कथय । हि-यस्मात् । अमृतं - अमृतवदत्यन्तं भोग्यभूतं भवन्माहात्म्यं । शृण्वतः - आकर्णयतः । मे तृप्तिर्नास्ति ॥ १८ ॥

श्रीभगवानुवाच ।

हन्त ते कथयिष्यामि दिव्याह्यात्मविभूतयः ।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्यमे ॥ १९ ॥

हन्त , आश्चर्ये । हेकुरुश्रेष्ठ । ते -तुभ्यं । प्राधान्यतः - प्रधानत्वेनोपलक्षिताः । दिव्याः - कल्याणीः । आत्मनः - मम । विभूतीः । कथयिष्यामि । मे-मम । विस्तरस्य - विभूतिगोचरशब्दप्रपंचस्य । अन्तः-अवसानं । नास्ति ॥ १९ ॥

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यंच भूतानामन्त एव च ॥ २० ॥

हे गुडाकेश - हे अर्जुन । अहं । आत्मासन् । सर्वभूताशयस्थितः - सर्वप्राणिहृदयकमले स्थितः । अहमेव । भूतानां । आदिः - उत्पत्तिहेतुः । मध्यं - स्थितिहेतुः । अन्तः - प्रळयहेतुश्च ॥ २० ॥

आदित्यानामहंविष्णु र्ज्योतिषां रविरंशुमान् ।
मरीचिर्मरुतामस्मि नक्षत्राणा महं शशी ॥ २१ ॥

आदित्यानां - द्वादशादित्यानां मध्ये । विष्णुर्नामश्रेष्ठादित्योहं । ज्योतिषां - तेजः पदार्थानाम्मध्ये । अंशुमान् - प्रशस्तकिरणः । रविः-

सूर्योहं । मरुतां-एकोनपंचाशद्वायूनां मध्ये । मरीचिरहमस्मि । नक्षत्राणां - अश्विन्यादीनां पतिः । शशी - चन्द्रोहम् ॥ २१ ॥

वेदानां सामवेदोस्मि देवानामस्मि वासवः ।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥ २२ ॥

वेदानां - चतुर्णाम्मध्ये । सामवेदोहमस्मि । देवानांमध्ये । वासवः-इन्द्रोहमस्मि । इन्द्रियाणां मध्ये मनश्चाहमस्मि । भूतानां-प्राणिनां । चेतना - बुद्धिरस्मि ॥ २२ ॥

रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसां ।
वसूनां पावक श्चास्मि मेरुः शिखरिणामहम् ॥ २३ ॥

रुद्राणां-एकादशानां । शंकरोनामरुद्रश्च । अहमस्मि । यक्षरक्षसां-यक्षाणां राक्षसानांच , पतिः वित्तेशः - कुबेरोहं । वसूनां - अष्टानां मध्ये । पावकश्चाहमस्मि । शिखरिणां - कांचनमयशिखरवतांमध्ये । मेरुरहं ॥ २३ ॥

पुरोधसांच मुख्यंमां विद्धि पार्थ बृहस्पतिम् ।
सेनानीनामहं स्कन्दः सरसा मस्मि सागरः ॥ २४ ॥

हेपार्थ । पुरोधसां - पुरोहितानांमध्ये । मुख्यम् । बृहस्पतिंच । मां । विद्धि - जानीहि ! सेनानीनां - चमूपतीनां - मध्ये । स्कन्दः- कुमारः । अस्म्यहम् । सरसां - जलाशयनां मध्ये । सागरः - समुद्रोहमस्मि ॥ २४ ॥

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् ।
यज्ञानां जपयज्ञोस्मि स्थावराणां हिमालयः ॥ २५ ॥

महर्षीणांमध्ये । भृगुर्महामुनिरहं । गिरां-अर्थवच्छब्दानांमध्ये । एकमक्षरं-ओमित्येकाक्षरभूतः प्रणवोहमस्मि । यज्ञानांमध्ये । जपरूपो

**यज्ञोहमस्मि । स्थावराणां पर्वतमात्राणांमध्ये । हिमालयः - हिमवान्प र्वतोहमस्मि ॥ २५ ॥**

अश्वत्थः सर्ववृक्षाणां देवर्षीणांच नारदः ।
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥ २६ ॥
उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम् ।
ऐरावतं गजेंद्राणां नराणां च नराधिपम् ॥ २७ ॥

**सर्ववृक्षाणांमध्ये । अश्वत्थोहं । देवर्षीणांमध्ये । नारदोहं । गन्धर्वाणांमध्ये । चित्ररथोहं । सिद्धानां - ज्ञानिनांमध्ये । कपिलोनाममुनिरहं । अश्वानांमध्ये । अमृतोद्भवं - अमृतमथनसमयोत्पन्नं । उच्चैःश्रवसंनामदेवेन्द्रतुरंगं । मांविद्धि । गजेन्द्राणां - गजश्रेष्ठानांमध्ये । ऐरावतंच । मांविद्धि । नराणां - मनुष्याणांमध्ये । नराधिपं - राजानंच । मांविद्धि ॥ २६ ॥ २७ ॥**

आयुधानामहं वज्रं धेनूनामस्मि कामधुक् ।
प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वासुकिः ॥ २८ ॥

**आयुधानां - मत्सुदर्शनव्यतिरिक्तायुधानांमध्ये । वज्रं - वज्रायुधं । अहमस्मि । धेनूनांमध्ये । कामधुक् - कामधेनुरहमस्मि । प्रजनयतीतिप्रजनः, प्रजननसमर्थः कंदर्पोहमस्मि । सर्पाणां–एकशिरसां पन्नगानांमध्ये । वासुकिः- मन्दराचलरज्जुतयावस्थितः सर्पोस्मि ॥ २८ ॥**

अनन्तश्चास्मि नागानां वरुणो यादसामहं ।
पितॄणामर्यमा चास्मि यमः संयमतामहम् ॥ २९ ॥

**नागानां- बहुशिरसां पन्नगानांमध्ये । अनन्तः–शेषोहमस्मि । यादसां-जलजन्तूनांमध्ये । तत्पतिर्वरुणोहं । पितॄणां - अग्निष्वात्तादीनांमध्ये । अर्यमाचाहमस्मि । संयमतां–दण्डयतांमध्ये । यमः–वैवस्वतोहं ॥ २९ ॥**

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् ।
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ॥ ३० ॥

**दैत्यानां मध्ये । प्रह्लादो वैष्णवाग्रेसरश्च । अहमस्मि । कलयतां – अनर्थप्रापकतया गणनीयानां मध्ये । कालाख्यः पुरुषोहमस्मि । मृगाणां मध्ये । मृगेन्द्रः – सिंहश्च । अहमस्मि । पक्षिणां मध्ये । वैनतेयश्चाहमस्मि ॥ ३० ॥**

पवनः पवतामस्मि रामः शस्त्रभृतामहम् ।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥ ३१ ॥

**पवतां – सततगमनशीलानां मध्ये । पवनः - वायुः । अहमस्मि । शस्त्रभृतां - शस्त्रधारिणां मध्ये । रामः - परशुरामस्यापि जेता रावणान्तकोहमस्मि । झषाणां - मत्स्यानां मध्ये । मकरश्चाहमस्मि । स्रोतसां - प्रवाहाणां मध्ये । जाह्नवी – गंगाहमस्मि ॥ ३१ ॥**

सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन ।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥ ३२ ॥

**हे अर्जुन ? सर्गाणां – सृज्यानां सकलपदार्थानाम् । आदिः – स्रष्टा । अन्तः - संहर्ता । मध्यं - पालयिताच । अहमेव । विद्यानां - मध्ये । अध्यात्मविद्या - ब्रह्मविद्याहम् । प्रवदतां - वितण्डादिकथाः कुर्वताम् । वादः - तत्वनिर्णयकथाहम् ॥ ३२ ॥**

अक्षराणा मकारोस्मि द्वंद्वः सामासिकस्य च ।
अहमेवाक्षयः कालो धाताऽहं विश्वतोमुखः ॥ ३३ ॥

**अक्षराणां - वर्णानांमध्ये । अकारोहं । सामासिकस्य – तत्पुरुषादिसमासवर्गस्य, मध्ये । द्वन्द्वः समासोहं । अक्षयः – आद्यन्तरहितः । कालश्चाहमेव । विश्वतोमुखः - चतुर्मुखः । धाता - हिरण्यगर्भश्चाहम् ॥ ३३ ॥**

मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् ।
कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥ ३४ ॥

सर्वहरः-सर्वप्राणिहरः । मृत्युः - यमश्चाहं । भविष्यतां - उत्पस्यमानपदार्थानां । उद्भवः-उत्पत्तिरूपक्रियाहं । नारीणां । श्रीः-लक्ष्मीरहं । कीर्तिः यशः । वाक्-सरस्वतीचाहं । स्मृतिः-अनुभूतार्थस्मरणं । मेधा - धारणावतीधीः । धृतिः - धैर्यं । क्षमा-क्षांतिश्चाहं ॥ ३४ ॥

बृहत्साम तथा साम्नां गायत्री छन्दसामहम् ।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥ ३५ ॥

तथा, साम्नां-रथन्तरादीनांमध्ये । बृहत्सामाहं । छन्दसां - छन्दोविशिष्टमंत्राणांमध्ये । गायत्री - वेदमातृत्वेन श्रुतिप्रसिद्धा गायत्रीछंदोविशिष्टा चतुर्विंशत्यक्षरा त्रिपदाऋगहं । मासानां - चैत्रादीनांमध्ये । मार्गशीर्षोमासोहं । ऋतूनां - षण्णांमध्ये । कुसुमाकरः- वसन्तोहं ॥ ३५ ॥

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् ।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ॥ ३६ ॥

छलयतां-परस्परंवंचनंकुर्वतांजनानां । द्यूतं - तादृशवंचनहेतुभूतमक्षदेवनं, छलकरणयुद्धादिरुपोहं । तेजस्विनां - पराभिभवनसामर्थ्यवतां सम्बन्धि । तेजोहं । जयशीलानां । जयोहमस्मि । व्यवसायशीलानां । व्यवसायः - निष्ठाहमस्मि । सत्ववतां । सत्वं - महामनस्त्वमहम् ॥ ३६ ॥

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः ।
मुनीनामप्यहं व्यासः कवीनामुशनाः कविः ॥ ३७ ॥

वृष्णीनां, मध्ये । वासुदेवः - वसुदेवतनयोहं । पाण्डवानां- पंचानांमध्ये । धनंजयः-त्वंचाहम् । मुनीनां - मननशीलानां, मध्ये । व्यासोप्यहं । कवीनां - विपश्चितां मध्ये । उशनाः शुक्रोनामकविरहम् ॥ ३७ ॥

दण्डो दमयतामस्मि नीतिरस्मि जिगीषतां ।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥ ३८ ॥

**दमयतां - यथापराधन्दण्डं कुर्वतांसम्बन्धी । दण्डः - निग्रहश्चाहमस्मि । जिगीषतां - जेतुमिच्छतां । नीतिः - जयोपायोहमस्मि । गुह्यानां - रहस्यार्थगोपनोपायानांमध्ये । मौनंचाहमस्मि । ज्ञानवतां - संबंधि । ज्ञानं-तत्वविषयकंचाहम् ॥ ३८ ॥**

यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥ ३९ ॥

**सर्वभूतानां - नित्यसृज्यमानानां सुरनरतिर्यगादीनां । यच्च-परोक्षमपरोक्षंवा । बीजं-उपादानकारणमस्ति । हे अर्जुन ! तदप्यहमेव । मया । विनाभूतं -शरीरतयांतरननुप्रविष्टं । यच्चराचरं - जगमं स्थावरं । स्यात । तन्नास्ति ॥ ३९ ॥**

नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप ।
एषतूद्देशतः प्रोक्तो विभूते र्विस्तरो मया ॥ ४० ॥

**हे परंतप ! दिव्यानां - कल्याणिनीनाम् । मम । विभूतीनां - नियाम्यवस्तूनाम् । अन्तः - परिच्छेदः । नास्ति । एषः - पूर्वोक्तः । विभूते र्विस्तरस्तु । उद्देशतः - संक्षेपेण । मया । प्रोक्तः - कथितः ॥ ४० ॥**

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंशसम्भवम् ॥ ४१ ॥

**विभूतिमत - अनेकानियाम्यवस्तुविशिष्टम् । श्रीमत - कान्तिमत् । ऊर्जितंवा - बलवच्च । यद्यत्सत्वं - जन्तुजातम् । दृश्यते । तत्तत्सर्वम् । मम । तेजोंशसम्भवं - तेजसः - नियमनसामर्थ्यस्य, अंशः - लेशः , सम्भवः - कारणम् , यस्य तत्तथोक्तमेव । अवगच्छ - जानीहि ॥ ४१ ॥**

अथवा बहुनैतेन किं ज्ञानेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ ४२ ॥

इति श्री भगवद्गीतायाम् दशमोध्यायः ॥ १० ॥

**अथवा । हे अर्जुन! बहुना - मया पृथक् पृथक् अविरतम् कथ्यमानेन । ज्ञानेन - ज्ञायमानेनच । एतेन - विभूतिविस्तरेण । किम् - किंप्रयोजनम् । अहम् - सर्वेश्वरः । इदं - कार्यकारणोभयावस्थं स्थूलसूक्ष्मं चिदचिद्वस्त्वात्मकम् । कृत्स्नं जगत् । एकांशेन - मन्नियमनसामर्थ्यैकभागेन । विष्टभ्य - नियन्तृतयावष्टभ्य स्थितः । एवं संग्रहेण जानीहीत्यर्थः ॥ ४२ ॥**

**इति श्रीमद्यामुनाचार्यविरचिते गीतार्थसंग्रहे**
**दशमोध्यायः ॥ १० ॥**

श्रीः ।

**॥ श्रीमतेरामानुजायनमः ॥**

## ॥ अथ एकादशोऽध्यायः ॥

अर्जुन उवाच ।

मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम् ।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥ १ ॥

**एवम् भगवदसाधारणेन कल्याणगुणगणेन सह भगवतः सर्वात्मकत्वे सकलजगच्छरीरकत्वे समस्तचेतनाचेतननियन्तृत्वे कथिते सति तच्छ्रुत्वा आस्तिक्यातिशयेनतत्तथैवेति निश्चित्य यथाश्रुताकारविशिष्टं भगवन्तं साक्षात्कर्तुकामोर्जुनः पृच्छति ।**

**मदनुग्रहाय – मम अनुग्रहं कर्तुम् । परमं गुह्यम्-अतिरहस्यम् अध्यात्मसंज्ञितं - आत्मविषयकतया अध्यात्मनामकम् । यद्वचः । त्व**

**या- आप्ततमेन। उक्तम्। तेन - वाक्येन। अयं-आत्मविषयः। मम। मोहः - भ्रमः। विगतः - निवृत्तः ॥ १ ॥**

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥ २ ॥

**हे कमलपत्राक्ष ? भूतानां - देवमनुष्यादिसमस्तजन्तूनाम्। त्वत्तः - परमात्मनः सकाशात्। भवाप्ययौ-उत्पत्तिलयौ। विस्तरशः- प्रपंचेन। मया श्रुतौ। अव्ययं - अवधिरहितम्। माहात्म्यं - भवन्महिमाच। विस्तरेण श्रुतं। हीत्याश्चर्ये ॥ २ ॥**

एवमेतद्यथात्थ त्वमात्मानं परमेश्वर।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥ ३ ॥

**हे परमेश्वर- सर्वनियामक। त्वं। आत्मानं -भवन्तम्। यथा - येन प्रकारेण। आत्थ-ब्रवीषि। एतत्। एवं-इत्थम् सत्यमेव। हे पुरुषोत्तम। ते - तव। ऐश्वरं - त्वदसाधारणं। रूपं - दिव्यात्मस्वरूपं। द्रष्टुम् - साक्षात्कर्तुम्। इच्छामि ॥ ३ ॥**

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥ ४ ॥

**हे प्रभो। योगेश्वर - ज्ञानशक्त्यादिगुणयोगनियामक। तत - स्वरूपं। मया। द्रष्टुं - साक्षात्कर्तुं। शक्यमिति। यदि मन्यसे - संकल्पयसिचेत्। ततः - संकल्पादेव। आत्मानं - त्वत्स्वरूपम्। अव्ययम् - अशेषं यथा तथा। मे - मम। त्वमेव। दर्शय ॥ ४ ॥**

श्रीभगवानुवाच।

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥ ५ ॥

**एवमत्यन्तसन्तोषगद्गदकण्ठेन शरणागतेनाऽर्जुनेन याचितो**

भगवानुवाच –

हे पार्थ । शतशः - शतानि । सहस्रशः - सहस्राणि । नानाविधानि – नानाप्रकाराणि । दिव्यानि - अप्राकृतानि । नानावर्णाकृतानि – अनेकशुक्लपीतादिवर्णसहितसुरनर तिर्यगादिसमानाकाराणि । मे – मम । रूपाणि । पश्य - अवलोकय ॥ ५ ॥

पश्यादित्यान् वसून् रुद्रानश्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ ६ ॥

हे भारत । आदित्यान् , वसून् , रुद्रानश्विनौ , मरुतश्च । पश्य- मम रूपे साक्षात्कुरु । तथा । अदृष्टपूर्वाणि-इतः पूर्वं कुत्राप्यदृष्टानि । बहून्याश्चर्याणि । पश्य ॥ ६ ॥

इहैकस्थं जगत् कृत्स्नं पश्याद्य स चराचरम् ।
मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥ ७ ॥

हे गुडाकेश - अर्जुन । अद्य - इदानीं । इह - मया दर्शयिष्यमाणे मद्रूपे । एकस्थं - एकदेशस्थितम् । सचराचरं –जंगमस्थावरान्वितम् । कृत्स्नं - अखिलं । जगत्पश्य । अन्यच्च यद्वस्तुजातं द्रष्टुमिच्छसि तदपि पश्य ॥ ७ ॥

नतु मां शक्ष्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥ ८ ॥

हे अर्जुन । अनेन स्वचक्षुषा – परिमितविषयग्राहिणा त्वदीयमांसचक्षुषातु । मां - उक्ताकारविशिष्टं । द्रष्टुं । न शक्ष्यसे – शक्तो न भविष्यसि । ते – तव । दिव्यं - अप्राकृतम् । चक्षुर्ददामि । तेन - दिव्यचक्षुषा । मम । ऐश्वरं - असाधारणम् । योगं - अनन्तकल्याणगुणविभूतियोगं । पश्य ॥ ८ ॥

संजय उवाच ।

एवमुक्त्वा ततोराजन् महायोगेश्वरो हरिः ।

दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥ ९ ॥

**एवमुक्त्वा कृष्णः किंकृतवानिति पृच्छन्तं धृतराष्ट्रम्प्रति सञ्जयआह- हे राजन्। महा योगेश्वरः - सकलाश्चर्यमहायोग नियन्ता। हरिः- श्री कृष्णः। एवं – पूर्वोक्तरीत्या। उक्त्वा। ततः - तदनन्तरं। पार्थाय - अर्जुनाय। परमं - निरतिशयं। ऐश्वरं - स्वासाधारणम्। रूपं - विचित्रविग्रहं। दर्शयामास ॥ ९ ॥**

अनेकवक्त्रनयन मनेकाद्भुतदर्शनम्।

अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥ १० ॥

**अनेकवक्त्रनयनं - अनेकानि- बहूनि, वक्त्राणि - मुखानि, नयनानिच यस्य तथोक्तम्। अनेकाद्भुतं दर्शनं यस्यतथोक्तम्। अनेकदिव्याभरणं – अनेकानि दिव्यानि भूषणानि यस्य तथोक्तम्। दिव्यानेकोद्यतायुधं - दिव्यानि अप्राकृतानि, अनेकानि - नानाविधानि, उद्यतानि – विरोधिनिरसनोद्युक्तानि, आयुधानि - चक्रादीनि, यस्य तथोक्तम् ॥ १० ॥**

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम्।

सर्वाश्चर्यमयंदेव मनन्तं विश्वतो मुखम् ॥ ११ ॥

**दिव्यमाल्यांबरधरं - दिव्यानिमाल्यान्यबराणिच धरतीतितथोक्तम्। दिव्यगन्धानुलेपनम् - अप्राकृतसौरभवदनाद्यनुलेपयुक्तं। सर्वाश्चर्यमयं - आश्चर्यभूतं। देवं -द्योतमानं। अनन्तं - अपरिच्छिन्नं। विश्वतोमुखं - सर्वदिग्वर्तिमुखं। एतादृशं रूपं दर्शयामासेतिपूर्वेणान्वयः ॥ ११ ॥**

दिवि सूर्यसहस्रस्य भवे द्युगपदुत्थिता।

यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥ १२ ॥

**दिवि- आकाशे। सूर्यसहस्रस्य - अनन्तसूर्याणां। भा - कांतिः। युगपत् - एककालमेव। उत्थिता - उदिताभवेद्यदि। सा-कांतिः।**

तस्य - भगवतः । महात्मनः - महाविग्रहस्य । भासः - तेजसः । सदृशी - समाना । स्यात् । अभूतोपमेयम् ॥ १२ ॥

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥ १३ ॥

तत्र - तादृशे । देवदेवस्य - भगवतः । शरीरे । एकस्थं-एकदेशेस्थितं । अनेकधा - बहुप्रकारेण । प्रविभक्तं - भिन्नं । कृत्स्नं अखिलचेतनाचेतनात्मकं । जगत् । तदा - तस्मिन् समये । पाण्डवः- धनञ्जयः । अपश्यत - ददर्श ॥ १३ ॥

ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयः ।
प्रणम्यशिरसा देवं कृताञ्जलिरभाषत ॥ १४ ॥

सः-धनञ्जः । ततः-अत्यद्भुतदिव्यविग्रहदर्शनाद्धेतोः । विस्मयाविष्टः-आश्चर्यपरवशः । हृष्टरोमा-पुलकितगात्रस्सन् । देवं - भगवंतं । शिरसा - मूर्ध्ना । प्रणम्य-भूमौपतित्वा । कृतांजलिः सन् । अभाषत - उवाच ॥ १४ ॥

अर्जुन उवाच ।

पश्यामि देवांस्तव देव देहे सर्वा स्तथा भूतविशेषसंघान् ।
ब्रह्माणमीशं कमलासनस्थ मृषींश्च सर्वानुरगांश्च दिव्यान् ॥ १५ ॥

हे देव! तव । देहे - दिव्यविग्रहे । सर्वान् देवान् - त्रयस्त्रिंशत्कोटिदेवताः । तथा । सर्वान् - समस्तान् । भूतविशेषसंघान् - प्राणिविशेषसमूहान् । ब्रह्माणं - चतुर्मुखं । कमलासनस्थं - कमलासनस्य ब्रह्मणोमतेस्थितं । ईशं - रुद्रं । सर्वान् ऋषीन् - नारदप्रमुखांश्च । दिव्यान् - अलौकिकान् । उरगान् वासुकिप्रमुखसर्पान् । पश्यामि ॥ १५ ॥

अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोनन्तरूपम् ।
नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूपम् ॥ १६ ॥

हेविश्वेश्वर! सकलजगन्नियन्तः । हेविश्वरूप ! - सकलजगच्छरीरक । अनेकबाहूदरवक्त्रनेत्रं - अनेकानि - बहूनि, बाहवः, उदराणि, वक्त्राणि - नेत्राणिच, यस्यतं तथोक्तं । अनन्तं – अपरिछिन्नस्वरूपम् । त्वां । सर्वतः समन्तात् । पश्यामि । तव । अन्तं अवसानं । आदिं मध्यंच पुनः नपश्यामि ॥ १६ ॥

किरीटिनं गादिनं चक्रिणञ्च तेजोराशिं सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वा दुर्निरीक्ष्यं समंता द्दीप्तानलार्क द्युतिमप्रमेयम् ॥१७॥

तेजोराशिं - तेजः पुञ्जरूपं । सर्वतोदीप्तिमंतः- सर्वव्यापिप्रभाचेतम् । दीप्तानलार्कद्युतिं – दीप्तानां – ज्वलितानां, अनलानां - अग्नीनां, अर्काणांच, द्युतिरिव द्युति र्यस्यतं तथोक्तं । अप्रमेयं - ईदृगिति परिच्छेत्तुमशक्यं । समन्तात् - सर्वतः । दुर्निरीक्ष्यं - प्रयासेनापि निरीक्षित्तुमशक्यं । एवमदृष्टरूपं । त्वां । किरीटिनं किरीटवंतं ! गदिनं गदावंतं । चक्रिणं – चक्रहस्तंच । पश्यामि - किरीटादिलांछनेन कृष्णएवायमिति प्रत्यभिजानामि ॥ १७ ॥

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययश्शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥ १८ ॥

हे प्रभो ! वेदितव्यं - उपासकैः ज्ञातव्यम् । परं - प्रकृतेः परम् , जीवादपि परम् । अक्षरम् । त्वमेव । अस्य - चेतनात्मकस्य । विश्वस्य - जगतः । परं - अनन्याधारम् । निधानं - आधारभूतस्त्वमेव । अव्ययः - सदैकरूपः । त्वमेव । शाश्वतधर्मगोप्ता - शाश्वतस्य धर्मस्य -नित्यस्य वर्णाश्रमोचितस्य , गोप्ता - रक्षकः । सनातनः पुरुषः - पुराणपुरुषः । त्वमेव । मतः - मया साक्षात्कृतइत्यर्थः ॥ १८ ॥

अनादिमध्यान्त मनन्तवीर्य मनन्तबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वा दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तं ॥ १९ ॥

अनादिमध्यान्तं - आदिमध्यान्तरहितम् । अनन्तवीर्यं - अनवधिकवीर्यसम्पन्नम् । अनन्तबाहुं - असंख्येयभुजम् । शशिसूर्यनेत्रं-

चन्द्रसूर्यव त्प्रसादप्रतापयुक्तसर्वनेत्रम् । दीप्तहुताशवक्त्रम् । प्रज्वलितकालाग्निव त्संहारोन्मुखानेकवक्त्रसंयुक्तम् । स्वतेजसा - स्वकीयप्रभया । इदम् । विश्वं- जगत्त्रयं । तपन्तं - अभिभवन्तंच । त्वाम् । पश्यामि - साक्षात्करोमि ॥ १९ ॥

द्यावापृथिव्यो रिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वाऽद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन् ॥ २० ॥

द्यावापृथिव्योः - पृथिव्यन्तरिक्षादिसमस्तलोकानाम् । इदमंतरं - अन्तराळम् । एकेन त्वया । व्याप्तं - आक्रान्तंहि । सर्वादिशश्च । व्याप्ताः । हे महात्मन् इदम् । अनन्तम् । अद्भुतं - अतिविचित्रम् । उग्रं - अतिभयंकरम् । तव रूपम् दृष्ट्वा । लोकत्रयं - अनुकूलप्रतिकूलमध्यस्थरूप सकललोकवर्तिजनत्रितयम् । प्रव्यथितम् - अत्यन्तभीतम् ॥ २० ॥

अमी हि त्वा सुरसंघा विशन्ति केचिद्भीताः प्रांजलयो गृणन्ति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसंघा स्स्तुवन्तित्वां स्तुतिभिः पुष्कलाभिः ॥ २१ ॥

अमी । सुरसंधाः - देवसमूहाः । त्वाम् । विशन्तिहि । केचित - धैर्यरहिताः सुराः । भीताः सन्तः । प्रांजलयः - बद्धांजलयः । गृणन्ति - स्तुतिरूपाणि वाक्यानि यथा स्वज्ञानमुच्चारयन्ति । महर्षिसिद्धसंघाः - महर्षीणां - भृग्वादीनां, सिद्धानां – सनकादीनांच, संघाः – समूहाः । स्वस्तीत्युक्ता - मंगळाशासनम् कृत्वा । पुष्कळाभिः - समग्राभिः । स्तुतिभिः - स्तोत्रैः । त्वां स्तुवन्ति ॥ २१ ॥

रुद्रादित्या वसवो येच साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
गन्धर्वयक्षा सुरसिद्धसंघा वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥ २२ ॥

रुद्रादित्याः - एकादशरुद्राः द्वादशादित्याः । वसवः - अष्टवसवः । येच साध्याः - साध्यनामका देवाः । विश्वेदेवाः अश्विनौ द्वौ । मरुतः - एकोनपंचाशद्वायवः । ऊष्मपाः - पितरः । ग-

न्धर्वयक्षासुरसिद्धसंघाश्च । ते सर्वे । विस्मिताः सन्तः । त्वा मेव । वीक्षन्ते - विलोकयन्ति ॥ २२ ॥

रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाऽहम् ॥ २३ ॥

हे महाबाहो । बहुवक्त्रनेत्रं । बहुबाहूरुपादं । बहूदरं । बहुदंष्ट्राकरालं - बहुभिर्दंष्ट्राभिरतिभयंकरं । महत् - अपरिच्छेद्यं । तव । रूपं - विग्रहं । दृष्ट्वा । लोकाः - सर्वे जनाः । प्रव्यथिताः - अत्यन्तभयार्दिताः । तथाहंच प्रव्यथितः ॥ २३ ॥

नभस्स्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वा प्रव्यथितांतरात्मा धृतिं नविन्दामि शमंच विष्णो ॥ २४ ॥

हे विष्णो । नभः स्पृशं - परमाकाशपर्यन्तस्पृशं । दीप्तं - अतीव प्रकाशमानम् । अनेकवर्णं - नानावर्णम् । व्यात्ताननं - जगद्ग्रसनोन्मुखानेक विवृतवक्त्रम् । दीप्तविशालनेत्रं - अनुकूल प्रतिकूलविषय सौम्यासौम्य दीप्तिमद्विपुलनयनम् । त्वामेतादृशं । दृष्ट्वा । प्रव्यथितान्तरात्मा - अत्यन्तभीतमनस्कोहं । धृतिं - धैर्यं । नविन्दामि । शमं - शान्तिच । न विन्दामि ॥ २४ ॥

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि ।
दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥ २५ ॥

दंष्ट्राकरालानि - दंष्ट्राभिरतिभीषणानि । कालानलसन्निभानि- युगान्ताग्निसदृशानि । ते - तव । मुखानि । दृष्ट्वैव - दर्शनमात्रेण । दिशः - नजाने । शर्म - सुखम् । नचलभे । हे जगन्निवास - हे देवेश । प्रसीद- प्रसन्नो भव ॥ २५ ॥

अमी हि त्वा धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः ।
भीष्मो द्रोणः सूतपुत्रस्तथाऽसौ सहास्मदीयैरपि योधमुख्यैः ॥ २६ ॥

अमी । सर्वे । धृतराष्ट्रस्य पुत्राः - दुर्योधनादयः । भीष्मः । द्रोणः । तथासौ । सूतपुत्रः - कर्णः । अवनिपालसंघैः सहायार्थमा

गतै राज समूहैः । अस्मदीयैः - अस्मत्सहायभूतैः । योधमुख्यैः अरियोधाग्रेसरैरपि सह । त्वां हि त्वामेव । विशन्ति ॥ २६ ॥

वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकराळानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु संदृश्यन्ते चूर्णितैरुत्तमांगैः ॥ २७ ॥

अमी - दुर्योधनादयः । त्वरमाणाः - त्वरावन्तः । दंष्ट्रा कराळानि - दंष्ट्राभिरतिविकृतानि । भयानकानि - भयंकराणि । ते - तव । वक्त्राणि । विशन्ति - शलभाः पावकमिव नाशाय प्रविशन्तीत्यर्थः । केचित । चूर्णितैः - भवद्दन्तघातेन चूर्णीकृतैः । उत्तमांगैः - शिरोभिः सहिताः । दशनान्तरेषु - भवदीयदन्तान्तरालेषु । विलग्नाः - सक्ताः सन्तः । दृश्यन्ते ॥ ७ ॥

यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति ॥ २८ ॥

यथा । नदीनां । बहवोम्बुवेगाः - वेगवन्तः प्रचुरजलप्रवाहाः । समुद्रंप्रत्येवाभिमुखाः सन्तः । द्रवन्ति - गच्छन्ति । तथा । अमी । नरलोकवीराः-राजानः । तव । अभिविज्वलन्ति वक्त्राणि विशन्ति ॥२८॥

यथा प्रदीप्तं ज्वलनं पतंगा विशन्ति नाशायसमृद्धवेगाः ।
तथैव नाशाय विशन्ति लोका स्तवापि वक्त्राणि समृद्धवेगाः ॥ २९ ॥

यथा । पतंगाः - शलभाः । समृद्धवेगाः - संपूर्णवेगाः सन्तः । नाशाय - भस्मीभावाय । प्रदीप्तं - प्रकर्षेण ज्वलन्तम् । ज्वलनं - पावकम् । विशन्ति । तथैव । लोकाः - सर्वे राजानोपि । समृद्धवेगाः - सत्वराः सन्तः । विनाशाय - विनाशं संप्राप्तुम् । तव वक्त्राणि । विशन्ति ॥ २९ ॥

लेलिह्यसे ग्रसमानः समन्ता ल्लोकान् समग्रान् वदनै र्ज्वलद्भिः ।
तेजोभि रापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो ॥ ३० ॥

समग्रान् लोकान् - समरांगणसमवेतान् समस्तान् राज्ञः । उज्वलद्भिः - देदीप्यमानैः । वदनैः - मुखैः । ग्रसमानः - भक्षयन् ।

समन्तात - सर्वतः । तद्रुधिरावसिक्तं सर्वमोष्ठादिप्रदेशम् । लेलिह्यसे - जिह्वया पुनः पुनः लिहसि । हे विष्णो! । उग्राः- अतिघोराः । ते भासः – रश्मयः । तेजोभिः - स्वकीयप्रकाशैः । समग्रं -समस्तम् । जगत् । आपूर्य । प्रतपन्ति ॥ ३० ॥

आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद ।
विज्ञातु मिच्छामि भवन्त माद्यं नहि प्रजानामि तव प्रवृत्तिम् ॥ ३१ ॥

हे देववर! – देवतासार्वभौम! । ते - तुभ्यम् । नमोस्तु । उग्ररूपः - भयंकरविग्रहः । भवान् । कः । आद्यं - जगत्कर्तारम् । भवन्तम् । विज्ञातुं – विशेषेण ज्ञातुम् । इच्छामि । हि – यस्मात् । तव । प्रवृत्तिं – ईदृशं घोररूपाविस्करणहेतुभूतं प्रयत्नम्। नजानामि । आख्याहि – ममोत्तरं ब्रूहि । प्रसीद – प्रसन्नोभव ॥ ३१ ॥

( श्रीभगवानुवाच )

कालोस्मि लोकक्षयकृत् प्रवृद्धो लोकान् समाहर्तु मिह प्रवृत्तः ।
ऋतेपि त्वा न भविष्यन्ति सर्वे येवस्थिताः प्रत्यनीकेषु योधाः ॥ ३२ ॥

लोकक्षयकृत – लोकसंहारकर्ता । कालः - मृत्युरहम् । लोकान् - समस्तराजजनान् । समाहर्तुम् – स्वयमेवहर्तुम् । प्रवृत्तः सन् । इह – कुरुक्षेत्रे । प्रवृद्धः घोररूपेण विजृंभितोस्मि । अतः । प्रत्यनीकेषु – शत्रुसैन्येषु । ये । योधाः - योद्धारः । अवस्थिताः । तेसर्वे । त्वामृते - भवन्तंविनाऽपि । नभविष्यन्ति - मत्संकल्पादेव नष्टा भविष्यन्ति ॥ ३२ ॥

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुंक्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ॥ ३३ ॥

तस्मात - कारणात् । त्वमुत्तिष्ठ । यशः - कीर्तिम् । लभस्व । शत्रून् । जित्वा - अप्रयत्नेन संहृत्य । समृद्धं राज्यं भुङ्क्ष्व । एते - धार्तराष्ट्रादयः । पूर्वमेव – त्वदुद्योगात्प्रागेव । म

यैव - सर्वसंहर्त्रा । निहताः - हन्तुं संकल्पिताः । हे सव्यसाचिन् - अर्जुन । त्वं निमित्तमात्रंभव ॥ ३३ ॥

द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान् ।
मया हतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान् ॥ ३४ ॥

मया - सर्वसंहारकेन । हतान् - हननायसंकल्पितान् । द्रोणं भीष्मं, जयद्रथं, कर्णं, तथान्यान्, योध्दवीरान् अपि । त्वम् । जहि । माव्यधिष्ठाः- व्यथांमाकृथाः । युध्यस्व - स्ववर्णोचितम् युद्धं कुरु । रणे । सपत्नान् - शत्रून् । जेष्यसि ॥ ३४ ॥

( संजय उवाच )

एतच्छ्रुत्वा वचनं केशवस्य कृतांजलि र्वेपमानः किरीटी ।
नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ॥ ३५ ॥

किरीटी - अर्जुनः । केशवस्य - भगवतः । एतत् - पूर्वोक्तवचनम् । श्रुत्वा - निशम्य । नमस्कृत्वा । भीतभीतः - अत्यन्तभीतस्सन् । भूयएव । प्रणम्य - दण्डवत्प्राणिपत्य । कृतांजलिः - सम्पुटीकृतकरद्वय स्सन् । वेपमानः - कम्पमानः । कृष्णं प्रति । सगद्गदं - गद्गदस्वरेण सह । आह - अब्रवीत् ॥ ३५ ॥

( अर्जुन उवाच )

स्थाने हृषीकेश तव प्रकीर्त्या जगत् प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्तिच सिद्धसंघाः ॥ ३६ ॥

हे हृषीकेश । जगत - युद्धदिदृक्षया समागतं देवगन्धर्वादिरूपं जगत् । तव प्रकीर्त्या - त्वन्महात्म्यकीर्तनेन । प्रहृष्यति - हर्ष प्राप्नोति । अनुरज्यतेच - अनुरक्तंच भवति । रक्षांसि - राक्षसाः । भीतानि - भयातुरा स्सन्तः । दिशः प्रति । द्रवन्ति - पलायन्ते । सर्वे सिद्धसंघाः - सिद्धावर्गाः । त्वां । नमस्यन्ति - प्रणमान्तिच । स्थाने - युक्तमेतत् ॥ ३६ ॥

कस्माच्च ते न नमेरन्महात्मन् गरीयसे ब्रह्मणोप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥ ३७ ॥

**हेमहात्मन् - अपरिच्छिन्नविग्रह । ब्रह्मणः - चतुर्मुखस्यापि । आदिकर्त्रे - निमित्तोपादानकारणभूताय । गरीयसे । ते - तुभ्यं । कस्माद्धेतोः । सर्वे । ननमेरन् - ननमस्कुर्युः । हे अनन्त - अपरिच्छिन्नस्वरूप । देवेश - सर्वदेवनियन्तः । जगन्निवास - सकलजगदाधार । सदसत् - सदसच्छब्दवाच्यं कार्यकारणोभयावस्थंसर्वंप्रकृतितत्वं । त्वमेव । तत्परं - तस्मादपिपरंयत् । अक्षरं - मुक्तात्मस्वरूपं । तच्चत्वमेव ॥ ३७ ॥**

त्वमादिदेवः पुरुषः पुराण स्त्वमस्य विश्वस्य परं निधानम् ।
वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप ॥ ३८ ॥

**हेभगवन्! आदिदेवः आदिः जगदुपादानभूतः, देवः - सृष्ट्यादिक्रीडापरः । पुराणपुरुषस्त्वं । अस्य - परिदृश्यमानस्य । विश्वस्य - जगतः । परं - उत्कृष्टम् । निधानं - आश्रयभूतस्त्वम् । वेत्ताचत्वमेवासि । वेद्यं - ज्ञातव्यंच त्वमेव । परंधाम - परमप्राप्यभूतं वैकुण्ठादिस्थानंच । त्वमेव । हे अनन्तरूप - त्रिविधपरिच्छेदातीतस्वरूप । विश्वं - जगत । त्वया । ततं - व्याप्तम् ॥ ३८ ॥**

वायुर्यमोग्निर्वरुण श्शशांकः प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्तेस्तु सहस्रकृत्वः पुनश्च भूयोपि नमो नमस्ते ॥ ३९ ॥

**हे भगवन् । वायुः, यमः, अग्निः, वरुणः, शशांकः, प्रजापतिरित्यादयस्त्वमेव । पितामहश्चत्वम् । लोकस्य पितरः - प्रजापतयः, तज्जनकः हिरण्यगर्भः प्रपितामहः, तस्यापि जनको भगवान् प्रपितामहइत्यर्थः । अतः । ते - तुभ्यम् । सहस्रकृत्वः - सहस्रसंख्याकावृत्ति । नमोनमः - अनन्यार्होनमस्कारोस्तु ।**

पुनश्च । सहस्रकृत्वः । नमोनमः । भूयोपि । सहस्रकृत्वः। नमोनमोस्तु ॥ ३९ ॥

नमः पुरस्तादथ पृष्ठतस्ते नमोस्तु ते सर्वत एव सर्व ।
अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोसि सर्वः ॥ ४० ॥

हे सर्व – ब्रह्मादिसमस्तदेवतारूप । ते – तुभ्यम् । पुरस्तात् – अग्रे । नमोस्तु । अथ – अनन्तरम् । ते । पृष्ठतः - पश्चात । नमोस्तु । किंबहुना । ते । सर्वतएव – सर्वास्वपि दिक्षु । नमोस्तु । अनन्तवीर्य - अनवधिकातिशयज्ञानबलैश्वर्यादि- कल्याणगुणनिधे । अमितविक्रमः – अपरिमितपराक्रमस्त्वम् । सर्वं - वस्तुजातम् । समाप्नोषि - आत्मतया अन्तर्व्याप्नोषि । ततः - कारणात । त्वम् । सर्वोसि - सर्वात्मकोसि ॥ ४० ॥

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि ॥ ४१ ॥

हे भगवन् ! इदं सर्वान्तरात्मत्वादिरूपं । तव । महिमानम् अजानता मया । प्रमादात् - मोहात् । प्रणयेन - चिरपरिचयेनवापि । असौ । सखा - वयस्यः । इतिमत्वा । हे कृष्ण! श्यामलांग । हे यादव ! यदुकुलप्रसूत । हे सखे ! वयस्य । इतिच संबोध्य । प्रसभं - विनयापेतंयथातथा । यद्वचनम् । उक्तं जल्पितम् ॥ ४१ ॥

यच्चावहासार्थमसत्कृतोसि विहारशय्यासनभोजनेषु ।
एकोथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयम् ॥ ४२ ॥

किंच । हे अच्युत ! त्वं । अवहासार्थं मातुलसुतोचित परिहासार्थं । विहारशय्यासन भोजनेषु- सहशयनसहोपवेशसहभोजनेषु । एकः एकान्तेवस्थितः । अथवा, तत्समक्षं - सर्वजनसन्निधावपि असत्कृतोसीति यत मपराधजातमस्ति तत्सर्वं । अहं । तवदासः । अप्रमेयं अपरिच्छेद्यस्वभावं । आश्रितदोषभोग्यं । त्वां । क्षामये - क्षमांकारयामि ॥ ४२ ॥

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोस्त्यभ्यधिकः कुतोन्यो लोकत्रयेप्यप्रतिमप्रभाव ॥ ४३ ॥

**हे अप्रतिमप्रभाव! – अतुलगुणवैभव! । त्वम् । अस्य - कृत्स्नस्य । चराचरस्य – जंगमाजंगमरूपस्य । लोकस्य । पिता – जनकः । पूज्यः – पूजार्हः । गरीयान् - उत्कृष्टतमः । गुरुः - आचार्यश्च । असि । लोकत्रयेपि–कृतकाकृतक कृतकाकृतकभेदेन त्रिप्रकारकेष्वपि लोकेषु । अन्यः - त्वद्व्यतिरिक्तः । नत्वत्समः - केनापि कारुण्यादिगुणेन त्वत्सदृशो नास्ति । अभ्यधिकः - अधिकस्तु । कुतः - नकुतोपीत्यर्थः ॥ ४३ ॥**

तस्मात् प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम् ॥ ४४ ॥

**तस्मात् - कारणात । अहं-अपराधसहस्रभाजनभूतः । ईशं – जगन्नियन्तारम् । ईड्यं - जगत्स्तोत्रार्हम् । त्वां - आश्रितवत्सलम् । कायं - शरीरम् । प्रणिधाय – भूतले दण्डवत्प्रणिपात्य । प्रणम्य । प्रसादये - मयि प्रसादंकारयामि । हे देव! पुत्रस्यापराधं पितेव । सख्युरपराधं सखेव । प्रियाय मह्यम् । प्रियस्त्वम् । तदपराधजातम् । सोढुं - क्षन्तुम् । अर्हसि ॥ ४४ ॥**

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देवरूपं प्रसीद देवेश जगन्निवास ॥ ४५ ॥

**हे देव! अदृष्टपूर्वं – मया कदाचिदप्यदृष्टम् । इदं - रूपम् । दृष्ट्वा – साक्षात्कृत्य । हृषितः – प्रहृष्टोस्मि । भयेनच - त्वद्दर्शनजनितभयेन । मे मनश्च । प्रव्यथितं - प्रचलितम् । इदं रूपमुपसंहृत्य । मे - मह्यम् । तदेव - सौम्यमेव । ते - प्राचीनम् - रूपम् । दर्शय । हे देवेश! सर्वदेवनियामक । जगन्निवास! निखिलजगदाश्रय । प्रसीद – प्रसन्नोभव ॥ ४५ ॥**

किरीटिनं गदिनं चक्रहस्त मिच्छामि त्वां द्रष्टुमहं तथैव ।
तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥ ४६ ॥

**तथैव – पूर्ववदेव । किरीटिनं - किरीटवन्तम् । गदिनं - कौमोदकी सहितम् । चक्रहस्तं – सुदर्शनपाणिम् । त्वाम् - अहम् । द्रष्टुं – साक्षात्कर्तुम् । इच्छामि । हेसहस्रबाहो ! सहस्रभुज । विश्वमूर्ते ! सर्वजगच्छरीर । तेनैव चतुर्भुजेन रूपेण । भव – आविर्भव ॥ ४६ ॥**

( श्रीभगवानुवाच )

मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात् ।
तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम् ॥ ४७ ॥

**हे अर्जुन! मे - मम । यद्रूपं , तेजोमयम् । विश्वं-विविधविचित्रजगदात्मकम् । अनन्तं - अपरिच्छिन्नम् । आद्यं - जगदुपादानभूतं । त्वदन्येन - त्वद्व्यतिरिक्तेन केनापि । नदृष्टपूर्वं - पूर्वं न दृष्टं । इदं । परं - निरतिशयोत्कृष्टं । रूपं । प्रसन्नेन – त्वयि प्रसादवता । मया-आश्रितवत्सलेन । आत्मयोगात - आत्मसंकल्पा देव । तव - प्रार्थयमानस्य । दर्शितं - दर्शनविषयीकृतम् ॥ ४७ ॥**

न वेद यज्ञाध्ययनैर्नदानै र्नच क्रियाभि र्नतपोभिरुग्रैः ।
एवंरूप श्शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ॥ ४८ ॥

**हे कुरुप्रवीर! हे कुरुश्रेष्ठ ! एवं रूपः - ईदृशस्वरूपः । अहम् । नृलोके - मनुष्यलोके । त्वदन्येन । वेदयज्ञाध्ययनैः – वेदानां - सांगानां , यज्ञानां - कल्पसूत्रादियज्ञविद्यानांच, अध्ययनैः - ग्रहणधारणादिरूपैः । द्रष्टुं न शक्यः । दानैरपि द्रष्टुं न शक्यः । क्रियाभिः - दर्शपूर्णमासादिभिश्च । द्रष्टुं नशक्यः । उग्रैः - अतिदुष्करैः । तपोभिरपिद्रष्टुं न शक्यः ॥ ४८ ॥**

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्गमेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥ ४९ ॥

ईदृक् - ईदृशम् । घोरं - अतिभयंकरं । इदम् । मम । रूपम् । दृष्ट्वा । ते-तव । व्यथा - भयं । माभूत् । विमूढभावः - वैकल्यंच । माभूत् । व्यपेतभीः - विगतभयः । प्रीतमनाः – सन्तुष्टचित्तश्च सन् । तदेव - पूर्वं तवाभ्यस्तमेव । इदं - दर्शयिष्यमाणं । मे - मम । रूपं - सौम्यं रूपं । पुनः । प्रपश्य - वीक्षस्व ॥ ४९ ॥

( संजय उवाच )

इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः ।
आश्वासयामास च भीतमेनं भूत्वा पुन स्सौम्यवपुर्महात्मा ॥ ५० ॥

वासुदेवः । इति - इत्युक्तप्रकारेण । अर्जुनमुक्त्वा । भूयः - पुनरपि । स्वकं - स्वकीयम् । रूपं दर्शयामास । किंच – महात्मा – महानुभावः श्रीकृष्णः । पुनः - सौम्यवपुर्भूत्वा । भीतं – अपरिचित भयंकरविश्वरूप दर्शनेन जनितभयाविष्टं । एनं – अर्जुनं । आश्वासयामास - चतुर्भिरपिबाहुभि रंगाभिमर्शनेन तस्य भयमपाचकारेत्यर्थः ॥ ५० ॥

( अर्जुन उवाच )

दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ।
इदानीमस्मि संवृत्त स्सचेताः प्रकृतिं गतः ॥ ५१ ॥

हे जनार्दन ! श्रीकृष्ण । इदं - निरतिशय सौन्दर्य सौकुमार्यादि कल्याणगुणशालि । मानुषम् - मनुष्यजातीयम् । सौम्यं - प्रसन्नम् । तव । रूपं – विग्रहम् । दृष्ट्वा । इदानीं । सचेताः - प्रसन्न मनस्कः । संवृत्तः – जातोऽस्मि । प्रकृतिं – स्वस्थताम् । गतः - प्राप्तश्च ॥ ५१ ॥

( श्रीभगवानुवाच )

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्यं दर्शनकांक्षिणः ॥ ५२ ॥

मम । यदीश्वररूपं । दृष्टवानसि । इदं - रूपं । सुदुर्दर्शं - अति दुर्लभदर्शन मित्यर्थः । यतः – देवाः – ब्रह्मादयोपि । नित्यं - अनव-

रतम् । अस्य – रूपस्य । दर्शन कांक्षिणः – दर्शनाभिलाषिणः ॥ ५२ ॥

नाहं वेदै र्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥ ५३ ॥

यथा – यादृशं - अप्राकृताकारविशिष्टम् । मां । दृष्टवानसि – एवंविधोहं । वेदैः - केवलस्वाध्यायैः । द्रष्टुं नशक्यः । केवलेन दानेनापि नशक्यः । इज्यया - केवलयोगेनापि । नशक्यः ॥ ५३ ॥

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥ ५४ ॥

हे परंतप ! नामश्रवणमात्रेण शत्रुसन्तापकर ! हे अर्जुन ! एवंविधो विश्वरूपोहम् । अनन्यया – अव्यभिचारिण्या । भक्त्याय तु । तत्त्वेन ज्ञातुम् - शास्त्रतः अवगन्तुम् । द्रष्टुं - साक्षात्कर्तुम् । प्रवेष्टुं – प्राप्तुञ्च । शक्यः ॥ ५४ ॥

मत्कर्मकृन्मत्परमो मद्भक्त स्संगवर्जितः ।
निर्वैर स्सर्वभूतेषु य स्समामेति पाण्डव ॥ ५५ ॥

इति श्रीभगवद्गीतायाम् एकादशोध्यायः ॥ ११ ॥

मत्कर्मकृत् - मत्सन्तर्पणकवेदाध्ययनादिकर्मकृत् । मत्परमः – मदेकप्रयोजनः । मद्भक्तः - श्रवणकीर्तनस्मरणस्तुतिप्रणामार्चनादिरूपा मद्भक्तिः , तद्युक्तः । संगवर्जितः - मदितरविषयासक्तिरहितः । सर्वभूतेषु । निर्वैरः - निरसूयः । एवंभूतोयः पुरुषः । सः । मां- अखिलहेयप्रत्यनीकं । एति सवासनं निवृतसमस्ता विद्यादिप्राप्तिप्रतिबन्धकः सुखेन प्राप्नोति ॥ ५५ ॥

इति श्रीमद्यामुनाचार्यविरचिते भगवद्गीतार्थसंग्रहे
एकादशोध्यायः ॥ ११ ॥

श्रीः।

॥ श्रीमते रामानुजाय नमः ॥

# अथ द्वादशोध्यायः ॥ १२ ॥

( अर्जुन उवाच )

एवं सततयुक्ता ये भक्ता स्त्वां पर्युपासते।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १ ॥

**एवं भगवता भक्तियोगलभ्यस्य परब्रह्मणः स्वस्यासाधारणं यथावस्थितं निरंकुशैश्वर्यं दिदृक्षवेऽर्जुनाय प्रदर्श्य, तज्ज्ञानदर्शन प्राप्तीनामैकांतिकात्यंतिक परमभक्तिलभ्यत्वमुक्तम्। अथात्मप्राप्तिसाधन भूतादात्मोपासना द्भक्तिरूपस्य भगवदुपासनस्य स्वसाध्यनिष्पाद- नेशैघ्र्यं भगवदुपासनोपायः तदशक्तस्यात्मनिष्ठता तदपेक्षिता श्चोच्यंते ॥**

**एवं – मत्कर्मकृदित्युक्तरीत्या। सततयुक्ताः - त्वया सततयोगमे- व परप्रयोजनं मन्वानाः। येभक्तास्त्वाम्। पर्युपासते - स्वरूप- गुणविभूतिभिः परिपूर्णमुपासते। किंच। येपि। अव्यक्तं – चक्षुरादिकरणै रनभिव्यक्तम्। अक्षरं - प्रत्यगात्मस्वरूपम्! उ पासते। तेषां मध्ये। के। योगवित्तमाः - युज्यतइति योगः, फलं, तद्विदंति - लभन्तइतियोगविदः, अतिशयेन योगविदः यो गवित्तमाः, स्वसाद्ध्यंप्रति शीघ्रगामिनः ॥ १ ॥**

( श्री भगवानुवाच )

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।
श्रद्धया परयोपेता स्ते मे युक्ततमा मताः ॥ २ ॥

**ये - उपासकाः। मनः। मयि - निरतिशयभोग्ये। आ वेश्य। परया - उत्कृष्टया। श्रद्धया। उपेताः। नित्य**

युक्ताः - मया नित्यं सांगत्यमाकांक्षन्तश्च सन्तः । मामुपासते । ते युक्ततमाः – श्रेष्ठतमाः । मताः - संमताः ॥ २ ॥

ये त्वक्षरमनिर्देश्य मव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थ मचलं ध्रुवम् ॥ ३ ॥

येतु - उपासकाः । अनिर्देश्यं - देहादिविलक्षणतया देवमनुष्यादिशब्दनिर्देशानर्हम् । अतएव अव्यक्तं – चक्षुरादिकरणैरनभिव्यक्तम् । सर्वत्रगं · सर्वत्र - देवादिदेहेषु वर्तमानम् । तथाप्यचिन्त्यं - चिन्तयितुमशक्यम् । कूटस्थं – देवमनुष्यादिसर्वदेहसाधारणतया पूर्वपुरुषभूतम्। अतएवाचलं–एकरूपम् । अतएवध्रुवं – नित्यम् । एवंभूतं अक्षरं - प्रत्यगात्मस्वरूपम् ॥ ३ ॥

सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥ ४ ॥

इन्द्रियग्रामं - इन्द्रियसमूहं । संनियम्य - विषयेभ्यः संनिवर्त्य । सर्वत्र – सर्वेष्वात्मसु । समबुद्धयः – ज्ञानैकाकारतया तुल्यधियः । सर्वभूतहिते - सर्वेषां भूतानां, हिते - अनिष्टनिवृत्तिपूर्वके ष्टप्राप्तिरूपे । रताः - आसक्ताश्च सन्तः । पर्युपासते । तेपि । मां - मत्समानाकारम् प्रत्यगात्मानम् । प्राप्नुवन्त्येव ॥ ४ ॥

क्लेशोऽधिकतर स्तेषा मव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भि रवाप्यते ॥ ५ ॥

किन्तु । अव्यक्तासक्त चेतसां – आत्मस्वरूपप्रवणचेतसां । तेषां - उपासकानां । क्लेशः - आयासः । अधिकतरः । कुतइत्यत्राह ( अव्यक्तेति ) हि - यस्मात् कारणात् । देहवद्भिः - देहात्माभिमानवद्भिः । अव्यक्ता - आत्मस्वरूपविषया । गतिः - उपासना रूपा मनोवृत्तिः । दुःखं यथातथा अवाप्यते ॥ ५ ॥

ये तु सर्वाणि कर्माणि मयि सन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ ६ ॥

**येतु । सर्वाणि - लौकिकानिवैदिकानिच कर्माणि । मयि - सर्वात्मभूते । सन्यस्य - समर्प्य । मत्पराः - मदेकप्रयोजनाः । अनन्येन - अव्यभिचारिणा । योगेन - भक्तिरूपोपायेन । ध्यायन्तस्सन्तः । मामुपासते ॥ ६ ॥**

तेषा महं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ॥ ७ ॥

**हेपार्थ ! मय्यावेशितचेतसां - मदेकप्रवणमनसाम् । तेषां । अहम् - आश्रितवात्सल्यैकजलधिः । नचिरात् - अचिरेणैव । मृत्युसंसारसागरात् - मृत्युभूत संसारसमुद्रात । समुद्धर्ता - सम्यगुद्धर्ता भवामि ॥ ७ ॥**

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥ ८ ॥

**हे अर्जुन ! परमपुरुषार्थभूते परमसुलभे सर्वस्वामिनिमय्येव । मनः । आधत्स्व - अर्पय । मय्येव । बुद्धिं - अध्यवसायंच । निवेशय । अतऊर्ध्वं - एवमध्यवसायपूर्वकं मन स्समाधानानन्तरं । मय्येव । निवसिष्यसि - निवत्स्यसि ॥ ८ ॥**

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ॥ ९ ॥

**मयि - अदृष्टपूर्वे । चित्तं - मनः । स्थिरं यथा तथा । समाधातुं - निवेशयितुम् । न शक्नोषि । शक्तो न भविष्यसि यदि । अथ शब्दो यद्यर्थः । ततः - तस्माद्धेतोः । अभ्यासयोगेन । मयि - निरतिशय प्रेमगर्भ स्मरणावृत्त्युपायेन । मां प्राप्तुं इच्छ ॥ ९ ॥**

अभ्यासेप्यसमर्थोऽसि मत्कर्मपरमो भव।
मदर्थमपि कर्माणि कुर्वन् सिद्धि मवाप्स्यसि ॥ १० ॥

अभ्यासेपि - निरतिशयप्रेमगर्भ स्मरणावृत्तावपि । असमर्थोऽसि यदि । ततो मत्कर्मपरमो भव - मत्कर्माणि - इतिहासपुराणादि प्रसिद्धानि आलयनिर्माणोद्यानकरण प्रदीपारोपणसम्मार्जना नुलेपन पुष्पाहरण पूजाप्रवर्तन संकीर्तन प्रदक्षिण स्तुतिप्रणामादि मदाराधनात्मक कर्माणि, परमाणि - प्रयोजनानि, यस्यसः, तथोक्तोभव। मदर्थं केवलं - मत्प्रीणनाय । कर्माण्युक्तरूपाणि । कुर्वन् - आचरन्नपि । सिद्धिं - मत्प्राप्तिरूपाम् । अवाप्स्यसि ॥ १० ॥

अथैतदप्यशक्तोसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्म फलत्यागं ततः कुरु यतात्मवान् ॥ ११ ॥

मद्योगं - मयि निरतिशयभक्तियोगं । आश्रितः सन् । एतदपि - पूर्वोक्तं कर्म। कर्तुमशक्तोसि यदि । ततः । यतात्मवान् - नियमितमनस्क स्सन् । फलत्यागं - फलाभिसन्धिरहितम् । सर्वकर्म - मदाराधनैकवेषं यज्ञ दानादिकं समस्तं कर्म । कुरु - समाचर॥ ११ ॥

श्रेयो हि ज्ञानमभ्यासा ज्ज्ञानाद्ध्यानं विशिष्यते ।
ध्याना त्कर्मफलत्याग स्त्यागाच्छान्ति रनन्तरम् ॥ १२ ॥

हि यस्मात्कारणात् । अभ्यासात - उक्तरूपात् । ज्ञानं - आत्मनः साक्षात्काररूपं । श्रेयः - हितं । ज्ञानात् - तादृशात् । ध्यानं - आत्मस्वरूपविषयकम् । विशिष्यते - हितंभवति। ज्ञानात् - तादृशात् । कर्मफलत्यागः - फलत्यागपूर्वकर्मानुष्ठानं । श्रेयः । त्यागात्तादृशात् । अनन्तरं - अचिरादेव । शांतिः - रजस्तमोमूलकरागद्वेषादिनिवृत्ति र्भवति ॥ १२ ॥

अद्वेष्टा सर्वभूतानां मैत्रः करुण एवच ।
निर्ममो निरहंकार स्समदुःखसुखः क्षमी ॥ १३ ॥

**सर्वभूतानां - मनोवाक्कायैरपकुर्वतामपि सर्वजन्तूनां । अद्वेष्टा - अकृतद्वेषः । मैत्रः - सर्वभूतहितैषी । करुणः - सर्व भूतदयापरः । निर्ममः - देहेंद्रियादिषु ममकार रहितः । निरहं कारः - देहात्माभिमानरूपाहंकाररहितः । अतएव । समदुःख सुखः - सुखदुःखयोरविकृतचित्तः । अतएव । क्षमी - अवर्जनीयशीतोष्णादिसहिष्णुः ॥ १३ ॥**

सन्तुष्ट स्सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धि र्यो मद्भक्त स्स मे प्रियः ॥ १४ ॥

**सन्तुष्टः - यदृच्छालाभसंतुष्टः । सततं । योगी - प्रकृतिवियुक्तात्मानुसन्धानपरः । यतात्मा - नियतमनस्कः । दृढनिश्चयः । मयि-सर्वकर्माराध्ये । अर्पितमनोबुद्धिः - समर्पितचित्ताध्यवसायः । एवं भूतोयः । मद्भक्तः - मयि भक्तिमान् । सः । मे-मम । प्रियः ॥१४॥**

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगै र्मुक्तो य स्स च मे प्रियः ॥ १५ ॥

**यस्मात - कर्मयोगनिष्ठात् । लोकः - जनः । नोद्विजते - नबिभेति । लोकाच्च यो नोद्विजते । अतएव । हर्षा मर्ष भयो द्वेगैः - कंचित् प्रति हर्षेण, कंचित् प्रति भयेन, कंचित् प्रत्यु द्वेगेन - कम्पेन, विमुक्तः । सच । मे-मम । प्रियः ॥ १५ ॥**

अनपेक्ष श्शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्त स्स मे प्रियः ॥ १६ ॥

**अनपेक्षः-आत्मव्यतिरिक्त वस्तु न्यपेक्षारहितः । शुचिः-नियताहारेण शुद्धः । दक्षः - युक्तायुक्त विवेक समर्थः ।**

उदासीनः - अनवहितो यत्नरहितः । गतव्यथः-द्वन्द्वेषु व्यथारहितः । सर्वारम्भ परित्यागी - लौकिक मनो वाक्काय व्यापार रहितः । एवं भूतोयः मद्भक्तः । सच । मे - मम । प्रियः ॥ १६ ॥

यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति ।
शुभाशुभपरित्यागी भक्तिमान् य स्स मे प्रियः ॥ १७ ॥

यः । न हृष्यति - दैवात प्राप्तं प्रिय मर्थं प्राप्यापि हर्षं न प्राप्नोति । नद्वेष्टि-अप्रियं प्राप्यापि द्वेषं न करोति । नशोचति-पशु पत्नी सुतादि वियोगरूप शोकनिमित्तं प्राप्यापि शोकं न करोति । नकांक्षति - अनागतं वस्तु न इच्छति । यः । शुभा शुभ परित्यागी-पुण्य पाप रूप प्रतिबन्धक कर्म निवृत्तिपरः । एवंविधोयोमद्भक्तः । सच । मे मम । प्रियः ॥ १७ ॥

समः शत्रौ च मित्रे च तथा मानावमानयोः ।
शीतोष्णसुखदुःखेषु समः स्संगविवर्जितः ॥ १८ ॥

शत्रौ - अपकारिणि । मित्रे - उपकारिणिच । समः । तथा । मानावमानयोः - सत्कारासत्कारयोः । शीतोष्ण सुख दुःखेष्वपि । समः- निर्विकारः । संगविवर्जितः - क्वचिद् प्यासक्तिरहितः ॥ १८ ॥

तुल्यनिन्दा स्तुति मौनी संतुष्टो येन केन चित् ।
अनिकेतः स्थिरमति र्भक्तिमान् मे प्रियो नरः ॥ १९ ॥

तुल्य निन्दा स्तुतिः - निन्दास्तुत्यो रेक प्रकारः । मौनी - प्रतिनिन्दा स्तुति वा गुच्चारणरहितः । येनकेनचित्-यदृच्छागतेन । संतुष्टः - संजातहर्षः । स्थिरमतिः - अचंचलात्म मननशीलः । अनिकेतः - गृहक्षेत्रादि वसक्तः । एवंभूतो यो भक्तिमान् नरः । सच मेप्रियः ॥ १९ ॥

येतु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेतीव मे प्रियाः ॥ २० ॥

इति श्रीभगवद्गीतायाम् द्वादशोऽध्यायः ॥ १२ ॥

ये – पुरुषाः । श्रद्दधानाः - श्रद्धावन्तः । मत्परमाः - मदेकप्रयोजनाः । यथोक्तं - मदुक्तप्रकारम् । धर्म्यामृतं – धर्मादनपेतम् , अमृतवद्भोग्यभूतंच । इदं – भक्तियोगाख्यं मदुपासनम् । पर्युपासते – सपरिकरमनुतिष्ठन्ति । तेभक्ताः । मे – मम । अतीव - प्रियाः – प्रियतमाः । मदात्मभूताइत्यर्थः ॥ २० ॥

इति श्रीमद्यामुनाचार्यविरचिते भगवद्गीतार्थसंग्रहे
द्वादशोध्यायः ॥ १२ ॥

श्रीः ।

श्रीमते रामानुजाय नमः ।

## ॥ अथ त्रयोदशोध्यायः ॥

( श्री भगवानुवाच )

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञइति तद्विदः ॥ १ ॥

प्रथमषट्के भगवदुपासनांगभूत प्रत्यगात्मसाक्षात्कारस्य कर्मज्ञानयोगसाध्यत्व मुक्तम् । मध्यमषट्के भगवत्तत्व याथात्म्यतन्माहात्म्यज्ञानपूर्वक भक्तियोगनिष्ठा प्रतिपादिता । इदानी मुत्तरषट्के पूर्वषट्कद्वयोदितमेवार्थजातं विशोध्यते ।

तत्र त्रयोदशेध्याये देहात्मस्वरूपं देहयाथात्म्यशोधनं देहवियुक्तात्मप्राप्त्युपायो वियुक्तात्मस्वरूपशोधनम् तथाविधस्यात्मनोऽचित्सम्बन्धहेतुस्ततोविवेकानुसन्धानप्रकारश्चोच्यते ।

इदं – देवमनुष्यादि शब्द निर्देश्यं शरीरम् । क्षेत्रं - कर्म बीज फलोत्पत्तिस्थानं। इत्यभिधीयते । यएतच्छरीरं । वेत्ति । तम् । क्षेत्रज्ञ इति । तद्विदः - आत्मस्वरूपविदः । प्राहुः - प्रवदन्ति ॥ १ ॥

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयो र्ज्ञानं यत्तज्ज्ञानं मतं मम ॥ २ ॥

हे भारत ! सर्वक्षेत्रेषु - समस्तशरीरेषु वर्तमानम् । क्षेत्रज्ञं – आत्मानञ्च । मां - विद्धि - मदात्मकं जानीहि । अपिशब्दात् क्षेत्रमपि मां विद्धीत्यर्थः । क्षेत्रक्षेत्रज्ञयोः – शरीरात्मनोः । यत ज्ञानम् - तयोः परस्परविलक्षणत्वमदात्मकत्व विषया बुद्धिः । तत् - ज्ञानम् । मम । मतं - संमतम् ॥ २ ॥

तत्क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥ ३ ॥

तत् - पूर्वोक्तं । क्षेत्रं – शरीरं । यच्च - यज्जातीयं । यादृक् - यादृशं । यद्विकारि - यादृश विकारवत् । यतः - यस्यहेतोः उत्पन्नं । यच्च - यत्स्वरूपंच । सच - क्षेत्रज्ञः । यः - यत्स्वरूपः । यत्प्रभावश्च - यादृशस्वभावश्च । तत्सर्वं । समासेन - संग्रहेण । मे – मत्तः । शृणु–सावधान माकर्णय ॥ ३ ॥

ऋषिभि र्बहुधा गीतं छन्दोभि र्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भि र्विनिश्चितैः ॥ ४ ॥

तत् – क्षेत्रज्ञ स्वरूपं । ऋषिभिः - पराशरादिभिः । विविधैः – नानाविधैः । छन्दोभिः - वेदैः । हेतुमद्भिः - युक्तियुक्तैः । विनिश्चितैः - निर्णयान्तैः । ब्रह्मसूत्रपदैः - ब्रह्मप्रतिपादक शारीरक

सूत्रपदैश्च । बहुधा - बहुप्रकारेण । पृथक् - असंकीर्णं यथा भवति तथा । गीतं - प्रतिपादितम् ॥ ४ ॥

महाभूतान्यहंकारो बुद्धि रव्यक्तमेवच ।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥ ५ ॥

महा भूतानि - पृथिव्यादीनि पंच । अहंकारः । बुद्धिः - महत्तत्वम् । अव्यक्तम् - मूलप्रकृतिः । दशैकंच इन्द्रियाणि - श्रोत्रादीनि मनोन्तानि एकादश । इन्द्रियाणां गोचराः - शब्द स्पर्शादिविषयाः । पंच ॥ ५ ॥

इच्छा द्वेष स्सुखं दुःखं संघात श्चेतनाऽऽधृतिः ।
एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥ ६ ॥

इच्छा-कामः । द्वेषः । क्रोधः । सुखं-अनुकूलम् । दुःखं-प्रतिकूलम् । संघातः - शरीरं । चेतना – ज्ञानं । आधृतिः - भोगाधारता । एतत्सर्वं-सविकारं । क्षेत्रं । समासेन– संक्षेपेण । उदाहृतं - प्रतिपादितम् । अव्यक्त महदहंकार पंचभूतारब्धतया जडरूप मिन्द्रियाश्रयं इच्छाद्वेषादि विकारयुक्तं भूतसंघातस्वरूपं सुखदुःखभोगाधारं नैकप्रयोजनं शरीरमेव क्षेत्रमित्युक्तंभवति ॥ ६ ॥

अमानित्वमदंभित्व महिंसा क्षान्ति रार्जवम् ।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ ७ ॥

अमानित्वं - गर्वरहितत्वं । अदम्भित्वं - धार्मिकत्वख्यात्येक प्रयोजनाय धर्मानुष्ठान रूप दम्भरहितत्वं । अहिंसा - परोपद्रव रहितता । क्षांतिः - सहिष्णुता । आर्जवं - करणत्रय ऋजुत्वं । आचार्योपासनं - गुरु शुश्रूषा । शौचं - शुचित्वं । स्थैर्यं - अध्यात्मविद्याया मचञ्चलत्वं । आत्मविनिग्रहः - मनो निग्रहः ॥ ७ ॥

इन्द्रियार्थेषु वैराग्य मनहंकार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥ ८ ॥

इंद्रियार्थेषु - विषयेषु । वैराग्यं - विरक्तिः । अनहंकारश्च - देहात्माभिमान रहितत्वं । जन्म - जननम् , मृत्युर्मरणं , जरा - शरीरशैथिल्यं , व्याधिः - शरीरपीडा , तैर्थत दुःखम् , सएवदोषः , तस्यानुदर्शनं - पुनः पुनरालोकनम् ॥ ८ ॥

असक्ति रनभिष्वंगः पुत्रदारगृहादिषु ।
नित्यंच समचित्तत्व मिष्टानिष्टोपपत्तिषु ॥ ९ ॥

असक्तिः - आत्मव्यतिरिक्त विषयसंगरहितत्वं । पुत्र दार गृहादिषु - अनभिष्वंगः - संगरहितत्वं । इष्टा निष्टो पपत्तिषु । नित्यं । समचित्तत्वं - हर्षविषादरहितत्वं ॥ ९ ॥

मयि चानन्ययोगेन भक्ति रव्यभिचारिणी ।
विविक्तदेशसेवित्व मरति र्जनसंसदि ॥ १० ॥

मयि विषये । अनन्य योगेन - देवतान्तरसंस्पर्श राहित्येन उपलक्षिता । अव्यभिचारिणीभक्तिश्च । विविक्त देश सेवित्वं - विजनप्रदेशवासित्वं । जनसंसदि - असत्सभायां । अरतिः अरुचिः ॥ १० ॥

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थचिन्तनम् ।
एतज्ज्ञानमिति प्रोक्त मज्ञानं यदतोऽन्यथा ॥ ११ ॥

अध्यात्म ज्ञान नित्यत्वं - आत्म ज्ञान निरतत्वं । तत्वंज्ञानार्थ चिन्तनं - तत्वज्ञानैक प्रयोजनं चिंतनं । एत त्सर्वं । ज्ञानं आत्म ज्ञान साधन भूत मि त्यनेन प्रकारेण । प्रोक्तं । यत्

अतोऽन्यथा - अमानित्वाद्यतिरिक्तंयत् । तदज्ञानं - आत्म विरोधि ॥ ११ ॥

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ १२ ॥

ज्ञेयं - अमानित्वादि साधनै र्ज्ञातव्यं । यदात्मस्वरूपं । तत् । प्रवक्ष्यामि । यत् - आत्मस्वरूपं । ज्ञात्वा । अमृतं - मोक्षं । अश्नुते - प्राप्नोति । तत - प्रत्यगात्मस्वरूपं । अनादि - आदि मध्यान्त रहितं । मत्परं - मच्छेषतैकस्वरूपं । ब्रह्म - अणुस्वरूपमपि गुणतो बृहत्वयुक्तं । सत् - कार्यावस्थं । नोच्यते । असत् - कारणावस्थंच । नोच्यते । आत्मनि कार्य कारणा वस्था नैव , अवस्थाद्वयान्वयस्य प्रकृतिसंसंर्गकार्यत्वेन स्वाभाविकत्वा भावात् , अचित्संसर्गवियुक्त मात्मस्वरूपम् सदसच्छब्द वाच्यम् न भवतीत्यर्थः ॥ १२ ॥

सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् ।
सर्वत श्श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १३ ॥

तत् - आत्मस्वरूपम् । सर्वतः पाणिपादम् - सर्वत्र करचरणादियुक्तम् । सर्वतोक्षि शिरो मुखं - सर्वत्र नयन शिरोवदन संयुक्तं । सर्वतः श्रुतिमत् - सर्वत्र श्रोत्रेन्द्रिययुक्तम् । लोके । यत्सर्वं वस्तुजातं । तत् । आवृत्य - धर्मभूत ज्ञानेनव्याप्य । तिष्ठति ॥ १३ ॥

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृच ॥ १४ ॥

सर्वेंद्रिय गुणाभासम् - सर्वेन्द्रिय व्यापार कृत विषय ज्ञान सामर्थ्य वत् । सर्वेंद्रिय विवर्जितं - स्वभावतः सर्वेंद्रिय सम्बन्ध रहितं । असक्तं - वस्तुतः पुत्रादि रहितं । सर्व-

भृत् - सर्व भरण सामर्थ्यवञ्च । निर्गुणं - गुणरहितं । गुण भोक्तृ - गुणत्रय कृत सुख दुःखानुभव समर्थंच ॥ १४ ॥

बहिरन्तश्च भूताना मचरं चरमेवच ।
सूक्ष्मत्वा त्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥ १५ ॥

तत - आत्मस्वरूपं । भूतानां - पृथिव्यादीनां । बहिश्चांतश्चवर्तते । अचरं - स्वभावतः पादाद्यधीन संचार रहितं । चरं- कदाचि त्पादाद्यधीन संचारंच । सूक्ष्मत्वाद्धेतोरविज्ञेयम् - शरीरातिरेकेण ज्ञातुमशक्यम् । किंच । दूरस्थम् - ज्ञानरहितानां देहे वर्तमानमपि विप्रकृष्टं । अन्तिके - ज्ञानिना मत्यन्त सन्निकृष्टंच ॥ १५ ॥

अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृच तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥ १६ ॥

तत - आत्मस्वरूपं । भूतेषु - देवमनुष्यादि देहेषु । अविभक्तं- एकाकारतया विभागरहितम् । विभक्तमिव - ज्ञानरहितानां भिन्नमिव । स्थितंच । भूतभर्तृ । देवमनुष्यादि शरीर भरण समर्थंच । ग्रसिष्णु - अन्नादि ग्रसन शीलंच । प्रभविष्णु - प्रभवहेतुश्च । एवं ज्ञेयं - देहादि विलक्षण तया ज्ञातव्यम् ॥ १६ ॥

ज्योतिषामपि तज्ज्योति स्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥ १७ ॥

तत् - आत्मस्वरूपम् । ज्योतिषां - मणि द्युमणी दीपादि प्रकाश वस्तूना मपि । ज्योतिः- प्रकाशकं । तमसः - प्रकृतेः । परं - प्रधान मिति । उच्यते । ज्ञानं ज्ञेयं - ज्ञानैकाकारमिति विज्ञेयं । ज्ञानगम्यं - अमानित्वादि ज्ञान साधनेन प्राप्यं । सर्वस्य - देव मनुष्यादेः । हृदये विशेषेणावस्थितम् ॥ १७ ॥

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १८ ॥

इति - अनेन प्रकारेण। क्षेत्रं - शरीरस्वरूपम्। ज्ञानं - ज्ञातव्यात्म तत्त्व ज्ञानसाधनम् । ज्ञेयं - ज्ञातव्य क्षेत्रज्ञस्वरूपंच । समासतः - संक्षेपेणोक्तं । मद्भक्तः - मयि भक्तिमान् पुरुषः । एतत् - त्रितयम् । विज्ञाय - विविच्यज्ञात्वा । मद्भावाय - अपहतपाप्मत्वादि मत्स्वभावाय । उपपद्यते - समर्थोभवति ॥ १८ ॥

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान् ॥ १९ ॥

प्रकृतिं - पुरुषंच - उभावपि - अनादीएव - विद्धि । विकारान् - बन्धहेतुभूतान् रागद्वेषादीन् । गुणान् - मोक्षहेतुभूता नमानित्वादींश्च । प्रकृति सम्भवान् । विद्धि ॥ १९ ॥

कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुष स्सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ २० ॥

कार्य कारण कर्तृत्वे - कार्यं-शरीरं, कारणं-इन्द्रियजातं , तयोः, कर्तृत्वे-भोगसाधन क्रियाश्रयत्वे । प्रकृतिरेव हेतुरित्युच्यते । पुरुषः - प्रकृतिसंश्लिष्टोजीवः । सुखदुःखानां । भोक्तृत्वे - भोगाश्रयत्वे । हेतुरित्युच्यते ॥ २० ॥

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान् ।
कारणं गुणसंगोऽस्य सदसद्योनिजन्मसु ॥ २१ ॥

पुरुषः - जीवः । प्रकृतिस्थः - प्रकृतिसंश्लिष्टस्सन् । प्रकृतिजान् गुणान्-प्रकृतिसंसर्गजं सत्वादिगुण कार्यं सुखदुःखादि । भुङ्क्ते-अनुभवति । अस्य - पुरुषस्य । सदसद्योनिजन्मसु - साध्वसाधुरूप देवमनुष्यादियोनिसम्भवेषु । गुणसंगः - कारणम् ॥ २१ ॥

उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहे ऽस्मिन् पुरुषः परः ॥ २२ ॥

अपरिच्छिन्न ज्ञानशक्तिरपि । पुरुषः - जीवः । अस्मिन्नेव देहे ऽवास्थित स्सन् । उपद्रष्टा - कर्मसु प्रवर्तमानस्य साक्षात्कर्ता । अनु - मन्ता-प्रेरकः । भर्ता - धारकः । भोक्ता - अनुभवनशीलः । महेश्वरः - नियामकः । परमात्मा - अन्नमयादिभ्यो प्युत्कृष्टतया परमआत्मेतिच । उक्तः - कथितः ॥ २२ ॥

य एनं वेत्ति पुरुषं प्रकृतिं च गुणै स्सह ।
सर्वथा वर्तमानो ऽपि न स भूयो ऽभिजायते ॥ २३ ॥

यः-पुमान् । एनं- उक्तस्वभावं । पुरुषं - प्रत्यगात्मानं । प्रकृतिंच । गुणैस्सह । वेत्ति - जानाति । सः । सर्वथा- येन केनापि प्रकारेण । वर्तमानोपि । भूयः । नाभिजायते - संसारं नप्राप्नोति ॥ २३ ॥

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥ २४ ॥

केचित्-पुरुषाः । आत्मनि-देहे स्थितम् । आत्मानं । आत्मना - मनसा- ध्यानेन । पश्यन्ति- साक्षात्कुर्वन्ति । अन्येतु । सांख्येन-ज्ञानरूपेण । योगेन- पश्यन्ति । अपरे । कर्मयोगेन - अनभिसंहितफल कर्मानुष्ठानेन । पश्यान्त ॥ २४ ॥

अन्ये त्वेवमजानन्त श्श्रुत्वा ऽन्येभ्य उपासते ।
तेपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥ २५ ॥

अन्ये-अधिकारिणस्तु । एवं- उक्तस्वभावमात्मानं । अजानन्तः । अन्येभ्यः । ज्ञाननिष्ठेभ्यः । श्रुत्वा । श्रुतिपरायणाः - श्रवणनिष्ठास्सं-

तः । आत्मानमुपासते । तेपि । मृत्युम् - संसारम् । अतितरंत्येव ॥ २५ ॥

यावत्संजायते किंचि त्सत्त्वं स्थावरजंगमम् ।
क्षेत्रक्षेत्रज्ञसंयोगा त्तद्विद्धि भरतर्षभ ॥ २६ ॥

स्थावर जंगमं - अचरं चरंच । यावत - यत किंचित प्रकृष्ट मपकृष्टंवा । सत्त्वं - जन्तुः । जायते । क्षेत्रक्षेत्रज्ञसंयोगात- प्रकृतिपुरुषसंयोगादेव । तत जातं विद्धि ॥ २६ ॥

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥ २७ ॥

सर्वेषु भूतेषु - देव मनुष्यादि शरीरेषु . तिष्ठन्तं - वर्तमानम् । परमेश्वरम् - परमनियन्तारम् प्रत्यगात्मानं । समं - समानाकारम् । भूतेषु - नश्यत्स्वपि अविनश्यन्तंच । यः पश्यति । सपश्यति - सएव साक्षात्करोति ॥ २७ ॥

समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥ २८ ॥

हि - यस्मात्कारणात् । सर्वत्र - देवादिशरीरेषु । समवस्थितं - विलक्षणतया वर्तमानम् । ईश्वरं -आत्मानम् । समं - समानाकारं । पश्यन्-पुरुषः । आत्मना - मनसा । आत्मानं - स्वात्मानं । न हिनस्ति - न नाशयति । ततः । तस्मादेव । परां - उत्कृष्टां । गतिं - प्राप्यभूत मात्मानं - याति - प्राप्नोति ॥ २८ ॥

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।
यः पश्यति तथात्मान मकर्तारं स पश्यति ॥ २९ ॥

किंच । यः - पुरुषः । सर्वशः - सर्वाणि । कर्माणि । प्रकृत्यैव - शरीराकारेण परिणतया प्रकृत्यैव । क्रियमाणानि । पश्यति । तथा -

आत्मानं अकर्तारंच पश्यति । सः । आत्मानं-तथावस्थितम् । साक्षात्करोति ॥ २९ ॥

यदा भूतपृथग्भाव मेकस्थ मनुपश्यति ।
तत एव च विस्तारं ब्रह्म सम्पद्यते तदा ॥ ३० ॥

यदा । भूत पृथग्भावं - भूतेषु - देवमनुष्यादिजन्तुषु, पृथग्भावं - देवमनुष्यादिभेदं । एकस्थं - अचिदंशरूपैकदेशावस्थितम् । पश्यति । नतु चिदंशेवस्थितं पश्यति । ततएव अचिदंशादेव । विस्तारं - प्रपंचं । पश्यति । तदा । ब्रह्म - परिशुद्धात्मस्वरूपं । संपद्यते - प्राप्नोति ॥ ३० ॥

अनादित्वा न्निर्गुणत्वा त्परमात्माय मव्ययः ।
शरीरस्थो ऽपि कौन्तेय न करोति न लिप्यते ॥ ३१ ॥

अयं । परमात्मा - निष्कृष्टस्वरूपो जीवः । शरीरस्थोपि । अनादित्वात् - उत्पत्तिरहितत्वात् । अव्ययः - नाशरहितः । निर्गुणत्वात्- सत्वादि गुणरहितत्वात् । नकरोति - कर्ता न भवति । न लिप्यते - देहस्वभावैर्वा नलिप्यते ॥ ३१ ॥

यथा सर्वगतं सौक्ष्म्या दाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥ ३२ ॥

यथा । आकाशं । सर्वगतमपि - समस्त वस्तु संयुक्तमपि । सौक्ष्म्यात् - अतिसूक्ष्मत्वाद्धेतोः । नोपलिप्यते - देहस्वभावै र्नस्पृश्यते । तथा । आत्मापि । सर्वत्र - देहे - देवमनुष्यादिरूपे । अवस्थितः- वर्तमानोपि । सूक्ष्मत्वात् नोपलिप्यते ॥ ३२ ॥

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥ ३३ ॥

हेभारत! यथा । एकः- रविः-सूर्यः । समस्तमिमं लोकम् । प्रका-

शयति । तथा । एकः । क्षेत्री - जीवः । कृत्स्नं - आपादमस्तकं सर्वं । क्षेत्रं - शरीरं । प्रकाशयति - व्यवहारयोग्यम् करोति ॥ ३३ ॥

क्षेत्रक्षेत्रज्ञयोरेव मन्तरं ज्ञानचक्षुषा ।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥ ३४ ॥

॥ इति श्री भगवद्गीतायां त्रयोदशोध्यायः ॥

एवं - उक्तप्रकारेण । क्षेत्रक्षेत्रज्ञयोः - शरीरात्मनोः । अन्तरं - जडत्वाजडत्वादिकृत भेदं । भूतप्रकृति मोक्षंच - भूतानि - पृथिव्यादीनि, प्रकृतिः-कारणं यस्य तत् , भूतप्रकृति - शरीरं, तन्मोक्ष्यते - येन - स भूतप्रकृतिमोक्षः, अमानित्वादि गुणवर्गः । तंच । ये - पुरुषाः । विदुः - जानन्ति । ते । परं - स्वस्वरूपेणा वस्थितं आत्मानं । यान्ति - प्राप्नुवन्ति ॥ ३४ ॥

इति श्रीमद्यामुनाचार्यविरचिते भगवद्गीतार्थसंग्रहे
॥ त्रयोदशोध्यायः ॥ १३ ॥

श्रीः ।
॥ श्रीमते रामानुजाय नमः ॥

## अथ चतुर्दशोऽध्यायः ॥ १४ ॥

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनयस्सर्वे परां सिद्धिमितो गताः ॥ १ ॥

हे अर्जुन ! ज्ञानानां-प्रकृतिपुरुषविषयकसमस्तज्ञानानां मध्ये । उत्तमं-उत्कृष्टम् । परं - पूर्वोक्तज्ञानादन्यत् । ज्ञानं- सत्वादिविषयकज्ञानं । भूयः - पुनरपि । प्रवक्ष्यामि ! यज्ज्ञानंज्ञात्वा । मुनयः - तद्विषयकमननशीलाः पुरुषाः । इतः - संसारात् । परां उत्कृष्टां । सिद्धिं । गताः - प्राप्ताः ॥ १ ॥

इदं ज्ञान मुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेपि नोपजायन्ते प्रलये न व्यथन्तिच ॥ २ ॥

**इदं - मया वक्ष्यमाणं । ज्ञानं । उपाश्रित्य - लब्ध्वा । मम साधर्म्यं - मत्साम्यम् । आगताः - प्राप्ताः । सर्गे - सृष्टिकालेपि । नोपजायन्ते । प्रलये - संहारकाले । न व्यथन्ति - न क्लिश्यन्तिच ॥ २ ॥**

मम योनि र्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम् ।
सम्भव स्सर्वभूतानां ततो भवति भारत ॥ ३ ॥

**योनिः - सकल जग दुत्पत्ति स्थानभूतम् । महत-मूलभूतम् । मम-मत्सम्बन्धि । यत् ब्रह्म - प्रकृतिरस्ति । तस्मिन् । अहं - सकलजगज्जनकोहं । गर्भं - चेतन समष्टि रूपं । दधामि - प्रकृत्यासह जीवप्रकृतिं योजयामीत्यर्थः । हे भारत ! ततः-तस्मात् । प्रकृतिपुरुषसंयोजनरूपात् गर्भाधानात् । सर्वभूतानां - ब्रह्मादि स्तम्ब पर्यन्तानां समस्तजन्तूनां । सम्भवः - उत्पत्तिः । भवति ॥ ३ ॥**

सर्वयोनिषु कौन्तेय मूर्तय स्सम्भवन्तियाः ।
तासां ब्रह्ममहद्योनि रहं बीजप्रदः पिता ॥ ४ ॥

**हे कौन्तेय ! सर्व योनिषु-देवमनुष्यादि समस्तयोनिषु । याः-मूर्तयः - शरीराणि । सम्भवन्ति - जायन्ते । तासां मूर्तीनां - महत्-मूलभूतम् । ब्रह्म - प्रकृतिः । योनिः - कारणम् । अहन्तु । बीजप्रदः - तत्तद्देहरूपाङ्कुरहेतुभूत चेतनपुंजरूप बीजप्रदः । पिता - जनकः ॥ ४ ॥**

सत्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।
निबध्नन्ति महाबाहो देहे देहिन मव्ययम् ॥ ५ ॥

**हे महाबाहो ! सत्वं रजतस्तम इति - त्रयोगुणाः । प्रकृतिसम्भवाः - मूल प्रकृतेर्जाताः । देहिनं - देहसम्बन्धिनं । अव्ययम् - विकाररहितम् । आत्मानम् । देहे निबध्नन्ति ॥ ५ ॥**

तत्र सत्वं निर्मलत्वात् प्रकाशकमनामयम्।
सुखसंगेन बध्नाति ज्ञानसंगेन चानघ ॥ ६ ॥

हे अनघ ! तत्र - गुणत्रयमध्ये। सत्वं - सत्वगुणः। निर्मलत्वात्- निर्मलत्वाद्धेतोः। प्रकाशकं - वस्तुयाधात्म्यज्ञानजनकं। अनामयम् - आरोग्यहेतुः। सः देहिनमेनम्। सुखसंगेन ज्ञान संगेनच। बध्नाति - संयोजयति ॥ ६ ॥

रजो रागात्मकं विद्धि तृष्णा संगसमुद्भवम्।
तन्निबध्नाति कौन्तेय कर्मसंगेन देहिनम् ॥ ७ ॥

हे कौन्तेय ! रजः - रजोगुणं। रागात्मकं। तृष्णासंगसमुद्भवम् - तृष्णा-शब्दादिविषय स्पृहा, संगः - पुत्रदारादिष्वासक्तिः, तयोः, समुद्भवं - उत्पत्तिस्थानं। विद्धि - जानीहि। तत् -रजः। देहिनम्। कर्मसंगेन - पुण्यपाप क्रियारूप संगेन। निब- ध्नाति ॥ ७ ॥

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनां।
प्रमादालस्य निद्राभि स्तान्निबध्नाति भारत ॥ ८ ॥

तमस्तु - तमो गुणंतु। अज्ञानजं - अन्यथा ज्ञानसम्भूतं। स- र्वभूतानां। मोहनं - मोहजनकंच। विद्धि। तत् -तमः। देहिनम्। प्र- मादा लस्य निद्राभिर्निबध्नाति ॥ ८ ॥

सत्वं सुखे संजयति रजः कर्मणि भारत।
ज्ञान मावृत्य तु तमः प्रमादेसंजयत्युत ॥ ९ ॥

हे भारत ! सत्वं। सुखे-केवल सुखविषये। देहिनं। संज यति - घटयति। रजः - केवल कर्मविषये सञ्जयति। तमस्तु। ज्ञानं - वस्तुयाथात्म्यविषयं। आवृत्य - तिरोधाय। उत - वैपरीत्येन। प्रमादे - अकृत्यकरण कृत्याकरणरूपे अनवधाने। सञ्जयति ॥ ९ ॥

रज स्तम श्चाभिभूय सत्वं भवति भारत ।
रजस्सत्वं तमश्चैव तम स्सत्वं रज स्तथा ॥ १० ॥

कदाचित । रज स्तमश्चाभिभूय सत्व मुद्रिक्तं भवति । कदाचि स्सत्वं तम श्चाभिभूय रज एवो द्रिक्तं भवति । कदाचि रस त्वं रज श्चाभिभूय तमएवो द्रिक्तं भवति ॥ १० ॥

सर्वद्वारेषु देहे ऽ स्मिन् प्रकाश उपजायते ।
ज्ञानं यदा तदा विद्या द्विवृद्धं सत्त्व मित्युत ॥ ११ ॥

यदा - यस्मिन् काले । अस्मिन् देहे सर्वद्वारेषु - चक्षुरादि सर्वेन्द्रियेषु । प्रकाशः- वस्तुयाथात्म्य ज्ञानं । उपजायते - प्रसरति । तदा । सत्वं विवृद्धमिति - उद्रिक्तमिति । विद्यात् - जानीयात् ॥ ११ ॥

लोभः प्रवृत्ति रारम्भः कर्मणा मशम स्स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥ १२ ॥

लोभः – द्रव्य त्याग स्वभावराहित्यम् । प्रवृत्तिः – व्यर्थ चेष्टासु यत्नः । कर्मणां – दृष्टा दृष्ट फल साधन भूत लौकिक वैदिक कर्मणाम् । आरंभः – उपक्रमः । अशमः – इन्द्रिया नुपरमः । स्पृहा – विषये ष्वभिलाषः । एतानि – कार्याणि । रजसि । विवृद्धे – उद्रिक्ते सति । जायन्ते ॥ १२ ॥

अप्रकाशोप्रवृत्तिश्च प्रमादो मोह एवच ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥ १३ ॥

हे कुरुनन्दन! अप्रकाशः – अज्ञानम् । अप्रवृत्तिः – स्तब्धता। प्रमादः – अनवधानम् । मोहः – विपरीत ज्ञानञ्च । एतानि - कार्याणि । तमसि विवृद्धे जायन्ते ॥ १३ ॥

यदा सत्वे प्रवृद्धे तु प्रळयं याति देहभृत् ।
तदोत्तमविदांलोका नमलान् प्रतिपद्यते ॥ १४ ॥

यदा । सत्वे प्रवृद्धेसति । देहभृत् - देहधारी । प्रळयं - मरणम् । याति । तदा । अमलान् - निर्मलान् । उत्तमविदां - आत्म स्वरूप याथात्म्य विदाम् पुरुषाणाम् । लोकान् । प्रतिपद्यते- प्राप्नोति ॥ १४ ॥

रजसि प्रळयं गत्वा कर्मसंगिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥ १५ ॥

रजसि । प्रवृद्धे सति । प्रळयं - मरणम् । गत्वा । कर्मसंगिषु - काम्य कर्म प्रवणेषु जनेषु । जायते । तमसि प्रवृद्धे सति । प्रलीनः - मृतः पुरुषः । मूढयोनिषु - सकल पुरुषार्थानर्ह पशुपक्ष्यादियोनिषु । जायते ॥ १५ ॥

कर्मण स्सुकृतस्याहु स्सात्विकं निर्मलंफलम् ।
रजसस्तु फलं दुःख मज्ञानं तमसः फलम् ॥ १६ ॥

सुकृतस्य कर्मणः । मदाराधन रूपस्य । सात्विकं - सत्वगुण जनितम् । निर्मलं फल माहुः । रजसस्तु । दुःख सन्निभं फल माहुः । तमस स्त्वज्ञानं फलमाहुः ॥ १६ ॥

सत्वात्संजायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेवच ॥ १७ ॥

सत्वात् । ज्ञानम् - आत्मस्वरूपसाक्षात्कार रूपम् । संजायते । रजसः लोभो जायते । तमसः प्रमाद मोहौ । भवतः - जायेते । तथा । अज्ञानंच जायते ॥ १७ ॥

ऊर्ध्वं गच्छंति सत्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥ १८ ॥

सत्वस्थाः - सत्वगुणनिष्ठाः । ऊर्ध्वं गच्छन्ति - क्रमेण मो-

क्षं गच्छन्ति - प्राप्नुवन्ति । राजसाः - रजोगुणनिष्ठाः । मध्ये तिष्ठन्ति - स्वर्गमनुभूय क्षीणे पुण्ये पुनः पुनः मर्त्य लोक मेव प्रविशन्ति । तामसाः । जघन्य गुण वृत्तिस्थाः - अतिनिकृष्ट तमोगुणनिष्ठा स्सन्तः । अधोगच्छन्ति - पुनः पुन र्नीचजन्तुषु जनित्वा निरयगामिनो भवन्ति ॥ १८ ॥

नान्यंगुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥ १९ ॥

द्रष्टा - ज्ञाता जीवः । यदा - सत्वोद्रेकसमये । गुणेभ्यः । अन्यं - अतिरिक्तम् । कर्तारं नानुपश्यति । गुणेभ्यः । परं - अतिरिक्तम् । वेत्ति - पश्यति । स मद्भाव मधिगच्छति ॥ १९ ॥

गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान् ।
जन्ममृत्युजराव्याधि विमुक्तोऽमृतमश्नुते ॥ २० ॥

देही - शरीरभृत । शरीरसमुद्भवान् । एतान् - उक्तरूपान् । त्रीन् - सत्वरजस्तमोरूपान् । गुणान् । अतीत्य - अतिक्रम्य । सत्वादिगुणातीत मात्मानं ज्ञात्वा । जन्ममृत्यु जरादुःखैः विमुक्त स्सन् । अमृतं-आत्मानम् । अश्नुते - अनुभवति ॥ २० ॥

(अर्जुन उवाच)

कैर्लिंगैस्त्रीन् गुणानेता नतीतो भवति प्रभो ।
किमाचारः कथं चैतां स्त्रीन् गुणानातिवर्तते ॥ २१ ॥

हे प्रभो ! स्वामिन् कृष्ण । एतान् - त्रीन् - गुणान् । अतीतः - अतिक्रान्तः पुरुषः । कैर्लिंगैः - लक्षणै रुपलक्ष्यो भवति । किमाचारः - कीदृशाचारः । एतान् - त्रीन् - गुणांश्च । कथं - केनोपायेन । अतिवर्तते - अत्येति ॥ २१ ॥

(श्रीभगवानुवाच)

प्रकाशं च प्रवृत्तिं च मोहमेवच पांडव ।
न द्वेष्टिसप्रवृत्तानि न निवृत्तानि कांक्षति ॥ २२ ॥

उदासीनवदासीनो गुणैर्यो न विचाल्यते।
गुणा वर्तंत इत्येव योऽवतिष्ठति नेंगते ॥ २३ ॥

**हे पाण्डव ! यः। प्रकाशं - वस्तुयाथात्म्य ज्ञानं। प्रवृत्तिं - फल-साधन कर्मसु प्रयत्नम्। मोहं - विपरीतज्ञानंच। एतानि। संप्रवृत्तानि - आत्मव्यतिरिक्तेषु साधनतया प्रवृत्तानि। सत्वादि कार्याणि। नैव द्वेष्टि। निवृत्तानि च तथाविधानि। न कांक्षति। यः - आत्मानुभवशीलः। उदासीनवत - अकिंचित्कारइव। आसीनः - वर्तमान स्सन्। गुणैः - सत्वादिभिः। न विचाल्यते। गुणाः - सत्वादयः। वर्तन्ते - प्रकाशादिस्वकार्येषु प्रवर्तन्ते। इत्येवं प्रकारेण। यः। अव तिष्ठति - तूष्णीमास्ते। नेंगते - स्वयं न प्रवर्तते ॥२२॥ २३॥**

समदुःखसुख स्स्वस्थ स्समलोष्टाश्मकांचनः।
तुल्यप्रियाप्रियोधीर स्तुल्यनिंदात्मसंस्तुतिः ॥२४॥
मानावमानयोस्तुल्य स्तुल्यो मित्रारिपक्षयोः।
सर्वारंभपरित्यागी गुणातीत स्स उच्यते ॥ २५ ॥

**सम दुःखसुखः - सुखदुःखयो रविकृत चित्तः। स्वस्थः - स्वात्मैकनिष्ठः। सम लोष्टा श्म कांचनः - लोष्टे - घटशकले, अश्मनि - पाषाणे, कांचने च - समबुद्धिः। तुल्यप्रिया प्रियः - इष्टानिष्टविषयेषु तुल्यादरः। धीरः - विवेककुशलः। तुल्य निन्दात्मसंस्तुतिः - गुण-दोष निमित्तात्म निन्दास्तुत्योः समचित्तः। तथा। मानावमानयो रपि तुल्यः। अतएव निमित्तात्। मित्रारिपक्षयोरपि तुल्यः। सर्वारम्भ परित्यागी - सांसारिक सर्व कर्मपरित्यागी। एवं भूतोयः। स गुणातीत इत्युच्यते ॥ २४ ॥ २५ ॥**

मां च योऽव्यभिचारेण भक्तियोगेन सेवते।
सगुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ २६ ॥

**यः। मां-अनवधिकातिशया संख्येय कल्याणगुणगणौघ महार्णवम्। अव्यभिचारेण - भक्तियोगेन। सेवते। सएतान् गुणान्।**

समतीत्य - सवासनमतिक्रम्य । ब्रह्मभूयाय । कल्पते - समर्थो - भवति ॥ २६ ॥

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्यच ।
शाश्वतस्य च धर्मस्य सुखस्यैकांतिकस्य च ॥ २७ ॥

इति श्रीभगवद्गीतायां चतुर्दशोऽध्यायः ॥ १४ ॥

हि - यस्मात् कारणात् । अहं - अपरिच्छिन्न ज्ञानानन्द स्वरूपः । अमृतस्य - भोग्यभूतस्य । अव्ययस्य - अविकारस्य । ब्रह्मणः – प्रत्यगात्म स्वरूपस्य । शाश्वतस्य - चिरकालस्थायिनः । धर्मस्य - ऐश्वर्यस्यच । ऐकान्तिकस्य - परमैकान्तिलभ्यस्य । सुखस्य - निरतिशयानंदस्यच । प्रतिष्ठा - आश्रयभूतः । अतः । प्रस्तुत मात्मप्राप्तिरूप ब्रह्मभूयस्त्व मपि मद्भजनैक लभ्य मित्यर्थः ॥ २७ ॥

इति श्रीमद्यामुनाचार्यविरचिते भगवद्गीतार्थसंग्रहे
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीः ।

श्रीमते रामानुजायनमः ।

## ॥ अथ पंचदशोऽध्यायः ॥ १५ ॥

(श्रीभगवानुवाच)

ऊर्ध्वमूलमधश्शाख मश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ १ ॥

यं – अश्वत्थं - देवमनुष्यादि चतुर्विधशरीर सम्बन्ध लक्षणं, संसाराख्यमश्वत्थवृक्षम् । ऊर्ध्वमूलं - ऊर्ध्वं सप्तलोकोपरि-

मूलं - सर्वजीव समष्टिरूप चतुर्मुखाख्यं मूलं यस्यतं - तथोक्तम् । अधः शाखं - अधः - मर्त्यलोके, शाखाः – समस्त नर मृग पशु पक्षि कृमि कीट पतंग स्थावराख्याः, यस्य तं । अव्ययं - आ मोक्षमनिवर्त्यम् । आदेहपातं अछेद्यत्वान्नाशरहितंच । आहुः – 'ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थ स्सनातनः' इत्याद्याः श्रुतयः प्रवदन्ति । यस्यचाश्वत्थस्य । छन्दांसि - वेदाः । पर्णानि - पत्राण्याहुः । उत्तरोत्तरं पर्णानां वृक्षविवृद्धि हेतुत्वव द्वेदप्रतिपाद्य काम्यकर्मणां संसार वृद्धिहेतुत्वा च्छन्दसामेतत्पर्णत्वम् । यः । तं – एवंभूतं अश्वत्थम् । वेद – तत्वतो जानाति । सः । वेदवित् – सकलवेदार्थवेदी ॥ १ ॥

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके ॥ २ ॥

तस्य - अश्वत्थस्य । गुणप्रवृद्धाः – गुणैः - सत्वादिभिः, जलसेकैरिव, प्रवृद्धाः । विषयप्रवालाः - विषयाः - शब्दादयः, तएव - प्रवालाः - पल्लवाः, यासां ताः, तथोक्ताः । शाखाः । अधः - पृथिव्यांच । प्रसृताः – मनुष्यपश्वादिरूपेण प्रवृत्ताः । ऊर्ध्वंच प्रसृताः - ऊर्ध्वलोकेषु देवगन्धर्वादिरूपेण प्रसृताः । कुतइत्यत्राह । तस्य – ब्रह्मलोकमूलस्य मनुष्यलोकाग्रस्य वृक्षस्य । कर्मानुबन्धीनि – कर्माणि - कर्मरूपाणि, अनुबन्धीनि - सहजानि - मूलानि । अधः । मनुष्यलोकेच । अनुसन्ततानि – व्याप्तानि । पृथिव्यांहि मनुष्यत्वावस्थाया मनुष्ठितैः कर्मभिः अधोमनुष्यादयः ऊर्ध्वंदेवादयश्च भवन्तीति भावः ॥ २ ॥

न रूपमस्येह तथोपलभ्यते नांतो नचादि र्न च संप्रतिष्ठा ।
अश्वत्थमेनं सुविरूढमूल मसंगशस्त्रेण दृढेन छित्वा ॥ ३ ॥

इह – अस्मिन् लोके । अस्य वृक्षस्य रूपम् । तथा । उक्तप्रकारेण । नोपलभ्यते – संसारिभि र्नदृश्यते । अस्य । अन्तः –

विनाशश्च । नोपलभ्यते । अस्य । आदिः -कारणंच । नोपलभ्यते । अस्य संप्रतिष्ठा नोपलभ्यते । एनं - उक्तप्रकारं सुविरूढमूलमश्वत्थम् । दृढेन - स्थिरेण । असंगशस्त्रेण - विषयविरक्तिरूपशस्त्रेण । छित्वा ॥ ३ ॥

ततः पदं तत्परिमार्गितव्यं यस्मिन् गता न निवर्तंति भूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥ ४ ॥

ततः - तस्मात । पदं - परिशुद्धात्मरूपं । परिमार्गितव्यं - प्राप्तुमन्वेषणीयम् । यस्मिन् - यदेव । गताः पुरुषाः भूयो न निवर्तन्ति । असंगशस्त्रलाभो पायमाह ( तमेवेति ) आद्यं - जगत्कारणं । पुरुषं - परमात्मानमेव । प्रपद्य - शरणं गच्छ । इयतः - एतावतः - संगनिवृत्यादेः स्वाधीनभूता । पुराणी - चिरन्तनी । प्रवृत्तिः - प्रकृतिः । प्रसृता - संजाता । प्राचीनाहि मुमुक्षवः मामेव शरणमुपगम्य निर्मुक्तबन्धा स्संजाताइत्यर्थः ॥ ४ ॥

निर्मानमोहाजितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः ।
द्वंद्वैर्विमुक्ता स्सुखदुःखसंज्ञै र्गच्छन्त्यमूढाः पदमव्ययं तत् ॥ ५ ॥

निर्मानमोहाः-निर्गत मानमोहाः । देहात्माभिमानरूप मोहरहिताः । जितसंगदोषाः - निर्जितविषयासक्त्याख्यदोषाः । अध्यात्मनित्याः - आत्मज्ञाननिरताः । विनिवृत्तकामाः - विशेषेण निवृत्तात्मव्यतिरिक्त कामाः । सुखदुःखसंज्ञैः - सुखदुःखाभिधानैः । द्वंद्वैः विमुक्ताः । अमूढाः - विवेकिनः । अव्ययं - नाशरहितम् । तत्पदं - आत्मस्वरूपम् । गच्छन्ति - प्राप्नुवन्ति ॥ ५ ॥

न तद्भासयते सूर्यो न शशांको न पावकः ।
यद्गत्वा न निवर्तंते तद्धाम परमं मम ॥ ६ ॥

तत्-स्वयं- ज्योतिर्धाम । सूर्यः न भासयते । शशांकश्च नभासयते । पावकः - अग्निश्च । न भासयते । यद्धामगत्वायोगिनो न -

निवर्तन्ते । तत् । परमं - उत्कृष्टं । धाम-ज्योतिः । मम-मदीयं ॥ ६ ॥

मम्मैवांशो जीवलोके जीवभूत स्सनातनः ।
मन ष्षष्ठानींद्रियाणि प्रकृतिस्थानिकर्षति ॥ ७ ॥

सनातनः - शाश्वतः कश्चित् प्रत्यगात्मा । मम्मैवांशः - मदंश एव सन् । जीवभूतो ऽविद्यावेष्टनेन बन्धनंप्राप्तः , जीवलोके - कर्मफलभूमौ - वर्तमानः । प्रकृतिस्थानि । मन ष्षष्ठानीन्द्रियाणि षड्ज्ञानेन्द्रियाणि । कर्षति - गृहीत्वा इतस्ततः संचरति ॥ ७ ॥

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानिसंयाति वायुर्गंधानिवाशयात् ॥ ८ ॥

ईश्वरः - जीवः । यत् - यदा । शरीरं-अपूर्वशरीरान्तरं । अवाप्नोति - उपविशति । यत - यदा । उक्रामति - शरीरं विहाय गच्छति । तदा । वायुः । आशयात् - चन्दनाद्याशयात । गन्धानिव । एतानि - कर्मेन्द्रियभूतसूक्ष्मसहितानि मन ष्षष्ठानीन्द्रियाणि गृहीत्वा । संयाति - शरीरान्तर प्रवेशाय गच्छति ॥ ८ ॥

श्रोत्रं चक्षुस्स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥ ९ ॥

अयं - जीवः । श्रोत्रं चक्षुः । स्पर्शनं - त्वगिन्द्रियम् । रसनेन्द्रियं घ्राणं मनश्चं अधिष्ठाय । विषयान् - शब्दादीन् । उपसेवते - उपभुङ्क्ते ॥ ९ ॥

उत्क्रामन्तं स्थितंवापि भुंजानं वा गुणान्वितं ।
विमूढा नानुपश्यंति पश्यंतिज्ञानचक्षुषः ॥ १० ॥

गुणान्वितं . सत्वादिगुणसमेतम् । अतएव । उत्क्रामन्तम् - कस्माच्चि च्छरीरान्निर्गतं । स्थितं - कस्मिन्श्चिच्छरीरे वर्तमानंवा । भुंजानं - विषयाननुभवन्तं वा । एवंभूतमिमं - ज्ञानैकाकारं जीवं । विमुढाः - ज्ञानशून्याः । नानुपश्यन्ति - न जानन्ति । ज्ञानचक्षुषस्तु पुरुषाः । साक्षात्कुर्वन्ति ॥ १० ॥

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितं ।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥ ११ ॥

**यतन्तः - मत्प्रयत्नपूर्वकं यतमानाः । योगिनः । आत्मनि - शरीरे । अवस्थितं। एनं जीवम्। पश्यन्ति - साक्षात् कुर्वन्ति । यतन्तोपि । अकृतात्मानः – अकृतमच्छरणागतिकमनसः । अतएव, अचेतसः – अमनस्कप्रायाः पुरुषाः । एनमात्मानम् । नानुपश्यन्ति ॥ ११ ॥**

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥ १२ ॥

**यत् आदित्यगतं तेजः अखिलं जगत् । भासयते - प्रकाशयति । चन्द्रमसि यत्तेजः । तत्तेजः । मामकं - मदीयम् । विद्धि - जानीहि ॥ १२ ॥**

गामाविश्य च भूतानि धारयाम्यहमोजसा ।
पुष्णामि चौषधीस्सर्वा स्सोमो भूत्वा रसात्मकः ॥ १३ ॥

**अहम् । गां - पृथ्वीम् । आविश्य । ओजसा - मदीयसामर्थ्येन । सर्वाणि भूतानि धारयामि । रसात्मकः - अमृतमयशरीरः । सोमोभूत्वा । सर्वाश्चौषधीः - सस्यादीनि । पुष्णामि - पोषयामि ॥ १३ ॥**

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ १४ ॥

**अहम् । वैश्वानरः - जाठराग्निर्भूत्वा । प्राणिनां देहमाश्रितस्सन् । प्राणापानसमायुक्तः - प्राणापानाभ्यां - तदुद्दीपकप्राणवायुवृत्तिभेदाभ्यां, समायुक्तः – सहितस्सन् । चतुर्विधं - खाद्यचोष्यलेह्यपानीयरूपेण चतुःप्रकारम् । अन्नं – प्राणिभि र्भुक्तं अन्नंवस्तु । पचामि - रसादि रूपेण परिणमयामि ॥ १४ ॥**

सर्वस्य चाहं हृदि सन्निविष्टो मत्त स्स्मृतिर्ज्ञान मपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो वेदांतकृद्वेदविदेव चाहं ॥ १५ ॥

**अहम् । सर्वस्य - भूतजातस्य । हृदि - हृदयकमले । सन्निविष्टः - नियन्तृतया सम्यगवस्थितः । अतः । मत्तएव । सर्वस्य पदार्थस्य । स्मृतिः - स्मरणम् । ज्ञानं - प्रत्यक्षादिरूपं वस्तुयाथात्म्यज्ञानम् । अपोहनं - ऊहादिरूपं ज्ञानंच । भवति । अतः । सर्वैश्च वेदै रहमेव । वेद्यः - मुख्यतया प्रतिपाद्यः । अहमेव । वेदान्तकृत - वेदप्रतिपाद्यकर्मफलप्रदाता । वेदविच्चाहमेव ॥ १५ ॥**

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षर स्सर्वाणिभूतानि कूटस्थो ऽक्षर उच्यते ॥ १६ ॥

**लोके - जगति । क्षरः, अक्षरश्चेति । इमौ द्वावेव पुरुषौ प्रसिद्धौ । तत्र । सर्वाणि - ब्रह्मादिस्तंबपर्यन्तानि समस्तानि भूतानि । क्षरः पुरुषइत्युच्यते । कूटस्थः - मुक्तात्मा पुरुषः । अक्षर इत्युच्यते ॥ १६ ॥**

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ १७ ॥

**उत्तमः पुरुषस्तु । अन्यः - क्षरा ऽक्षर शब्दवाच्य बद्ध मुक्ताभ्या मतिरिक्तः । परमात्मेति । उदाहृतः - वेदान्तेषु प्रतिपादितइत्यर्थः । यः - परमात्मा । लोकत्रयं - बद्धमुक्तनित्यरूपलोकत्रितयम् । आविश्य - आत्मतया प्रविश्य । बिभर्ति । अव्ययः - विकाररहितः । ईश्वरः - सर्वनियन्ताच ॥ १७ ॥**

यस्मात्क्षरमतीतोऽह मक्षरादपि चोत्तमः ।
अतोऽस्मिलोके वेदे च प्रथितः पुरुषोत्तमः ॥ १८ ॥

**यस्मात् - कारणात् । अहम् क्षरम् । अतीतः - अतिक्रान्तः । अक्षरादप्युत्तमश्च । अतः । लोके - धर्मशास्त्रे । वेदे - तन्मूलभूतश्रुतौच । पुरुषोत्तमइति । प्रथितः - प्रसिद्धोस्मि ॥ १८ ॥**

योमामेवमसंमूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ॥ १९ ॥

यः । एवं – उक्तरीत्या । पुरुषोत्तमं मां । असम्मूडः - मोह-रहितस्सन् । जानाति - यथावद्वेति । हे भारत ! सः । सर्ववित् समस्तप्राप्त्युपाय वेदी । सर्वप्रकारेण मां भजति ॥ १९ ॥

इति गुह्यतमं शास्त्र मिदमुक्तं मयाऽनघ ।
एतद्बुद्ध्वाबुद्धिमान् स्या त्कृतकृत्यश्च भारत ॥ २० ॥

इति श्रीभगवद्गीतायां पंचदशोऽध्यायः ॥ १५ ॥

हे अनघ ! इति - इत्थं भूतम् । गुह्यतमं - अतिरहस्य भूतम् । इदं - शास्त्रं । मया - आश्रितवत्सलेन । उक्तम् । एतत - मदुक्तं मत्पुरुषोत्तमत्वम् । बुध्वा – ज्ञात्वैव । बुद्धिमान् - ज्ञानीस्यात् । कृतकृत्यः - कृतार्थश्च । स्यात् ॥ २० ॥

इति श्रीमद्यामुनाचार्यविरचिते गीतार्थसंग्रहे

॥ पंचदशो ऽध्यायः ॥

श्रीः ।

॥ श्रीमते रामानुजाय नमः ॥

## अथ षोडशोऽध्यायः ॥ १६ ॥

॥ श्रीभगवानुवाच ॥

अभयं सत्त्वसंशुद्धि र्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ १ ॥

अथा तीताध्यायत्रयोक्त स्यार्थस्य स्थिरीकरणाय शास्त्रवश्य त द्विपरीतयो दैवासुरयो विभागः।

अभयं - दुःखनिमित्त दर्शन जनित भयराहित्यम्। सत्व संशुद्धिः - सत्वजनितां तःकरणशुद्धिः। ज्ञानयोगव्यवस्थितिः - ज्ञान योगनिष्ठा। दानं - न्यायार्जितद्रव्यस्य पात्रे प्रतिपादनम्। दमः- अन्तरिन्द्रियनिग्रहः। यज्ञः - फलाभिसन्धि रहित महायज्ञाद्यनु- ष्ठानम्। स्वाध्यायः - वेदाभ्यासः। तपः - भगवत्प्रीतिजनकं काय क्लेशादि। आर्जवं - करण त्रयस्यैकरूपत्वम् ॥ १ ॥

अहिंसा सत्यमक्रोध स्त्याग श्शांतिरपैशुनम्।
दयाभूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ २ ॥

अहिंसा - परपीडानिवृत्तिः। सत्यं - भूतहितं वाक्यम्। अ- क्रोधः - परोद्वेगजनक चित्तविकाराभावः। त्यागः - विरोधिपरिग्र- हवर्जनम्। शान्तिः - इन्द्रियनिग्रहः। अपैशुनं - परोपद्रवहेतु वा- क्यविवर्जनम्। भूतेषु - सर्वप्राणिषु। दयां - दुःखासहिष्णुत्वं। अलोलुप्त्वं - विषयेष्वचंचलत्वं। मार्दवं - मृदुप्रकृतित्वं। ह्रीः - अकृत्यकरणे लज्जा। अचापलं - विषय सन्निधा वप्यचञ्च- लत्वम् ॥ २ ॥

तेजः क्षमा धृति श्शौच मद्रोहो नातिमानिता।
भवंति सम्पदंदैवी मभिजातस्य भारत ॥ ३ ॥

तेजः - दुर्जनैरनभिभवनीयत्वम्। क्षमा - क्षान्तिः। धृतिः - धै- र्यम्। शौचं - करणत्रयनैर्मल्यम्। अद्रोहः - परहितनिरोधाक रणम्। नातिमानिता - अस्थानगर्वरूपातिमानरहितता। एतेगु णाः। हे भारत! दैवीं संपदं - भगवदाज्ञानुवृत्तिरूपाम्। अभि जातस्य - अभिमुखीकृत्यजातस्य पुरुषस्य। भवन्ति ॥ ३ ॥

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ॥ ४ ॥

हे पार्थ! दंभः - धार्मिकोयमिति ख्यातये धर्मानुष्ठानम्। दर्पः – विषयानुभवजनितो हर्षविशेषः । अभिमानः - स्वविद्याभि जनवित्ताद्यनुगुणाभिमानः । क्रोधः - चित्तक्षोभः । पारुष्यं - सा धुजनोद्वेगकरकर्म स्वभावत्वम् । अज्ञानं - त्याज्योपादेयविवेकरहित त्वम् । आसुरीं संपदं - भगवदाज्ञातिलंघनरूपाम् । अभिजात स्य पुरुषस्य सम्भवन्ति ॥ ४ ॥

दैवी सम्पाद्विमोक्षाय निबन्धायासुरी मता।
माशुच स्सम्पदं दैवी मभिजातोऽसि पांडव ॥ ५ ॥

दैवी - देवसंबन्धिनी । संपत् - उक्तरूपा । विमोक्षाय-बन्धमुक्तये । भवति । आसुरी - असुरसंबन्धिनी संपत्। नि बन्धाय – निरयाय । भवति । हे पाण्डव! परमधार्मिकपाण्डु महाराजतनय। त्वम् । दैवीं संपद मभिजातोसि । माशुचः-निबन्धनिमित्तशोकं माकृथाः ॥ ५ ॥

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ ६ ॥

हे पार्थ! अस्मिन् लोके । भूतसर्गौ - प्राणिना मुत्पत्ती। दैवः - आसुरश्चेति - द्वावेव । तयोर्मध्ये । दैवः सर्गः । वि स्तरशः - विस्तरेण । प्रोक्तः - प्रागेव कथितः । आसुरं सर्गम् । मे - मत्तः। शृणु - सावधान माकर्णय ॥ ६ ॥

प्रवृत्तिंच निवृत्तिंच जना न विदुरासुराः ।
न शौचंनापि चाचारो न सत्यं तेषु विद्यते ॥ ७ ॥

आसुराः - असुरसंबन्धिनः जनाः । प्रवृत्तिं – अभ्युदयसाध नम् । निवृत्तिं - मोक्षसाधनंच । वैदिकं कर्म । नविदुः - न जानन्ति । तेषु – जनेषु । शौचं - बाह्याभ्यन्तरशुद्धिः । नवि द्यते । आचारोपि शास्त्रीयो नविद्यते । सत्यं - भूतहितपर्य-वसायि भाषणंच। नविद्यते ॥ ७ ॥

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं ।
अपरस्परसंभूतं किमन्यत्कामहेतुकम् ॥ ८ ॥

ते - आसुराः । जगत् - प्रपंचम् । ब्रह्मात्मकतया सत्यमपि । मिथ्याभूतमिति । आहुः - वदन्ति । अप्रतिष्ठं - ब्रह्मणि प्रतिष्ठितमपि । अप्रतिष्ठितमेव । आहुः । अनीश्वरं - सर्वेश्वरेण नियमितमपि नियन्तृशून्य माहुः । किंच । अपरस्पर संभूतं - स्त्रीपुरुष द्वंद्व संभूत व्यतिरिक्तम् । अन्यद्वस्तु । किम् - अस्ति - किमपि नास्त्येव । अतः । सर्वम् । कामहेतुकं - स्त्रीपुरुषयोः परस्पर काम हेतुकमेव । इतिचाहुरित्यर्थः ॥ ८ ॥

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवंत्युग्रकर्माणः क्षयाय जगतोहिताः ॥ ९ ॥

ते - जनाः । एतां - उक्तरूपाम् । दृष्टिं - मतिम् । अवष्टभ्य - अवलम्ब्य । नष्टात्मानः - अदृष्टात्म स्वरूपाः । अतएव । अल्पबुद्धयः - दृष्टार्थ मात्र पर्यवसित मतयः । उग्रकर्माणः - भयंकरव्यापाराः । अहिताः - सर्वकण्टकाश्च सन्तः । जगतः - लोकस्य । क्षयाय - नाशाय । प्रभवन्ति - प्रवर्तन्ते ॥ ९ ॥

काममाश्रित्यदुष्पूरं दम्भमानमदान्विताः ।
मोहाद्गृहीत्वाऽसद्ग्राहान् प्रवर्तंतेऽशुचिव्रताः ॥ १० ॥

ते - जनाः । दुष्पूरं - पूरयितुमशक्यम् । काममाश्रित्य । दंभ मान मदान्विताः । मोहात् - अविवेकात् । असद्ग्राहान् - चौर्याद्यसदुपायगृहीतार्थसंचयान् । गृहीत्वा - उपादाय । अशुचिव्रताः । अत्यन्तनिषिद्धकर्माणस्सन्तः । प्रवर्तन्ते ॥ १० ॥

चिंतामपरिमेयांच प्रलयांतामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ॥ ११ ॥

**किंच । अपरिमेयां - अपरिछिन्नां । प्रलयान्तां - प्रलय काल पर्यन्त साध्यविषयां । चिन्ताम् - आलोचनम् । उपाश्रिताः - प्राप्ताः । कामोपभोग परमाः - कामोपभोगमेव परमपुरुषार्थं मन्यमानाः । एतावत् - इदमेव प्रयोजनमिति । निश्चिताः-निश्चयवन्तः ॥ ११ ॥**

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहंते कामभोगार्थं मन्यायेनार्थसंचयान् ॥ १२ ॥

**आशापाशशतैः - विषय स्पृहा रज्जु शतैः । बद्धाः । कामक्रोध परायणाः - कामक्रोधैकनिष्ठाः । कामभोगार्थं । अर्थसंचयान् - अर्थ संग्रहान् प्रति । ईहन्ते - चेष्टन्ते ॥ १२ ॥**

इदमद्य मया लब्ध मिमं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनं ॥ १३ ॥

**इदं - क्षेत्रवित्तादिकं । अद्य - अधुना । मया - आर्जितम् । इदं - मनोरथंच । प्राप्स्ये - साधयिष्यामि । इदंधनं । मे-मम । अस्ति । इदमपिधनं । मे - मम - पुनर्भविष्यति ॥ १३॥**

असौ मया हतश्शत्रु र्हनिष्ये चापरानपि ।
ईश्वरोह महं भोगी सिद्धोहं बलवान् सुखी ॥ १४ ॥

**मया । असौ - शत्रुः । हतः । अपरानपि शत्रून् हनिष्ये । अहं । ईश्वरः - स्वतन्त्रोनियन्ता । अहं । भोगी - भोक्ता । अहं । सिद्धः - ज्ञानशक्त्यादिसम्पन्नः । बलवान्सुखी ॥ १४ ॥**

आढयो भिजनवानस्मि कोन्यो स्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥ १५ ॥

**अहं । आढ्यः - सम्पन्नः । अभिजनवान् - सत्कुलप्रसूतः । लोके मया सदृशः अन्यः कः पुरुषो स्ति । यक्ष्ये - इतोधिका भ्युद**

याय यागं करिष्ये। दास्यामि - दानं करिष्यामि । मोदिष्ये- मोदंप्राप्स्ये । इति -अनेन प्रकारेण । अज्ञानविमोहिताः - अविवेकेन मोहं प्रापिताः ॥ १५ ॥

अनेकचित्तविभ्रांता मोहजालसमावृताः।
प्रसक्ताः कामभोगेषु पतंति नरकेऽशुचौ ॥ १६ ॥

अनेकचित्तविभ्रांताः - अनेकैः, चित्तैः - मनोवृत्तिभिः, विभ्रांताः-क्षुब्धाः, क्षोभयुक्ताः । मोहजालसमावृताः - विपरीतज्ञान वागुरा वेष्टिताः । कामभोगेषु - विषयसुखानुभवेषु । प्रसक्ताः- प्रकर्षेण आसक्ताः । अशुचौ - अतिहेये। नरकेपतन्ति ॥ १६ ॥

आत्मसंभाविताः स्तब्धा धनमानमदान्विताः।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥ १७ ॥

ते - जनाः। आत्मसंभाविताः - आत्मप्रशंसापराः । स्तब्धाः- परिपूर्णाभिमानतया कृतकृत्या वय मिति निश्चेष्टाः । धनमानमदान्विताः - अनादिप्रयुक्त गर्वौद्धत्याभ्या मुपेताः । दंभेन - ख्यात्यैकप्रयोजनाभिसन्धिना । अविधिपूर्वकं - शास्त्रोक्तप्रकारपरित्यागपूर्वकम् । नामयज्ञैः । यजन्ति - यज्ञान् कुर्वन्ति ॥ १७ ॥

अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषंतो ऽभ्यसूयकाः ॥ १८॥

अहंकारं - स्वशेषभूतेन इत्यादिविपरीतां वयमेव करिष्याम इत्येवंरूपा महंकृतिं । बलं-भगवतो बलेन इत्यादिविपरीतं स्व बलपर्याप्त्यनुसन्धानम् । दर्पं - गर्वं । कामक्रोधौच संश्रिताः। आत्मपरहेदेषु-स्वदेहेषु परदेहेषुच । अन्तः प्राविश्य नियन्तारं महोपकारके मां। प्रद्विषन्तः - प्रकर्षेण द्विषन्तः। अभ्यसूयकाः - कर्मवश्यस्य जीवस्य कर्मणैव सिद्धिः किमीश्वरेण अकिञ्चित्करेणेति मय्यसूयां कुर्वन्तश्च सन्तः। यजन्तइति पूर्वेणान्वयः ॥ १९ ॥

तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।

क्षिपाम्यजस्रमशुभा नासुरीष्वेव योनिषु ॥ १९ ॥

**द्विषतः – मयि द्वेषं कुर्वतः । क्रूरान् - नृशंसान् । अमंगळान् तान् असुरान् । नराधमान् । अहं – सकलजगन्नियन्ताहम् । अजस्रम् ; संसारेषु – चक्रवत् परिवर्तमान जन्म जरा मरणादिसन्तानेषु । तत्राप्यासुरीषु योनिषु – असुरसबन्धियोनिषु । क्षिपामि – पातयामि ॥ १९॥॥**

असुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।

मामप्राप्यैव कौन्तेय ततो यांत्यधमां गतिम् ॥ २० ॥

**हेकौन्तेय ! आसुरीं - योनिं । आपन्नाः -प्राप्ताः । जन्मनि जन्मनि - उत्तरोत्तरेषु जन्मसु । मूढाः – ज्ञानशून्याः । मां-अप्राप्यैव - यथावत् अविज्ञायैव । ततः - तज्जन्मनः । अधमां - अपकृष्टामेव । गतिं । यांति - प्राप्नुवन्ति ॥ २० ॥**

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।

कामःक्रोधस्तथा लोभ स्तस्मादेतत्रयं त्यजेत् ॥ २१ ॥

**आत्मनः – स्वरूपस्य । नाशकं – अनवाप्तिहेतुः । कामःक्रोधः लोभश्चेति इदं त्रिविधं । नरकस्य । द्वरं-हेतुः । तस्मात् - नरकहेतुत्वात् । एतत्त्रयं । त्यजेत - प्रयत्नेन वर्जयेत् ॥ २१ ॥**

एतै र्विमुक्तः कौंतेय तमोद्वारै स्त्रिभिर्नरः ।

आचरत्यात्मन श्श्रेय स्ततो याति परां गतिं ॥ २२ ॥

**हे कौन्तेय ! तमोद्वारैः - विपरीतज्ञानहेतुभिः । एतैः - त्रिभिः कामक्रोधलोभैः । विमुक्तो नरः । आत्मनः – स्वस्य । श्रेयः - यथावस्थितमद्विषय ज्ञानजनकम् भक्तियोगाख्यम् कल्याणम् । आचरति - अनुतिष्ठति । ततः - तस्मात् । परां गतिं याति ॥ २२ ॥**

य इशास्त्रविधि मुत्सृज्य वर्तते कामकारतः ।
न स सिद्धि मवाप्नोति न सुखं न परां गतिम् ॥ २३ ॥

यो नरः । शास्त्रविधिं - श्रुतिस्मृतिविहितमनुशासनम् । उत्सृज्य - परित्यज्य । कामकारतः - स्वेच्छानुगुणम् । वर्तते - कर्मस्वधिकरोति । सः । सिद्धिं - स्वर्गादिरूपाम् । नावाप्नोति । परां गतिं च नावाप्नोतीति किमु वक्तव्यम् ॥ २३ ॥

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तु मिहार्हसि ॥ २४ ॥

इति श्रीमद्भगवद्गीतायां षोडशो ऽध्यायः ॥ १६ ॥

तस्मात् - अशास्त्रीयानुष्ठानस्य सर्वानर्थमूलत्वात् हेतोः । हे-कौंतेय ! कार्याकार्यव्यवस्थितौ - कृत्याकृत्यव्यवस्थायां । ते - तव । शास्त्रमेव । प्रमाणं । इह - कर्मभूमौ । शास्त्रविधानोक्तं - शास्त्ररूप मदनुशासनोक्तं । कर्म । ज्ञात्वा कर्तु मर्हसि ॥ २४ ॥

इति श्रीमद्यामुनाचार्य विरचिते भगवद्गीतार्थसंग्रहे
षोडशोऽध्यायः ॥ १६ ॥

श्रीः ।

श्रीमते रामानुजाय नमः ।

## अथ सप्तदशोऽध्यायः ।

( अर्जुन उवाच )

ये शास्त्र विधि मुत्सृज्य यजन्ते श्रद्धयान्विताः ।
तेषां निष्ठा तु का कृष्ण सत्वमाहो रजस्तमः ॥ १ ॥

ये - जनाः । शास्त्रविधिं - शास्त्ररूपं त्वदनुशासनम् । उत्सृज्य । श्रद्धया - आस्तिक्यबुद्ध्या । अन्विता स्सन्तः । यजन्ति । हे कृष्ण! तेषां निष्ठातु । कीदृशी - किंस्वरूपा। सत्वं - सत्वनिष्ठा । आहो रजः - उतरजोनिष्ठा। तमः - तमोनिष्ठावा ॥ १ ॥

( श्री भगवानुवाच )

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्विकी राजसी चैव तामसी चेति तां शृणु ॥ २ ॥

देहिनां-देहधारिणां। श्रद्धा। त्रिविधा-त्रिप्रकारा। भवति । साच स्वभावजा - प्राचीनवासना निमित्तक तत्तद्रुचि विशेष जन्या। सात्विकी - सत्वमूला । राजसी - रजोमूला । तामसी - तमोमूलाचेति । तां त्रिविधां श्रद्धाम् । शृणु - सावधान मकर्णय ॥ २ ॥

सत्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।
श्रद्धामयो ऽयं पुरुषो यो यच्छ्रद्ध स्स एव सः ॥ ३ ॥

हे भारत ! सर्वस्य देहिनः । सत्वानुरूपा - अन्तः करणा द्यनुगुणा । श्रद्धा । भवति । अन्तःकरणं यादृश गुण विशिष्टं तादृशी श्रद्धा भवतीत्यर्थः । अयं पुरुषः । श्रद्धामयः - श्रद्धापरिणामरूपः। तथाच। यः। यच्छ्रद्धः - यादृशश्रद्धायुक्तः। सः। स एव - तत्तच्छ्रद्धएव । तादृश श्रद्धा विशेष जन्य फलवानित्यर्थः ॥ ३ ॥

यजन्ते सात्विका देवान् यक्षरक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥ ४॥

सात्विकाः - सात्विक श्रद्धायुक्ताः । देवान् - इन्द्रादीन् । यजन्ते । राजसाः - राजसश्रद्धायुक्ताः । यक्ष रक्षांसि । यजन्ति । अन्ये । तामसाः - तामस श्रद्धा युक्ताः । प्रेतान्-

भूतगणांश्च यजन्ति । दुःखा संभिन्न सुख हेतु भूत देवयाग विषयक श्रद्धा सात्विकी , दुःख मिश्र सुख हेतु यक्ष रक्षो याग विषयक श्रद्धा राजसी , दुःखप्रचुरा ल्पसुख हेतु प्रेतादि याग विषयक श्रद्धा तामसीति भावः ॥ ४ ॥

अशास्त्रविहितं घोरं तप्यन्ते ये तपोजनाः ।
दंभाहंकारसंयुक्ताः कामरागबलान्विताः ॥ ५ ॥
कर्शयन्त श्शरीरस्थं भूतग्राममचेतसः ।
मां चैवान्त श्शरीरस्थं तान् विद्ध्यासुरनिश्चयान् ॥ ६ ॥

ये जनाः । दम्भाहंकारसंयुक्ताः । कामरागबलान्विताः - रागः - विषयस्पृहा , सएव परिपाक विशेषापन्नः कामः , तद्विशिष्टं ताम सं बलं, तेनान्विताः । किंच । शरीरस्थं । भूतग्रामं – पृथिव्यादि भूतसमूहं । कर्शयन्तः – कृशीकुर्वतः । अचेतसः - विवेकाभावा दमनस्क प्रायाः । अन्तः शरीरस्थं – शरीरान्तर्वर्तिनम् । मां - मदंशभूतं जीवात्मानंच । कर्शयन्त स्सन्तः । अशास्त्रविहित मति-दारुणम् । तपः तप्यन्ते - तपः कुर्वंति । तान् । आसुरनिश्चयान् - मदाज्ञातिलंघनरूपा सुरसम्बन्धि निश्चयवतः । विद्धि ॥ ५ ॥ ६ ॥

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।
यज्ञ स्तप स्तथा दानं तेषां भेद मिमं शृणु ॥ ७ ॥

सर्वस्य – जनस्य । आहारस्तु । त्रिविधः – गुणत्रयसंबन्धेन त्रिप्रकारः । प्रियोभवति । यज्ञ स्तपो दानश्च त्रिविधं भवति । तेषां - आहारादीनां । इमं - वक्ष्यमाणम् । भेदं । शृणु ॥ ७ ॥

आयु स्सत्वबलारोग्य सुखप्रीतिविवर्धनाः ।
रस्या स्स्निग्धा स्स्थिरा हृद्या आहारा स्सात्विकप्रियाः ॥ ८ ॥

आयुषः , सत्वस्य - ज्ञानस्य , बलस्य , आरोग्यस्य , सुखस्य - शरीरसुखस्य , प्रीतेः – आत्मसन्तोषस्यच , विवर्द्धनाः – विवृद्धिकराः । रस्याः – मधुररसोपेताः । स्निग्धाः - आज्यादि स्नेह

युक्ताः । स्थिराः - स्थिरपरिणामवन्तः । हृद्याः - रमणीयाः । आहाराः । सात्विकप्रियाः - सत्वगुणविवृद्धिहेतुत्वा त्सात्विकजनप्रिया भवन्ति ॥ ८ ॥

कट्वाम्ललवणात्युष्ण तीक्ष्णरूक्षाविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥ ९ ॥

कटवः-कटुरसप्रचुराः, अम्लाः- अम्लरसप्रचुराः, लवणाः- लवणरस प्रचुराः, अत्युष्णाः - स्पृष्टुमशक्याः, तीक्ष्णाः - अतिशीतत्वातितीक्ष्णत्वादिना क्रूराः, रूक्षाः - शुष्काः, विदाहिनः - सन्तापकराः । अतएव । दुःखशोकामयप्रदाः - धातुवैषम्यकृतदुःखस्य पश्चात्तापजनितशोकस्य; कालान्तरभाविरोगस्यच हेतुभूताः । आहाराः । राजसस्यजनस्य इष्टाभवन्ति ॥ ९ ॥

यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥ १० ॥

यातयामं – चिरकालस्थितम् । गतरसं - नष्टस्वाभाविकरसम् । पूति - दुर्गन्धयुक्तम् । पर्युषितं - कालातिपातात् रसान्तरं गतम् । उच्छिष्टं - आचार्यादि व्यतिरिक्तभुक्तावशिष्टम् । अमेध्यं - अपरिशुद्धम् । एवंभूतं यद्भोजन मस्ति । तत् तामसप्रियम् ॥ १० ॥

अफलाकांक्षिभि र्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मन स्समाधाय स सात्विकः ॥ ११॥

अभिसन्धाय तु फलं दंभार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥ १२ ॥

यज्ञः । विधिदृष्टः - शास्त्रदृष्टप्रकारस्सन् । अफलाकांक्षिभिः - फलाभिसन्धि रहितैः पुरुषैः । यष्टव्यएव - भगवदाराधनत्वेन स्वयं प्रयोजनत्वेन अवश्यं कर्तव्यएव । इति- अनेन प्रकारेण । मनः । समाधाय । इज्यते - अनुष्ठीयते । सयज्ञः सात्विकः । फल मभिस-

न्धाय । दम्भार्थं - ख्यातिलाभार्थंच । इज्यते इतियत् । हे भरतश्रेष्ठ ! तं यज्ञं - राजसं । विद्धि ॥ ११ ॥ १२ ॥

विधिहीन मसृष्टान्नं मन्त्रहीन मदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥ १३ ॥

विधिहीनं - चोदनारहितं । असृष्टान्नं - अन्यायागतद्रव्यकम् । मन्त्रहीनं - यथोक्तमन्त्ररहितम् । अदक्षिणं - लोभाददत्तदक्षिणम् । श्रद्धाविरहितं - आस्तिक्यबुद्धिरहितम् । एतादृशंयज्ञम् । तामसं । परिचक्षते - पण्डिताः प्रवदन्ति ॥ १३ ॥

देवद्विजगुरुप्राज्ञ पूजनं शौच मार्जवम् ।
ब्रह्मचर्य महिंसाच शारीरं तप उच्यते ॥ १४ ॥

देवाः - ब्रह्मणाः, गुरुः - आचार्यः, प्राज्ञाः, एतेषां, पूजनं - प्रत्युत्थान प्रदक्षिण नमस्कारादि ।शौचं - तीर्थस्नानाचरणं । आर्जवं- मनोवाक्कायाना मैकरूप्यं । ब्रह्मचर्य - योषित्सु सानुराग वीक्षणादि वर्जनं । अहिंसा - परोपद्रवनिवृत्तिः । एतत । शारीरं - शरीरसम्बन्धि । तपः । उच्यते ॥ १४ ॥

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥ १५ ॥

अनुद्वेगकरं - अभयंकरम् । सत्यं - यथार्थ । प्रियहितं - प्रियं परिणामे हितंच यद्वाक्यं तत् । स्वध्यायाभ्यसनंच । वाङ्मयं - वाचिकं । तप उच्यते ॥ २५ ॥

मनःप्रसाद स्सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येत त्तपोमानसमुच्यते ॥ १६ ॥

मनः प्रसादः - मनः कालुष्य रहितत्वं । सौम्यत्वं - पराभ्युदयप्रावण्यं । मौनं - वाङ्नियमनं । आत्मविनिग्रहः - मनोनिग्रहः । भावसंशुद्धिः - हृदयशुद्धिः । इत्येवंभूतमेतत । मानसं तप - उच्यते ॥ १६ ॥

श्रद्धया परया तप्तं तप स्तत्त्रिविधं नरैः।
अफलाकांक्षिभि र्युक्तै स्सात्विकं परिचक्षते ॥ १७ ॥

**अफलाकांक्षिभिः - फलाभिसन्धिरहितैः। युक्तैः - भगवद्भक्तपरैः। परया श्रद्धया तप्तम्। तत् - पूर्वोक्तम्। त्रिविधं - शारीरादि त्रिप्रकारम्। तपः। सात्विकम्। परिचक्षते - प्रवदन्ति ॥ १७ ॥**

सत्कारमानपूजार्थं तपोदंभेन चैव यत्।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥ १८ ॥

**नरैः। सत्कारमान पूजार्थं - सत्कारो मानसिकादरः, मानो वाचिकप्रशंसा, पूजा कायिको पकृत नमस्कारादि, तदर्थम्। दम्भेन। तपः क्रियते। तत्तपः। इह-लोके। चलं - चलनहेतुः। अध्रुवं - अस्थिरफलं। राजसं तपः प्रोक्तम् ॥ १८ ॥**

मूढ ग्राहेणात्मनो यत् पीडया क्रियते तपः।
परस्योत्सादनार्थं वा तत्तामस मुदाहृतम ॥ १९ ॥

**मूढग्राहेण - मूढाभिनिवेशेन। आत्मनः - स्वस्य। पीडया - शक्त्यननुगुण कायक्लेशेन। यत्तपः क्रियते। परस्य - शत्रोः। उत्सादनार्थंवा। यदभिचारादिरूपं तपः क्रियते। तत् तामसं। उदाहृतम् - कथितम् ॥ १९ ॥**

दातव्यमिति यद्दानं दीयते ऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्विकं स्मृतम् ॥ २० ॥

**देशे - पुण्यक्षेत्रे। काले - ग्रहणादिपुण्यकाले। पात्रे - श्रुतवृत्तादिभि र्दानपात्रेच। दातव्यम् - भगवदाराधनैकवेषेण दानं कर्तव्यमिति। अनुपकारिणे। यद्दानं दीयते। तद्दानं - सात्विकमिति। स्मृतम् - धर्मशास्त्रोक्तम् ॥ २० ॥**

यत्तु प्रत्युपकारार्थं फल मुद्दिश्य वा पुनः।
दीयते च परिक्लिष्टं तद्राजसमुदाहृतम् ॥ २१ ॥

**प्रत्युपकारार्थं - प्रतिगृहीतु स्वकाशा दुपकारलाभार्थंच । फ- लं - स्वर्गादिरूपम् । उद्दिश्यच । परिक्लिष्टम् - अकल्याणद्रव्यंच यथा तथा । यत्पुनः दानं दीयते । तद्राजस मुदाहृतम् ॥ २१ ॥**

अदेशकाले यद्दान मपात्रेभ्यश्च दीयते ।

असत्कृत मवज्ञातं तत्तामस मुदाहृतम् ॥ २२ ॥

**अदेशकाले - कलिंगाद्ययोग्यदेशे राग्याद्ययोग्यकालेच । अपा त्रेभ्यः - पङ्क्तिदूषक विट पतित विकर्मनिरत वेदविहितानुष्ठानादि- दूषकादिभ्यश्च । असत्कृतं - आदौ पादप्रक्षाळनादि गौरव रहितम् । अवज्ञातम् - वाचिकोपचारवर्जितम् । यद्दानम् । तत् तामसमु- दाहृतम् ॥ २२ ॥**

ओंतत्सदिति निर्देशो ब्रह्मण स्त्रिविध स्स्मृतः ।

ब्राह्मणा स्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥ २३ ॥

**ब्रह्मणः – वेदप्रतिपाद्यकर्मणः । ओंतत्सदिति । त्रिविधः – त्रिप्रकारः । निर्देशः स्मृतः । तत्रादौ । ओमितिशब्दप्रयोगः । अंतेतत्स च्छब्दयोरन्वय इति भावः । ब्राह्मणाः - त्रैवर्णिकाः । वेदायज्ञाश्च । तेन - त्रिविधेन निर्देशेनसहिताः । पुरा । विहिताः – मयैवनिर्मिता इत्यर्थः ॥ २३ ॥**

तस्मादोमित्युदाहृत्य यज्ञदानतपः क्रियाः ।

प्रवर्तन्ते विधानोक्ता स्सततं ब्रह्मवादिनाम् ॥ २४ ॥

**तस्मात् - कारणात् । ब्रह्मवादिनां । विधानोक्ताः - विधानेन- विधिवाक्येन , उक्ताः - प्रतिपादिताः । यज्ञदानतपःक्रियाः - यज्ञ दानतपोरूपाणि कर्माणि । ओमित्युदाहृत्य - आदावोमित्युच्चार्य । स- ततं । प्रवर्त्तंते – प्रयुज्यंत इत्यर्थः ॥ २४ ॥**

तदित्यनभिसन्धाय फलं यज्ञतपः क्रियाः ।

दानाक्रियाश्च विविधाः क्रियन्ते मोक्षकांक्षिभिः ॥ २५ ॥

**मोक्षकांक्षिभिः - मुमुक्षुभिः । तदित्युदाहृत्य - इदं - कर्म**

तत ब्रह्म त्यभेदोच्चारणेनोच्चार्य । फलं - प्रयोजनांतरं । अनभिसन्धाय । विविधाः - नानाप्रकाराः । यज्ञ तपः क्रियाः दानक्रियाश्च । चकारात् वेदाभ्यासादिक्रियाश्च । क्रियन्ते ॥२५॥

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥ २६ ॥

हेपार्थ ! सदित्येतत्पदम् । सद्भावे - अतीतानागतादिव्यावृत्ते विद्यमानत्वे । साधुभावे – समीचीनत्वेच । प्रयुज्यते – लोकैर्व्यवह्रियते । तेन । हेपार्थ ! प्रशस्ते–कल्याणे । कर्मणि । सच्छब्दः । युज्यते - प्रयुज्यतइत्यर्थः ॥ २६ ॥

यज्ञे तपसि दाने च स्थिति स्सदिति चोच्यते ।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥ २७ ॥

यज्ञे तपसि दानेच । चकारादध्ययनेच । स्थितिः-निष्ठा । सदित्युच्यते । तदर्थीयं - कर्म - त्रैवर्णिकार्थीयं, त्रैवर्णिकेभ्योहितम् ,यज्ञदानादिकं, तत्सम्बन्धिकर्मच । सदित्येव । अभिधीयते–प्रोच्यते ॥ २७ ॥

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥ २८ ॥

इति श्री भगवद्गीतायां सप्तदशोऽध्यायः ॥ १७ ॥

अश्रद्धया - शास्त्रीयमपि श्रद्धां विना ऽनुष्ठितम् । यत् हुतं–होमः । दत्तं – दानं । तप्तं - तपश्चं । कृतं । हेपार्थ ! तत् कर्म असदित्युच्यते । कुतइत्युक्ते । तत् - श्रद्धारहितंकर्म । प्रेत्य - शरीरंत्यक्त्वा गंतव्यमपि । नसाधयति । इह - लोके वर्त्तमानदशायां च । साध्यं नसाधयति । श्रद्धायुक्तं अशास्त्रीयं - शास्त्रीयमपिश्रद्धारहितंकर्म - दृष्टादृष्टोभयप्रयोजनाभावा दननुष्ठेयं,उभयविधप्रयोजन योगाच्छास्त्रीयमेव श्रद्धाऽविनाभूतंकर्म अवश्यमनुष्ठेय मित्यध्यायसारार्थः ॥२८॥

इति श्रीमद्यामुनाचार्य विरचित भगवद्गीतार्थसंग्रहे सप्तदशोऽध्यायः ॥१७॥

श्रीः ।

श्रीमते रामानुजाय नमः ।

# अथ अष्टादशोऽध्यायः ।

( अर्जुन उवाच )

संन्यासस्य महाबाहो तत्त्व मिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथ क्केशिनिषूदन ॥ १ ॥

अथ वेदांतेषु 'त्यागेनैके अमृतत्वमानशुः' 'संन्यास योगाद्य-तय श्शुद्धसत्वा' इति मोक्ष साधनत्वेन निर्दिष्टयो स्त्याग संन्यास-यो रैक्यं त्यागस्य च स्वरूपं भगवति सर्वेश्वरे सर्वकर्मणां कर्तृत्वा द्यनुसन्धानं सत्वरजस्तमसां कार्यवर्णनेन सत्वस्योपादेयत्वं स्व स्व वर्णोचितानां कर्मणां परमपुरुष प्राप्ति निर्वर्त्तत प्रकारः कृत्स्नस्य गीता शास्त्रस्य सारार्थो भक्तियोगइतिच प्रतिपाद्यते ।

तत्रादौ त्यागसंन्यासयोः पृथक्त्वैकत्वे स्वरूपंच निर्गेतुं अर्जुनः पृच्छति ।

हे महाबाहो ! महाभुज । केशिनिषूदन ! केशिनामरक्षोविध्वंसन । हृषीकेश ! सर्वेन्द्रिय नियामक । पृथक् - भेदेन प्रतीय मानयोः । संन्यासस्य त्यागस्यच । तत्वं - याथार्थ्यं । वेदितुं - ज्ञातुं । इच्छामि ॥ १ ॥

( श्रीभगवानुवाच )

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ २ ॥

कवयः - केचित्पण्डिताः । काम्यानां - अभ्युदयसाधनभूतानां । कर्मणां - वैदिकक्रियाणां । न्यासं - स्वरूपत्यागं । संन्यासं ।

**विदुः - जानन्ति । विचक्षणाः - पण्डिताः । सर्वकर्मफलत्यागं- नित्य नैमित्तिक काम्य रूप समस्त कर्मणां फलत्यागमात्रं । त्यागं। प्राहुः ॥ २ ॥**

त्याज्यं दोषवदित्येके कर्म प्राहु र्मनीषिणः ।
यज्ञदानतपः कर्म न त्याज्यमिति चापरे ॥ ३ ॥

**एके -केचित कपिलमतानुसारिणः । मनीषिणः - विद्वांसः । दोषवत - रागद्वेषादिदोषयुक्तम् । कर्म - यज्ञदानादिकम् । त्याज्यं- स्वरूपेणत्यागार्हमिति । प्राहुः । अपरे - मन्मतानुसारिणः केचित्- पण्डितास्तु । यज्ञदानतपःकर्म । नत्याज्यं -अकरणे प्रत्यवायस्मरणात स्वरूपेण त्यागानर्ह इति । प्राहुः ॥ ३ ॥**

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविध स्संप्रकीर्तितः ॥ ४ ॥

**हे भरत सत्तम ! तत्र विप्रतिपन्ने त्यागेविषये । निश्चयं - त्या- गविषयकं निर्णयं । मे-मत्तः। शृणु। हे पुरुषव्याघ्र ! त्रिविधः - अनुष्ठी- यमानेष्वेव कर्मसु फलतः कर्मतः कर्तृतश्च त्रिप्रकारः। त्यागः। संप्रकी र्तितोहि - मयाप्रागेव 'मयि सर्वाणि कर्माणि' इत्यादिना सम्य क्कीर्ति त इत्यर्थः ॥ ४ ॥**

यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ ५ ॥

**यज्ञदानतपः कर्म - यज्ञदानतपःप्रभृति वैदिकं कर्म। नत्याज्यम् । किन्तु । तत्कार्यमेव । कुतइत्युक्ते । यज्ञोदानन्तपश्च । चकारा दन्या- न्यपि वर्णाश्रमोचितानि कर्माणि । मनीषिणां पावनान्येव ॥ ५ ॥**

एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मत मुत्तमम् ॥ ६ ॥

**हेपार्थ ! एतानि - पूर्वोक्तानि । कर्माणि - यज्ञादी न्यपि । सं**

**गं - तत्रममकारं । फलानिच । त्यक्त्वा । कर्त्तव्यानि - अवश्यमनुष्ठेयानि । इति - एवं । निश्चितं - निर्णीतं । उत्तमं । मे । मतं - सिद्धांतः ॥ ६ ॥**

नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्याग स्तामसः परिकीर्तितः ॥ ७ ॥

**नियतस्य - वर्णाश्रमानुबन्धितया दुस्त्यजस्य । कर्मणस्तु । संन्यासः - त्यागोपि । नोपपद्यते । तस्य - कर्मणः । मोहात् - बन्धकत्वभ्रमात । परित्यागः । तामसः परिकीर्तितः ॥ ७ ॥**

दुःखमित्येव यत्कर्म कायक्लेशभया त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥ ८ ॥

**यत् । कर्म - महायज्ञादिकं । दुःखं - आयाससाध्यत्वेन दुःख स्वरूपम् । इत्येव । कायक्लेशभयात् त्यजेदितियत । सपुरुषः । तं-राजसं त्यागं कृत्वा । त्यागफलं - ज्ञाननिष्ठारूप संन्यासफलं । नैवलभेत - नप्राप्नुयात ॥ ८ ॥**

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
संगं त्यक्त्वा फलं चैव सत्याग स्सात्विको मतः ॥ ९ ॥

**हे अर्जुन ! नियतं - नित्यं नैमित्तिकंच वर्णाश्रमानुबन्धि । कर्म । कार्यं - भगवदाराधन रूपत्वेन अवश्यंकर्त्तव्यमित्येव । संगं-तत्र ममकारं । फलं - प्रयोजनांतरं । चकारा त्कर्तृत्वंच । त्यक्त्वाक्रियत इतियत् । सएव सात्विकस्त्यागोमतः ॥ ९ ॥**

न द्वेष्ट्यकुशलं कर्म कुशलेनानुषज्जते ।
त्यागी सत्वसमाविष्टो मेधावी छिन्नसंशयः ॥ १० ॥

**सत्वसमाविष्टः - सत्वगुणव्याप्तः । अतएव । मेधावी - यथावस्थिततत्वज्ञानवान् । अतएव । छिन्नसंशयः- निवृत्तसन्देहः । त्यागी - पूर्वोक्त सात्विकत्यागवान् पुरुषः । अकुशलं - अनिष्टफलं । कर्म । नद्वेष्टि - तत्रद्वेषंनकरोति । कुशले - स्वर्गादीष्टफलके कर्मणि । नानुषज्जते - तत्रासक्तिंच नकरोति ॥ १० ॥**

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥ ११ ॥

**हि - यस्मात्कारणात । देहभृता - शरीरधारिणा । अशेषतः - सर्वाणि कर्माणि । त्यक्तुं नशक्यं । यस्तु पुरुषः । कर्मफलत्यागी - कर्मसु फलसंगकर्तृत्वत्यागी । सः । त्यागीति । अभिधीयते - कथ्यते ॥ ११ ॥**

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ॥ १२ ॥

**अनिष्टं- निरयादिकम् । इष्टं - स्वर्गादिकं । मिश्रं - इष्टानिष्टमिश्रं पशुबक्ष्यसुतादिकं । इति त्रिविधंकर्मणः फलं । अत्यागिनां - सात्विकत्यागरहितानां । प्रेत्य - कर्मानुष्ठानोत्तरकाले । भवति । सन्यासिनां - सात्विकत्यागिनान्तु मुमुक्षूणां । क्वचित्- कदाचि दपि । नभवति । नहि मुमुक्षो मोक्षविरोधि फल मुत्पद्यत इत्यर्थः ॥ १२ ॥**

पंचैतानि महाबाहो कारणानि निबोध मे ।
सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥ १३ ॥

**हेमहाबाहो ! सांख्ये - तत्वज्ञानप्रधाने । कृतां ते - सिद्धान्ते । वेदान्तइत्यर्थः । सर्वकर्मणां - लौकिकानां वैदिकानांच सर्वेषां कर्मणां । सिद्धये - उत्पत्तये । प्रोक्तानि । एतानि - वक्ष्यमाणानि कारणानि । पंच । मे - मत्तः । निबोध - बुध्यस्व ॥ १३ ॥**

अधिष्ठानं तथा कर्ता करणं च पृथग्विधं ।
विविधाच पृथक्चेष्टा दैवं चैवात्र पंचमम् ॥ १४ ॥

**अधिष्ठानं - शरीरं । तथा । कर्ता - जीवः । पृथग्विधं - नानाप्रकारं । करणं-इन्द्रियवर्गश्च । विविधा । पृथक्-वृत्तिभेदेन पृथग्भूता । चेष्टा- पंचात्मकप्राणवायुः । अत्र-कारणवर्गे । दैवं-परमात्मा । पंचमं - प्रधानकारणमित्यर्थः ॥ १४ ॥**

शरीरवाङ्मनोभिर्य त्कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः ॥ १५ ॥

नरः । शरीरवाङ्मनोभिः । न्याय्यं- शास्त्रविहितम् । विपरीतं - शास्त्रनिषिद्धं वा । यत् - कर्म । प्रारभते - कर्तुं यतते । तस्य - सर्वस्य कर्मणः । एते - अधिष्ठानादयो दैवान्ताः । पंच । हेतवः - कारणानि ॥ १५ ॥

तत्रैवं सति कर्तार मात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वा न्न स पश्यति दुर्मतिः ॥ १६ ॥

एवंसति । तत्र - कर्मणि । योनरः । केवलमेकमात्मानं - स्वात्मानमेव । कर्त्तारं पश्यति । सः । दुर्मतिः । अकृतबुद्धित्वात् - अनिष्पन्नज्ञानत्वात् । न पश्यति - यथावस्थित कर्तृत्वस्वरूपम् न-जानाति ॥ १६ ॥

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमाँल्लोका न्न हंति न निबद्धयते ॥ १७ ॥

यस्य - पुरुषस्य । भावः - कर्तृत्वविषयक मनोवृत्तिविशेषः । नाहंकृतः - अहमेव करोमीत्येवंरूपा भिमानरहिता यस्य बुद्धिः । न - लिप्यते - क्रियमाणे कर्मणि ममेदं कर्म मदीय मेतत्कर्म फल मिति कर्मणाफलेनच नस्पृश्यते । स इमान् लोकान् हत्वाऽपि । न हन्ति- हनने कर्ताऽपि न भवति । नबध्यते - तत्फलंच नानुभवतीत्यर्थः ॥ १७ ॥

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।
करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥ १८ ॥

ज्ञानं - कर्तव्यकर्मस्वरूपविषयकज्ञानं । ज्ञेयं - बोद्धव्यं कर्म । परिज्ञाता - तत्कर्मस्वरूपबोद्धेति । कर्मचोदना - कर्मविधिः । त्रिविधा - त्रिप्रकारः । ज्ञानादित्रययुक्तो ज्योतिष्टोमादिकर्मविधिरित्यर्थः । करणं - साधनभूतम् व्रीह्यादिकम् । कर्म-यागादेः स्वरूपं ।

कर्ता - तत्प्रयोक्ताचेति । कर्मसंग्रह स्त्रिविधः - संग्राह्यकर्मापि त्रिप्रकारमित्यर्थः ॥ १८ ॥

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ।
प्रोच्यते गुणसंख्याने यथावच्छृणुतान्यपि ॥ १९ ॥

ज्ञानं- अनुष्ठेयकर्मविषयकं । कर्म – अनुष्ठेयं कर्म । कर्ता–तदनुष्ठाता च । गुणभेदतः–सत्वादिगुणभेदेन । त्रिधैव–त्रिविधत्वेयैव । गुणसंख्याने - सत्वादिगुणकार्य परिगणने । प्रोच्यते- गुणविद्भिः कथ्यते । तान्यपि - गुणभेदभिन्नज्ञानादीन्यपि । यथावच्छृणु – सवधान माकर्णय ॥ १८ ॥

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकम् ॥ २० ॥

विभक्तेषु - ब्राह्मणादिभेदेन परस्पर विलक्षणेषु सर्वभूतेषु । एकं- ज्ञानैकाकारतया वर्तमानं । भावं-आत्मस्वरूपम् । येन- ज्ञानेन । अविभक्तं - ब्राह्मणत्वादिभेदरहितम् । अव्ययं- विकाररहितम् । ईक्षते - पश्यति । तज्ज्ञानं । सात्विकं विद्धि ॥ २० ॥

पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥ २१ ॥

यतज्ज्ञानं । सर्वेषु भूतेषु । भावान् । आत्मवस्तुनि ब्राह्मणत्वादिभेदेन । नानाभूतान् । पृथग्विधान् - नीलपीतादिभिन्नप्रकारांश्च । वेत्ति । तज्ज्ञानं राजसं विद्धि ॥ २१ ॥

यत्तु कृत्स्नवदेकस्मिन्कार्येसक्तमहेतुकम् ।
अतत्त्वार्थवदल्पं च तत्तामस मुदाहृतं ॥ २२ ॥

यत्तु । एकस्मिन्कार्ये-अत्यल्प फलके एकस्मिन् कर्मणि । कृत्स्नवत्-कृत्स्नफलदइव । प्रवर्तयति । अहेतुकं - अकारणं । अतत्वार्थवत् - एकाकार आत्मनि यथावस्थित ब्राह्मणत्वादि मिथ्यार्थवत् । अल्पं - अतिक्षुद्र फलदंच भवति । तज्ज्ञानं तामसमुदाहृतम् ॥ २२ ॥

नियतं संगरहित मरागद्वेषतः कृतं ।
अफलप्रेप्सुना कर्म यत्तत्सात्विकमुच्यते ॥ २३ ॥

नियतं - स्ववर्णाश्रमोचितं । संगरहितं - तत्रकर्तृत्वादिसंगरहितं । अरागद्वेषतः - रागद्वेषरहितेन । अफलप्रेप्सुना – प्रयोजनान्तर प्राप्ती च्छारहितेन पुरुषेण । यत्कर्मकृतं । तत्कर्मसात्विकमुच्यते ॥२३ ॥

यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥ २४ ॥

अनुबन्धं क्षयं हिंसा मनवेक्ष्य च पौरुषं ।
मोहादारभ्यते कर्म तत्तामसमुदाहृतं ॥ २५ ॥

यत्पुनः कर्म । कामेप्सुना - मोक्षव्यतिरिक्त फलेप्सुना । साहंकारेण - अहंकरोमी त्यभिमानवताचपुरुषेण । बहुलायासम् - अधिकतरक्लेशं । क्रियते । तद्राजसमुदाहृतम् । अनुबन्धं - पश्चाद्भाविदुःखम् । क्षयं - अर्थव्ययम् । हिंसां - प्राणिपीडाम् । पौरुषं - स्वसामर्थ्यंच । अनवेक्ष्य – अपरामृश्य । मोहात् - स्वस्वातन्त्रचभ्रमात । यत् - कर्म । आरभ्यते - क्रियते । तत्तामसमुच्यते ॥ २५ ॥

मुक्तसंगोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिध्यसिद्ध्योर्निर्विकारः कर्ता सात्विक उच्यते ॥ २६ ॥

मुक्तसंगः – कर्मणि ममकाररहितः । अनहंवादी – अनहंकारः, मिथ्याभिमानमूलकाहंवादरहितः । धृत्युत्साहसमन्वितः – धृत्या - यावत्कर्मसमाप्ति अवर्जनीय दुःखादिसहिष्णुत्वरूपधैर्येण , उत्साहेनच , समन्वितः । सिद्ध्यसिद्ध्योः - युद्धादिकर्मणि जयादि सिद्ध्यसिद्ध्योः । निर्विकारः – असन्तोषादिविकार रहितः । एवंविधः कर्ता सात्विक उच्यते ॥ २६ ॥

रागी कर्म फलप्रेप्सु र्लुब्धो हिंसात्मको ऽशुचिः ।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥ २७ ॥

रागी – ख्यातिकामः । कर्मफलप्रेप्सुः - मोक्षव्यतिरिक्त कर्मफलप्राप्तीच्छुः । लुब्धः - कर्मापेक्षित वित्तव्ययसंकोचस्वभावः । हिंसात्मकः – परपीडनेन कर्म करण शीलः । अशुचिः - शुद्धि रहितः । हर्षशोकान्वितः - जयाजयादिषु हर्षविषादादिविकारसहितः । एवंविधः कर्ता । राजसः परिकीर्तितः ॥ २७ ॥

अयुक्तः प्राकृत स्स्तब्ध श्शठो नैकृतिकोऽलसः ।
विषादी दीर्घसूत्रीच कर्ता तामस उच्यते ॥ २८ ॥

अयुक्तः – विकर्मस्थः । प्राकृतः - अनधिगतविद्यः । स्तब्धः – कर्मस्वनारंभशीलः । शठः - अभिचारादिकर्म रुचिः । नैकृतिकः - वंचनपरः । अलसः - आरब्धेपि कर्मणि आशुकरणस्वभावरहितः । विषादी - अत्यन्तविषादशीलः । दीर्घसूत्री च- परेषुच दीर्घकालव र्त्यनर्थपर्यालोचनशीलः । एवंविधः कर्ता । तामस उच्यते ॥ २८ ॥

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ।
प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय ॥ २९ ॥

हे धनंजय ! बुद्धेः - निश्चयात्मकज्ञानस्य । धृतेः - आरब्धकर्मणः विघ्नोपनिपातेपि धारणसामर्थ्यस्यच । पृथक्त्वेन – असांकर्येण । प्रोच्यमानं -मया कथ्यमानं । भेदं - त्रिविधं भेदम् । अशेषेण - साकल्येन । शृणु - सावधान माकर्णय ॥ २९ ॥

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।

बन्धं मोक्षं च या वेत्ति बुद्धि स्सा पार्थ सात्विकी ॥ ३० ॥

हेपार्थ ! या - बुद्धिः । प्रवृत्तिं - फलसाधनभूतंधर्मं । निवृत्तिं – मोक्षसाधनभूतं धर्मं । कार्याकार्ये – कर्तव्याकर्तव्ये । भयाभये – भयस्थानमभयस्थानंच । बन्धं – प्रकृतिसम्बन्ध याथात्म्यम् ।

मोक्षं - मोक्षस्वरूपंच । वेत्ति - विषयीकरोति । सा बुद्धिः । सात्विकी ॥ ३० ॥

यया धर्ममधर्मंच कार्यं चाकार्यमेव च ।

अयथावत् प्रजानाति बुद्धि स्सा पार्थ राजसी ॥ ३१ ॥

यया - बुद्ध्या । धर्मं अधर्मंच - धर्माधर्मौ । कार्याकार्ये । अयथावत् - असमग्रं । प्रजानाति । सा राजसी बुद्धिः । असमग्रवेदनमन्यथा वेदनंच राजस्यां, तामस्यां सर्वत्र विपरीतग्रहइति भेद इत्येके । पीतश्शंखइतिव द्धर्मवैपरीत्यग्रहे राजसी, शुक्तिका रजतग्रहवत धर्मिवैपरीत्ये तामसीति भेद इत्यन्ये ॥ ३१ ॥

अधर्मं धर्ममिति या मन्यते तमसावृता ।

सर्वार्थान् विपरितांश्च बुद्धि स्सा पार्थ तामसी ॥ ३२ ॥

हेपार्थ ! याबुद्धिः । तमसा - तमोगुणेन । वृता - वेष्टितासती । धर्मं अधर्मं इति । मन्यते - गृह्णाति । किं बहुना । सर्वार्थान् - विपरीतान् । मन्यते - सन्तमर्थमसन्त मसन्तमर्थं सन्तमित्यनेन प्रकारेण गृह्णाति । साबुद्धिः तामसी ॥ ३२ ॥

धृत्या यया धारयते मनः प्राणेन्द्रियक्रियाः ।

योगेनाव्यभिचारिण्या धृति स्सा पार्थ सात्विकी ॥ ३३ ॥

हे पार्थ ! योगेन - भगवदुपासनेन । अव्यभिचारिण्या - योगस्य निरतिशयानन्दरूपत्वेन स्वतः पुरुषार्थतया तं विहाय फलान्तरमस्पृशन्त्येत्यर्थः । यया - एवं रूपया धृत्या । मनः प्राणेन्द्रियक्रियाः - योगोद्देशेन प्रवृत्तान् मनः प्राण बहिरिन्द्रिय व्यापारान् । पुरुषः । धारयते - निर्विघ्नं प्रवर्तयति । सा धृतिः - सात्विकी ॥ ३३ ॥

यया तु धर्मकामार्थान् धृत्या धारयते ऽर्जुन ।

प्रसंगेन फलाकांक्षी धृति स्सा पार्थ राजसी ॥ ३४ ॥

हे अर्जुन ! पुरुषः । फलाकांक्षी – प्रयोजनान्तरकाम स्सन् । प्रसंगेन – प्रकृष्टसंगेन । धर्मकामार्थान् - धर्मकामार्थसाधन भूत मनः प्राणेन्द्रियव्यापारान् । यया धृत्या । धारयते । सा - धृतिः । राजसी ॥ ३४ ॥

यया स्वप्नं भयं शोकं विषादं मदमेवच ।

न विमुंचति दुर्मेधा धृति स्सा पार्थ तामसी ॥ ३५ ॥

हे पार्थ ! दुर्मेधाः - दुष्टबुद्धिः पुरुषः । यया - धृत्या । स्वप्नं - निद्रां । भयं - भयजनकं धर्मं । शोकं - शोकजनकं धर्मं । विषादं - मनोविषादजनकं धर्मं । मदं - गर्वजनकं धर्मंच । एतत्साधनभूतान् मनः प्राणेन्द्रियव्यापारानित्यर्थः । न विमुंचति - न त्यजति । सा धृति स्तामसी ॥ ३५ ॥

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ।

अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ॥ ३६ ॥

हे भरतर्षभ ! इदानीं । त्रिविधं – गुणत स्त्रिप्रकारं । सुखन्तु । मे - मत्तः । शृणु । यत्र - सुखे । अभ्यासात - चिरकालपरिचयात । रमते - रतिं प्राप्नोति । दुःखान्तं – समस्तसांसारिकदुखस्यांतं च । निगच्छति - प्राप्नोति ॥ ३६ ॥

यत्तदग्रे विषमिव परिणामे ऽमृतोपमम् ।

तत्सुखं सात्विकं प्रोक्त मात्मबुद्धिप्रसादजम् ॥ ३७ ॥

यत् – पूर्वोक्तं सुखं । अग्रे – उपक्रमसमये । विषमिव - आयाससाध्यत्वा दपरिचयाच्च गरलमिव स्थित्वा । परिणामे - परिपाकसमये । अमृतोपमं - अभ्यासातिशयात् अमृतसमं भवति । आत्म बुद्धि प्रसादजंच - आत्मविषयक ज्ञान प्रसादेन जातंच । तत्सुखं । सात्विकं । प्रोक्तं ॥ ३७ ॥

विषयेन्द्रियसंयोगा द्यत्तदग्रे ऽमृतोपमम् ।

परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥ ३८ ॥

यत् । सुखम् । अग्रे - अनुभवदशायाम् । विषयेन्द्रियसंयोगात् - विषयाणा मिन्द्रियाणांच संगात् । अमृतमिव स्थित्वा । परिणामे - विपाकसमये । विषमिव भवति । तत्सुखं राजसम् भवति ॥ ३८ ॥

यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥ ३९ ॥

यत्सुखम् । अग्रे - अनुभवदशायाम् । अनुबन्धे - विपाकसमयेच । आत्मनः - स्वस्य । मोहनं - मोहजनकम् । निद्रालस्यप्रमादोत्थं - निद्रया - दिवास्वापादिना, आलस्येन - इन्द्रियव्यापारमांद्येन, प्रमादेन - अनवधानेनच , उत्थं - उत्पन्नम् । तत्सुखम् । तामस मुदाहृतम् ॥ ३९ ॥

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्वं प्रकृतिजै र्मुक्तं यदेभि स्स्या त्रिभि र्गुणैः ॥ ४० ॥

यत् । सत्वं - जनः । प्रकृतिजैः - प्रकृतिसंभवैः । एभिः - उक्तविधैः । त्रिभिः । गुणैः - सत्वरजस्तमोभिः । मुक्तं स्यात् । तत्तादृशः जन्तुः । पृथिव्यां - पृथिवीवर्ति मनुष्यादिषु वा । दिवि - स्वर्गादौ देवेषु वा । नास्ति । सर्वमपिब्रह्मादिस्तम्बपर्यन्तं जन्तुजातं गुणत्रय वश्य मेवेत्यर्थः ॥ ४० ॥

ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवै र्गुणैः ॥ ४१ ॥

हे परंतप ! ब्राह्मणक्षत्रियवैश्यशूद्राणां । स्वभावप्रभवैः - स्वकीयप्राचीनकर्मसमुद्भवैः । गुणैः - सत्वादिभिस्सह । कर्माणि - तेषां कर्तव्यक्रियावृत्तयश्च । प्रविभक्तानि - विभज्य कथिताः ॥ ४१ ॥

शमो दम स्तप श्शौचं क्षान्ति रार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्राह्मंकर्म स्वभावजम् ॥ ४२ ॥

शमः - बहिरिन्द्रियनियमनम् । दमः - अन्तःकरणनियमनम् । तपः - शास्त्रीयकर्मानुष्ठानयोग्यतासंपादनम् । क्षान्तिः - अपकारिष्वपि चित्तस्य निर्विकारता । आर्जवं - परेषु मनोवाक्कायानामैकरूप्यम् । ज्ञानं - तत्वावबोधः । विज्ञानं - परतत्वगतविशेषावबोधः । आस्तिक्यं - श्रद्धाच । एतत् । ब्राह्मं - ब्राह्मणासाधारणम् । स्वभावजं - ब्राह्मणजन्महेतुप्राचीनकर्ममूल सत्वोद्रेकजनितम् । कर्म - अवश्यं कर्तव्यं कर्मेत्यर्थः ॥ ४२ ॥

शौर्यं तेजो धृति र्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दान मीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥ ४३ ॥

शौर्यं - युद्धेषु निर्भयप्रवेशसामर्थ्यम् । तेजः - परैरनभिभवनीयतयाऽवस्थानम् । धृतिः - धैर्यम् । दाक्ष्यं - उत्साहशीलत्वं । युद्धे - शस्त्रपातसमये । अपलायनम् - अनिवर्तनम् । दानं - पात्रेत्यागः । ईश्वरभावः - सकलजननियमनसामर्थ्यंच । क्षात्रं - क्षत्रियासाधारणम् । स्वभावजं - क्षत्रियजन्महेतु प्राचीन कर्ममूल रजोगुणजनितम् । कर्म - अवश्यकर्तव्यक्रिया ॥ ४३ ॥

कृषिगोरक्षवाणिज्यं वैश्यंकर्म स्वभावजम् ।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥ ४४ ॥

कृषिगोरक्षवाणिज्यं। वैश्यासाधारणम् । स्वभावजं - वैश्यजन्म हेतु प्राचीन कर्ममूलक तमोमिश्र रजोगुणजनितम् । कर्म - कर्तव्यक्रिया । शूद्रस्यापि । परिचर्यात्मकं - पूर्ववर्णत्रयशुश्रूषारूपम् । कर्म । स्वभावजं - शूद्रजन्महेतु प्राचीन कर्ममूलक केवल तमो गुण जनितम् ॥ ४४ ॥

स्वे स्वे कर्मण्यभिरत स्संसिद्धिं लभते नरः ।
स्वकर्मनिरत स्सिद्धिं यथा विन्दति तच्छृणु ॥ ४५ ॥

स्वेस्वे - स्वस्ववर्णा साधारणे । कर्मणि - शास्त्रीयधर्मे । अभिरतः - आभिमुख्येनप्रवृत्तः । नरः - मनुष्यः । संसिद्धिं-

मोक्षरूपां सम्यक्सिद्धिम् । लभते - प्राप्नोति । स्वकर्मनिरतः पुरुषः । यथा - येनप्रकारेण । सिद्धिं - मोक्षम् । विन्दति । तत्स्वरूपं श्रृणु ॥ ४५ ॥

यतः प्रवृत्ति र्भूतानां येन सर्वमिदं ततम ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ ४६ ॥

यतः - यस्माव परमपुरुषात् । भूतानां - ब्रह्मादिस्तंब पर्यन्तानां प्राणिनाम् । प्रवृत्तिः - उत्पत्यादि स्समस्तो व्यापारः । भवति । येन - परमपुरुषेण । इदं - सर्वं - स्थावरजंगमात्मकं जगत् । ततं - व्याप्तम् । तं - तादृशम् पुरुषोत्तमं मां आश्रितवात्सल्यजलधिम् । स्वकर्मणा - वर्णाश्रमोचितधर्मेण । अभ्यर्च्य - आराध्य । मानवः - मनुष्यः । सिद्धिं - मत्प्राप्तिरूपाम् । विन्दति - प्राप्नोति ॥ ४६ ॥

श्रेयान् स्वधर्मो विगुणः परधर्मा त्स्वनुष्ठितात् ।
स्वभावनियतं कर्म कुर्वन् नाप्नोति किल्बिषम् ॥ ४७ ॥

स्वधर्मः – भगवदाराधनरूपकर्मयोगाख्यो धर्मः । विगुणोपि – अंगविकलोपि । स्वनुष्ठितात् - सांगमनुष्ठितात् । परधर्मात् – अधिकारिविशेषधर्मात् ज्ञानयोगात । श्रेयान् - श्रेष्ठः । स्वभावनियतं - स्वकीयजन्मन उचितं । कर्म कुर्वन् पुरुषः । किल्बिषं - पापम् । नाप्नोति - नप्राप्नोति ॥ ४७ ॥

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ।
सर्वारंभा हि दोषेण धूमेनाग्नि रिवावृताः ॥ ४८ ॥

हे कौन्तेय ! सहजं - स्वभावनियतम् । कर्म - कर्मयोगम् । सदोषं - सदुःखमपि । नत्यजेत । हि - यस्मात् कारणात् । सर्वारम्भाः - सर्वेप्युपायाः । धूमेनाग्निरिव । दोषेण - दुःखरूपेण । आवृताः - वेष्टिताः ॥ ४८ ॥

असक्तबुद्धि स्सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥ ४९ ॥

**सर्वत्र - क्रियमाणेषु सर्वेषु कर्मसु । असक्तबुद्धिः – संगररहिताध्यवसायः । जितात्मा–जितमनस्कः । विगतस्पृहः – फलारंभेच्छारहितः । संन्यासेन - सात्विकत्यागेन युक्तः पुरुषः । परमां - उत्कृष्टां । नैष्कर्म्यसिद्धिं - ज्ञाननिष्ठां । अधिगच्छति ॥ ४९ ॥**

सिद्धिं प्राप्तो यथा ब्रह्म तथाऽप्नोति निबोध मे ।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥ ५० ॥

**हे कौन्तेय ! सिद्धिं - पूर्वोक्ताम् । प्राप्तः - पुरुषः । यथा – येन प्रकारेण वर्तमानः । ब्रह्म । प्राप्नोति । तथा – तंप्रकारम् । समासेन - संक्षेपेणैव । मे - मत्तः । निबोध - बुध्यस्व । या । ज्ञानस्य – ब्रह्मज्ञानस्य । परा निष्ठा - पर्यवसानभूमिः ॥ ५० ॥**

बुद्ध्या विशुद्धया युक्तो धृत्याऽऽत्मानं नियम्य च ।
शब्दादीन् विषयां स्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥ ५१ ॥

**विशुद्धया - संशयविपर्ययादि दोषरहितया । बुद्ध्या युक्तः । धृत्या-धैर्येण । आत्मानं - मनः । नियम्य । शब्दादीन् विषयां स्त्यक्त्वा । रागद्वेषौ । व्युदस्य – परिहृत्य ॥ ५१ ॥**

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ ५२ ॥

**विविक्तसेवी – एकान्तवासी । लघ्वाशी - मिताहारः । यतवाक्कायमानसः - नियमितकरणत्रितयः । नित्यं । ध्यानयोगपरः - अध्यात्मोपायनिष्ठः पुरुषः । वैराग्यं । समुपाश्रितः - सम्यग्वर्द्धयन् ॥ ५२॥**

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्मम श्शान्तो ब्रह्मभूयाय कल्पते ॥ ५३ ॥

**अहंकारं - अनात्मन्यात्माभिमानम् । बलं - तद्धेतुभूत कर्मवासनाबलं । दर्पं - गर्वं । कामं । क्रोधं । परिग्रहं – पुत्रमित्राद्यभिमानं सर्वं ।**

विमुच्य - त्यक्त्वा । निर्ममः - ममकाररहितः । शान्तः - आत्मानु भवैकसुखे वर्त्तमान स्सन् । ब्रह्मभूयाय - प्रकृतिविविक्तात्मस्वरूपा य । कल्पते - समर्थोभवति ॥ ५३ ॥

ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति ।

सम स्सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ ५४ ॥

ब्रह्मभूतः - उक्तरूपेण सब्रह्मत्वं प्राप्तः पुरुषः । प्रसन्नात्मा - निर्मलस्वरूपः । न शोचति - किंचिदपिप्रति शोकं न करोति । न - कांक्षति - मद्व्यतिरिक्तं किंचिदपि न वांछति । सर्वेषु भूतेषु । समः- तुल्यबुद्धि स्सन् । परां - उत्कृष्टां । मद्भक्तिं - अखिलहेय प्रत्य- नीककल्याणैकतान स्वरूपे सर्वस्वामिनि अत्यन्तप्रियानुभव स्वरूपां भक्तिं । लभते ॥ ५४ ॥

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ।

ततो मां तत्वतो ज्ञात्वा विशते तदनन्तरम् ॥ ५५ ॥

अहं । यः - यत्स्वरूपः । यावान् - गुणविभूत्यादिभि र्यत्परिमाण- श्च । अस्मि । तंमां । भक्त्या । तत्वतः - तत्वेन । अभिजानाति - सा क्षात्करोति । मां तत्वतो ज्ञात्वा । तदनन्तरम् । ततः - भक्त्या । मां । विशते - विशति ॥ ५५ ॥

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ।

मत्प्रसादा दवाप्नोति शाश्वतं पद मव्ययम् ॥ ५६ ॥

सर्वकर्माणि - नकेवलं नित्यनैमित्तिकानि, किन्तु , काम्यान्य पीत्यर्थः । मद्व्यपाश्रयः - मदेकाश्रयस्सन् । सदा - आप्रयाणम् । कुर्वाणः – अनुतिष्ठन् सन् । मत् प्रसादात् । शाश्वतं पदं - परमप्राप्यं मां । अवाप्नोति ॥ ५६ ॥

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः ।

बुद्धियोग मुपाश्रित्य मच्चित्त स्सततंभव ॥ ५७ ॥

चेतसा । सर्वकर्माणि । मयि - सर्वान्तर्यामिणि । संन्यस्य - स मर्प्य । मत्परः - मदेकप्राप्यः । बुद्धियोगं - स्वात्मन्यकर्तृत्वानुसन्धान रूपम् । उपाश्रित्य उपादाय । सततं । मच्चित्तः - मद्विषयकचित्त वृत्तिविशिष्ट कर्मानुष्ठानपरः । भव ॥ ५७ ॥

मच्चित्तस्सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि ।
अथचेत्त्वमहंकारा न्नश्रोष्यसिविनंक्ष्यसि ॥ ५८ ॥

मच्चित्तः - मद्विषयोक्तमनोवृत्ति विशिष्ट कर्मयोग मनुतिष्ठन् । त्वं । मत्प्रसादात् - मदनुग्रहादेव । सर्वदुर्गाणि - प्राप्तिप्रतिबंध क सकलसांसारिकदुःखानि । तरिष्यसि - लंघयिष्यसि । अ- थ त्व महंकारात् । नश्रोष्यसि - मदीयं हितवचनं नाकर्णयिष्य- सियदि । विनंक्ष्यसि - नष्टोभविष्यसि ॥ ५८ ॥

यद्यहंकारमाश्रित्य नयोत्स्यइतिमन्यसे ।
मिथ्यैषव्यवसायस्ते प्रकृतिस्त्वांनियोक्ष्यति ॥ ५९ ॥

अहंकारात - अहमेवस्वयंजानामि इत्येवं रूप मभिमान मा- श्रित्य । नयोत्स्ये - युद्धंनकरिष्यामीति । मन्यसे यदि । ते- तव । एषः । व्यवसायः - निश्चयः । मिथ्यैव भविष्यति । कथमित्युक्ते । प्रकृतिः - तवस्वभावएव । त्वां । नियोक्ष्यति - युद्धेप्रवर्तयिष्यति ॥ ५९ ॥

स्वभावजेनकौंतेय निबद्धस्स्वेनकर्मणा ।
कर्तुंनेच्छसियन्मोहा त्करिष्यस्यवशोपितत् ॥ ६० ॥

हे कौंतेय! स्वभावजेन-शौर्यस्वभावजनितेन । स्वेन -स्वासाधारणे- न । कर्मणा - युद्धाख्येन । निबद्धः - वशीकृतः । त्वमेव । अधुना । यत- युद्धं । मोहात् -अज्ञानात् । कर्तुंनेच्छसि । तत्-युद्धं । अव- शोपि । करिष्यसि ॥ ६० ॥

ईश्वरस्सर्वभूतानां हृद्देशेर्जुनतिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ ६१ ॥

हे अर्जुन! ईश्वरः - सर्वनियन्तावासुदेवः । सर्वभूतानां । हृद्देशे - ज्ञानोदयस्थाने हृदयप्रदेशे । यन्त्रारूढानि - शरीररूपयंत्राधिष्ठितानि । सर्वभूतानि । मायया - स्वकीययाप्रकृत्या । भ्रामयन् - प्रवर्त्तयन् । तिष्ठति ॥ ६१ ॥

तमेवशरणंगच्छ सर्वभावेनभारत ।
तत्प्रसादात्परांशान्तिं स्थानंप्राप्स्यसिशाश्वतं ॥ ६२ ॥

हे भारत ! तमेव - हृद्देस्थमेव सर्वनियन्तारम् ! सर्वभावेन - सर्वप्रकारेण । शरणंगच्छ । तत्प्रसादात् - तदनुग्रहात । परां - उत्कृष्टां । शांतिं । शाश्वतं स्थानं - परमपदं । प्राप्स्यसि ॥ ६२ ॥

इतितेज्ञानमाख्यातं गुह्याद्गुह्यतरंमया ।
विमृश्यतदशेषेण यथेच्छसितथाकुरु ॥ ६३ ॥

इति - अनेन प्रकारेण । ते - तुभ्यं । मया - स्वत स्सर्वज्ञेन आप्ततमेन हितैषिणाचमया । गुह्यात् - सर्वस्मादपि रहस्यात् । गुह्यतरं - अतिरहस्यभूतं । ज्ञानं - कर्म ज्ञान भक्ति योग विषयं सकलं ज्ञानं । आख्यातं - उपदिष्टं । एतत् - सर्वं । विमृश्य - सम्यक् परामृश्य । यथेच्छसि तथाकुरु - स्ववर्णाश्रमधर्मगर्भं कर्मयोगं ज्ञानयोगं भक्तियोगंवा अनुतिष्ठेत्यर्थः ॥ ६३ ॥

सर्वगुह्यतमम्भूय श्शृणुमेपरमंवचः ।
इष्टोसिमेदृढमिति ततोवक्ष्यामितेहितं ॥ ६४ ॥

सर्वगुह्यतमं - सर्वेष्वपि कर्मयोगादिषु गुह्येषु मध्ये गुह्यतमं । परमं - उत्कृष्टं । मे - मम । वचः । भूयः - पुनरपि । शृणु । त्वं । मे - मम । दृढं - अत्यन्तम् । इष्टः - प्रीतिविषयोसि । इति यत् ततो हेतोः । तव । हितम् - परमपुरुषार्थसाधनभूतम् । वक्ष्यामि - कथयिष्यामि ॥ ६ ॥

मन्मनाभवमद्भक्तो मद्याजीमांनमस्कुरु ।
मामेवैष्यसिसत्यन्ते प्रतिजानेप्रियोसिमे ॥ ६५ ॥

मद्भक्तः-मयि अत्यन्तप्रीतियुक्तस्सन् । मन्मनाः मदेकप्रवणमनोवृत्तिः । भव ! मामेव- यष्टुं-पूजयितुं, शीलमस्यास्तीति, मद्याजी-मदाराधनपरोभव । मां नमस्कुरु - मय्यात्मात्मीयभरन्यासपूर्वं प्रणिपातं कुरु । एवंच सति । मामेव । एष्यसि - प्राप्स्यसि । ते - तव । सत्यं - प्रतिजाने - प्रतिज्ञां करोमि । यत स्त्वं । मे - मम । प्रियोसि ॥ ६५ ॥

सर्वधर्मान् परित्यज्य मामेकंशरणंव्रज ।
अहन्त्वासर्वपापेभ्यो मोक्षयिष्यामिमाशुचः ॥ ६६ ॥

एवं ' न श्रोष्यसि विनंक्ष्यसी' त्यकरणे वाधोक्ति पूर्वकं यथाधिकारं सात्विकत्यागेन कर्मज्ञानभक्तियोगेषु कर्तव्यतयोक्तेषु अचित्पारतन्त्र्यैकचेष्टस्य अनन्यशरणस्य चेतनस्य कर्मयोगाद्यनुष्ठानमपि स्वरूपविरुद्धं तदकरणमपि स्वरूपनाशकमिति दर्शितं, हन्त सर्वधर्मस्वरूपनाशएव प्राप्त इति महता शोकेन विशिष्ट स्यार्जुनस्य साधनान्तरपरित्यागपूर्वकं भगवदेकप्रपदनरूप सारतमार्थो पदेशेन शोकमपनुदति ॥

सर्वधर्मान् - अखिलान् मत्प्राप्त्युपायतया मदुक्तान् कर्मज्ञानभक्तियोगान् । परित्यज्य - रुचिवासनाभ्यां सह अपुनरंकुरं त्यक्त्वा । मामेकं - आश्रितवात्सल्यैकजलधिं अखिलजगत्स्वामिनं अतिसुशीलम् अतिसुलभं अनालोचितविशेषा शेषलोकशरण्यं मामेव । शरणं - प्राप्त्युपायं । व्रज - अवगच्छ । अहं - सर्वज्ञः सर्वशक्ति रवाप्तसमस्तकामः स्वेतरसमस्त चिदचिद्वस्तुशेषी परमकारुणिकश्चाहं । त्वां । अत्र मशक्त मप्राप्तसकलधर्मत्यागपूर्वकं मामेवोपायत्वेन अध्यवसितवन्तं त्वां । सर्वपापेभ्यः-अविद्या वासना रुचिप्रकृति सम्बन्धा भ्युपगतप्रारब्धेतरपूर्वाघ प्रामादिकोतराघ रूपेभ्यः सर्वेभ्यो मत् प्राप्तिप्रतिबन्धकेभ्यः । मोक्षयिष्यामि - अश्लेषविनाशरूप मोक्षवन्तं करिष्यामि । माशुचः - शोकं माकार्षीः । सर्वेभ्यस्साधनान्तरेभ्योपि सर्वप्रकारविलक्षणोपाये मयि स्ववशे सति किं तव शोकनिमित्त मिति भावः । अत्र भगवत् प्राप्तिसि-

द्वयैव प्रतिबन्धकनिवृत्तौ सत्यां स्वयमेवार्हतीति प्रतिबन्धकनिवृत्तिमात्र मपाकृत्यतयाऽत्रोच्यत इति मन्तव्यम् ॥ ६६ ॥

इदंतेनातपस्काय नाभक्तायकदाचन ।
नचाशुश्रूषवेवाच्यं नचमांयोभ्यसूयति ॥ ६७ ॥

इदं - रहस्यम् । अतपस्काय - अननुष्ठिततपसे । ते - त्वया । नवाच्यम् - नोपदेष्टव्यम् । अभक्ताय - गुरुमन्त्रदेवताभक्तिरहिताय । कदाचन नवाच्यम् । अशुश्रूषवे - शुश्रूषारहिताय । नवाच्यम् । किंच । यः । मां प्रति । अभ्यसूयति । मत्स्वरूपरूपगुणविभूतिषु कथितेषु दोष माविष्करोति । तस्मै-सर्वगुणसंपन्नायापिच नवाच्यम् ॥ ६७ ॥

यइदंपरमंगुह्यं मद्भक्तेष्वभिधास्यति ।
भक्तिमयिपरांकृत्वा मामेवैष्यत्यसंशयम् ॥ ६८ ॥

यः - पुरुषः । परमं - सारतममिदम् । गुह्यं - रहस्यम् । मद्भक्तेषु । अभिधास्यति । स मयि परां भक्तिं कृत्वा । मामेव एष्यति, नात्र संशयइत्यर्थः ॥ ६८ ॥

नचतस्मान्मनुष्येषु कश्चिन्मेप्रियकृत्तमः ।
भवितानचमेतस्मा दन्यः प्रियतरोभुवि ॥ ६९ ॥

दिवि । भूमौ - मनुष्येषुमध्ये । तस्मात् - योग्येष्वेतच्छास्त्रव्याख्यापनपरात्पुरुषात् । मे - मम । प्रियकृत्तमः - अतिशयेन प्रियंकरः । कश्चिदपि । न । इतःपूर्वमपि नाभूत् । नच भविता - इतःपरंच नभविष्यति । अतएव । तस्मात् पुरुषात् अन्यः । मे - मम । प्रियतरः - अतिशयप्रीतिविशेषयोग्यः । नाभून्नभविताच ॥ ६९ ॥

अध्येष्यतेचयइमं धर्म्यंसंवादमावयोः ।
ज्ञानयज्ञेन तेनाह मिष्टस्यामिति मे मतिः ॥ ७० ॥

किंच । यः पुरुषः । धर्म्यं - परमश्रेयस्साधनभूतम् । आवयोः - तव ममच । इमं - गीताशास्त्ररूपम् । संवादं । अध्येष्यते - गुरुसकाशादर्थावबोधपर्यन्त मध्ययनं करिष्यति । तेन - पुरुषेण । ज्ञानयज्ञेन - भगवदनुसन्धानरूप ज्ञानयज्ञेन कर्मणा । अहम् । इष्टः - आराधितः । स्यां - भवेयम् । इति - अनेन प्रकारेण । मे - अवाप्तसमस्तकामस्य मम । मतिः - अभिमतिः ॥ ७० ॥

श्रद्धावाननसूयश्च शृणुयादपि यो नरः ।
सोऽपि मुक्त श्शुभाँल्लोकान् प्राप्नुयात्पुण्यकर्मणां ॥ ७१ ॥

यो नरः । श्रद्धावान् - एतच्छ्रवणे अत्यन्तविश्वासशाली । अनसूयः - मय्यसूयारहितश्च सन् । इदंशृणुयादपि - परैः पठ्यमानस्य अस्य श्रवणंवा कुर्यात् । सोपि । मुक्तः - तच्छ्रवणमात्रेण मद्भक्तिविरोधिपापै र्विमुक्तः । पुण्यकृतां - सुकृतिनां जनानाम् । शुभान् - कल्याणान् । लोकान् । प्राप्नुयात् ॥ ७१ ॥

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ।
कच्चिदज्ञानसंमोहः प्रणष्टस्ते धनंजय ॥ ७२ ॥

हे पार्थ ! त्वया - मय्येव सकलविध बन्धुत्व प्रतिपत्ति कृतवता त्वया । एतत् मद्वाक्यं । एकाग्रेण - सावधानेन चेतसा । श्रुतंकच्चित् । हे धनंजय ! ते-तव । अज्ञानसंमोहः - अज्ञानकृतोभ्रमः । प्रणष्टःकच्चित्-सवासनं निवृत्तः किम् ॥ ७२ ॥

(अर्जुन उवाच)

नष्टो मोह स्स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युत ।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥ ७३ ॥

हे धनंजय ! त्वत्प्रसादात् - त्वदनुग्रहात् । मोहः । नष्टः - सवासनन्निवृत्तः । स्मृतिः - चिदचिदीश्वरतत्वयाथात्म्यविषयिणीबुद्धिः । लब्धा -प्राप्ता - अतः । गतसन्देहः - सवासननिवृत्त-

सर्वसंशयः । स्थितोस्मि । तव-आप्ततमस्य । वचनं । करिष्ये-अवश्यमनुष्ठास्यामि ॥ ७३ ॥

( संजय उवाच )

इत्यहंवासुदेवस्य पार्थस्य च महात्मनः ।
संवादमिममश्रौपमद्भुतं रोमहर्षणं ॥ ७४ ॥

इति-एवं प्रकारं । अद्भुतं - आश्चर्यभूतम् । रोमहर्षणं - रोमांचजनकम् । महात्मनः -ब्रह्मरुद्रादीनामपि वाङ्मनसापरिछेद्यस्वभावस्य । वासुदेवस्य - भगवतः । महात्मनः - महाबुद्धेः । पार्थस्य-अर्जुनस्यच । इमं संवादं । अहं । अश्रौषं - श्रुतवान् ॥ ७४ ॥

व्यासप्रसादाच्छ्रुतवा नेतद्गुह्यमहं परं ।
योगं योगेश्वरात् कृष्णात् साक्षात् कथयत स्स्वयम् ॥ ७ ॥

व्यास प्रसादात - व्यासानुग्रहात् । योगं - योगाख्यं । परमं-उत्कृष्टं । गुह्यं - रहस्यम् । योगेश्वरात् - योगस्य -ज्ञानशक्तिबलैश्वर्य तेजोरूप कल्याणगुणयोगस्य , ईश्वरात - स्वासाधारणतया नियन्तुः। स्वयं कथयतः । कृष्णात । अहं । अर्जुनवदव्यवधानेनैव । श्रुतवानस्मि ॥ ७५ ॥

राजन् संस्मृत्य संस्मृत्य संवादमिममद्भुतं ।
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥ ७६ ॥

हेराजन्! धृतराष्ट्र! पुण्यं - परमपावनम् । अद्भुतं । आश्चर्यावहं । केशवार्जुनयोरिमं संवादं। संस्मृत्यसंस्मृत्य - स्मृत्वा स्मृत्वा । मुहुर्मुहुः -पुनः पुनः । हृष्यामि-हर्षंप्राप्नोमि ॥ ७६ ॥

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ।
विस्मयोमे महान् राजन् हृष्यामि च पुनः पुनः ॥ ७७ ॥

हेराजन् ! हरेः - कृष्णस्य । अत्यद्भुतं - अत्यन्ताश्चर्यावहं । दिव्यचक्षुःप्रदानपूर्वक मर्जुनायप्रकाशितम् मयाच साक्षात्कृतम् । रूपं - विश्वरूपं च । संस्मृत्यसंस्मृत्य - स्मृत्वास्मृत्वा । पुनः पुनः । हृष्यामि । एवं हृष्यतो मे महान्विस्मयो भवति । काच-

मन्विष्यतो महार्घमणिलाभइव युद्धाडंबरविलोकनायगत्वा शस्त्रपातभयात् दूरे स्थितवतः कोय मलभ्यलाभ इति ममहान्विस्मय इति तात्पर्यम् ॥ ७७ ॥

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूति र्ध्रुवा नीतिर्मतिर्मम ॥ ७८ ॥

इति श्रीमद्भगवद्गीतायां अष्टादशोऽध्यायः ॥ १८ ॥

यत्र – यस्मिन् पक्षे । योगेश्वरः कृष्णः वर्तते । यत्र-पक्षे । धनुर्धरः-करधृतगाण्डीवः । पार्थः - अर्जुनः । वर्तते । तत्र - तस्मिन्पक्षे । श्रीः – राज्यादिभोगसमृद्धिः । विजयः-शत्रुनिरासः । भूतिः-ईश्वर्य । नीतिश्च । ध्रुवा – निश्चला । इत्येवंममयतिस्संजाता । तवतु नैवं मतिरस्तीतिभावः ॥

अस्त्रविद्याराजविद्या ममविद्यानहीयते ।
विद्याहीनस्तमोध्वस्तो नाभिजानातिकेशवम् ॥ १ ॥
मायांनसेवेभद्रन्ते नवृथाधर्ममाचरे ।
शुद्धभावंगतोभक्त्या शास्त्राद्वेद्मिजनार्दनम् ॥ २ ॥

इति ग्रन्थां तरोक्तं संजय धृतराष्ट्रयोः परस्परवैलक्षण्य मिहविवक्षितं । रोचतेयदि श्रीकृष्णार्जुना वस्मिन्समये प्रसादनीयौ तवैति फलितार्थः ॥७८॥

इति श्रीम द्यामुनाचार्य विरचिते श्रीमद्भगवद्गीतार्थ संग्रहे

## अष्टादशोऽध्यायः ॥ १८ ॥

शास्त्रंच समाप्तम् ॥

श्रीगणेशाय नमः ।

# कात्यायनश्रौतसूत्रसहितं कर्कभाष्यम् ।

त्रयीसुसम्वित्तिविवेकनिर्मलाः
समग्रनिःश्रेयससिद्धिहेतवः ।
समस्तशास्त्रार्थसतत्त्वबोधका
जयन्ति कात्यायनपादपांसवः ॥ १ ॥

## अथातोऽधिकारः ॥ १ ॥

व्याख्यास्यत इति सूत्रशेषः । शास्त्रावतारसम्बन्धप्रयोजनाभिधानं दर्शपौर्णमासादौ कृतमिदानीं पदार्थमात्रव्याख्यानं क्रियते ॥ तत्रायमथ शब्दः पूर्ववृत्तवेदाध्ययनानन्तर्यप्रज्ञप्त्यर्थः । पूर्वप्रवृत्ते हि वेदाध्ययने उत्तरो विचार उपपद्यते ॥ वेदवाक्यार्थनिरूपणं ह्यत्र भवति । अतः शब्दस्तदेव वेदाध्ययनं हेतुत्वेन प्रकरोति । यस्माद्धीतो वेदः तत उत्तरं विचारस्यावसर इति । अधिकारशब्देन च कर्मविषयः कर्त्तृव्यापारोभिधीयते । प्रतिज्ञासूत्रमेतत् । प्रतिज्ञातमिदमधिकारो व्याख्यास्यत इति । प्रतिज्ञाकरणं शिष्यबुद्धिसमाधानाय । अपरे व्याचक्षते । नित्यनैमित्तिककाम्यकर्मोपनिबन्धनोत्तरकालमाचार्येण परिभाषोपनिबद्धा । तत्रायमथशब्दः कर्मानन्तर्यप्रज्ञप्तये । हेत्वर्थश्चातः शब्दः । यस्मादभिहितानि कर्माणि अतस्तेष्वधिकारोभिधीयते । क एतैरग्निहोत्रादिभिरधिक्रियत इति ॥ १ ॥

एवं प्रतिज्ञाते सति इदानीमिदं विचार्यते । किं फलवन्ति कर्माणि, उताफलवन्ति कर्माणि ? किं तावत्प्राप्तम् । अफलवन्तीति ब्रूमः । न हि तत्समनन्तरं फलमुपलभ्यते । आगमोपि नैवं विधोस्ति येन अग्निहोत्रादिभिः प्राप्यं फलमुच्यते इति । ननु च अग्निहोत्रं जुहुयात स्वर्गकाम इति, दर्शपूर्णमासाभ्यां स्वर्गकामो य-

जेतेत्येवमादिना फलवत्ता गम्यते। नैतदेवम्। अत्र हि यागहोमयोः श्रुत्या विधानं यजेतेति यागस्य कर्त्तव्यतोच्यते। जुहुयादिति होमस्य। न चान्यत्पदान्तरमस्ति यतः फलमवगम्यते। दर्शपूर्णमासशब्दः कर्मणि वर्त्तते अग्निहोत्रशब्दश्च। स्वर्गकामशब्देन च पुरुषो विशेष्यते। यजेतेत्यनेन च यागस्य कर्त्तव्यता उच्यते श्रुत्या। एवं जुहुयादिति च होमस्य। तेन यात्र फलबुद्धिः सा मृषेति। एवं प्राप्त इदमुच्यते—

## फलयुक्तानि कर्माणि ॥ २ ॥

फलस्य साधकानीत्यर्थः। कुत एतत्। वाक्यात्। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत। अग्निहोत्रं जुहुयात् स्वर्गकाम इति च। ननूक्तम्। योऽत्र कर्त्तव्यता वाचकः स यागस्य कर्त्तव्यतामाह होमस्य च। नैतदेवम्। यागमात्र कर्त्तव्यतायां विधीयमानायां वाक्यमेवेदमनर्थकं स्यात्। न हि यागेनाफलस्य कर्त्तव्यता। तेन यागोऽप्यनर्थको वाक्यं च। अथ तु यागः साधनात्वेन विधीयते स्वर्गं प्रति तदा धात्वर्थविधानेन श्रुतिरप्यत्रानुगृह्यते वाक्यमप्यर्थवद्भवति। न च वेदे मात्रामात्रस्याप्यानर्थक्यमिष्यते अतः स्वर्गः साध्यो यागश्च साधनम्। तत्कथमिति चेत्। इह स्वर्गकामो यजेतेति पदद्वयं न विधायकं, न चानुवादकम्। न हि द्वयोर्विधीयमानयोः परस्परं सम्बन्धो भवति, न चानूद्यमानयोः। तस्मात्तत्रैकमुद्देशकं पदमन्यत् प्रतिनिर्देशकमिति। तत्र यदि यागोद्देशेन स्वर्गकामो विधीयते। स्वर्गं कामयमानेन यागः कर्त्तव्य इति। तदा वाक्यस्यानर्थक्यं भवति। अदृष्टपरिकल्पना यागस्य स्वर्गकामनायाश्च। अथ तु स्वर्गकामोद्देशेन यागो विधीयते तदा स तस्योपकारको भवति, पुरुषप्रयत्नरूपो ह्यसौ, स्वर्गकामस्य चानेक उपकारः पुत्रपश्वादिलाभरूपस्तत्र चैकवाक्योपात्तं स्वर्गमेव साधयतीति नातीवादृष्टपरिकल्पना। तस्मात् स्वर्गः साध्यो यागश्च साधनम्। अपि च यागस्य कर्त्तव्यतायामसामञ्जस्यं स्यात्। स्वर्गं कामयते यागं च करोतीति। तस्मात् स्वर्गकामोद्देशेन यागविधानमतश्च फलवन्ति कर्माणीत्युक्तम्। आह च—

स्वर्गकामो यजेतेति द्वेपदे चेद्विधायके ।
परस्परेण सम्बन्धो नानुवादेऽपि युज्यते ॥ १ ॥
अतोनूद्य पदेनैकेनापरेण विधीयते ।
यदि तत्रैव सम्बन्धस्ततो युज्येत नान्यथा ॥ २ ॥
अनूद्य यदि यागं तु स्वर्गकामो विधीयते ।
कामनायास्तथा यागादृदृष्टं परिकल्प्यते ॥ ३ ॥
स्वर्गकाममनूद्याथ यदि यागो विधीयते ।
तस्योपकारकत्वेन ततः स्वर्गस्य साध्यता ॥ ४ ॥
प्रयत्नरूपो यागोयं निष्फलः स च नेष्यते ।
विधेयो ऽपि हि साध्यस्य साधनत्वेन जायते ॥ ५ ॥
स्वर्गश्च साध्यो नान्यत्तु साध्यं किञ्चिदपीष्यते ।
प्रयत्नरूपो यागोपि तेन स्यात्तस्य साधनम् ॥ ६ ॥
उद्दिश्य स्वर्गकामं तु स्फुटे यागविधौ सति ।
एकवाक्य गतः स्वर्गो यागेनेह प्रसाध्यते ॥ ७ ॥
साध्यं नान्यद्धि यागस्य न चान्यत् स्वर्गसाधनम् ।
साध्यसाधनसम्बन्धस्तेनेष्टः स्वर्गयागयोः ॥ ८ ॥

## सर्वेषामविशेषात् ॥ ३ ॥

अधिकारः सर्वेषां भवति । देवमनुष्यरक्षः पिशाचतिर्यगादीनाम् । सर्वेह्येते फलार्थिन इति । दृष्टश्चायमर्थो यथा सर्वेषामधिकार इति । देवाः सत्रमित्युपासत । गावो वा एतत् सत्रमासतेति ॥ ३ ॥ अतः फलार्थित्वाविशेषात् सर्वेषामधिकार इत्येवं प्राप्त आह—

## मनुष्याणां वारम्भसामर्थ्यात् ॥ ४ ॥

वा शब्दः पक्षव्यावृत्तौ । न सर्वेषामधिकारो मनुष्या एव कर्मस्वधिक्रियन्ते । त एव हि यथा श्रुतं कर्मारब्धुं समर्था न देवादयः । देवास्तावदवाप्तकामाः । न तेषामवाप्तव्यमस्ति यद्यागादिभिरवाप्यते । न च देवानामन्ये देवाः सन्ति यान्यजेरन् । ऋषीणामार्षेयाभावादनधिकारः । रक्षः पिशाचानामशुचित्वात् । गवादीनामासन्नचेतवत्वात् । अवैद्यत्वाच्च । यच्च दर्शनमुक्तं गावो वा एतत् सत्रमासतेति । स सत्रप्रशंसार्थो ऽर्थवादः । तस्मान्मनुष्याणा

मेवाधिकारः ॥ ४ ॥

एवं सर्वमनुष्याधिकारप्राप्ताविदमाह—

अङ्गहीनाश्रोत्रियषण्ढशूद्रवर्जम् ॥ ५ ॥

मनुष्याणामङ्गहीनादिवर्जितानामधिकारः । कुत एतत् । आरम्भसामर्थ्यादेव । न ह्यङ्गहीनादयो यथाश्रुतं कर्मारब्धुं समर्थाः । अतोनाधिकारः । अङ्गेनहीनः अङ्गहीनः । यथा विष्णुक्रमणे पङ्गुरसमर्थः । अन्ध आज्यावेक्षणे । मूको मन्त्रोच्चारणे । बधिरश्च सम्बोधने । विष्णुक्रमणादिभिश्च विना विगुणं कर्म भवति । अत एव नाधिकारः । अश्रोत्रियस्य सर्व याजमानिकेष्वनधिकारः । अनधिकृतोह्यसावश्रोत्रियत्वादेव । षण्ढश्चाशुचित्वादद्रव्यत्वाच्च । अशुचित्वं हि तस्य स्मर्यते । अद्रव्यत्वं च । तस्मादेषामनधिकारः । ननु चारम्भसामर्थ्यादित्ययं हेतुर्यथा गवादिव्युदासे वर्त्तते एवमङ्गहीनादिव्युदासेपीति नारब्धव्यमेतत् सूत्रम । सत्यमेतत् । अद्रव्यव्युदासार्थमङ्गहीनादीनामुपादानम । आरम्भसामर्थ्यात्तस्याप्यनधिकारो मा भूदिति । शूद्रः कस्मान्नाधिक्रियते द्रव्यवाननङ्गहीनश्च । सन्ति चान्यार्थानि दर्शनानि यैः शूद्रस्याप्यधिकारो गम्यते । हविष्कृदाह्वानविशेषं प्रकृत्योच्यते 'आधावेति शूद्रस्य' तथा व्रतविशेषे मस्तु शूद्रस्य । तथा पितृमेधे अष्ठीवद्घ्नं शूद्रस्येति । एवं प्राप्त इदमाह । शूद्रवर्जम ॥ ५ ॥

कुत एतत्—

ब्राह्मणराजन्यवैश्यानां श्रुतेः ॥ ६ ॥

ब्राह्मणादीनामेवाधानं श्रूयते । वसन्ते ब्राह्मणोग्नीनादधीत । ग्रीष्मे राजन्यो । वर्षासु वैश्य इति । तेनाधानाभावादनग्निः शूद्रः । सोऽग्निसाध्ये कर्मणि कथं प्रवर्त्तिष्यते । आत्मार्थं चाधीयन्ते अग्नयो न परार्थे । आत्मने पदं ह्यत्र भवति आदधीतेति । तेन ब्राह्मणादय एवाधानेनाग्निमुत्पादयितुं समर्थाः । न शूद्रः । आधानाभावात् । अतः शूद्रस्यानधिकारः । यानि पुनर्दर्शनान्युक्तानि तानि रथकारविषयाणि । रथकारस्य हि शूद्रासम्बन्धात् शूद्रत्वमुच्यते । करण्यां

हि स जातः । करणी च शूद्रा दुहितेति । अथवा ब्राह्मणराजन्यवैश्यानामेवाध्ययनं श्रूयते । वसन्ते ब्राह्मणमुपनयीत । ग्रीष्मे राजन्यं वर्षासु वैश्यमिति । उपनयनं चाध्ययनार्थम् । अतस्तदभावादवैद्यत्वादनधिकारः शूद्रस्य । अपि च । शूद्रस्य प्रतिषेधो भवत्यध्ययनं प्रति । श्रवणे त्रपुजतुभ्यां श्रोत्रप्रतिपूरणम् । उच्चारणे जिह्वाच्छेदः धारणे शरीरभेद इति । तस्मादवैद्यत्वाच्छूद्रो नाधिक्रियत इति ॥ ६ ॥

ब्राह्मणोऽग्नीनादधीत स्वर्गकामोयजेतेति च विशिष्टलिङ्गश्रवणात् स्त्रिया अनधिकारे प्राप्त इदमाह—

## स्त्री चाविशेषात् ॥ ७ ॥

स्त्री चाधिक्रियते । कुत एतत् । अविशेषात् । यस्माच्छ्रूयमाणमप्येतल्लिङ्गं न विशेषकं भवति अतो न पुंसामेवाधिकार इति । उद्दिश्यमानविशेषणं ह्येतत् । स्वर्गकामो यजेतेति । विधिसंस्पर्शाभावादविवक्षितं लिङ्गं संख्या च । यत्र पुनर्विधिसंस्पर्शोऽस्ति तत्र लिङ्गं संख्या च विवक्ष्यते । यथा पशुमालभेतेत्यत्र तद्विषयं पुंस्त्वमेकत्वं च विधीयते । विशिष्टपश्वालम्भोऽन्यथा न भवति । तस्मात् स्त्रिया अप्यधिकारः ॥ ७ ॥

## दर्शनाच्च ॥ ८ ॥

दृश्यते चायमर्थो यथा स्त्रिया अप्यधिकार इति । मेखलया यजमानं दीक्षयति योक्त्रेण पत्नीमिति योक्त्रविधिपरे वाक्ये पत्न्या अधिकारं दर्शयति । सा च पुंसा सहाधिक्रियते न पृथक् । येनैकस्मिन्कर्मणि पत्नीसाध्याः पदार्था दृश्यन्ते यजमानसाध्याश्च । पत्न्याज्यमवेक्ष्यते यजमानो वेदं बध्नातीति । अपि च । तयोः समध्यकं द्रव्यं स्मर्यते । धर्मार्थकामेषु चानभिचारः । तस्मात् सहाधिक्रियते । तुल्यफलत्वाच्च । कुत एतत् । सूत्रकारप्रस्थानात् । पत्नीः प्रकृत्याहानुचरीर्वा फलाधिकारादितरासामिति । क्रियाफलं च सकलमेकैकस्य भवति । न विभागेन । स्वर्गकामो यजेतेत्यनेन यथा यजमानोऽभिधीयते । एवं पत्न्यपीति । यथा यागेन यजमानः फलं साधयति तथा पत्न्यपीति । वाक्यान्तरेण सह क्रिया तयोः । तथाच

स्मरणम् । नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् । शुश्रूषयति भर्त्तारं तेन स्वर्गे महीयते ॥ ८ ॥

त्रयाणां वर्णानामङ्गहीनादिवर्जितानां स्त्रियासहाधिकारउक्तः अन्यस्यापि कस्यचिदिष्यते तदर्थं सूत्रमारभ्यते—

रथकारस्याधाने ॥ ९ ॥

श्रुतत्वाद्रथकारोऽधिक्रियते । श्रूयते हि वर्षासु रथकार आदधीतेति ॥ ९ ॥

तत्रैतद्विचार्यते । किं त्रैवर्णिको रथकारो रथक्रियायोगाद्रथकारः। उत जात्यन्तरमिति।?। उभयत्र प्रयोगदर्शनात् सन्देहः। किं तावत्प्राप्तम् । त्रैवार्णिक इति । तस्य ह्याधानप्राप्तौ सत्यामृतुमात्रविधानात् वाक्यभेदो न भवति । जात्यन्तरवाचिनि पुनस्तस्याधानसम्बन्धो वक्तव्यः ऋतुसम्बन्धश्चेति । तथासति वाक्यं भिद्यते । तस्मात् त्रैवर्णिको रथकारः। एवं प्राप्त आह—

नियतं च ॥ १० ॥

च शब्दो वाशब्दस्यार्थे। निपातानामनेकार्थतोक्ता । उच्चावचेष्वर्थेषु निपतन्तीति निपाता इति । अतश्च शब्दो वाशब्दार्थे वाशब्दश्च पक्षव्यावृत्तौ । न त्रैवर्णिको रथकारः। किं तर्हि जात्यन्तरमेव ? तस्मिन्हि रथकारशब्दो रूढः स्मर्यते । माहिष्येण करण्यां तु रथकारः प्रजायते इति । क्षत्रियाज्जातो वैश्यायां माहिष्यः। वैश्येन शूद्रायां जाता करणी माहिष्येणकारण्यां जातो रथकारः । आनुलोम्येन सङ्करजातः । रथकारशब्दश्चात्र रूढः। रूढिश्चयोगाद्बलीयसी। सा हि श्रुतिपक्षनिक्षिप्ता । वाक्यपक्षनिक्षिप्तो योगः । अपि च । त्रैवर्णिकस्य शिल्पोपजीवनं प्रतिषिद्धम् । तस्मादपि जात्यन्तरं इति । तथा च मन्त्रलिङ्गम् । ऋभूणां त्वेति रथकृत आदधीतेति। सौधन्वना ऋभवश्चेत च । सौधन्वनशब्देन स्पष्टमेव जात्यन्तरमभिधीयते । अथ यदुक्तञ्जात्यन्तरवाचिनि रथकारशब्दे वाक्यं भिद्यत इति । तद्विशिष्टविधानेन परिह्रियते । अथ कस्मात्त्रैवर्णिक एव नाङ्गीक्रियते । सोऽपि हि रथकरणाद्रथकारो भवति तस्येदमाधानम् । एवं च

सति ऋतुमात्रविधाने लाघवं भवति । जात्यन्तरे तु विशिष्टविधानाङ्गीकरणे गौरवं स्यात् ॥ १० ॥

एवमाशङ्किते उत्तरसूत्रम्—

## नाभावादिति वात्स्यः ॥ ११ ॥

न त्रैवर्णिको रथकारः शक्यते वक्तुम् । योगनिमित्तः शब्दो यावदेव युक्तः तावदेव प्रवर्त्तते । अतो न रथकाराख्याया रथकरणनिमित्तता । वात्स्यग्रहणं प्रत्ययदार्ढ्यार्थम् । रथकारस्याधान इत्येवमादीनामपरा व्याख्या । रथकारस्याधाने दृष्टत्वाद्रथकारोऽधिक्रियत इत्युक्तम् । रथकारशब्दश्च जात्यन्तर एव रूढः । तेन यौगिकाशङ्कैव न भवति । अतोऽन्यथा व्याख्यायते । रथकारस्याधाने दृष्टत्वात् किमाधानमात्रमेव भवति उतोपरितनकर्मस्वप्यधिकार इति । तत्रैतदुच्यते । नियतं च । चशब्दान्नैमित्तिकं काम्यं च कर्म प्रवर्त्तते । कुत एतत् । आधानं हि तस्य श्रुतम् । आत्मसंस्कारार्थं अग्निद्वारेण । संस्काराश्चोपरितनकर्महेतवः । अतश्चोपरितनकर्मस्वऽप्यधिकार इति । एवं प्राप्त उच्यते । नाभावादिति वात्स्यः । नैतदेवमुपरितनकर्मस्वऽप्यधिकार इति । लिङ्गाभावात् । न ह्यधिकारलिङ्गान्यस्य दृश्यन्ते । यथा त्रैवर्णिकानाम् । एहीति ब्राह्मणस्य । आगह्याद्रवेति वैश्यस्य च राजन्यबन्धोश्चेत्येवमादीनि । तेन लिङ्गाभावादनधिकारो गम्यते । एवमभिधाय पुनराधीतेन व्याख्यायते । अभावाल्लिङ्गानामुपरितनकर्मस्वधिकारो भावो न स्यात् । अस्ति तु भावः । न च लिङ्गाभावमात्रेणैवानधिकारो गम्यते । आधानं हि तस्य श्रुतम् । तद्धि संस्कार्याग्निद्वारेण परार्थमिति । वात्स्यग्रहणमुक्तार्थम् । अपि च लिङ्गमप्यस्ति । आद्रावेति शूद्रस्य । तथा मस्तुशूद्रस्य अष्ठीवद्घ्नं शूद्रस्येति शूद्रसम्बन्धाद्रथकारः शूद्र इत्यभिधीयते । तस्य हि मातामही शूद्रेति ॥ ११ ॥

## निषादस्थपतिर्गावेधुके ऽधिकृतः ॥ १२ ॥

एवं हि श्रूयते । यस्य रुद्रः पशून् शमयेत् स वास्तुमध्ये रौद्रं गावेधुकं चरुं निर्वपेदिति । तामिष्टिं प्रकृत्यामनन्ति । एतया निषा-

दस्थपतिं याजयेदिति । निषादस्थपतिर्यजेतेत्यर्थः । तत्रैतत्सन्दिह्यते । किं निषादानां स्थपतिर्निषादस्थपतिः उतनिषादश्चासौ स्थपतिश्च निषादस्थपतिरिति । स्थपतिशब्द आधिपत्यवचनः । किं चातो यदि षष्ठीसमासः तदा त्रैवर्णिको भवति । अथ समानाधिकरणस्तदा जात्यन्तरमिति । जात्यन्तरस्यावैद्यत्वात्षष्ठीसमासपरिग्रहे प्राप्ते उच्यते । निषादश्चासौ स्थपतिश्चेति समानाधिकरण इति । कुत एतत् षष्ठ्यश्रवणात् । ननु च समासे सति लुप्यते षष्ठी । एतदेव ह्यनुपपन्नम् । यदश्रुता षष्ठी कल्प्या लोपश्चेति । इतरस्मिन्पुनः पक्षे द्वयोरपि पदयोः स्वार्थवृत्तिता भवति । तस्मात् समानाधिकरणोयं षष्ठीसमासः । अपि च । निषादद्रव्यं हि दक्षिणा श्रूयते । कूटं दक्षिणा काणो वा गर्द्दभ इति ।

वावकीर्णिनो गर्दभेज्या ॥ १३ ॥

अवकीर्णी ब्रह्मचारी यः स्त्रियमुपैति तस्य वा गर्द्दभेज्या नैमित्तिकी । वा आज्याहुती इति उभयं हि शाखान्तरे श्रूयते विकल्पेन ॥ १३ ॥

तत्रैतद्विचार्यते । स्थपतीष्ट्यां अवकीर्णिपशौ च किमाधान संस्कृतोऽग्निरुत लौकिक इति । किं तावत्प्राप्तमाधानसंस्कृत इति । दर्शपूर्णमासविध्यन्तग्राहके ह्येते कर्मणी । तत्र चाधानसंस्कृतोऽग्निर्दृष्टः । इहापि तद्वदेवभवतीत्येवं प्राप्त आह—

लौकिके ॥ १४ ॥

लौकिकेऽग्नावेतदुभयं स्यात् । स्थपतीष्ट्यां हि तत्प्रयुज्यते यत् दर्शपूर्णमासयोरङ्गं न चाधानं दर्शपौर्णमासाङ्गम् । प्रकरणाभावात् । स्वकाले हि पुरुषसंस्कारकत्वेन तद्विहितम् । अतो लौकिकोऽग्निरिति ॥ १४ ॥

भूमौ पशुपुरोडाशश्रपणम् ॥ १५ ॥

न कपालेषु ॥ १५ ॥

अप्स्ववदानाहमः ॥ १६ ॥

नाग्नाविति ॥ १६ ॥

शिश्ना१त्प्राशित्रावदानम् ॥ १७ ॥

कर्त्तव्यमिति शेषः ॥ १७ ॥

कर्त्रधिकारो निरूपितः इदानीमग्न्यधिकारनिरूपणायाह—

वैतानिकेषु सर्वः; सर्वार्थत्वात् ॥ १८ ॥

वैतानिका वितानार्हा आधानसंस्कृता अग्नय उच्यन्ते । तेषु सर्वं श्रौतं स्मार्त्तं च कर्म कर्त्तव्यम् । कुत एतत् । सर्वार्थत्वात् । सर्वार्था ह्येते अग्नयः । कथं ज्ञायते । यन्नाम द्रव्यमुत्पद्यमानमेव विशिष्टार्थसंयोगेनोत्पद्यते तस्य तादर्थ्यमेवावसीयते । न चैते विशिष्टार्थसंयोगिनस्तस्मात् सर्वार्था इति २ ॥ १८ ॥

दर्शनाच्च ॥ १९ ॥

दृश्यते चायमर्थो यथा स्मार्त्तमप्यत्र क्रियते । दक्षिणाग्निं प्रकृत्य श्रूयते । मांसं तु तत्र न पचेयुरिति । प्राप्तिपूर्वकश्च प्रतिषेधो भवति । न च श्रौतो मांसपाको दक्षिणाग्नावस्ति यस्यैष प्रतिषेधः स्यात् । शामित्रे ह्यसौ विहित इति । अस्तित्वविहिताप्रतिषिद्धः ३ स्मार्त्तो मांसपाकस्तस्यैष प्रतिषेधो युज्यते । तस्मार्त्तमप्यत्र क्रियत इति ॥ १९ ॥

एवं प्राप्ते ब्रूमः—

नौपासनश्रुतेः ॥ २० ॥

'नैतदेवं' स्मार्त्तमपि वैतानिकेषु कर्त्तव्यमित्येवं नास्ति । येन वैतानिकस्यापि स्मार्त्तकर्मसाधनभूतऔपासनो दृश्यते । पितृमेधे अद्वारेणौपासनं निरस्यतीति । यदि हि स्मार्त्तमपि वैता-

१ गर्दभस्य शिश्नात् प्राशित्रावदानं कार्यम्, वचनात्, न जौहवेभ्यो हृदयादिभ्य इति तत्त्वम् ।

२ आधानेनोत्पादितानामग्नीनां प्रयोजनापेक्षायां सामर्थ्येन सर्वाग्निकार्यार्थता विज्ञायत इति भावः ।

३ तथा च मार्कण्डेयः आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहितः, अनाहिताग्निस्त्वौपासनेऽग्न्यभावे तथाप्सु वा इति ।

निकेषु क्रियेत । औपासनदर्शनं न स्यात् । दृश्यते च । तस्मात्स्मार्त्तान्यौपासने क्रियन्त इति । पूर्वमौपासनः । स्मरन्ति ह्येवं संस्कारैः संस्कृतः पूर्वैरुत्तरैरनुसंस्क्रियत इति १ । पूर्वे च स्मार्त्ताः श्रौताश्चोत्तरे । न च वैतानिकोत्पत्त्युत्तरकालमौपासनस्य युक्तस्त्यागोऽग्न्युत्सादित्वप्रसङ्गात् ॥ २० ॥

अधिश्रयणीये मा॥ सप्रतिषेधः ॥ २१ ॥

यश्च दक्षिणाग्नौमा॥ सपाकप्रतिषेधः । साधिश्रयणीयाहर्विषयः । दक्षिणाग्निं प्रकृत्य श्रूयते । न वावसिते वैनमाहरेयुस्तस्मिन्पचेयुरिति । पाकद्रव्यं चाविशेषान्मांसमपि भवति तस्यैष प्रतिषेध इति २ ॥ २१ ॥

स्वर्गकामो यजेत इत्येवमादीनां फलवत्ता प्रतिपादिता । अधिकारनिरूपणा च कृता । इदानीं तस्यैव साङ्गस्य फलवतः कर्मणो निरूपणायाह—

यज्ञं व्या३ख्यास्यामः ॥ २२ ॥

यज्ञशब्दो व्याख्यास्यत इत्यर्थः ॥ २२ ॥

प्रतिज्ञाकृता तामाह—

द्रव्यं देवता त्यागः४ ॥ २३ ॥

व्रीहियवपश्वादिद्रव्यम् । देवताशब्दस्तु चोदना लक्षणः । या यत्र चोद्यते सा तत्र देवता । न हि जात्या काचिद्देवतास्ति

---

१ अत्र याज्ञवल्क्यः–कर्म स्मार्तं विवाग्नौ कुर्वीत प्रत्यहं गृही, दायकालाहृते वापि श्रौतं वैतानिकाग्निषु इति ।

२ अतः श्रौतान्येव वैतानिकेषु गार्हपत्यादिषु कर्तव्यानि स्मार्तानित्वावसथ्येऽग्नावेवेति सिद्धम् ।

३ यज्ञो यागो यजनमिष्टिरिति पर्यायाः, यज्ञं यागं व्याख्यास्याम इत्यर्थः, यागस्वरूपं कथयिष्य इति यावत् ।

४ अग्न्यादिदेवतोद्देशेन पुरोडाशादिद्रव्योत्सर्गो याग इति भावः ।

वैदिके व्यवहारे तद्धितेन द्रव्यं प्रति देवतात्वं गम्यते । चतुर्थ्यन्तेन वा। तस्य द्रव्यस्य देवतां प्रति या उत्सर्गक्रिया स यागः । यज्ञो याग इति चानर्थान्तरम् । अस्मिन्नेवार्थे लोके यज्ञशब्दः प्रसिद्धः। प्रसिद्धोऽपि सन्नुच्यते अङ्गप्रधानविवेकनिरूपणाय ॥ २३ ॥

निरूपितं प्रधानं फलसंयुक्तं इदानीमङ्गनिरूपणायाह—

## तदङ्गमितरत् समभिव्याहारप्रकारणाभ्याम् ॥ २४ ॥

यदन्यफलासंयुक्तं यागहोमरूपं तत्तस्यैव फलवतो यागस्याङ्गम् । धर्मःशेषोऽङ्गमिति चानर्थान्तरम् । कुत एतत्समभिव्याहारप्रकरणाभ्याम् । समभिव्याहारशब्देन वाक्यमभिधीयते। यथा पौर्णमासेनेष्ट्वेंद्राय विमृधे ऽनुनिर्वपतीति । प्रकरणाम्नानसामर्थ्याद्दर्शपूर्णमासाङ्गत्वे प्राप्ते वाक्यात्पौर्णमासाङ्गतोच्यते । उभयाकाङ्क्षालक्षणं प्रकरणमुच्यते । तद्यथा । दर्शपूर्णमासाभ्यां स्वर्गकामोयजेतेति यागस्य फले विधानं साधनत्वेन । साधनस्य चेति कर्त्तव्यतापेक्षा। इतिकर्त्तव्यता च साध्यसव्यपेक्षा। तयोराकाङ्क्षावतो सम्बन्धः प्रकरणम्। उभयोराकाङ्क्षावत्वे सति तत्सम्बन्धप्रतिपादकवाक्यपरिकल्पना । वाक्यादभिधानसामर्थ्यम् । अभिधानसामर्थ्याद्विनियोक्री श्रुतिरिति । एवं वाक्यप्रकरणाभ्यां शेषविनियोग इति । ननु च तन्त्रे श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानानि शेषविनियोगप्रमाणानि । सूत्रकारेण तु प्रमाणद्वयमुपन्यस्तम्। शेषाणामनुपन्यास इति । नैष दोषः। कर्मविरचनाकाल एव तानि ह्यभिहितानि। तत्र तत्रोच्यते। काष्ठं हिरण्यं वाभिजुहुयात् श्रुतिरिति । काष्ठहिरण्ययोः श्रुतेर्विनियोजकत्वमुक्तम्। लिङ्गस्य च । तेषामारम्भे ऽर्थतो व्यवस्था तद्वचनत्वादिति । क्रमस्तु द्विप्रकारः। सन्निधानलक्षणो यथासंख्यलक्षणश्च । तत्र यः सन्निधानलक्षणः स विकृतिविषयः। अन्यतराकाङ्क्षोपि हि तत्र सम्बन्धो भवति । विकृतिसंन्निधौ यदपूर्वमङ्गमाम्नायते तत्साध्याभावात्साध्याकाङ्क्षं तस्यानर्थक्यं मा भूदिति वैकृतस्य प्रधानस्य तत्प्रत्यपेक्षा कल्प्यते। सोयमन्यतराकाङ्क्षा लक्षणः क्रमः । तेनापि विनियोगो ज्ञापित एवाचार्येण। यथाधिदेवनादीनामभिषेचनीये। यथा-

संख्यलक्षणेनापि विनियोग उक्त एव । यथा कांस्यवानस्यत्यमार्त्तिकैरभिचारब्रह्मवर्चसप्रतिष्ठाकामा यथासंख्यमिति । समाख्ययापि च विनियोगो ज्ञापित एव । शेषमितरे यथासंख्यमिति । अतो विनियोगप्रमाणद्वयमेवात्राभिहितम् । यच्च पितृभूत्याचार्येण यथासंख्यलक्षणक्रमं प्रकृत्योपांशुयाजे दब्धिर्नामास्यदब्धोहं भ्रातृव्यं दभेयमिति । अस्य विनियोग उक्तः । तन्नातीव शोभते । प्रकरणेन हि तस्य सम्बन्धः । उभयाकाङ्क्षालक्षणास्तेनानुमन्त्रणेन प्रकरणिनोपेक्ष्यन्ते । प्रकरणिभिरथाग्नेयोपांशुयाजाग्नीषोमीयैस्तदपेक्ष्यते । तेन प्रकरणेनानुमन्त्रणसम्बन्धः । तद्यदि विशेषे व्यवस्थाप्यते । क्रमेण प्रकरणं बाधितं स्यात् । यथासंख्यलक्षणेन विनियोगः प्रदर्शित एव । कवचिनिषङ्गिकलापिदण्डिनो यथासंख्यमित्येवमादि ॥ २४ ॥

अयागहोमरूपस्याङ्गभाव उक्तः । इदानीं यागहोमरूपयोरङ्गत्वप्रतिपादनायाह—

## यजतयश्चाफलयुक्तास्तदङ्गम् ॥ २५ ॥

चशब्दाज्जुहोतयश्च । ननु दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यनेन यागस्य फलसम्बन्धउक्तः । कुतोऽफलयुक्ता यजतय इति । अत्रोच्यते । नात्र सर्वस्य यागस्य फलवत्ता । किं तर्हि य एव दर्शपूर्णमासशब्दवाच्यः स फलवान् । कश्चासौ । यो दर्शपूर्णमाससंयोगेनोत्पन्नो यथाग्नेयोष्टाकपालः पौर्णमास्याममावास्यायां वाच्युतो भवतीति आग्नेयस्य दर्शपौर्णमाससंयोगः । दर्शशब्देन च चन्द्रमसो दर्शनाद्विपरीत्यलक्षणयामावास्योक्ता । तथा तावब्रूतामग्नीषोमावाज्यस्यनाउपांशुपौर्णमास्यां यजन्निति उपांशुयाजस्य पौर्णमासीसंयोगः । ताभ्यामेतमग्नीषोमीयमेकादशकपालं पौर्णमास्यामप्रायच्छादित्यस्य च । तथा चैन्द्रं दध्यमावास्यायामैन्द्रं पयोमावास्यायामित्यमावास्यासंयोगः । एवमेते यागा लक्षणया दर्शपूर्णमासशब्देनाभिधीयन्ते । तेषामेव फलविधानम् । इतरे प्रयाजादयो निष्फलास्तेषामपि फलवदुपकारः परिकल्प्यते । तेन तादर्थ्यात्तदङ्गता । तस्मात्साधूक्तम् । यजतयश्चाफलयुक्तास्तदङ्गमिति । अङ्गाधिकारे पुनस्तदङ्गग्रहणमपूर्वसंसूचनार्थम् ॥ २५ ॥

यजतिजुहोत्योर्विवेकायाह—

यजति जुहोतीनां को विशेषः१ ॥ २६ ॥

इति ॥ २६ ॥

तिष्ठद्धोमा वषट्कारप्रदाना याज्यापुरोनु-
वाक्यावन्तो यजतयः२ ॥ २७ ॥

उच्यन्ते ॥ २७ ॥

उपविष्टहोमाः स्वाहाकारप्रदाना जुहोतयः३ ॥२८॥

उच्यन्ते । अनेन प्रकारेण तद्धर्मानुकथनं कृतमाचार्येण । यजतीनां तिष्ठद्धोमादयो धर्माः । जुहोतीनां चोपविष्टहोमादयः । लक्ष्यलक्षणसम्बन्धे त्वदृष्टपरिकल्पनम । तस्मात्तद्धर्मानुकथनायैतदुक्तम ॥ २८ ॥

अङ्गत्वे लक्षणमुक्तम । तेषां च ऋत्विक्कर्तृकत्वमुक्तं प्रदेशान्तरे शेषमितरे यथासंख्यमिति । ये इतरे ते किं ब्राह्मणा उत क्षत्रियवैश्यावपीति । क्षत्रियवैश्यावपीति ब्रूमः । समर्था ह्यधिक्रियन्ते । सामर्थ्यं च वैद्यत्वात्त्रयाणामपीत्येवं प्राप्त आह—

ब्राह्मणा ऋत्विजो भक्षप्रतिषेधादितरयोः ॥ २९ ॥

ब्राह्मणानामेवार्त्विज्ये ऽधिकारो न क्षत्रियवैश्ययोः । तयोर्हि शेषभक्षप्रतिषेधः । अग्निहोत्रोच्छिष्टं प्रकृत्योच्यते । तद्धै नाब्राह्मणः पिबेदग्नौ ह्यभिश्रयन्ति तस्मान्नाब्राह्मणः पिबेदिति । एवं च कृत्वा

---

१ यजतीनां यागानां, जुहोतीनां होमानां च परस्परं को विशेषः, को भेद ? इति प्रश्नः ।

२ तिष्ठता होमो येषु ते तिष्ठद्धोमाः, वषट्कारेण प्रदानं येषु ते वषट्कारप्रदानाः, तथा याज्यावन्तः पुरोऽनुवाक्यावन्तश्च ये ते यजतय उच्यन्ते इति देवः ।

३ उपविष्टेन कर्त्रा होमो येषु ते उपविष्टहोमाः, स्वाहाकारेण प्रदानं येषु ते स्वाहाकार प्रदानाः, ये उपविष्टहोमाः स्वाहाकारप्रदानाश्च ते जुहोतय उच्यन्ते ।

क्षत्रियवैश्ययोर्भागस्य होमविधानं कृतं न भक्षणमिति१ ॥ २९ ॥

दर्शनाच्च ॥ ३० ॥

दृश्यते चायमर्थो यथा ब्राह्मणानामेवार्त्विज्यमिति । द्वया वै देवादेवा आहेव देवा अथ ये ब्राह्मणाः शुश्रुवाꣳसो ऽनूचानास्ते मनुष्यदेवास्तेषां द्वेधा विभक्त एव यज्ञ आहुतय एव देवानां दक्षिणामनुष्यदेवानां ब्राह्मणानां शुश्रुषामनूचानानामाहुतिभिरेव देवान्प्रीणाति दक्षिणाभिर्मनुष्यदेवान्ब्राह्मणानिति । दक्षिणा शब्दश्च परिक्रयार्थे द्रव्ये वर्त्तते । तेन ब्राह्मणानामेवार्त्विज्यमिति । अपि च स्मरन्ति । ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहा इति ॥ ३० ॥

इदानीमिदं विचार्यते । कर्मणामारम्भे किं याथाकाम्यं कर्तुरुत नियोगतो ऽनुष्ठेयानीति । किं तावत्प्राप्तम् । सूत्रेणैव पक्षः—

फलयुक्तानामारम्भे याथाकामी फलार्थित्वात्२ ॥ ३१ ॥

फलार्थिनो हि कर्मचोद्यते । तस्माद्याथाकाम्यं प्राप्तम् ॥ ३१ ॥

न नियमनिमित्ताग्निहोत्रदर्शपूर्णमासदाक्षायणाग्रयणपशुषु प्रवृत्तेः ॥ ३२ ॥

नियमेषु न याथाकाम्यम् । यस्मान्नियोगतस्तत्र शास्त्रं प्र-

---

१ तथा च शाखान्तरम् ' न राजन्यो न वैश्यो वा सान्नाय्यं पिबेदसोमपीथी ह्येष ' इति ।

२ फल सम्बद्धानां काम्यानां कर्मणां द्वादशाहादीनामारम्भे कर्तुर्याथाकाम्यमिच्छया प्रवृत्तिः, कुत ? तस्य कर्तुः फलार्थित्वादित्यर्थः । काममनतिक्रम्य यथाकामम्, तस्य भावो याथाकामी, याथा काम्यमिति यावत्, ब्राह्मणादित्वादृगुणवचनब्राह्मणादिभ्य इति ष्यञि षित्वान्ङीषि यस्येति चेत्यकारलोपे हलस्तद्धितस्येति यकारलोपे औचित्यमौचिती इति वत् रूपद्वयम् ।

वर्त्तयति । सत्यवादीस्याद्धः शायी स्यादिति च । पक्षे नैतन्नियमशास्त्रं प्रवृत्तम् । प्रागेव यस्माद्याथा काम्यं प्राप्तम् । यदि तु नियोगतोनानुष्ठेयम् । सत्यवदनशासनमनर्थकमेव स्यात् । तस्मात्सत्यवदनादि नियोगतोनुष्ठेयं सत्यवदनशासनानर्थक्यं मा भूत् । तस्मान्नियमेषु न याथाकाम्यम् । निमित्तेऽपि यद्विधीयते तत्रापि न याथाकाम्यम् । निमित्तोद्देशेन विधानात् । गेहदाहे अग्नये क्षामवत इति । यदि गेहदाहे क्षामवत्यादिषु याथाकाम्यं स्यात् । गेहदाहग्रहणमनर्थकमेव स्यात् । प्रागपि गेहदाहग्रहणाद्याथाकाम्यं सिद्धमेव । तस्मान्नैमित्तिकेषु न याथाकाम्यम् । अग्निहोत्रे ऽपि न याथाकाम्यम् । यावज्जीवमग्निहोत्रं जुहुयादिति श्रूयते । ननु च अग्निहोत्रं जुहुयात्स्वर्गकाम इति च । तत्र प्रकरणात् काम्यस्यैवैष कर्मणो धर्मस्ततश्च याथाकाम्यमित्येवं प्राप्त उच्यते । प्रकरणादेष कर्मधर्मः स्यात् यावज्जीविकता । तत्रापि लक्षणया कर्माभ्यास उपदिश्यते । विहिता हि तस्य सायं प्रातः परिसमाप्तिः । तेन यावज्जीवं जुहुयादित्यनेनाभ्यासो लक्ष्यते । कर्तृधर्मे पुनर्जुहुयादिति स्वार्थ एव वर्त्तते । नाभ्यासं लक्षयति । जीवने च निमित्ते ज्ञातो होमो विधीयते । तस्मात्कर्तृधर्मो यावज्जीविकता । ततश्च न याथाकाम्यम् । यत्पुनरुक्तम् । अग्निहोत्रं जुहुयात्स्वर्गकाम इति । स पृथक्काम्यः प्रयोगः । अयमपरो जीवननिमित्त इति । तत्रैतद्भवति । काम्येपि प्रयोगे क्रियमाणे नैयमिकः कृत एव भवति । सोप्यग्निहोत्रप्रयोग एवेति । दर्शपूर्णमासादिष्वप्येवमेव द्रष्टव्यम् । तत्रापि हि काम्यचोदना यवाज्जीवचोदना च । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति च । दाक्षायणग्रहणं काम्यसम्बन्धा ऽऽशङ्कया । आग्रयणेष्ट्यामपि शाखान्तरादयाथाकाम्यं स्वशाखायामपि च । नवं प्रकृत्यामनन्ति अनयोर्वा अयं द्यावापृथिव्योरसोस्य रसस्य हुत्वा देवेभ्योथेममश्नामेति । अशनस्य च नित्यकर्त्तव्यता । न च देवताभ्यो हुत्वासौनित्यकर्त्तव्यता क्रियते । अतो नित्यतागम्यते । अपि च प्रायश्चित्तविधानमत्र भवति । अनिष्ट्वाग्रयणेन नवस्याश्नीयादिति । तस्मादाग्रयणेपि न याथाकाम्यम् । पशावप्येवम् । निरूढं प्रकृत्यामनन्ति । तं वै संवत्सरो नानीजानमतीयादिति ॥ ३२ ॥

## सोमे चैके ॥ ३३ ॥

सोमे च न याथाकाम्यम् । एवं हि श्रूयते । वसन्ते वसन्ते ज्योतिषा यजेतेति । साभ्यासवसन्तग्रहणं ज्योतिष्टोमस्य निमित्तम् । यथा जीवनमग्निहोत्रस्य । एके पुनरन्यथा वदन्ति । ज्योतिष्टोमेन स्वर्गकामोयजेतेति फलयुक्ता चोदना तस्मादिह यथाकाम्यम् । अत्रोच्यते । पृथक्प्रयोग एवायम् । एकः स्वर्गकामप्रयोगो ऽपरो नैयमिकः कर्तृधर्म इति । एवं च कृत्वा गवामयने श्रूयते । कथमेषां सोमोनन्तरितो भवतीति सवनैरिति ब्रूयादिति । यदवश्यं कर्त्तव्यं तस्य कारणान्तरेणानन्तराय उच्यते । तस्मादत्रापि न याथाकाम्यम् । तथा च स्मरणम् । क्लृप्तानां पशुसोमानां निष्कृत्यर्थमसम्भवे । इष्टिं वैश्वानरीं नित्यं निर्वपेदब्दपर्यये ॥ ३३ ॥

## चातुर्मास्येषु चर्तुमु१खश्रुतेः ॥ ३४ ॥

चातुर्मास्येषु च न याथाकाम्यम । कुत एतत् । ऋतुमुखश्रुतेः ऋतुमुखे ऋतुमुखे चातुर्मास्यैयजतेति श्रूयते ॥ ३४ ॥

किञ्च—

## नियतसहपाठात् ॥ ३४ ॥

अपि च नित्यैः सह चातुर्मास्यानां पाठो भवति । त एतान्यज्ञक्रतूस्तेनिरेऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुबन्धं सौम्यमध्वरमिति । सह पाठाच्च तुल्यता गम्यते ॥ ३५ ॥

## दर्शनाच्च ॥ ३६ ॥

दृश्यते चायमर्थो यथा नित्यानि चातुर्मास्यानि । गवामयनयाजिनं प्रकृत्योच्यते । कथमेतेषां चातुर्मास्यान्यनन्तरितानि भवन्तीति पयस्ययेति ब्रूयादिति । दीक्षितत्वात्तेषां प्रतिषेधे सति कारणान्तरेण चातुर्मास्यानामनुग्रहं दर्शयति पयस्ययेति ब्रूयादिति । यच्च ना-

---

१ ऋतोः मुखं प्रथमदिनं प्रतिपत् तत्रेत्यर्थः, अत एव चातुर्मास्यपर्वाणि प्रतिपद्येवानुष्ठीयन्ते । अत्रार्थे एषा ह सम्वत्सरस्य प्रथमारात्रीर्यत्फाल्गुनी पौर्णमासी योत्तरेति श्रुतिः शरणम् ।

आवश्यं कर्त्तव्यं तस्य कारणान्तरेणानुग्रहो भवति । अपरे सर्वकर्मविषयं दर्शनं मन्यन्ते कथमेषामग्निहोत्रमनन्तरितं भवति कथमेषां पौर्णमास ६ हविरनन्तरितं भवत्येवमादिसर्वत्र कारणान्तरेणानुग्रहो दृश्यते ॥ ३६ ॥

नो १त्सर्गयोगात् ॥ ३७ ॥

न च नित्यानि चातुर्मास्यानि । उत्सर्गेण हि तानि युज्यन्ते । इति तूत्सृजमानस्येति । यन्नाम नित्यं कथं तस्योत्सर्ग इति ॥ ३७ ॥

स्या२त् त्रि ६ शद्वत् ॥ ३८ ॥

भवेद्वा नित्यत्वेप्युत्सर्गो यथा दर्शपौर्णमासयोस्तस्मादुत्रि ६ शतमेव वर्षाणि यजेतेति । अपि च । तन्नित्यमुच्यते यदवश्यं कर्त्तव्यम् । द्विप्रकारं कर्म नित्यं काम्यं च । तत्र नित्यं प्रकृत्य चिन्त्यते । किं सगुणमेव कर्त्तव्यं उत निर्गुणमपीति ॥ ३८ ॥

गुणाम्नानात्सगुणमेवेत्येवं प्राप्त आह—

विगुणे फलनिर्वृत्तिरङ्गप्रधानभेदात् ॥ ३९ ॥

विगुणेपि नित्ये कर्मणि फलाभिनिर्वृत्तिर्भवति । कुत एतत् । यतोङ्गानि प्रधानानि च भिन्नानि । इह यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति दर्शपूर्णमासयोरेव कर्त्तव्यतोच्यते नाङ्गानाम् । अतश्च प्रधाने कृते यत्फलं तत्सिद्धं भवत्येव । अतश्च धात्वर्थमात्रमेव कर्त्तव्यम् । न तेनान्यस्य कर्त्तव्यता । यत्र च साधनत्वेन यागस्य श्रवणं तत्र साध्यापेक्षाभवतीतिकर्त्तव्यतापेक्षा च । न चात्र साधनत्वं तस्माद्विगुणादपि फलं भवति । अङ्गाम्नानं तर्हि किमर्थम् । काम्यप्रयोगविषयमित्यदोषः ॥ ३९ ॥

प्रायश्चित्तविधानाच्च ॥ ४० ॥

विगुणेपि नित्ये प्रायश्चित्तं विधीयते । भिन्ने जुहोति स्कन्ने जुहोतीत्येवमादि । यदि हि विगुणं फलं न साधयेत् । प्रायश्चित्तविधानवैयर्थ्यप्रसङ्गः स्यात् ॥ ४० ॥

---

१ एवं सिद्धान्तिते ऽन्तरापूर्वपक्षोयमिति देवः ।

२ उक्तमेव सिद्धान्तं दृढ़यति ।

## तथा च दृष्टम् ॥ ४१ ॥

विगुणमपि नित्यं कर्म यथाकथञ्चित्परिसमाप्यमानम् १। यत्पयो न स्यात् केन जुहुया इति व्रीहियवाभ्यामिति यद्व्रीहियवौ न स्यातां केन जुहुया इति या अन्या ओषधय इत्येवमाद्यभिधाय पुनरुपसंहरति न वा इह तर्हि किं चनासीदथैतदहूयतैव सत्यं श्रद्धायामिति यथाकथञ्चित्परिसमाप्तिं दर्शयति। न चैते विधयो ? विधिविभक्तेरभावात् तस्माद्विगुणमपि नित्यं फलं साधयत्येव। अपरेन्यथा व्याचक्षते। गुणाम्नानसामर्थ्यान्नित्यं सगुणमेव कर्त्तव्यं। सूत्रव्याख्या च। विगुणेपि नित्ये फलाभिनिर्वृत्तिर्भवत्येव। यदि नाम दैवान्मानुषाद्वा प्रतिबलात्सर्वाङ्गोपसंहारो न शक्यते कर्तुं कतिपयाङ्गोपसंहारेणापि कर्त्तव्यमेव। यथा शक्नुयादित्युपपदार्थोऽत्र परिकल्पते। सर्वदा कर्त्तव्यं सगुणं चेत्यशक्यमेव। अवश्यम्भावि हि दैवान्मानुषाद्वा प्रतिबलाद्वैगुण्यमिति। एवं च कृत्वा विकृतौ नित्ये कर्मणि प्राकृताङ्गानुवृत्तिर्दृश्यते। यथा वरुणप्रघासेषु। अथाहाग्निमग्नीत्सम्मृड्ढीत्यसम्मृष्टमेव भवति सम्प्रेषितमथ प्रतिप्रस्थाताप्रतिपरैति स सपत्नीमुदानेष्यन्निति पत्न्यानयनविधिपरे वाक्ये अग्निसम्मार्गप्रैषं दर्शयति। तथा महापितृयज्ञे स यज्ञोपवीती भूत्वाज्यानि गृह्णातीत्येवं विधिपरे वाक्ये लेखाकरणहरणोत्तरपरिग्रहादीन्पदार्थाननुवदति। यदि हि नित्यस्याङ्गसम्बन्धो न स्यात् लेखाकरणाद्यनुवादो न स्यात्, भवति च, तस्मान्नित्यानामप्यङ्गसम्बन्धः। पशौ च दर्शयति। स उत्तरमाघारमाघार्यासंस्पर्शयन् स्रुचौ पर्येत्य जुह्वा पशुं समनक्तीति पशुसमञ्जनविधिपरे वाक्ये उत्तराघारं दर्शयति। यच्चोच्यते। न यागेनान्यत् साध्यत इति। आम्नानसामर्थ्यादुपात्तदुरितक्षयो वा उत्पित्सुदुरितप्रतिबन्धो वा भवत्येव। तस्मान्नित्येप्यङ्गसम्बन्धः ॥ ४१ ॥

अथ काम्ये कर्मणि कथम् ?। काम्ये विगुणेऽपि फलाभिनिर्वृत्तिर्भवत्येव। तत्रापि चाङ्गानि प्रधानानि भिन्नानि च।

---

१ नित्यं कर्म यथा कथञ्चित् श्रुताङ्गपरित्यागेनापि यथा शक्त्यङ्गोपेतमनुष्ठातव्यत्वेन श्रुतौ दृष्टम्। तथा हि यदि पयो न स्यात् इत्यादि।

प्रायश्चित्तविधानं भवत्यश्वमेधे अश्वं प्रकृत्य अथ यदि स्रामो विन्देदथ यद्यक्ष्यामयो विन्देदित्येवमादि १। यदि विगुणं काम्यं फलं न साधयेत्प्रायश्चित्तविधानमनर्थकं स्यात् । तथा च दृष्टम् । दृश्यते च विगुणेपि काम्ये फलम् । वृष्टिकामेष्टिः कारीरी द्व्यहकालतया समाम्नाता शाखान्तरे । तां प्रकृत्य श्रूयते । यदि वर्षेत्तावत्येव जुहुयादिति । यद्यपरिसमाप्तायामेवेष्ट्यां वृष्टिर्भवति तस्मिन्नेव काले परिसमापयेत् । न द्व्यहकालतामाद्रियेत । यदि हि विगुणमपि काम्यं फलं न साधयेत् । कथं वृष्टिर्दृश्यते । तस्माद्विगुणेपि काम्येऽस्ति फलमित्येवं प्राप्त आह—

न श्रुतिलक्षणत्वात् ॥ ४२ ॥

नैतदेवं विगुणेपि काम्ये फलमिति । सगुणं हि श्रुत्या लक्षितम् । सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इति ब्रह्मवर्चसं साध्यं यागश्च साधनम् । सेतिकर्त्तव्यताकं च साधनं साध्ये व्याप्रियते । तेनेतिकर्त्तव्यतासम्बन्धस्तस्मात्सगुणमेव काम्यं फलं साधयतीति नित्ये पुनः सर्वदा कर्त्तव्यत्वादवश्यम्भाविनि वैगुण्ये उपपदार्थः परिकल्प्यते । यथा शक्नुयादिति । काम्येषु पुनरवश्यं कर्त्तव्यत्वाभावान्नैतत्परिकल्प्यते ॥ ४२ ॥

प्रायश्चित्तविधानं तर्हि किमर्थम्—

प्रायश्चित्तं तत्कालम् २ ॥ ४३ ॥

काम्यमपि कर्म प्रक्रान्तं परिसमापनीयमेव । फलाभावेपि प्रायश्चित्तानुष्ठानमर्थवत् । तत्रापि अन्यत्फलं दोषपरिहारः । तेनार्थवत्प्रायश्चित्तम् ॥ ४३ ॥

दृष्टे तत्परिमाणम् ३ ॥ ४४ ॥

---

१ तथा पञ्चशारदीये उत्सृष्टान् पशून् प्रकृत्य ताण्ड्ये प्रायश्चित्तं विधानं श्रूयते–' अपोनप्त्रियो ऽप्सु मृत ' इत्यादिकमिति देवः ।

२ तस्य काम्यस्य कर्मणो विनाशकाले यत् प्रायश्चित्तं तत्तस्य नष्टस्य कर्मणः प्रत्यवायपरिहारजननेन सार्थकमिति भावः ।

३ कृतार्धायामिष्टौ वर्षणेदृष्टे सति तत्परिमाणमेव कर्म कर्तव्यं यत्परिमाणमदृष्टे वर्षणे क्रियते इत्यर्थः । न तु वृष्टौ जातायां किमप्यूनं कृतार्धं वा त्याज्यमिति यावत् ।

अथ यद्वृष्टिदर्शनमुक्तं न तदिष्टिफलम् । ऋतुस्वभावजनिताया वृष्टेस्तद्दर्शनम् । तत्र तावत्प्रमाणता कर्मण उच्यते ॥ ४४ ॥

वाक्यप्रकरणाभ्यां शेषविनियोगउक्तः, इदानीं मन्त्राणां लिङ्गेन विनियोग उच्यते । तेचाध्येतृप्रसिद्धा एव मन्त्रास्ताननुवदति—

## ऋचो यजूꣳषि सामानि निगदा मन्त्राः ॥ ४५ ॥

नियताक्षरपादावसाना ऋगित्युच्यते । अनियताक्षरपादावसानं यजुः । प्रगीतं मन्त्रवाक्यं सामेत्युच्यते । तत्र विशेषणं गीतिः विशेष्याण्यक्षराणि । न चागृहीतविशेषणा विशेष्ये बुद्धिरुत्पद्यते । अतः पूर्वप्रतीतत्वाद्गीतिरेव सामशब्देनाभिलक्ष्यते । ननु चैवं रथन्तरादयः शब्दा गीतौ वर्त्तन्ते । तत्र रथन्तरेण स्तुवीत बृहता स्तुवीतेति च गुणगुण्यभिधानं स्तुतिः । सा साम्नो नोपपद्यते । तत्रोच्यते । स्वयमेव गीतेः स्तुत्यनभिधायकत्वात् ऋगक्षराभिव्यक्तिद्वारेण स्तुत्यभिनिर्वृत्त्यर्थतेति । एवं च कृत्वा ऋच्यध्यूढं सामगीयते प्रजापतिहृदयमनृचं गीयते इत्येवमादीन्युपपन्नार्थानि भवन्ति । एवं च ऋचो मन्त्रत्वे उक्ते साम्नो वक्तव्यम् । निगदाः प्रैषा इत्यनर्थान्तरम् । एतच्चतुष्टयं १ मन्त्रशब्देनाभिधीयते ॥ ४५ ॥

## तेषां वाक्यं निराकाङ्क्षम् ॥ ४६ ॥

तेषामिति सर्वनामशब्देन यजुषां परामर्शः । ऋचः सामानि च वाक्यव्यवस्थारूपाण्येव प्रायशः पठ्यन्तेति न यजुःषु कियन्मात्रं वाक्यमित्यपरिज्ञान आह । तेषां वाक्यं निराकाङ्क्षम् । यावति पदसमूहे उच्चरिते पदान्तराकाङ्क्षा न भवति तावदेकं वाक्यं नैरुत्सुक्यात् । य-

---

१ ननु निगदानां यजुष्ट्वमेव, तत्कथं चातुर्विध्यं मन्त्राणामिति चेत्, न उपांशुयजुषा उच्चैर्निगदेति भेदबोधनाय प्रथगुपादानात् । वस्तुतस्तु तेषां यजुष्ट्वमेव, ऋगादावप्युच्चैस्त्वादिधर्माणां व्यत्यासदर्शनात्, एवञ्चत्रिविधा एव मन्त्राः, अतएव मन्त्राधिकरणे “ अहे बुध्निय मन्त्रं मे गोपाय यमृषयस्त्रयी विदा विदुः ऋचः सामानि यजूꣳषि ” इत्येव मुक्तम्, सूत्रकारोक्तिस्तु वाह्य धर्मद्वयविषयेति भावः ।

था देवस्यत्वेत्येवमादि अग्नये जुष्टं गृह्णामीत्येवमन्तम् ॥ ४६ ॥

यत्र पुनः श्रूयमाणैः पदैर्नैरुत्सुक्यम् । यथा कर्मणे वां वेषायवामिति । तत्राध्याहृत्यापि क्रियापदं नैरुत्सुक्यं कर्त्तव्यमित्यत आह—

मिथः सम्बद्धम् १ ॥ ४७ ॥

यत्तैः पदैः सह सम्बध्यते तदध्याहर्त्तव्यम । न हि क्रियापदशून्यं पदजातमर्थाभिधायकं भवति । अथवानुषङ्गार्थमिदमुच्यते । यथा दर्शपौर्णमासयोः । अस्मादन्नादस्यै प्रतिष्ठाया इति । अधस्तनमन्त्रवाक्यात्ततो निर्भक्त इत्यत्रानुषज्यते ॥ ४७ ॥

तेषामारम्भे ऽर्थतो व्यवस्था तद्वचनत्वात् ॥४८॥

तेषां मन्त्राणां प्रकरणसमधीतानामारम्भे अर्थतो व्यवस्था भवति । यो यत्पदार्थाभिधानसमर्थो मन्त्रः स तत्र विनियुज्यते । कुत एतत् । तद्वचनत्वात् । तमेवार्थं वक्तुं शक्नोति नार्थान्तरम । यथा उरुप्रथाउरुप्रथस्वेति प्रथनम । ननु च प्रतिपदार्थं मन्त्रविनियोग उक्तः । सत्यमेतत् । अनुक्तसङ्ग्रहार्थत्वाददोषः । यथा प्रवत्स्यत् सर्वान्नयेति प्रतिमन्त्रम ॥ ४८ ॥

मन्त्रान्तैः कर्मादिः सान्निपात्योभिधानात् २ ॥४९॥

कर्मणि प्रयुज्यमानानां मन्त्राणां मन्त्रान्तस्य कर्मादेश्च सन्निपातः संलग्नता कर्त्तव्या । कुत एतत् । अभिधानात् । अभिहितो मन्त्रः कर्माभिधातुं शक्नोति । ततश्च तदनुष्ठीयते ॥ ४९ ॥

अनियमं वात्स्यः ॥ ५० ॥

वात्स्य आचार्यो ऽनियमं मेने । आदौ वा मन्त्रमुक्त्वा कर्मा-

---

१ यावदेव मिथः सम्बद्धं परस्परान्वयि तावदेकं यजुः; अतोन्यत् यजुरन्तरमित्यर्थः ।

२ सकलस्य मन्त्रस्य कर्मणि विनियोगात सकलेन सम्पादितं स्मरणं कर्माङ्गं, तच्च स्मरणं यथा नष्टं न भवेत् तथा कर्तव्यं अतो मन्त्रान्तस्य तदादेश्च सम्बन्धं कृत्वा कर्मानुष्ठेयमिति तात्पर्यम ।

नुष्ठानं क्रियते। कृते वा कर्मणि मन्त्रवचनमिति । एवमपि हि कर्माभिधायकत्वं मन्त्रस्य भवति ॥ ५० ॥

१ आदिं त्वाचार्याः ॥ ५१ ॥

तु शब्दः पक्षव्यावृत्तौ। नानियमः । मन्त्रान्ते एव कर्मादिमाचार्या इच्छन्ति । यत्कारणं मन्त्रेण स्मृतं कर्म कर्त्तव्यम् २। मन्त्राम्नानसामर्थ्यादेवावगम्यते। एवं दृ३ष्टार्थता भवति। इतरथा अदृष्टं परिकल्प्यते। तच्च नेष्यते दृष्टे सति॥ ५१ ॥

त आद्युक्ताः ॥ ५२ ॥

त एते मन्त्रा आदिमात्रे उक्ते सति समस्ताः प्रयोक्तव्याः ४ ॥ ५२ ॥

परादिना पूर्वान्तः ॥ ५३ ॥

परस्य मन्त्रस्यादिना पूर्वस्यान्तः प्रतिपत्तव्यः । ननु च वाक्यलक्षणेनैव तत्सिद्धं किमर्थं पुनरुच्यते? । वाक्यसमुच्चयविधानार्थतयेत्यदोषः । यथा विश्वेषां देवानां भागधेयीस्थेत्यत्रामूर्या उपसूर्य इत्येवमादि५प्रयुज्यते ॥ ५३ ॥

उपा?शु प्रयोगः श्रुतेः ६ ॥ ५४ ॥

---

१ सिद्धान्तमाह ' आदिं ' इति ।

२ तदुक्तम्, अनुष्ठाने पदार्थानामवश्यम्भाविनी स्मृतिः, अनन्यसाधनानन्यकार्यैर्मन्त्रैः प्रसाध्यत इति ।

३ मन्त्रैरेव स्मृतं कर्म कृत्वाभ्युदयकारि भवतीत्येवं रूपा दृष्टार्थता ऽत्र ।

४ न तु सूत्रे यावदवयवोपादानं तावदेव पठनीयं, शास्त्र बाधात्।

५ आदि पदेन ' अष्टगृहीतं जुहोति सन्तत मनुगृह्णन् युञ्जान इती ' त्यस्य गृहणम् । अतएव तत्राष्टानामेक मन्त्रत्वम्, एव मेव देवस्य त्वे त्यभ्रिमादाय ' इत्यत्र त्रयाणां; ग्रहणं भवति ।

६ ' उच्चैः ऋचा क्रियते उच्चैः साम्नोपांशु यजुषा ' इति शाखान्तरे श्रवणात् । ' स उपांशु यजुर्भिश्चरन्तीति शतपथ श्रुतौ ।

शाखान्तरे उच्चैर्ऋचा क्रियते । उच्चैः साम्नोपांशु यजुषेति । यजुषामेवोपांशुत्वम् । वेदोपक्रमाणि चैतानि वचनानि वेदोपसंहाराणि च । तेन ऋगादीनां वेदोपलक्षणार्थता । ऋग्वेदविहितसामवेदविहितं चोच्चैर्वक्तव्यं । उपांशु याजुर्वैदिकमिति १ ॥ ५४ ॥

## न सम्प्रैषाः ॥ ५५ ॥

याजुर्वैदिकत्वेपि सति सम्प्रैषा नोपांशु भवन्ति । सम्बोधनार्थत्वात्तेषाम् २ ॥ ५५ ॥

इदं विचार्यते । बर्हिः शब्दः किं संस्कारनिमित्त उत जातिनिमित्त इति । संस्कारनिमित्त इति ब्रूमः । संस्कृतेषु तृणेषु प्रयोक्तारो बर्हिः शब्दं प्रयुञ्जते । नन्वसंस्कृतेष्वपि प्रयोगो दृश्यते । बर्हिरादाय गावो गता इति प्रदेशान्तरे वक्तारो वदन्ति । तत्सादृश्यात्सम्प्रयोग इत्येवं प्राप्त आह—

## कौ३शं बर्हिः ॥ ५६ ॥

कुशा एव बर्हिः शब्देनोच्यन्ते । न संस्कारात् । कुत एतत् । असंस्कृतेष्वपि प्रयोगदर्शनात् । उपक्षीणानि तृणानि बर्हिर्गावश्चरन्ति । सादृश्यात्प्रयोग इति चेत् । नेतरेतराश्रयदोषप्रसङ्गात् । बर्हिः शब्देनोद्दिश्य संस्कारविधानम् । संस्कारनिमित्तश्च बर्हिः शब्द इति । यदि संस्कारनिमित्तो बर्हिशब्दस्तदा सादृश्याज्जातौ प्रयोगः । यदि जातिनिमित्तस्तदा बर्हिःशब्देनोद्दिश्य संस्कारविधानं, जातिनिमित्तत्वे पुनरेष दोषो न भवति । तस्माज्जातिनिमित्तो बर्हिः शब्द इति । चिन्तायाः प्रयोजनम् । बर्हिषा यूपावटमवस्तृणातीत्यत्र संस्कारा न कर्त्तव्याः ॥ ५६ ॥

---

१ अस्य-सूत्रस्योष्टि पशुसोमव्यतिरिक्तं कर्माग्निहोत्रादिकं विषयः, एतेषु तत्र तत्र विशेषस्य वक्ष्यमाणत्वात् ।

२ स च नोपांशूच्चारितैरेभिः सम्भवतीति भावः ।

३ कुशा दर्भाः तस्येदं कौशम्, शैषिकाधिकारस्थेन तस्येदम्, इत्यणा साधुत्वम् ।

अर्थात्परिमाणम् १ ॥ ५७ ॥

यत्र परिमाणविशेषो न श्रूयते तत्र सामर्थ्यात्परिमाणं भवति । यथा वसोर्द्धारायां अर्थात्परिमाणबाधः । अर्थबाधो माभूदिति । न ह्यङ्गुष्ठपर्ववृत्तपुष्करस्रुवेण वसोर्द्धारा होमः सम्भवति ॥ ५७ ॥

अयुग्धातूनि २ यूनानि ॥ ५८ ॥

यूनानां बन्धानार्थानामयुग्मा धातवो भवन्ति । धातवस्तृणमुष्टिप्रक्षेपाः ॥ ५८ ॥

प्रागग्रे यून उदगग्रं बर्हिराचिनोति ३ ॥ ५९ ॥

उदगग्रं प्रागग्रमिध्मम् ॥ ६० ॥

आचिनोतीति वर्त्तते ४ ॥ ५९ ॥

प्रत्यग्ग्रन्थीनवगूहति ५ ॥ ६१ ॥

प्रत्यक् शब्दः पश्चाद्भागवचनः न दिग्वाचको बर्हिष्यसम्भवात् ॥ ६१ ॥

---

२ यावता परिमाणेन प्रयोजनं भवति तावत्परिमाणं ( स्रुगादि ) भवतीत्यर्थः ।

१ अयुजो विषमा एकत्रिपञ्चसप्तनवादिसंख्या धातवस्तृणमुष्टिप्रक्षेपाः येषां तानीत्यर्थः । तदुक्तमापस्तम्बेन ‘ त्रिधातु पञ्चधातु वा शुल्वं करोति ’ इति । तित्तिरिसूत्रे ऽपि ‘ त्रिरन्वाहितं शुल्वं कृत्वा ’ इत्युक्तम् ।

३ प्रागग्रे यूने प्रागग्रे सन्नहने बन्धनार्थायां रज्जौ उदगग्रं बर्हिराचिनोति बन्धनार्थं स्थापयतीत्यर्थः ।

४ उदगग्रे यूने सन्नहने प्रागग्रमिध्मं आचिनोति बन्धनार्थं स्थापयतीत्यर्थः ।

५ इध्मबर्हिबन्धनार्थानां यूनानां ग्रन्थीन् प्रत्यगवगूहति यूनेन गाढं बध्वा यूनस्याग्रमूले सङ्कलय्य प्रदक्षिणमावेष्ट्य इध्मबर्हिषोरग्रभागं प्रोतायित्वा तयार्मूलभागं अवगूहति प्रेरयतीत्यर्थः ।

## अ१ष्टादशेध्मं परिधिवृक्षाणाम् ॥ ६२ ॥

अष्टादशकाष्ठमिध्मं कुर्यात् । परिधिवृक्षसम्बन्धिनः । परिधिवृक्षाः पलाशादयः ॥ ६२ ॥

## एकविंशतिं वा ॥ ६३ ॥

एकविंशतिकाष्ठं वेध्मं कुर्यात् । शाखान्तरात्२ । वा शब्दो विकल्पार्थः ॥ ६३ ॥

## ततः परिधीनेके ३ ॥ ६४ ॥

तद्धैक इध्मस्यैवैतान्परिधीन्परिदधतीति वचनात् ॥ ६४ ॥

## अपरिमितं ४ प्रणयनीयं त्रियूनम् ॥ ६५ ॥

अपरिमितं प्रणयनीयमिध्मं बहुतरं कुर्यात् । शाखान्तरात् त्रियूनं च कुर्यात् । अत्र केचिदृग्वृद्धौ काष्ठविवृद्धिमिच्छन्ति । तदयुक्तम् । न हीध्मकाष्ठप्रक्षेपस्य सामिधेनीनां च शेषशेषिभावः । काष्ठानि ह्यग्नीन्धनार्थानि । सामिधेन्यश्चेध्यमानाग्न्यनुवादिन्यः । इध्यमानानुवादनाच्चादृष्टम् । न ह्यासां काष्ठप्रक्षेपं प्रति करणत्वेन

---

१ अत्राष्टादशसंख्या उपलक्षणं तेन सामिधेनीविवृद्धौ काष्ठवृद्धिर्भवति, ह्रासस्तु न प्रकृतिवदित्युक्तेः । अतएवापस्तम्बः 'सामिधेनी विवृद्धौ काष्ठानिविवर्धन्ते प्रकृतितो ह्रसमानासु प्रकृतिवत् ' इति ।

२ तथा चापस्तम्बः " खादिरं पालाशं वैकविंशति दारुमिध्मं करोति " इति ।

३ एके आचार्याः तत एकविंशतिसंख्याकाष्ठकादिध्मात्त्रीणि काष्ठान्यरत्निमात्राण्येवोपादाय परिधीन् परिदधति, ' तद्धैक इध्मस्यैवैतान् परिधीन् परिदधाति ' इति श्रुतेः ।

४ अपरिमितत्वं च आगुक्तेध्मकाष्ठसंख्यापेक्षयातिशयेनाधिकसंख्यकाष्ठकत्वम् । अतश्चतुर्विंशतिसामिधेनीको य इष्टकापशुस्तत्रसप्तविंशतिकाष्ठानि भवन्ति, भवन्ति च प्रणयनीयेऽष्टाविंशति संख्यानि ।

विधानम् । तस्माद्दग्वृद्ध्या न काष्ठविवृद्धिरिति । अभ्युपगम्यापि ब्रूमः । यद्यपि शेषशेषिभावः स्यात् । तथापि शेषवृद्धौ शेषिणो वृद्धिरन्याय्यैव ॥ ६५ ॥

निरुप्याज्यं वेदो[१]सीति यजमानो वेदं करोति ॥ ६६ ॥

सूत्रे क्त्वाप्रत्ययादेशो ल्यप् कालार्थः । न ह्याज्यनिर्वापस्यात्र विधानम् । विहितो ह्यसावन्यत्र । वेदबन्धस्य कालज्ञापनायानूद्यते । यथा निरुप्याज्यं प्रातर्दोहनमन्यस्मिन्निति ॥ ६६ ॥

कुशमुष्टिं सव्यावृत्तं वत्सजानुं त्रिवृतं मूतकार्यं वा ॥ ६७ ॥

सव्यावृत्तं सप्रदक्षिणावृत्तं वत्सजानुसदृशं वेदं करोति । अथवा त्रिवृतं वेण्याकारं मूतकार्यं वा । वा शब्दो विकल्पार्थः ॥ ६७ ॥

पशुब्रह्मवर्च्चसान्नाद्यकामा यथासंख्यम् ॥ ६८ ॥

यथासंख्येन वेदाकारान् कुर्युः २ ॥ ६८ ॥

आ[३]मुष्मादिति कर्मसु तच्च ॥ ६९ ॥

---

१ अस्य मन्त्रस्य बहुयजमानके ऊहो भवति, तेन 'आवाभ्यां वेदो भूयाः अस्मभ्यं वेदा भूयाः, इति भवति प्रयोगः; पित्र्यायां 'देवपितृभ्य' इति च ।

२ देवयाज्ञिकैरेतत्सूत्रद्वयमेकसूत्रत्वेन व्याख्यातं, तथा च सूत्रस्वरूपमेवं सम्पद्यते—कुशमुष्टिं सव्यावृत्तं वत्सजानुं त्रिवृतं मूतकार्यं वा पशुब्रह्मवर्चसान्नाद्यकामा यथासंख्यम' पशुब्रह्मवर्चसान्नाद्यकामा यजमाना यथासंख्यं यथोपदेशक्रमेण एवमाकारं वेदं कुर्युः । तत्र पशुकामः कुशमुष्टिं सव्यावृत्तं प्रदक्षिणावृत्तं वत्सजानुं वेदं करोति । ब्रह्मवर्चसकामः कुशमुष्टिं त्रिवृतं करोति । अन्नाद्यकामो मूतकार्यमिति यथा संख्यशब्दार्थः ।

३ आ अमुष्मादिति च्छेदः, यदाङा संयुक्तं तदपि कर्तव्यमध्ये ज्ञेयम्, न त्ववधित्वेनेत्यर्थः ।

यत्राङ्प्रयोगः कर्मविषयः । यथा आप्रयाजेभ्य आ इडाया इति च तत्र तच्च कर्मप्रतिपत्तव्यम् । यदाङाभिसम्बध्यते । अभिविधौ कर्मविषय आङः प्रयोग इत्यर्थः ॥ ६९ ॥

अन्तवचने च ॥ ७० ॥

तच्च कर्मप्रतिपत्तव्यम् । यथा शंय्वन्तं भवतीति ॥ ७० ॥

प्रतिकर्मोद्धरणमप्रसङ्गे ॥ ७१ ॥

कर्मकर्मप्रत्युद्धरणमाहवनीयस्य कर्त्तव्यम् । न चेदन्यार्थमुद्धृतः सन्ननपवृत्तः ॥ ७१ ॥

अपवृत्तकर्मा लौकिकोर्थसंयोगात् ॥ ७२ ॥

अपवृत्तं यस्मिन्कर्म स लौकिकः प्रतिपत्तव्यः । कुत एतत् । अर्थसंयोगात् । यदर्थमुद्धृतस्तेनार्थेन संयोगात् । लौकिकवत् द्रष्टव्यः । आहवनीयसंस्काररूपं कर्माभिनिर्वृत्त्युत्तरकालं गार्हपत्ये समवैति । कर्माभिनिर्वृत्तिमात्रार्थैव तस्य पृथक्क्रियेति ॥ ७२ ॥

अप्रकरणोत्पत्तिरनारभ्यवाद आश्रयित्वा-
त्सर्वगुणः ॥ ७३ ॥

यो न कस्यचित्प्रकरणे उत्पन्नः न चारभ्य किञ्चिच्छ्रूयते वाक्यप्रकरणाभ्यामङ्गभावं नोपयातीत्यर्थः । स सर्वगुणो भवति । प्रकृत्यर्थो विकृत्यर्थश्च । यथा यस्य खादिरः स्रुवो भवतीति । अनारभ्यविहिता स्रुवे खादिरता प्रकृत्यर्था विकृत्यर्था च कुत एतत् । आश्रयित्वात् । स्रुवाश्रया हि खादिरता । स्रुवश्च प्रकृतौ विकृतौ च विद्यते ॥ ७३ ॥

तस्मादुभयार्थतेत्येवं प्राप्त आह—

प्रकरणे चाविशेषात् ॥ ७४ ॥

च शब्दो वा शब्दार्थे । वाशब्दश्चावधारणे । प्रकरणे एव निवेशः । प्रकरणशब्देन प्रक्रियते यस्मिन् धर्मा इति प्रकृतिरुच्यते । तत्रानारभ्यविधेर्निवेशो न विकृताविति । कुत एतत् । अविशेषात् । अविशेषेण हि प्रकृतितो विकृतौ चोदको धर्मान्प्रापयति । तत्रानार-

भ्यविधेरपि प्रापितत्वात् । यद्यनारभ्यविधिः पुनः प्रापयेद्विरुक्तता दोषः स्यात् । न हि प्राप्तस्य सतः प्राप्तिसम्भवः । स्यादेतदेवम् । अनारभ्यविधिनैव पूर्वं प्रापिते खादिरत्वे पश्चाच्चोदकस्तद्वर्जमङ्गानि प्रापयिष्यत्येवं द्विरुक्तता दोषो न भवतीति । नैतदेवम् । वैकृतं हि प्रधानं चोदनासारूप्यात्प्रकृतिमपेक्षते नारभ्यविधिम् । चोदनासारूप्याभावात् ॥ ७४ ॥

दर्शनाच्च ॥ ७५ ॥

एवं च कृत्वा विकृतौ प्रयाजादीनां दर्शनमुपपद्यते । तस्यै प्रयाजेषु तायमानेषु ब्राह्मणो वीणागाथी दक्षिणत उत्तरमन्द्रां उदाघ्नं स्तिस्रः स्वयम्भृता गाथा गायतीति गाथागानविधिपरं वाक्यं प्रयाजान्दर्शयति । ते च प्रकृतिसव्यपेक्षत्वे भवन्ति । विकृतौ नानारभ्यविधिसव्यपेक्षायाम् । तस्मादनारभ्यवादस्य प्रकृतिगामित्वम् । रूपोदाहरणं खादिरत्वम् । अन्येप्येवमादयः । कार्यं तु विचारस्य ताण्डके काम्याः प्रतिपत्कल्पा अनारभ्याधीतास्ते यदि प्रकृतिविकृत्यर्थास्ततो विकृतावपि प्रयोगः । अनारभ्यवादानां तु प्रकृत्यर्थत्वे विकृतावप्रयोगो । न हि विकृतिरनारभ्यवादमपेक्षते, प्रकृतिसव्यपेक्षत्वात् ॥ ७५ ॥

वैकङ्कतानि पात्राणि१ ॥ ७६ ॥

भवन्तीति सूत्रशेषः ॥ ७६ ॥

खादिरः स्रुवः ॥ ७७ ॥

स्यात् ॥ ७७ ॥

स्फ्यश्च२ ॥ ७८ ॥

चशब्दात्खादिर एव ॥ ७८ ॥

पालाशी३ जुहूर्भवति ॥ ७९ ॥

---

१ "ततो विकङ्कतः समभवत्तस्मादेष यज्ञियो यज्ञपात्रीयो वृक्ष" इति श्रुतेः ।

२ "खादिरः स्फ्य" इति श्रवणात् ।

३ हूयते अनया इति जुहूः, सा पालाशी कर्त्तव्या । "यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति" इति श्रुतेः ।

आश्वत्थ्युपभृद्भवत्येव ॥ ७९ ॥

वारणान्यहोमसंयुक्तानि१ ॥ ८० ॥

यान्यहोमसंयुक्तानि तानि वारणानि भवन्ति । वैकङ्कतानि पारिशेष्याद्धोमसंयुक्तानि ॥ ८० ॥

बाहुमात्र्यः स्रुचः पाणिमात्रपुष्करास्त्वग्बिलाहं

---

१ होमेन संयुक्तानि यानि न भवन्ति पात्राणि तानि वारणानि भवन्ति, यथा उलूखलमुसलकूर्चेडापात्रीपिष्टपात्रीपुरोडाशपात्रीशम्याश्रृतावदानाभ्र्युपवेषान्तर्धानकटप्राशित्रहरणषडवत्तब्रह्मयजमानासनहोतृषदनानि । तत्रोलूखलमुसले स्वायत्तप्रमाणे, कूर्चो बाहुमात्रः पीठाकारः, इडापात्री अरत्निमात्री मध्यसङ्गृहीता, पिष्टपात्री अति विपुला, पुरोडाश पात्री प्रादेश मात्री समचतुरस्राषडङ्गुलपरिमण्डलखातवती, शम्या प्रादेशमात्री, प्रादेशमात्रं तीक्ष्णाङ्गुष्ठपर्वमुखं श्रृतावदानम्, अभ्रिररत्निमात्रस्तीक्ष्णमुखः, उपवेषोऽरत्निमात्रः प्रादेशमात्रो वा हस्ताकृतिः, अन्तर्धानकटस्त्वर्धचन्द्राकारो द्वादशाङ्गुलः, षडवत्तं च उभयत्र खातवत्, आसनानि चारत्निमात्राणि वा प्रादेश मात्राणि वा प्रादेशपृथूनि, एतानि वारणानि । प्रसङ्गाद्वैकङ्कतानि प्रतिपादनीयानि, यथा प्रकृतौ वैकङ्कती ध्रुवा, अग्निहोत्रहवणी, अग्निहोत्र होमार्थः स्रुक्, सोमे ग्रहचमसद्रोणकलशादीनि, तत्रापि हविर्धानाधिषवणफलकपरिप्लवासम्भरणयादीनि वारणान्येव, षोडशिपात्रं खादिरम्, अश्वदाभ्यग्रहणपात्रमौदुम्बरम्, वाजपेये सप्तदश-सोमग्रहाः सुराग्रहाश्च भवन्ति, तेषां पात्राणि वारणान्येव, सुराग्रहपात्राणि तु मृण्मयान्यपि शाखान्तरे तथैवोक्तेः । एवमन्यदप्यूह्यम् । “ खादिरः स्रुवः पर्णमयी जुहूराश्वत्थ्युपपभृद्वैकङ्कती ध्रुवैतेषां वृक्षाणामेकस्य स्रुवः कारयेद्बाहुमात्र्योऽरत्निमात्र्यो वा ग्राग्रास्त्वक्तो-बिला हंसमुख्यः स्फ्यशम्याप्राशित्रहरणमिति खादिराणि वारणान्यहोमार्थानि भवन्ति ” इत्यापस्तम्बोक्तेरिति दिक् ।

समुखप्रसेका मूलदण्डा१ भवन्ति ॥ ८१ ॥

बाहुप्रमाणाः स्रुचः कर्त्तव्याः । प्रसृताङ्गुलिः पाणिरामणिबन्धनाद्धस्त उच्यते तन्मात्रं पुष्करं भवति ॥ ८१ ॥

अरत्निमात्रः स्रुवोऽङ्गुष्ठपर्ववृत्तपुष्करः२ ॥ ८२ ॥

अङ्गुष्ठपर्वणो यावद्वृत्तं तावत्प्रमाणं पुष्करं भवति ॥ ८२ ॥

स्फ्योऽस्याकृतिरादर्शाकृतिः प्राशित्रहरणं चमसाकृति३र्वा ॥ ८३ ॥

भवति ॥ ८३ ॥

चात्वालोत्करावन्तरेण संचरः४ ॥ ८४ ॥

अर्थलक्षणं यत्संञ्चरणं तच्चात्वालोत्करावन्तरेण भवति ॥८४॥

प्रणीतोत्करावििष्टिषु ॥ ८५ ॥

अर्थलक्षणमेव यत्सञ्चरणं तदिष्टिषु प्रणीतोत्करावन्तरेण भ-

---

१ बाहुः प्रमाणमासां ताः बाहुमात्राः । पाणिः प्रमाणमस्य तत्पाणिमात्रम्, पाणिमात्रं पुष्करं ( मुखं ) यासां ताः पाणिमात्र पुष्कराः । त्वक्प्रदेशे बिलं मुखं यासां तास्त्वग्बिलाः । प्रसिच्यते क्षार्यते अनेनेति प्रसेकः हंसमुखसदृशः प्रसेकः प्रणालिका यासां ताः हंसमुखप्रसेकाः । मूले दण्डो यासां ताः मूलदण्डाः स्रुचो भवन्ति ।

२ अरत्निः प्रमाणमस्या सावरत्निमात्रः । अङ्गुष्ठपर्वणोवृत्तं, अङ्गुष्ठपर्ववृत्तम्, अङ्गुष्ठपर्ववृत्तप्रमाणं वृत्तं पुष्करं मुखं यस्य असावङ्गुष्ठपर्ववृत्तमुखः स्रुवो भवति ।

३ याज्ञिकदेवैरेकमेव सूत्रं त्रेधाविभक्तम्, तन्मते "स्फ्योऽस्याकृतिः" "आदर्शाकृतिः प्राशित्र हरणम्" "चमसाकृति वा" इति सूत्ररूपं भवति ।

४ अयं च सोत्तरवेदिकेषु वरुणप्रघासमहाहविपशुसोमेषु ज्ञेयः चात्वालस्यैष्वेव सत्त्वात् ।

यति । अन्तरेण सञ्चर इत्यनुवर्त्तते ॥ ८५ ॥
इदानीमिदं विचार्यते । श्रुतद्रव्याभावे किं द्रव्यान्तरेण कर्त्तव्यम् । उतनेति? । किं तावत्प्राप्तम् । सूत्रेणैव पक्षः—

चोदिताभावेनारम्भस्तत्सिद्धित्वात्तस्य ॥ ८६ ॥

चोदितस्य द्रव्यस्याभावे नारब्धव्यं तत्कर्म । कुत एतत् । तदेव हि साधनं तस्य कर्मणः श्रुतम् । अतो द्रव्यान्यत्वे कर्मणोन्यत्वं भवति । द्रव्यदेवतं हि कर्मणो रूपमिति । ॥ ८६ ॥

सत्यमेतदेवं काम्ये । अथ नित्ये कथमिति[१]नित्येपि श्रुतद्रव्याभावे कर्मान्तरबुध्या अनारम्भे प्राप्त आह—

नियते सामान्यतः प्रतिनिधिः स्यात् ॥ ८७ ॥

नित्ये कर्मणि श्रुतद्रव्याभावे प्रतिनिधिनारब्धव्यं तत्कर्म श्रुतद्रव्यसदृशेन । कुत एतत् । उच्यते । व्रीहिभिर्यजेतत्यत्र नियममात्रं व्रीहिश्रुतिः । न च नियमानुरोधेन यावज्जीवश्रुत्युपरोधः शक्यः कर्त्तुम् । अवश्यकर्त्तव्ये कर्मणि नियममात्रस्यैवानुपादानं युक्तरूपम् । तस्मात्प्रतिनिधिना तत्कर्म परिसमापनीयम् । यद्येवं कुतः श्रुतद्रव्यसामान्यत इत्युच्यते । व्रीहिभिर्यजेतेत्यनेन व्रीहिजात्युपलक्षितानां व्यक्तिविशेषाणामङ्गभावो विहितो भवति । न हि व्रीहिजात्या अमूर्त्तत्वादष्टाकपालाभिनिर्वृत्तिः शक्यते कर्तुम् । न च व्यक्तिविशेषाणां जातिशब्दादृते ऽन्यद्वाचकमस्ति । तस्माद्व्यक्तिशेषा एवात्राङ्गभूताः । तेन सदृशेषूपादीयमानेषु कियतामपि व्यक्तिशेषाणामुपादानं कृतं भवति । तस्मात्साधूक्तं नियते सामान्यतः प्रतिनिधिः स्यादिति ॥ ८७ ॥
नित्ये प्रतिनिधिर्भवति काम्येपि प्रक्रान्ते प्रतिनिधिर्भवत्येव तदर्थमाह—

आरम्भान्नियमः ॥ ८८ ॥

आरब्धं हि तत्कर्म आरम्भश्च समाप्तेर्निमित्तं न च प्रतिनिधिद्रव्यमन्तरेण समाप्तिस्तस्य भवति । तस्मात्तत्रापि प्रतिनिधिर्भ-

---

१ अग्रिमेण सूत्रेण नित्यकर्मविषयकविशेषस्य वक्ष्यमाणत्वात् काम्यकर्मविषयकमेतत्सूत्रमिति भावः ।

षत्येव१ ॥ ८८ ॥

दोषश्चासमाप्तौ स्यात्सामान्यात् ॥ ८९ ॥

अपिच । प्रक्रान्तस्य काम्यस्यासमाप्तौ दोषो२ भवति । तदपि हि नित्यैः समानं भवति । यथैव नित्यस्याकरणे शिष्टविगर्हणम् । एवं काम्यस्यापि प्रक्रान्तस्य असमाप्तौ शिष्टविगर्हणम् । ननु च शिष्टविगर्हणं नाम को दोषोऽस्ति । अस्ति दोषो येन शिष्टा विगर्हन्ते । अथापि नाम नास्ति दोषः । शिष्टविगर्हणमेव दुष्टमिति ॥ ८९ ॥

दर्शनाच्च ॥ ९० ॥

दर्शयति च द्रव्यान्तरेण समाप्तिम् । यदि सोमं न विन्देत्पूतीकानभिषुणुयादिति । अभिषवेण च समाप्त्यभिधानम् ॥ ९० ॥

एवं दर्शने कृते तदाक्षिपति—

अन्यार्थं दर्शनं न पुनर्ग्रहणात् ॥ ९१ ॥

तत्र दर्शनमन्यार्थं भवति यदन्यविधिपरे वाक्ये ऽन्यमर्थं ज्ञापयति । यथा कृष्णलहोमविधिपरे वाक्ये प्रयाजान्दर्शयति । न चेदमन्यार्थम् । कुत एतत् । पुनर्ग्रहणात् । सोमाभावे सति पुनर्द्रव्यान्तरमन्यदत्र विधीयते ॥ ९१ ॥

एवंस्थिते सत्युच्यते—

---

१ इदमत्रतत्त्वम्, द्रव्यान्यत्वेऽपि न कर्मान्यत्वम्, कर्मान्यत्वकारणभूतानां शब्दभेदादीनामभावात् । यथा चैत्रीप्रयोगवैशाखीप्रयोगयोरभेदः, उभयत्रापि दर्शपूर्णमासपदानुवृत्तेः । यथा वा शाबलेय बाहुलेययोर्भेदेपि न गोत्वं भिन्नमेवमत्रापि व्रीहिनीवारभेदेऽपि न कर्मभेदः । एवञ्च श्रुतद्रव्यापचारे द्रव्यान्तराऽनुपादाने कर्मस्वरूपभङ्गभिया आरब्धं प्रतिनिधिनापि समापनीयमिति ।

२ "देवताभ्यो वा एष आवृश्चते यो यक्ष्य इत्युक्त्वा न यजते त्रैधातवीयेन यजेत न तेन देवताभ्य आवृश्चत" इति तैत्तिरीये निन्दाप्रायश्चित्तयोः स्पष्टं दर्शनात् आरब्धस्यावश्यं समाप्तिरिति प्रतिभाति । अतएव जैमिनिरपि षष्ठे "प्रक्रमान्तु नियम्येतारम्भस्य क्रियानिमित्तत्वात्" इति सूत्रयाञ्चकार ।

## अन्यार्थं पुनर्ग्रहणम् ॥ ९२ ॥

पुनर्ग्रहणमेवेदमन्यार्थम् । कोन्योर्थ इतिचेत्, सोमाभावे- यागस्यावश्यकर्त्तव्यत्वात्सुसदृशद्रव्यप्राप्तौ विसदृशेषु अपि पूतीकेषु व्यापारो वाक्यस्य । द्रव्यमात्रं तु प्राप्तमेव येन विशेषो नियम्यते । तस्मात्समाप्तिदर्शनमेवेदमिति ॥ ९२ ॥

इदं श्रूयते । पयो व्रतं ब्राह्मणस्य यवागू राजन्यस्यामिक्षा वैश्यस्ये ति तदभावे चिन्त्यते, किं प्रतिनिधिरत्र प्रसज्यते । उत न प्रसज्यते? । न प्रसज्यत इत्याह—

## व्रते प्रसङ्गो न नियमशब्दात् ॥ ९३ ॥

व्रते प्रतिनिधिर्न भवति । येन नियमशब्दोऽत्र भवति । व्रतं ह्येवास्यातोशनं भवतीति । एवकारश्रवणात् प्रतिनिधिव्युदासो न ह्यत्रान्यद्विहितं यद्व्युदस्यते । एवं स्थिते उच्यते । व्रते प्रतिनिधिः प्रसज्येत । न, न प्रसज्यत इति । कुत एतत् । यतो नायं नियमशब्दः अन्यार्थो ह्ययं इष्टाशनस्तावकः । पुरा केशश्मश्रोर्वपनाद्यत्कामयेत तदश्नीयादिति हि प्रकृत्य व्रतं ह्येवास्यातोशनं भवतीति संस्तवोयम् ॥ ९३ ॥

इदानीमिदं विचार्यते । श्रुतद्रव्याभावे प्रतिनिहिते द्रव्यान्तरे छागाभावे मेषे किं श्रुतद्रव्यशब्देनोपलक्षणम् । उत प्रतिनिहितद्रव्यशब्देनेति । किं तावत्प्राप्तम् । प्रतिनिहितशब्दे नेति । शब्देन हि द्रव्यमभिधेयम् । न चाविपरिणतरूपः शक्नोति तदभिधातुम् । तस्माद्विपरिणाम इत्येवं प्राप्त उच्यते—

## शब्देऽविप्रतिपत्तिः ॥ ९४ ॥

प्रतिनिहिते द्रव्ये श्रुतद्रव्याभिधायिनि शब्दे अविप्रतिपत्तिरविपरिणामः । अनूह इत्यर्थः । कुत एतत् । प्रतिनिध्युपादानं हि श्रुतद्रव्यबुद्ध्या क्रियते । न तु द्रव्यान्तरबुद्ध्या । यत्र वचनेन द्रव्यान्तरं विधीयते । यथा नैवारं चरुं[1] निर्वपेदिति तत्र द्रव्यान्तरबुद्धि-

---

[1] उपलक्षणमिदम् " सारस्वतीं मेषीं, ' ऐन्द्रं मेषम् ' ' ऐन्द्र ऋषभ ' इत्यादनीं, अतस्तत्र भवत्यूह इति ।

भवति । न चेह वचनमस्ति । तस्माद्भूयोवयवसामान्येन श्रुतद्रव्यमेवेदमिति कृत्वा प्रतिनिध्युपादानम् । अतः श्रुतद्रव्यशब्देनैवाभिधानम् ॥ ९४ ॥

यदि वचने सति द्रव्यान्तरबुद्धिर्भवति ततः सोमाभावे पूतीकानभिषुणुयादिति पूतीकानां वाचनिकत्वादस्तु विपरिणाम इत्येवं प्राप्त आह—

## सोमेन जात्यभावात् ॥ ९५ ॥

सोमाभावे सत्यपि वचने सोमशब्देनैवोपलक्षणं कर्त्तव्यम् । न ह्यत्र द्रव्यान्तरबुद्ध्या पूतीकोपादानम् । द्रव्यभावे यागस्यावश्यकर्त्तव्यत्वाद्द्रव्यान्तरे प्राप्ते तद्गतविशेषनियमः क्रियते । तस्मात्सोमशब्देनोपलक्षणं कर्त्तव्यम् ॥ ९५ ॥

१पृषदाज्ये तर्हि वाचनिकत्वाद्विपरिणामोस्त्वित्येवं प्राप्त आह–

## आज्ये चादर्शनात् ॥ ९६ ॥

आज्ये चाविपरिणामः । कुत एतत् । अदर्शनाद्द्रव्यान्तरस्य । न ह्यत्र द्रव्यान्तरबुद्ध्या दध्युपादीयते । किं तर्हि आज्यसंस्काराय । तस्मिन्सति पृषद्गुणकमाज्यं भवति । यदप्युच्यते । द्वयं वा इदꣳ सर्पिश्चैव दधिचेति तद्गुणभूतस्यैव दध्नः प्रशंसार्थम्२ ॥ ९६ ॥

किञ्च—

---

१ अयम्भावः, प्रकृतौ आज्यपदयुक्ता "देवान् आज्यपानावह" "देवानामाज्यपानां प्रियाधामानि" "देवा आज्यपा आज्यमजुषन्त" इत्यादयो मन्त्राः सन्ति, इदानीं तेषु देवा आज्यपानामित्यादिपदानां स्थाने "देवा पृषदाज्यपा" इत्यादयः शब्दाः प्रयोक्तव्या; न वा? तत्र पूतिकतृणाभिषवणवदत्रापि भविष्यत्यूहः; वचनेन विहितत्वादिति पूर्वपक्ष्याशयः ।

२ वस्तुतस्तु लोके पृषच्छब्दस्य चित्रगुणबोधकत्वादत्रापि पृषदाज्येनेत्यस्य चित्रेणाज्येनेति भविष्यति बोधः तथा च सति चित्रतारूपगुणमात्रविधानेन वाक्यस्य चारितार्थ्ये जाते न प्राकृतादन्यस्य कस्यचिद्द्रव्यस्य ग्रहणमिति कस्य स्थाने ऊहो भविता ।

पशौ मन्त्रवर्णात् ॥ ९७ ॥

पशौ हि मन्त्रवर्णो भवति स्वाहा देवान् आज्यपान् इति पृषदाज्यसाधनकत्वेपि सत्युच्यते ॥ ९७ ॥

किञ्च—

श्रुतेश्च ॥ ९८ ॥

एकवचनश्रुतिर्भवति। अथ पृषदाज्यं गृह्णातीति। यदि च दध्नः प्राधान्यं स्यात्तर्हि द्विवचनेन भवितव्यम्। न च तदस्तीति ॥ ९८ ॥

अथ यत्र वैकल्पिकं द्रव्यमुपात्तं नष्टं। यथा व्रीहिषु नष्टेषु किं व्रीहिसामान्येन प्रतिनिध्युपादानं। उत श्रुतद्रव्यं यवा उपादेयाः? श्रुतद्रव्याभावे सति प्रतिनिधिरिष्यते न श्रुतद्रव्ये सतीति यवा उपदेया इति प्राप्त आह—

विकल्पे प्रवृत्तं कर्मान्तरत्वात्[१] ॥ ९९ ॥

यस्मिन्विकल्पे यत्प्रवृत्तं द्रव्यं तत्सामान्येन प्रतिनिध्युपादानं कर्त्तव्यम्। न श्रुतद्रव्यमपि यवा उपदेयाः। किं कारणम्। सर्वेषु वैकल्पिकेषु द्रव्येषु यजमानः स्वयमेवैकं साधनत्वेनाङ्गीकरोति। तत्र तदेव साधनं नान्यत्। अश्रुतसममेव हि तदिति। यदि तदप्युपादीयते। कर्मान्तरबुद्धिः स्यात्। न च सेष्यते। तस्मात्प्रक्रान्तद्रव्यसादृश्येन प्रतिनिध्युपादानमिति ॥ ९९ ॥

उक्तेन न्यायेन प्रतिनिहितद्रव्यनाशे तत्सामान्येन प्रतिनिध्युपादाने प्राप्त आह—

प्रतिनिधौ तत्कालात् ॥ १०० ॥

---

१ "सोमे न जात्यभावात्" इत्यत्र न कारस्य पृथक् च्छेदं कृत्वा तस्यात्रानुवृत्तिः कर्तव्या, एवञ्चविकल्पे प्रवृत्तं यवादिकं न प्रतिनिधेयम्, कुतः? उपादीयमानप्रतिनिहित द्रव्यसाहित्येन कर्मान्तरत्वात्तस्येति वा व्याख्येयम्।

प्रतिनिधिद्रव्ये नष्टे न प्रतिनिधिसामान्येन प्रतिनिधिरुपादेयः किं तर्हि श्रुतमेव द्रव्यम् । न तदभावे तत्सामान्येन प्रतिनिधिरुपादेयः । कुत एतत् । तत्कालात् । स एव हि कालः प्रतिनिधेः यः श्रुतद्रव्याभाव इति । अतस्तस्मिन्नष्टे न तत्सामान्येन प्रतिनिधिरुपादातव्यः श्रुतद्रव्यमेवोपादेयमिति ॥ १०० ॥

अथ यत्र श्रुतं द्रव्यं अर्थाभिनिर्वृत्त्यसमर्थं विद्यते खदिरादि । अर्थाभिनिर्वृत्तिसमर्थं च प्रतिनिधिद्रव्यम् । श्रुतद्रव्ये अर्थाभावः । प्रतिनिधिद्रव्ये चार्थाभिनिर्वृत्ति समर्थे श्रुतद्रव्याभावः तत्र किं श्रुतद्रव्याभाव उतार्थाभावस्तत्रैतदुच्यते--

अर्थद्रव्यविरोधे र्थसामान्यं तत्परत्वात् ॥ १०१ ॥

तस्मिन्नर्थद्रव्यविरोधे यदर्थाभिनिर्वृत्तिसमर्थं तदश्रुतमपि प्रतिनिधिद्रव्यं उपादेयम् । कुत एतत् । अर्थाभिनिर्वृत्त्यर्थत्वाद्द्रव्यस्य येनार्थो न निवर्त्यते तत् श्रुतमपि सदश्रुतसममेव१ ॥ १०१ ॥

अथ यत्र गुणद्रव्यविरोधस्तत्रकथम् । यथा कृष्णानां व्रीहिणां दर्विहोम इति । अकृष्णा व्रीहयः सन्ति कृष्णाश्च नीवारास्तत्रैतदुच्यते—

गुणद्रव्ययोर्द्रव्यं प्रधानयोगात् ॥ १०२ ॥

गुणद्रव्यविरोधे द्रव्यमुपादेयम् । न गुणस्तद्धि प्रधानेन युज्यते । कथं येन युज्यमानं यागमभिनिर्वर्त्तयति । अतः सन्निकृष्टं यागस्य द्रव्यं विप्रकृष्टो गुणः । अतः सन्निकृष्टविप्रकृष्टयोश्च सन्निकृष्टे सम्प्रत्ययः ॥ १०२ ॥

इत्येवं प्राप्ते आह—

२न समत्वात् ॥ १०३ ॥

नैतदेवम् । द्रव्यमेव प्रधानेन युज्यते न गुण इति । समसे-

---

१ तदुक्तं षष्ठाध्याये तृतीते पादे जैमिनिना "अर्थ द्रव्यविरोधेऽर्थो द्रव्याभावे तदुत्पत्तिर्द्रव्याणामर्थशेषत्वात्" इति सूत्रेण ।

२ मध्ये पूर्वपक्षोऽयम् ।

तदुभयम्। द्रव्यमपि प्रधानयोग्याम्नानसामर्थ्याद्गुणोपीत्येवं प्राप्त उच्यते ॥ १०३ ॥

गु१णानुग्रहात् ॥ १०४ ॥

गुणेनानुगृहीतं द्रव्यमेव प्रधानयोगि गुणस्तु विशेषणं विशेष्यं द्रव्यम्। विशेषणविशेष्ययोश्च विशेष्ये सम्प्रत्यय इति न सममेतत्२ ॥ १०४ ॥

अधुनेदं विचार्यते। यान्येक प्रधानसम्बन्धीन्यङ्गकर्माणि-किं तेषां क्रमविशेषेणानुष्ठानं उतानियमः क्रमं प्रतीति ?। किं तावत्प्राप्तम्। सूत्रेणैवोपक्रमः—

कर्मणामानुपूर्व्यं न युगपद्भावात् ॥ १०५ ॥

अग्न्यन्वाधानादीनां कर्मणामानुपूर्व्यं नास्ति। यौगपद्येन हि तानि प्रधानापेक्षाया गृह्यन्ते। न चैषां क्रमनियामकं किञ्चित्कारणमस्ति। येन क्रमोवसीयते। तेनैकत्वात्कर्तुरवश्यं भाविनि क्रमे यः कश्चित् क्रम आस्थेयः ॥ १०५ ॥

अर्थनिर्वृत्तेश्च ॥ १०६ ॥

अपिचैवं सति सुखेनैवार्थाभिनिर्वृत्तिर्भवति। इतरथा क्रमविशेषे आश्रीयमाणे विस्तरेण स्यात्तत्र प्रधानकालातिक्रमः स्यादिति ॥ १०६ ॥

३स्याद्वानुपूर्व्यनियमः श्रुत्यर्थक्रमेभ्यः ॥ १०७ ॥

भवेद्वा क्रमनियमो नानियमः। श्रुतिरेव क्वचित्क्रमस्य नियामिका भवति। यथा द्वादशाहे। तेषां गृहपतिः प्रथमो दीक्षते।

---

१ उक्तमेवसिद्धान्तं स्थापयति।

२ अत एवाग्निहोत्रे पुंवत्साया अग्निहोत्र्याः पायसोऽभावे पुंवत्सत्वलक्षणं गुणं हित्वा स्त्रीवत्साया अप्यग्निहोत्र्याः पयसा होमो भवति; भवति चार्द्राणां परिधीनामभावे शुष्कैरेव कार्यसिद्धिः।

३ एवमङ्गानामनुष्ठाने क्रमनियमो नेति पूर्वपक्षे सिद्धान्तमाह।

अथ ब्रह्माणं दीक्षयत्यथोद्गातारमिति । एवमादिब्रह्मादीनां यजमानत्वात् प्राप्तासु दीक्षासु क्रमपरेयं श्रुतिः । तथा च । आश्विनो दशमो गृह्यते । तं तृतीयं जुह्वतीति । अर्थाच्च क्रमनियमो गम्यते । यथा वघातपेषणयोः । अन्यथा पुरोडाश एव न सिध्यति । पाठक्रमादपिच क्रमोवसातुं शक्यते । द्विप्रकारात् श्रुतिपाठात् । मन्त्रपाठाच्च । विशिष्टेन क्रमेण पदार्थानां विधिपाठः । मन्त्राणामपिच तदभिधानक्रमो विशिष्टएव । तत्रैतच्छक्यते वक्तुं येन क्रमेण पदार्थानामवगमस्तेनैवानुष्ठानमिति । इतरथा प्रतीतक्रमहानिरप्रतीतोपादानं चायुक्तमापद्यते । तस्मात्पाठक्रमादपि क्रमोवगम्यते ॥ १०७ ॥

## प्राकृतं च विकृतौ ॥ १०८ ॥

इतश्च पाठक्रमादपि क्रमोवसीयते । येन प्राकृतं पदार्थजातं विकृतौ चोदकप्राप्तमन्यपरे वाक्ये तेनैव क्रमेणानुवदति । पितृयज्ञे उत्तरेण परिग्रहेण परिगृह्य परिमृज्याह प्रोक्षणीरासादायेत्यासादयन्ति । प्रोक्षणीरिध्मं बर्हिरुपसादयन्त्येवमादि । स यज्ञोपवीती भूत्वाज्यानि गृह्णातीति यज्ञोपवीतित्वविधिपरे प्राकृतं क्रमं दर्शयति । अपरेऽन्यथैतत्सूत्रं वर्णयन्ति । प्राकृतं च वैकृतश्च यत्र कर्मणि व्यपदेशसंयुक्तं भवति तत्र पूर्वं प्राकृतं कर्त्तव्यं पश्चाद्वैकृतम् । न्यायेन ह्यचरितार्थत्वात्पूर्वं वैकृतमेव भवति । सूत्रप्रस्थानात्पूर्वं प्राकृतमिति ॥ सूत्रस्य च वेदवाक्यमूलतानुमीयते । एवं च कृत्वा पशावुत्तराघारमाघार्य पशुं पूर्वं समनक्ति । प्रकृतं च व्यपदेशसंयुक्तं ध्रुवासमञ्जनम् । पशुसमञ्जनं तु वैकृतम् । तदचरितार्थत्वात्पूर्वमेव प्राप्नोति । तेन पूर्वग्रहणं कुर्वन्नाचार्योमुमर्थं ज्ञापयति । ध्रुवासमञ्जनमेवात्र पूर्वं मा भूदिति । तथा ज्योतिष्टोमे आसाद्य हवीꣳषि सम्मृश्यापउपस्पृश्य राजानमादाय प्रपद्यत इति श्रुतिः । तत्र सूत्रकारेणोक्तम् । आसाद्याज्यानि दक्षिणेन कृष्णाजिनमास्तीर्य तस्मिन्सोमं निदधातीति । हविः सम्मर्शनात्मालम्भनोदकोपस्पर्शनानि प्राकृतं च विकृतावित्यनेनैव सिद्धानि ॥ १०८ ॥

## विरोधेर्थस्तत्परत्वात् ॥ १०९ ॥

अथ यत्र विरोधः पाठक्रमार्थक्रमयोस्तत्र कथमिति । यथा सर्वे पर्णशाखया वत्सानपाकरोति तामाच्छिनत्तिषेत्वेति पाठः । अ-

र्थस्तु नैवं निर्वक्ष्यते । वत्सापाकरणायैव हि शाखाच्छेदनम् । तेन पाठक्रमार्थक्रमयोरर्थक्रमो बलीयान् । तेनोक्तमाचार्येण विरोधेर्थस्तत्परत्वादिति । अर्थार्थो हि पाठः ॥ १०९ ॥

## श्रुतिः क्रमादानुमानिकत्वात् ॥ ११० ॥

अथ यत्र श्रुतिपाठक्रमयोर्विरोधस्तत्र कथम् । यथा संस्थिते यज्ञे ब्राह्मणतर्पणं श्रुत्याभिहितम् । पाठात्तु प्राक् स्विष्टकृत्समनन्तरं प्राप्नोति । तत्रैतदाह । पाठक्रमाद्बलीयसी श्रुतिः । प्रत्यक्षत्वात् संस्थिते यज्ञ इति । पाठक्रमे त्वनुमानम् । नूनमेतेनैव क्रमेणानुष्ठानं येनैवं पाठइति ॥ ११० ॥

अथ यत्र चोदनापाठस्य मन्त्रपाठस्य च विरोधस्तत्र कथम् । यथाज्याधिश्रयणे सोसावाज्यमधिश्रयतीषेत्वेति पठित्वा तत्पुनरुद्वासयत्यूर्जेत्वेति पाठः । मन्त्रपाठे तु आज्याधिश्रयणमन्त्रप्रभृतिघर्मोसि विश्वायुरित्येवमादीन् बहून् पदार्थानुपक्रम्योद्वासनमन्त्र ऊर्जेत्वेति पठ्यते । यदि चोदना पाठो बलवान् अधिश्रयणसमनन्तरमुद्वासनम् । अथ मन्त्रपाठस्ततं उपरिष्टादिति । किमत्र युक्तम्?--

## मन्त्रचोदनयोर्मन्त्रबलं प्रयोगित्वात् ॥ १११ ॥

मन्त्रपाठचोदनापाठयोर्मन्त्रपाठो बलवान् । कर्मणि क्रियमाणे प्रयुज्यते ह्यसौमन्त्रः । अतश्च सन्निकृष्टो मन्त्रः । विप्रकृष्टो चोदनापाठः[१] ॥ १११ ॥

ततश्च सन्निकृष्टविप्रकृष्टयोः सन्निकृष्टे सम्प्रत्यय इत्येवं प्राप्त आह—

---

१ एतदुक्तं भवति, स्मारकक्रमेण तावदनुष्ठानक्रमः । न च मन्त्रे अनन्यार्थे सति ब्राह्मणस्य स्मारकत्वम्? अप्रयुज्यमानतया सामर्थ्याभावात् । न हि निर्वपामीति वन्निर्वपेदिति पदमुच्चारितमनुष्ठानौपयिकमनुष्ठेयप्रकाशनं करोति, किं तु सम्बन्धिमात्रतया प्रयोगबहिर्भूतं सत् अनेन वाक्येनेदं विहितमत एतत् करोमीत्येवमालोचनेन स्मारकं भवति । मन्त्रस्तु प्रयुज्यमान एवाभिधानत एव स्मारक इति देवयाज्ञिकाः ।

न[1] समत्वात् ॥ ११२ ॥

नैतदेवं मन्त्रपाठो बलवानिति । सममेतदुभयम् । कर्मणि प्रयुज्यते मन्त्रः । चोदना तु कर्मणः प्रवर्त्तिकैव । अपि च । पूर्वं प्रवृत्ता चोदना विहितं हि-पदार्थपश्चान्मन्त्रः प्रयुज्यते ॥ ११२ ॥

गु[2]णानां तु भूयस्त्वात् ॥ ११३ ॥

तु शब्दः पक्षव्यावृत्तौ । नैतत्समम् । मन्त्रपाठो बलवान्[3]। स हि प्रयुज्यमान उत्तरं पदार्थं बुद्धौ सन्निधापयति । नैवं चोदनापाठः । पदार्थस्मारको हि मन्त्रः । तस्मान्मन्त्रपाठो बलीयान् ॥ ११३ ॥

क्रमनियमे कारणान्युक्तानि । तेषां च बलाबलमिदानीं विचार्यते । यत्र बहूनां प्रधानानां सह क्रिया तत्र किमेकैकस्य प्रधानस्य सकलं गुणकाण्डमावर्तयितव्यम् । उत प्रत्येकपदार्थेनानुसमय इति? । सकलं गुणकाण्डमेकैकस्य कर्त्तव्यमिति ब्रूमः । न पदार्थानुसमयः । पदार्थानुसमये हि प्रथमस्य पदार्थे कृते द्वितीयस्य तस्मिन्नेव क्रियमाणे पूर्वस्य व्यवधानं स्यादित्येवं प्राप्त आह—

तुल्यसमवाये सामान्यपूर्वमानुपूर्व्ययोगात् ॥ ११४ ॥

तुल्यानां प्राधानानां सहप्रयोगे सति सामान्यं पूर्वं कर्त्तव्यम् । समानः पदार्थः सर्वेषां पूर्वः पूर्वः कर्त्तव्यः[4]। एवं क्रियमाणे आनुपूर्व्येण पदार्था युज्यन्ते । तत्तन्मन्त्राश्च । इतरथोत्तरपदार्थाभिनिर्वृत्त्युत्तर-

---

१ मध्ये पूर्वक्षोयम् ।

२ सिद्धान्तयति ।

३ " तस्मादेतदृषिणाभ्यनूक्तं " इत्यादिना श्रुतिरपि मन्त्राणाङ्गुणभूयस्त्वं कथयति ।

४ तद्यथा, बहुषु हविःषु प्रथमं सर्वेषां विभस्मीकरणम्, ततः सर्वेषां पात्री स्थापनम्, ततः सर्वेषां तत्र व्यभिघारः, ततः सर्वेषां पात्रीषूपस्तारः, ततः सर्वेषामुद्वासनम्, ततः सर्वेषां वेद्यामासादनम्, ततः सर्वेषामालम्भ इत्येवं रूपः पदार्थानुसमयः कर्तव्य इत्यर्थः ।

कालं पूर्वेषु क्रियमाणेषु आनुपूर्व्ययोगो न स्यात्। तस्मात्पदार्थानुसमयः। अथवानुपूर्व्ययोगादिति सकले गुणकाण्डे ऽपवृज्यमाने आनुपूर्व्येण क्रमेणायुक्तानि प्रधानानि भवन्ति। तत्र सहत्वप्रापकः प्रयोगवचनो बाध्यते। यत्पुनरुच्यते। पूर्वस्य पदार्थे कृते तस्मिन्नेव द्वितीयस्य क्रियमाणे व्यवधानमिति। तत्सहत्वविधानेन परिहियते। आह च—

सकलं गुणकाण्डं चेदेकैकस्यापवृज्यते सहत्वप्रापको नैव प्रयोगवचनो भवेत्। यतः पदार्थानुसमये क्रियमाणे क्रमश्चानुगृहीतो भवति सहत्वश्चेति। एवं च सति सप्तदशसु प्रजापत्येषु षोडशभिः पदार्थैः समानजातीयैर्व्यवधानमिष्यते। अनेनैव मुख्यक्रमप्रावृत्तिकावुक्तावेव भवतः। कथं। प्रथमस्य नियोगं कृत्वा द्वितीयादीनां नियोगे कृते यदि प्रोक्षणं द्वितीयतृतीयप्रभृतिक्रियते। सप्तदशभिरष्टादशभिर्वापदार्थैः प्रथमस्य प्रोक्षणस्य व्यवधानं स्यात्। मुख्यक्रमेप्येवम्। काण्डक्रमं तु वक्ष्यत्युपरिष्टात्॥ १४॥

उक्तेनन्यायेन चतुरोमुष्टीन्निर्वपतीत्यत्र मुष्टिनानुसमये प्राप्ते, अष्टौ कपलान्युपदधातीत्यत्र च कपालानुसमये प्राप्त आह—

## नैककर्मणि सम्बन्धात्॥ ११५॥

निर्वापकर्मणि न मुष्टिनानुसमयः कार्यः। चतुर्मुष्टिको निर्वाप एकः पदार्थः। पदार्थावयवो मुष्टिः। न चावयवेनानुसमयः कर्त्तव्यः। पदार्थेन ह्यनुसमयो भवति। पदार्थश्च कर्त्तव्यः। अवय वस्तुतादर्थ्येनैव क्रियते। संख्या मुष्टयश्च। मुष्टीनां निर्वापसम्बन्धः संख्यायाश्च। संख्यामुष्टिसम्बन्धे वैरू[1]प्यलक्षणवाक्यभेदप्रसङ्गात्। तस्मादुभयोर्निर्वापसम्बन्धः। व्यवच्छेद्यव्यवच्छेदकभावस्त्वार्थो न

---

१ वैरूप्यं चैवम्, चतुरोमुष्टीन्निर्वपतीत्यत्र निर्वापं प्रति मुष्टीनामुपादेयत्वं विधेयत्वमङ्गत्वं चेति त्रिकम्, संख्यां प्रति च तेषामुद्देश्यत्वमनुवाद्यत्वं प्रधानत्वं चेति, एतत् परस्परविरुद्धं त्रिकद्वयं मुष्टीनामापद्यत इति।

तु वाक्यावगत१ः । तेन वाक्यभेदो न भवति२ ॥ ११५ ॥

एवं सर्वत्र पदार्थानुसमये प्राप्त आह—

ग्रहणसादनावदानप्रदानेषु तु व३चनात् ॥ ११६

ग्रहणं सादानान्तम् । अवदानं प्रदानान्तं कर्त्तव्यम् । शाखान्तरात् ॥ ११६ ॥

एवं सर्वत्रावदाने प्रदानान्ते प्राप्त आह—

न द्रव्यभेदे गुणयोगादिति वात्स्यः ॥ ११७ ॥

द्रव्येषु भिन्नेषु देवतायामभिन्नायां नावदानं प्रदानान्तं कर्त्तव्यम् । यथा सप्तदशसु प्राजापत्येषु । स्विष्टकृद्यागे चानेकहविष्के । कुत एतत् । सर्वाङ्गानां प्रधानम्प्रति गुणत्वेन योगात् । तद्यद्यवदानं प्रदानान्तं क्रियते गुणानुरोधेन प्रधानावृत्तिः कृता स्यात् । न चासाविष्यते ॥ ११७ ॥

इदमन्यद्विचार्यते । कस्मिंश्चित्कर्मणि प्रक्रान्तेऽपरिसमाप्ते एव नित्यस्य काल आयाते किं नित्यं कर्त्तव्यमुत न कर्त्तव्यमिति? । व्यवधानान्न कर्त्तव्यमित्येवं प्राप्त आह—

प्रवृत्ते नियतं दोषविशेषात् ॥ ११८ ॥

प्रवृत्ते कर्मणि नियतस्य काल आयाते नियतमेव कर्त्तव्यम् । अकरणे हि दोषः स्यात् । ननु पूर्वस्यापि व्यवधाने दोष एव । सत्यमेवं यत्र तु विशिष्टतरो दोषः । प्रधानस्यैवाक्रियेति । तत्र गुणभूतानां पदार्थानां व्यवधानमात्रम् । अपिचासम्बन्धेन व्यवधानेप्यदोषः । तस्मान्नियतमेव तावत्कर्त्तव्यम् ॥ ११८ ॥

---

१ ये चत्वारस्ते मुष्टयः येमुष्टयस्ते चत्वार इति परस्परव्यवच्छेद्यव्यवच्छेदकभावोऽरुणैकहायनीन्यायेन द्रव्यस्य गुणावच्छेदकत्वेन गुणस्य च द्रव्यावच्छेदकत्वेनार्थाद्भवतीति भावः ।

२ एवं 'अष्टाकपालं निर्वपति' 'द्विरवद्यति' 'त्रिरभ्यङ्क्ते' 'त्रिः पावयति' इत्यादावपि दृष्टव्यम् ।

३ "अथातो गृह्णात्येवायं वां मित्रावरुणेति" इत्यादिकं वचनमिति भावः ।

ज्योतिष्टोमे उक्थ्यविग्रहाणां परतः १ षोडशी श्रूयते। तत्र च कालनियमोऽस्ति। समयाध्युषिते षोडशिनस्तोत्रमुपाकरोतीति। तद्यदि मानुषात्प्रतिबलादुक्थ्यविग्रहणानामुत्कर्षः स्यात्। षोडशिनोऽप्युपाकरणकालश्चायातस्तत्र किं षोडशिन उपाकरणं कर्त्तव्यम्। उतोक्थ्यविग्रहणानां परतः क्रमेर्णात? । प्रवृत्तेनियतमिति न्यायेन षोडशिन उपाकरणे प्राप्त उच्यते—

## षोडशिनि त्वानुपूर्व्यभूयस्त्वात् ॥ ११९ ॥

षोडशिनि तु नैवम्। क्रमेणोक्थ्यर्थविग्रहणानां परत उपाकरणं कर्त्तव्यम्। एवं गुणभूयस्त्वम्। इतरथा षोडशिनो वैगुण्यं उक्थ्यविग्रहाणां च। उत्कर्षे षोडशिन एवेति। तस्मादुत्कृष्यते षोडशी२ ॥ ११९ ॥

अग्निहोत्रादीन्युदाहृत्य चिन्त्यते। किं पाठक्रमेणैषामनुष्ठानम्। उतानियमः क्रमम्प्रतीति? । पाठक्रमेणानुष्ठानमिति ब्रूमः। पाठो हि नियामकः क्रमस्येत्युक्तम्। एवं प्राप्त आह—

## अनियमः फलसंयुक्तेषु ॥ १२० ॥

प्रधानकर्मसु क्रमं प्रत्यनियमः। कानिचिन्नियतकालान्येव पठ्यन्ते। कानिचित्कामनया क्रियन्ते। नचैषां परस्परतः सम्बन्धोऽस्ति। यथाङ्गकर्मणामेकप्रधानसम्बन्धः। यस्यैव निमित्तमायातं तदेव कर्त्तव्यम् ॥ १२० ॥

पाठक्रमस्तर्हि किमर्थः?—

## क्रमो विध्यर्थः कर्मण्यसम्भवात् ॥ १२१ ॥

विधानार्थः क्रमो नानुष्ठानार्थः। सर्वस्वारात्परे कर्मण्यसम्भ-

---

१ " तं पराञ्चमुक्थ्येभ्यो विगृह्णाति " इति वचनात्।

२ तदुक्तं पञ्चमाध्यायस्य प्रथमपादान्त्याधिकरणे तन्त्ररत्ने " न ग्रहणक्रमानुग्रहार्थमुत्कर्षो विधीयते; किं तर्हि यागक्रमानुग्रहार्थम्, तस्य च स्तोत्रं प्रति प्राधान्यमविवादम्, अतस्तस्य यागाभ्यासस्य काले नाङ्गस्य स्तोत्रकालो बाध्यत इति युक्त एवोत्कर्ष इति " इत्यादिना।

वात् । मरणकामस्यासौ विहितस्ततोनुष्ठानक्रमस्यासम्भव इति ॥ १२१ ॥

अवत्तस्यावदानस्य नाशे किं हविरन्तरमुत्पाद्यते । उतान्यस्तत एवावदीयते? । किं तावत्प्राप्तम् । सूत्रेणैवपक्षः—

## अवत्तनाशेन्यद्गुणानुग्रहात् ॥ १२२ ॥

अवत्तनाशे ऽन्यद्धविरुत्पादयितव्यम् । कुत एतत् । गुणानुग्रहात् । एवं गुणानुग्रहः कृतो भवति । इतरथा गुणहीनेन यागः कृतः स्यात् । ये पूर्वस्मिन् हविषि गुणाः कृतास्ते ह्यवदाननिष्ठास्तद्विनाशाच्च विनाशमुपगतास्तस्माद्गुणहीनं तत् । न च गुणहीनेन याग इष्यते ॥ १२२ ॥

एवं प्राप्त आह—

## न पूर्वशेषात् ॥ १२३ ॥

नैतदेवं हविरन्तरमुत्पादयितव्यम् । यतः पूर्वस्यैव हविषः संस्कृतस्य शेषो विद्यते । ननु ह्यवदानविनाशेन गुणविनाशात् संस्कारहीनं तदिति । नेत्युच्यते । उपभोगेन हि संस्काराणामपवर्गो भवति । नचोपभुक्तास्ते प्रक्षेपाभावात् । तस्मात्तत एवावदेयम्[1] ॥ १२३ ॥

## अचोदितत्वाच्च ॥ १२४ ॥

नचैवं विधा चोदनास्ति । अवदाननाशे हविरन्तरोत्पत्तिः कार्येत्यतस्तत एवावदेयम् ॥ १२४ ॥

---

१ अयम्भावः, पुरोडशस्य यौमध्यपूर्वार्धावयवौ तदपादानकतदवयवभूतमवदानद्वयं यागसाधनम्, नष्टे च मध्ये पूर्वार्धावयविनि पूर्वसकलरूपे पुरोडाशे यो मध्यावयवः पूर्वार्धावयवश्चावदानापादानभूतः स एवावदानापेक्षयावयवी, तस्मिन्नवदानोद्धरणेन विनष्टेऽपि मध्यान्तरस्य पूर्वार्धान्तरस्य चावदानद्वयोपलक्षणत्वेन विद्यमानत्वात्तत एवावदेयम् । न चैवं सति कृत्स्नस्य मध्यपूर्वार्धावयवादवदेयमिति शङ्क्यम् ? " मध्यादवद्यति " इत्येवन्मात्रस्य वचनबोधितत्वान्न तु सकलस्य मध्यपूर्वार्धादिति तत्त्वम् ।

स्विष्टकृद्वदानुपूर्व्ययोगात् ॥ १२५ ॥

अपि च। तत एवावदीयमाने स्विष्टकृद्वदेतद्धविर्भवति स स्विष्टकृद्भवतीत्यर्थः। प्रधानावदानसमनन्तरं हि स्विष्टकृदित्यर्थवदवदानं भवति। यदि तदेव न गृह्यते स्विष्टकृदर्थमपि ततो न गृह्यते ततो हविष उत्पत्तिरनार्थिकैव स्यात्। न१ च सेष्यते ॥ १२५ ॥

इत्येवं प्राप्त आह—

गुणहानौ तु शेषभावात् ॥ १२६ ॥

तु शब्दः पक्षव्यावृत्तौ। न तत एव पुनरवदेयम्। गुणहीनं हि तदित्युक्तमेवं ये तत्र संस्कारास्तेद्व्यवदानानिष्ठास्ताद्विनाशाच्च विनाशमुपगतास्तस्मात्संस्कारहीनत्वान्न ततोवदेयम्। अपि च। मध्यात्पूर्वार्द्धाच्चावद्यतीति श्रुतिः। तदभावाच्च गुणहीनमेव तदिति। तस्माद्धविरन्तरोत्पत्तिः कार्येति२। आह च—

संस्काराणां पुरोडाशेद्व्यवदानं प्रयोजकम्।
तद्विनाशाच्च नष्टास्ते नावदेयमतस्ततः ॥

अपि च।

गृहीतौ मध्यपूर्वार्धौ तौ च नष्टावुभावपि।
अतः शेषस्य शेषत्वात्प्रधानत्वं न युज्यते ॥ १२६ ॥

नियते सामान्यतः प्रतिनिधिः स्यादित्युक्तमधस्तात्। तेन देवतादीनामपि प्रतिनिधाने प्राप्त आह—

न देवताग्निशब्दक्रियाः परार्थत्वात् ॥ १२७ ॥

न प्रतिनिधेयान्येतानि। न ह्येतानि प्रतिनिधीयमानानि यदर्थं प्रतिनिधीयन्ते तत्कार्यं कुर्वन्ति। देवतायास्तावदैन्द्रयागे तदस्मरणे यद्यग्निः प्रतिनिधीयते। न तत्कार्यं करोति। ऐन्द्रयागनिबन्धनं यदपू-

---

१ शेषात्तु प्रधानार्थेऽवदीयमाने स्विष्टकृदर्थमपि ततोऽवदीययत एवेति पूर्वहविः स्विष्टकृद्भवतीति पूर्वपक्षे गुण इति हृदयम्।

२ इदमुक्तं भवति, कृत्स्नस्य हि पुरोडाशस्य मध्यदेशोपरितनाङ्गुष्ठपर्वमात्रभागोऽवदानम्, अन्यास्त्विडादिशेषकार्यार्थः अतो न तस्य हविष्ट्वम्, यस्य तु हविष्ट्वं नासौ विद्यत इत्यवश्यं हविरन्तरमुत्पादनीयम्।

र्वम न तदाग्नेयेन साध्यते१ । अग्नेरण्याहवनीयादेरभावे यद्यग्न्यन्तरं प्रतिनिधीयते । नाहवनीयकार्यं करोति । अन्यद्ध्यदृष्टमाहवनीयस्याधिकरणत्वे अन्यदग्न्यन्तराधिकरणत्व इति । शब्दो मन्त्रः । सोपि मन्त्रान्तरस्य कार्ये न वर्त्तते । न हि पेषणमन्त्रः प्रथनं प्रकाशयति । क्रिया त्रिप्रकारा अदृष्टार्था दृष्टार्था च । सा च प्रतिनिधीयमाना क्रियान्तरकार्यं न करोति । न हि पेषणमवघातकार्ये वर्त्तते । अदृष्टार्थायामपि क्रियायामभिधीयते । न हि प्रयाजाअनुयाजकार्ये वर्त्तन्ते । न चानुयाजाः प्रयाजानाम । प्रतिनियतानि ह्यदृष्टानीति ॥ १२७ ॥

## कामं देवताम् ॥ १२८ ॥

योग्निशब्दक्रियां प्रतिनिधत्ते स कामन्देवतामपि प्रतिनिदध्यात । अग्निशब्दादीनामप्रतिनिधेयत्वार्थमिदमुक्तम । येन देवताप्रतिनिधातुं नैव शक्यते।न ह्याग्नेये इन्द्रस्य देवतात्वम । चोदनालक्षणं हि तत । तेनान्यत्रान्यदेवतैव न भवति । अचोदितत्वात॥ १२८ ॥

## प्रतिषिद्धं प्रत्यवायात ॥ १२९ ॥

निवर्त्तते । यत्प्रतिषिद्धं न तत्प्रतिनिधेयम । यथा श्यामाकचरौ कोद्रवबरटाः । मोद्गे चरौ माषाः इति । प्रतिनिधित्वेन हि निषेधो भवति । अयज्ञिया तु वै कोद्रवबरटाः अयज्ञिया माषा इति । प्रतिनिधित्वेनायं प्रतिषेधः२ । प्रतिषेधविध्यतिक्रमे च प्रत्यवायः॥१२९॥

---

१ एवं च गत्यभावाद्यागस्यापि लोपः, न हि त्यागमात्रं यागः किन्तु देवतोद्देशेन त्यागः, तेनासत्यां देवतायां प्रधानस्यैव यज्ञार्थस्य स्याल्लोप इति ।

२ तदुक्तम, ' व्रीहिर्यवो वा श्यामाको नीवारो वा हविर्भवेत । वेणुयवा मसूरं वा शाकं मूलं फलं जलम । सत्यं वा हविरेतेषु यथासम्भवमाचरेत । प्रतिनिध्यन्तरवत्सत्यं विज्ञेयं हविरत्यये । प्रधानदेवतोद्देशात सन्त्यजेत्सत्यमात्मनः । अतोऽन्यदपि वा ग्राह्यं सदृशं धान्यमात्रकम् । न ग्राह्यं सर्वथा माषवरकोदारकोद्रवम् । यद्वा व्रीहियवाभावे तुषतण्डुलयोगिनीः । ओषधीः परिगृह्णीयादणुकोद्रववर्जिताः । ग्राम्याणां वा भवेत ग्राम्यमारण्यानामरण्यजम । यवाभावे तु गोधूमास्ततो वेणुयवादय ' इति ।

## स्वामी फलयोगात्१ ॥ १३० ॥

स्वामी यजमानः। यः स्वद्रव्यपरित्यागेन फलं साधयति तस्य यद्यन्यः प्रति निधीयते स एव तत्कर्मफलेन युज्यते न पूर्वः। अतो न तस्यार्थे वर्त्तते। तस्मात्स्वामिनोऽप्यप्रतिनिधानम् ॥ १३० ॥

एवं सर्वत्राप्यप्रतिनिधाने प्राप्त आह—

---

१ "स्वामी फलयोगात्" नेत्यनुवर्तते। स्वामी यजमानो न प्रतिनिधेयः। मृते तावत् कः पुरुषान्तरं प्रतिनिदध्यात्, को वाध्वर्य्वादीन् प्रवर्तयेत्। स्वयं प्रवर्तमानेषु च तेषु न मृतस्याकर्तुः फलं सिध्यति। यदि तु प्रतिनिहितो दक्षिणादानं द्रव्यत्यागं च करोति; तदा तस्य सम्यक्फलसम्बन्धान्मुख्य एव स्वामी स्यान्न प्रतिनिधिः। पत्नीत्वस्वतन्त्रा मृते पत्यौ पुरुषान्तरं प्रतिनिधाय प्रयोक्ष्यतीत्यनाशङ्कनीयमेव। प्रोषिते अन्यत्र व्यापृते वा यजमाने ये तावत् क्रत्वर्था आज्यावेक्षणादयः तेषु यथा समाख्यमध्वर्य्वादय एव कर्तारो विद्यन्त इति न प्रतिनिधिना कार्यम्। पुरुषसंस्काराणां च ऋत्विग्वरणादीनां क्रत्वर्थत्वात् विनापि यजमानेन नास्ति वैगुण्यम्; पत्न्या अपि तदनुष्ठानसम्भवात्। यानि च ब्रह्मचर्यादीनि फलं प्रति योग्यतायाः कारणानि तानि बहिरवस्थिते नापि यजमानेन क्रियमाणानि क्रतोरुपकारकाण्येव। तस्मात् वेदबन्धनाज्यावेक्षणादावध्वर्य्वादेर्विद्यमानत्वादितरत्र ब्रह्मचर्यादावसम्भवात्प्रतिनिधेरनुपपन्नो यजमानप्रतिनिधिः। कुतः ? फलयोगात्। न हि पुरुषान्तरेण क्रियमाणानि ब्रह्मचर्यादीनि यजमानस्य फलयोग्यतां सम्पादयन्तीत्यसम्भवः प्रतिनिधेः। तस्मान्न प्रवासादिनापचरिते स्वामिनि तत्स्थाने स्वाम्यन्तरं प्रतिनिधेयमिति। ननु पत्न्यां मृतायां किमस्ति प्रतिनिधिरुतनेति ? नायमस्याधिकरणस्य विषयः। तदापि हि यदा तावत् 'भार्यायै पूर्वमारिण्यै दत्वाग्नीनन्त्यकर्मणि' इत्ययं पक्षः समाश्रीयते तदाग्न्यभावादेवानधिकारः सिद्धः। यदा तु नाग्नयः पत्न्यै दत्ता तदाप्याचारप्रामाण्यान्नापत्नीकस्य दर्शपूर्णमासाद्यनुष्ठानम्। अग्निहोत्रमात्रं तु वचनादनुष्ठीयते। तदाप्यपत्नीकोऽप्यग्निमाहरेदिति वचनात्। वचनान्नास्ति पत्न्याः प्रतिनिधिरिति तन्त्ररत्न इति देवयाज्ञिकाः।

## गुणेषु प्रतिनिधिः परार्थत्वात् ॥ १३१ ॥

पात्रासादनाद्याज्यावेक्षणादिषु गुणपदार्थेषु स्वाम्यपिप्रतिनिधीयते । कुत एतत् । परार्थो ह्यसौ । न तत्र प्रधानवत्स्वार्थं साधयति । तस्मात्क्रत्वर्थाभिनिर्वृत्तये स्वाम्यपि प्रतिनिधीयते ॥ १३१ ॥

## सत्त्रेषु तु श्रुतेः ॥ १३२ ॥

सत्रेषु पुनः स्वामी श्रवणादेव प्रतिनिधीयते । अथ यदि संदीक्षितानां कश्चित्प्रमीयते तस्य यो नेदिष्ठो स्यात्तमुपदीक्ष्य तेन सह यजेरन्निति श्रुतिः१ ॥ १३२ ॥

## स तद्धर्मा कर्मयोगात् ॥ १३३ ॥

स नेदिष्ठो चिन्त्यते । यजमानधर्मैर्युज्यते । न युज्यत इति? । अयजमानत्वान्न युज्यत इत्येवं प्राप्ते ब्रूमः । स तद्धर्मा स नेदिष्ठो तद्धर्मा स्यात् । कुत एतत् । कर्मयोगात् । यजमानकर्मणा हि तस्य योगस्तद्धर्मसंस्कृतेन तत्कर्मानुष्ठानं कृतम् । अयमपि तद्धर्मसंस्कृत एव करिष्यतीति२ ॥ १३३ ॥

इदं विचार्यते । किं सत्त्राणि ब्राह्मणानामेव भवंत्युत त्रयाणामपि वर्णानामिति? वैद्यत्वात्त्रयाणामपि प्राप्त आह—

## सत्त्राणि ब्राह्मणानामृत्विक्श्रुतेः ॥ १३४ ॥

ब्राह्मणानामेव सत्त्राणि न क्षत्रियवैश्ययोरिति । कुत एतत् । ऋत्विक् श्रवणात् । येऋत्विजस्ते यजमाना इति श्रुतिः । न चानृत्वि-

---

१ काम्यमपि यत् प्रारब्धं तदवश्यं समापनीयमित्युक्तम्, आवश्यकत्वाच्च यथाशक्ति प्रयोक्तव्यम् । अतो यद्यपि 'ये यजमानास्त ऋत्विज' इति यजमानशब्दस्य स्वामिभूतकर्तृवचनत्वात् एकशब्दोपात्तयोश्च स्वामिकर्तृत्वयोरार्त्विज्योद्देशेन विधिसम्भवात् स्वामिभिरेवार्त्विज्यं कर्तव्यम् । तथापि स्वामिगता सप्तदशादिसंख्या तत्राङ्गम् । तया विना च वैगुण्यम् । अतस्तत्सम्पादनाय पुरुषान्तरं प्रतिनिधेयमिति भावः ।

२ तथाच " सप्तदशावराः सत्रमासीरन् " इति शास्त्रमनुगृहीतं भवति, इतरथा संस्कृताः षोडशैवेति शास्त्रबाधः स्यात् ।

जो यजमाना भवन्ति। परकीये कर्मणि यः प्रवर्त्तते सऋत्विगित्युच्यते। तेनानेन प्रकारेण ऋत्विजां यजमानसंस्कारा विधीयन्त इति गौण्या वृत्त्या एवं ऋत्विजां यजमानत्वं भवति। एवं च सति यजमानसंस्कारेभ्यो ऽदृष्टपरिकल्पनम्। तेनान्यथा वर्ण्यते ऋत्विक्शब्देनार्त्विजीनान्पदार्थाननूद्य तत्कर्तृत्वेन यजमानविधानम्। एवं दृष्टार्थता भवति। प्रत्याम्नानाच्च ऋत्विजो निवर्त्तन्ते। न त्वेवमपि ऋत्विक्शब्देन गौण्या वृत्त्या तत्कर्माभिधानम्। सत्यमेवम्। इतरस्मिन्पक्षे गौणीवृत्तिरदृष्टकल्पना चेति। तस्मादृत्विक्पदार्थेषु यजमानानां कर्तृत्वेन विधानम्। एवं सति। येन क्रियमाणा आर्त्विजीनाः पदार्थाः सगुणाभवन्ति तस्यैवाधिकार इति। तस्माद्ब्राह्मणानामेवाधिकारः सत्त्रेषु॥ १३४॥

## एककल्पानामवैगुण्यात्॥ १३५॥

तानि चैककल्पानां भवन्ति। एकः कल्पो येषां तनूनपाद्याजित्वं नाराशंसयाजित्वं वा तेषां सत्त्रेऽधिकारः। एवमवैगुण्यं भवति[1]॥ १३५॥

यद्येवं तुल्यप्रमाणानां भवन्तु। एवमपि हि श्रूयते। यजमानसम्मितौदुम्बरी कार्येति। यस्यैव यजमानस्य प्रमाणं नोपसंह्रियते तस्यैव वैगुण्यं स्यादिति। एवमाशङ्कित आह—

## न परार्थत्वात्॥ १३६॥

नातुल्यप्रमाणकैर्वैगुण्यं भवति। परार्थो हि यजमानोत्र न तनूनपाद्याजित्ववत्स्वार्थार्थता। तत्र तनूनपाद्याजिनां नाराशंसेन वैगुण्यं नाराशंसानां च तनूनपातेनेति। इह पुनर्न तथा। इह यजमानसम्मितौदुम्बरी कार्या सा च येन केनचिद्यजमानेन सम्मि-

---

१ अयमर्थः, वशिष्ठानां नाराशंस एव यज्ञाङ्गम्, तद्युक्त एव क्रतुः फलसिद्ध्यै प्रर्याप्तो भवति। एवं तनूनपाद्युक्त एवेतरेषाम्। अत एककल्पानामेव सहाधिकारो न भिन्नकल्पानामिति सिद्धम्।

ताभवतीति । तस्माद्वैषम्यं तनूनपातेनेति१ ॥ १३६ ॥

वैश्यराजन्ययोर्गार्हपते ॥ १३७ ॥

यथार्त्विज्येषु पदार्थेषु क्षत्रियवैश्ययोरनाधिकारः । गार्हपते तर्हि पदार्थेऽधिकारोऽस्त्वित्येवमाशङ्किते अधस्तनसूत्रान्नेति प्रतिषेधमपकृष्यते । गार्हपतेऽपि पदार्थे वैश्यराजन्ययोर्नाधिकारः । कुत एतत् । विषमो हि तयोर्ब्रह्मसामकल्पः । बार्हदङ्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्यात् । पार्थुरश्मं राजन्यस्य । रायोवाजीयं वैश्यस्येति । तेनेतरेणेतरस्य वैगुण्यमितरस्य चेतरेणेति । तस्माद्गृहपतित्वेनापि वैश्यराजन्ययोर्नाधिकारः ॥ १३७ ॥

प्रक्रान्तेषु सत्त्रेषु तद्विषयमेव चिन्त्यते । अस्ति२ सहस्रसम्व-

---

१ नन्वेवमग्नीनामपि परार्थत्वाद्यस्य कस्य चिदग्निषु साधितं कर्म सर्वेषां फलसाधकं भविष्यतीत्यनाहिताग्नीनामप्यधिकारः सत्त्रेषु भवतीति प्राप्ते उच्यते । 'दर्शपूर्णमासाभ्यामिष्ट्वासोमेन यजेत' इत्यस्य प्रकृतितः प्राप्तः 'य एतेनानिष्ट्वा' इति वचनादकृतदर्शपूर्णमासज्योतिष्टोमानामनाहिताग्नीनां नास्ति सत्त्रेष्वधिकारः। तथाग्नयोऽप्याधानगतात्मनेपदादनाधातॄणां न कार्यसिद्ध्यै पर्याप्नुवन्तीत्यनाहिताग्नीनामनाधिकारः । आदधीतेत्यात्मनेपदाद्धि आधातुरेवाधानफलेन भवितव्यम्, कर्मयोग्यता चाग्नीनां फलम्, अतोऽन्येनाहिता अन्यस्य कर्म न साधयन्ति।यजमानेन सम्मितौदुम्बरीकार्येति तु शास्त्रार्थो येन केनचिदपि प्रयोगगतेन यजमानेन सम्पाद्यत इति वैषम्यम् ।

२ पञ्चविंशति ब्राह्मणे श्रूयते, 'पञ्च पञ्चाशतस्त्रिवृतः संवत्सराः पञ्चपञ्चाशतः पञ्चदशाः पञ्च पञ्चाशतः सप्तदशाः पञ्च पञ्चाशत एकविंꣳशा विश्वसृजाꣳ सहस्रसंवत्सरम्' इति । तत्र सन्देहः, किमयं सहस्रसंवत्सरशब्दो मुख्य; उत गौणः ? यदापि मुख्यस्तदापि, किं मनुष्यव्यतिरिक्तानां स्वतः सहस्रायुषां गन्धर्वादीनामधिकारः; उत मनुष्याणामेव रसायनमित्रविन्दादिसम्पादितसहस्रायुषाम् ? अथवा कुलकल्पः ? अथवा साम्युत्थानम् ? । अथवा विश्वसृजामयनं कुर्वतां सहस्रायुष्टम् ? । अथवार्धतृतीयशतानां यजमानामधिकारः?। यदापि गौणत्वम्, तदापि किं मासेषु सम्वत्सरशब्द; उत द्वादशरात्रिषु; उत दिवसेषु ? इति पक्षाः । तत्र प्रथमं पक्षं तावदाह ।

त्सरं सत्त्रं किं तन्मनुष्याणां भवति केन चित्प्रकारेण । उत न भवतीति ? किं तावत्प्राप्तम् । सूत्रेणैव पक्षः—

## सहस्रसंवत्सरममनुष्याणामसम्भवात् ॥ १३८ ॥

अमनुष्याणामिति पर्युदासे सति देवानां स्यात्, ते च पूर्वं निराकृता वारम्भसामर्थ्यादित्यत्र, तस्मान्नञः प्रतिषेधार्थता वर्ण्यते। अमनुष्याणामिति । मनुष्याणां न भवतीत्येतदुक्तं भवति । तथा-चोत्तरसूत्रे मनुष्यविषयैवाभ्यनुज्ञा स्याद्देहानित्यत्वादिति । किमिति मनुष्याणां न भवति । तदायुष्ट्वस्यासम्भवात् । न हि सहस्रायुषो मनुष्याः सन्ति१ ॥ १३८ ॥

## २स्याद्देहानित्यत्वात् ॥ १३९ ॥

भवेद्वा सहस्रसंवत्सरं मनुष्याणामेव । कुत एतत् । देहानित्यत्वादिति । न हि नियतपरिमाणं मनुष्याणामायुरिति । कश्चिच्छतं वर्षाणि जीवति । कश्चिदभ्यधिकतरमपरिमितायुषो मनुष्या इति ॥ १३९ ॥

## ३तस्य च कार्यत्वात् ॥ १४० ॥

क्रियते ह्यायुरायुषः प्रापकेण कर्मणा । यथा मित्रविन्दा श्रीराष्ट्रमित्रायुःकामस्येति । मित्रविन्दया आयुर्भवतीति गम्यते । तथा च काठके आयुःकामस्यामृतचरुरिति ॥ १४० ॥

---

१ अतः श्रुतिबलादमनुष्याणां गन्धर्वादीनामधिकार इति भावः ।

२ गन्धर्वादीनामनधिकारित्वस्य पूर्वं व्यवस्थापनात् 'वसन्ते ब्राह्मण' इत्यादिना मनुष्याणामेव वैतानाग्निमत्त्वात्; साकल्येन यथोदितानुष्ठानकर्तृत्वाच्च मनुष्याणामेवाधिकार इत्याशयवान् आह ।

३ ननु मनुष्यदेहस्यानित्यत्वेऽपि सहस्रायुष्ट्वं तेषां कथं सम्भवतीत्यत आह ।

१नासम्भवात् ॥ १४१ ॥

न हि तत्प्रापकेण कर्मणा सहस्रायुष्ट्वं भवति २। प्रायशः शतायुष्ट्वमेव मनुष्याणामनूद्यते। शतायुर्वै पुरुष इति ३ ॥ १४१ ॥

शास्त्रसम्भवादिति भारद्वाजः ॥ १४२ ॥

अस्ति हि शास्त्रं आयुषो हिवृद्ध्यर्थं मित्रविन्दया आयुष्कामो यजेतेति। न च तत्रायुषः परिमाणमुक्तम्। भविष्यति कश्चित्कर्माभ्यासेन सहस्रायुरिति४ ॥ १४२ ॥

नादर्शनात् ॥ १४३ ॥

नैतदेवम्। सहस्रपरिमाणं आयुः कर्मणा क्रियत इति। नैवंविधं वाक्यमस्ति। आयुर्दीर्घं भवतीत्येतावद्गम्यते। न च दृश्यन्ते सहस्रायुषो मनुष्याः। कथं तर्ह्यायुःप्रापकाणि कर्माणि विहिता-

---

१ नन्वेवं रसायनैर्मित्रविन्दादिभिश्चायुः प्रापकै कर्मभिश्च मनुष्या अपि दीर्घमायुः प्राप्स्यन्तीत्याशङ्क्याह।

२ अयमभिप्रायः, न हि रसायनादेः सहस्रायुष्ट्वस्य च सम्बन्धो दृष्टचरः, नापि रसायनादीनां तथाविधं सामर्थ्यं दृष्टं येन मनुष्याः सहस्रं वर्षाणि जीवेयुः, एभिर्जाठरोऽग्निरभिवर्धते बलीपलितादयो नश्यन्ति स्वरवर्णमेधादीनां जननं भवतीत्येतावदेव कल्पयितुं शक्यते न सहस्रायुष्ट्वम्।

३ ननु शतान्यायूंष्यस्येति विग्रहः करिष्यते? मैवम्, न हि द्विवचनबहुवचनान्ताभ्यां समास इष्यते 'प्रमाणाभावात् अभिधानसामर्थ्याच्च। नन्वेवमेकत्वेऽपि प्रमाणभावात्तेन कथं विग्रहः? उच्यते, एकत्वं जात्यपेक्षं प्रातिपदिकानि हि जातिरेकेति। यद्वा जातिराश्रयमन्तरेणानुपपद्यमाना एकं तावदाश्रयमाक्षिपतीत्येकत्वसिद्धिरिति दिक्।

४ नच 'शतायुर्वै पुरुष' इत्यनेन विरोधः? तस्य शतस्तावकत्वादिति गृहाण।

नि । उच्यते । अपमृत्युनिरासार्थानि तानि । अपमृत्युनापि मरणं भवति । अथर्वणे च पठ्यते । एकशतमपमृत्यूनामिति । तेनैकं परमायुस्तदुल्लङ्घनं कर्मणापि न शक्यते कर्त्तुम् । तस्मादपमृत्युजयार्थान्यायुः प्रापकाणि कर्माणि। तथा चाह । मर्त्याः पितरः पुरा ह्यायुषो म्रियते यस्तद्धाधत्ते इति । परमायुषः पूर्वमपि अपमृत्युना मरणं दर्शयति । तथा चापपुनर्मृत्युं जयतीति सर्वमायुरियादिति । तथा च मानवे कथं मृत्युः प्रभवतीत्युक्त्वा । अनभ्यासेन वेदानामाचारस्य तु वर्जनात् । आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसतीत्याह । अपमृत्युनापि मरणं भवतीत्यमुमर्थं ज्ञापयति । अतः सहस्रायुष्ट्वस्यासम्भवादित्युक्तम् ॥ १४३ ॥

एवं स्थित इदमुच्यते—

## कुलसत्त्रमिति१ कार्ष्णाजिनिः ॥ १४४ ॥

यजमानकुलीनाः परिसमापयिष्यन्त्येतत्सत्रम् । तच्च पैतृक रिक्थन्यायेन । न ह्यत्रान्यागतिरस्ति ॥ १४४ ॥

## २साम्युत्थान३मिति लौगाक्षिः ॥ १४५ ॥

कार्ष्णाजिनिपक्षनिराकरणार्थमेतत्सूत्रम् ।कुलसत्रं कैश्चिदारब्धं कैश्चित्समापयिष्यन्ति । न चावयवात्फलमिष्यते । यद्येवं वरं

---

१ कुलस्य पितृपुत्रपौत्रादेः सत्रं कुलसत्रमिति विग्रहः ।

२ वस्तुतस्तु 'शास्त्रफलं प्रयोक्तरि' इति न्यायात् सकलानुष्ठातृणामेव फलं नैकदेशानुष्ठातृणाम् । न च कुलसत्रे एकेन सकलं कृतम् । अतो विफलमनुष्ठानं' स्यात् । न च तद्युक्तमिति चतुर्थः साम्युत्थानपक्षोऽस्त्वित्यत आह ।

३ सामिशब्दोऽर्धांशस्यार्थे, अर्धसमाप्ते सत्रे उत्थानम् 'त्यागः साम्युत्थानमिति विग्रहः, 'सामित्वर्धे जुगुप्सिते' इत्यमरोक्तेः ।

साम्युत्थानमेव १ सर्वथैतदपि नोपपद्यते । अत आह ॥ १४५ ॥

अन्हां वा शक्यत्वात् ॥ १४६ ॥

अन्हां वैतत्सहस्रमङ्गीकर्त्तव्यम । न संवत्सराणामशक्यत्वात् । मुख्यार्थासम्भवे च गौणीवृत्ति राश्रीयते । तेन संवत्सरशब्दो

---

१ वस्तुतस्त्वयमप्यनुपपन्न एव, असमाप्तात् कर्मणः फलानुत्पत्तेः । तर्हि सत्त्रविधायकवचनबलादेव सत्त्रिणां दीर्घायुर्भविष्यतीति पञ्चमः पक्षोऽस्तु ? । मैवम् । न ह्यस्य वचनस्य सोऽर्थः सम्भवति । तद्वाचकपदाभावात् । न च कल्पयितुं शक्यते, सम्भावितायुष्काणामपि सत्त्रान्तरेषु प्रवृत्तानां दैवान्म्रियमाणानां तत्सत्त्रविधिबलादायुर्वृद्ध्यदर्शनात् । तर्हि ' पञ्च पञ्चाशता ' इत्यस्य पुरुषपरत्वमङ्गीकृत्य सार्धद्विशतानां पुरुषाणामधिकारेऽभिहिते सम्वत्सरचतुष्टयेन सहस्रसम्वत्सरत्वं सम्पद्यते । यत एकोऽपि त्रिवृत्स्तोमकयागयुक्तः सम्वत्सरः पञ्च पञ्चाशत्संख्यैर्यजमानैः प्रत्येकं कर्तृभूतैः सम्बध्यमानस्तत्संख्यो भवति तथा पञ्चदशादयोऽपीति, तेन चतुः सम्वत्सरमिदं सत्त्रमर्धतृतीयैर्यजमानशतैः क्रियमाणं सहस्रसम्वत्सरम्भवतीति षष्ठः पक्षोऽस्तु । सोप्यनुपपन्नः । ' चतुर्विंशति परमाः सत्त्रमासीरन् ' इति वचनादधिकानां तत्राधिकाराभावात् । संख्याशब्दसम्वत्सरशब्दयोर्मध्ये अन्यतरस्य गौणत्वमाश्रित्य मनुष्याधिकार आश्रयणीयः । तत्रापि संख्याशब्दस्य मुख्यत्वादेकार्थनिश्चयसामर्थ्याच्च न स्वार्थत्यागः । सम्वत्सरपदं तु जघन्यत्वात् सावनसौरचान्द्रनाक्षत्राद्यनेकार्थसाधारणत्वेनार्थनिश्चयासामर्थ्यात् गौणं भवति । तर्हि यो मासः स सम्वत्सर इति वचनात्सम्वत्सरशब्दस्य मासपरत्वे सति सहस्रमासमेतत्सत्त्रमिति सप्तमः पक्षोऽस्तु । सोऽपि नोपपद्यते । यतः अष्टमे वर्ष उपनीतो द्वादशवर्षाणि वेदमधीत्य विंशतिवयस्को विवाहं कृत्वा जातपुत्रोऽग्नीनादधीत, तस्मादाधानादूर्ध्वं ज्योतिष्टोमानुष्ठानोत्तरकालमस्यायुषि न सम्भवन्ति सहस्रमासाः । ननु तर्हि सम्वत्सरप्रतिमा वै द्वादशरात्रय इति प्रयोगाद्द्वादशरात्रिषु सम्वत्सरशब्दः ? । प्रतिमाविशेषणं तत्र सम्वत्सरशब्दः न तस्य द्वादशरात्रिषु प्रयोगः । तस्मादष्टमः पक्षोऽप्ययुक्त इत्याशयेनोक्तं ' सर्वथैतदपि नोपपद्यत ' इति ।

गौण्या वृत्त्याहर्विषयः १ ॥ १४६ ॥

संख्यायाः कस्माद्गौणी वृत्तिराश्रीयतेत आह—

श्रुतिसामर्थ्यात् ॥ १४७ ॥

श्रुत्याहि संवत्सरशब्दोहर्विषयः प्रदर्शितः । अहर्वैसंवत्सर इति २। तस्मादन्हां सहस्रमङ्गकिर्त्तव्यम् ॥ १४७ ॥

प्रकृत्यनुग्रहाच्च ॥ १४८ ॥

एवं च प्रकृति रनुगृहीता भवति। प्रकृतौ हि द्वादशाहे अहानि संख्येयानि । इहापि तद्वदेव संख्यायोग इति ॥ १४८ ॥

कर्मणां युगपद्भावस्तन्त्रम् ॥ ४९ ॥

अत्रेदं विचार्यते । प्रधानकर्मणां यौगपद्ये सहप्रयोगे सति किमङ्गकर्मणां तन्त्रम् । उत प्रतिप्रधानमावृत्तिरिति ?। प्रतिप्रधानमावृत्तिरिति ब्रूमः । प्रधानानि बहूनि । प्रत्येकं चाङ्गवत्ता सम्पादनीया । न चानावृत्तैरङ्गैरसौ सम्पद्यते । तस्मात्प्रतिधानमावृत्तिरित्येवं प्राप्त उच्यते । प्रधानानां सहप्रयोगे सत्यङ्गानां तन्त्रम् । सकृत्क्रिया ॥ १४९ ॥

कुत एतत्—

शक्यपुरुषार्थकृतत्वैकार्थसमवायश्रुतिभ्यः ॥ १५० ॥

युक्तं यत्प्रधानकर्मणां सहप्रयोगे सत्यङ्गानां सकृत् क्रियेति ।

---

१ यथा त्रिवृत् पञ्चदशः सप्तदश इत्येते शब्दाः स्तोमवाचकाः सन्तः स्तोमयुक्ते एकैकस्मिन्नहनि यागरूपे लक्षणया वर्तन्ते, नत्वहः सन्ङ्घे क्वचिदपि त्रिवृदादिशब्दाः प्रयुक्ताः । तैश्च शब्दैः सामानाधिकरण्यात् सम्वत्सरशब्दः स्वावयवभूते अहनि तथैव लक्षणया वर्तत इति भवति तस्याहः परत्वमिति तत्त्वम् ।

२ उपलक्षणमिदम्" आदित्यस्त्वेव सर्वऋतवो यदैवोदेत्यथ वसन्तो यदा सङ्गवोऽथ ग्रीष्मो यदा मध्यन्दिनोऽथ वर्षा यदापराह्णोथ शरद्यदैवास्तमेत्यथ हेमन्त" इत्यस्य, अत्रापि श्रुतौ दिनपरत्वं स्पष्टमिति भावः ।

कुत एतत् । शक्यत्वात् । शक्यते ह्यदृष्टोपकारिणाङ्गेनानेकेषामुपकर्तुम् । अगृह्यमाणविशेषत्वात् । प्रदीपवत्१ । पुरुषार्थकृतत्वाच्च । प्रधानान्यङ्गवन्ति कर्त्तव्यानीति पुरुषार्थः सकृत् कृतैरेवासौ कृत एव भवति । एकार्थसमवायश्रुतेश्च । एकस्मिन्नर्थे फले बहुभिः प्रधानैः साध्ये अङ्गानां समवायश्रुतिर्भवति । ता एकविंशतिराहुतयो द्वावाघारौ पञ्चप्रयाजा द्वावाज्यभागावाग्नेयः पुरोडाशस्तद्दशाग्नीषोमीय-उपांशुयाजोग्नीषोमीयः पुरोडाशोग्निः स्विष्टकृदिडा त्रयोनुयाजाः सूक्तवाकश्च संयोवाकश्चाथ यदेवादः पत्नीसंयाजेषु सम्प्रगृह्णाति समिष्टयजुश्चेति आहुतीनामेकविंशतिसंख्या दृश्यते । सा च तन्त्रपक्षे भवति । इतरथा आहुतिशब्दो लक्षणया तद्विधिपर एव स्यात् । अपरेन्यथा वर्णयन्त्येतत्सूत्रम् । शक्यपुरुषार्थत्वात् । शक्यते हि सकृत्कृतेनाप्यनेन बहूनामुपकर्तुम् । पुरुषार्थवत् । यथा पुरुषार्थेन प्रदीपेनेति । अपि च । कृतमप्यङ्गं यदि पुनः क्रियते । तत्कृतत्वादेकार्थवत्कृतं भवति।यथा प्रदीप एव कृतः पुनः क्रियते। समवायस्तूक्त एव । अतः सहप्रयोगे प्रधानानामङ्गानां सकृत् क्रियेति ॥१५०॥

प्रयोगएव प्रधानानां कुतः—

## फलकर्मदेशकालद्रव्यदेवतागुण-
## सामान्ये२ ॥ १५१ ॥

यत्रैकेन प्रयोगवचनेन बहूनि प्रधानान्युपदाय फले विधीयन्ते । तत्र सहप्रयोगः। इतरेतरसव्यपेक्षाणि हि तानि विहितानि। यथा वैश्वदेवेन प्रजाकामं याजयेदिति । तत्र वैश्वदेवशब्देन समुदायवचनेनाष्टानां हविषां सहत्वम् । यदि च तेषां कर्मापि समानं भवति । पञ्चप्रयाजता त्रयोनुयजतेत्येवमादि । भिन्नाङ्गकर्मणां सहप्रयो-

१ यथा एक एव प्रदीपोबहूनां मध्ये कृतः सन् सर्वेषामुपकरोति, यथा वा षट्सु भावनासु लिङ्पदेनैव कथम्भावमपेक्षमाणास्वपि सकृदाम्नाता एवाङ्गविधयः षणामपि प्रत्येकमङ्गानि समर्पयन्ति तथेदमितिभावः ।

२ सामान्यशब्दस्य द्वन्द्वान्तपदत्वात् प्रत्येकं सम्बन्धः, तथा च, फलसामान्ये कर्मसामान्ये देशसामान्ये कालसामान्ये द्रव्यसामान्ये देवतासामान्ये गुणसामान्ये च सह प्रयोग इति भवति सूत्रार्थः ।

गे सतीतरेतरवैगुण्यं स्यात् । देशसामान्ये च सहप्रयोगो न भिन्नदेशानामशक्यत्वात् । कालसामान्येप्येवम् । परिक्रयद्रव्यसामान्ये च सहप्रयोगो युक्तः । यथा त्रिषंयुक्तेषु । त्रयाणां वामनत्रयाणां श्यामत्रयाणां बभ्रुरिति । देवतासामान्ये पुनः समानमुच्चारणम् । यथा सप्तदशसु प्राजापत्येष्वनुवाचने प्रैषे च । यदि च तासां देवतानां गुणो ऽपि समानो भवति यथा तत्रैवोपांशुत्वम् । गुणभेदे पुनरशक्यं सहोच्चारणम् । यथोपांशुयाजदेवताग्नीषोमीययोः ॥ १५१ ॥

तद्भेदे भेदः ॥ १५२ ॥

तेषामेव सहत्वकारणानां यत्र भेदस्तत्र सहत्वं न भवति । यथा मित्रविन्दाप्रतिकामाग्नेययोः प्रयोगवचनभेदात् कर्मभेदो भवति । यथा कस्यचित्पञ्चप्रयाजता कस्यचिन्नवप्रयाजता । तत्र सहत्वे इतरेतरवैगुण्यमापद्यते । देशभेदपि भेदो भवति । यथा वरुणप्रघासेषु मारुत्याः । कालभेदेपि दर्शस्य पौर्णमासस्य च सहत्वं भिद्यते । द्रव्यभेदेपि त्रयाणां त्रिषंयुक्तानां भेदः ॥ १५२ ॥

सहत्वे प्रधानानामङ्गानां तन्त्रमुक्तम् । क्वचित्तयोः सङ्गतिरेव नास्ति । यथा वैश्वदेवे देशो विरुध्यते । प्रधानानां प्राचीनप्रवणो देशः । प्राचीनप्रवणे वैश्वदेवेन यजेतेति । तदङ्गानां समो देशश्चोदकप्राप्त्या । समे दर्शपूर्णमासाभ्यां यजेतेति । तेनाङ्गप्रधानानामसङ्गतिरत्र । कालोपि चात्र विरुध्यते । प्रधानानां पक्षान्तस्तदङ्गानां पक्षादिरित्येतदालोच्य सूत्रितम्—

१देशकालौ विरोधे न कृत्स्नोपदेशात् ॥ १५३ ॥

---

१ देवयाज्ञिकैरेतत्सूत्रं द्विधाकृतम्, " देशकालौ विरोधे " " न कृत्स्नोपदेशात् " इति । तत्र देशकालौ विरोधे इत्यस्य देशकालौ तन्त्रस्य विरोधकाविति प्रतिप्रधानं भिद्येते इत्यर्थः, एवञ्च यस्यामेव पौर्णिमायां आग्नेयानुष्ठानं न तस्यामेवाग्नीषोमीयस्य । न च षड्भिः पर्वभिर्दर्शपौर्णमासानुष्ठानमेवं सति स्यात् ? इष्टापत्तेः । एवं देशस्यापि तथा च न तयोस्तन्त्रमिति पूर्वदले " न कृत्स्नोपदेशात् " नैतदेवं प्रतिप्रधानं देशकालयोरावृत्तिः, कस्मात् ? कृत्स्नसाङ्गप्रधानयागस्य पौर्णमासादौ उपदेशात्, यदा तु एकस्यैवानुष्ठानं न तदा कार्त्स्न्यं ? त्रयाणां देवानां प्राधान्यादिति समाहितम् ।

कृत्स्नं ह्येतत्कर्मसाङ्गं देशे काले च विधीयत इति। न ह्यङ्गरहितस्य प्रधानस्य पृथग्वचनम्। देशकालौ विरोध इत्येतत्सूत्रमपरेऽन्यथा वर्णयन्ति। किं प्रयोगवचनैकत्वे सति कर्मादीनि सर्वाणि सहत्वविरोधकानि उत देशकालावेवेति?। तद्भेदे भेदइत्युक्तत्वात्सर्वाणीत्येवं प्राप्त आह—

देशकालावेव विरोधकौ न कर्मादीनि। शाब्दो हि सहप्रयोगः। कर्मादीनामशब्दता। तेन वैश्वदेवे कर्मभेदेपि सति अष्टानां हविषां सहत्वम्। कथं कर्मभेद इति चेत्। पयस्यायाः सान्नाय्यपयोविध्यन्तेन वृधन्वन्तता प्राप्नोति। इतरेषां पौर्णमासविध्यन्तेन वार्त्रघ्नता। शब्दबलीयस्त्वात्सहप्रयोगः। द्रव्यभेदेपि शुनासीरीये परिक्रयभेदेपि प्रयोगवचनैकत्वात्सहप्रयोगः। तस्माद्देशकालावेव सहप्रयोगस्य विरोधकौ प्रयोगवचनैकत्वे सति न कर्मादीनि। एतस्यां व्याख्यायां न कृत्स्नोपदेशादिति सूत्रं पूर्वपक्षमुत्थाप्य पूर्ववद्व्याख्येयम्॥ १५३॥

अस्ति ज्योतिष्टोमस्तत्रोपसत्कालीनः ब्रह्मण्यासु निगदस्त्र्यहे सुत्यामागच्छेति। स च चोदकेन द्वादशाहं प्राप्तस्तत्र च द्वादशोपसत्कालीनान्यहानि द्वादशसौत्यानि। तत्रैतत्सान्दिह्यते किं सकृच्छ्रुत्या शब्दोच्चारणं, उत भेदेन प्रति सुत्यमिति? कुतः सन्देहः। यदि प्रकृतौ त्र्यहे सुत्यामागच्छेत्यनेन सुत्योपलक्षणां कृतम् ततो भेदेन प्रतिसुत्यमुपलक्षणम्। अथ यागसाधनभूतदेवतेन्द्रस्मरणं चिकीर्षितं ततः सकृत्सुत्या शब्दोच्चारणं। किं तावत्प्राप्तम्। सूत्रेणैव पक्षः—

## अहर्गणे सुब्रह्मण्यायाः सर्वोपलक्षणं प्रकृतिवत्॥ १५४॥

अहर्गणे उपसत्कालीने सुब्रह्मण्यानिगदे सर्वाण्यहानि भेदेनोपलक्षयितव्यानि। एवं प्रकृतिवद्विप्रकृतिः कृता भवति। प्रकृतौ ह्येकं सौत्यमहरासीत्तदेवोपलक्षितम्। त्र्यहे सुत्यामागच्छेति। इह द्वादशसौत्यान्यहानि। तत्र च यदेवनोपलक्ष्यते तस्यैवोपलक्षणसंस्कारहानाद्वैगुण्यमापद्यते। तस्माद्द्वादशाहे त्रयोदशाह इत्येवमादिसर्वेषामुपलक्षणमित्येवं प्राप्ते ब्रूमः॥ ५४॥

## तन्त्रकालकर्म प्रत्यहमविधानात्॥ १५५ ॥

लुप्तविभक्तिको निर्देशः। तन्त्रेण उपसत्काले सुत्या शब्दोच्चारणं कर्म। सकृत्सुत्या शब्दोच्चारणमित्यर्थः। कुत एतत्। प्रत्यहमविधानात्। नह्येवं विधं वाक्यमस्ति प्रहत्यमुच्चारणमिति। ननु चोदकेन विधानम्। प्रकृतावेकं सौत्यमहस्तदुपलक्षितम्। ऽयहे सुत्यामागच्छेति। विकृतौ बहूनि सौत्यानि। तानि सर्वाण्युपलक्षयितव्यानि। अत्रोच्यते। न हि सुत्योपलक्षणं चिकीर्षितं न हि तयोपलक्षितया किञ्चित्प्रयोजनमित्यत्राहष्टं परिकल्प्यं। यागसाधनभूतदेवतेन्द्रस्मरणं चिकीर्षितम्। तच्चोपसत्कालीनानामह्नां निगदद्वारेण। ऽयहतीते सुत्यां प्रतिभवतेन्द्रागन्तव्यमिति। ननु चात्राप्यहष्टमेव। महीन्द्रआमन्त्रणं शृणोति न च श्रुत्वागच्छतीति १। सत्यमेवम्। अनेन प्रकारेण यागसंस्तवोयम्। येन साधनान्यचेतयमानान्यपि चेतनावत्संश्रूयन्ते। यथा शृणोत ग्रावाणः इति। न हि ग्रावाणः शृण्वन्ति। संस्तवायैतदुच्यते। यथा शृणोतु देवः सविता हवं इति यागः संस्तूयते। एवमनागच्छन्नपीन्द्र आगच्छतीवाशृण्वन्नपि सविता शृणोतीवेति। यागसंस्तवने न च कर्तुरुत्साहसजननमिति दृष्टो ऽर्थः। सुत्योपलक्षणे पुनर्दृष्टस्यांशोपि नास्तीति॥ १५५॥

## एकद्रव्ये कर्मावृत्तौ सकृन्मन्त्रवचनं कृतत्वात्॥ १५६ ॥

यत्रैकद्रव्यविषयः कर्मणोभ्यासस्तत्र किं प्रतिक्रियं मन्त्राभ्यावृत्तिरुत सकृन्मन्त्रवचनमिति? क्रियाभ्यावृत्तौ तच्छेषस्य मन्त्रस्यापि प्राप्तौ सकृदुच्यते। एकद्रव्यविषये कर्मणोभ्यासे सकृन्मन्त्रो वक्तव्यः। कुत एतत्। कृतत्वादभिधानसंस्कारस्य। अपि च साभ्यासा एकैवेयं क्रियेति। क्रियादौ च मन्त्रवचनमुक्तम्॥ १५६॥

---

१ देवतानां विग्रहवत्त्वस्य मीमांसकैरनङ्गीकारात्। इन्द्रशब्दस्यैवात्र देवतात्वं; न च शब्दस्यामन्त्रणस्मरणमागमनं वा घटत इत्याशयः।

उक्तेन न्यायेन हविषो ग्रहणे बर्हिषो लवने तस्यैव स्तरणे आज्यग्रहणे च सकृन्मन्त्रवचने प्राप्त आह—

न ग्रहणलवनस्तरणाज्यग्रहणेषु तु ॥ १५७ ॥

तु शब्दोवधारणे । ग्रहणादिषु नैव सकृन्मन्त्रवचनम् । न ह्यत्राभिधानसंस्कारस्य कृतत्वमस्ति । ग्रहणे तावद्यावदेव मुष्टिना गृहीतम् तावदेव मन्त्राभिधानेन संस्कृतम् । अन्यद्गृह्यमाणमभिधानसंस्कारसव्यपेक्षमेवेति । लवनस्तरणयोरप्येवम् । आज्यग्रहणे च ॥ १५७ ॥

वचनादाज्ये१ ॥ १५८ ॥

आज्ये वाचनिकी मन्त्रनिवृत्तिरुक्ता । उत्तरेषु ग्रहणेषु । त्रिंस्त्रिरेव यजुषा गृह्णीयात्रिवृद्धि यज्ञ इति । तदनु सकृत्सकृदेवेति ॥ १५८ ॥

मुष्टौ चोत्तमे ॥ १५९ ॥

तूष्णीं चतुर्थमिति ॥ १५९ ॥

दीक्षितस्यामनोज्ञस्वप्नदर्शने मन्त्रवचनमाम्नातम् । तथा-नदीतरणे अववर्षणे अमेध्यदर्शने प्रयाणे च । तत्रैतत्सन्दिह्यते । किं युगपदनेकामनोज्ञस्वप्नदर्शने सकृन्मन्त्रवचनमुत भेदेनेति? । तथा नदीतरणेपि च स्रोतसां भेदे किं भेदेन मन्त्रवचनं उत सकृदिति? । अववर्षणे युगपदनेकधारासन्निपाते किं प्रत्यववर्षणं मन्त्रवचनमुत सकृदिति ? एवं युगपदनेकामेध्यदर्शने वनीवाहनप्रयाणे ऽपि च किं प्रतिप्रयाणं मन्त्रवचनमुत प्रथमे प्रयाण इति ।

---

१ यद्यप्येकः पदर्थो निर्वापादिः तथापि प्रत्यभ्यासं संस्कारभेदोभवति, मन्त्रवता निर्वापेण द्रव्यं संस्कर्तव्यम्, अतो यस्मिन्नेव मुष्टौ मन्त्रो नोच्यते तस्यैव मन्त्रकृतेन संस्कारेण हीनं स्यात् । कार्यप्रयुक्तोहि संस्कारो न क्रियास्वरूप प्रयुक्तः, कार्यं चात्र भिन्नम् । तस्मात् प्रतिमुष्टिमन्त्रावृत्तिरिति भावः ।

यजमानस्य स्वप्नादिदर्शने सकृन्मन्त्रवचनं प्राधानयूप- ६१
योस्तन्त्रेणानुष्ठानं च।

तत्र प्रत्येकं मन्त्रवचने प्राप्त आह—

स्वप्ननदीतरणाव्रवर्षणामेध्यदर्शनप्रयाणेषु तु सकृत्कालद्रव्यैकार्थत्वात् ॥ १६० ॥

यथासम्भवं हेतुविभागः। अनेकस्वप्नदर्शने कालैकत्वात् सकृन्मन्त्रवचनम्। नदीतरणे द्रव्यैकत्वात्। श्रोतसाम्भेदेप्येकमेव नदीद्रव्यमिति सकृन्मन्त्रः। अववर्षणेपि कालैकत्वात् । तथामेध्यदर्शने प्रयाणेषु तु एकार्थत्वात्। एक एवायमर्थो गमनं नाम। तस्याद्यावेव मन्त्रवचनं न प्रतिप्रयाणमिति ॥ १६० ॥

अथ यत्र कालभेदेन पुनस्तदेव निमित्तमापतति। तत्रापि किं सकृद्वचतमुतभेदेनेतिअभिहितमेव तदिति कृत्वा सकृन्मन्त्रवचने प्राप्त आह—

न निमित्तभेदात् ॥ १६१ ॥

नात्र सकृन्मन्त्रवचनम्। भिद्यते ह्यत्र निमित्तमिति कृत्वाभ्यावृत्तिः ॥ १६१ ॥

अप्रधानकाल;सकृदसन्निपातात् ॥ १६२ ॥

अप्रधानकालीनं यदङ्गं, यथा आधानं, तस्य प्रतिकर्म प्राप्तौसत्यामुच्यते। सकृत्कर्त्तव्यम्। न हि तत्कचित्कर्मविशेषे सन्निपतितं यस्यापवर्गेपवृज्येत १ । अतः स्वकालत्वात्सकृदेव कर्त्तव्यम् ॥ १६२ ॥

यूपः ॥ १६३ ॥

सोप्यग्राधेयवद्द्रष्टव्यः। सोप्यप्रधानकालीन एव। दीक्षासु यूपं छिनत्तीति तस्मात्सोपि साधारणः पशुत्रयेपि । नन्वग्न्याधेयाधिकरणन्यायेनैव गतार्थत्वादवाच्यमेतत्। पशवे वै यूपमुच्छ्रयन्तीति प्रतिपशुप्राप्त्याशङ्कानिवृत्त्यर्थमतिदेशः ॥ १६३ ॥

---

१ एवमनभिहितकर्मविशेषेण सर्वोद्देशेनाधाने कृते यद्यपि कारणावशात् किञ्चित्कर्म प्रथममापतति तथापि न तादर्थ्यमेव भवति प्रथमावस्थायामेव सर्वार्थत्वावधारणादिति भावः।

स्वरुश्च स॒ंस्थावचनात् ॥ १६४ ॥

स्वरुरपि यूपवदग्नीषोमीयसवनीयानुबन्ध्यानां साधारण एव। संस्थावचनं हि भवति । स्वरुहोमेन हि यूपः संस्थाप्यत इति। यदि च प्रथममेव हूयेत यूपः साधारणो न भवेत् । तस्मात्सोपि यूपवत्साधारणः ॥ १६४ ॥

तन्निवृत्तेश्च ॥ १६५ ॥

अपि च। तत एव यूपात्स्वरुर्निर्वर्त्यते । तस्य यः प्रथमः शकलः परापतेत् स स्वरुः कार्य इति समामनन्ति ॥ १६५ ॥

दर्शपूर्णमासादिषु चिन्त्यते किं सर्वं स्वयमेव कर्त्तव्यम् । उत किञ्चित्परकर्तृकमपीति ? फलार्थिनः कर्मचोदितं अतस्तेनैव कर्त्तव्यमित्येवं प्राप्त आह—

कर्मणि पुरुषाणाम्[१] ॥ १६६ ॥

अधिकारः । कुत एतत् । परिक्रयाम्नानात् । तद्दृश्यते हि तत्र परिक्रयः । गौर्दक्षिणा हिरण्यं दक्षिणेत्येवमादि ॥ १६६ ॥

एवं सर्वत्र प्राप्ताविदमुच्यते—

प्रधान॒ं स्वामी फलयोगात् ॥ १६७ ॥

यत्प्रधानं स्वद्रव्यपरित्यागपरसत्तापादनरूपं तत्स्वामी करोति । फलयुक्तं हि तदिति । तच्च कुर्वन् फलेन युज्यते इति । एकं सूत्रमेवेदमपरे वर्णयन्ति । परिक्रयाम्नानात् सर्वत्र पुरुषाणां कर्तृत्वे

---

१ अत्र परिक्रयाम्नानादिति शेषः । तथाच, दर्शपूर्णमासादिकर्मणि होत्रध्वर्य्वादीनां कर्तव्यं भवति न यजमानस्य परिक्रयाम्नानादिति सूत्रार्थः। न च यजमानस्य साक्षादकर्तृत्वे अर्थिनः साङ्गं कर्तव्यमिति विरोधः ? प्रयोजकत्वेनापि तस्य कर्तृत्वोपपत्तेः ।

सति प्रधानं स्वामीकरोति। फलयोगादित्युक्तमेव[१] ॥ १६७ ॥

किमेतदेव स्वामीकरोति नेत्याह—

पुरुषयोगिमन्त्रसंस्कारयोस्त्यागे सामर्थ्यात् ॥ १६८ ॥

पुरुषयोगी यो मन्त्रः तनूपा अग्नेसि तन्वं मे पाहीत्येवमादिः प्रत्यगाशीर्युक्तः। यश्चात्मसंस्कारः पावनमुण्डनादिः। तौ द्वावपि त्यागे प्रतिपत्तव्यौ। त्यागशब्देन त्यागाधिकृतो लक्षणया यजमानोऽभिधीयते। यजमानयोगिनौ भवत इत्यर्थः। यजमान एव हि समर्थ आशीः प्रार्थनं कर्तुम्। संस्कारोऽपि च फलप्रतिग्रहयोग्यतापत्त्या यजमानयोग्य एव ॥ १६८ ॥

वचनादन्यत् ॥ १६९ ॥

अन्यद्वचनाद्यजमानस्य भवति। यथा शुक्रं यजमानोन्वारभत इति। ऋत्विजामपि वचनेन संस्कारो भवति। यथा हिरण्यमालिनो वाजपेयेन चरन्तीति ॥ १६९ ॥

---

१ ननु च प्रधानसमकर्तृकत्वादङ्गानामपि स एव कर्ता सेत्स्यति? न, तत्र प्रयोजकत्वेनापि कर्तृत्वानुग्रहात्। द्रव्योत्सर्गे ह्यक्रियमाणे न किञ्चित् यजमानेन कृतं स्यादिति तं करोति। न ह्यात्मनेपदे फलार्थिकर्तृकत्वं गम्यते, किं तर्हि भावनाक्षिप्तकर्तृत्वस्य सतः फलसम्बन्धित्वम्। अतश्च फलेन कर्तुरन्यत्र न गन्तव्यम्, न तु फलार्थिनोऽन्येन व्यापारकरणं विरुध्यते, तावता च सिद्धोऽङ्गेष्वनियम इति। अतोऽङ्गेष्वन्यकर्तृत्वं प्रधाने च स्वामिकर्तृत्वमिति। अन्येष्वपि कर्म कुर्वत्सु यजमानेन यत्नेन कृताकृतप्रत्यवेक्षणं कर्तव्यमेव। अन्यथा हि ऋत्विजः कर्मकर्तृत्वात्प्रमादेन सर्वं कर्म साधनतया यथाश्रुतं न कुर्वन्ति, वैगुण्येऽपि तेषां स्वार्थविनाशाभावात्। तदुक्तं भट्टाचार्यैः, यथैवाध्वर्युणा पदार्थाः कर्तव्यास्तथैव यजमानेनाप्रमादार्थं प्रत्यवेक्षितव्या इति।

शेषमितरे यथा संख्यम् ॥ १७० ॥

इतरे स्वामिव्यतिरिक्ताः शेषं यथाख्यं कुर्वन्ति । या यस्याख्येति ॥ १७० ॥

उपवीतिनः १ ॥ १७१ ॥

कुर्वन्ति स्मृतेः ॥ १७१ ॥

प्राङ्च्युदग्वा ॥ १७२ ॥

प्राञ्च्युदञ्चि च कर्माणि सन्तिष्ठेरन्निति श्रुतिः२ ॥ १७२ ॥

आवृत्तिसामंतेषु३ प्रदक्षिणम् ॥ १७३ ॥

आवृत्तौ सामन्ते च प्रदक्षिणं४ स्मृतेः ॥ १७१ ॥

विपर्यस्य पित्र्येषु तु सकृद्दक्षिणाच ॥ १७४ ॥

पित्र्येषु कर्मसु विपर्यासेनाप्रदक्षिणं कार्यम । सकृच्च । यद-

---

१ तदुक्तं शाङ्खायन श्रौतसूत्रे " यज्ञोपवीती देवकर्माणि करोति " इति ।

२ तथाच श्रुत्यन्तरम, 'तं प्राञ्चमनुसमस्यति प्राची हि देवानां दिगथोऽउदञ्चमुदीची हि मनुष्याणां दिक्' इति । 'तथो हास्यै तत्प्रागेव कर्मकृतं भवति तद्वै प्राङ् निदध्यात् अथोदक् प्राङेव यज्ञोऽनुसन्तिष्ठाता इति तथो हास्योदगेव कर्मानुसन्तिष्ठत, इति च। पात्राणामासादनं दक्षिणत आरभ्योदक् संस्थं; पश्चादाभ्य प्राक्संस्थं वा कार्यम । परिस्तरणपर्युक्षणादिकमप्युत्तरतः समापनीयम, त्रिरुल्लेखनाद्यपि एवमेव कर्तव्यम इतितत्त्वम् ।

३ सामन्तशब्देन परिस्तरणपर्युक्षणनित्यपरिषेकपदपरिलेखपिण्डपरिलेखादिकर्म उच्यते । समन्ततो भवं सामन्तम; सार्वत्रिकमिति तद्व्युत्पत्तेः । तथा च श्रूयते 'दक्षिणान् बाहूनन्वावर्तन्त' इति ।

४ 'प्राचीनावीती पित्र्याणि' इत्युक्तेः यत परिस्तरणादिप्रदक्षिणयुक्तं तत् पित्र्ये अप्रदक्षिणम्भवति इति भावः ।

भ्यस्तरूपं दैवे स्मर्यते तत्पित्र्ये सकृत्कर्त्तव्यम् । यथा परिसमुह्योप-
लिप्योल्लेखनम् । १दक्षिणाच दिक् । न प्राच्युदीची वा ॥ १७४ ॥

प्रधानद्रव्यव्यापत्तौ साङ्गावृत्तिस्तदादेशात् ॥१७५॥

प्रधानस्य च यत्साधनद्रव्यं तस्य व्यापत्तौ विनाशे साङ्गावृ-
त्तिर्भवति । तेन ह्यादिष्टान्यङ्गानि तद्विनाशाच्च विनाशमुपगतानि ।
अपरेन्यथा वर्णयन्ति । द्रव्यमेव संस्पर्शिभिरङ्गैः सहावर्त्तते । नारा-
दुपकारकैरपि । तेन तान्यादिष्टानी२त्युक्तार्थम् ॥ १७५ ॥

इदं श्रूयते । व्रीहिभिर्यजेत यवैर्वा यजेतेति । तत्रैतत्सन्दिह्यते ।
किमुभावपि व्रीहियवौ यागं प्रत्यङ्गभावमुपनेयौ । उत विकल्पेनेति? ।
किं तावत्प्राप्तम् । सूत्रेणैव पक्षः—

गुणानामेकार्थानां सर्वारम्भश्चोदितत्वात् ॥१७६॥

ये गुणा एकप्रयोजना यथा व्रीहियवादयः तैः सर्वैस्तत्कर्मार-
ब्धव्यम् । कुत एतत् । चोदितत्वात् । चोदिता हि ते यागाभिनिर्वृ-
त्ताविति ३ य एव गुणोऽङ्गभावं नोपनीयते तस्यैव श्रुतिरनर्थिका-
स्यादिति ॥ १७६ ॥

एवं प्राप्त आह—

न कृतत्वात् ॥ १७७ ॥

नैतदेवं सर्वैस्तत्कर्मारब्धव्यमिति । किं कारणम् । कृतत्वात् ।
एकेनैव यदा तत्कर्माष्टाकपालाभिनिर्वृत्तिरूपं निर्वर्तितं भवति ।
तदा द्वितीयोपादानमनर्थकं स्यात् । सर्वे हि ते इतरेतरनिरपेक्षा एव
विधीयन्ते ॥ १७७ ॥

अथ यद्येकेनैव निर्वर्त्तिते यागे द्वितीयश्रुत्यनुग्रहाय या-
गाभ्यावृत्तिः क्रियते । तत्रैतदुत्तरसूत्रम्—

---

१ 'एषा वै दिक् पितॄणां या दक्षिणा दिक् सा पितॄणाम्' इति
श्रुतेः ।

२ तदुक्तमापस्तम्बेन "यद्यप्रत्तदेवतं हविर्व्यापद्येतान्यद्धविः
संस्कृत्य प्रयच्छेद्देवतायै" इति ।

३ तच्चोभयोर्यागसाधनत्वे एवेति भावः ।

अनारभ्यत्वात् ॥ १७८ ॥

अनारभ्योयमर्थः । यदुत गुणानुरोधेन प्रधानाभ्यावृत्तिः तस्माद्विकल्पः१ ॥ १७८ ॥

दर्शनाच्च ॥ १७९ ॥

दृश्यते चायमर्थो यथा व्रीहियवयोर्विकल्प इति । हविरुप्तपनं प्रकृत्य श्रूयते । वर्षवृद्धा उ ह्येवैते यदि व्रीहयो यदि यवा इति२। अपि च । समुच्चये सति न व्रीहिभिः कृतो भवति न यवैरिति सङ्कीर्णमन्यदेव द्रव्यान्तरं भवति ॥ १७९ ॥

श्रुत्यानर्थक्यमिति चेत् ॥ १८० ॥

इति चेत् पश्यसि। व्रीहियवयोरेवान्यतरस्य विकल्पेनान्यतरस्य श्रुतिरनर्थिका स्यात् ॥ १८० ॥

कालान्तरेर्थवत्त्वं स्यात् ॥ १८१ ॥

कालान्तरे द्वितीयश्रुतिः सार्थिका भविष्यति । न ह्येकस्मिन्कर्मणि समुच्चयः सम्भवतीत्येतदुक्तम् ३ ॥ १८१ ॥

---

१ न समुच्चय इति हृदयम् ।

२ ज्योतिष्टोमे हि द्रव्यदेवतासंयोगानामदृष्टानामपर्यायविधानात् प्रकरणेन युगपद्ग्रहणात्सर्वसम्पादनाय युक्तं यदभ्यस्यते; व्रीहियवौ तु द्वाभ्यां वाक्याभ्यामन्योन्यनिरपेक्षौ यागद्रव्यप्रकृतितया विधीयमानौ तद्द्वारेण प्रयोगवचनो गृह्णन् पर्यायेणैव गृह्णाति न युगपत् येन बलात्प्रधानाभ्यासः स्यात्, अतो विकल्प एव । समुच्चित्य यजनया तु वाक्यद्वयमपि बाधितं स्यादिति दिक् ।

३ तदुक्तं शाखान्तरे "व्रीहिभिरिष्ट्वा व्रीहिभिर्यजेता यवेभ्यो यवैरिष्ट्वा यवैर्यजेता व्रीहिभ्यो दशपूर्णमासौ" इति । अतो व्रीह्याग्रयणानन्तरं प्राग्यवाग्रयाणात व्रीहिभिरेव दर्शपूर्णयासयागः । यवाग्रयणानन्तरं प्राग्व्रीह्याग्रयणात् यवैरिति । अत्र दर्शपूर्णमासावित्यनेन दर्शपूर्णमासयोरेवायं द्रव्यनियम उक्तः, तेनान्यासु विकृतिषु नायं द्रव्यनियम इति धूर्तस्वामिनः ।

आघारं प्रकृत्यगुणाः समाम्नाताः । ऋजुमाघारयति सन्ततमाघारयति दीर्घमाघारयति प्राञ्चमाघारयति तेषामेककार्यत्वादुक्तेन न्यायेन विकल्पे प्राप्त आह—

## धर्ममात्रेषु समुच्चयो विरोधे ॥ १८२ ॥

ये गुणा धर्ममात्राः तेषां समुच्चयः । कुत एतत् । अविरोधे हि ते वर्त्तन्ते । कथम् । ऋजुसन्ततं न विरुणद्धि । न सान्तत्यं प्राञ्चम् । प्रतिनियतानि ह्यदृष्टानि । तस्मादृज्वादीनां समुच्चयः । ननूक्तमेककार्यत्वादिति । सत्यम् । परमेकं कार्यम् । अवान्तरकार्याणि तु भिन्नानि । यदृजुना क्रियते । न तत्सन्ततेन यत्सन्ततेन न तत्प्राञ्चेति ॥१८२॥

होत्राधानयोः क्रियमाणानुवादिनामग्निमन्थनप्रणयनादिषु होतृकाणां आधानमन्त्राणां च भूर्भुवः स्वरिति किमेषां समुच्चय, उत विकल्प इति?। मन्त्राणां क्रियाभिधायकत्वं तत्साधनाभिधायकत्वं च दृष्टं प्रयोजनमिति विकल्पे प्राप्त आह—

## होत्राधानयोः ॥ १८३ ॥

होतृकाणां मन्त्राणां अधस्तनसूत्रोपात्तः समुच्चयोनुकृष्यते । यत्कारणमदृष्टार्था हि ते क्रियमाणानुवादिनः । करणमन्त्राणां च विकल्प इष्यते । दृष्टार्थत्वात् । क्रियमाणानुवादिनस्त्वदृष्टार्थायेति समुच्चयः१ । आधानमन्त्राणां तु समुच्चयो वाचनिकः । त्रिभिरक्षरैर्गार्हपत्यमादधाति पञ्चभिराहवनीयमिति ॥ १८३ ॥

सर्वत्र होतृकाणां समुच्चये प्राप्त आह—

## न याज्यानुवाक्यासु विरोधात् ॥ १८४ ॥

एकस्मिन्प्रकरणे याज्यानुवाक्यालक्षणयुक्तानां समुच्चयो न भवति । देवतास्मरणार्था ह्यनुवाक्या । हविः समर्पणार्था च याज्या । अतो दृष्टार्थत्वाद्विकल्पः । तथाचाह । ह्वयति वा अनुवाक्यया प्रयच्छति याज्ययेति ॥ १८४ ॥

---

१ तथाच श्रुतिः " त्रिःप्रथमामन्वाह त्रिरुत्तमाम् " " आग्नेयीरन्वाह " " एकादशान्वाह नवान्वाह दशान्वाह " इत्यादि ।

## दर्शनाच्च ॥ १८५ ॥

दृश्यते चायमर्थो यथा याज्यानुवाक्यासु न समुच्चयः । प्राजापत्यान्प्रकृत्यामनन्ति । एकानुवाक्या भवत्येका याज्यैकदेवत्या हीति । देवतैकत्वं हेतुं ब्रुवन् याज्यानुवाक्ययोरेकत्वं च प्रदर्शयति । तथापितृयज्ञे पुरोनुवाक्यां प्रकृत्यामनन्ति । एकया व देवान्प्रच्यावयन्ति द्वाभ्यां पितॄनिति अनुवाक्याद्वित्वविधिपरेवाक्ये एकत्वं दर्शयति १ ॥ १८५ ॥

## प्रायश्चित्तेषु दोषनाशात् ॥ १८६ ॥

एकस्मिन् कर्मणि प्रायश्चित्तबहुत्वे आम्नाते२ किं समुच्चय, उत विकल्प इति ? । विकल्प इति ब्रूमः । कुतो दोषनिर्घातार्थं हि प्रायश्चित्तं भवति । दोषदर्शने हि सति तदाम्नायते ततस्तन्निर्हृतिरेव प्रयोजनं तेन विकल्प्यते ३ ॥ १८६ ॥

---

१ एवमेव महापितृयज्ञे पुरोऽनुवाक्या प्रस्तावे " स द्वे पुरोऽनुवाक्ये अन्वाहैकया वै देवान् प्रच्यावयन्ति द्वाभ्यां पितॄन् " इत्यादावप्येकत्वं सिद्धं दर्शयति । तस्मादत्रापि विकल्प एवेति भावः ।

२ " यो ऽमावास्यां पौर्णमासीं वातिपातयेदग्नये पथिकृते ऽष्टाकपालं पुरोडाशं निर्वपेत् " " यो ऽमावास्यां पौर्णमासीं वातिपातयेद्वैश्वानरन्द्वादशकपालं निर्वपेत् " इत्यादिना बोधिते इत्यर्थः ।

३ अयमभिप्रायः, वैगुण्यं निमित्तीकृत्य वाक्येन विधीयमानानिप्रायश्चित्तानि वैगुण्यनाशकत्वात् प्रत्येकं समर्थानि विज्ञायन्ते । तेषां विकल्पसमुच्चयविचारे अदृष्टार्थत्वात्समुच्चये प्राप्ते एकैकेन वाक्येन निरपेक्षविधानाद्वारैक्याद्विकल्प एव न समुच्चयः । तदुक्तं द्वादशाध्याये तृतीयपादे चतुर्दशसूत्रे जैमिनिना " प्रायश्चित्तेषु चैकार्थ्यान्निष्पन्नेनाभिसंयोगस्तस्मात्सर्वस्य निर्घात " इति । अस्यार्थः, प्रायश्चित्तेषु विकल्पस्यात्, कुतः ? ऐकार्थ्यात्, कथमैकार्थ्यम् ? यत एकेषां निष्पन्नेन दोषेण केवलस्य तस्याभिसंयोगो यद्युक्तो यज्ञ आर्त्तिमियाद्भूः स्वाहेति गार्हपत्ये जुहुयात् इति, तस्मात् सर्वस्य दोषस्यैकेन निर्घातः । एकेन चेन्निर्हतो दोषस्तर्हि द्वितीयादीनि प्रयोगान्तरार्थानि भवन्ति । एवं स्मार्तेष्वपि द्रष्टव्यम् । तत्र द्वितीयं सूत्रम् " समुच्चय-

एकेन च निहते दोषे द्वितीयमनर्थकमित्येवं प्राप्त आह—

नाश्रुते ॥ १८७ ॥

प्रायश्चित्ते कृते दोषः प्रयातीति नैवं श्रुतिरस्ति ॥ १८७ ॥

प्रत्यक्षाच्च ॥ १८८ ॥

प्रत्यक्षेणापि दोष निर्घातो न दृश्यते । भिन्ने जुहोति स्कन्ने जुहोतीति । कृतेपि होमे न भिन्नमभिन्नं भवति । न च स्कन्नमस्कन्नम् । अतो धर्म मात्रं, तस्मात्समुच्चयः ॥ १८८ ॥

स्याद्वा दर्शनात् ॥ १८९ ॥

भवेद्वा केषुचित्प्रायश्चित्तेषु दोषनिर्घातार्थता । यथा महाव्याहृतिहोमेषु । दोषनिघातो ह्यत्र दृश्यते । स यथा पर्वणा पर्व सन्दध्यादेवꣳ हैव च सन्दधाति य एताभिर्भिषज्यतीति सन्धानभैषज्ये दर्शयति ॥ १८९ ॥

एवं प्राप्त आह—

नाऽन्यार्थत्वात् ॥ १९० ॥

नैतदेवं सन्धानभैषज्ये दृष्ट्वा विकल्प इति । किं कारणम् । अन्यार्थे ह्येते । किमर्थे इति चेत् । महाव्याहृतिस्तुत्यर्थे, इत्थं

---

स्त्वदृष्टार्थेषु ( १२. ३. २५ ) यानि पुनर्न दोषनिर्घातार्थानि तेषु समुच्चयः, कानि पुनस्तानि ? यानि न शिष्टस्याक्रियायां प्रतिषिद्धस्य करणे वा विधीयन्ते, यथा 'यस्याहुतमग्निहोत्रꣳ सूर्योऽभ्युदियान्मैत्रं चरुं निर्वपेत् सौर्यमेककपालम्' तथा 'यस्याहुतमग्निहोत्रꣳ सूर्योऽभ्युदियादग्निꣳ समाधाय वाचं यत्वा दम्पती सर्वाहमुपासीयाताम्' इति । तत्र दोषो न दृश्यते दोषस्याभावान्निर्घातार्थता च नास्ति केवलमभ्युदये निमित्ते कर्म विधीयते तन्नैमित्तिकं च कर्मणः प्रकरणे उत्पन्नत्वात् कर्माङ्गं विज्ञायते । तत्र यावन्ति चोद्यन्ते तानि सर्वाणि प्रयोगवचनेन सङ्गृह्यन्ते । अतस्तेषां समुच्चयः । तदेवं जैमिनेः सिद्धान्तः, प्रमादापतितस्य वैगुण्यस्य समाधानार्थानां विकल्पः, निमित्ते सति कर्माङ्गानां समुच्चय इति सङ्क्षेपः ।

नाम प्रशस्तो महाव्याहृतिहोमो येन सन्धानभैषज्ये क्रियेते । तस्माददृष्टार्थत्वम् ४ ॥ १९० ॥

इदानीमिदं विचार्यते । कर्मणि प्रयुज्यमानानां मन्त्राणां किं यथाम्नातस्वरेण प्रयोग, उत भाषिकस्वरेण ? भाषिकस्वरो ब्राह्मणस्वरः । आहोस्विदेकश्रुत्या तानेनेति? किं तावत्प्राप्तम् । सूत्रणैव पक्षः—

मन्त्रे स्वरक्रिया यथाम्नातमविशेषात् ॥ १९१ ॥

कर्मणि प्रयुज्यमाने मन्त्रे आम्नातस्वरेण प्रयोगः । कुत एतदविशेषात् । न विशेषोवसातुं शक्यते अनेन स्वरेण अनेन वा प्रयोग इति । तस्मात्समाम्नायस्वरः ॥ १९१ ॥

एवं प्राप्त आह—

भाषिकस्वरो वोपपन्नमन्त्रोपदेशात् ॥ १९२ ॥

वा शब्दः पक्षव्यावृत्तौ । भाषिकस्वरो वा भवति ब्राह्मणरः । न मन्त्रस्वरः । कुत एतत् । उपपन्नस्वरस्यैव मन्त्रस्य विद्यमानस्वरस्य ब्राह्मणे स्वरान्तरेणोपदेशो भवति । तस्माद्भाषिक-

---

४ अपराव्याख्या " स्याद्वादर्शनात् " प्रायश्चित्तानि द्विविधानि, कानि चिद्वैगुण्यस्य प्रमादापतितस्य समाधानार्थानि, कानि चिन्निमित्ते कर्माङ्गानि । तत्र यानि वैगुण्यसमाधानार्थानि तेषु दोषनिर्घातः स्यात्, कुतः ? दर्शनात् "स यथा पर्वणा" इत्यादिनातदुक्तम् । एकेन च निर्हते दोषे न द्वितीयस्य प्रयोजनमित्यकमेव किंचिद्विकल्पेन कर्तव्यमिति सिद्धान्तः । एवमेव सर्वेषु प्राप्ते आह "नान्यार्थत्वात्" प्रयाश्चित्तानि न दोषे निर्घातार्थानि किन्तु भेदनादिनिमित्ते सति कर्माङ्गानि, तेषु दोषेऽसति न तन्निर्घातार्थतार्थता कुतः ? अन्यार्थत्वात्, तत्र हि न प्रायाश्चित्तस्य विनष्टसमाधानं कार्यम्, किञ्च स एवार्थो दृष्टः, न च होमादिना भिन्नं स्कन्नं वा अभिन्नमस्कन्नं च कर्तुं शक्यते, अत एवं विधे निमित्ते यानि विधीयन्ते तान्यदृष्टार्थान्येव, तस्मात्तेषु समुच्चय इति । एवं च जैमिनिसिद्धान्तेनाविरोधि व्याख्यानं भवति, अतो युक्तमेवेति दिक् ।

स्वर इति ॥ १९२ ॥

एवं प्राप्त उच्यते—

तानो[1] वा नित्यत्वात् ॥ १९३ ॥

वा शब्दः पक्षान्तरपरिग्रहे । नैतदस्ति यद्भाषिकस्वर इति । तानेन प्रयोगः । एकश्रुत्या प्रयोग इत्यर्थः ॥ १९३ ॥

कुत एतत्—

एकश्रुतिदूरात्सम्बुद्धौ यज्ञकर्मणि सुब्रह्मण्यासाम-
जपन्यूङ्खयाजमानवर्जम् ॥ १०४ ॥

स्मर्यते ह्येवमेकश्रुतिदूरात्सम्बुद्धाविति वर्त्तमाने यज्ञकर्मण्यजपन्यूंखसामसु । एवमादिवर्जितानां मन्त्राणां एकश्रुत्या तानेन प्रयोगः[2] । ननु चेयं स्मृतिः । श्रुत्या च मन्त्रप्रयोगः स्वरान्तरेणोच्यते । नैव श्रुतिर्मन्त्रप्रयोगार्था । तं प्रथयत्युरुप्रथा उरुप्रथस्वेति प्रयोगवचनेनोपसंगृहीतत्वात् । लिङ्गेन प्रथने प्राप्नोत्येवं तत्र श्रुतिरर्थवादार्था । उरुते यज्ञपतिः प्रथतामिति । प्रशस्तमेतत्प्रथनं येन यज्ञपतिरपि प्रजया पशुभिश्च प्रथत इति । अपि च नित्या स्मृतिरविच्छिन्नपारम्पर्यात् । अथ वा नित्यत्वादिति । नित्यं वैदिकं वचनं स्मृतानां तन्मूलमिति । एवं च स्मृतेर्नित्यत्वम् ॥ २०४ ॥

आधाने श्रूयते षड्देया द्वादशदेया इत्येवमादि । तत्र सन्देहः । किं दानसंयोगे संख्याविकल्पते । उत समुच्चीयत इति ? ।

---

१ तान एकश्रुतिरित्यर्थः ।

२ सुब्रह्मण्योमिन्द्रागच्छेत्यादिर्निगदः सुब्रह्मण्या, सामानि उद्गातृभिर्यज्ञे गीयमानानि, जपाश्च धूरसि इन्द्रस्य बाहुरसि मर्यादित्याद्या जपतीति शब्देनचोदिता मन्त्राः, न्यूङ्खास्तु पृष्ठ्ये षडहे होतृवेदे प्रसिद्धा ओकारा द्वादश पिबा सोममिन्द्र मन्दतु त्वा यं ते ओ ओ ओ ओ ओ ओ ओ ओ ओ ओ सुषाव हर्यश्वाद्रिरित्यादयः, याजमानं च सर्वं विष्णुक्रमणादिकम्, तत्सम्बन्धिनो ये मन्त्राः दिविविष्णुरित्याद्याः एषु नैकश्रुतिर्भवतीति सूत्रस्य हृदयम् ।

सर्वासामाम्नातत्वात्समुच्चये प्राप्त आह—

संख्याविकल्पो दानसंयोगे कृतत्वात् ॥ १९५ ॥

दानसंयोगे या संख्या श्रूयते सा विकल्पेन भवितुमर्हति । कुत एतत् । एकेन संख्याविशेषेणानत्यर्थस्य निर्वर्त्तितत्वात् । आनत्यर्थश्चैतद्दानं न धर्ममात्रम् । स एष यज्ञो हतो नददक्षे तं देवा दक्षिणाभिरदक्षयन्निति प्रकृत्यामनन्ति । ता वै षड्दद्यादित्येवमादि ॥ १९५ ॥

अस्त्यग्नीषोमीयः पशुस्तत्र श्रूयते । श्वभ्र उवध्यमवदधाति । वसां जुहोति । अध्यूध्नीं होत्रे प्रयच्छति । वनिष्ठुमग्नीधे प्रयच्छति । तच्च चोदकेन पञ्चपश्वादिपशुगणे प्राप्तम् । तत्र सन्देहः । किमवध्यादीनां समुच्चय, उत विकल्प इति ?। किं तावत्तावत्प्रतिभाति । एकेनैव द्रव्येण तस्याः क्रियाया निर्वर्त्तितत्वाद्विकल्पे प्राप्ते आह—

उवध्यवसाध्यृध्नीवनिष्ठुषु समुच्चयो
द्रव्यसंस्कारतद्भेदाभ्याम् ॥ १९६ ॥

उवध्यादिषु समुच्चयो न विकल्पः । कुत एतत् । द्रव्याणि हि तया क्रियया संस्क्रियन्ते । प्रतिपाद्यन्ते । नात्र द्रव्यं क्रियार्थं क्रिया एव द्रव्यार्थेति क्रियानिर्वृत्त्युत्तरकालं चरितार्थस्य द्रव्यस्य प्रतिपत्तिः संस्कारः संस्कार्याणि भिन्नानि । यस्यैव पशोः शेषसंस्करो न क्रियते तस्यैव संस्कारहानाद्वैगुण्यमापद्यते । तस्मात्समुच्चय[१] इति । भूतभव्यसमुच्चारणन्यायेन द्रव्यमन्यत्र क्रियार्थम् । एकेनैव च क्रियाया निर्वर्त्तितत्वान्न द्वितीयेन प्रयोजनामिति ॥ १९६ ॥

ज्योतिष्टोमे क्रयं प्रकृत्यामनन्ति । हिरण्येन क्रीणाति । वाससा क्रीणाति । गवा क्रीणातीत्येवमादि । तत्रैतत्सन्दिह्यते । किं क्रयचोदना गुणेषु समुच्चय, उत विकल्प इति ?। किं तावत्प्राप्तम् इतरेतरनिरपेक्षत्वाद्दक्षिणा संख्या विकल्पवत् विकल्प प्राप्ताविदमाह—

---

१ उपलक्षणमिदं गुदजाघन्यादिष्वपि समुच्चयस्य ।

चोदनागुणेषु च प्रक्लृप्त्युपबन्धाभ्याम् ॥ १९७ ॥

अधस्तनसूत्रोपात्तसमुच्चयानुकर्षणार्थश्चशब्दः । क्रयचोदनागुणेषु समुच्चयो न विकल्पः। प्रक्लृप्तएव हि सोमे विद्यमाने कर्ममध्ये क्रयश्चादितस्तेनास्य धर्ममात्रता । न ह्ययमप्राप्तस्य सोमस्य परिप्रापणार्थः । धर्ममात्रत्वाद्यथाचोदितः कार्यः । चोदना च सर्वद्रव्याणां । तस्मात्समुच्चयः । अपि च संख्योपबध्यते । तं वै दशभिरेव क्रीणीयान्नादशभिरिति ॥ १९७ ॥

१गार्हपत्याहवनीयौ न व्यवेयात् ॥ १९८ ॥

अर्थलक्षणेषु सञ्चरणेषु ॥ १९८ ॥

२विवृत्यावृत्य वेतरथावृत्तिः ॥ १९९ ॥

विवर्त्तनमप्रदक्षिणम् । आवर्त्तनं प्रदक्षिणं । एते शास्त्रतः कृत्वा इतरथावृत्तिः कार्या ॥ १९९ ॥

अतीत्य निष्क्रमणम् ॥ २०० ॥

यत्र सञ्चरणमार्गेण शास्त्रात्प्रविष्टः । यथान्तरेणापराग्नीगत्वा व्रतग्रहणे तत्र तत्पदार्थाभिनिर्वृत्त्युत्तरकालमतीत्य तेनैव मार्गेण निःक्रमणम् ॥ २०० ॥

३उत्तरत उपचारो यज्ञः ॥ २०१ ॥

उत्तरत उपचारो वै यज्ञ इति श्रुतेः । अनियतदेशस्य कर्मणो देशोयम् ॥ २०१ ॥

---

१ विना वचनं गार्हपत्याहवनीयौ न व्यवेयात् तयोर्व्यवायं न कुर्यात् तयोरन्तरालेन न गच्छेत्, नापि स्फ्योदपात्रादिकमन्तरालेन नयेदित्यर्थः ।

२ निवृत्य प्रदक्षिणमावृत्य आवृत्य आवर्तनं कृत्वा प्रदक्षिणमावृत्य वा इतरथावृत्तिः प्रत्यावृत्तिः कर्तव्येत्यर्थः ।

३ यज्ञ उत्तरत उपचारो भवति, उत्तरतः विहारादुत्तरदेशे उपाचारणं कर्म करणं यस्यासावुत्तरत उपचारः, सर्वं कर्म विहारादुत्तरदेशे कर्तव्यमित्यर्थः ।

दक्षिणतो ब्रह्मयजमानयोरासने ॥ २०२ ॥

भवतः । ब्रह्मा वै यज्ञस्य दक्षिणत आस्ते इति वचनात् । अथ हैषैव तुला यद्दक्षिणो वेद्यन्त इति प्रकृत्य तस्माद्दक्षिणं वेद्यन्तमधिस्पृश्येवासीतेति ॥ २०२ ॥

पश्चाद्यजमानो वेदिस्पृक् ॥ २०३ ॥

ब्रह्मणः पश्चाद्यजमानो वेदिसंलग्न आस्ते १ ॥ २०३ ॥

अध्वर्युः कर्मसु वेदयोगात् ॥ २०४ ॥

अध्वर्युवेदविहितस्य कर्मणश्चत्वार ऋत्विजः कर्त्तारः । तेषामनागृहीतकर्तृके कर्मण्यध्वर्युः कर्त्ता । कुत एतत् । वेदयोगात् । अध्वर्युणा हि वेदो युज्यते । समाख्यायते । अध्वर्युवेद इति । यदि तद्वेदविहितानामध्वर्युः कर्त्ता तदैतदुपपद्यते ॥ २०४ ॥

वचनविरोधाभ्यामन्यः २ ॥ २०५ ॥

तद्यथा प्रतिप्रस्थाता मन्थिनं जुहोति वचनात् । विरोधादपि पेषणोपधानयोर्युगपद्विधानादुपधानेऽग्नीत् ॥ २०५ ॥

हविष्पात्रस्वाम्यृत्विजाम् ३ ॥ २०६ ॥

समावेशे सत्युत्तरमुत्तरं बहिर्भवति ॥ १०६ ॥

पूर्वं पूर्वमन्तरम् ॥ २०७ ॥

भवति ॥ २०७ ॥

---

१ तथाच श्रुतिः, "अथ हैषैवतुला यद्दक्षिणो वेद्यन्तः स यत्साधु करोति तदन्तर्वेद्यथ यदसाधु तद्बहिर्वेदि तस्माद्दक्षिणं वेद्यन्तमधिस्पृश्येवासीत" इति ।

२ वचनाद्विरोधाच्चाध्वर्योरन्योऽपि यजुर्वेदविहितस्य कर्मणः कर्ता भवतीति सूत्रार्थः ।

३ हवींषि च पात्राणि च स्वामी च ऋत्विजश्च हविष्पात्रस्वाम्यृत्विजः तेषाम् ।

ऋत्विजां च१ यथापूर्वम् ॥ २०८ ॥

ऋत्विजां च यथापूर्वं समावेशे सत्युत्तमुत्तरं बहिर्भवति । पूर्वं पूर्वमन्तरं भवति ॥ २०८ ॥

न वा चोदित्वात् ॥ २०९ ॥

न वायमन्तर्बहिर्भावो भवति । न ह्यस्य ब्राह्मणे चोदनेति । एवमभिहिते पुनरावीतेन व्याख्यायते । अचोदितत्वात् । नायमन्तर्बहिर्भावः स्याद्यदि न स्मर्यते स्मर्यते च । तस्मादस्त्येवेति २ ॥ २०९ ॥

गार्हपत्ये संस्काराः ॥ २१० ॥

३प्रतपानादयो भवन्ति ॥ २१० ॥

श्रपणं वाहवनीये ॥ २११ ॥

आहवनीये वा भवति । गार्हपत्ये वा ४ एवमेवहि श्रू-

---

१ चकाराद्धविषां तत्पात्राणां सत्त्रगणयागादौ स्वामिनां चैवमन्तर्बहिर्भावो ज्ञेयः ।

२ तद्यथा " तामन्तरेण यूपं चाग्निं च हरन्ति " इति । " प्रत्याहृत्य वा सोमाहवनीययोरव्यवायात् " इत्यादि, अन्तर्बहिर्भावश्चात्राग्न्यवधिकः । तेन वपा अग्नेरव्यवहिता, यूपस्तु पात्रत्वाद्वपापेक्षया बहिः, प्रतिप्रस्थाता तु ऋत्विक्त्वाद्यूपादपि बहिर्भवतीति भावः ।

३ प्रतपनं आदिर्येषां ते प्रतपनादयः, ते च अधिश्रयणपर्यग्निकरणपात्रप्रतपनादयः, एतेषां संस्काराणां विशेषवचनाभावे गार्हपत्येऽनुष्ठानमित्यर्थः ।

४ आदिविकल्पोऽयम्; नेच्छाविकल्पः । " तच्छ्रापिण " इति तच्छ्रापित्वस्य नियतत्वेनानुवादात् । तदुक्तम् " रूपं कालोऽनुनिर्वाप्यः श्रपणं देवतास्तथा, आदौ ये विधृताः पक्षास्त इमे सर्वदास्मृताः " इति । रूपं कर्म स्वरूपं दाक्षायण पौर्णमासादिकम्, काल उदिताऽनुदितादिः, अनुनिर्वाप्यो वैमृधादिष्टौ, श्रपणं हविः श्रपणं गार्हपत्ये वाहवनीये वा, देवता ऐन्द्रं भवति माहेन्द्रं वा, एतेषां विकल्पानां मध्ये यः प्रथमं स्वीकृतः स एव यावज्जीवं कर्तव्यः न पक्षान्तरम् । एवमेते पञ्चैवादिविकल्पाः । अन्ये सर्वेऽपीच्छा विकल्पा इति दिक् ।

यते ॥ २११ ॥

आज्येन यूपं समनक्तीति श्रूयते । तत्रैतच्चिन्त्यते किमाज्यशब्दः संस्कारनिमित्त उत जातिनिमित्त इति ?। किं तावत्प्राप्तं । प्रयोगप्राचुर्यात्संस्कारनिमित्त इत्येवं प्राप्त इदमाह—

घृतमाज्ये लिङ्गात् ॥ २१२ ॥

आज्ये चोदिते घृतं प्रतीयात्। जातिनिमित्त १ आज्यशब्दो न संस्कारनिमित्त इति । असंस्कृतेपि हि प्रयोगो दृश्यते। क्रेयमाज्यं क्षीणमाज्यं तैलमुपसेवनं वर्त्तते । नन्वयमेकदेशे प्रयोगः । सत्यमेवं । एकदेशप्रयोगोपि वाचकशक्तिमन्तरेण न भवति । लिङ्गाच्च लिंङ्गं चाश्व मेधे ब्रह्मौदनंप्रकृत्य भवति । यदाज्यमुच्छिष्यते तेन रशनामभ्यज्यादत्त इति । असंस्कृतेप्याज्यशब्दप्रयोगो भवति । अपरे लिङ्गादिति वर्णयन्ति लिङ्गाद्द्रव्यमेव भवति । आज्यनिर्वापं प्रकृत्यामनन्ति । महीनां पयोसीति मह्य इति ह वा एतासामेकं नाम यद्गवामिति २ ॥ २१२ ॥

तस्य होमो नादेशे ॥ २१३

तस्येत्यवयवलक्षणा षष्ठी । द्रव्यान्तरस्याविधाने तेन होमः कर्त्तव्यः ३ ॥ २१३ ॥

---

१ प्रयोजनं 'आज्येन यूपमनक्ति' 'आज्यमासिच्योद्गात्रे सोम्यं प्रपच्छति' इत्येवमादौ संस्काराभावः ।

२ तथाच मण्डनमिश्राः—

'घृतार्थे गोघृतं ग्राह्यं तदभावे तु माहिषम् ।
आज्यं वा तदभावे तु साक्षात्तैलं ग्रहीष्यते ॥
तैलाभावे ग्रहीतव्यं तैलं जर्तिलसम्भवम् ।
तदभावेऽतसीस्नेहं कौस्तुभं सर्षपोद्भवम् ॥
वृक्षस्नेहोऽथवा ग्राह्यः पूर्वालाभे परः परः ।
तदभावे यवव्रीहिश्यामाकान्यतरोद्भवम् ॥
पिष्टमालोड्य यत्नेन घृतार्थे योजयेत् सुधीः ।
वृक्षतैलेषु पुन्नागनिम्बैरण्डोद्भवं त्यजेत्' इति ॥

३ तद्यथा 'सव्येनावृत्यदक्षिणाग्नौ जुहोत्यग्नय इति सरस्वत्या इति च' इति । 'नमः कृतायेति जुहोति' इति च । अत्र सर्वत्राज्येनैव होमो भवति ।

## चात्वालात्पुरीषम् ॥ २१४ ॥

यज्ञकर्मणि यत्पुरीषं तच्चात्वालाद्ग्राह्यम् ॥ २१४ ॥

## आहवनीययजतयो ध्रुवायाः १ ॥ २१५ ॥

सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यमिति वचनात् । तत्र केचिदुपस्तरणाभिघारणे अपि ध्रौवादेवाज्यादिच्छन्ति । उपस्तरणाभिघारणे अपि यज्ञसाधने एवेति । तत्पुनरयुक्तम् । द्व्यवदानसंस्कारके ह्येते । न यज्ञसाधने । कुत एतत् । उत्पद्यमानएवायं यागोऽष्टाकपालसाधनकएवोत्पन्न आग्नेयोऽष्टाकपालोभवतीत्यनेन । तत्रान्यद्द्रव्यान्तरं न विकल्पते । न समुच्चीयते । न चवैपरीत्येन बाध्यबाधकभावेन वाभिसम्बध्यते । उत्पत्तिगुणविरोधात् । अतोद्व्यवदानसंस्कारोयम् । तथाचाह । स आज्यस्योपस्तीर्य द्विर्हविषोवदायाथोपरिष्टादाज्यस्याभिघारयति । सैषाऽऽज्येन मिश्राहुतिर्हूयत इति । मिश्रणत्वेनाज्यमभिधीयते । न यागसाधनत्वेनेति । अथ संस्कारकाण्यपि ध्रौवाद् गृह्यते । तदानीं पुरोडाशाभिघारणोपस्तरणप्राणदानादीन्यपितत एव प्राप्नुवन्ति । अस्तुतथेतिचेत् । न स्थाल्यानर्थक्यात् ॥ २१५ ॥

## इडाप्राशित्राघारांश्चैके ॥ २१६ ॥

ध्रौवादेवेच्छन्ति । तत्रापि हि यज्ञसंशब्दनं भवति । पाकयज्ञिययेव वा एतदिडया च्यरिषुरितीडायां । तथा प्राशित्रं प्रकृत्यामनन्ति । तद्यथैव यज्ञस्यावदानमेवमेषतदिति शिरो वै यज्ञस्यैतयोरन्यतर आघारयोरिति यज्ञसंशब्दनं भवति । एके तन्नेच्छन्ति । अयज्ञत्वात् । उपचारिकाण्येतानि यज्ञसंशब्दनानि ॥ २१६ ॥

---

१ आहवनीये ये आज्यहविष्कायागा भवन्ति ते ध्रुवायाः सकाशादाज्यमवदायकार्या इत्यर्थः । 'उपस्तृणन्नभिघारयन्नाज्यस्य यजन्ध्रुवाया गृह्णाति' इतिश्रुतौ आज्ययागार्थत्वेन ध्रौवस्य बोधनात् इति ।

१प्राञ्चावाघारौ ॥ २१७ ॥

होतव्यौ ॥ २१७ ॥

२विदिशावेके ॥ २१८ ॥

जुह्वति ॥ २१८ ॥

आहवनीये होमाः श्रुतिसमाख्यानाभ्याम् ॥२१९॥

यदाहवनीये जुह्वतीति श्रुतिः । आ एत्यैतस्मिन्नहूयत इति आहवनीयसमाख्यानम् ॥ २१९ ॥

जुह्वावचने ॥ २२० ॥

अवचनेऽन्यस्य होमार्थस्य द्रव्यस्य जुह्वा होमः कर्त्तव्यः । कुत एतत् । समाख्यानात् हूयते ऽनयेति जुहूः । एतच्च दर्शपूर्णमासप्रकरण एव तद्विध्यन्तग्राहकेषु च । तत्रैव जुहूर्दृष्टेति ॥ २२० ॥

सकृद्गृहीतार्थावाप्तेः ॥ २२१ ॥

सकृद्गृहीतेन होमः कर्त्तव्यः । सकृद्गृहीतेनैव हि होमार्थाभिनिर्वृत्तिरवाप्ता भवतीति ॥ २२१ ॥

किञ्च—

---

१ पूर्वाघार उत्तराघारश्चैतौ द्वावप्याघारौ प्राञ्चौ प्राक् संस्थौ होतव्यौ ऋजू सन्ततौ दीर्घौचेति सूत्रार्थः । 'ऋजुमाघारयति' 'सन्ततमाघारयति' 'दीर्घमाघारयति' 'प्राञ्चमाघारयति' इति श्रुतेः । सूत्रे प्राञ्चावित्युक्तिस्तु ऋज्वाद्युपलक्षिकेति भावः ।

२ एके शाखिनः आघारौ विदिशौ जुह्वति, आहवनीयस्योत्तरश्रोणेरारभ्य दक्षिणांसपर्यन्तं पूर्वाघारम्; दक्षिणश्रोणेरारभ्योत्तरांसपर्यन्तमुत्तराघारमिति । तथा च सूत्रान्तरम् 'उत्तरपश्चार्धादग्नेरारभ्याविच्छिन्नं दक्षिणतोजुहोति' 'तथादक्षिणपश्चार्धादारभ्याविच्छन्नमुत्तरतो जुहोति' इति ।

## अवषट्कारातिरेकाच्च ॥ २२२ ॥

अवषट्कारास्वाहुतिषु द्वितीयमेवावदानमतिरिक्तं ज्ञापयति। कथम्। तद्वै चतुरवत्तं भवतीदं वा अनुवाक्याथ याज्याथ वषट्कारोथ सा देवता चतुर्थी यस्यै देवतायै हविर्भवतीति प्रकृत्याह। अतिरिक्तं ह तदवदानं यत्पञ्चममिति। तेनावषट्कारास्वाहुतिष्वनुवाक्याद्यभावाद्द्वितीयमेवावदानमतिरिक्तमिति ज्ञापितं भवति। तथा यच्चतुरुन्नैषीर्द्विरहौषीरथ के ते द्वे आहुती इति द्वयोरतिरिक्ततां दर्शयति ॥ २२२ ॥

## व्रीहीन्यवान्वा हविषि ॥ २२३ ॥

हविषि चोदिते व्रीहीन्यवान्वा प्रतीयात् ॥ २२३ ॥

## तस्या द्विरवद्यति ॥ २२४ ॥

तस्य सकलस्यैव देवतोद्देशेन गृहीतस्य होमे प्राप्ते वचनाद्द्विरवद्यति ॥ २२४ ॥

## त्रिजर्मदग्नीनाम् ॥ २२५ ॥

जमदग्नीनां त्रिरवद्येत्। पञ्चावत्तं १ जमदग्नीनामिति वचनात् ॥ २२५ ॥

## २पश्चात्तृतीयम् ॥ २२६ ॥

---

३ एवं च यत्र यत्रान्येषां चतुरवत्तमाज्यभागपत्नीसंयाजप्रधानयागादौ तत्र सर्वत्र जमदग्नीनां पञ्चावत्तमेव कर्त्तव्यम्। अग्निहोत्रहोमेऽपि तेषां पञ्चावत्तमेव पठ्यते मानवे "चतुः पञ्चकृत्वो वा" इति। आपस्तम्बोऽपि। त्रिजर्मदग्नीनाम्, इति सूत्रयामास। अत्र जमदग्निपदमुपलक्षणम्, अन्येषामपि पञ्चावत्तं स्मर्यते। तथाहि—

"जमदग्निवत्सविदा वार्ष्टिषेणास्तथैव च।
पञ्चावत्तिन एतेऽन्ये सर्वे चतुरवत्तिनः" इति ॥

४ तृतीयमवदानं हविषः पश्चाद्भागादवदेयम्। प्रथमद्वितीये तु मध्यात्पूर्वार्धादिति वक्ष्यते।

अवदेयम् ॥ २२६ ॥

सर्वेषां वोभयमविधानात् ॥ २२७ ॥

सर्वेषां वोभयं भवतीति । चतुरवत्तं पञ्चावत्तं वा । कुत एतत् । अविधानाज्जमदग्नीनां पञ्चावत्तत्वस्य । माध्यन्दिनानां पठ्यते । तद्वै चतुरवत्तं भवति उतो पञ्चावत्तमेव भवतीति । शाखान्तरे तु पञ्चावत्तं जमदग्नीनामिति । तेन जमदग्नीनां पञ्चावत्तमेव इतरेषां चतुरवत्तं पञ्चावत्तं वा ॥ २२७ ॥

मध्यात्पूर्वार्द्धाच्चासम्भिर्दन्नङ्गुष्ठपर्व-

मात्रमवदानम् ॥ २२८ ॥

हविषो मध्यात्पूर्वार्द्धाच्चासम्भिन्दन्नङ्गुष्ठपर्वमात्रमवदानं गृह्णीयात् । असम्भिन्दन्नवदानमर्यादां कुर्वन् । कुत एतत् । अवदानसम्भेदनेहि मर्यादाबाधः । मर्यादाबाधे च मध्यात्पूर्वार्द्धाच्चेत्यस्य बाधः ॥ २२८ ॥

मात्रावद्दधिपयसोः ॥ २२९ ॥

दधिपयसोरपि तन्मात्रमेवावदेयम् १॥ २२९ ॥

आद्यन्तयोराज्यम् ॥ २३० ॥

कर्त्तव्यमिति शेषः । स आज्यस्योपस्तीर्य द्विर्हविषोवदायाथोपरिष्टादाज्यस्याभिघारयतीति२ ॥ २३० ॥

एकप्रत्यवायः स्विष्टकृतः ॥ २३१ ॥

स्विष्टकृतस्त्ववदाने एकमवदानं प्रत्यवैति ॥ २३१ ॥

---

१ तयोर्हि द्रवत्वात्स्रुवेणावदानं सामर्थ्यात्; स्रुवपुष्करस्यैतावत्परिमाणत्वादिति भावः ।

२ तच्च ध्रुवाया अवदेयम्, 'उपस्तृणन्नभिघारयन्नाज्यस्य यजन् ध्रुवायां गृह्णाति' इति वचनात् ॥

द्विश्चाभिघारणम् ॥ २३२ ॥

स्विष्टकृत्येव भवति १ ॥ २३२ ॥

२अवदाय प्रत्यभिघारणं प्राक् स्विष्टकृतः ॥२३३॥

तस्माद्यस्य कस्य च हविषोवद्यति पुनरेव तदभिघारयति स्विष्टकृतएव तत्पुनराप्यायतीति ॥ २३३ ॥

सर्वहुत एककपालः ३ ॥ २३४ ॥

कर्त्तव्यः । द्यावापृथिवीयप्रकृतित्वात् । तत्प्रकृतित्वं च वक्ष्यत्युपरिष्टात् ॥ २३४ ॥

४अनुवाचनप्रैषो यथादेवतममुष्मा अनुब्रूहीति ॥ २३५ ॥

चतुर्थ्यं तेनानुवाचनं कर्त्तव्यम् ॥ २३५ ॥

आश्राव्यप्रैषे च ॥ २३६ ॥

चतुर्थ्यन्तेनैव प्रेषणम् । यत्र मैत्रावरुणस्य प्रैषः। यथा इन्द्रा-

१ 'सकृदवद्यत्यथोपरिष्टाद्विराज्यस्याभिघारयति ' ' अथास्य चरोः सकृदवद्यत्यथोपरिष्टाद्द्विराज्यस्याभिघारति , इति श्रुतिभ्याम् ।

२ प्रधानार्थं हविषोऽवदानं कृत्वा हविषो यावद्भ्यः प्रदेशेभ्योऽवदानग्रहणं कृतं तत्राज्येन प्रत्यभिघारणं कर्त्तव्यं, स्विष्टकृतः प्राक्, तस्मिन् कृते तु प्रत्यभिघारणं न कर्त्तव्यम् । तथा च श्रुतिः "तस्मात्" इत्यादि ।

३ ' अथैत ं सर्वमेव जुहोति न स्विष्टकृतेऽवद्यति ' इति श्रुतेः ।

४ या देवता यस्मिन् यागे भवति तद्वाचकममुष्मै इति चतुर्थ्यन्तं प्रयुज्यानुब्रूहीति प्रैषःकर्तव्य इत्यर्थः, यथा अग्नयेऽनुब्रूहि सोमायानुब्रूहि इति ।

ग्निभ्यां च्छागस्य वपां मेदः प्रेष्येति ॥ २३६ ॥

अमुं यजेति ॥ २३७ ॥

यत्र मैत्रावरुणस्य प्रैषाभावस्तत्रामुं यजेति द्वितीयान्तेन प्रैषः१ ॥ २३७ ॥

प्रैषानुवाचने षष्ठी वपायै धानासोमेभ्य इति परिहाप्य ॥ २३८ ॥

प्रैषसम्बद्धेनुवाचने द्रव्ये षष्ठी विभक्तिर्भवति । वपायै धानासोमेभ्य इति परिहाप्य ॥ २३८ ॥

असावित्यपनोदे ॥ २३९ ॥

यत्रासौ यजासौ यजेति । यथा पुनरभ्युन्नीतेषु । तत्र देवताविभक्तिश्चापनोदे वर्त्तते। अथवासावित्यपनोदे इति । यत्र मन्त्रेऽसाविति सर्वनामशब्दस्तस्यापनोदं कृत्वा यस्तत्राभिधेयस्तन्नामादेशः कार्यः २ ॥ २३९ ॥

सवषट्कारासु तिष्ठन्दक्षिणत उदङ् प्राङ् वषट्कृते ॥ २४० ॥

सवषट्कारास्वाहुतिषु दक्षिणतो वितानस्योदक् प्राग्व्यवस्थितो वषट्कृते जुहोति३ ॥ २४० ॥

सह वा ॥ २४१ ॥

१ तद्यथाग्निं यज सोमं यजेति ।

२ यथा 'सम्राडयमसौ' 'बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चाम्यसौ, 'इममुष्य पुत्रममुष्यै पुत्रमित्यादि ।

३ वषट्कारात्पूर्वं होमे निन्दा च श्रूयते 'देवपात्रं वा एष यद्वषट्कारस्तद्यथा पात्रउदूधृत्य प्रयच्छेदेवं तदथ यत्पुरा वषट्काराज्जुहुयाद्यथाधो भूमौ निदिग्धं तदमुया स्यादेवं तत्' इति ।

सहवा वषट्कारेण जुहुयात् । वाशब्दो विकल्पार्थः । तस्मादु सह वै वषट्कारेण जुहुयाद्वषट्कृते वेति ॥ २४१ ॥

१उभयत आज्यं हविषः ॥ २४२ ॥

क्षारयेत् ॥ २४२ ॥

सह वा ॥ २४३ ॥

एवमेव हि श्रुतत्वात्२ । अनुवाचनप्रैषौ यथादेवतमिति ॥२४३॥

प्रैषाः प्रक्रान्ता अतस्तद्विषयमेवैतच्चिन्त्यते । किमग्नी दग्नीन्विहरेत्येवमादयः कर्मचोदका, उत सम्बोधनार्था मन्त्रा इति ? । ननु चोक्तमाचार्येण निगदानां मन्त्रत्वम् । ऋचो यजूंषि सामानि निगदा मन्त्रा इति । सत्यमेवम् । मन्त्रवैलक्षण्यात्तदेवाक्षिप्यते । स एव च निर्णयो भविष्यति । किं वैलक्षण्यमिति चेत् । उच्यते । केचित्करणमन्त्रा येनुष्ठानकाले पदार्थान्स्मारयन्ति । केचिज्जपमन्त्रा अदृष्टार्थाः । अपरे क्रियमाणानुवादिनः क्रियमाणमर्थमनुवदन्ति । यथाग्निमन्थनीयादयः । न च तद्रूपाः प्रैषाः । अपि च विधिविभक्तियुक्ता एते अग्नीदग्नीन्विहर बर्हिस्तृणीहीति । तेनामन्त्रत्वाशङ्काविनिवृत्त्यर्थमिदमारभ्यते—

वर्त्तमानापदेशाच्चोदनाशब्दात् श्रुत्यर्थाभावात्तवैचेति वचनान्निर्देशात्कर्मचोदकः ॥ २४४ ॥

अग्नीदग्नीन्विहरेत्येवमादिः कर्मचोदकः प्रतिपत्तव्यः । कुत

---

१ होमकाले हविष उभयत आज्यं होतव्यम्, पूर्वमल्पं हुत्वा ततो हविर्हूयते पुनश्चोपर्याज्यमित्यर्थः ।

२ 'प्रदग्धाहुतिर्ह वा अन्योऽध्वर्युरि'ति प्रकृत्य "अथ हैना एष सन्तर्पयति योऽयमाज्यं हुत्वावदानानि जुहोत्यथ पुनरन्तत आज्येनाभिजुहोत्येष हैनाः सन्तर्पयति" इति, तथा "तदुहोवाच याज्ञवल्क्यो यद्वा उपस्तीर्यावदायाभिघारयति तदेवैनाः सन्तर्पयति" इति च श्रुतेः ।

एतत् । वर्त्तमानापदेशात् । वर्त्तमानमर्थमपदिशन्त्येवमादयोनुष्ठेयत्वेन । अग्निविहरणक्रियानुष्ठेयत्वेनोच्यते । किं च चोदनाशब्दात् । चोदनाशब्दो हि भवति । लिङ्लोटौ कर्मचोदकौ । लोड्वचनानि चैतानि श्रूयन्ते । अग्नीदग्नीन्विहर बर्हिस्तृणीहीत्येवमादीनि । अतः कर्मचोदकः । यदि च विधिविभक्तियोगेपि कर्मचोदकत्वं नाश्रीयते । लोट्श्रवणमनर्थकमेव स्यात् ।

## श्रुत्यर्थाभावाच्च ।

अपि च लोट्श्रवणादेवायमर्थो गम्यते । यदुक्तं कर्मचोदकत्वम् । यदि च विधिविभक्तियोगेपि कर्मचोदका न भवेयुः श्रुतार्थहानिः स्यात् ।

किञ्च—

## तवैचेति वचनात् ।

मन्त्रवैलक्षण्यमेषाम् । तवै वचनाः प्रैषाः पठ्यन्ते । ब्राह्मणं तर्पयितवै इत्येवमादयः । इति वचनाश्च मन्त्रायथा उरु प्रथा उरुप्रथस्वेति प्रथयत्येवैनमेतदुरुते यज्ञपतिः प्रथतामिति च । अतोपि मन्त्रवैलक्षण्यादमन्त्रत्वम् ।

## निर्देशात् ।

अपि च निर्दिष्टा मन्त्राः । अहेबुध्न्यमन्त्रं मे पाहि यमृषयस्त्रयी विदो विदुः ऋचो यजूंषि सामानीति तन्मध्ये चानाम्नानादमन्त्रत्वम् । अतः ।

## कर्म चोदकः ।

अपरे निर्देशादित्यन्यथा वर्णयन्ति विधिविभक्तियोगाच्छक्नुवन्ति कर्मनिर्देष्टुमिति ॥ २४४ ॥

एवं प्राप्त आह—

## मन्त्रो वा समभिव्याहारात् ॥ २४५ ॥

वा शब्दः पक्षव्यावृत्तौ । मन्त्रो वैवञ्जातीयकः प्रतिपत्तव्यः ।

कुत एतत्। समभिव्याहारात्। य एभिरर्थोऽभिधीयते स समभिव्याहृतो वाक्यान्तरेण विहरत्यग्नीनित्येवमादिना। न च विहितस्य विधानमवकल्पते। अभिधानं तु सम्भवति। तस्मान्मन्त्र एवं जातीयकः प्रतिपत्तव्यः। अथवा समभिव्याहारादित्यभिव्याहरणमेषां प्रयोगकाले चोद्यते। उत्तिष्ठन्नाहाग्नीन्विहरेति। अथाह प्रोक्षणीरासादयेति च। यदि कर्मचोदका एते स्युरभिव्याहरणं एषां न चोद्येत। चोद्यते च तस्मान्मन्त्रा इति। यत्पुनरुक्तं वर्त्तमानापदेशादिति तन्मन्त्रत्वेपि न विरुध्यते। वर्त्तमानापदेशको हि मन्त्रो भवति। यदुच्यते। चोदनाशब्दाच्छ्रुत्यर्थाभावादिति। तत्रोच्यते। मन्त्रत्वेप्येतन्न दुष्यति। न लोड्विभक्तेर्विधानमेवैकोर्थः। प्राप्तकालतायामपि लोट् स्मर्यते। अग्नीदग्नीन्विहर बर्हिस्तृणाहीति च। अग्नीदित्यभिधीयते विहरणस्तरणयोः प्राप्तः काल इति। यदपि मन्त्रवैलक्षण्यमुक्तम्। तवैवेति वचनादिति तदप्यनैकान्तिकम्। तवै वचना अपि मन्त्रा दृश्यन्ते। कन्या इव वहतु मे तवा उ इति। मन्त्रश्चायम्। अनितिवचना च मन्त्रा दृश्यन्ते। स जुहोत्येष स्य वाजी क्षिपणिं तुरण्यतीत्येवमादयः तस्माद्वैलक्षण्यम्। यच्चोक्तं निर्देशादिति निर्दिष्टा हि मन्त्रा ऋचो यजूंषि सामानीति निगदानामनिर्देशादमन्त्रत्वमित्यत्र ब्रूमः। यजुषां निर्देशात् निगदोपि निर्दिष्ट एवेत्यदोषः। अथवा वर्त्तमानापदेशादित्येवमादीनां व्याख्यान्तरं प्रस्तूयते। पूर्वत्रापारितोषात्। उक्तमेव हि निगदानां मन्त्रत्वमिति। विषयव्याप्तिश्च भवति। इदमामनन्ति आग्नेयोष्टाकपालो भवति ऐन्द्राग्नो द्वादशकपालो भवतीत्येवमादि। तत्रैतत्सन्दिह्यते। किमेते विधय उतार्थवदा आहोस्विन्मन्त्रा इति। तत्र तदुच्यते नैते विधयो वर्त्तमानापदेशात्। यो हि वर्त्तमानमर्थमुपदिशति सोनुवादसरूपत्वान्न विधिः स्यात्। विधानं तर्हि कीदृसादवगम्यते। अत आह। चोदनाशब्दात्। लिङन्ताल्लोडन्तात्तव्यान्तात्। एते हि विधौ स्मर्यन्ते। न चाग्नेयोऽष्टाकपालो भवतीत्येवमादयो लिङन्ता न लोडन्ता नापि तव्यान्ताः। अतो न विधयोऽर्थवादास्तर्हि भवन्त्वित्याशङ्कित आह। श्रुत्यर्थाभावात्। अर्थवादा न भवन्त्येते श्रुतस्य ह्यर्थस्यार्थवादो भवति स्तावको। न चात्र श्रुतोर्थो विद्यते य एभिः संस्तूयेत। तस्मान्नार्थवादाः। मन्त्रास्तर्हि भवन्तु। मन्त्रा अपि न भवन्त्येते। कुत एतत्।

श्रुत्यर्थाभावादेव । श्रुतस्य ह्यर्थस्य मन्त्रः प्रयोगकालेभिधायको भवति । न चासावस्तीति । तथैचेति वचना इति वचनाश्च मन्त्रा ब्राह्मणे पठ्यन्ते । न चैतं तल्लक्षणयुक्तास्तस्मादप्यमन्त्रत्वमिति । तस्मात्सर्वप्रकाराभावादानर्थक्ये प्राप्त आह । निर्देशात्कर्मचोदकः । कर्मचोदक एवं जातीयकः प्रतिपत्तव्यः । शक्नोति ह्यसौ अर्थवादपदसंयोगात् पञ्चमलकारपरिकल्पना द्वारेण विधानं कर्तुम् । ननु च वर्त्तमानापदेशकोयं भवति कथमिवानुवादसरूपत्वाद्विधिः स्यात् । यथा गच्छति पठतीत्येवमादयो न विधयः । एवमेतेपि । अत्रोच्यते । आग्नेयोष्टाकपालो भवतीति नानुवादोयम् । न ह्यसौ विहितः क्वचिद्येनानूद्यते । तस्मादष्टाकपालो भवतीति भावयितव्य एवमेवगम्यते । न चाभावितोऽष्टाकपालो भवतीति । तस्माद्भावयितव्य एव । अर्थवादपदसंयोगोप्युक्त एव । आग्निर्वै देवानां मुखमित्येवमादि । यदि वर्त्तमानापदेशकस्यापि विधायकत्वमाश्रीयते । गायत्रेण त्वा च्छन्दसा परिगृह्णामीत्येवमादीनामपि विधायकत्वमस्त्वित्येवं प्राप्त आह ।

## मन्त्रो वा समभिव्याहारात् ।

मन्त्रो वैवं जातीयः स्यात् । कुतः समभिव्याहारात् । य एवमादिभिरर्थो विधीयते । स वाक्यान्तरेण विहित एवेति । तस्मान्मन्त्रा एवमादयः ॥ २४५ ॥

## १अर्थप्रसंख्यया द्रव्योपकल्पनम् ॥ २४६ ॥

कर्त्तव्यमिति शेषः ॥ २४६ ॥

---

१ अर्थः प्रयोजनम् । तथाच प्रयोजनपरिगणनया शूर्पाग्निहोत्रहवण्यादिद्रव्याणां समीपे स्थापनं कर्त्तव्यमित्यर्थः । अर्थात् करिष्यमाणे कर्मणि उपयोक्ष्यमाणानि । सर्वाणि द्रव्याणि गणयित्वा कर्मारम्भात् प्रागेवानीय समीपे स्थापनीयानि अन्यथा कालविलम्बेन प्रधानकर्मबाधः स्यादिति तात्पर्यम् ।

१चर्माण्युत्तरलोमानि प्राग्ग्रीवाणि ॥ २४७ ॥

कर्त्तव्यानीति शेषः ॥ २४७ ॥

अत्रोक्तमुत्तरं हविषि ॥ २४८ ॥

हविषां यत्पश्चादभिहितं तदासादनादिषु उत्तरं देशतः कालतश्च प्रतिपत्तव्यम २ ॥ २४८ ॥

एकद्रव्ये साज्ये वेदेनोपग्रहणम् ३ ॥ २४९ ॥

साज्य एकस्मिन्द्रव्ये वेदेन उपग्रहो भवति। एकद्रव्यग्रहणमनेकद्रव्यव्युदासार्थम ४ ॥ २४९ ॥

स्फ्येनान्यत्र ॥ २५० ॥

आज्यादन्यत्रान्येन द्रव्येण द्रव्यवत्येकस्मिन् स्फ्येनोपग्रहणम ॥ २५० ॥

५कुशैरसत्सु ॥ २५१ ॥

असत्सु वेदवज्राद्वितीयद्रव्येषु कुशैरुपग्रहणम । अपरेन्यथा वर्णयन्ति । असत्सुद्रव्येषु जपोपस्थानादिषु कुशैरुपग्रहणम ॥ २५१ ॥

१ चर्माणि कृष्णाजिनाधिषवणशार्दूलचर्मादीनि उत्तरलोमानि प्राग्ग्रीवाणि च स्तरणीयानि इत्यर्थः । " तदुत्तरतः पुच्छस्योत्तरलोम प्राचीनग्रीवमुपस्तृणाति " इति श्रुतेः ।

२ तथाच महापितृयज्ञे ' स तत्र जुहूमासादयत्यथ पूर्वामुपभृतमथ ध्रुवामथ पुरोडाशमथ धाना अथ मन्थमि 'ति । अत्र दिग्विपर्ययेण प्राच्येवोत्तरा तेनैवमनूद्यत इति भावः ।

३ दक्षिणहस्तस्थस्य साज्यस्यैकद्रव्यस्य हस्तकम्पनादिनाज्यस्कन्दनवारणार्थं सव्यहस्तगृहीतवेदेनाधारणमुपग्रहणमुच्यते । यथा " दशापवित्रेणोपगृह्य " इति ।

४ तेन जुहूपभृतोर्द्वयोर्ग्रहणे न वेदोपग्रहः ।

५ तथाच स्मृतिः " सव्यः सोपग्रहः कार्यो दक्षिणः सपवित्रक " इति ।

पाणिभ्यां जुहूं परिगृह्योपभृत्याधानमादानकालेसः
१ह्लादयन् ॥ २५२ ॥

एवमेव श्रुतत्वात् । असः ह्लादयन् शब्दमकुर्वन् ॥ २५२ ॥

इदमामनन्ति । अभिजिता यजेत विश्वजिता यजेतेन्यस्थलसंयुक्ताश्चोदनास्तत्र चिन्त्यते। किमेषु फलमस्त्युत नास्तीति ?। यदा चास्ति तदा यत्किश्चिदुत स्वर्ग इति ? किं तावत्प्राप्तम् । फलाश्रवणान्नास्ति फलमित्येवं प्राप्त उच्यते—

२वाच्यफलेषु स्वर्गः सामर्थ्यात् ॥ २५३ ॥

सामर्थ्याद्भवितव्यमत्र फलेन । एवमेताश्चोदनाः समर्था अर्थवत्यो भवन्ति । इतरथा सापेक्षाः सन्त्योनर्थिकाः स्युः । न च वेदे मात्रामात्रस्याप्यानर्थक्यमिष्यते । यच्च साकाङ्क्षं वाक्यं तदध्याहारेण वानुषङ्गेण वा निराकाङ्क्षी कर्त्तव्यम् । एवं चार्थवद्भवति । तेनेह स्वर्गकामपदानुषङ्गः कार्यः । विश्वजिता यजेत स्वर्गकाम इति नैरुत्सुक्यम् । ननु च पशुकामादिपदानुषङ्गः कस्मान्न क्रियते । अत्रोच्यते । स्वर्गएव पुरुषैरभिवाञ्छ्यते । तदेव सामर्थ्यादनुषज्यते । नान्यानि फलवाक्यानि ॥ २५३ ॥

एककर्मणि गुणविशेषे फलविशेषः ॥ २५४ ॥

एकस्मिन्कर्मणि गुणविशेषे फलविशेषेण३ भवितव्यमाम्नानसामर्थ्यात् ॥ २५४ ॥

१ तदुक्तम् " इत्थमेव कुर्यादुभाभ्यामेव पाणिभ्यां जुहूं परिगृह्योपभृत्यधिनिदध्यात् " इति । तथा " ते असः शिञ्जयन्नाददीत " इति श्रुतिभ्याम् ।

२ अश्रुतफलेषु विश्वजिदादिषु स्वर्गः फलत्वेन कल्पनीयः, कुतः ? सामर्थ्यादित्यर्थः ।

३ तद्यथा, अग्न्याधेयं पूर्णाहुत्यन्तमिष्ट्यन्तं च, तत्र पूर्णाहुत्यन्तपक्षादिष्ट्यन्तपक्षे फलभूयस्त्वम्, तत्रापि षड्दक्षिणापक्षाद्द्वादशदक्षिणापक्षे फलाधिक्यम्, ततोऽपि चतुर्विंशतिदक्षिणापक्षे । एवञ्चाङ्गाधिक्यं फलाधिक्यम्, इतरथा तद्विधानवैय्यर्थ्यप्रसङ्ग इति भावः ।

दानवाचनान्वारम्भणवरवरणव्रतप्रमाणेषु
यजमानं प्रतीयात् ॥ २५४ ॥

दानादिनिगदव्याख्यातानि तेषां कर्त्तारं यजमानं प्रतीयात् १ ॥ २५४ ॥

खातलूनच्छिन्नावहतापिष्टदुधदग्धेषु
यजुष्क्रियासम्भवात् ॥ २५५ ॥

खाते यूपावटे । लूने बर्हिषि । छिन्ने यूपे । अवहतेषु व्रीहिषु । पिष्टेषु तण्डुलेषु । दुग्धे पयसि । दग्धे महावीरे । तद्यजुषा क्रिया न भवति । कुत एतत् । द्वाराभावात् । क्रियाद्वारको हि मन्त्र इति । एतच्चासम्भवविषयमेव द्रष्टव्यम् २ ॥ २५५ ॥

---

१ दाने तावत् "अन्वाहार्यं ददाति" "तस्मादग्नीधे प्रथमाय दक्षिणां ददाति" इत्यादौ यजमानस्यैव दानकर्तृत्वम् । वाचने "आवोदेवास इति वाचयति" "रेवती यजमान इति वाचयती" त्यादौ तस्यैव वाचनकर्तृत्वम् । एवमेव "आश्विनं गृह्णात्यन्वारब्धेवा" "वरं वृत्वा ददाति" इत्यादावपि यजमानस्यैव कर्तृता ज्ञेयेति भावः ।

२ याज्ञिकास्त्वेवमाहुः 'एषु लोकासिद्धेष्वपि गृहीतेष्वपि यजुः क्रिया यजुर्युक्ता क्रिया यथाकथं चित् कर्तव्या कुतः ? सम्भवात् । सम्भवति हि यथाकथं चिद्यजुः क्रिया । अथवा असम्भवात् । अन्यस्याः क्रियायाः कर्ममध्ये असम्भवात् । यदाच पशौ यूपाहरणार्थं सन्निकृष्टे अलाभात् देशान्तरे विप्रकृष्टे गम्यते तदा प्रधानकालविरोधो भवति । यदा चैकदीक्षापक्षः तदा महावीरोखादिकमेकेनान्हा निष्पादयितुं न शक्यते इति । तदुक्तं मण्डनमिश्रैः—

"छिन्नं लूनं च पिष्टं च सान्नाय्यं मृन्मयं तथा ।
लोकसिद्धं गृहीतं चेन्मन्त्रा जाप्याः कठाशयात् ॥
छिन्नादिलोकसिद्धं चेदाह्रियेत क्रतुं प्रति ।
तत्तन्मन्त्रजपं प्राह भारद्वाजः कृताकृतम् ॥
छिन्ने चावहते पिष्टे दग्धे लूने च मृन्मये ।
खाते च लौकिके प्राप्ते जपोनास्त्येव वाजिनाम्" इति ।

रौद्रं राक्षसमासुरमाभिचरणिकं मन्त्रमुक्त्वा
पित्र्यमात्मानं चालभ्योपस्पृशेदपः ॥ २५६ ॥

रौद्रादिमन्त्रमुक्त्वा च शब्दात्कर्म च कृत्वा उपस्पृशेदप इति। दर्शयति चैवं रुद्रियेणैव वा एतद्चारिषुः शान्तिरापस्तदद्भिः शान्त्या शमय इति २५६ ॥

त्रयीसारसमुद्धारसूत्रव्याख्यानमादृते।
यत्तन्मयानुगृह्णन्तु साधुत्वेनेह साधवः ॥

इति श्रीउपाध्यायकर्ककृतौ कात्यायनसूत्रविचारणे
परिभाषाध्यायः प्रथमः समाप्तः।

# अथ द्वितीयोऽध्यायः ।

ॐ इह स्वर्गापवर्गौ परः पुरुषार्थः । तौ चानेकशाखाप्रभेदभिन्ननियतवर्णानुपूर्व्याऽव्यवस्थिताऽकृत्रिमसर्वगतविधिनिषेधरूपशब्दौघसमधिगम्यौ । न हि प्रत्यक्षादीनामसौ विषयः१ । ननु च स्वर्गकामो यजेतेत्येवमादिना स्वर्गस्यास्तु तत्समधिगम्यता अपवर्गे कथमिति । उच्यते । शुभाशुभकर्मफलोपभोगनिमित्तशरीरग्रहणाभावोऽपवर्गः । स च विहिताकरणप्रतिषिद्धसेवनोपजाताशुभोपभोगायावश्यं भाविनि शरीरग्रहणे दुर्लभ इति भवति विधिनिषेधसमधिगम्यता ऽपवर्गस्यापि । यदपि कैश्चिदुच्यते ज्ञानादपवर्ग इति । तदपि न । देहेन्द्रियतो व्यतिरिक्तात्मसतत्त्वावबोधस्य मुक्तेश्च केन साध्यसाधनसम्बन्धो गृहीत इति पर्यालोचनीयं स्वर्गयागादिवत् । आगमोपि नैवं विधः । यदप्यात्मा वा अरे द्रष्टव्य इत्यादि तदप्यात्मनो दर्शनश्रवणादिपरमेव । मुक्तिस्तु पुनरपि शुभाशुभोपक्षयनिमित्तैवेति२ । ज्ञानेपि सति विहिताकरणात्प्रतिषिद्धसेवनाच्च मुक्तिप्रतिबन्धः । यदप्युच्यते न करोति न लिप्यत इति । ज्ञानप्रशंसैवासौ । नन्वेवं सत्यात्मसतत्त्वावबोधो न किञ्चिदुपकारं करोति । नेत्युच्यते । यदा वगतमेतदस्ति देहादिव्यतिरिक्त आत्मेति तद्बन्धश्च शुभाशुभनिमित्तो न बृहस्पतिमतानुसारिणामिव३ भूतसङ्घातमात्रमेवेदमिति तदा त-

---

१ प्रत्यक्षस्य विद्यमानोपलम्भनत्वेनातीन्द्रियेऽर्थे प्रमाणाभावात् । तदप्रामाण्ये तन्मूलभूतानां प्रमाणान्तराणामप्यविषय इति भावः । भावनाबलजं योगिप्रत्यक्षं तत्र समर्थमिति तु मनोरथमात्रं ? भावनाया ह्यनुभूतविषयत्वात् ।

२ तदुक्तम् " अत्र चत्वारि भूतानि भूमिवार्य्यनलानिलाः । चतुर्भ्यः खलु भूतेभ्यश्चैतन्यमुपजायत इति ।

३ " यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवं विदि पापं कर्म न श्लिष्यते " " तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे-

बन्धहेतुपरिहारे प्रयतत इति भवति ज्ञानान्मुक्तिः । अथापि शुद्धं ज्ञानमेव मुक्तेः साधनमिति विधिः स्यात्तथापि विधिनिषेधमूलतैवापवर्गस्यापीति । स च विधिनिषेधरूपः शब्दसमूहोऽनेकशाखान्तरावस्थानरूपतया स्वतश्च प्रतिवाक्यमनेकवाक्यार्थप्रतिभानिरुद्धावतारतया महोर्मिमालाकुलार्णव इव दुरवगाहः । तद्यथा क्वचिदग्निहोत्रं जुहोतीत्यादौ धात्वर्थमात्रविधानम् । तत्राप्यग्निहोत्रशब्दे गुणविध्याशङ्का । तथा किं होमः स्वर्गाय उत स्वर्गो होमाय इति । एवं सर्वत्र । क्वचित्सोमेन यजेतेतिवद्विशिष्टधात्वर्थविधानम् । अग्निहोत्रं जुहुयात्स्वर्गकाम इति फले विधिः । क्वचित्सौर्यादौ विशिष्टं फले विधीयते । दध्नाजुहोतीत्यत्र गुणे विधेर्व्यापारपर्यवसानम् । क्वचिच्च प्राकाशावध्वर्यवे ददातीत्यादिवद्धात्वर्थेऽनान्यसम्बन्धविषयो व्यापारः । तथा क्वचिन्मुख्यार्थवृत्तिता शब्दस्य । क्वचित्सहस्रसम्वत्सरादिवत् गुणवृत्त्या शब्दवृत्तिः । विध्यर्थवादसम्मोहश्च परस्परतो रूपव्यतिषङ्गात् । शूर्पेण जुहोति तेन ह्यन्नं क्रियते इति विधिसरूपोऽर्थवादः । रात्रीः प्रतितिष्ठन्ति य एता उपयन्तीत्यर्थवादसरूपं रात्रीणां फले विधानमिति । दिङ्मात्रमिदं दुरवगाहत्वे । यद्यपि च संशयविपर्ययरहितज्ञानोत्पत्तिशक्तियुक्तविधिवाक्याभिहितार्थ प्ररोचनाद्वारेणार्थवादानां तदन्तर्भाव उक्तो जैमिनिप्रभृतिभिर्मन्त्राणामभिहितार्थप्रकाशनेन क्रियाङ्गता नामधेयस्य च गुणफलोपबन्धेनेति सुविवृतमेवैतत् । यथा भेदादिलक्षणानुकथनेनानेकरूपवाक्यार्थमार्गोपदर्शनं कृतमे-

---

पाप्मानः प्रदूयन्ते " " भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः, क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे " इत्यादि श्रुतिस्मृतिभ्यस्तथैवावगमात् । तस्मात् सुखदुःखादिसमस्तवैशेषिकात्मगुणोच्छेदो मोक्षः, सुखदुःखोच्छेदश्च धर्माधर्मयोरुच्छेदात्, धर्माधर्मयोरुच्छेदश्चोत्पन्नानां धर्माधर्माणामुपभोगेन नित्यनैमित्तिककर्मानुष्ठानेनात्मज्ञानेन च विरोधादुत्पाद्यानां च काम्यानुष्ठाननिमित्तानां धर्माणां तदननुष्ठानेनानुत्पादाद्विहिताकारणप्रतिषिद्धानुष्ठाननिमित्तानां चाधर्माणां विहितानुष्ठानेन प्रतिषिद्धाकरणेन च परिहारादसति शरीरारम्भे पूर्व शरीरनिपाते चेति शाङ्करभाष्य शास्त्रदीपिकादौ ।

च । तथापि नेयतानेकशास्त्राव्यवस्थितवाक्यराशिप्रतिपादितार्थानुष्ठानं शक्यं कर्तुमित्याचार्यः कल्पसूत्रमारब्धवान् । तत्र चाधिकारादिसामान्यश्रुत्युपनिबन्धनं कृत्वा विशेषोपनिबधनं न्याय्यम् । इतरथा हि प्रतिविशेषं सामान्यानुकथने ग्रन्थगौरवं स्यादित्यतोऽधिकाराद्युपस्पृशेदप इत्येवमन्तमनुक्रम्य विशेषाननुक्रमते । तत्र च पूर्वं पौर्णमासमारभ्यते । यद्यपि फलवत्सु क्रमो नास्त्यनुष्ठानं प्रति अनुविधाने दूरोत्सारित इति । तथापि क्रमवर्त्तिनी वागित्यवश्यम्भाविनि क्रमे श्रुत्यर्थानुसारेण पौर्णमासारम्भः प्रथमः । ननु च सामर्थ्यादाधानस्य प्राक्कालता, न ह्यकृताधानः शक्नोति पौर्णमासमनुष्ठातुमिति । श्रुतिक्रमाच्च । सवै सम्भारान्सम्भरतीति । तथा स्मृत्यनुक्रमणम् । अग्न्याधेयमग्निहोत्रं दर्शपौर्णमासाविति । नैतदेवम् । व्रतमुपैष्यन्निति श्रुतिक्रमात्पूर्वं पौर्णमासम । सामर्थ्याच्च । न हि पौर्णमासमनुक्त्वा साकल्येनाधानमनुविधातुं शक्यते । सन्ति हि तत्र दर्शपूर्णमासविधानग्राहिण्य इष्टयः । किं च मन्त्रक्रमादग्ने व्रतपत इति । दर्शस्तर्हि प्राप्नोति इषे त्वेति । सत्यमेतत् । किं त्वसौ पौर्णमासपूर्वकः । दाक्षायणे च साक्षादेव मन्त्रक्रमानुग्रहः । तस्मात्पौर्णमासारम्भ एव कारणभूयस्त्वमिति । तेन पूर्वं पौर्णमासमारब्धम ।

## पूर्वां पौर्णमासीमुत्तरां वोपवसेत् ॥ १ ॥

तत्र कालविशेषवाचिनि पौर्णमासशब्दे तिथ्यभिप्राया स्त्रीलिङ्गान्तता । तद्विशेषणत्वाच्च पूर्वोत्तरशब्दयोः । सप्तम्यां च प्राप्तायां "उपान्वध्याङ्व" इति उपपदविभक्तिर्द्वितीया । पूर्वां पौर्णमासीमुत्तरां वेति विकल्पे वा शब्दो ऽयञ्चोपवासशब्दः प्रसिद्धितो ऽनशनभिधाय्यनश्नन्नेव ह्युपोषित इत्युच्यते । ननु चापराह्णे व्रतोपायनीयमश्नीत इत्यनेन विरोधाद्विकल्पः स्यात् । न भिन्नविषयत्वात् । तत्र ह्यर्थप्राप्तएवाशने सर्पिरादिगुणनियम इहाशनप्रतिषेध इति । अशनविधाने हि तस्मिन्सत्यविधेय एवार्थः स्यात् । प्राप्तार्थत्वाददृष्टार्थता वाशनस्य कर्मोपकाराय प्रकल्प्या । न चासौ दृष्टे सति न्याय्या । तस्मादनेकविषयत्वादविकल्पः । यत्र पुनरेकक्रियाविषयौ विधिनिषेधौ तत्र षोडशिग्रहणवद्विकल्पः । अतिरात्रे षोडशिविषयो विधिः । तद्विषयएव निषेधः । गृह्यते चेन्न प्रतिषेधो नेति चेन्न ग्रहण-

मिति। न चात्र क्रत्वादिवत्समुच्चयः सम्भवति विरोधात्। न चाग्नेयप्रयाजादिवदङ्गाङ्गिभावः। फलित्वाफलित्वानवगतेः। न च वार्त्रघ्न्यादिवद्वा व्यवस्था। तत्र हि लिङ्गप्रकरणानुमितवाक्यावगताङ्गभावयोर्वार्त्रघ्न्योर्वृधन्वत्योश्च व्यवस्थापरमेव वचनम्। वार्त्रघ्नी पौर्णमास्यामनूच्येते वृधन्वती अमावास्यायामिति। न चात्रानुवादोऽप्राप्तत्वात्। बाधोऽपि चान्यतरस्यान्यत्र चरितार्थस्यान्यतरेणाचरितार्थेन निवृत्तिः। न च ग्रहणाग्रहणयोश्चरितार्थोऽचरितार्थत्वे कुशशरवत्सम्भवतः। तस्माद्यथोक्तएवेतरवाक्यापेक्षया विकल्पः षोडशिनीति। अथोपवासशब्देनार्थप्राप्ताशननिषेधो व्रतोपायनीयमश्नीत इत्यनेनाशनविधानं स्यात्। नेत्युच्यते। अशनप्रतिषेधवैयर्थ्यात् उत्तरसूत्रादप्यस्यार्थस्य सिद्धत्वात्। अनिषेधेऽपि हि गुणार्थमुत्तरं सूत्रमारब्धव्यमेव न चात्र भिन्नविषयत्वेऽप्यविरोधः। सति ह्यशने तद्गुणविधानमुपपद्यत इति। तस्माद्विरोध एव। कस्तह्यत्र समाधिः। उच्यते। अन्यतरस्यायथार्थता। तत्राप्यनियमः। अस्य पाश्चात्यस्य वा। विरोधोपजनकत्वाद्यथार्थत्वे प्राप्ते यस्यैवायथार्थतान्यत्रोपलब्धा दृष्टप्रवृत्तित्वात्तस्यैवाश्रयितुं युज्यते नेतरस्य। स चायमुपवासशब्दो नियतद्रव्यकालपरिमाणे व्यशने उपलभ्यते। यथा चान्द्रायणमुपवसेदिति। अतो यमनियमविषयतोपवासशब्दस्य। केचित्पौर्णमासीशब्दं लक्षणया कर्मविषयं मन्यन्ते, पौर्णमासीमुपवसेन्न प्रवसेदित्यर्थः। तदेतन्न। कर्मणः पूर्वोत्तरभावानुपपत्तेः। स्वयं होमसूत्रादेव तत्सिद्धेः। तस्माद्यथोक्तैव व्याख्या। पूर्वस्यां पौर्णमास्यामुत्तरस्यां वोपोष्य यमनियमवान्यजेतेति। पूर्वामुत्तरामिति द्वित्वनिबन्धनम्। तत्र सन्दिह्यते। किमेका पौर्णमासी उत द्वे इति। एकेति ब्रूमः। एका ह्यागोपालाङ्गनादिप्रसिद्धा। सम्वत्सरं प्रकृत्य च दर्शयति द्वादशपौर्णमास्य इति। द्वे अपि वा स्याताम्। शिष्टानुस्मरणात्। या पूर्वपौर्णमासी सानुमतिर्योत्तरा सा राकेति विज्ञापयति इति। दर्शयति च द्वे हि पौर्णमास्यौ यजते द्वे अमावास्ये इति। तथा एषा ह सम्वत्सरस्य प्रथमा रात्रिर्यत्फाल्गुनी पौर्णमासी योत्तरैषोत्तमा या पूर्वेति। सूत्रकारप्रस्थानाच्च। उत्तरस्यां फाल्गुन्यामिति। प्रसिद्धिलिङ्गं मुख्यविषये। द्वितीया गौणी। न ह्यनेकार्थता सति सादृश्यादौ युज्यते। असति तु सादृश्ये सम्बन्धे वा नेकार्थत्वमपि भवत्यक्षादिशब्दवत्। सादृश्यं चेहास्तीति वक्ष्या-

मः। एवं द्वित्वोपपत्तावपि सन्देहः। कतरा पूर्वा कतरोत्तरेति। मुख्यसन्निधानाच्चतुर्दशी पूर्वा पञ्चदश्युत्तरा। तत्रैतदुच्यते। चतुर्दशी पूर्वा तस्यां हि चन्द्रमसः पूरणमस्ति त्रयोदश्याद्यपेक्षया। आह च चन्द्रमसं प्रकृत्यैतस्य ह्यनुपूरणं पौर्णमासीत्याचक्षत इति। अपि च पूर्वोदिते कलाहीने चन्द्रे पूर्वा विचक्षणा इति चतुर्दशीं पूर्वां ज्ञापयति। तथा यदात्वस्तामियात्सूर्यः पूर्णश्चेन्दुरुपागमत्। युगपत्सोत्तरा राका तदाभवति पूर्णिमा इति पञ्चदशीमुत्तरां दर्शयति। ज्ञापयति पञ्चदशी वा पूर्वा प्रतिपदुत्तरेति। कुत एतत्। सादृश्याद्धि पौर्णमासीशब्दस्तिष्ठन्तो प्रवर्त्तते। तच्च सादृश्यं पौर्णमास्याः प्रतिपदि न चतुर्दश्याम्। कथं मासस्य पूरणं पौर्णमासीशब्दस्य प्रवृत्तौ निमित्तं मासमानं चन्द्रमाः। मन्त्रलिङ्गाच्च। यत्वा देवप्रपिबान्ति तत आप्यायते पुनः। वायुः सोमस्य रक्षिता समानां मास आकृतिरिति। तच्चैतच्चन्द्रमसः पूरणं प्रतिपादि पञ्चदश्यां च तुल्यम्। अन्त्यकलाव्यापारसामान्यात्। अन्त्या हि कलोभयत्र व्याप्रियते। इयांस्तु विशेषः। एकत्रोपैतीतरत्र वापैति। चतुर्दशकलत्वसामान्याच्च। प्रागन्त्यकलाव्यापाराच्चतुर्दशकलः पञ्चदश्यां प्रतिपद्यपि तद्व्यापारोपरमे चतुर्दशकल एव। तदेतत्सादृश्ययुक्ता पञ्चदशीति प्रतिपच्छक्यते वक्तुं न चतुर्दशी सादृश्याभावात्। यच्चोक्तं त्रयोदश्याद्यपेक्षया तत्र पूरणमस्तीति। एवं चेन्न काचिदपूर्णमासी सर्वत्र ह्यापेक्षिकं पूरणमिति। यदुक्तं पूर्वोदिते कलाहीन इति तदपि स्वविकाभिप्रायम्। दृश्यते चायमर्थोऽन्यपरे वाक्ये। स वैसम्प्रत्येवोपवसेत् सप्रतिवृत्रꣳ हनानि सम्प्रतिद्विषन्तं भ्रातृव्यꣳ हनानीति मुख्योपवासविषयम्। तथा स वा उतरामेवोपवसेदिति प्रकृत्य पूर्वोपवासविषयं दोषमाह समिव वा एष क्रमते यः सम्प्रत्युपवसतीति। आदित्यरूपिणो यजमानस्यास्तमनकाले सम्पूर्णोदितेन वृत्ररूपिणा चन्द्रमसा सङ्क्रमणं भवति। तस्य चास्पष्टौ जयपराजयौ मत्वैतदुच्यते। अनद्धा वै सङ्क्रान्तयोर्यदीतरोवेतरमभिभवतीतरोवेतरमिति। अथ य उत्तरामुपवसति तस्य को गुणोभवति। यथा पराञ्चमावृत्तꣳ सम्पिꣳ स्यादप्रत्यालभमानꣳ सोन्यतो घात्येव स्यादिति। तत्र ह्यसम्पूर्णो आभिमुख्येन वाव्यवस्थितः पापरूपी चन्द्रमा यमनियमवता आदित्यरूपिणा यजमानेन सुखेन जेतुं शक्यत इति प्रतिपदमुत्तरां दर्शयति। यथा एषा ह सम्वत्स-

रस्य प्रथममा रात्रिर्यत्फाल्गुनी पौर्णमासी योत्तरैषोत्तमा या पूर्वे र्ति । पक्षादौ सम्वत्सरादिरिति प्रतिप्रतिपत्प्रथमोच्यते । पक्षान्ते च तदन्त इति पौर्णमास्युत्तमा । न च पौर्णमास्यां पक्षादित्वं चतुर्दश्यां चापक्षान्तता सम्भवति । तस्मादेतत् । सूत्रकारप्रस्थानाच्च। पक्षादौ यद्यद्धविरिति । यदा चतुर्दशी पूर्वा तदा पञ्चदश्यां यागः स्यात् । तत्र पक्षादौ हविः पाक्षिकं स्यात् । नन्वेवं सत्युत्तरोपवासपक्षे द्वितीयायां यागः प्राप्नोति, तत्र पक्षादौ यद्यद्धविरिति-पाक्षिकमेव । न, सूत्रारम्भसामर्थ्यात् सद्यो वा प्रातरिति ॥ १ ॥

अग्न्यन्वाधानमध्वर्युर्यजमानो वा ॥ २ ॥

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम मह्यं नमन्तां प्रदिशश्चतस्रस्त्वया ध्यक्षणे पृतनाजयेमेत्याहवनीये समिधमादधाति ॥ ३ ॥

अग्न्यन्वाधानमिति कर्मणो नामधेयम् । कर्तृनिर्देशात् । गुणविध्यसम्भवात् । द्रव्येचाप्रसिद्धेः । तत्राध्वर्युग्रहणं न कर्त्तव्यम् । अध्वर्युः कर्मसु वेदयोगादिति प्राप्तत्वात् । अथ यजमानो वेत्येवमर्थमुच्येत । तन्न इयतापि सिद्धत्वात् । यथान्यत्र पात्राणि सं सादायति यजमानोवा। तथाऽऽज्यमवेक्षते तेजोसीति यजमानो वेति । तस्मादध्वर्युरित्यवाच्यम् । अत्रोच्यते । यजमानकाण्डमित्यवान्तराख्याऽसौ च महासमाख्यायाः बाधिका भवति । तेन यजमानो वेतीयत्युच्यमाने वा शब्दो वधारणे न्यायमूलत्वेन माभूदिति शास्त्रमूलोयं विकल्प इत्यध्वर्युग्रहणम् । नन्वितरत्रापि शास्त्रमूल एव विकल्पः । आज्यमवेक्षते तेजोसीति यजमानो वेति । अत्राप्यध्वर्युग्रहणं तर्हि कर्तव्यमेवेति । सत्यमेवम् । प्रत्यक्षं हि तत्र वचनम् । तद्धैके यजमानमवख्यापयन्ति तस्मादध्वर्युरेवावक्षेतेति च । ननु चात्राप्याचार्यस्य प्रत्यक्षमेव वचनम् । स्मरन्ति हि, पञ्चदशशाखोपनिबन्धनं कृतमाचर्येणेति । तस्मान्नास्ति प्रत्यक्षकृतो विशेषः । उच्यते । शाखाद्वयमधिकृत्य तात्पर्येणानुप्रवृत्त आचार्यः । तत्र नित्यनैमित्तिककाम्यवैकल्पिकानि कार्त्स्न्येनोपनिबद्धानि शाखाद्वयव्यतिरेकेण नैयमिकमात्रमेव । तेन शाखा-

द्वयविहितस्येतरेणास्ति विशेषः । तद्विहितं प्रत्यक्षपक्षनिक्षिप्तमिव यथाकथञ्चिदपि ज्ञाप्यते। शाखान्तरीयं पुनः प्रयत्नतो ज्ञापनीयमित्यध्वर्युग्रहणम् । ननु कतिपयशाखोपसंहारे सति असर्वशाखाप्रत्ययत्वादनादरणीयमेतत् सूत्रकारवचनमिति । नैतदेवम् एवं हि स्मरन्ति या एव काश्चन नवदशशाखा उपनिबध्यन्ते । तत्रैव नैयमिकाङ्गप्रधानकर्म्मोपसंहारः सम्भाव्यते । किमुत पञ्चदशशाखोपनिबन्धन इति । तस्मादपरिचोदना ऽसर्वशाखाप्रत्ययत्वमिति । अथ सर्वशाखाप्रत्ययकर्मोपसंहारेणैवाधिक्रियेत तथासत्यशक्यशब्दार्थोपदेशात्सर्वशाखानामानर्थक्यमेव स्यात् । स्मर्यते ह्येकशतमध्वर्युशाखानामिति । तथैकदेशाध्ययनेनाप्यधिकारं स्मरन्ति । वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् । अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेदिति । तथा च लिङ्गम् । यो वै ज्ञातोनूचानस्तमवकाशयेदिति । सर्वशाखाप्रत्ययत्वे ह्यनूचानो न कश्चित्स्यात् । अपरेध्वर्युग्रहणं यजमानसम्बन्धार्थं व्यावर्णयन्ति । तत् किमर्थं व्यूहनेध्वर्युर्वेत्युक्ते यजमानो यथास्यादिति । किं वा स्यादध्वर्युणा विकल्पितत्वादधिकृतमेव ऋत्विगन्तरं प्राप्नुयात् । अथ पुनर्यजमानसम्बन्धे ज्ञापिते यजमानः सिद्धो भवति । एतस्यामपि व्याख्यायामध्वर्युर्यजमानो वा यूपमनक्ति, तथाध्वर्युर्यजमानो वा सोमोपनहनं हरतीत्यत्र दोषः । तस्माद्यथोक्तैव व्याख्या । यदृच्छा वा चार्यस्य क्वचित्कथञ्चिद्विकल्पं ज्ञापयतीति । अथवान्यदेव व्याख्यान्तरम् । ऋग्वेदविहितमन्वाधानं समाख्यया होतुः प्राप्नोति, तन्माभूदित्यध्वर्युग्रहणम् । स चायं ममाग्न इति मन्त्रोऽङ्गभूतार्थप्रकाशकत्वादाहवनीयकार्यापन्नास्वप्सु ममाप इति यथार्थं विपरिणंस्यते । न ह्यविपरिणतोऽङ्गभूतार्थप्रकाशने समर्थो भवति। सत्त्रे गणयज्ञेषु च यजमानाभिधायीनि पदानि यजमानकर्तृकेऽग्न्यन्वाधाने यथार्थं विपरिणंस्यन्ते। अस्माकमग्नेऽस्मभ्यं नमन्तामिति चेत्येवमादीनि । अध्वर्युकर्तृके त्वग्न्यन्वाधाने न्यायनिगदत्वादनूह एव। न च वचो दिशां चावनतिरध्वर्युविषया। कर्मणः परार्थत्वात्। लिङ्गाच्च। या वै काश्च यज्ञे ऋत्विज आशिषमाशासते यजमानस्यैव सेति । असौ च समिद्बाहुप्रमाणा स्यादधिकरणस्यैतावत्प्रमाणत्वात् । कुतः । परिधीनां वर्म संश्रुतेः । वर्मणश्च शरीरप्रमाणत्वादाधेयं चाधिकरणप्रमाणमुचितम् । लिङ्गाच्च । यद्वु वा आत्मसम्मितमन्नं तदवति तन्न हिनस्ति यद्भूयो हिनस्तीति इति । प्रा-

देशमात्री वा शिष्टानुस्मरणात् । वेदः समित्पवित्रं च त्रयं प्रादेशसम्मितामिति । तस्य चाविरोधात् । क्वचिच्च दर्शनात्प्रादेशमात्र्योभवन्तीति । अधिकरणप्रमाणत्वमाधेयस्यानैकान्तिकं लिङ्गं विध्यर्थशेषस्तस्मात्प्रादेशमात्र्येव ॥ ३ ॥

## तूष्णीं द्वितीयाम् ॥ ४ ॥

द्वितीया ग्रहणेन प्राप्तो मन्त्रो निवर्त्त्यते तूष्णीमिति ॥ ४ ॥

## एवमितरयोरग्न्योः ॥ ५ ॥

समिधावादधातीति वाक्यशेषः । प्रथमं दक्षिणाग्नौ सन्निधानात् । प्रदक्षिण क्रमयोगादुदक्संस्थता सम्पत्तेश्च । गार्हपत्ये वामुख्यक्रमानुग्रहात् । अग्न्यन्वाधानस्य हि कार्यं देवता परिग्रहः । ताश्च पूर्वं गार्हपत्येऽन्वीज्यन्ते । ततो दक्षिणाग्नाविति । सान्निधानाद्यकारणं केचिदग्निग्रहणं प्रकृतत्वादवाच्यं मन्यमाना गार्हपत्यदक्षिणाग्न्योः क्रमार्थं मन्यन्ते ॥ ५ ॥

## महाव्याहृतिभिर्वा प्राक्सꣳस्थम् ॥ ६ ॥

भूर्भुवः स्वः इत्येता महाव्याहृतयः अध्येतृप्रसिद्धाः, भूर्भुवः स्वरित्येताभिश्च व्याहृतिभिरिति लिङ्गात् । विभागानुपदेशात् समस्ताभिः, भेदेन क्वचिदुपदेशात् प्रतिमहाव्याहृतीति । न वाक्यभेदात् । वाक्यसमुच्चयस्य चान्याय्यत्वात् । तस्मात्प्रत्यग्निविभक्ताभिर्व्याहृतिभिः समिदाधानम् । सूत्रकारानुपदेशान्नेति चेत् । स्यात्परिभाषितत्वात् । तेषामारम्भेऽर्थतो व्यवस्था तद्वचनत्वादिति । तत्कथम्? अर्थवादात् । भूरिति गार्हपत्यो भुव इत्यन्वाहार्यपचनः स्वरित्याहवनीय इति । तथा भूरिति वा अयं लोको भुव इत्यन्तरिक्षलोकः स्वरित्यसौ लोक इति । अयं वै लोको गार्हपत्योऽन्तरिक्षलोकोऽन्वाहार्यपचनोऽसौ लोक आहवनीय इति । समस्तोपदेशो लाघवार्थः । भेदोपदेशश्च होमविधानार्थः । ताश्चैताः शब्दत्वसामान्यान्मन्त्रस्य निवर्त्तिकाः ॥ ६ ॥

## तूष्णीं वा यथापूर्वम् ॥ ७ ॥

समिदाधानमिति वाक्यशेषः । तत्र च युगपत्समिदाधानं

भेदे कारणाभावात् । केचित्तूष्णीं द्वितीयामिति द्वितीया ग्रहणमिहार्थं मन्यन्ते । तूष्णीं चेति लघीयसा न्यासेन सिद्धत्वात्, यद्गुरुत्वं करोति तदिह भेदेनाधानं यथा स्यादिति । तदयुक्तम् । न हि सूत्रकारस्यानुप्रवृत्तिरीदृशी यन्न्यासगौरवमर्थान्तराय भवत्यसति वचने । सति तु वचने प्रमाणान्तरानयमर्थ इत्यतिरेकोपि गृह्यते । न च न्यासगौरवस्यान्यथानुपपत्त्या शक्यं वचनमनुमातुम् । द्वितीयां समिधमादधातीति कदाचित्स्वशब्देनोच्यते कदाचित्स्वशब्देन । न्यायप्राप्ते युगपत्समिदाधानं दुर्निवारमिति । ये तु सूत्रगौरवमात्रेणैवार्थान्तरं परिकल्पयन्ति नमस्तेभ्यः । यथापूर्वमिति च न यथाध्यवसितं सूत्रादेशवैलक्षण्यात् । पूर्ववदिति ह्येवं प्रकारेष्वर्थेष्वाचार्याः प्रायशः सूत्राणि प्रणयन्ति । तस्माद्यथापूर्वं यथोत्पन्नं अग्नय इति । तदेतन्निर्विकल्पकमग्न्यन्वाधानं दृष्टार्थमुत धर्ममात्रमिति ? । दृष्टार्थमिति ब्रूमः । दृष्टं हि कार्यमग्नौ काष्ठमाधीयमानं करोत्यग्नीन्धनं तद्धारणं च । न च तदनभिवाञ्छितम् । कार्यस्य विद्यमानत्वात् । ते वा एते उल्मुके उदूहन्तीति च पूर्वाहितसमिद्द्वयविषयस्तच्छब्दो द्विवचनान्त एवमेवोपपद्यते । देवतापरिग्रहणार्थं वा वचनसामर्थ्यात् । कस्य देवा गृहानागच्छन्ति कस्य न यः पूर्वे द्युर्ममाग्न इत्यग्नीन् गृह्णातीत्यर्थवादसरूपमपि कार्यनिर्देशविषयमभ्युपगतमाचार्येण । येनाग्न्यन्वाधानप्रभृतीत्यनुक्रम्य दीक्षणीयादिप्रागुदवसानीयाया निवर्त्तयति । तत्राग्न्यन्वाधानकार्यं दीक्षणीयायां कृतमित्यभिप्रायः । तत्र हि वचनमाग्नावैष्णवं प्रकृत्य अग्निर्वै यज्ञस्यावराद्धर्यो विष्णुः परार्द्ध्यस्तत् सर्वाश्चैवैतद्देवता परिगृह्य सर्वं च यज्ञं परिगृह्य दीक्षा इति दीक्षणीयाङ्गप्रधानदेवतापरिग्रहस्य निवर्त्तितत्वात् । प्रायणीयादिष्वग्न्यन्वाधाननिवृत्तिरुच्यते । तच्च देवता परिग्रहणार्थे अग्न्यन्वाधाने उपपद्यते नाग्निधारणार्थे । ननु चार्थवादसरूपमेव वचनम् । आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाण इति प्रकृत्य तत्सर्वाश्चैवैतद्देवता परिगृह्येत्युक्तम् । निर्ज्ञातदीक्षाप्रयोजनाया दीक्षणीयाया देवतापरिग्रहफलश्रुतिरर्थवादो भवति । किं पुनरभ्युपगतो देवतापरिग्रहोऽत्र प्रयोजनत्वेन जैमिनिप्रभृतिभिरपि । एवं च सति वाचनिकं कार्यं देवतापरिग्रहः । तस्मिन्सति नोपलभ्यमानमपि प्रयोजनान्तरमवगन्तुं न्याय्यम् । यच्च लिङ्गमुक्तं ते वा एते उल्मुके इति तदपूर्वप्रकृतेपि दृश्यते । तद्यथा स यद्वा इतश्चेतश्च सम्भरतीति । अप्रकृत-

विषयस्तच्छब्दः। प्रयोजनमबादिष्वपि क्रियते। किमदमेकं कर्म, उत बह्विति। बह्विति ब्रूमः।अधिकरणभेदाच्चाधेयभेदाच्च प्रत्यग्निसार्मदूद्वय पर्यवसनात्। एकं वा कार्यैकत्वात्। एकं हि कार्यमभीज्यमानदेवतापरिग्रहः। एकवाचनान्तेन चैकेन शब्देनोपदेशोभवत्यस्य चाधानमिति। न चाधिकरणभेदः पर्यवसानं वा कर्मभेदे कारणं, परिधिपरिधानवत्। तस्मादेकमिति। प्रयोजनमन्ते नैमित्तिकं भवतीति सम्प्रदायः। केचित्तु गृहमेधीयादिषु सर्वत्र कर्त्तव्यमिति प्रयोजनमाहुः। तत्पुनरालोचनीयम्। न ह्यपराग्निसम्बद्धहोमाभीज्यमानदेवतापरिग्रहस्तत्रोपपद्यते। तस्मात्तत्राप्रवृत्तिः। अपरे त्वाहुः। अग्निपरिग्रहणद्वारेण देवतापरिग्रहो ममाग्ने इत्यग्नीन् गृह्णातीति वचनात्। तेषां चाग्निनां भेदः। प्रत्यग्निचान्याश्चान्याश्च देवताः परिगृह्यन्ते। तेनापराग्निहोमेष्वसत्सु तद्देवतापरिग्रहो नास्तीतिनिवर्त्ततेग्न्यन्वाधानम्। न चात्र समुदितानामेककार्यता। तद्यथा त्रयो ग्रावाण इतरेतरसव्यपेक्षा उखां धारयन्ति। प्रत्यक्षं हि तत्र समुदितानामेककार्यत्वमिहत्वग्निद्वारेण भेदाध्यवसानमिति। नन्वेवं सत्यपराग्निकयोः कार्यान्तरं प्राप्नोति। अस्तु को दोषः? कर्मभेदः स्या त्तत्र याशागोमिप्रभृतिकृतव्याख्योपरोधः स्यात्। उच्यते न व्याख्योपरोधनयान्यदार्थस्यान्यथात्वमवसातुं शक्यम्। यथा हि प्रमाणैरर्थः प्रमीयते तथैव गृह्यत इति। अथवैकमेवाग्न्यन्वाधानं प्रत्यग्न्यभ्यस्यत इत्यदोषः। एवमाश्रीयमाणे प्रत्यग्न्यभ्यासं नैमित्तिकावसर इति ॥ ७ ॥

अहनि मांसमैथुने वर्जयेत् ॥ ८ ॥

ननु चाहनि मैथुनस्य प्रतिषिद्धत्वादवाच्यत्वम्। कर्मोपलक्षणार्थमहर्ग्रहणमित्यदोषः। दृश्यते च कर्मणः कालव्यपदेशः। चतुर्होत्रा पौर्णमासीमभिमृशेत् पञ्चहोत्रामावास्यामिति। नियमस्य च कर्माङ्गता न्याय्या। अतदङ्गत्वे हि पुरुषमात्राभिसंबन्धात्फलपरिकल्पना स्यात। ननु च मांसमैथुने वर्जयेदितीयत्यपि सूत्रे प्रकरणात्कर्माङ्गतावगतिरविरुद्धा व्यर्थमहर्ग्रहणमिति। सत्यमेवमाप्रयोगद्वयपरिसमाप्तेरयं धर्मो मा भूदिति प्रतिप्रयोगावसायित्वमङ्गानामिति न्यायसंसूचनार्थमहर्ग्रहणम्। एवं च सति

दाक्षायणे पुनरारम्भसामर्थ्यादाप्रयोगद्वयपरिसमाप्तेर्मांऽ सस्त्र्यमृत-मूत्रकृतवासांसि वर्जयेदित्ययं धर्मः ॥ ८ ॥

केशश्मश्रु वपते वाऽशिखम् ॥ ९ ॥

वा शब्दस्य सन्निधानाविशेषेपि सति वपतिनैव सम्बन्धः । शिखासम्बन्धे हि पक्षे सति सशिखं स्यात् । तत्र स्मृतिरुपरुध्यते । अशुचिर्वा एष यन्मुण्डस्तस्यैतदपिधानं यच्छिखेति । न चाहत्य वचनं सशिखस्य । तस्मात्स्मृत्यनुरोध एव ज्यायानिति १ ॥ ९ ॥

अपराह्णे२ व्रतोपायनीयमश्नीतः सर्पिषा सुहितौ ॥१०॥

अपराह्णग्रहणं अन्होपरभागमात्रविषयम् । शब्दसामर्थ्यान्न यथान्यत्राह्नस्त्रिभागविषयता । तत्र ह्यपराह्णे ददातीति प्रकृत्य पूर्वाह्णो वै देवानां मध्यन्दिनो मनुष्याणामपराह्णः पितॄणामिति वाक्यशेषाद्विशेषाध्यवसानम् । इहत्वपरभागमात्रवृत्तित्वमिति । भोजनकालप्रत्यासत्तेश्च । व्रतोपायनीयमिति व्रतं भोजनमुच्यते यथाऽन्यत्र तद्व्रतः स्यात् । पयो व्रतमिति च । तद्येनोपेयते अमाषादिना तद्व्रतोपायनीयम् । अश्नीत इति द्विवचनोपदेशात्पत्नी च । इतरथा हि याजमानएव नियमः स्यात् । यथा सौत्रामण्यां हुतोच्छिष्टभक्ष इति । सर्पिषेति । नात्र पयो व्रतवत्सर्पिरेव साधनं स्थित्यसम्भवात् । अमाषममांसमिति च पर्युदासात् । तेन यथाप्राप्तं सर्पिरभिधीयते । तत्रापि किं नियमविधिरुत तैलादिपरिसंख्या? कश्चात्र विशेषः । यदि नियमः तैलमपि व्यञ्जनादिसंस्कारप्राप्त्या न

---

१ केचिद्वाशब्दमशिखमित्यनेन सह योजयन्ति, अशिखं वा सशिखं वेति । तन्मते केशश्मश्रुवपनं नित्यमेव । सूत्रकारप्रस्थानाद्व्ययमर्थो ऽवसीयते । येनाधाने " पौर्णमासवद्वपनम " इत्युक्त्वा; " ऋतुनक्षत्रसम्भारसामवपने " त्यादिना वपनस्य विकल्पमाह । यदि पौर्णमासे वपनं विकल्पेन स्यात्तदा पौर्णमासीवदित्यनेनैवाधानेऽपि विकल्पस्य सिद्धत्वात्पुनर्विकल्पो न वक्तव्यः स्यात् । उक्तश्च । अत एवं ज्ञायते पौर्णमासे वपनस्य विकल्पो नास्तीति याज्ञिकदेवाः ।

२ व्रतं भोजनं येनान्नेनोपेयते ।क्रियते तद्व्रतोपायनीयम् उच्यते ।

निवर्त्यते । अथ परिसंख्या सर्पिषो न नियम इति । किमत्र युक्तम् । नियमविधिः । तत्र हि स्वार्थवृत्तिता शब्दस्य स्यात् । तैलव्युदासे परार्थता कल्पेत । लक्षणा च स्यात् । तस्मान्नियमविधिरेव । नियमे च सत्यर्थात्तैलादिनिवृत्तिः । असुहितौ अतृप्ताविति । तदेतदशनं दृष्टार्थमुत धर्ममात्रमिति? । धर्ममात्रमिति ब्रूमः । कुतः । द्रव्यकालादिनियमात् । दृष्टार्थे हि यत्किञ्चित्स्यात् । तस्माद्धर्ममात्रमिति । दृष्टार्थं वा प्रसिद्धेस्तदर्थत्वात् । न ह्यदृष्टाय कश्चिद्भुङ्क्ते । यत्तूक्त द्रव्यादिनियम इति । कामं नियमाददृष्टपरिकल्पना प्राङ्मुखोन्नानि भुञ्जीतेति वत् । न तु गम्यमानतृप्त्यपन्हवद्वारेणादृष्टपरिकल्पनामिति । प्रयोजनं सति सामर्थ्ये ऽश्नीयात् ॥ १० ॥

अन्तरेणापराग्नीगत्वा परेणाहवनीयं प्राङ्तिष्ठन्नग्निमीक्षमाणोप उपस्पृश्य व्रतमुपैत्यग्ने व्रतपत इदमहमिति वा ॥ ११ ॥

अन्तरेणापराग्न्योरिति षष्ठ्यां प्राप्तायां तदपवादोन्तरान्तरेण युक्त इत्युपपदविभक्तिर्द्वितीया । प्राङ्तिष्ठन्निति शक्यमवक्तुम् । अपरेण व्यवस्थितस्याग्नीक्षणविधानसामर्थ्यात् । अग्निमीक्षमाण इत्यपि न वाच्यम् । मन्त्रलिङ्गादेव प्राप्तः । उक्तं च प्रदेशान्तरे । आहवनीयमीक्षमाणस्तद्वचनत्वादिति । वक्तव्यं वोत्तरमन्त्रार्थत्वात् । तस्य च विलिङ्गत्वात् । प्राङ्मुखता अत्राच्या । प्रोषितस्यापि दिङ्नियमो यथा स्यादिति । अपामुपस्पर्शनमाचमनं लिङ्गात् । प्राङ्तिष्ठन्नप उपस्पृशतीति प्रकृत्य तेन पूतिरन्तरतो मेध्या वा आपो मेध्यो भूत्वा व्रतमुपायानीति । आलम्भनमात्रं वा आचमनानुपदेशात्तस्य नैमित्तिकत्वात् । शब्दसामर्थ्याच्चाप उपस्पृशतीतीलिङ्गमर्थवादमात्रं दीक्षास्नानवत् । व्रतमुपैति नियममुपगच्छतीति । अग्ने व्रतपत इत्याहवनीयाग्निरुच्यते । न हि देवस्याग्नेरीक्षणं सम्भवति । तेन दार्षद्व्रतावभृथे विपरिणामः । ननु च समिष्टयजुरन्ते प्रकृतौ चावभृथविधानात्तत्र च व्रतस्य प्रासङ्गिकत्वादग्रहणमिति चेत् । न । अतद्धर्मत्वात् । न हि समिष्टयजुरन्तताऽवभृथस्य धर्मः । तस्मान्न तदन्तएवावभृथः । तत्र न व्रतग्रहणेऽग्नि-

शब्दो विपरिणम्यत इति न तत् दुरुक्तम् ॥ ११ ॥

सत्यवाद्यतः ॥ १२ ॥

अत इत्यवाच्यम् । पाठादेव तत्सिद्धेः । स्यात्सम्बन्धज्ञापनार्थत्वात् । व्रतग्रहणोत्कर्षे सत्ययं नियमो यथोत्कृष्येतेति । अपरे त्वतः शब्दं हेत्वर्थं मन्यन्ते । ननु चैकमुपनयनसमकालमेव सत्यवदनमुत्तरेषां चैतद्विरोधीतीहापि प्राप्तम् । तथा परमाधानसमकालं न वा आहिताग्निनानृतं वदितव्यमिति । अनृतात्तिध्यपनोदेति सूत्रितम् ॥ १२ ॥

इदमन्यत् सत्यवाद्यत इत्यस्य विषयोपदर्शनायाह—

कर्माङ्गमुत्तरे सत्यवदनमिति ॥ १३ ॥

पूर्वं तु पुरुषाङ्गम् । यदिदमुत्तरदेशे तत्कर्माङ्गमिति । को विशेष इति चेत् । कर्माङ्गे प्रायश्चित्तसमुच्चयः । पुरुषार्थापचारे स्मार्त्तमेव । श्रौतापचारे श्रौतम् । नन्विह द्वे पुरुषार्थे श्रौतं स्मार्त्तं च । तत्र श्रौतापचारे कृते प्रायश्चित्तसमुच्चय इह प्राप्नोत्येव । पुनरारम्भो व्यर्थ इति । सत्यमेवं कर्माङ्गे कर्मगतविशेषनिबन्धनं विशिष्टं प्रायश्चित्तं यथास्यादिति । तच्चार्ग्वेदिके भूरिति याजुर्वेदिके भुव इति । हौतृकपदार्थानुष्ठानकाले सत्यवदनापचारे हौतृकं श्रौतं आध्वर्यवं च । स्मार्त्तं च । केचित्त्वाधानकालानृतवदनप्रतिषेधमनुवादं मन्यन्ते । तथा हि न वा आहिताग्निनानृतं वदितव्यम् । न च वदन् जातु नानृतम्वदेदित्याह ॥ १३ ॥

वृक्षारण्यौषधीनामश्नीयाद्वा ॥ १४ ॥

इदमवसरप्राप्तं सायाशनमुच्यते । आरण्यवृक्षाणामारण्योषधीनां वा श्नीयाद्वा न वेतिविकल्पः । केचिदारण्यशब्दमोषधिविशेषणं मन्यन्ते । निर्देशसामर्थ्यान्न ह्यारण्यशब्दो वृक्षपदात्पूर्वः । अतो न तदुपसर्जनमिति । न वा अविशेषेण श्रवणात् । स वा आरण्यमेवाश्नीयादिति हि प्रकृत्य या वारण्या ओषधयो द्वावृक्षमित्याह । सूत्रस्य च तन्मूलत्वादतन्त्रो निर्देश इति । सामर्थ्यासिद्धत्वात् विकल्पोऽवाच्य इति चेत् । न, अ-

वधारणार्थत्वात् । अवधार्य हि वैकल्पिके कर्मणि प्रवृत्तिर्न्याय्येति । आरण्यगुणविधित्सया वेदमुच्यते ॥ १४ ॥

## आहवनीयगृहशाय्यधो गार्हपत्यस्य वा ॥ १५ ॥

विकल्पेन हि श्रवणमत्र । तत्रायमधः शब्दः किं खट्वादिविरोधकुदुताऽऽस्तरणस्यापीति? । नास्तरणनिषेधकः । तत्रापि प्रयोगप्रत्ययाभ्यामधः सुप्तावयमिति । क्वचित्तु स्थण्डिलशायीत्यतो नास्तरणस्य निषेधः । अधःशयीताधस्तादिव हि श्रेयस उपचार इति लिङ्गात् ॥ १५ ॥

## सद्यो वा प्रातः ॥ १६ ॥

पूर्वामुत्तरां वोपवसेदिति हि पूर्वमुक्तम् । तत्र सद्यो वेतीयत्युच्यमाने तयोरेवान्यतरत्र यागः प्राप्नोति । उत्तरोपवासपक्षे च द्वितीयायाम् । तन्माभूदित्यतः प्रातर्ग्रहणम् । अथाक्रियमाणेऽपि प्रातर्ग्रहणे अङ्गानां प्रधानकालत्वस्य न्याय्यत्वात्पूर्वस्यामप्राप्तिरेव यागस्येति । उच्यते । एवं सति यथोत्तरस्यां साङ्गप्राप्तिरेवमुत्तरोपवासपक्षाऽवलम्बनद्वारेणोत्तरोत्तरस्यामपि प्राप्नुयात् । तन्निरासार्थं प्रातर्ग्रहणम् । अस्तु तथेति चेत् । न, पौर्णमास्यां यागविधानसामर्थ्यात् । एवं उत्तरस्यामप्यप्राप्तिरिति चेत् । स्यादारम्भसामर्थ्यात् पूर्वामुत्तरां वोपवसेदिति । उत्तरापि हि पौर्णमासीप्रतिपदिति प्रतिपादितम् । तेन सद्यो वा प्रातः प्रातरिति यदा प्रातस्तदा सद्य इति इतिपौर्णमासी द्वितीया च निरस्ते भवतः । सूत्रारम्भसामर्थ्यादप्ययमर्थोऽवसीयते । पक्षादौ यद्यद्धविरिति । हविः पक्षादिना विशेष्यते तच्चैवमुपपद्यते । अन्यथानैकान्तिकत्वादविशेषणं स्यात् । तस्मादुत्तरस्यामेव याग इति साधूच्यते १ ॥ १६ ॥

---

१ याज्ञिकदेवभाष्ये त्वत्र सूत्रभेदो दृश्यते । तथा हि "सद्योवा" पौर्णमासे यद्द्व्यहकर्त्तव्यमुक्तं तदेकस्यामहन्यग्न्यन्वाधानादि कर्मापवर्गान्तं भवति । "प्रातः" अस्मिन् पक्षे प्रातः प्रतिपद्दिन एव सर्वमग्न्यन्वाधानादि कर्मापवर्गान्तं कर्तव्यं न पूर्वेद्युरग्न्यन्वाधानदिने प्रतिपदः प्रधानकालत्वात् अङ्गानां प्रधानकाल-

अग्निहोत्रं हुत्वा ब्रह्माणं वृणीते ब्रह्मिष्ठं भूपते
भुवनपते महतो भूतस्य पते ब्रह्माणं त्वा
वृणीमह इति ॥ १७ ॥

प्रातरित्यनुवर्त्तमाने अग्निहोत्रं हुत्वेत्युक्ते तत्प्रतिपत्तिर्मा भूत् सायमग्निहोत्रमिति । ततः अहनि कर्मसाकल्याद्रात्रौ चाविधानात् । अग्निहोत्रग्रहणं च इहार्थाभावादमावास्या विषयम् । तत्र हि वचनम् । उदिते पौर्णमासस्य तन्त्रं प्रक्रमियादनुदिते अमावास्यस्येति । अतो अग्निहोत्रग्रहणमानन्तर्यार्थम् । ब्रह्मिष्ठमिति च पदार्थसतत्त्वोपजातावबोधेन । न हि परमात्माख्यब्रह्मसतत्त्वावबोधोत्रोपयुज्यते १ ॥ १७ ॥

वृतो जपत्यहं भूपतिरहं भुवनपतिरहं महतो भूतस्य पतिर्भूर्भुवः स्वर्देवसवितरेतं त्वा वृणते बृहस्पतिं ब्रह्माणं तदहं मनसे प्रब्रवीमि मनो गायत्र्यै गायत्री त्रिष्टुभे

---

त्वस्य न्याय्यत्वात् । तत्र च व्रतोपायनीयाशनारण्याशनान्यतरागारशयनानि न भवन्ति, उक्तकालाभावात् । रागप्राप्तेष्वेवैतेषु द्रव्यादिनियममात्रविधानाच्च । न हि रागतस्तदानीमशनादीनि प्राप्नुवन्ति । अन्यद्वपनादि सर्वं भवत्येव ।

व्यवस्थितविकल्पोयमिति केचित् । तथाच कात्यायनः—

"सन्धिश्चेत्सङ्गवादूर्ध्वं प्राक् पर्यावर्त्तनाद्रवेः-
सा पौर्णमासी विज्ञेया सद्यस्कालविधौ तिथिः" इति ।

१ वरणं चाचारादेवं कर्तव्यम् । वितानस्योत्तरतः प्राङ्मुखोपविष्टं ब्रह्माणमुदङ्मुखोपविष्टो यजमानः स्फ्यं सव्येन गृहीत्वा दक्षिणेन यवसहितेन ब्रह्मणो जान्वालभ्य वृणीते ? अमुकगोत्र अमुकशर्मन् पौर्णमासेष्ट्या वयं यक्ष्यामहे तत्र त्वं ब्रह्मा भवेति, अत्र च भूपत इत्यादिमन्त्रः, । एतच्च वरणमप्रवृत्तस्य प्रवर्तनम् । तेन पवमानेष्टिदीक्षणीयादौ न भवतीति ।

त्रिष्टुब् जगत्यै जगत्यनुष्टुभेऽनुष्टुप्प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यो बृहस्पतिर्देवानां ब्रह्माहं मनुष्याणाम् ॥ १८ ॥

वृतो जपति ब्रह्मा जपतीति यावदुक्तम् । अथवा यदा वृतः समस्तेन मन्त्रेण भवति तदा जपति कर्तृभेदाद्यौगपद्यं मा भूदिति ॥१८॥

वाचस्पते यज्ञं गोपायेत्याह ॥ १९ ॥

सामर्थ्याद्यजमानः । स हि वरणेनाऽनत्या च यज्ञगोपायने नियोक्तुं समर्थो नान्यः । वाचस्पतित्वं च स्तोतुं ब्रह्मण्यध्यारोप्यते । वाचस्पते ब्रह्मन् यज्ञं गोपायेति । यदपि च कण्वानां देवसवितरित्युक्त्वा वाचस्पते यज्ञं गोपायेत्याहेति पठ्यते । तदपि न समानकर्तृकार्थम् । पूर्वकालता मात्रे हि क्त्वाशब्दः । समानकर्तृकतायामसामञ्जस्यं स्यात् । न हि ब्रह्मात्मानमेव वाचस्पते इति सम्बोधयति । अथाधिष्ठात्री देवतोच्यते । तत्रापि नियोगाभावाददृष्टार्थता स्यात् । तस्माद्यथोपवर्णित एवार्थः । स चायं प्रैषो नियोगार्थत्वादसत्यपि वरणे प्रवर्त्तते । यथा ज्योतिष्टोमे दीक्षणीयादिष्वाधाने चेष्टिषु । कथमाधाने वरणाभाव इति चेत्स्यात् प्रवृत्तिदर्शनात्, चत्वार ऋत्विजः प्राश्नन्तीति।ब्रह्मौदनाभावेऽस्तु वरणमिति चेन्न। तत्रापि दर्शनादग्न्याधेये ब्रह्मा सामानि गायतीति। तेन प्रतिपन्नब्रह्मत्वस्य वरणं क्रियमाणमप्राकृतप्रयोजनं स्यात् । वरणविशेषनियमार्थमस्तु प्रवृत्तिरिति चेत् । न, नियमस्य क्रियापुरःसरत्वात् । सत्यां हि क्रियायां नियमानुग्रहो न नियमानुग्रहाय क्रियाप्रवृत्तिः। यो हि पण्डितं मन्यमान एवं कुर्यात्स प्राङ्मुखोऽन्नानि भुञ्जीतेति भोजननियमानुग्रहाय तृप्तोपि सन् भुञ्जीतापि । यश्च ज्योतिष्टोमे ब्रह्मवरणनिषेधो न्यायमूलः स इहापि प्रवर्त्तत एव ॥ १९ ॥

अपरेण वाहवनीयं दक्षिणातिक्रामति ॥ २० ॥

उत्तरत उपचारो यज्ञ इति वरणमुत्तरतः । दक्षिणतो ब्रह्मयजमानयोरासने इति । गमने विकल्पः । शास्त्रसामर्थ्यात् ॥ २० ॥

अहे दैधिषव्योदतस्तिष्ठान्यस्य सदने सीद योस्म-
त्पाकतर इति ब्रह्मसदनमीक्षते ॥ २१ ॥

तच्चैतत्कौशं स्यात्तृणनिरसनोपदेशात्, प्रसिद्धेश्च। न वा नियमशासनाभावात्। तृणनिरसनं तु कुशास्तृतत्वादासनस्य। तत्कुतः शिष्टानुस्मरणात्प्रसिद्धिरविशिष्टा। तस्माद्यथा प्रसिद्धमवेश्रविद्धमासनमिति ॥ २१ ॥

ब्रह्मसदनात्तृणं निरस्यति१ निरस्तः पाप्मा सह
तेन यं द्विष्म इति ॥ २२ ॥

स चायमासनसंस्कारस्तेन पशुपुरोडाशे आपशुपरिसमाप्तेः संस्कृतत्वादासनस्य पुनर्न प्रवर्त्तते ॥ २२ ॥

इदमहं बृहस्पतेः सदसि सीदामि प्रसूतो देवेन सवित्रा
तदग्नये प्रब्रवीमि तद्वायवे तत्पृथिव्या
इति ॥ २३ ॥

ब्रह्मसदन आहवनीयमभिमुख२ उपविशति॥ २४॥

तदग्नये प्रब्रवीमीत्यग्निशब्दो देवता वचनः स्यात्प्रकृतत्वात्। न वा वायुना समुच्चारणात्। तस्य चाप्रकृतत्वात्। तस्माद्देवतान्तरवचनः। प्रयोजनम् सौर्यादावविपरिणामः। ब्रह्मसदनग्रहणं गुणार्थं प्रकृतत्वादेव। को गुण इति चेदाहवनीयमभिमुख इति ॥ २३ ॥ २४ ॥

---

१ नैर्ऋत्यां दिशि प्रक्षिपति शाङ्खायने दर्शनात्। तत्र "समानं होत्रा तृण निरसनम्" इत्युक्तम्। होतुश्च पठितम् "होतृषदनात्कुष्कं तृणमुभयतः प्रतिच्छिद्य दक्षिणापरमवान्तरदेशं निरस्यति" इति, एवञ्च होत्रासाम्यसम्पादनाय तथैव कर्तव्यमिति भावः।

२ छन्दोग सूत्रे तु "परिध्योर्वा सन्धि स्रुचां वाग्राणि उत्करं वाभिमुख" इति पठितम्।

वाग्यत आनुयाजप्रसवात् ॥ २५ ॥

यतवाग्ब्रह्मा भवत्यनुयाजप्रसवं यावत् ।॥ २५ ॥

भागपरिहरणादि वा ॥ २६ ॥

सा चैषाऽवधारणा अथास्मै ब्रह्मभागं पर्याहरन्तीति प्रकृत्य स वै वाचं यम एव स्याद् ब्रह्मन् प्रस्थास्यामीत्येतस्माद्वचस इति आम्नायते । पूर्वमविशेषादध्यवसितम् । पाठक्रमाद्विशेषाध्यवसानम् । लिङ्गाच्च, विवृहन्ति वा एते यज्ञं क्षण्वन्ति ये मध्ये यज्ञस्य पाकयज्ञिययेडया चरन्तीति हेतुत्वेन वाग्यमनस्येहाचरणं निर्दिशति । तस्माद्भागपरिहरणाद्येव । स चायं पदार्थधर्म्मो यतवाक्त्वे हि सत्यप्रमादात्कृताकृतप्रत्यवेक्षणमाचरति ॥ २६ ॥

आवृता ऽवषट्कारासु ॥ २७ ॥

अवषट्कारास्वाहुतिषु १ ब्रह्माऽवृतोत्पाद्यते । ताश्चैता अग्निहोत्राहुतयो वषट्काराः । अस्ति हि तत्रैकर्त्विक्त्वेपि सति प्रायश्चित्तार्थतया ब्रह्मणः प्राप्तिः । तेन निमित्ताद्व्याहृतिहोम आपन्ने सति आवृता क्रियामात्रेण ब्रह्मोत्पद्यत इति । क्रियया हि कारकमाक्षिप्यते । लिङ्गाच्च । अथ हैतामिन्द्र ऋषये प्रायश्चित्तिमुवाचाग्निहोत्रादग्नआमहत उत्त्कादिति । न चैतदेवमेकर्त्विक्त्वात् । एवं हि श्रूयते एकर्त्विजमग्निहोत्रमिति । अङ्गप्रधानपदार्थाभिनिर्वृत्तिरेकेनर्त्विजा कर्त्तव्येति । ननु नैमित्तिकार्थतया द्वितीयोपि भविष्यति । नेत्युच्यते । न हि नैमित्तिकस्य ब्रह्माक्षेपसामर्थ्यमस्ति । भिन्ने जुहोतीति होममात्र एव विधेर्व्यापरपर्यवसानं वाक्यान्तरपरिप्राप्त इति चेत् । यदेव त्रय्यै विद्यायै शुक्रं तेन ब्रह्मत्वमित्येवमादिना व्याहृतिहोमे ब्रह्मसम्बन्धविधानम् । तेन यत्र व्याहृतयस्तत्र ब्रह्मणा भवितव्यम् । नैतदेवम् । यदि ह्येतदन्यत्राचरितार्थं स्यात्ततः कदाचित्स्यादपि । अस्ति ह्यस्य चरितार्थत्वं दर्शपूर्णमासादौ । तेनाग्निहोत्रे नान्यथानुपपत्त्या ब्रह्माक्षेप्तुं शक्यत इति । एकर्त्विक्त्वविरोधाच्च । न चात्र क्रिया ब्रह्माणमन्तरेण न सम्भवति । कर्त्रन्तरविधानात् । अस्तिह्यत्राध्वर्य्वाख्यं कर्त्रन्तरम् । तेनापि न तदाक्षेपः । यच्चोक्तमग्निहोत्रादग्नआमहत तस्कादिति ।

१ ताश्च पूर्णाहुतियूपाहुतिषड्ढोत्राहुतिसावित्राहुत्याद्याः ।

सोऽपि चतुर्स्त्रिंशद्धोमविषयोऽर्थवादः । अस्तु तर्हि दर्विहोमविषयतास्य सूत्रस्य । दर्विहोमाहुतयो ऽवषट्काराः तासां हि पौर्णमासविध्यन्तग्राहित्वेनोचितो वषट्कारः । स्वाहाकाराम्नानात्पुनर्निवृत्तिः । तदभावे ऽन्वाख्यानमुपपद्यते । तदेतदनुपपन्नम् । तत्र हि प्राप्त एव ब्रह्मा मन्त्ररहिता च क्रिया ब्रह्मवरणादिका तूष्णीमर्थ लुप्ता इति । पूर्णाहुतिविध्यन्तग्राहिहोमविषयता तर्ह्यस्तु अस्य सूत्रस्य । ता अपि ह्यवषट्कारा इति । एतदपि नोपपद्यते । अग्निहोत्रन्यायसालक्षण्यादनुद्वृताभ्यस्तमयाहुतौ पूर्णाहुतिका धर्मा विहितास्त आचार्येण पूर्णाहुत्यामुपसंहृत्यान्यत्रातिदिष्टाः । अतस्तत्रापि ब्रह्मणः प्राप्त्यभाव एव । एवं चेदिहार्थमेव सूत्रमस्तु । इह हि प्राग्ब्रह्मवरणाद्व्याहृतिहोमनिमित्ते सति तदर्थं ब्रह्मवरणापकर्षोऽन्याय्यः । अङ्गप्रधानार्थत्वाद्ब्रह्मणः । तदर्थमिदं सूत्रं आवृताऽवषट्कारासु । आवृता क्रियया । समन्त्रिकाचासौ क्रिया न्यायतः प्राप्नोति । ननु चान्यत्राचार्येणायमावृच्छब्दो मन्त्ररहितक्रियाविषयः प्रयुक्तः । मृदा सहोषां करोत्यावृतेति । सत्यमेवं मृदा सहोषां करोतीयतैव समन्त्रिका क्रिया प्राप्ता तत्रावृच्छब्दो मन्त्रनिवृत्तिपर एव । तन्निवृत्तिश्च वाचनिकी । एतयैवावृनुपहरन्यजुरिति । अतो ब्रह्मवरणापकर्षार्थमेतत् । वाचस्पतिप्रैषस्तु स्वकालीन एव व्याहृतीनामतदङ्गत्वात् । अतदङ्गता च प्रकरणव्यवच्छेदात् । शक्यन्ते चावषट्कारा व्याहृतयो वक्तुम् । उचितत्वाद्वषट्कारस्य । याज्याकार्ये हि तासामाम्नानमस्ति । यदि याज्यां पुरोनुवाक्यां वा न विन्देद्व्याहृतीरेव याज्यायाः पुरोनुवाक्याया स्वस्थाने कुर्यादिति । तेनेह वषट्काराभावे अवषट्कारा व्याहृतय उच्यन्ते ॥ २७ ॥

## अत्र वा वृतोपायनम् ॥ २८ ॥

शास्त्रस्य तुल्यत्वात् ॥ २८ ॥

## व्याहृत्य वैष्णवं मन्त्रं जपेत् ॥ २९ ॥

वाग्यत आनुयाजप्रसवादिति वाग्यमे सति यद्यनुव्यवहरति तदा वैष्णवं मन्त्रंजपेत् ॥ २९ ॥

अधिकारमुपजीवन्नाह—

अध्वर्युश्च ॥ ३० ॥

हविर्ग्रहणकाले वाग्यमने । तुल्यं हि शास्त्रमुभयोः । स यदि पुरा मानुषीं वाचं व्याहरेत्ततो वैष्णवीमृचं वा यजुर्वा जपेदिति । यजमानस्य त्वनाम्नानादाध्वर्यवमेव । केचित्तु च शब्दाद्यजमानस्य दीक्षाकालवाग्यमापचारे वैष्णवमिच्छन्ति । तत्रापि ह्याम्नायते वा यद्वाचंयमोऽप्रनत्यव्याहरतीति । स च मन्त्रः प्राकरणिकः स्यात् । प्रकरणादेवसामान्यसम्बन्धावगतेर्विशेषविषयत्वे सति वाच्यस्य लाघवं । इतरथा ह्यप्रकृत उपादीयमाने सामान्यसम्बन्धो विशेषसम्बन्धश्चेति गौरवंस्यात् ॥ ३० ॥

प्रणय यज्ञं देवता वर्धयत्वं नाकस्य पृष्ठे यजमानो अस्तु सप्तऋषीणाꣳ सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेह्योम् प्रणयेति प्रणीताः प्रसौति ॥ ३१ ॥

प्रणययज्ञमित्यनेन मन्त्रेण प्रणीताः प्रणीयमाना अनुजानाति ॐ प्रणयेत्यस्य प्रसवार्थत्वात् पुरस्ताज्जपः । प्रयोजनमुपांशुप्रयोगः । अत्र पुनर्लोकमध्यमपुरुषैकवचनाविशेषेपि सति मृग्योविशेषः । अयं च मन्त्रोनेकयजमानके कर्मणि१ यजमानाः सन्तु यजमानांश्च धेहीति विपरिणम्यते । द्वित्वेपि यजमानौ स्तां यजमानौ च धेहीति च ॥ ३१ ॥

एवमामन्त्रित ॐकारेण प्रोक्ष यज्ञमिति हविर्षीध्माबर्हिषोश्च ॥ ३२ ॥

प्रोक्षणं प्रसौति । एवमामन्त्रित इत्यामन्त्रणाविधानं ब्रह्मन् हविः प्रोक्षिष्यामीत्येवमादिलाभार्थम् । न हि तत्र प्रणीताप्रणयनवदाम्नातम् । एवमोङ्कारेणेति, ॐकारपूर्वकेणार्थसरूपेण वचसेति यावत् ॥ ३२ ॥

---

१ अहीनैन्द्राग्नकुलायसत्त्रगणयागादौ ।

बृहस्पते परिगृहाण वेदिं सुगावो देवाः सदनानि सन्त्वस्यां बर्हिः प्रथतां साध्वन्तर्हिं स्त्वापृथिवी देवी देव्यस्त्वति वेदिं परिगृह्णन्तम् ॥ ३३ ॥

प्रसौतीत्यनुवर्त्तते ॥ ३३ ॥

प्रजापतेनुब्रूहि यज्ञमिति सामिधेनीरनुवक्ष्यन्तम् ॥ ३४ ॥

होतारं प्रसौति ॥ ३४ ॥

देवता वर्द्धयत्वमिति सर्वत्रानुषजति[1] ॥ ३५ ॥

अनुषङ्गश्च लाघवार्थः । अत्र च प्रोक्षणपरिग्रहेषु अध्वर्युपरं वेदिपरं च वरुणप्रघासेषु वचनमूह्यते । यजमानपरं चानेकयजमानके ॥ ३५ ॥

मित्रस्य त्वा चक्षुषा प्रतीक्ष इति प्राशित्रं[2] प्रतीक्षते ॥ ३६ ॥

देवस्यत्वेति प्रगृह्णाति ॥ ३७ ॥

स पात्रं प्रसिद्धेः सादनोपदेशात् पुनरादानसामर्थ्याच्च ॥ ३७ ॥

[3]पृथिव्यास्त्वेतिसादयत्यपोह्य बर्हींषि ॥ ३८ ॥

---

१ पूर्वोक्तेषु प्रोक्ष यज्ञमित्यादिकेषु सर्वेष्वपि मन्त्रेषु 'देवतावर्धय त्वं नाकस्य पृष्ठे यजमानो अस्तु सप्तऋषीणां सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानञ्च धेहीति' मन्त्रमनुषजति ।

२ प्राशित्रं ब्रह्मणो भाग., यवमात्रं पिप्पलमात्रं वा ।

३ ब्रह्मा तत्प्रातिगृह्य वेदेर्दक्षिणांसदेशे स्तृतानि बर्हींषि अपसार्य प्रागूदण्डं सादयति । आश्वलायनादिसूत्रेषु तद्दर्शनात् ।

पुनरादाय देवस्यत्वेत्यनामिकाङ्गुष्ठाभ्यामग्नेष्ट्वेति प्राश्नाति दन्तैरनुपस्पृशन्नत्र चेत् ॥ ३९ ॥

पुनरादानं च द्रव्यमात्रस्य प्राशनार्थत्वात् । अतश्च आसादितेपि भविष्यति । अनामिकाङ्गुष्ठाभ्यामादायाग्नेष्ट्वेत्यनेन मन्त्रेण प्राश्नाति । चेच्छब्दो विकल्पार्थः । अत्र चेत्प्राश्नाति पुनरादाय प्राश्नाति । अथोपरिष्टात्ततो ॥ ३९ ॥

निदधाति वाꣳसदेशे ॥ ४० ॥

पूर्वमविशेषेणाभिहितं विशेषप्रतिपिपादयिषयाऽत्र पुनर्वचनम् ॥ ४० ॥

प्रक्षाल्य पात्रं नाभिमालभते या अप्स्वन्तर्देवतास्ता इदꣳ शमयन्तु स्वाहा कृतं जठरमिन्द्रस्य गच्छ घसिना मे मासं पृक्था ऊर्ध्वं मे नाभेः सीदेन्द्रस्य त्वा जठरे सादयामीति ॥ ४१ ॥

प्रक्षालनंच कार्यसम्बन्धाविशेषाद्द्वयोरपि पात्रयोः । एकवचनं तु जात्यपेक्षं । ननु चैकमेवैतत्पात्रं प्रक्षाल्य पात्रमित्येकवचननिर्देशात् । तथा तूष्णीं प्राशित्रहरणमिति । द्वे वा स्यातां प्रतिपत्तिदर्शनात् । कर्णयोः प्राशित्रहरणे इतीतरज्जात्यपेक्षयेत्युक्तम् ॥ ४१ ॥

एतं त इति समिदामन्त्रितः प्रसौति ॥ ४२ ॥

समित्सम्बन्धादामन्त्रणं समिच्छब्देनोच्यते । अथवा समिच्छब्देन तादर्थ्यादनुयाजा उच्यन्ते । अनुयाजार्थमामन्त्रित एतं त इत्यनेन मन्त्रेणानुजानाति । यज्ञपतिशब्दश्च सत्रे विपरिणम्यते । यज्ञपतिसम्बद्धवचनसंस्कारपरिलोपः कस्य चिन्माभूदिति ॥ ४२ ॥

प्रतिष्ठेति ब्रूयाद्वा ॥ ४३ ॥

स यदि कामयेत ब्रूयात्प्रतिष्ठेति वचनात् । केचित्प्रतिष्ठेति क्रियापदात्पदान्तरमध्याहरन्ति सामर्थ्यात् । तत्पुनर्युक्तमयुक्तं वेति-

विचारणीयम् । प्रतिष्ठतमिति च वरुणप्रघासेषु विपरिणामः ॥ ४३ ॥

कर्मापवर्गे समिधमादधाति जुहोत्युपतिष्ठते वा नमः कृताय कर्मणे अकृताय कर्मणे नमः अयाड् यज्ञं जातवेदा अन्तरः पूर्वो अस्मिन्निषद्य सन्व॒ सनि॒ सुविमुचाविमुञ्च धेह्यस्मभ्यं द्रविणं जातवेदः स्वाहेति यथेतमेत्य ॥ ४४ ॥

अपवर्गः समाप्तिः१। यथेतमेत्येति२ परिभाषितत्वादवाच्यमिति चेत् । अतीत्य निःक्रमणामिति । नेदमर्थेनाऽप्राप्तेः । तत्रस्थस्यापि हि समिदाधानादि न विरुध्यते । स्वाहाकाराम्नानं च उपस्थानसमिदाधानार्थम् । होमे ह्यसमाम्नातोपि प्राप्नुयादेव । स्वाहाकारः सर्वत्रेत्यनेन । स चायं पदार्थो यावदुक्तान्तापच्छिन्नादिषु निवर्त्तते ॥ ४४ ॥

एतद् ब्रह्मत्वमिष्टिपश्वोः ॥ ४५ ॥

एतद्ब्रह्मत्वमधिकारादिहोक्तम् । तदिष्टिपशुविषयम्प्रत्येतव्यम् । इष्टिग्रहणं प्रकृतत्वादकार्यम् । पशुग्रहणं च चोदकपरिप्रापितत्वात्कर्त्तव्यं वा पशुग्रहणम् । ब्रह्मानुज्ञाते प्रोक्षणं यथा स्यादिति न हि तत्र सान्नाय्यविकारत्वात् प्रोक्षणमस्ति । इष्टिग्रहणं तर्हि न कर्त्तव्यम् । न वा कार्यं वाक्याद्धि पश्वर्थतैव ब्रह्मत्वस्य स्यात् । तन्माभूदितीष्टिग्रहणम् । ब्रह्मवरणाधिकारे तत्प्रसङ्गमुपजीवता यावद्ब्रह्मत्वं तत्सर्वमभिहितं अतः प्रणयनाद्युच्यते ॥ ४५ ॥

---

१ ब्राह्मणतर्पणान्तम् । तस्मिन् इत्यर्थः ।

२ यथा येन क्रमेण इतं गतं आहवनीयस्य पूर्वेणापरेण वा तथैव एत्य आगत्य आहवनीये समिदाधानहोमोपस्थानाद्यन्यतमं करोति । होमपक्षे ‘ इदं जातवेदसे ’ इति त्यागमात्रमधिकमिति भावः ।

गार्हपत्यमुत्तरेणोदपात्रं निधायालभते भूतस्त्वा भूतकरिष्यामीति ॥ ४६ ॥

गार्हपत्यमित्युपपदविभक्तिः षष्ठ्यपवादो द्वितीया । उदपात्रं उदकस्य पात्रम् । उदकस्योदादेशः । तच्चाविशेषेपि सति चतुरश्रं स्यात् । चमसेनापः प्रणयतीति । स च चतुरस्रः प्रसिद्धेः । लिङ्गाच्च । चमसं प्रकृत्य चतुः स्रक्तिना चतस्रो वै दिश इत्याम्नायते । सूत्रकारप्रस्थानात् च । चमसवत् स्रुवेणेति । आलम्भ उदकस्य स्यात्तत्संस्काराभिप्रवृत्तेः । पात्रस्य वा । तदुपदेशात्तत्संस्कारतश्च तत्सम्बन्धिद्वारेण इडोपहवे होत्रत्वारम्भणवत् । प्रयोजनं प्रणीताकार्यापन्नयोर्दधिपयसोरविपरिणामः । उदकालम्भे हि भूतस्त्वा भूतकरिष्यामीति त्वाशब्दस्तद्विषयः स्यात् । तत्र द्रव्यद्वित्वे विपरिणाम्येत ॥ ४६ ॥

ब्रह्मन्नपः[1] प्रणेष्यामि यजमान वाचं यच्छेत्याह ॥ ४७ ॥

ब्रह्मन्नपः प्रणेष्यामीति ब्रह्मानुज्ञाप्रार्थनं ब्रह्मेत्यृत्विग्विशेषः । स च यद्यपि वरणाभरणनिमित्तस्तथापि तु ब्रह्मत्वं कर्त्तर्युपचर्यते । प्रयोजनं तु सत्त्रे ऽविपरिणामः । कुण्डपायिनामयने च मैत्रावरुणे ब्रह्मत्वं कुर्वंति । यजमान वाचं यच्छेत्यनेकयजमानके यथार्थं

---

१ यदा च प्रणीतानां सर्वार्थत्वं संयवनार्थत्वं वा तदा यस्मिन् कर्मणि चरुश्रपणार्थं पयो घृतं वा विहितम्; यथा ' वैश्वदेवश्चरुः पयसि वा ' इति, ' घृते चरुरादित्येभ्य ' इति च, तत्र पयो घृतस्य च प्रणयनं दध्नश्च मन्थाद्यर्थं कर्तव्यम, तत्र ब्रह्मन् अप्पयांसि अब्घृतानि अब्दधिनी प्रणेष्यामीत्यूहः । पित्र्यायामपि प्रणयनात्पूर्वमेव निवान्यां दुग्ध्वा तद्दुग्धस्य प्रणयनं कर्त्तव्यम ' अत्र नैमिनेर्मते प्रणीताः संयवनार्था एव, कर्काचार्याणां मते सर्वार्था एव, इतरेषामदृष्टार्था एवेति तत्त्वम् ।

विपरिणम्यते। स चायं वाग्यमः पदार्थधर्मत्वादसत्यपि प्रणयने प्रवर्त्तेत इति । प्रैषश्च तादर्थ्यात् ॥ ४७ ॥

## अनुज्ञात उत्तरेणाऽऽहवनीयꣳ सम्प्रतिनिदधाति कस्त्वेति ॥ ४८ ॥

सामर्थ्यपरिप्रापितत्वादनुज्ञात इत्यवाच्यम् । न वा प्रैषप्रैषार्थयोरानन्तर्यव्युदासार्थत्वाद्यजमान वाचं यच्छेत्यनन्तरं यथा स्यादिति । पाठादेव तत्प्राप्तिरिति चेत् । न प्रैषसमनन्तरं तदर्थानुष्ठानं न्याय्यमिति । सम्प्रतिशब्दो ऽनन्तिकानतिदूरविषयस्तानातिहृत्य सादयेन्नो अनाप्ताः सादयेदिति वचनात् । निधाने मन्त्रः स्यात्तदुपदेशात् । निदधाति कस्त्वेति । श्रुतिविरोधान्नेति चेत् । स प्रणयति कस्त्वा युनक्तीति । निधाने वा प्रणयनस्य तदर्थत्वात्तस्मादुसम्प्रत्येवोत्तरेणाहवनीयं प्रणयतीत्युपसंहारात् । शाखान्तरे तु स्पष्टतरः पाठः स निदधाति कस्त्वेति। त्वा शब्दो द्रव्यपरत्वाद्द्रव्यबहुत्वेपि पयो दधिघृतादौ विपरिणम्यते । न वाऽन्यायनिगदत्वादपः प्रणयतीति हि बहुवचनान्तोपदेशः । त्वाशब्दश्चैकवचनान्तस्तस्मादनूह इति ॥ ४८ ॥

## नान्तरेणगच्छेयुः ॥ ४९ ॥

प्रकृताऽप्रकृतयोरुपदेशात् लिङ्गाच्च नेनन्मिथुनं चर्यमाणमन्तरेण सञ्चरानिति । प्रयोजनं सर्वत्र प्रायश्चितम् ॥ ४९ ॥

## काꣳस्य वानस्यत्य मार्त्तिकैरभिचारब्रह्मवर्चसप्रतिष्ठाकामा यथासंख्यम् ॥ ५० ॥

कांस्यादीनि प्रणयनाश्रितानि मृदन्तानि अभिचारादीन्साधयन्ति । न तदाश्रया क्रिया। शब्दस्य तत्परत्वात्कांस्यादीनां फलसम्बधः । एवं च सति विकार एषामप्रवृत्तिः पुरुषार्थत्वात् । वानस्पत्ये तु वारणे प्रवर्त्तमाने क्रत्वर्थस्य साधारणत्वात्तदाश्रयः । कामो ब्रह्मवर्चसे प्रवर्त्तयत्येव । ता एताः प्रणीता दृष्टार्था उत धर्ममात्रा इति? धर्ममात्रा इति ब्रूमः । देशनियमात्पात्रनियमाच्च । तथा मन्त्रवत्तोपदेशात् । शिरः संस्तवाच्च । शिरो ह वा एतद्यज्ञस्य यत्प्रणीता

इति । अनवखण्डनसामान्याच्छिरः संस्तवः । स्कन्दनप्रतिषेधश्च धर्ममात्र उपपद्यते । इतरथा ह्यवश्यम्भाविस्कन्दनमिति । अन्ते प्रतिपत्तिविधानाच्च । अथ प्रणीता दक्षिणतः परीत्य निनयतीति । दृष्टार्थत्वे हि कदाचिदुपयुक्ता भवेयुस्तत्र प्रतिपत्तिविधानं पाक्षिकं स्यात् । अपाक्षिकं च श्रवणम् । तस्माद्धर्ममात्रा इति । दृष्टार्था वा द्रव्याणां क्रियाभिनिर्वृत्त्यर्थता प्रसिद्धेः । न हि कश्चिद्द्रव्यमदृष्टार्थं परिकल्पयति। सन्ति चात्रोदकसाध्याः क्रियाः।न च तत्सिद्ध्येन्यदुदकमुपदिश्यते । तेन दृष्टार्थेवगम्यमानेपि यो नामादृष्टङ्कल्पयति स दिङ्नियमवद्भोजनादृष्यदृष्टं कल्पयेत् । लिङ्गाच्च प्रणीताभिर्हवींषि संयौतीति । यदुक्तं दशादिनियम इति स नियमो दृष्टाय । शिरः संस्तुतिः प्राग्भागसामान्यात् । स्कन्दनप्रतिषेधश्च सुतरां दृष्टार्थत्व उपपद्यते । प्रतिपत्तिः शेषस्येति । दृष्टार्थत्वेपि सन्देहः । किं संयवनार्था उत सर्वार्था इति? । तत्र केचित्प्रतिषेधश्च सुतरां दृष्टार्थत्व उपपद्यते । प्रतिपत्तिः शेषस्येति । दृष्टार्थत्वेपि सन्देहः । किं संयवनार्था उत सर्वार्था इति? । तत्र केचित्प्रणीताभिः संयौतीति वाक्यसामर्थ्यात् संयवनार्थतामाहुः । द्रव्यप्रक्लृप्तेः परार्थत्वात्तत्र चाविशेषात्सर्वार्थत्वादनुवादोयमित्यपरे । किं चाग्नीषोमीये प्रतिषेधानुपपत्तेः संवयवनार्थत्वे हि तदभावादेव प्रणीतासु व्यर्थः प्रतिषेध इति । निरूढे च प्रतिप्रसवानुपपत्तिः । तत्रापि हि नैव संयवनमस्ति । सर्वार्थत्वे पुनः प्रतिषेधप्रतिप्रसवावुपपद्येते । सूत्रकारप्रस्थानाच्च प्रणीताद्युपसादिति । तस्मात्सर्वार्था इति ॥ ५० ॥

तृणैरग्नीन्परिस्तीर्य पुरस्तात्प्रथमं द्विशः पात्राणि
स॒ँ सादयति ॥ ५१ ॥

तृणशब्दो दर्भविषयः । यज्ञिया तु वै दर्भा इति लिङ्गात् । दर्भैस्तृणन्ति हरितैः सुवर्णैरिति च । समाचाराच्च । आचरन्ति हि दर्भैः परिस्तरणम् । आचार्याभिप्रायाच्च । बर्हिषस्तृणे तिरश्चीनि दधातीत्युक्त्वा ऽन्ये वा युक्तत्वादित्यभिधायाहान्यत्रापि तृणार्थ इति । अन्यदुपादीयमानं बर्हिर्जातीयमेव प्रतीयते न तृणान्तरजातीयम् । पुरस्तात्प्रथममिति दिगभिप्रायम् । आहवनीयस्तु कार्यक्रमादेव प्राप्नोति । ततो गार्हपत्यदक्षिणाग्नी तयोरपि पुरस्तादेव प्रथमं श्रुतेः ।

शेषं च स्मृतिवशात् । प्रदक्षिणमावृत्तिसामन्तेषु प्रदक्षिणमिति । इह च परिस्तीर्येति परिः समन्तार्थः । स्मार्त्ते चैतस्मिन् सति क्रमे तदपचारे स्मार्त्तमेव प्रायश्चित्तम् । तच्चैतत्परिस्तरणमाहुत्यङ्गं यज्ञसंयोगात् । स हैष यज्ञ उवाच नग्नताया वै बिभेमीति प्रकृत्य तस्मादेतदग्निमभितः परिस्तृणन्तीत्याह । यज्ञसम्बन्धादाहुतिर्यज्ञशब्देनोच्यते । अथ यज्ञसम्बन्धमात्रमेवोच्यते । तथासत्यग्निव्यतिरेकेणान्यत्रापि स्यात् । तत्र तस्मादेतदग्निमभितः परिस्तृणन्तीत्यसमञ्जसं स्यात् । तस्मादाहुत्यङ्गमेतत् । तत्रापि केचिदाहुत्यर्थत्वात्पदवर्वाहोमहिरण्यादिषु वाक्यसंयोगात्परिस्तरणमिच्छन्ति । वाक्यं ह्येतत् । स हैष यज्ञ उवाचेति । तच्च प्रकरणानुरोधेन न यज्ञविशेषे व्यवस्थापयितुं शक्यमिति । तदेतदसद्वाक्यस्य यज्ञविशेषविषयत्वात् । स हैष यज्ञ उवचेति एष इत्ययं शब्दः प्रकृतयागविषयः । तस्माद्दर्शपूर्णमासाहुत्यङ्गमेव । तथा चाह परिस्तीर्य तं पूर्ववत्पात्रासादनमिति । द्विशः पात्राणि सꣳसादयतीति द्वे-द्वे एकीकृत्य सा चैषा द्वन्द्वता पात्रोद्देशसामर्थ्यात्सर्वत्र प्रवर्त्तते । एवं हि समामनन्ति द्वन्द्वं पात्राण्युदाहरन्ति । ननु च शूर्पं चाग्निहोत्रहवर्णी चेत्येवमादिसमाम्नानाद्दर्शगणस्यैव द्वन्द्वता । इतरथा हि पाठवैयर्थ्यप्रसङ्गात । आह च तद्दशदशाक्षरा वै विराड् विराड् वै यज्ञ इति । नवोक्तहेतुत्वात् । उक्तं हि पात्रोद्देशेन द्वन्द्वता विधानमिति । पाठवैयर्थ्यप्रसङ्ग इति चेत् । न विशिष्टद्वन्द्वपरिग्रहार्थत्वादन्यथा हि विनियोगक्रमव्यवस्थितानां द्वन्द्वता स्यात् । तत्र स्फ्यस्य कपालैः सह द्वन्द्वता न स्यात् । अथ पुनः पाठे सति विशिष्टद्वन्द्वपरिग्रहः सिद्धो भवति । यत्पुनरुक्तं तद्दशदशाक्षरा वै विराड् विराड् वै यज्ञ इति । सोऽर्थवादः । एवं च सति विकारे चर्विष्टयां स्फ्य एक एवासाद्यते । न हि तत्र द्वन्द्वोपजनकानि कपालानि सन्तीति । अथोपरितनेन द्वन्द्वता क्रियते । तत्र यथापाठं द्वन्द्वता न कस्यचित्स्यात् । ननु वैपरीत्येऽपि स्फ्यस्य द्वन्द्वताभावप्रसङ्गः किं क्रियताम् । बह्वयथाऽर्थे मा भूदिति । अर्थवदासादितानां तु द्वन्द्वगतविशेषानाम्नानात् यस्य कस्य चिद्येन केन चिद्द्वन्द्वतेत्यविरुद्धम् । सूत्रकाराभिप्रायाच्च । द्विशः पात्राणीत्युक्त्वा शूर्पाग्निहोत्रहवणिस्फ्यकपालमित्येवमादि तु द्वन्द्वैकवद्भावमाह । तेन च सिद्धायां द्वन्द्वतायां द्विश इत्यवाच्यं

स्यात् । उक्तं च तस्मात्सर्वत्र द्वन्द्वतेति सिद्धम् । पात्रशब्दः साधनवचनो न खातवद्विषयः । तथा हि स्फ्यकपालशम्याकृष्णाजिनादीनामपात्रता स्यात् । साधनं चेत्पात्रं कपालसमुदायस्य साधनत्वाद्यथाभूतस्य द्वन्द्वता । प्रतिचितिसाधनभाव इति चेत् । तथा च प्रतिचिति द्वन्द्वता । न समाम्नानसामर्थ्यात् । स्फ्यं च कपालानि चेति । उद्धरणपाऽयोरपि कपालवदन्येन द्वन्द्वता । अर्थप्रसंख्यया द्रव्योपकल्पनामिति परिभाषितत्वादवाच्यम् । पात्रासादनामिति चेत्स्याद्देशकालार्थत्वात् ॥ ५१ ॥

## यजमानो वा ॥ ५२ ॥

विकल्पार्थोयमारम्भः ॥ ५२ ॥

## शूर्पाग्निहोत्रहवणि ऽर्थवच्च ॥ ५३ ॥

स्फ्यकपालःशम्याकृष्णाजिनगुलूखलमुसलं दृषदुपलमिति यावत् । आसादयतीति अनुवर्त्तते । शूर्पं प्रसिद्धमेव स्यात् लिङ्गाच्च । यदि नडानां यदि वेणूनां यदीषीकाणामिति । एषां चाध्वर्युरेव कर्त्ता स्यात्सामाख्यानाम्न वा करणस्याचोदित्वात् । अभ्यासङ्गाच्च । तस्मात्तद्भूतानामुपादानमिति । लिङ्गाच्च । तद्यदेवैषामत्राशुद्धस्तक्षावऽन्यो वामेध्यः कश्चित्पराहन्तीति । १अर्थवच्चेति

---

१ येषां येषां पात्राणामत्रोपयोगस्तेषां सर्वेषामुपयोगक्रमेणासादनमित्यर्थवच्चेत्यनेन बोध्यते । तथा च कात्यायनः—

“ प्राञ्चं प्राञ्चमुदगग्नेरुदगग्रं समीपतः ।

तत्तथा सादयेद्द्रव्यं यद्यथा विनियुज्यत ” इति ।

तानि चैवम् शूर्पाग्निहोत्रहवणी, स्फ्यः कपालानि, शम्या कृष्णाजिनम्, उलूखलमुसलम्, दृषदुपलम्, पात्री पवित्रच्छेदनानि, पवित्रे उपवेषः, आज्यस्थाल्युपसर्जनी पात्रम्, कुशमुष्टिरन्वाहार्यपात्रम्, वेदितृणमद्भिः, योक्त्रं स्रुवः, जुहूपभृत्, ध्रुवा सन्नहनावच्छादनानि, परिधयो विधृत्यौ, आज्यं पुरोडाशपात्र्यौ, होत्रषदनं शृतावदानम्, औषधं प्राशित्रहरणे, अन्वाहार्यतण्डुला अन्तर्धानकटः, पूर्णपात्रं पक्षे समिद्द्वयं च, इध्मबर्हिषोरुपकल्पनं खडवत्तं चेति ।

अर्थोऽस्यास्मिन्विद्यत इति अर्थवत्प्रयोजनवदित्यर्थः। तच्च विनियोगक्रमेणासाद्यते। अर्थवद्ग्रहणाद्यपि न परिध्युपवेषादिवत्साक्षाच्छ्रूयते। अन्वाहार्योपसर्जनीपात्रादि तदप्यासादनीयम्। इन्धनाद्यपीति चेत्। नाचोदितार्थत्वात्। चोदिते हि यदर्थात्प्राप्नोति तदासाद्यते। तत्रापि याज्ञिकैर्दण्डकः प्रणीतो ऽनः पात्री वा पवित्रच्छेदनानि चेत्येवमादि। तत्र चोपवेषसमनन्तरमाज्यस्थाल्युपसर्जनीपात्रम्। पेषणोपधानाज्यनिर्वपणानामेककालत्वात्। पिषन्ति पिष्टान्यभीन्धन्ते कपालान्यथैक आज्यं निर्वपतीति। उपधानोत्तरकालमुपसर्जन्याधिश्रयणमिति। कुशमुष्टिरपि तर्हि ततः पूर्वं प्राप्नोति। एवं हि सूत्रितं निरुप्याज्यं वेदं करोतीति। न समत्वादुपधानादुत्तरकालमुपसर्जन्यधिश्रयणमाज्यनिर्वापणाच्च वेदबन्धनम्। तुल्यकालतोभयोरपीति न नियमोवसीयते। उच्यते। कुशमुष्ट्युपसर्जनीपात्रयोर्यद्यप्येककालता। तत्कार्ययोस्तुगम्यते पौर्वापर्यं। प्राक्कालीनं ह्युपसर्जनीकार्यं वेदकार्यादतः पूर्वमुपसर्जनीपात्रं ततः कुशमुष्टिरिति। ततश्चान्वाहार्यपात्रं प्राशित्रहरणोत्तरकालं प्राप्नोति। न तण्डुलानामसाववसरः तत्पात्रं तु कुशमुष्ट्यन्तर्द्धानतृणयोरन्तराल इति। पात्रस्याधिश्रयणार्थत्वादेवं सर्वत्र कार्यक्रमेणासादनमालोचनीयमिति। विकारेपि च प्राकृतपात्रकार्यापन्नस्य वैकृतस्यासादनादिप्रवर्त्तत एव। किं पुनस्तत्रापि कार्यक्रम एव। न, प्राकृतपात्रक्रमः। प्रकृतावपि हि कार्यक्रम एव कारणमासादने। तद्यथा निरूढे वपाश्रपण्यनन्तरं दक्षिणाद्रव्यमिति। यत्पुनर्विकृतावप्राकृतकार्यापन्नम्। यथा मन्थनचतुष्टयम्। यूपक्षुरचतुष्टयादि तत्प्रकल्प्यत एव नासाद्यते न प्रोक्ष्यते च। न हि तस्यासादनप्रोक्षणे विहिते। न च कार्यापत्तितः प्राप्तिस्तस्मादुपकल्पनमेव। चर्विष्ट्यां चरुपात्रस्य तर्हि कपालधर्माः सन्तु कार्यापत्तेरिति। स्यादेतदेवं यदि कार्यापत्तिः स्यात्। न त्विह तथा। इह हि न चरुपात्रगतेनोष्मणा चरुः पच्यते। कपालगतेनेव पुरोडशः। कथं तर्हि चरुपात्रगत ऊष्मोदकमेव तपयति तत श्चरुसिद्धिरित्यकपालकार्यापत्तिरिति। ततश्चरुपात्रमप्युपकल्प्यते। यच्चप्रकृतावेव याज्ञिका इध्माबर्हिषोरुपकल्पनमाहुः तदिह प्रोक्षणाभावात्। तदभावश्चोपरिष्टात्प्रोक्षणविधानात्। प्रोक्षति विस्रंऽस्येति ॥ ५३ ॥

श्रपणस्य पश्चादुत्तरतो वा१ ॥ ५४ ॥

शास्त्रस्य तुल्यत्वात् ॥ ५४ ॥

कर्म्मणे वामिति शुर्प्पाग्निहोत्रहवण्यादाय वाचं यच्छति ॥ ५५ ॥

साकाङ्क्षत्वाददद इत्यध्याहारः मन्त्रश्चाविशेषादुभयार्थः । प्रयोजनमन्तरा येन्यन्तरेणापि प्रयुज्यते । शूर्पाग्निहोत्रहवण्यादानं निर्वापार्थम् । तत्संनिधावाम्नानात् । प्रयोजनं पशावमन्त्रवदग्निहोत्रहवण्यादानं प्रोक्षण्यर्थतया । वाग्यमस्तु पदार्थधर्म्मः । यां वा अमूः हविर्ग्रहीष्यन्वाचं यच्छत्यत्र वै तां विसृजत इति । कालोपलक्षणार्थत्वात्प्रयोजनं हविर्ग्रहणाभावेपि पश्चादौ भविष्यति ॥ ५५ ॥

प्रतपनं प्रत्युष्टं निष्टप्तमिति वा ५६ ॥

तत्संस्कारो हविर्ग्रहणार्थः तेन तदभावे न भवति ॥ ५६ ॥

गच्छत्युर्वन्तरिक्षमिति श्रपणस्य पश्चादनस्तिष्ठत्समाङ्गि ॥ ॥ ५७ ॥

श्रपणशब्दश्चाविशेषेपि सति अत्र गार्हपत्यविषयो ग्राह्यः । जघनेन गार्हपत्यं प्रागीषमनोऽवस्थितं भवति । तस्यदक्षिणं चक्रमारुह्यानसोधिनिर्वपतीति । विकृत्यनुप्रवृत्तिदर्शनाच्च । स जघनेन गार्हपत्यं प्राचीनावीति भूत्वा दक्षिणासीन एतः षट्कपालं पुरोडाशं गृह्णा-

---

१ श्रप्यन्ते अनेन हवींषि इति श्रपणो गार्हपत्यो वाहवनीयो वा तस्य पश्चात् प्राक्संस्थान्युदगग्राणि प्रागग्राणि वा पात्राण्यासादयति । तदुक्तं कारिकायाम्—

"उत्तरे चेदुदक्संस्थं प्राक्संस्थं पश्चिमे भवेत्" इति ।

तीति । सङ्गताङ्गं समाङ्गि । सांयौगिकानि चाङ्गान्यत्र गृह्यन्ते । न हि सामवायिकव्यतिरेकणानां व्यपदेशोस्ति । अनडुत्प्राप्तिरपि तर्हि स्यात । न केवलं गमनार्थत्वात्तयोस्तस्य चार्थाभावात् । तस्माद्युगयोक्त्रवरत्रादिमात्रमेव ॥ ५७ ॥

## धूरसीति धूरभिमर्शनम् ॥ ५८ ॥

धूः शब्दो युगशम्यान्तरालवचनः स्मृतः । एवं हि स्मरन्ति व्युत्पादयन्ति च । धूर्धूर्वेतर्वधकर्मण इयमपीतरा धूरेतस्मादेव विहन्ति वहम् । धारयतेर्वा इति । वहस्य विहन्तिरनसो वाधारणं शम्यान्तरालावनुडुत्स्कन्धसम्बन्धाद्भवति । लिङ्गाच्च । तस्य वा एतस्यानसोग्निरेव धूरग्निर्हि वै धूरथ य एनद्वहन्त्यग्निदग्धमिवैषां वहं भवतीति । अतोन्यत्रोपचारवृत्तिर्यथेषाग्नयोः । धूर्भेदाच्चोभयोरभिमर्शनम् । तत्संस्काराच्च । दक्षिणामभिमृश्य तत उत्तराम् । उदक्संस्थतासम्पत्तेः । स्मर्यते हि सर्वत्रोदक्संस्थता । लिङ्गं च भवति । तथाह्युदग्भवति । तथोदीची भवतीति च । केचित्त्वेकस्या एव धुरोभिमर्शनमिच्छन्ति । वाक्यशेषात् । अग्निर्वा एष धुर्यस्तमेतदत्येष्यन्भवति हविर्ग्रहीष्यंस्तस्मा एवैतन्निन्हुत इति । एकत्वादग्नेः सकृदेव निन्हव इति । तत्पुनरेतदर्थवादप्रायम् । अनोवयवसंस्कारश्चात्र । तौ च संस्कार्यौ भिन्नौ । प्रतिसंस्कार्यं च संस्कारावृत्तिर्न्याय्येति भेदेनाभिमर्शनमिति सम्प्रदायः ॥ ५८ ॥

## देवानामित्युपस्तम्भनस्य पश्चादीषाम् ॥ ५९ ॥

अभिमृश्य जपतीति सूत्रशेषः । अथ जघनेन कस्तम्भीमीषामभिमृश्य जपतीति श्रुतत्वात् । स चायमनः संस्कारत्वान्न प्रतीषमावर्त्तते । तत्संस्कारश्च मन्त्रलिङ्गवाक्यशेषाभ्यां देवानामसि वन्हितममित्येवमादिना ऽनोभिधीयते नेषेति । अत एवैतदुपस्तौत्युपस्तुताद्रातमनसो हविर्गृह्णानीति च वाक्यशेषः । अयं च मन्त्रश्चोदितार्थाभिधायी पितृयज्ञे विपरिणीयते । पितृणामसि वन्हितमं पिपृहूतममिति च । देवशब्दस्य प्रकृतदेववचनत्वात् । वचनं चात्रासमवेतम् । द्वयोर्हि देवतयोर्बहुवचनं श्रूयते । तेन विकार एकदैवत्ये वचनस्याविपरिणाम इति केचित् । तदेतदनुपपन्नमिव वचनस्याप्यत्र

समवायात् । बहवोह्यत्र देवता अग्निरग्नीषोमौचेति । न त्वग्नीषोमयोः समुदितयोः देवतात्वादेकत्वम् । नैतदेवम् । समुदितयोरपि देवतात्वे देवशब्दस्य प्रत्येकवृत्तित्वम् । अग्निर्देवः सोमोदेव इति प्रसिद्धम् । मन्त्रलिङ्गाच्च । देवो अग्निर्देवः सोम इति च । न चात्रावयवभूतोग्निः सोमो वा नास्ति । किं तु पृथक्त्वेन देवतात्वाभावः । पृथक् तद्धितानुपपत्तेः । समुदायाच्च तद्धितप्रत्ययदर्शनात् । समुदितयोरपि देवतात्वेऽग्नेः सोमस्य चास्त्येव समवायः । एवं च सति अग्नीषोमाभ्यामिति द्विवचनोपपत्तिः । एवं च सति अग्नीषोमयोरुज्जितिमिति च । यच्चोक्तं अपिष्टो वा देवतान्यत्वादिति युक्तं तदग्निसद्वितीयस्य पूष्णो देवतात्वाद्भवति पूष्णोन्यत्वम् । समवायस्तु पूष्णोपि न निवार्यते । अथ देवतैव देवशब्देनोच्यते । तथा च सति प्रातिपदिकार्थस्याप्यनन्यत्वात् पितृयज्ञे देवशब्दस्याप्यविपरिणामः । पितरोपि हि नोदितत्वाद्देवता शब्देनाभिधातुं शक्यन्ते । ततश्च देवताविषयो देवशब्द इति अविपरिणामः । अथ तत्र पितृशब्देन चोदना पितृभ्यः सोमवद्भ्यः पितृभ्यो बर्हिषद्भ्य इति । न च पितरो न देवशब्देनाभिधातुं शक्यन्त इति विपरिणंस्यते देवशब्दः । नैतदेवं देवताविषये हि देवशब्दे पितॄणामपि नोदितत्वाद्देवतात्वाद्देवशब्दप्रयोगो ऽविरुद्ध एव । अथ शब्दान्तराभिहितेषु देवशब्दो न प्रवर्त्तत इति । तथा च सत्यग्न्यादिष्वपि देवशब्दप्रयोगो दुर्लभः । तत्रापि हि शब्दान्तरत्वमाग्नेयो ऽग्नीषोमीय इति । इयांस्तु विशेषः इह तद्धितस्तत्र चतुर्थी । न चोदित एव शब्दोन्यत्रापि प्रयोगादित्युक्तम् । अथ देवशब्दो योगादग्न्यादिषु प्रवर्त्तते दानाद्देव इति । तथापि पितृयज्ञे अनूह एव । पितरो हि तत्साध्यक्रियाभिनिर्वृत्तिद्वारेण फलदानाद्देवा इति । तदेतदप्यसत् । प्रत्यस्तमितावयवार्थवृत्तितया देवशब्दस्यार्थप्रतीतिसामर्थ्यात् । न च दानाद्देवत्वं सर्वत्रेष्यते । न हि सर्पन्त्यपि गोधा सर्पशब्देनाभिधातुं शक्यते । प्रत्ययस्य विशिष्टजातिविषयत्वाद् भुजङ्ग एव सर्पशब्देनाभिधीयते । तेनेहापि प्रत्ययस्य विशिष्टार्थप्रवृत्तित्वाद्देव एव देवः । तेषां च बहुत्वात्समवेतं वचनम् । ननु चैवमपि देवद्वित्वम् । अग्नेरुभयत्रैकत्वात् । नैतदेवम् । एको हि केवलोग्निरपरः सोमसद्वितीय इति बहुत्वम् । ननु चैवमपि देवानामिति षष्ठी बहुवचनमनुपपन्नम् । न हि तदन्यः पृथगग्निना

सोमेन च सम्बध्यते । इतरेतरसव्यपेक्षयोर्देवतात्वात् । यथा च देवानां देवतात्वं तथा तदर्थहविर्द्धारणद्वारेणानो देवानामित्युच्यते । सत्यमेतदेवं मन्त्रे देवशब्दस्य बहुवचनान्तत्वात्तेषां च साक्षादनः सम्बन्धाभावात्तदुपलक्षितसमुदायद्वारेणानः सम्बध्यत इत्यदोषः । ततश्च विकार एकदेवत्ययोर्देवस्यासि देवयोरसीति च युक्तरूपतरं वचनम् । लिङ्गमपि चात्र समवेतं । विशिष्टलिङ्गत्वादग्न्यादीनाम् । ततश्चादित्येष्ट्यां देव्या असीति प्रयोगः । न च देवशब्दो देवताशब्दवदाविष्टलिङ्गः । येनादित्येष्टचामप्यविकृतः प्रयुज्येत । देवीं वाचमजनयन्त देवा इति दर्शनात् । तथा देव्यनुमते देव्यदिते देवीराप इति चेति । केचित्तु लिङ्गवचनयोरसमवायं मन्यमाना अपि परिणाममिच्छन्ति । तत्पुनर्विचारणीयम् । यज्ञपतिशब्दश्चानेकयजमानके विपरिणम्यते । चोदितार्थाभिधानात् ॥ ५९ ॥

## विष्णुस्त्वेत्यारोहणम् ॥ ६० ॥

विष्णुस्त्वेत्यनेन मन्त्रेणानसो दक्षिणं चक्रमारोहति । एवं हि श्रूयते । स जघनेन गार्हपत्यं प्रागीषमनोवस्थितं भवति । तस्य दक्षिणं चक्रमारुह्यानसो विर्निर्वपतीति ॥ ६० ॥

## प्रेक्षत उरुवातायेति हविष्यान् ॥ ६१ ॥

व्रीहीन्यवान्वा । तच्चैतद्धविः प्रेक्षणं नानाबीजेष्ट्यां तत्संस्कारात्प्रतिबीजमावर्त्तते । मन्त्रश्च क्रियाशेषत्वात् । साकाङ्क्षत्वाच्चोरुवातायेत्यस्य भवेत्यध्याहारः । ननु चाथ प्रेक्षत इति प्रेक्षणस्य चोदितत्वात् श्रौतक्रियापदाध्याहार एव न्याय्यः । सत्यमेवं, यत्र तेनैकवाक्यतोपजायते । इह पुनरुरुवातायेति विस्तीर्णता हविषः प्राणाय वाताय प्रार्थ्यते । न चासौ प्रेक्षत इति क्रियापदेन शक्यतेभिधातुम् । तस्माद्यथोक्त एव भवेत्यध्याहारः ॥ ६१ ॥

## अपहतमिति निरस्यत्यन्यत् ॥ ६२ ॥

हविर्द्रव्यव्यतिरेकेण यदन्यल्लोष्टादि तदपहतमित्यनेन मन्त्रेण निरस्यति । रक्षोभिधायकत्वाच्च मन्त्रस्योदकोपस्पर्शनं भवति । प्रतपनमन्त्रे चैवम् । नानाबीजेषु च शक्यत्वाद्युगपदपद्रव्य-

निरसनं भवति ॥ ६२ ॥

अविद्यमानेऽभिमृशेत् ॥ ६३ ॥

अभिमर्शनेऽप्ययमेव मन्त्रो । अथापास्यत्यपहतꣳ रक्ष इति यद्यत्र किञ्चिदापन्नं भवति । यद्युनाऽप्येव मृशेदिति श्रुतत्वात् । नानावर्जिषु च भेदेनाभिमर्शनसंस्कारः । ततश्च मन्त्रावृत्तिः ॥ ५३ ॥

यच्छन्तामित्यालभते ॥ ६४ ॥

हविर्द्रव्यं प्रकृतत्वात् । पञ्चभिरङ्गुलीभिरभिमर्शनं स्यात् । मन्त्रलिङ्गवाक्यशेषाभ्यां यच्छताम्पञ्चेति निबध्नन्तु पञ्चेत्येतदुक्तं भवति । तथा पञ्च वा इमा अङ्गुलयः पाङ्क्तो वै यज्ञस्तद्यज्ञ मेवैतदत्र दधातीति । नवोपदेशाभावात् । मन्त्राणां चाविधायकत्वात् यच्छन्तां पञ्चेति चग्रहणापेक्षया । बहुषु च भेदेनालम्भः संस्कारात् ॥ ६४ ॥

देवस्यत्वेति गृह्णात्याग्नेयं चतुरो[1] मुष्टीन् ॥ ६५ ॥

ग्रहणे मन्त्रः स्यात् । तदुपदेशात् । स गृह्णाति देवस्यत्वेति । प्रक्षेपे वा । गृह्णातेस्तदर्थत्वात् । तत्कुतः । वचनादग्निहोत्रहवण्यां चतुरो मुष्टीन्निर्वपति । मुष्टीन्यजमानो गृह्णीयात् । परिमाणस्य याजमानत्वात् । न वा पदार्थप्राधान्यात् । तस्य चाध्वर्युकर्तृकत्वात् । तत्कुतः । समाख्यानाद्यजमानपरिमाणमन्यविषयम् यथा पञ्चारत्निं परिवासयेदिति ॥ ६५ ॥

एवमग्नीषोमीयम् ॥ ६६ ॥

ननु चोत्तरसूत्रादेव तत्प्राप्तेरवाच्यमेतदिति । न हि तदैन्द्राग्नविषयम् । यथा दैवतमन्यदित्येतद्विषयताप्यस्यास्त्विति चेत् ।

---

१ मुष्टित्रयं मन्त्रेण चतुर्थं तूष्णीम् । एवमेव सर्वेषु सूत्रेषु । ग्रहणानन्तरं चाग्निहोत्रहवण्याः शूर्पे हविः पृथक् पृथक् प्रक्षेपणीयम् । एवं शूर्पादानस्यापि दृष्टार्थता भवति । अग्निहोत्रहवण्यां च रिक्तायां हविरन्तरं ग्रहीष्यते; आपश्च तत्र करिष्यन्त इति तत्त्वम् ।

ततश्चावाच्यमेवमग्नीषोमीयमिति । न समाम्नायोपप्रदर्शनार्थत्वात् । यथा दैवतमन्यदिति हि प्राप्तौसमाम्नायो न प्रदर्शितः स्यात् । तत्र पूर्वस्मिन् मन्त्रे ऽग्नीषोमाभ्यां जुष्टं गृह्णामीति शेषभावमियात् ॥ ६६ ॥

## यथादेवतमन्यत् ॥ ६७ ॥

ऐन्द्राग्नार्थोयमारम्भः । ननु चैवं यथा देवतमिति नोपपद्यते । वीप्सायां ह्ययमव्ययीभावः । या या देवता यथादेवतमिति । वीप्सा च बहुविषया । न चात्र देवता बहुत्वम् । अतोनुपपन्नमेतदिति । अथ विप्रकृत्यर्थमुच्येत । तत्रापि चोदकेनैव प्राप्तत्वादवाच्यता । प्रकृत्यर्थत्वे च शब्द दोष इत्युक्तम् । उच्यते, प्रकृतावेव देवता बहुत्वमस्ति । तद्धैके चरुं निर्वपन्ति पौर्णमास्यां सारस्वते ऽमावास्यायां सरस्वत्या इति । ऐन्द्राग्नेन सह देवता बहुत्वम् । अथायमविधिः स्यात्तथाभ्युदितेष्टिविषयं भविष्यति । अस्ति हि तत्र व्रताशक्तौ ग्रहणे देवताबहुत्वमिति । नन्वभ्युदितेष्टिरपि विकृतिरूपा ततश्च विकृत्यन्तरवन्नैवं विषयतापि स्यात् । सत्यमेवम् । तदेवेदं कर्मविकृतरूपमित्यदोषः ६७ ॥

## भूतायत्वेति शेषाभिमर्शनम् ॥ ६८ ॥

साकाङ्क्षत्वान्मन्त्रस्य परिशेषयामीत्यध्याहारः । न ह्यत्राभिमर्शनक्रियापदमेकवाक्यतामुपैति । किमिति । भूताय प्रभवायाविच्छेदाय नारातये नादानाय कृपणतया परिशेषयामीति एकवाक्यता । न ह्यस्याविच्छेदायाभिमर्शनम् । परिशेषणं त्वविच्छेदाय भवति । तस्माद्यथोक्त एव वाक्यशेषः । स चायं शेषसम्बन्धेपि सति हविष एव संस्कारः । प्रयोजनवत्वात् । न च शेषेण संस्कृते नास्ति प्रयोजनम् । अत स्रङ्मालापनयनवच्छेषिसंस्कारः प्रतिपत्तव्यः । तद्यथा । स्रङ्माला देवदत्तीयेति कृत्वा शुचौ देशे व्यवस्थाप्यते । अपगतदेवत्तसम्बन्धाया अपि मालायाः संस्कारो देवदत्तस्यैवानिष्टपरिहारार्थं, न मालाया, एवमिहापीति, प्रयोजनं शेषिसंस्काराभिसम्बन्धार्थतया सशेषं ग्रहणं कर्त्तव्यमिति ॥ ६८ ॥

स्वरति प्राङीक्षते ॥ ६९ ॥

तच्चैतदूढक्संनिरोधोपजातश्रमापनोदायेक्षणम् । परिवृतमिव वा एतदनो भवति तदस्यैतच्चक्षुः पाप्मगृहीतमिव भवति यज्ञो वै श्वरहर्देवाः सूर्यस्तत्स्वरे वै तदतोभिविपश्यतीति लिङ्गात् । प्रयोजनं निर्वापाभावे न भवति ॥ ६९ ॥

द्दृ हन्तामित्यवरोहति ॥ ७० ॥

अनसः ॥ ७० ॥

गच्छत्युर्वन्तरिक्षमिति[१] श्रपणस्य पश्चात्सादयति पृथिव्यास्त्वेति ॥ ७१ ॥

यो यदा श्रपणः । अग्निशब्दश्चात्र[२] श्रपणाग्निविषयः । न देवतावचनः सन्निधानात् । प्रयोजनं विकृतावविपरिणामः ॥ ७१ ॥

पात्र्यां वा स्फ्योपहितायाम् ॥ ७२ ॥

एतदनः सम्बन्धिप्रतिपत्तव्यम् । उतो पात्र्यै गृह्णन्तीति हि समामनन्ति तदा ॥ ७२ ॥

धूरीषारोहणानि पात्रीबिले जपति ॥ ७३ ॥

धूरीषारोहणादिशब्दैस्तन्मन्त्रा लक्ष्यन्ते । जपति शब्दोपादानात् । विलिङ्गा अपि वचनसामर्थ्यात् विनियुज्यन्ते । अनन्तरायमुतर्हि य-

---

१ उत्तरदेशं प्रति ।

२ अत एव वरुणप्रघासेषु पूर्वेद्युर्मेषमिथुनकरम्भपात्रार्थं गृहीतानां यवानां दक्षिणाग्नेः पश्चात् सादनम् । पित्र्यायां च दिग्विपर्ययाद्गार्हपत्यदक्षिणाग्न्योरुत्तरतो हविषामासादनम् । त्र्यम्बकेषु गार्हपत्यस्य दाक्षिणत इति विवेकः ।

जूंषि जपेदिति १ ॥ ७३ ॥

दृंहन्तामित्युत्थानम् ॥ ७४ ॥

अस्मिन्पक्षे ॥ ७४ ॥

कुशौ समावप्रशीर्णाग्रावनन्तर्गर्भौ कुशैश्छिनत्ति पवित्रे स्थ इति ॥ ७५ ॥

अप्रशीर्णाग्रावग्रवन्तौ । अनन्तर्गर्भौ ययोरन्तर्मध्ये गर्भौ न स्तः । तौ कुशैश्छिनत्ति पवित्रे स्थ इत्यनेन मन्त्रेण ॥ ७५ ॥

तीन् वा ॥ ७६ ॥

छिनत्तीत्यनुवर्त्तते । तत्र मन्त्रो न स्यात् द्विवचनान्तत्वात् । पवित्रद्वयपक्षे च कृतार्थत्वात् । स्याद्वार्थाभिधानसामर्थ्यात् । प्रातिपदिकार्थस्य विद्यमानत्वात् । द्विवचनस्यासमवायान्नेति चेत् । माभूत्समवायः । गुणो हि संख्या प्रातिपदिकार्थः प्रधानभूतः । न च

---

१ इदमत्रानुसन्धेयम् । एषां मन्त्राणां त एवार्था भवन्ति येऽनसि । कथम् ? धूस्तावद्धूर्वतेर्बधकर्मण इति सापि ( पात्री ) किं चिदागच्छद्विहन्ति । तत्राप्यग्निरस्ति सर्वगतत्वात् । हविर्ग्रहीष्यन्नध्वर्युस्तामतिक्रामति, तस्या अपि निन्हुते धूरसीत्यादिना । अनोवच्च पात्र्यपि हविष्यान् धारयतीति वन्हितममित्यादिशब्दैरुच्यते । विष्णुश्चाध्वर्य्वात्मकः, तत्र पादेन क्रमते अत्र तु हस्तेनेति विशेषः । तस्मात् सिद्धप्रयोगाणां पात्र्यामपि त एवार्था इति हरिस्वामी । यदि तु पात्र्यां गृह्णीयात्तदा धूरिषाद्यभावेन तदननुष्ठानकृतं व्यवधानमन्तरायमन्तरेण तत्प्रकाशकयजूंषि जपेदिति माधवाचार्याः । पात्रीतः पश्चाद्देशे उत्तरस्मिन्वोपविश्य प्राङ्मुखो ग्रहणं कुर्यात्, पित्र्यायां दक्षिणासीनः, त्र्यम्बकेषूदङ्ङासीनः । आसनाय स्थानासम्भवे पात्रीमपरेणैव गत्वा दक्षिणतः प्राङुपविष्टेनैव ग्रहणं कार्यम् । पात्रीगार्हपत्योरन्तराले गमनस्यासिद्धत्वात् । अनस्यपि प्राङ्मुखोपविष्टेनैव ग्रहणं कर्तव्यमिति दिक् ।

गुणानभिधानेन प्रधानमभिधास्यतीति शक्यते उत्स्रष्टुम् । तस्मात्त्रित्वपक्षेऽपि मन्त्रः प्रवर्त्तत एव ॥ ७६ ॥

हविर्ग्रहण्यामपः कृत्वा ताभ्यामुत्पुनाति सवितुर्व इति ॥ ७७ ॥

हविर्ग्रहणीति न हविर्ग्रहणविवक्षया । किं तर्हि अग्निहोत्रहवण्यां चतुरो मुष्टीन्निर्वपतीत्याम्नानात् । अतस्तद्विवक्षेयम् । प्रयोजनं ग्रहणाभावेपि तत्रापः क्रियेरन् । ताभ्यामुत्पुनाति सवितुर्व इत्यनेन मन्त्रेण ॥ ७७ ॥

तास्थानं तयोः ॥ ७८ ॥

ताः अपिः पवित्रयोः स्थानं वचनसामर्थ्यात् । पवित्रे निधाय प्रणीतास्विति चाम्नानात् ॥ ७८ ॥

सव्ये कृत्वा दक्षिणेनोदिङ्गयति देवीराप इति ॥ ७९ ॥

उदिङ्गयति ऊर्ध्वं गमयति । दक्षिणग्रहणं शक्यमवक्तुं, समाचारात्प्राप्तेः । कर्त्तव्यं वा, सव्यस्थितानामेव प्रोक्षणीनामुदिङ्गनं यथा स्यादिति । यज्ञपतिशब्दश्चानेकयजमानके यथार्थं विपरिणम्यते १ ॥ ७९ ॥

प्रोक्षितास्थेति तासां प्रोक्षणम् ॥ ८० ॥

ताभ्य एवाद्भ्य एकदेशेनेति सम्प्रदायः । नेत्यपरे स्वात्मनि क्रियाविरोधात् । न हि प्रोक्षणे कर्मता करणता च

---

१ स च 'यज्ञपती सुधातू' 'यज्ञपती देवयुवौ' 'यज्ञपतीन् सुधातून्' 'यज्ञपतीन् देवयून्' इत्यादि यथायथमूहनीयः ।

तासां सम्भवतीति । अन्याश्च नोपदिश्यन्ते । तस्मान्मन्त्रोच्चारणमेव । तदेताभ्यो निन्हुत इति च लिङ्गात् । अत्र पुनस्तासां प्रोक्षणमित्यसमञ्जसं स्यात् । हविश्चेति प्रोक्षणक्रियानुकर्षणार्थचशब्दानुपपत्तिश्च । तस्मात्सम्प्रदाय एव ज्यायान् । अथ ताभिरेव प्रोक्षणं विरुध्यते ततः प्राणीतेन भविष्यति । निन्हवश्चार्थवादप्रायः ॥ ८० ॥

## हविश्चाग्नये त्वाग्नीषोमाभ्यां त्वेति ॥ ८१ ॥

अत्र क्रियापदाभावात् अधस्तनसूत्रोपात्तं प्रोक्षणक्रियापदं च शब्देनानुकृष्यते । तच्च यथाश्रुतमेकवाक्यतामनुपपद्यमानस्तत्प्रोक्षतीति विपरिणतरूपमनुकृष्यते ॥ ८१ ॥

## यथा देवतमन्यत् ॥ ८२ ॥

कृतं व्याख्यानम् ॥ ८२ ॥

## पात्राणि दैव्यायेति ॥ ८३ ॥

प्रोक्षतीत्यनुवर्त्तते । शुन्धध्वं इति बहुवचनसामर्थ्यात् । कुटीकृत्य प्रोक्षणमित्येके । तन्न प्रोक्षणस्य पात्रोद्देशेन विधानात् । समुदायस्य वाचोदितत्वात् । प्रतिसंस्कार्यं च संस्कारावृत्तिर्न्याय्या । तस्मात्प्रतिपात्रमेव । बहुवचनं तु पूजार्थम् १ । एता उत्या उषसः केतुमक्रतेति वत् । देवशब्दस्य स्थाने पितृयज्ञे प्रधानार्थेषु पात्रेषु-शूर्पकपालकृष्णाजिनोलूखलमुसलादिषु पितृशब्देन प्रयोगः । यानि त्वङ्गप्रधानार्थानि प्रनाडिकयापि तेषु देवपितृशब्दप्रयोगः । यत्तु तत्रापि देवकर्मार्थं तत्र दैव्यायेत्येव । पात्र प्रोक्षणे च विनियोगक्रमः । क्रमान्तराभावात् ॥ ८३ ॥

## असञ्चरे प्रोक्षणीर्निधाय ॥ ८४ ॥

स चासञ्चरः प्रणीताहवनीयान्तरालम् । ता नान्तरेण सञ्चरेयुरित्युक्तत्वात् । यद्यपि चाहवनीयगार्हपत्यान्तराले हविष्पात्रस्वा-

१ परेतु यथाव्रीहिप्रोक्षणे जातेः प्रोक्षणं न व्यक्तेरेवं प्रात्रप्रोक्षणेपि, तथाच बहुवचनमप्युपपन्नमित्याहुः ।

म्यृत्विजां अन्तरागमनप्रतिषेधे सति असञ्चरव्यपदेशो भवति । तथापि तु प्रकरणसमधीत एव परिगृह्यते । नान्तरेण गच्छेयुरिति । इतरस्य च सर्वविषयत्वात् । प्रोक्षणीशब्दश्च यौगिको न जातिनिमित्तः संस्कारनिमित्तो वा । प्रोक्षणीभिरुद्व्रजिताः स्म इत्यसंस्कृतेपि शब्दप्रयोगात् । प्रकृत्युपसर्गप्रत्ययसमुदायार्थस्यावगम्यमानत्वत् । उक्षतिः सेचने, प्रशब्दश्च प्रकर्षे, करणे च प्रत्ययः प्रोक्ष्यत आभिरिति । चिन्तायाः प्रयोजनम् । आज्यप्रोक्षणीरुद्यम्येत्यत्रासंस्कृता आदीयन्ते ॥ ८४ ॥

## शर्मासीति कृष्णाजिनादानम् ॥ ८५ ॥

शर्मासीत्यनेन मन्त्रेण कृष्णाजिनादानम् । कृष्णाजिनमिति षष्ठीतत्पुरुषः । कृष्णस्य अजिनं कृष्णाजिनम् । न कर्मधारयः । कृष्णं च तदजिनं चेति । कुत एतल्लिङ्गात् । स कृष्णो भूत्वाचचार तस्य देवा अनुविद्य त्वचमेवावच्छाया जह्रुरिति । कृष्ण इति मृगोभिधीयते । प्रयोजनं मार्गं यथा स्यादिति । तदेतदादानमवघातार्थं तदभावेऽभावः ॥ ८५ ॥

## अपेत्य पात्रेभ्योवधूनोत्यवधूतमिति ॥ ८६ ॥

यद्यपि चापगमनक्रियाऽध्वर्युविषया १ । तथापि सामर्थ्यात् । कृष्णाजिनापनयनं प्रत्येतव्यम् । तस्य ह्यपनयनमत्रश्रूयते । अतिनत्येव पात्राण्यवधूनोति यद्ध्यस्यामेध्यमभूत्तद्ध्यस्यैतदवधूनोतीति । तच्चैतदवधूननं दृष्टार्थत्वात्सकृत्क्रियते । रक्षोभिधायकत्वाच्च मन्त्रस्योदकालम्भो भवति ॥ ८६ ॥

---

१ हरिस्वामिमतेनेदम्, तेहि ' अतिनत्य पात्राणि ' इत्यस्य अतिनत्य अतिक्रम्य पात्राण्यतीत्य ' नहि पात्राणि मेध्यानि सन्ति पुनरमेध्यानि कर्तुं युक्तम्, इत्यभिप्रायेणाध्वर्युः पात्राण्यतिक्रम्य कृष्णाजिनं सकृदवधूनोतीति व्याचख्युरिति ।

१प्रत्यग्ग्रीवमास्तृणात्यदित्यास्त्वागिति ॥ ८७ ॥

चर्मणां प्राग्ग्रीवतोक्ता तदपवादः प्रत्यग्ग्रीवमिति ॥ ८७ ॥

सव्याशून्ये निदधात्युलूखमद्रिरसि ग्रावासीति वा ॥ ८८ ॥

सव्येन पाणिना अशून्ये कृष्णाजिने उलूखलं स्थापयति । अद्रिरसीत्यनेन मन्त्रेण ग्रावासीति वा ॥ ८८ ॥

प्रतित्वेत्युभयोः ॥ ८९ ॥

शेषः । अत्राद्रिग्रावशब्दावुलूखलं स्तोतुं प्रयुज्येते । नहीदमश्ममयमुलूखलम् । वानस्पत्य इति विरोधात् । पृथुबुध्न इति च मन्त्रवर्णात् । सामर्थ्याच्च । अभिनिहितमेव सव्येन पाणिना भवति । अथ दक्षिणेनोलूखमाहरतीति । न ह्यश्ममयमुलूखलं दक्षिणेनैकेनाहर्तुं शक्यते । तस्मादुपचारवृत्त्याद्रिग्रावशब्दौ । ये तु मन्त्राभिधानसामर्थ्यमात्रेणैवाश्ममयतां नियमयन्ति त एव प्रष्टव्याः । किं च मुसलेपि ग्रावशब्दप्रयोगात् । बृहद्ग्रावासीति । असंशयं च तद्वानस्पत्यम् । अत्र केचिन्नखनिर्भिन्नचरौ वानस्पत्यपदस्य स्थाने मानुष इति विपरिणाममिच्छन्ति । तत्पुनर्नातियुक्तमिव । न ह्युलूखलकार्यापत्तावपि नखानां कृष्णाजिने स्थापनमस्ति । यतो न ते उलूखलवत्कृष्णाजिने स्थिता तण्डुलनिवृत्तिं कुर्वन्ति ॥ ८९ ॥

हविरावपत्यग्नेस्तनूरिति ॥ ९० ॥

अग्नेस्तनूरित्यनेन मन्त्रेणोलूखले हविर्द्रव्यमावपति । अग्निशब्दश्च न देवता वचनो लिङ्गात् । यज्ञो हि तेनाग्नेस्तनूरिति । यज्ञसा-

---

१ प्रतीच्यां ग्रीवा यस्य तत् प्रत्यग्ग्रीवम् । "कृष्णाजिनमवधूनोत्यूर्ध्वग्रविमुदङ्ङावृत्यावधूतमित्यथैतत्पुरस्तात्प्राचीनग्रीवमुत्तरलोमोपस्तृणाति" इत्यादिना तैत्तिरीयेप्युक्तमेतत् ।

धने यज्ञशब्दस्तस्य चाग्निसम्बन्धादग्नेस्तनूरित्युच्यते । तस्मात् ज्वलनविषयोऽग्निशब्दः। अग्नीषोमयोश्चानभिधानात्। प्रयोजनमवभृथे अपान्तनूरिति विपरिणामः। तत्रापि सवनीयैः सहानुष्ठानात्। असति प्रयोजने दार्षद्वतावभृथविषयतोहस्य। पितृयज्ञे च देववीतय इत्यस्य स्थाने पितृवीतय इति प्रयोगश्चोदितार्थाभिधानात् ॥ ९० ॥

वाचं विसृजते ॥ ९१ ॥

एवं हि श्रूयते यां वा अमूः हविर्ग्रहीष्यन्वाचं यच्छत्यत्र वै तां विसृजते इति ॥ ९१ ॥

यजमानश्च ॥ ९२ ॥

वाचं विसृजत इति वर्त्तते ॥ ९२ ॥

हविष्कृता वा ॥ ९३ ॥

हविष्कृदाह्वानकाले वा वाग्विसर्गः । तत्रापि हि श्रूयते। वाग्वै हविष्कृद्वाचमेवैतद्विसृजत इति । नन्वर्थवादरूपत्वान्नायं विसर्गकालः। सत्यमेवं पूर्वत्रापि ह्यर्थवादसरूपतैव किं तूभयत्राश्रितं विधित्वमाचार्येण वाक्यान्तराद्वा कुतश्चित् ॥ ९३ ॥

नानाबीजेष्वन्त्ये सामर्थ्यात् ॥ ९४ ॥

नानाबीजेष्ट्यां किमन्त्ये वाग्विसर्जनमुताद्ये? यथा देवसू हविःषु। तत्र हविरावपनस्य यतवाक्त्वं धर्मः। शूर्पादानादेर्व्याभाषणम्। एकैकं च हविस्तुषविप्रमोकान्तं कर्त्तव्यम् । पदार्थस्यैतावत्त्वात् । तत्र यद्याद्ये वाग्विसर्गः शूर्पादानादेर्व्याभाषणधर्मानुग्रहः। अथान्ते हविरावपनस्य यतवाक्त्वधर्मानुग्रहः । तत्र नियमानियमयोर्नियमसामर्थ्यादन्त्य एव वाग्विसर्गः । न हि शूर्पादानादेर्व्याभाषणधर्मनियमः। इतरत्र यतवाक्त्वं नियतं इति ॥ ९४ ॥

बृहद्ग्रावेति मुसलमादत्ते ॥ ९५ ॥

हविष्येषु मुसलमिति वाक्यशेषः ॥ ९५ ॥

स इदमित्यवदधाति ॥ ९६ ॥

स चायं मन्त्रः स इदामिति चोदितार्थाभिधायकत्वात् पितृयज्ञे विपरिणम्यते । वचनलिङ्गयोस्तु कृतं व्याख्यानम् ॥ ९६ ॥

## हविष्कृदेहीति त्रिराह्वयति ॥ ९७ ॥

हविष्कृदेहीत्यनेन मन्त्रेण त्रिः संशब्दयति हविः संस्कर्त्रीं पत्नीमग्नीधं वा ॥ ९७ ॥

## अतः पत्न्यवहन्त्यन्यो वा ॥ ९८ ॥

अत इत्यवाच्यं पाठक्रमादेव तत्सिद्धेः । वाच्यं वा । प्रवृत्तावघातस्याह्वानप्रज्ञापनार्थत्वात् । तत्कुतो वचनसामर्थ्यात् । हविष्कृदेहीति त्रिरवघ्नन्नाह्वयतीति । अन्यशब्देन च नर्त्विक्व्यतिरिक्तोन्य उच्यते । अन्यस्याप्रकृतत्वात् । ऋत्विजां च परिक्रीतत्वात् । सूत्रकारप्रस्थानाच्च । ऋत्विजां वैको प्रकृप्रत्वादिति । तेनाध्वर्युव्यतिरिक्तोन्यः परिगृह्यते । स चाग्नीत्सान्निकर्षात् । समाख्यानुग्रहाच्च । ब्रह्मापीति चेत् । न, तस्य वेदत्रयविहितकर्मसम्बन्धात् समाख्यानुग्रहाभावात् । भवति चाग्नीधोध्वर्युसमाख्यानम् । आश्विनमध्वर्यवो भक्षयन्तीति प्रकृत्याम्नायते । त्रय आश्विनं भक्षयन्ति अध्वर्युः प्रतिप्रस्थाताग्नीध्र इति । तस्मादन्यशब्देनाग्नीदभिधीयते ॥ ९८ ॥

## आह्वयत्याहन्त्यन्यो दृषदुपले कुक्कुटोसीति त्रिः शम्यया द्विर्दृषदं सकृदुपलाम् ॥ ९९ ॥

हविष्कृदाह्वानं कुर्वत्यध्वर्यावन्यो दृषदुपले आहन्ति । शम्यया करणभूतया । द्विर्दृषदं सकृदुपलाम् । कुक्कुटोसीत्यनेन मन्त्रेण । अन्य इति कुतो वचनात् । स यत्रैष हविष्कृतमुद्वादयति तदेको दृषदुपले समाहन्तीति । एष इति सर्वनामशब्देनाध्वर्योः परामर्शात्तदेको दृषदुपले सामाहन्तीत्येकशब्दोग्नीद्विषयः । ततश्च वचनादग्नीध आहनने कर्तृत्वम् । न विरोधादुपधानवत् । तत्र ह्यनागृहीतकर्तृविशेषकं वचनं स वै कपालान्येवान्यतर उपदधाति दृषदुपले अल्पतर इति । इह पुनर्गृहीतः कर्तृविशेषः । अथ हविष्कृतमुद्वादयतीति

समाख्ययाध्वर्युः स यत्रैव हविष्कृतमुद्वादयति तदेको दृषदुपले समाहन्तीति । तस्मान्न विरोधादग्नीदिति । प्रयोजनमव्यापृतत्वम् अध्वर्यावग्नीदेवावहन्ति इति । ननु च द्विर्दृषदं सकृदुपलामित्युक्त्वा त्रिरित्यवाच्यम् । स्यादेतदेवं यदि त्रिशब्दो हन्तिना सम्बध्यते । अयं तु मन्त्रेणाभिसम्बध्यते । त्रिःकुक्कुटोसीति । द्विर्दृषदि सकृन्मन्त्रप्रयोगे प्राप्ते एकद्रव्ये कर्मावृत्ताविति मन्त्राभ्यासार्थोयमारम्भः । हन्त्यभि सम्बन्धे पुनः त्रिशब्दस्यानुवादत्वं स्यात् । स चायमदृष्टोपकारकः पदार्थ इति । वक्ष्यत्युत्तरत्र तथा च सति यावदुक्ते निवर्त्तेत ॥ ९९ ॥

वर्षवृद्धमसीति शूर्प्पमादत्ते ॥ १०० ॥

अवहन्ताऽभिप्रवृत्तत्वात् ॥ १०० ॥

प्रतित्वेति हविरुद्वपति ॥ १०१ ॥

स एव ॥ १०१ ॥

परापूतमिति निष्पुनाति ॥ १०२ ॥

अपहतमिति तुषान्निरस्यति ॥ १०३ ॥

अध्वर्यु रनवघातशेषत्वात् । न चैषा प्रसिद्धिर्यदवहन्ता तुषान्निरस्यतीति । प्रतिपत्तिश्चैषा । तदभावेऽभावः ॥ १०२ ॥ १०३ ॥

वायुर्व इति विविनक्ति ॥ १०४ ॥

पृथक् करोति । तण्डुलान् कणांश्च वितुषी करणाय । तच्चैतद्विविक्तीकरणं तुषनिरासनात्पूर्वं प्रतिपत्तव्यम् । सामर्थ्यादशेषनिरसनं ह्येवं सति भवति । उक्तं च विरोधेर्थस्तत्परत्वादिति । सूत्रक्रमश्च यथाश्रुतीत्यदोषः । स चायमवघातः कृष्णाजिनादानादितुषविप्रमोकान्तः । तत्र नानाबीजेष्टयां हविरावपनमुसलयोजनहविरुद्वपननिष्पवनविवेकीकरणानि भेदेन मन्त्रवन्ति । हविष्परत्वान्मन्त्रस्य । शेषं तन्त्रेण ॥ १०४ ॥

देवीव इति पात्र्यामोप्याभिमन्त्रयते ॥ १०५ ॥

हविष्यान् । नानाबीजेष्टयां च सन्निपातात्तन्त्रेणाभिमन्त्रणम् १ ॥ १०५ ॥

त्रिः फलीकरोति देवेभ्यः शुन्धध्वं देवेभ्यः शुन्धध्वमित्येके ॥ १०६ ॥

फलीकरणं कणविमोकः । तच्च कर्त्तव्यं देवेभ्यः शुन्धध्वमित्यनेन मन्त्रेण । वीप्सा प्रतिफलीकरणमन्त्रावृत्तिपरा । न हि प्रतिप्रहारं मन्त्रावृत्तिर्युज्यते । पितृयज्ञे च पितृभ्यः शुन्धध्वमिति विपरिणामः ॥ १०६ ॥

फलीकृत्य कणान्निदधाति ॥ १०७ ॥

फलीकृत्येत्यवाच्यम् । पाठक्रमादेवतत्सिद्धेः । स्यात्प्रतिफलीकरणं कणनिधानं यथास्यादिति ॥ १०७ ॥

पेषणोपधाने युगपत् ॥ १०८ ॥

स वै कपालान्येवान्यतर उपदधाति दृषदुपले अन्यतर इति हि प्रकृत्य समामनन्ति । तद्वा एतदुभयं सह क्रियत इति । तत्र पेषणमन्तरङ्गत्वादध्वर्युः करोति । बहिरङ्गत्वात् चोपधानमग्नीद्वर्त्तयति २। तत्र श्रुतिपठानुसारेण पूर्वमुपधानमुच्यते ॥ १०८ ॥

धृष्टिरसीत्युपवेषमादायापाग्न इत्यङ्गारान्प्राचः करोति ॥ १०९ ॥

उपवेषोङ्गारापोहनसमर्थं काष्ठम् । तद्धृष्टिरसीत्यादाय अपा-

---

१ परेतु नानाबीजेष्टयां भेदेन मन्त्रपाठमिच्छन्ति कालभेदात् ।

२ अध्वर्योः पेषणकार्ये व्यापृतत्वात् । ततश्च यत्र विरोधो नास्ति यथा वरुणप्रघासेषु अध्वर्योर्मेषकरणे प्रतिप्रस्थातुश्च करम्भपात्रमेषीकरणे तत्रोभयोर्यथास्वं स्वयमेव कर्परोपधानं, नाग्नीध्रः ।

ग्न इत्यनेन मन्त्रेण प्राचोङ्गारानुदूहति । तच्चैतदङ्गारापोहनं देशरेचनार्थं रिक्ते हि देशे कपालानि यथोपधीयेरन्निति। एवं च सति चर्विष्ट्यामपोहनाभावः । धानाभर्जनस्य च देशरेचनकृतोपकाराभावात् । अङ्गारेषु ह्यधिश्रयणमुभयोरपि प्रसिद्धम् । केचिदनेन मन्त्रेणाङ्गारनिरसनमेव कुर्वन्ति । मन्त्रलिङ्गात् । अपाग्ने अग्निमामादं जहि निःक्रव्यादꣳ सेधेति अपजह्यग्निमामादं निषेध च क्रव्यादमिति । वाक्यशेषाच्च । एतावंवैतदुभावतोपहन्तीति । तदेतदनुपपन्नमविधानात् । विध्यन्तरशेषत्वाच्च । अस्तिह्यत्र विध्यन्तरम् । तेन प्राचोङ्गारानुदूहतीति । मन्त्राणाञ्चाविधायकत्वमुक्तम् अत उदूहनमात्रमेव । अपिचाग्न्युत्सर्गे दोषो दृश्यते वीरहा वा एष भवति योग्नीनुत्सृजतीति ॥ १०९ ॥

## आदेवयजमित्यङ्गारमाहृत्य कपालेनावच्छादयति ध्रुवमसीति ॥ ११० ॥

यद्यपि चाङ्गारे द्वितीया कपाले च तृतीया । तथाप्यङ्गारस्य निष्प्रयोजनत्वात्कपालस्य च प्रयोजनवत्त्वात् कपालार्थतैवाङ्गारस्य। कपालधर्मोपि च सन् तं मध्यमेन कपालेनाभ्युपदधातीति। मध्यमसंयोगात्तद्धर्म एवायं न कपालमात्रधर्मः । न च भर्जने प्रवर्त्तते । अङ्गारेषु हि तस्याधिश्रयणम् । आपितृयजं वहेति च पितृयज्ञे विपरिणामः । ननु चायमसमवेतवचनः । न ह्यत्र देवा इज्यन्त इति । तेन देवयाट्त्वं यथाकथञ्चिदत्रोच्यते । देवेज्यार्थहविःश्रपणद्वारेण देवयाड्त्वमस्यापि भवति। यथा च देवयाड्त्वं तथा मन्त्रोनुवदति । तस्मात्समवेतवचनः ॥ ११० ॥

## अमुष्येति द्विषच्छब्दे ऽभिचरन् ॥ १११ ॥

अमुष्य वधायेति अभिचरन्नामातिदिशति। द्विषच्छब्दमपनीय । सचायं द्विषच्छब्दो न स्वरूपतो गृह्यते किं तर्हि द्विषच्छब्दान्तरमपि। एवं च सतीह भ्रातृव्यशब्दे व्यादेशः सिद्धो भवति ॥ १११ ॥
किमिहैव द्विषच्छब्दे भिचरतो नामादेशः । नेत्युच्यते—

## अन्यत्रापि ॥ ११२ ॥

अतोऽन्यत्रापि अभिचरतो द्विषच्छब्दे नामादेशः कर्त्तव्यः । यथा द्विषतो बधोसि भ्रातृव्यमवबाध इत्येवमादि ॥ ११२ ॥

संव्याङ्गुल्याशुन्येङ्गारं निदधात्यग्ने ब्रह्मेति ॥११३॥

अभिनिहितमेव सव्यस्य पाणेरङ्गुल्या भवतीति श्रूयते । स चायं कपालसंस्कारत्वात्प्रतिकपालमावर्त्तते । गुणविभक्तिनिर्द्दिष्टमपि चात्र प्रयोजनवत्त्वात्कपालमेव संस्कार्यमागारे गावो वास्यन्ताम्, प्राकारे कुसुमानीति वत् । भर्जनेपि चोपरिष्टादङ्गारः प्रवर्त्तत एव । अदृष्टार्थत्वात् । चरोस्त्वकपालकार्यापत्तेर्न तद्धर्मप्रवृत्तिः ॥ ११३ ॥

धरुणमिति पश्चात् ॥ ११४ ॥

कपालमुपदधातीति वाक्यशेषः ॥ ११४ ॥

१पुरस्ताद्धर्त्रमिति ॥ ११५ ॥

२विश्वाभ्य इति दक्षिणतः ॥ ११६ ॥

प्रथमं कपालमङ्गीकृत्येतरत्र दिङ्नियम उच्यते—

समं विभज्य द्वे दक्षिणत एवमुत्तरतश्चित-
स्थेति ॥ ११७ ॥

समं विभज्य चितस्थेत्यनेन मन्त्रेण द्वे दक्षिणत एवमुत्तरत उपदधाति प्रदक्षिणक्रमयोगेन । स्मार्त्तं चैतत्प्रदक्षिणं न श्रौतं ततश्च तदपचारे स्मार्त्तमेव प्रायश्चित्तं भवति । समं विभज्येत्यवाच्यम । द्वे दक्षिणत एवमुत्तरत इति स्वशब्दाभिधानात् । स्यादग्नीषोमीयार्थत्वात् । तत्र हि समविभागानुक्तावधिकं दक्षिणत इति न वि-

---

१ ‘ धर्त्रमसि दिवम् ’ इत्यनेन मन्त्रेण पुरस्तात् पूर्वस्यां दिशि कपालमुपदधाति ।

२ ‘ विश्वाभ्यस्त्वाशाभ्य ’ इत्यनेन दक्षिणतः दक्षिणभागे कपालं स्थापयति ।

भागाधिकं स्यात् । तत्र को दोषः । संख्याधिक्यमप्याशङ्क्येत । अथ पुनः समविभाग उक्ते यदधिकं विभागस्य दक्षिणत उपधानं सिद्धं भवति ॥ ११७ ॥

तूष्णीं वा ॥ ११८ ॥

न चितस्येति ॥ ११८ ॥

एवमेकादशाग्नीषोमीयस्य ॥ ११९ ॥

कपालान्युपदधातीति शेषः१ ॥ ११९ ॥

---

१ इदमत्राकूतम् । एतानि सर्वाणि कपालानि निरन्तराणि संश्लिष्टानि समानि चोपधेयानि यथान्तरा भूमिर्न दृश्यते । अत्र मध्यमपङ्क्तिकपालानि द्यङ्गुलानि समचतुरस्राणि; एवं च षडङ्गुलदीर्घा मध्यमापङ्क्तिः । दक्षिणोत्तरपङ्क्ती तु किञ्चित्ततो न्यूने । पुरोडाशस्य कूर्माकारोक्त्या वृत्ताकारत्वप्रसिद्धेर्यावत्कपालं प्रथनविधेश्च तदर्थकपालचितेरपि अर्थात् वृत्ताकारताया गम्यमानत्वात् । ऐन्द्राग्ने चतुर्थोपधानानन्तरं समविभागेन चत्वारि दक्षिणतश्चत्वार्येवोत्तरतः । अत्र कपालचितिक्षेत्रं मध्यमाश्वशफप्रमाणम् । षडङ्गुलं वृत्तं कृत्वाततः प्रागपच्छेदेन समं त्रेधा विभज्य मध्यमभागस्य तिर्यगपच्छेदेन त्रेधा विभागः कार्यः, दक्षिणोत्तरभागयोस्तु खण्डचन्द्राकारयोः पुरोडाशकपालसङ्ख्यानुरोधेन तिर्यग्विभागः । तत्र षट्कपाले दक्षिणो भागो द्वेधा उत्तरे त्वेकमेव कपालं खण्डचन्द्राकारमुत्तरभागप्रमाणम् । सप्तकपाले दक्षिणो भागस्त्रेधा, उत्तर एकधा । अष्टाकपाले दक्षिणो भागस्त्रेधा उत्तरो द्वेधा । नवकपाले दक्षिणश्चतुर्धा उत्तरो द्वेधा । दशकपाले दक्षिणश्चतुर्धा मध्यमोत्तरौ त्रेधा । एकादशकपाले दक्षिणः पञ्चधा इतरौ त्रेधा । द्वादशकपाले दक्षिणः पञ्चधा मध्ये त्रेधा उत्तरश्चतुर्धा । त्रयोदशकपाले दक्षिणः षड्धा उत्तरश्चतुर्धा, मध्यमः सर्वत्र त्रेधैव । एकं कपालं चेत्तत्पाणिसंमितम् । द्विकपाले वृत्तस्य तिर्यगपच्छेदेन द्वेधा विभागः । त्रिकपाले वृत्तस्य तिर्यक्समं त्रेधा विभागः । चतुष्क-

## अधिकं दक्षिणतः ॥ १२० ॥

विभागाधिकं यत्तद्दक्षिणत उपधेयं क्रमेणैव न सर्वोपधाना- नुत्तरं स्मृत्यनुग्रहात् ॥ १२० ॥

## भृगूणामित्यङ्गारैरभ्यूहति ॥ १२१ ॥

कपालानीति शेषः । स चायं मन्त्र एककपाले विपरिणम्यते । तपसा तप्यस्वेति· वचनस्य समवायात् । द्विकपाले च तप्येथामि- ति । अभ्यूहनं च कपालावतापनार्थम् । तप्तेषु कपालेषु यथापुरोडा- शः पच्येत । एवं च सति कपालविध्यन्तग्राहिणोपि धानाभर्जनस्य नाङ्गारैरभ्यूहनं भवति । प्रसिद्ध्यभावात् । अधस्ताद्धि तस्य सन्तापनं प्रसिद्धमिति ॥ १२१ ॥

## उपसर्जनीरधिश्रयति ॥ १२२ ॥

उपसर्जनी शब्देन संयवनार्था आप उच्यन्ते । तदधिश्रयणं च तप्ताभिः पिष्टानां मार्दवं यथा स्यादिति । एवं च सति पुरोडाशपाकार्था एवैताः । ततश्च यत्र श्रपणं तत्रोपसर्जन्यधिश्रयणमपि कार्यम् । पितृयज्ञे च दक्षिणाग्नौ श्रपणविधानात् मन्थक्षीरोपसर्जन्यधिश्रयणमपि तत्रैवेति सम्प्रदा- यः । अत्र पुनरधिश्रपणे कृते उपकारो मन्थे त्वेषितव्यो । न ह्युपसर्जे- नीगतेनोष्मणा सक्तूनां पाक उपजन्यते । पिष्टानामिव पुरोडाशे । त- स्मादनधिश्रयणमेव न्याय्यतरमिवाभाति । करम्भपात्रेषु चैवम् । ननु चोपधानसमनन्तरं युगपदुपक्रमाभिधानात्पेषणमभिधेयम् । इत- रथा हि प्रकृतपरित्यागोऽप्रकृतोपदानं चायुक्तं स्यात् । तेनोपसर्जन्य- धिश्रयणविधानस्यायमनवसर इति । उच्यते । उपधानवत्पेषणेन

---

पाले वृत्तसमं प्राञ्चमपच्छिद्योत्तरभागस्य त्रेधा विभागः दक्षि- णत एकम् । पञ्च कपालेऽपि वृत्तं प्राञ्चं द्वेधापच्छिद्योत्तरभाग- स्य त्रेधा विभागः दक्षिणस्य द्वेधा । कपालानि तु घर्षणाद्युपायेन तथा करणीयानि यथा कपालचितिक्षेत्रं वृत्तं सम्पूर्यत इति याज्ञि- कादिभाष्येषु ।

सह यौगपद्यं यथा स्यादित्येवमर्थमिहाभिधानम् । तथा च विरोधादग्नीध एव कर्तृत्वमत्रापि । यत्र तु विरोधो नास्ति यथा चर्विष्टयां तत्राध्वर्योरिवोपसर्जन्यधिश्रयणे कर्तृत्वम् । अपरे तूपधानसमनन्तरमुपसर्जन्यधिश्रयणाभिधानस्य प्रयोजनान्तरं व्यावर्णयन्ति । यत्रोपधानं तदधिश्रयणमपि तत्रैवाधिकाराद्यथा स्यादिति । एवं चोपसर्जन्यानयकाल एव तासामधिश्रयणम् ॥ १२२ ॥

कृष्णाजिनमादत्ते पूर्वत्प्रतिकृष्णाजिनम् ॥ १२३ ॥

कृष्णाजिनस्य यत्पूर्वं धर्मजातमुपदिष्टम् आदानादि सव्याशून्यकरणान्तं तदिहातिदिश्यते । तुल्यश्रुतित्वात् । तच्चैतत्पेषणार्थत्वादपेषणे न स्यात् ॥ १२३ ॥

तस्मिन्दृषदं धिषणासीति ॥ १२४ ॥

तस्मिन्कृष्णाजिने दृषदमुपधाति धिषणासीत्यनेन मन्त्रेण ॥ १२४ ॥

पश्चाच्छम्यामुपोहत्युदीचीं दिव इति ॥ १२५ ॥

उपरिष्टाद्वाक्यशेषात् । हनू एव दृषदुपले जिव्हैव शम्येति जिव्हासंस्तुतिरन्तरालवृत्तिसामान्येन । न वाविरोधात् । विरुध्यते ह्युपरिशम्ययोपहितया पेषणम् । किं चान्यदधस्तादुपहिता दृषदः प्राक्प्रवणतामुपजनयतीति निश्चलीकरोति । अतोदृष्टार्थत्वादधस्तादुपधानम् । लिङ्गाच्च । स ये जघनेन शम्यां पिष्यमाणानामवशीयन्ते पिष्टानि वा तण्डुला वेति । अधस्तादुपहिताया एतद्घटाति नोपरि । जिव्हासंस्तुतिरुपधानक्रमापेक्षया ॥ १२५ ॥

दृषद्युपलां धिषणासीति ॥ १२६ ॥

पेषणार्थत्वादुपलायां दृषद्येवोपधानं प्राप्नोति । तेन शम्याया न दृषद्युपधानमिति । अभिहितन्यायसंसूचनार्थं दृषद्ग्रहणम् ॥ १२६ ॥

धान्यमसीति तण्डुलानोप्य पिनष्टि प्राणायत्वेति प्रतिमन्त्रम् ॥ १२७ ॥

धान्यशब्दः सत्वकेषु व्रीह्यादिषु रूढः । यद्यपि च धिनोतेर्धान्यमित्यवयवार्थो गम्यते । तथापि प्रत्ययस्य विशिष्टार्थविषयत्वात् गोशब्दवद्रूढिशब्दत्वम् । एवं च सति लक्षणया तद्विकारप्रकाशनं शब्दस्य । यवगुलिका अपि तद्विकार एवेति मन्त्रः प्रयुज्यत एव । शाक्यानामयने च तरसमयाः पुरोडाशा भवन्तीत्यत्र तरसमसीति मन्त्रो विपरिणम्यते । धान्यशब्दस्य जातिनिमित्तत्वात् । ननु च प्रकृतौ प्रकृतिद्रव्यशब्देन धान्यविकारद्रव्याभिधानादत्रापि तरसप्रकृतिद्रव्यशब्देन मृगोसीत्यभिधानं कर्त्तव्यम् । एवं हि तत्र वचनं संस्थिते संस्थितेहनि गृहपतिर्मृगयां याति स तत्र यान् मृगान् हन्ति तेन तरसमयाः सवनीयाः पुरोडाशा भवन्तीति । तरसस्य मृगः प्रकृतिद्रव्यम् । नैतदेवम् । प्रकृतौ ह्याम्नानसामर्थ्यात् धान्यशब्देन लक्षणया तण्डुलाभिधानम् । इह पुनः स्वायत्ते प्रयोगे नावाचकशब्दप्रयोगो युज्यते । तस्मात्तरसमसीत्येव प्रयोगः । पिनष्मीति चाध्याहारः साकाङ्क्षत्वात् ॥ १२७ ॥

दीर्घामिति कृष्णाजिने प्रोहति ॥ १२८ ॥

प्रक्षिपति पिष्टानि । प्रोहनं च पिष्टस्य सतः । नानाबीजेषु चैकैकं प्रोहणान्तं कर्त्तव्यं प्रसिद्धेः ॥ १२८ ॥

चक्षुषे त्वेतीक्षते ॥ १२९ ॥

पिष्टानि इति चाध्याहारः । साकाङ्क्षत्वात् । ईक्षणं च द्रव्यसंस्कारत्वात्तण्डुलानामपि चर्विष्टयां प्रवर्त्तते १ ॥ १२९ ॥

पिष्यमाणेषु निर्वपत्यन्यो महीनामित्याज्यम् ॥ १३० ॥

---

१ वाजप्रसवीयजुहोतौ चयने; वाजपेये च सर्वौषधीनामिति देवादिभाष्येष्वधिकम् ।

पिंषन्ति पिष्टान्यभान्धते कपालान्यथैक आज्यं निर्वपतीति तुल्यकालश्रवणात्। अत्रान्यशब्देन कैश्चिद्यजमानोभिधातुमिष्यते। अध्वर्य्वग्नीधौ हि पेषणोपधानयोर्व्यापृताविति। तथा च सूत्रकारप्रस्थानम्। निरुप्याज्यं वेदोसीति यजमानो वेदं करोतीति। तदेतदयुक्तमिवाभाति। यत्कारणम्। यत्किञ्चिदिह कर्त्तव्यं तत्सर्वमृत्विग्भिः परिक्रीतत्वादृत्विजाम्। अतोन्यशब्देन ब्रह्माभिधीयते। अन्य इत्यध्वर्युसन्निकर्षादृत्विगेव गृहीतुं न्याय्यो न यजमानः। सूत्रकारप्रस्थानाच्च। वचनविरोधाभ्यामन्य इति। यत्पुनरुक्तं निरुप्याज्यं वेदं करोतीति तत्रापि न समानकर्तृकतार्थः क्त्वाप्रत्ययादेशः। न ह्यत्राज्यनिर्वापविधानं अन्यत्र विहितत्वात्। तेनानिर्ज्ञातकालस्य वेदबन्धस्य कालं लक्षयितुं क्त्वाप्रत्ययविकारो ल्यप् प्रयुक्तः। यथान्यत्र निरुप्याज्यं प्रातर्दोहमन्यस्मिन्निति। तस्माद् ब्रह्मैवाज्यं निर्वपेत्। निर्वापश्च पात्रान्तरे १प्रक्षेपणम् ॥१३०॥

पात्र्यां सपवित्रायां पिष्टान्यावपति देवस्येत्वेति ॥ १३१ ॥

पात्र्यामावपनं संयवनार्थम्। ततश्च चर्विष्ट्यां तण्डुलानां पात्र्यामनावपनम्। संयवनाभावात्। सपवित्रता चादृष्टोपकारिणीति चरावपि भवति ॥ १३१ ॥

२श्रपणस्य पश्चादुपविशत्यन्तर्वेदि वा ॥ १३२ ॥

अन्तर्वेदिग्रहणाच्छ्रपणोऽत्र गार्हपत्योभिप्रेतः ॥ १३२ ॥

उपसर्जनीरानयत्यन्यः ॥ १३३ ॥

---

१ पात्रान्तरमाज्यस्थाली। तस्यालक्षणमुक्तं छन्दोगपरिशिष्टे—

"आज्यस्थाली च कर्तव्या तैजसद्रव्यसम्भवा।
महीमयी वा कर्तव्या सर्वास्वाज्याहुतीषु च" इति।

२ सपवित्रां पात्रीमादायेत उत्थाय गार्हपत्यस्य पश्चादुपविशति, अथवा वेद्याः करिष्यमाणाया अन्तर्देशे उपविशतीत्यर्थः।

उपसर्जन्यन्यशब्दौ व्याख्यातार्थौ ॥ १३३ ॥

पवित्राभ्यां प्रतिगृह्णाति समाप इति ॥ १३४ ॥

ता आनीयमानाः पवित्राभ्यां प्रतिगृह्णाति समाप इत्यनेन मन्त्रेण । तथा चानीयन्ते यथा मन्त्रान्तेन ग्रहणं भवति । स चायमपामभिधायकत्वात्तत्कार्योपन्ने पयसि दधनि घृते च विपरिणम्यते । उपसर्जन्यानयनं च चरावप्यकार्यलोपात् प्रवर्त्तत एव ॥ १३४ ॥

संयौति जनयत्यै त्वेति ॥ १३५ ॥

तच्चैतत्पिण्डार्थत्वाच्चरौ न भवति ॥ १३५ ॥

१समं विभज्यासंहरिष्यन्नालभत इदमग्नेरिदमग्नीषोमयोरिति ॥ १३६ ॥

समविभागो दृष्टार्थः । तत्सहावघ्नाति तत्सहापिंषन्ति तत्पुनर्नानाकरोतीति दृष्टार्थावगमात् । ततश्चैकस्मिन्न प्रवर्त्तते । केचिदाग्नेयालम्भात् दृष्टार्थेऽभिनिर्वृत्ते अग्नीषोमीयाभिलम्भनमदृष्टायेति मन्यमाना विकृतावग्नीषोमीयविकार एककेऽप्याग्नावैष्णवादौ आलम्भमिच्छन्ति । तत्पुनरयुक्तम् । दृष्टार्थत्वात्तस्य । विभागपूर्वको ह्यालम्भः एवं ह्युक्तम् । तत्पुनर्नानाकरोतीति । तस्मादेकके ऽनालम्भः । समं विभज्यालभत इतीयतापि सिद्धे यदसंहरिष्यन्निति सूत्रयति तद्यस्य यस्य यदा संहारस्तस्य तस्य तदालम्भो यथास्यादिति । यथा चरूणां फलीकरणान्ते पौष्णस्यावेक्षणान्त इति ॥ १३६ ॥

यथा देवतमन्यत् ॥ १३७ ॥

कृतव्याख्यानम् ॥ १३७ ॥

इषे त्वेत्याज्यमधिश्रयत्यन्यः ॥ १३८ ॥

---

१ द्वौ पिण्डौ कृत्वा पुनर्मिश्रणमकरिष्यन् क्रमेणैतौ पिण्डावालभत इत्यर्थः ।

अन्यश्चात्र ब्रह्माभिधीयते । पुरोडाशयोर्ह्यध्वर्य्वग्नीध्रौ व्यापृतौ । ऋत्विक्कर्तृकत्वं च कर्मणः परिक्रयाम्नानादित्युक्तम् । याजमानं च परिभाषितमेव, प्रधानꣳ स्वामी फलयोगादित्येवमादि । विरोधाच्च प्राप्त एव ब्रह्मणि यदन्यग्रहणं करोति तदविरोधेऽप्युपसदादौ ब्रह्मैव यथा स्यादित्येवमर्थमिति सम्प्रदायः । अपरे त्वन्य इति न्यायसूत्रमाहुः । विरोधादेवान्यप्राप्तेः । एवं ह्याह । तद्वा एतदुभयꣳ सह क्रियत इति प्रकृत्याद्धोह वा एष आत्मनो यज्ञस्य यदाज्यमर्द्धो यदिह हविर्भवति स यश्चासावर्द्धो य उचायमर्द्धस्ता उभावग्निं गमयावेति । एवं चाविरोधेऽध्वर्योरेवाधिश्रयणं स्यात् ॥ १३८ ॥

## अपत्नीकस्याहवनीये तच्छ्रापिणः ॥ १३९ ॥

अपत्नीक इति नाविद्यमानया पत्न्याधिकाराभावात् । तस्माद्विद्यमाना एव पत्न्यपत्नीवत् यदा रजस्वला तदैतद्भवति । तथाचाह प्रेत्येहनि यस्य पत्न्यनालंभुका स्यात्तामवरुध्य यजेतेति । आहवनीयश्रापिणोऽपत्नीकस्याहवनीय एवाज्याधिश्रयणम् । एवं ह्युक्तमाहवनीयश्रापिणं प्रकृत्य यस्यपत्नी न भवत्यग्र एव तस्याहवनीयेऽधिश्रयतीति । इतरस्य तु गार्हपत्य एव १ ॥ १३९ ॥

## घर्मोऽसीति पुरोडाशौ युगपत् ॥ १४० ॥

आज्यस्य पुरोडाशयोश्च युगपदधिश्रयणम् । तद्वा एतदुभयꣳ

---

१ केचित् अपत्नीको मृतपत्नीक इत्याहुः । तस्याप्येकाकिन एवाधानं श्रूयते आश्वलायनब्राह्मणे । पत्न्यां मृतायामग्निभिर्दग्ध्यायां पुनर्विवाहासम्भवे आत्मार्थमग्न्याधानमाहापस्तम्बो दर्शपौर्णमासाग्रयणार्थं शेषाणि कर्माणि न भवन्तीति । तथा त्रिकाण्डे मण्डनः—

" तस्मान्नयैकदेशेन दग्धव्या पर्वमारिणी ।
पत्नी ज्येष्ठतरा वापि यज्ञपार्श्वे निरूपितम् " इति ।

कर्मप्रदीपे कात्यायनः—

" मृतायामपि भार्यायां वैदिकाग्नीन्न हि त्यजेत् ।
उपाधिनापि तत् कर्म यावज्जीवं समापयेत् " इति ।

सह क्रियत इति ह्युक्तम् । तत्र चाध्वर्युर्मुख्यत्वादाग्नेयमधिश्रयति । अग्नीषोमीयमग्नीत् ॥ १४० ॥

उरुप्रथा इति प्रथयति यावत्कपालमनति पृथुम् ॥ १४१ ॥

यावत्कपालमित्युक्ते ऽति पृथुप्राप्त्यभावात् । निषेधवैयर्थ्यमनतिपृथुमिति उच्यते । कपालपरिमाणसिद्धौ यावत्कपालमिति प्रथनपरिमाणोपपत्तिः स्यात् न तु कपालपरिमाणं सिद्धम् । अतस्तत्परिमाणावधारणायानतिपृथुग्रहणम् । तत्कथं? श्रुतिसंयोगात् । तं न सत्रापृथुं कुर्यादिति प्रकृत्याश्वशफमात्रं कुर्यादित्युहैक आहुरिति । अनेकयजमानके च यथार्थं मन्त्रविपरिणामः । चरौ च कार्याभावात्प्रथनाभावः । यश्च येनाधिश्रितः स तस्य प्रथनाभिमर्शने करोतीतरथा हि तप्तकपालसंयोगाच्छोषणे सति प्रथनमनुपपन्नम् ॥ १४१ ॥

१अग्निष्ट इत्यद्भिरभिमृशति सकृत्त्रिर्वा ॥ १४२ ॥

चरौ न स्यात्कार्यलोपात् ॥ १४२ ॥

पर्यग्निकरोत्यन्तरित; रक्षोन्तरिता अरातय इति सहाज्यम् ॥ १४३ ॥

पुरोडाशाज्यसंयोगात्पर्यग्निकरणस्योपदेशिकत्वाच्च प्रकृतौ धर्माणां सान्नाय्ये ऽप्रवृत्तिः । एवं च तद्विकारे पशौ पर्यग्निकरणाविधानमुपपन्नं भवति । प्राक् पर्यग्निकरणात्पिष्टलेपापनयनपाण्यङ्गुलिप्रक्षालने ऽर्थात्कर्त्तव्ये । न हि तयोरुत्पतिश्चोदिता । २प्रातिपात्ति-

---

१ तं पृथुं कृतं पुरोडाशं सोदकेन हस्तेन सर्वतः स्पृशति । पृथने क्रियमाणे यत्र यत्र विदीर्णं भवति तदद्भिः सन्दधाति, सकृन्मन्त्रेण द्विस्तूष्णीम् । “ पिष्टलेपेनाविक्षारयन्त्रिः परिमार्ष्टि ” इति मानवे । “ अद्भिः श्लक्ष्णीकरोत्यनतिक्षारयन् ” इत्यापस्तम्बः ।

२ अन्यथाग्निसंयोगात् कालविलम्बाच्च शोषणे सति प्रतिपत्तिकाले क्षालनमतिदुष्करं स्यात् ।

मात्रविधानं त्वस्ति १ । सामर्थ्यादपि च क्रमोवसातुं शक्यते ॥ १४३ ॥

२देवस्त्वेति श्रपणम् ॥ १४४ ॥

ददातीति वाक्यशेषः । समर्थ्याच्चरोरधस्तात् ३ ॥ १४४ ॥

माभेरित्यालभते ॥ १४५ ॥

तच्चैतच्छृताशृतसंवित्त्यर्थं । तमभिमृशति शृतं वेदानीति श्रूयते । प्रयोजनं धानानामभावोभिमर्शनस्य दर्शनस्य दर्शनात्पाकसंवित्तेः । मन्त्रो दर्शन एवास्त्विति चेत् । नालम्भेपि सामर्थ्यपरिप्रापितत्वात् । अतस्तदकार्यापत्तिः । चरौ च स्यादकार्यलोपादालम्भः ॥ १४५ ॥

अतमेरुरिति शृतावभिवासयति भस्मना वेदेनोपवेषेण वा ॥ १४६ ॥

अशृतयोः श्रपणप्रदानार्थं शृतग्रहणम् । इतरथा ह्यवाच्यं स्यादिति । भस्मनाभिवासयति आच्छादयति । वेदेनोपवेषेण वा करणभूतेन । विरोधाच्चरावप्रवृत्तिर्वासस्य । अनेकयजमानके मन्त्रस्य विपरिणामः ॥ १४६ ॥

पात्र्यङ्गुलिप्रक्षालनमाप्तेभ्यो निनयत्यभितप्य प्रत्यगसः स्यन्दमानं त्रितायत्वेति प्रतिमन्त्रम् ॥ १४७ ॥

---

१ "पात्र्यङ्गुलिप्रक्षालनमाप्तेभ्यो निनयति, पिष्टलेपाञ्जुहोति" इत्यादिना ।

२ "देवस्त्वेत्युल्मुकेनाभितापयति दर्भैस्त्वचं ग्राहयति" इति मनुः ।

३ उपलक्षणमिदं धानानामपि ।

आप्तग्रहणं यागदेवताज्ञापनार्थम् । इतरथा हि देवतोद्देशाभावे प्रतिपत्तिमात्रमेव स्यात् । अथ पुनराप्तग्रहणे तदुद्देशेन परित्यागः कार्यः । तथा च नाशदोषादौ द्रव्यमात्रमुत्पादयितव्यमिति याज्ञिकाः । अपरे तु द्रव्यप्रधानत्वात्तस्य च नाशे दैवरक्ताः किंशुका इति नोत्पत्तिमिच्छन्ति । अभितप्येति प्रात्रीस्थमेवोल्कया तापयित्वा । प्रत्यगिति प्रत्यग्वचनात्प्रागुदग्वा असंस्पन्दमानमिति समुपसर्गनिर्देशादसङ्गच्छत् । न स्पन्दनमात्र प्रतिषेधः । त्रितायत्वेत्येभिर्मन्त्रैः प्रतिमन्त्रम् । निनयामीति वाक्यशेषः ॥ १४७ ॥

## अन्वाहार्यं दक्षिणाग्नावधिश्रयति ॥ १४८ ॥

अन्वाहार्यो दक्षिणार्थ ओदनः । ततो देवा एतां दर्शपूर्णमासयोर्दक्षिणामकल्पयन्यदन्वाहार्यमिति श्रूयते । दक्षिणाग्नावन्वाहार्यं पचतीति विधानात्तत्राधिश्रयणम् । स च भोक्तृतृप्तिव्यवच्छिन्नपरिमाणः स्यात् । परिमाणान्तरानभिधानात् । अन्नस्य च भुज्यर्थत्वात् । भुजेश्च तृप्तिप्रवृत्तिसंयोगात् । अनवधृतपरिमाणत्वान्नेति चेत् । स्यादौचित्यात् । उचिता हि पुरुषाणां प्रसृतित्रयेण तृप्तिरिति । स च लौकिक उदके पच्यते । सामर्थ्यगृहीतत्वात्तस्य । न चेह प्राणीतमुपादिश्यते । परिक्रयार्थत्वाच्चास्य पुरुषार्थरूपता । तस्मान्न प्राणीतोदकसाध्य इति सम्प्रदायः । अपरे व्यावर्णयन्ति । सामर्थ्यपरिगृहीतमपि यदेव सर्वार्थत्वेन प्रकल्पितं तदेव गृहीतुं न्याय्यम् । न च सर्वार्थत्वे कश्चिद्विशेष आश्रयितुं शक्यते पेदमर्थ्यं प्रति । प्राणीतं च सर्वार्थमित्युक्तम् । पुरुषार्थरूपत्वेपि सति क्रत्वभिनिर्वृत्त्यर्थपुरुषस्थितिद्वारेण कर्म सम्बन्धो स्त्येवेत्यदोषः । अथ निर्दिष्टकार्यतैव प्रणीतानां नार्थगृहीतार्थता । तद्यथा हविर्ग्रहणामपः कृत्वा इति, अपः उपस्पृश्येति च । तथासत्यप्राप्तिः स्यात्पाण्योरवनेजने प्राशित्रहरणप्रक्षालने च । अथ कर्मसम्बद्धपात्रसंस्कारः स इत्युच्येत तत्सम्बन्धाविशेषादध्वर्युपाण्योरपि संस्कारः शक्यो वक्तुम् । केवलं तु तत्र कृतप्रयोजनता पात्रस्य । पाण्योरवनेजनं तु करिष्यमाणप्रयोजनम् । न चैयता विशेषः शक्योऽवसातुम् । तस्मात्पाण्योरवनेजनपात्रप्रक्षालनयोः प्राणीतमेवोदकम् । सम्प्रदाये तु पात्रप्रक्षालन एव प्राणीतमुदकमिच्छन्ति न पाण्योरवनेजने । तत्पुनर्विचार्यमाणं ना-

तिसमञ्जसमिव । उभयत्र हि क्रियाक्षिप्तमुदकं न स्वशब्दाभिहितम् । तस्मादुभयत्र प्राणीतमुदकमिति । अन्वाहार्ये तु द्रव्याक्षिप्तमित्यक्रियाक्षेपाद्यदि विशेष उपलभ्यते ततोऽस्तु लौकिकमिति ॥ १४८ ॥

अत्र वा व्रतोपायनम् ॥ १४९ ॥

तुल्यश्रुतित्वात् । तुल्यसूत्रारम्भसामर्थ्यात् ॥ १४९ ॥

अपरेणाहवनीयं वेदिं खनति त्र्यङ्गुलखातां व्याममात्रीं पश्चात् त्र्यरत्निं प्राचीमपरिमितां वा प्राक्प्रवणामुदग्वा मध्यसङ्गृहीतामग्निमभितो; सौ ॥ १५० ॥

आहवनीयमपरेणेति । कुतः । वाक्यशेषात् । सोयं विष्णग्लनिः छन्दोभिरभितः परिगृहीतोग्निः पुरस्तान्नापक्रमणमासेति । वेदिरिति संस्कारनामधेयम् । तेषु हि सत्सु शब्दप्रयोगादाहवनीयवत् । प्रयोजनं सोमे धर्मप्रवृत्तिरिति । खनतिः करोत्यर्थः । अवश्यमेवात्राख्यातपदप्रयोगेण भवितव्यम् । तत्र किं सामान्यरूपः करोति प्रयुज्यतामुत विशेषरूपः खनत्यादिरिति । तत्र विशेषरूपे खनत्यादौ प्रयुज्यमाने सामान्यरूपाख्यातपदप्रयोगमन्तरेणापि कार्यसिद्धेः तत्प्रयोग एव ज्यायानिति खनतीति सूत्रितम् । मानपरिसमूहनादीनामन्यतमस्योच्चारणमस्त्विति चेत् । ते ऽपि हि वेद्यर्थाः खनत्यादिवत् । न, अप्रकाशरूपत्वात् । प्रकाशरूपो हि खनतिर्वेदिस्वरूपं प्रकाशयति न तथेतरे मानादयः । तस्मात्खनतिशब्दः प्रयुक्तः । तथा वक्ष्यत्यत्र वेदिकरणं यथोक्तमिति खनतिशब्दार्थे करोतिनानुवदति । खननाधिकारादाह त्र्यङ्गुलखातां त्र्यङ्गुलपरिमाणं खातमस्या इति । व्याममात्रीं पश्चात् परिमाणतः । व्याममात्रीं पश्चात्स्यादित्याहुरिति वचनात् । त्र्यरत्निं प्राचीम् । अरत्नित्रयपरिमाणा प्राची भवति । अपरिमितां वेत्ययमपरिमितशब्दो यद्यपि पूर्वप्रमाणापेक्षया बहुतरे रूढितो वर्त्तते । तथापि नञ् समास एवात्र गृहीतव्यः । किं कार-

णम् । एवं हि श्रूयते । नात्र मात्रास्ति यावतीमेव स्वयं मनसा मन्येत तावतीं कुर्यादिति । तेन न परिमिता अपरिमितेति । यथा चाग्नौ अपरिमितेष्टक इति । तत्राप्यपरिमाणमेव शाब्दम् । ते अपरिमिता एव परिश्रित उपदधुरपरिमिता यजुष्मतीरपरिमिता लोकं पृणोति । कुत एतदितिचेल्लिङ्गात् । न वैमे सर्वाणि रूपाणि उपधत्ताति वै वरे च यथनवाभ्यापथेति । अनाप्तिरपरिमाणपक्ष उपपद्यते । इतरथा ह्यतिरेक एव स्यात् । पुनश्चामृतत्वप्राप्तये इष्टका परिमाण आह । षष्टिं च त्रीणि च शतानि परिश्रित उपधत्तेत्येवमादि । तच्चैतदपरिमाणवचने अपरिमितशब्द उपपद्यते नान्यथा । तेनैतौ द्वावेव यज्ञशास्त्रेऽपरिमितशब्दावपरिमाणवाचिनौ । शेषा रूढिवशेन बहुवाचका इति । यथा द्वादशदीक्षा अपरिमिता वा । यथा च यूपे ऽपरिमितो वेत्येवमादि । तथा च परिशिष्टकार आह अपरिमितं प्रमाणादभूय इति । प्रत्यस्तमितावयवार्थवृत्तितया अपरिमितशब्दः श्रुत्यैव बहुनि वर्त्तते । अपरिमितपक्षेपि च मानं वर्त्तत एव । न ह्यपरिच्छिन्ने देशे खननादि शक्यं कर्तुमिति । प्राक्प्रवणामुदग्वेति । समो हि दर्शपूर्णमासयोर्देशो विहितः । समे दर्शपूर्णमासाभ्यां यजेतेति । तत्र वेदेः प्राक्प्रवणनियमो वाचनिकः । सा वै प्राक्प्रवणा स्यादिति प्रकृत्याह अथोदक्प्रवणेति । मध्ये संह्वारितेति वचनान्मध्ये सङ्गृहिताम् । अग्निमभितोऽसौ भवतः । तावपि च वेदिशब्दवाच्यावतः खन्येते तावपि । इतरथाहवनीयमपरेण वेदिं खनतीत्यपरत एव खननम् । तथा च सूत्रकारः । अपोह्य बर्हीऽषि निदधात्यंशदेशे इत्यंशयोः स्तरणं दर्शयति ॥ १५० ॥

आमूलोच्छेदनादोषधीनाम् ॥ १५१ ॥

वेति सामर्थ्याद्द्रष्टव्यम् । न हि त्र्यङ्गुलखातमूलोच्छेदनयोः समुच्चयः सम्भवति । त्र्यङ्गुलस्य ह्यनतिरिक्तमन्यूनं च खातं त्र्यङ्गुलखातमित्युच्यते । अस्मिंश्च पक्षे ॥ १५१ ॥

ओषधीनां मूलान्युच्छेत्तवैब्रूयात् ॥ १५२ ॥

इति प्रैषः । तच्चाग्नीदाहेति वक्ष्यामः । केचित्पूर्वसूत्रमाकारान्तमेव कुर्वन्ति । सुपांसुलुक्पूर्वसवर्णाच्छेयाडाज्यायाजाल इति अकारस्याकार आदेशः । छन्दो वद्भावेन सूत्राणाम् । तत्रोत्तरं, सूत्रं वा मूलोच्छेदनादौषधीनामिति स्वशब्दाभिहित एव विकल्पः । न हि तदानीं सान्धिकोयमावादेशवकारः । स चायं प्रैषस्तादर्थ्यात्खननकाल एव दातव्यः । केचिदाहुः मूलोच्छेदनान्तता सारस्वतादिविषया । न हि दर्शपूर्णमासयोर्वेद्यां मूलानि सन्ति कुतस्तदुच्छेदनमिति । अपरे तु मूलोच्छेदनस्य खननपरिमाणविषयत्वादिहापि मन्यन्ते । एवं ह्याह तस्मात् ऽयङ्गुला वेदिः स्यादिति । पुनश्च तदुनथा न कुर्यादौषधीनां वै समूलान्युपाम्लोचत्तस्मादोषधीनामेवमूलान्युच्छेत्तवै ब्रूयादिति । ओषधिमूलोचितखननपरिमाणं खेयमित्येतदुक्तं भवति । ततश्च सर्वत्र सम्भवात् सर्वविषयता । एवं च प्रकरणमनुगृहीतं भवति ॥ १५२ ॥

## आहार्यपुरीषां पशुकामस्य ॥ १५३ ॥

वेदिपुरीषमपनीयान्यत्पुरीषमाहर्त्तव्यम् । तच्चैतदनुमार्जनात्पूर्वं सामर्थ्यात्कर्त्तव्यम् । पुरुषार्थत्वाच्च विकृतावप्रवृत्तिः ॥ १५३ ॥

## वेदिं परिसमुह्य वितृतीयेग्नीदुत्तरत उत्करं करोति ॥ १५४ ॥

परिसमूहनोत्करकरणयोरग्नीधः कर्तृत्वं ल्यबादेशसामर्थ्यात् । वितृतीयं च सामर्थ्यात् वेदेर्ग्राह्यम् । तच्च पूर्ववितृतीयम् । परिशिष्टकारवचनात् । विपर्यस्योत्तरां स उत्कर इति । आचार्याभिप्रायाच्च । चात्वालोत्करावन्तरेण सञ्चर इति । सन्निहितो हि चात्वालस्योत्करः पूर्ववितृतीये भवति ॥ १५४ ॥

## देवस्यत्वेति स्फ्यमादाय सतृणं सव्ये कृत्वा दक्षिणेनालभ्य जपन्तीन्द्रस्य बाहुरिति ॥ १५५ ॥

आदानं सतृणस्य स्फ्यस्यैव तृणस्य सहत्वमात्रम् । सतृणमित्यु-

पदिष्टत्वात् । प्रयोजनमन्तराये तूष्णीमेव तृणादानम् । आददेध्वरकृतं देवेभ्य इति अङ्गप्रधानदेवताविषयो देवशब्दस्तदर्थं हि वज्रस्यादानम् । वेदिनिष्पत्त्यर्थत्वात् । वेदेश्चाङ्गप्रधानदेवतासम्बन्धो हविर्द्धारणार्थतया शक्यते तादर्थ्यं वदितुम् । ततश्च पितृयज्ञे देवपितृभ्य इति विपरिणामः । दक्षिणेनालभ्येत्यवाच्यं सामर्थ्यसिद्धत्वात् । न हि सव्ये कृतस्यान्यथा लम्भः सम्भवति । तेन सव्यपाणिस्थस्यैवालम्भो यथा स्यादिति । अक्रियमाणे हि दक्षिणेनालभ्येत्येतस्मिन् मुक्त्वाप्यालम्भः प्राप्नोति तन्माभूदिति दक्षिण ग्रहणम् । तच्चैतद्वज्रादानं जपश्च स्तबयजुर्हरणार्थत्वात्तदभावे न भवति । तादर्थ्यं च तत्सन्निधावाम्नानात् । तत्र चार्थस्य विद्यमानत्वात्सतृणमिति चोपदेशात् तृणस्य हि निःसन्दिग्धं स्तम्बयजुर्हरणार्थत्वम् । स्फ्यस्यापि तद्वत्तदर्थतैव ॥ १५५ ॥

## नोपस्पृशेत्पृथिव्यात्मानौ तेन स्तम्बयजुर्हरिष्यन् ॥ १५६ ॥

प्राक् स्तम्बयजुर्हरणाद्वज्रेण पृथिव्यात्मानौ नोपसंस्प्रष्टव्यौ । एवं हि श्रूयते । यज्ञं प्रकृत्य तेन सꣳशितेन नात्मानमुपस्पृशति न पृथिवीमिति । केचित्त्वेतदनुपस्पर्शनमाकर्म्मपरिसमाप्तेरिच्छन्ति । अविशेषाम्नानसामर्थ्यात् । स्तम्बयजुर्हरिष्यन्निति चोत्तरसूत्रेऽवयवं योजयन्ति । स्तम्बयजुर्हरिष्यन्वेद्यां तृणं निदधातीत्येवम् । तत्पुनर्नोपपद्यते । न ह्युत्तरसूत्रेण सम्बध्यमानः स्तम्बयजुर्हरिष्यन्नित्यवयवोर्थवान्भवति । स्तम्बयजुर्हरणं हि प्रहरणादिपुरीषनिवपनान्तम् । तत्र पाठादेव वेद्यां तृणं निदधातीयतापि सूत्रेणार्थः सिद्ध्यति नार्थोनेनावयवेन । पूर्वसूत्रे चार्थवत्ता ऽस्यावयवस्य । नोपस्पृशेत्पृथिव्यात्मानौ तेन कियन्तं कालमित्यपेक्षिते स्तम्बयजुर्हरिष्यन्निति कालसमर्प्पणेनार्थवत्तावयवस्य । अपि च वज्रादानस्य स्तम्बयजुर्हरणार्थतेत्युक्तम् । जपस्यापि तत्संस्कारद्वारेण तादर्थ्यमेव । तत्र वाक्यशेषः । सꣳश्यत्येवैनमेतद्यजुर्जपतीति । सꣳश्यति शातनूकरणंतीक्ष्णी करोतीत्येतदुक्तं भवति । पुनश्चाह तेन सꣳशितेन नात्मानमुपस्पृशति न पृथिवीमिति । तीक्ष्णीकरणस्य स्तम्बयजुर्हरणार्थत्वादनुपस्पर्शनमपि तावदेवेति गम्यते । तस्माद्यथोपवर्णितमेवा-

स्माभिः सूत्रम् । नोपस्पृशेत्पृथिव्यात्मानौ तेन स्तम्बयजुर्हरिष्यन्निति ॥ १५६ ॥

वेद्यां तृणं निदधात्युदक्पृथिव्यै वर्मासीति ॥ १५७ ॥

भाविन्या वृत्त्या वेदिः । न ह्यद्यापि संस्क्रियते भूप्रदेशः । तृणं प्रकृतत्वाद्यदात्तं तन्निधेयम् । उदगिति च प्राक्त्वनिवृत्त्यर्थम् । स्मृत्या हि प्रागग्रतोदगग्रता वाप्नोति । तन्निवृत्तौ च श्रौतीयमुदगग्रतेति गम्यते । ततश्च तदपचारे श्रौतमेव प्रायश्चित्तं भवति ॥ १५७ ॥

पृथिविदेवयजनीति तृणेऽन्तर्हिते प्रहरति ॥ १५८ ॥

तच्च वज्रेण तदर्थत्वात्तदादानस्य । देवयजनीति वास्य स्थाने पितृयज्ञे देवपितृयजनीति प्रयोगः । अङ्गप्रधानार्थत्वाद्वेदेरित्युक्तम् । पृथिविशब्देन च वेदिरत्राभिधीयते । तत् संस्काराभिप्रवृत्तेः । प्रहरणं च वेद्यां न तृणे अन्तर्हित इति सूत्रितत्वात् । इतरथा हि तृणे प्रहरतीत्येवमवक्ष्यत् । अथ पुनरन्तर्द्धानवचनात्तादर्थ्यमेव तृणस्य न प्रहरणाधिकरणता । तृण एव प्रहरणमिति सम्प्रदायः ॥ १५८ ॥

व्रजं गच्छेति पुरीषमादत्ते ॥ १५९ ॥

वज्रेणोद्धृतं यत्पुरीषं तद्व्रजं गच्छेत्यनेन मन्त्रेणादत्ते ॥१५९॥

वर्षतु त इति वेदिं प्रेक्षते ॥ १६० ॥

आत्तं पुरीषमिति वाक्यशेषः ॥ १६० ॥

बधानेत्युत्करे करोति ॥ १६१ ॥

प्रहृत्य निदधाति बधान देवसवितरिति श्रूयते ॥ १६१ ॥

प्रहरणशेषो वा विशेषोपदेशात् ॥ १६२ ॥

प्रह्रियते ऽनेनेति प्रहरणं मन्त्रः प्रहरणशब्देनाभिधीयते । तस्य शेष एकदेशः प्रहरणशेषः । कुत एतदविशेषोपदेशात् । प्रहरणं हि प्रकृत्य अविशेषेणोपदिश्यते । स प्रहरति पृथिविदेवयज-

न्योषध्यास्ते मूलं मा हिꣳसिषमित्येवमादि तमतो मा मौगिति यावत् । यद्येवं खण्डशोध्यवसानं च कथम् । मन्त्रलिङ्गादिति केचित् । एवं चेत्प्रहरणशेषतैव प्राप्नोति । न हि विधायका मन्त्रा इति । लिङ्गमपि च कयाचिद् वृत्या प्रहरणशेषभावमुपयास्यति । श्रुतितः खण्डशो विधानमित्यपरे । तथा च सति श्रुतिद्वयसामर्थ्याद्विकल्पो भवति । एवं च सति प्रहरणशेषो वाविशेषोपदेशात् । प्रतिकर्म वा खण्डशः प्रयोक्तव्यो विशेषोपदेशादिति । एवमपि सत्यन्येऽन्यथा वर्णयन्ति । माध्यंदिनपाठे ऽविशेषोपदेशात् । शाखान्तरे तु विशेषेणोपदिश्यते । तेनाविशेषस्य विशेषे प्रवृत्तिरविरुद्धा । न तु विशेषस्याविशेष इति । तेन विशेषोपदेशादवयवश एव प्रयोग इत्यवधारणा प्राप्नोति । सम्प्रदाये तु विकल्पमेवेच्छन्ति । प्रहरणशेषपक्षश्चेत्तुष्णीं पुरीषादानवेदिप्रेक्षणपुरीषाहरणानि ॥ १६२ ॥

## अपाररुमिति द्वितीयं प्रहरणादि ॥ १६३ ॥

अपाररुमित्यनेन मन्त्रेण प्रहरणादि द्वितीयं कर्मोत्करकरणान्तं प्रतिपत्तव्यम् । अररुर्ह वै नामासुररक्षसमासेति रक्षाभिधायकत्वाद्राक्षसो मन्त्रः । ततश्चोदकोस्पर्शनमत्र भवति । देवपितृयजनाद्बृध्यासमिति च प्रयोगः पितृयज्ञे । देवजनं हि वेदिरत्राभिप्रेता । असौ च पितृयज्ञे देवपितृयजनं भवति ॥ १६३ ॥

## अभिन्न्यस्यत्यग्नीदुत्तरमररो दिवमिति ॥ १६४ ॥

अभिन्यासश्च हस्तद्वयेन भवति नैकेन पाणिना । कुत एतल्लिङ्गात् । अभिनिहित एव सव्येन पाणिना भवत्यथ दक्षिणेन जुहुं प्रतिगृह्णातीति । प्रस्तरं स्तृत्वा तमभिनिदधातीति हि प्रकृत्यैवमामनन्ति अभिनिहित एव सव्येन पाणिनेति । पूर्वाभिनिहिते ह्येवकारकरणं समर्थं भवति । इहापि चाभिनिधानमेव चोदितम् । तमग्नीदभिनिदधातीति ॥ १६४ ॥

## द्रप्सस्त इति तृतीयम् ॥ १६५ ॥

प्रहरणादीति वर्त्तते ॥ १६५ ॥

२०

तूष्णीं चतुर्थं सतृणम् ॥ १६६ ॥

सह तृणेन पुरीषमुत्करे करोति ॥ १६६ ॥

पूर्वं परिग्रहं परिगृह्णाति दक्षिणतः पश्चादुत्तरतश्च स्फ्येन गायत्रेणेति प्रति मन्त्रम् ॥ १६७ ॥

पूर्वशब्दः सम्बन्धिशब्दः पूर्वं नद्याः कूलमिति यथा । परिग्रहणं परिग्रहः । यद्येवं परिगृह्णातीति नोपपद्यते । तस्मात्परिग्रहं करोतीत्येतदुक्तं भवति । दक्षिणतः पश्चादुत्तरतश्च स्फ्येन करणभूतेन गायत्रेणेत्येवमादिभिर्मन्त्रैः प्रतिमन्त्रम् ॥ १६७ ॥

वेद्यां त्रिरुल्लिख्याह हर त्रिरिति ॥ १६८ ॥

अयं च मन्त्रः किमियत्तापेक्षया उत त्रित्वविवक्षया । किञ्चातः यदीयत्तापेक्षया वरुणप्रघासेषु हर षट्कृत्व इति प्रयोगो वेदिद्वित्वात्प्रति वेदि हि तिस्रस्तिस्रो लेखाः । अथ त्रित्वविवक्षया ततस्त्रिशब्दोऽभ्यसितव्यः । न ह्यनभ्यस्ते प्रति वेदि त्रित्वविशिष्टं हरणमभिहितं भवति । तत्र केचिदाहुरियत्ता विवक्षा । प्रकृतौ हि लेखात्रित्वात्त्रिसंख्या विशिष्टं हरणमभिहितम् । विकृतावपि षट् लेखा इति षट्संख्याविशिष्टं हरणमभिधेयमिति । अन्येत्वाहुस्त्रिशब्दस्य श्रुत्यैव त्रिस्वरूपविषयता । लक्षणयेयत्ता परता स्यात् । श्रुतिलक्षणा विषयैव श्रुतिर्ज्यायसीति साभ्यासस्त्रिशब्दः प्रयोक्तव्यः ॥ १६८ ॥

[1]हृत्वाग्नीलेखाः संमृशति ॥ १६९ ॥

हरणसंमर्शने अग्नीत्कर्तृके । क्त्वाशब्दसामर्थ्यात् ॥ १६९ ॥

पितृयज्ञाग्निचित्ययोर्वा तत्र दर्शनात् ॥ १७० ॥

ते चैते पितृयज्ञाग्निचित्ययोः प्रतिपत्तव्ये । कुत एतत् । तत्र

---

१ एवं प्रेषितोऽग्नीत्ताभ्यो लेखाभ्यः पांसून् त्रिर्हृत्वा उत्करे प्रक्षिप्य लेखाः सम्मर्शनेन समीकरोतीत्यर्थः ।

दर्शनात् । तत्र ह्येते दृश्यन्ते । पितृयज्ञं तावत् । लिखति हरति यद्वार्यं भवति । अग्निचित्यपि च लिखित्वाह हरतारिति त्रिराग्नीध्र इति । दर्शनमत्र विधानमभिप्रेतं भवति । कुत एतत् । तत्र दर्शनादेव । तत्र हि दर्शनं न विधानमन्यपरत्वाद्वचनस्य । किं परतेति चेत् । पितृयज्ञे तावल्लिखति हरतीति प्रकृत्य स यज्ञोपवीती भूत्वाऽऽज्यानि गृह्णातीति। पित्र्यत्वादत्र स्मृत्युदितं प्राचीनावीतमुचितमतो यज्ञोपवीतविधानपरं वचनम् । अग्निचित्येपि च प्रायणीयहविष्कृदन्ते सौमिक्या वेदेः स्फ्यादिसम्मर्शनान्तस्यावसरविधानार्थं वचनम् । वेदिशब्दस्य संस्कारनिमित्तत्वात् । तद्धर्म्मपरिप्राप्तौ सत्यामवसरो विधीयते। एवं हि तत्र वचनं प्रायणीयं प्रकृत्य, तस्य हविष्कृता वाचं विसृजते, वाचं विसृज्य स्तम्बयजुर्हरति, स्तम्बयजुर्हृत्वा पूर्वेण परिग्रहेण परिगृह्य लिखित्वाह हर त्रिरिति, हरति त्रिराग्नीध्र इति । अतो विकृत्यनुप्रवृत्तिदर्शनात्प्रकृतावुपदेशोनुमीयते । किं च स्तम्बयजुर्हरणादिभिः सहोच्चारणात् । तस्मादिह भवति लेखा हरणादि ॥ १७० ॥

१अत्र वेदिकरणं यथोक्तम् ॥ १७१ ॥

खननमिहावसरे प्रतिपत्तव्यम् । आमूलोच्छेदनात् ऽयङ्गुलम् वा ॥ १७१ ॥

उत्तरं परिग्रहं २परिगृह्णाति सुक्ष्मास्योनोर्जस्वतीति प्रतिमन्त्रं पूर्ववत् ॥ १७२ ॥

प्रतिमन्त्रमितीयतापि सिद्धे यत्प्रतीकोच्चारणं करोति, तद्वाक्यावसानप्रज्ञप्तये । इतरथा हि सुक्ष्माचासि शिवाचेत्यत्रापि पर्यव-

---

१ याज्ञिकदेवमते ‘ वेदिकरणं यथोक्तम ’ इत्येव सूत्ररूपम, ‘ अत्र ’ पदं त्वनुवर्तत इति, अत्र मूलं मृग्यम ।

२ अत्रापि ‘ ब्रह्मन् ? उत्तरं परिग्रहं परिग्रहीष्यामि ’ इति ब्रह्माणमामन्त्र्य ‘ओ३म् परिग्रहाण ’ इति तेनाऽनुज्ञातः परिगृह्णाति ।

सानं स्यादतः प्रतीकोच्चारणम् । पूर्ववदिति स्फ्येन दक्षिणतः पश्चादुत्तरतश्चेत्येवमर्थम् ॥ १७२ ॥

पुरा क्रूरस्येत्यनुमार्ष्टि१ ॥ १७३ ॥

अनुमार्जनं समीकरणमभिप्रेतम् । पुरीषाहरणपक्षे चास्मिन्नवसरे वेदिपुरीषमपनीयान्यदानीयानुमार्जनं कर्त्तव्यम् । सामर्थ्यात् । यच्चोक्तं प्राक्प्रवणामुदग्वेति तदप्यस्मिन्नेवावसरे कार्यम् । करणान्तरानुपदेशाच्च वज्रेणैवानुमार्जनम् । प्रकृतत्वात् ॥ १७३ ॥

अध्यधिवेदिं प्रोक्षणीर्द्धारयति ॥ १७४ ॥

अध्यधिशब्दः सामीप्ये उपरिभावे च । वेदिमिति द्वितीयोपपदविभक्तिः । प्रोक्षणी शब्दो यौगिकोपि प्रोक्षणी विशेषविषयः । विशिष्टशब्दोपादानसामर्थ्यात् ॥ १७४ ॥

अन्योथ स्फ्यमुद्यम्याह प्रोक्षणीरासादयेध्मं बर्हिरुपसादय स्रुचः सम्मृड्ढि पत्नीꣳ सन्नह्याज्येनोदेहीति यदीच्छेत् ॥ १७५ ॥

अन्यशब्देनाग्नीदभिधीयत इत्युक्तम् । अथ शब्दप्रयोगोनर्थकः पाठानुपूर्व्यादपि तत्प्राप्तेः । उच्यते । प्रोक्षणी धारणस्य वज्रोद्यमनस्य चैककालता यथा स्यादिति । आनन्तर्यार्थत्वादथ शब्दस्य नैककालार्थतेति चेत् । स्यात्पाठादपि तत्प्राप्तेः । व्यर्थोथ शब्दप्रयोगो मा भूदिति एककालार्थता कल्प्यते । एवं ह्याह स वा उपर्युपर्येव प्रोक्षणीषुधार्यमाणास्वथ स्फ्यमुद्यच्छतीति । ननु च सप्तम्याप्ययमर्थो लभ्यते । अध्यधिवेदि प्रोक्षणीर्द्धारयत्यध्वर्यावन्यः स्फ्यमुद्यम्याहेति सिद्ध्यत्येवैककालता । एवं चेदन्यार्थोयमथ शब्दः । कोऽन्योसति ह्यथ शब्दे धार्यमाणासु प्रोक्षणीषु सर्वे प्रैषाः प्राप्नुव-

---

१ ' तां प्रतिमार्ष्टि ' इति श्रुतेः । प्रतिशब्दः पूर्वक्रियाविनिमयद्योतकः, पूर्वं खननेन विषमां कृतां इदानीं समीकरोति इति श्रुतेरर्थः ।

न्ति । नान्यथा । इध्मबर्हिः शब्दौ वरुणप्रघासेषु न विपरिणस्येते । यत इन्धनादिध्मः । एवं चैकस्मिन्नपि काष्ठे प्रयोग उपलभ्यते । इध्मस्य वा शकलमपच्छिद्येति । बर्हिः शब्दे तु जात्यपेक्षयैकवचनम । दृश्यते चैकस्मिन्नपि तृणे बर्हिः शब्दप्रयोगः । बर्हिर्वास्मा एतत् स्तृणात्यस्कन्नः हविरसदिति । इह समुदाय एकवचनान्तो जात्यपेक्षः । ततश्चाविपरिणामः तृणसमुदायान्तरेऽपि सैव जातिरिति । स्रुक् शब्दे बहुवचनस्य समवायाद् गृहमेधीयोपसदादौ यथार्थं विपरिणामः । पत्नीशब्दस्य त्वनेकपत्नीकेष्यनूह एवैकवचनान्तस्य समाम्नानात् । आज्येनोदेहीति आज्येन गृहीतेनोद्गच्छेत्यतदुक्तं भवति । प्रैषार्थकतृणगतमपि वचनं समवायाद्यथार्थं विपरिणस्यते । यथा वरुणप्रघासेषु प्रोक्षणीरासादयतामित्येवमादि । यदीच्छेत्ततः प्रैषो भवति । स यदि कामयेत ब्रूयादेतद्युकामयेतापि नाद्रियेतेति ॥१७५॥

प्रैषप्रैषार्थयोरध्वर्युकर्तृकत्वं विरोधान्न स्यादन्यः प्रैषेऽन्यश्च प्रैषार्थ इति प्राप्त इदमाह—

## यथाप्रेषितमन्यः पराधिकारात् ॥ १७६ ॥

यथाप्रेषितमन्यः करोति । प्रैषवचनसामर्थ्यादेवान्यस्मिन्प्राप्तेऽन्यशब्दोऽग्नीद्विषयः । यथान्यत्राहन्त्यन्य इति । अन्यः करोत्यग्नीत्करोतीति यावत् । कुत एतत् । पराधिकारात् । सामर्थ्यादेव च परप्राप्तौ परशब्दो जघन्यविषयः । परं हि जघन्यं निकृष्टमधिकृत्य प्रैषः प्रवर्त्तत इति । अपि च निकृष्टेनोत्कृष्टस्य प्रैषणं विरुध्यते । न ह्येवमाचरन्ति यदि वाध्वर्युः प्रेषयिताग्नीच्च प्रैषार्थं करोति ततोऽध्वर्युणा किञ्चित्कृतं किञ्चित्कारितं भवति । तथा च सति समाख्यानुगृह्येत । प्रैषार्थस्यः पुनरध्वर्युकर्तृकत्वे कृतमेव न कारितं स्यात् । तत्र नातीव समाख्यानुग्रहः स्यात् । तस्मादध्वर्युः प्रैषेऽग्नीच्च प्रैषार्थ इति ॥ १७६ ॥

एवं प्राप्त उच्यते—

## स्वयं वा अविरोधात् ॥ १७७ ॥

स्वयं वा अध्वर्युः प्रैषार्थं करोति सामर्थ्यादग्नीत्प्रेषयति । कुत एतत् । प्रैषार्थस्य प्राधान्यात् । कुत एतादिति चेत् । प्रैषस्य तदर्थं

त्वात्। अन्तरङ्गं प्रैषार्थो बहिरङ्गं प्रैषः। प्रैषार्थेन व्यवहितत्वात्। ततश्च यदन्तरङ्गं प्रधानं च तदध्वर्युः करोति। बहिरङ्गं गुणभूतं चाग्नीदिति न्याय्यम्। ननु च विरुध्यत एतदुक्तम्। न हि निकृष्ट उत्कृष्टं प्रेषयितुमलमित्यत आह। अविरोधात्। स्यादयं विरोधो यद्ययं प्रैषः स्यात्। अध्येषणात्वेषा। अग्नीदध्वर्युमधीच्छति। यथैतच्चैतच्च कुर्यादिति। प्रेषणाध्येषणयोः को विशेष इति चेत्। निकृष्टविषयं प्रेषणम्। उत्कृष्टविषयमध्येषणमिति। यथा लोके माणवकः प्रेष्यते काष्ठान्याहरेति। स्वामिनं च प्रत्यध्येषणा स्नायतां भुज्यतामिति। वेदेऽपि च एभिरग्ने सरथं याह्यर्वाङ्नानारथं वा विभवो ह्यश्वा इति। अग्नीधाग्निरधीष्यते ततश्च न विरोधः ॥ १७७ ॥

## प्रैषावचनाच्च ॥ १७८ ॥

न च सम्प्रैष वचनमस्ति। यथान्यत्राग्नीदग्नीन्विहरेति। अथवा सम्प्रैषावचनादिति। नैतत्सम्प्रैषवचनं किं तर्ह्यध्येषणमेतदिति। अथ यदुक्तमध्वर्योः प्रैषे सति किञ्चित् कृतं अध्वर्योः किञ्चित्कारितं तथा सति समाख्यानुग्रह इति। उच्यते। एवं हि प्रैषदानक्रियामेव प्रति साक्षादध्वर्योः कर्तृत्वं न प्रैषार्थे। साक्षात्कर्त्रन्तरस्य विद्यमानत्वात्। ननु चोक्तं स्वतन्त्रः कर्तेति प्रक्रम्य तत्प्रयोजको हेतुश्च कर्ता चेति प्रयोजकस्यापि कर्तृत्वम्। नैतदेवम्। अन्यकर्तृत्वात्प्रैषार्थस्येत्युक्तम्। कथं तर्हि प्रयोजकस्य कर्तृत्वम्। प्रैषे व्यापारात् क्रियायां चान्यस्य दृष्टत्वात्। तेन कर्तृत्वनिबन्धनकार्यार्थं कर्तृत्वमतिदिश्यते। आह च—

प्रेषणे यदि कर्तृत्वं तदर्थेनोपपद्यते।
तत्र चान्यस्य दृष्टत्वात् कर्तृत्वमुपचर्यते ॥

कर्तृनिर्देशकार्यं च कर्तृकरणयोस्तृतीयेत्येवमादि। यथा अपिति सार्वधातुके ङित्वातिदेशो ङिन्निबन्धनकार्यार्थः। न च तस्य साक्षात् ङित्वं ङकारस्येतोऽभावात्। एवमिहाप्यकर्तरि कर्तृत्वातिदेशः। तेन समाख्यानुग्रहो नातीवोपपद्यत इति।

प्रयोजकस्य कर्तृत्वं स्याच्चेत्किमतिदिश्यते।
अथातिदेशः कार्यार्थस्तदेव स्यात्प्रयोजनम् ॥

एवं च सति नातीवसमाख्यानुग्रह उपपद्यते । तस्मादध्वर्युः प्रैषार्थमग्नीच्च प्रैष इति । तथा च लिङ्गम् । प्रैषवचनं हि प्रकृत्याम्नायते । स यदि कामयेत ब्रूयादेतद्यद्युकामयेतापि नाद्रियेत स्वयमुह्येवैतत् वेदेदमतः कर्मेति अध्वर्युं प्रैषार्थस्य कर्त्तारं दर्शयति । सूत्रकारानुप्रवृत्तेश्चायमेवार्थोऽवसीयते । हर त्रिरिति प्रैषवचने हि सति हुत्वाग्नील्लेखाः संमृशतीत्याह । तच्चैवमुपपद्यते । यथास्माभिर्न्यायोऽभिहितः । यदा चाध्वर्युः प्रैषदानेऽधिक्रियते । तत्राग्नीधः प्रैषार्थः स्यात् । तथा च सति हुत्वाग्नील्लेखाः संमृशतीत्यवाच्यं स्यात् । आह च—

प्रेषणे यदि कर्तृत्वं तदर्थे नोपपद्यते ।
तत्र चान्यस्य दृष्टत्वात्कर्तृत्वमुपचर्यते ॥
प्रयोजकस्य कर्तृत्वं तदुक्ति प्रत्यसंशयम् ।
उक्तेरपि च कर्मत्वं उच्यमानतयैव हि ॥
तस्या अपि च कर्तृत्वमुच्यमानप्रबोधनात् ।
उच्यमानस्य कर्मत्वं कर्तृत्वं चार्थसाधनात् ॥
एवं ह्यनेककर्तृत्वं कर्मत्वव्यवधानतः ।
प्रयोजकस्य कर्तृत्वमुच्यमानं न शोभते ॥
प्रयोजकोक्तिस्तस्यैव व्यापारः स्फुट एव हि ।
न तेन व्यवधानं तु पाक एवोदकादिवत् ॥
पच्यर्थः सम्भवत्येव हेतुवाक्यं विनापि हि ।
तेन पूर्वापरीभावो हेतुवाक्यस्य नेष्यते ॥
अङित्त्वेऽपि हि ङित्त्वस्य यथादेशः कृतोऽपिति ।
प्रयोजकस्य कर्तृत्वमेवमेवातिदिश्यते ॥
ङिन्निबन्धनकार्यार्थे ङित्त्वं ह्यङिति भाष्यते ।
कर्तृकार्यातिदेशार्थमकर्त्तर्येवमुच्यते ॥
गुणवृद्धिनिषेधार्थं ङित्त्वं ह्यङिति कथ्यते ।
अकर्त्तर्यपि कर्तृत्वं तृतीयाद्यर्थमुच्यते ॥
अपचारिककर्तृत्वं न सर्वत्राभ्युपेयते ।
गोरालम्भविधाने हि वाहीको नैव गृह्यते ॥
कर्तृशब्दस्य वाच्यश्चेत्प्रयोज्यो हेतुरेव च ।
एवमप्येकशब्दस्य प्राप्तानेकार्थवाचिता ॥
सत्याङ्गतौ च सा नेष्टा गत्यभावेऽक्षशब्दवत् ।

साहश्यादिवियुक्तेर्थे युज्यते नैकवाचिता ॥
लोकेपि कारयन्नेव कर्त्तेति व्यपदिश्यते ।
कुर्वाणमेव कर्त्तारमाहुर्नैव प्रयोजकम् ॥
कर्तृशब्दः प्रयोज्ये हि कर्तृत्वादेव वर्त्तते ।
प्रयोजके च सम्बन्धादकर्त्तर्युपचर्यते ॥
शब्दस्यार्थेन सम्बन्धो वाच्यवाचकयोर्द्वयोः ।
अपि शक्ती प्रकल्प्येते प्रत्ययो नान्यथा भवेत् ॥
तेन यत्रान्यसादृश्यं सम्बन्धो वा क्वचिद्भवेत् ।
तत एव प्रतीतत्वाच्छक्तिर्नैवानुमीयते ॥
एवं प्रयोजकेऽध्वर्यौ कर्तृत्वानुपपत्तितः ।
प्रैषार्थस्यान्यकर्तृत्वात्समाख्यानुग्रहः कथम् ॥
प्रैषप्रैषार्थयोर्येन कर्त्रैकत्वं विरुध्यते ।
अतः कर्त्रन्तरापत्तिः सामर्थ्यादुपजायते ॥
प्रैषार्थस्यान्तरङ्गत्वात्प्रधानत्वाच्च कर्तृता ।
अध्वर्योरिव पश्यामः कातीयवचनाद्वयम् ॥
प्रैषस्य बहिरङ्गत्वाद् गुणत्वेनैव युज्यते ।
अग्नीध एव कर्तृत्वं विपरीतमतोन्यथा ॥
लोकस्य भ्रान्तिनाशाय महान्तं यत्नमास्थितैः ।
कृतेयं न्यायमास्थाय हेतुकर्तृनिराक्रिया ॥ १७८ ॥

प्राक्स्तरणाद्वेदिं नावमृशेत् ॥ १७९ ॥

वेदिं प्रकृत्य ह्येवमामनन्ति । तेनानवमर्शं यजध्वं तथा श्रेया॒ंसो भविष्यथेति ॥ १७९ ॥

शृतानि च हवी॒ंष्याप्रचरणात् ॥ १८० ॥

नावमृशेदिति वर्त्तते प्रचरणं च प्रधानविषयम् । न स्विष्टकृदादि विषयम् । अतदर्थत्वाद्धविषः ॥ १८० ॥

अङ्गुष्ठाङ्गुलिभ्यां मा॒ंस॒ंहिताभ्यामवद्यन्त्येके[1] ॥ १८१ ॥

---

१ अवमर्शननिषेधात् तत्प्रतिप्रसवार्थोऽयम् ।

मांससंहिते मांससंलग्ने ताभ्यामेके ऽवद्यन्ति । एके काष्ठेन । एवं ह्याम्नानम् । काष्ठेनावद्यतीति । तथा स्रुवेणावद्यति स्वधितिनावद्यति हस्तेनावद्यतीति । तत्र सामर्थ्यात् स्रुवस्य द्रवद्रव्यविषयता स्वधितेश्च मांसविषयता हस्तकाष्ठयोस्तु पुरोडाशविषयत्वम् । तथा च सूत्रकारः । शृतावदानं पात्रीं चेति । आह च—

सामर्थ्यात्स्वधितिर्मांसे द्रवेषु स्यात् स्रुवस्तथा ।
हस्तकाष्ठे पुरोडाशमवदातुं प्रकल्प्यते ॥ १८१ ॥

आपन्नᳪस्तृणन्निरस्येत् ॥ १८२ ॥

यद्वेद्यां तृणकाष्ठाद्यापन्नं तत्स्तरणकाले निरसितव्यम् ॥१८२॥

१द्विषतो बध इति स्फ्यमुदञ्चं प्रहरति ॥१८३॥

तदेतददृष्टार्थम् । दृष्टस्यासम्भवात् । प्रधानोपकारकं च प्रयाजादिवत् । ततश्च यावदुक्ते निवर्त्तते ॥ १८३ ॥

२अवनिज्यपाणी अपरेण प्रणीताः स्फ्यं निदधाति ॥ १८४ ॥

पाण्योरवनेजनं दृष्टार्थम् । वेदिखननेन हि धूलीधवलावमलौ क्रियते । प्रयोजनम् तदभावे न भवति । ताववनिज्य प्रणीतानामपरतः स्फ्यं निदधाति ॥ १८४ ॥

इध्माबर्हिश्च ॥ १८५ ॥

समासोक्तयोः क्रमापरिज्ञाने सत्याह—

पूर्वमिध्मम् ॥ १८६ ॥

निदधातीति वर्त्तते ॥ १८६ ॥

---

१ अध्वर्युः प्रैषार्थमुद्यतं वज्रं प्रैषान्ते उदगग्रमुत्करे क्षिपतीत्यर्थः ।

२ हस्तावुत्करेऽद्भिः प्रक्षाल्य प्रणीतानां समीपे एवं स्फ्यमासादयत्यध्वर्युरित्यर्थः ।

प्रणीतादक्षिणेन वाहृत्य ॥ १८७ ॥

१इध्मं निदधाति ॥ १८७ ॥

२स्रुवं प्रतप्य पूर्ववद्वेदाग्रैरन्तरतः प्राक्संमार्ष्ट्यनिशित इति विपर्यस्य बहिर्मूलैः प्राङुत्क्रम्य ॥ १८८ ॥

स्रुवं प्रतप्य पूर्ववदिति प्रत्युष्टं निष्टप्तमिति वा । तुल्यश्रुतित्वात् । वेदाग्रैः करणभूतैरन्तरत इति । मुखतः प्रागिति बुध्नादारभ्याग्रात्संमार्ष्टि । अनिशित इत्यनेन मन्त्रेण । विपर्यस्य बहिर्मूलैर्विपर्यासात् प्रत्यगिति लभ्यते । बहिर्बाह्यतः । वेदाग्रमूलैः प्राङुत्क्रम्येति । प्राङ्गत्वा । प्राङिवैवोत्क्रम्येति वचनात् । उत्क्रमणं च सम्मार्गमात्रे । न प्रतपने । तस्मादु तथैव सम्मृज्याद्यथाग्निं नाभिव्युक्षेत्प्राङिवैवोत्क्रम्येति वचनात् ॥ बहिरपि मन्त्रः प्रवर्त्तते । देशभेदात्तथा च सूत्रकारः । देशभेदे मन्त्रप्रवृत्तिं ज्ञापयति । अग्निसम्मार्गे तूष्णीमुपरीति ॥ १८८ ॥

३प्रतप्य प्रतप्य प्रयच्छति ॥ १८९ ॥

---

१ प्रणीतानामाहवनीयस्यचान्तरालेन प्रदक्षिणमिध्माबर्हिराहृत्य निदधातीत्यर्थः ।

२ अग्नीत् स्रुवं प्रतप्य अप उपस्पृश्य ततोऽग्निदेशात् प्राङुत्क्रम्य प्राच्यां गत्वावेदाग्रैः अग्रे प्रतिपत्तिविधानाद्वेदात् पृथग्भूतैः अन्तरतो मुखप्रदेशे स्रुवं प्राक् सम्मार्ष्टि; वेदाग्रैर्मूलादारभ्याग्रपर्यन्तमुपरिप्रदेशे प्राञ्चं सम्मार्ष्टि मार्जनेन तत्संलग्नं रजः पातयतीत्यर्थ इति देवः ।

३ यस्य यस्य स्रुवादेः सम्मार्गो विहितो विधास्यते तस्य तस्य सम्मार्गानन्तरं तत्तत्प्रतप्य प्रतप्याध्वर्यवे प्रयच्छति । अत्रायं क्रमः पूर्वं स्रुवस्य प्रतपनम्, ततः प्राङ्गत्वा यथोक्तः सम्मार्गः, पुनः प्रत्यावृत्य प्रतपनम्, तत उदकोपस्पर्शनमथ समर्पणमिति । अप्रैषपक्षे अध्वर्योः प्रतपनपक्षेचार्थादग्नीधे समर्पणमिति विशेषः ।

वीप्सा स्रुगादिविषया । ततश्च स्रुगादीनामपि उत्तरं प्रतपनं प्रवर्त्तते । पूर्वं तु स्रुवस्यैव विधानात् ॥ १८९ ॥

अनिशितेति स्रुचः१ ॥ १९० ॥

सम्मार्ष्टीत्यनुवर्त्तते ॥ १९० ॥

तूष्णीं प्राशित्रहरण ; शृतावदानं पात्रींच ॥ १९१ ॥

ननु चावाच्यं तूष्णीमिति । सम्मार्गमन्त्रानुपदेशात् । स्यात्प्रतपनमन्त्रव्युदासार्थत्वात् । तत्प्राप्तिश्च क्रियानिर्देशात् । तच्छेषत्वाच्च मन्त्रस्य । पात्रीमात्रोपदेशसामर्थ्यात् । प्रयोजनवत्वाविशेषाच्च । उद्धरणपात्र्योरिडापात्र्योश्च सम्मार्गः । स च विनियोक्रमेण । क्रमान्तरे प्रमाणाभावात्२ ॥ १९१ ॥

३सम्मार्जनान्यपास्यति ॥ १९२ ॥

अपक्षिपत्युत्करे । प्रदेशान्तराविधानात् । लिङ्गाच्चोत्करो वा अतिरिक्तस्य प्रतिष्ठेति ॥ १९३ ॥

४आहवनीये प्रासनमेके ॥ १९३ ॥

---

१ जुहूपभृद्ध्रुवाः ।

२ परेतु यदुक्तमविशेषादुद्धरणपात्र्योरिडापात्र्योश्च तूष्णीं विनियोगक्रमेण प्रतपनादीनीति, तदयुक्तम्, 'पात्रीम' इत्येकवचनप्रयोगेण पात्रीगतद्वित्वस्याप्रामाणिकत्वात्, आसादनोपस्तारादौ एकस्या एवपर्याप्तत्वात्, शाखान्तरेषु तथैव श्रवणात् । इडापात्र्योस्तु न कुत्रापि सूत्रे सम्मार्गप्रतपने विहिते स्तः, अतस्तयोः सम्मार्गप्रतपने निर्मूले एव । अत एव पित्रभूत्याचार्येणैतयो सम्मार्गानर्हत्वमुक्तम् इति प्राहुः ।

३ सम्मार्गोत्तरं सम्मार्जनसाधनानि वेदाग्राणि उत्करे क्षिपतीत्यर्थः ।

४ 'आहवनीये वा' इति देवः । अत्रार्थे 'सम्मार्जनान्यद्भिः संस्पृश्याग्नौ प्रहरति यस्मिन् प्रतपत्युत्करे वा' इत्यापस्तम्बोक्तिः शरणम् ।

तद्धैके स्रुवं समार्जनान्यग्नावभ्यादधतीति वचनात् ॥ १९३ ॥

पत्नीं सन्नह्यति प्रत्यग्दक्षित उपविष्टां गार्हपत्यस्य मुञ्जयोक्त्रेण त्रिवृता परिह्वरत्यधीवासोदित्यै रास्नेति ॥ १९४ ॥

पत्नीशब्देन यज्ञस्य स्वामिन्यभिधीयते। कुत एतत्। स्मृतेः। स्मरन्ति हि वैयाकरणाः। पत्युर्नो यज्ञसंयोग इति। तत्रैव पत्नीरूपं भवति। नान्यत्र। यच्च रजकस्य पत्नी कृषकस्य पत्नीति। उपचारमात्रं तत्। चिन्तायाः प्रयोजनम्। सन्नहनक्रियाकर्त्रभिसम्बन्धान्नाध्वर्युपत्नी गृह्यते। सन्नहनं च सम्पूर्वस्य नहेः। सन्नहनं बन्धनमित्यर्थः। प्रत्यग्दक्षिणत इत्यवान्तरदेश उच्यते। स कस्य। गार्हपत्यस्य। कुत एतत्। श्रुतेः। सा वै न पश्चात्प्राची यज्ञमन्वासीतेति हि प्रकृत्य तस्मादु दक्षिणत इवैवान्वासीतेत्याह। उपविष्टामिति च भूतकालप्रत्ययनिर्देशान्नेदानीमुपवेशनम्। पूर्वमेवोपविष्टां सन्नह्यति। तस्या अपि च कर्म सन्निधिव्यवस्थानं नाव्यम्। यजमानवत् स्वामित्वाविशेषात्। क्वचिच्च दर्शयति। पत्नी च पूर्ववत्पत्नी च यथादेशमिति। मुञ्जयोक्त्रेण त्रिवृता मुञ्जमयेन त्रिगुणेन योक्त्रेण सन्नह्यति। तच्च परिह्वरत्यधीवासोदित्यै रास्नेत्यनेन मन्त्रेण। अधीवास इति बहिर्वासस इति। स वा अभिवासः सन्नह्यत्योषधये वैवासो वरुण्या रज्जुस्तदोषधीरेवैतदन्तर्दधाति॥१९४॥

दक्षिणं पाशमुत्तरे प्रतिमुच्योर्द्ध्वमुद्गूहति विष्णोर्वेष्प इति ॥ १९५ ॥

उत्तरस्य शङ्कुस्थानीयता। प्रतिमोकश्च उपानहौ प्रतिमुञ्चत इति न्यायेन प्रवपणमुच्यते। ऊर्द्ध्वमुद्गूहति विष्णोर्वेष्प इत्यनेन मन्त्रेण। तच्चैतत्पत्नी सन्नहनं तत्संस्कारात्प्रतिपत्तिः कर्त्तव्यम्। यच्चोच्यते सन्नहनं प्रकृत्याथ मेध्येनैवोत्तरार्द्धेनाज्यमवेक्षत इति ततश्चाज्यावेक्षणार्थतावगम्यते। तदप्यर्थवादप्रायम्। न हि सन्नहनस्याज्यावेक्षणार्थत्वे प्रमाणत्वमस्ति ॥ १९५ ॥

न ग्रन्थिं करोति ॥ १९६ ॥

स वै न ग्रन्थिं कुर्यादिति वचनात् ॥ १९६ ॥

ऊर्जेत्वेत्याज्यमुद्वास्य पत्नीमवेक्षयत्य-
दब्धेनेति[1] ॥ १९७ ॥

ऊर्जेत्वेत्यनेन मन्त्रेणाज्यमुद्वास्य पत्नीमवेक्षयत्यवेक्षणं कारयति । ततश्चाध्येषणा पत्न्याज्यमवेक्षस्वेति । न ह्यन्यथा अवेक्षयितुं शक्यते । अदब्धेनेत्यवेक्षते । यद्यपि चोक्तमवेक्षयत्यदब्धेनेति । तथापि त्वावपश्यामीत्युत्तमपुरुषयोगादवेक्षण एव मन्त्रो नाध्येषण इति । तच्चैतदनेकपत्नीके परार्थत्वादेकैव करोति । पत्न्यभावेपि च पितृयज्ञे[2] द्रव्यसंस्कारानपायादध्वर्युरवेक्षते ॥ १९७ ॥

[3]वेद्यां करोत्यपरं प्रोक्षणीभ्यः ॥ १९८ ॥

निगदव्याख्यातम् ॥ १९८ ॥

आहवनीये वा कृत्वा तच्छ्रापिणः ॥ १९९ ॥

आहवनीये वा कृत्वा तच्छ्रापिणः। आहवनीये वा[4] कृत्वा वेद्यां करोति । तच्च नैवमेवं विकल्प्यते । किं तर्हि व्यवस्थितविभाषेयम् । आहवनीयश्रापिण आहवनीये वा कृत्वा एवं ह्यामनन्ति । अथाज्यमादाय प्राङुदाद्रवति तदाहवनीयेधिश्रयति यस्याहवनीये हवीꣳषि श्रपयन्ति । सर्वो मे यज्ञ आहवनीये श्रृतोभूदिति ॥ १९९ ॥

---

१ आपस्तम्बः ' सा निमील्यावीक्ष्यानुच्छ्वसन्ती वीक्षत ' इति ।

२ एवं रजस्वलायां प्रसूतायां प्रोषितायां वाऽध्वर्युरेवावेक्षते ।

३ अग्नीत्तदाज्यं नीत्वा आसादितानां प्रोक्षणीनां पश्चाद्वेद्यां करोतीत्यर्थः ।

४ ' अधिश्रपणम् ' इति शेषः ।

सवितुस्त्वेत्याज्यमुत्पुनाति प्रोक्षणीश्च पूर्ववत् ॥ २०० ॥

च शब्दादाज्यं च पूर्ववदेव । न ह्यन्यथाज्योत्पवने पवित्रे प्राप्येते इति । कुत एतदिति चेत् । प्रोक्षणीषु पवित्रे भवतस्ते तत आदत्ते ताभ्यामाज्यमुत्पुनातीति । प्रोक्षणीनां पुनः संस्कारः कार्यार्थः । प्रयोजनमिध्माबर्हिषोः प्रोक्षणाभावे न भवति ॥ २०० ॥

आज्यमवेक्षते तेजोसीति यजमानो वा ॥२०१॥

प्रकृतत्वादध्वर्युः ॥ २०१ ॥

स्रुवेणाज्यग्रहणं चतुर्जुह्वां धामनामेति सकृन्मन्त्रः २०२ ॥

स्रुवेणाज्यग्रहणमिति । कुत एतत् । चतुर्जुह्वां गृह्णातीति श्रुतेः । चतुः संख्याविशिष्टं च ग्रहणं कथमन्यथोपपद्यते । यदि स्रुवेण न गृह्यते । तत्राप्याज्यस्य नियमः । यदाज्यग्रहणं तत् स्रुवेण । न स्रुवनियमो नाप्युभयनियमस्तथा हि सति दधनि पयसि च स्रुवस्याप्रवृत्तिः स्यात् । तत्र को दोषः । स्रुवेणावद्यतीत्येतदुपरुध्येत । अथ पुनराज्यनियमे सति स्रुवस्यावदानसाधनत्वेन सामर्थ्याद्द्रवद्रव्यादौ प्रवृत्तिरनिवारिता भवति । जुह्वां चतुर्गृहीतं धामनामेत्यनेन मन्त्रेण । सकृन्मन्त्रवचनम् । पारिभाषिकसूत्रात्त्रिः कृत्वो मन्त्रप्राप्तौ इह विकल्पेन सकृत्वमुच्यते । ननु च परिभाषायामपि न त्रिर्मन्त्रवचनमभिहितम् । तत्र हि न्यायतः प्रतिग्रहणं मन्त्रप्राप्ताविदमुक्तं वचनादाज्ये मुष्टौ चोत्तम इति । सत्यमेवमपि तु त्रिरेव मन्त्रोऽभिहितः स्यात् । वचनोपसन्यासादेव हि वचनं त्रिस्त्रिरेव यजुषा गृह्णीयादिति । तेनात्रित्वप्राप्तौ तदनुसकृत्सकृदेवेति इह सकृत्वमुच्यते । ननु वचनादाज्यइति यदेव सूत्रम् । मुष्टौ चोत्तम इत्युत्तमशब्दस्य मुष्टिना सम्बन्धः । आज्यस्याप्युत्तमसम्बन्धे सति उपभृति सप्तकृत्वो मन्त्रः प्राप्नोति । तथा च न वेदवाक्यं व्यवस्थितम् । तेन वचनादाज्य इति पारिभाषिकेनैव वाक्यद्वयोपनिबन्धनं सिद्धम् । न वाच्य-

मिह सकृन्मन्त्र इति । सत्यमेतदेवम् । वाक्यद्वयप्रतिपत्त्यर्थस्तु पुनरारम्भः इतरथा ह्येकवाक्यताप्याशङ्क्येत सकृन्मन्त्रवचनविधिप्रशंसार्थतया त्रिशब्दस्य तन्माभूदित्यतः सकृन्मन्त्रवचनमुच्यते ॥ २०२ ॥

अष्टावुपभृत्यल्पीयोनुयाजाश्चेत् ॥ २०३ ॥

अष्टगृहीतमुपभृति गृहीतव्यम् । जौहवादल्पतरम् । यद्यनुयाजाः सन्ति । इहानुयाजानामवैकल्पिकत्वाद्विकृत्यर्थश्चेच्छब्दः ॥२०३॥

चतुरन्यत्र प्रतिविभागात् ॥ २०४ ॥

अनुयाजवत्कर्मणोन्यत्र अन्यद्रव्यानुयाजके च कर्मणि चतुर्गृहीतमुपभृति ग्राह्यम् । कुत एतत् । प्रतिविभागात् । प्रतिविभागेन ह्युपयोग औपभृतस्य दृश्यते प्रयाजेषु चानुयाजेषु च । तेनोभयार्थतौपभृतस्याध्यवसीयते । ततश्चानुयाजाभावे प्रयाजार्थमेव चतुर्गृहीतं भवतीत्ययमभिप्रायः ॥ २०४ ॥

किञ्च—

पश्चातिथ्यादर्शनाच्च ॥ २०५ ॥

पशौ तावदन्यद्रव्यकेष्वनुयाजेषूपभृति चतुर्गृहीतं दर्शयति । अथोत्पूयाज्यं चतुर्गृहीतं जुह्वां चोपभृति च गृह्णाति पञ्चगृहीतं पृषदाज्यमिति । तथा अननुयाजके कर्मण्यातिथ्यायाम् । अथोत्पूयाज्यं सर्वाण्येव चतुर्गृहीतान्याज्यानि गृह्णाति न ह्यत्रानुयाजा भवन्तीति । तत्रानुयाजार्थेन द्रव्येण नार्थ इति प्रयाजार्थमेव चतुर्गृहीतं दर्शयति ॥ २०५ ॥

न कृत्स्नोपदेशात् ॥ २०६ ॥

नैतदेवं कृत्स्नं ह्येतदष्टगृहीतमनुयाजार्थत्वेनोपदिश्यते । अथ यदष्टौकृत्व उपभृति गृह्णाति छन्दोभ्यस्तद् गृह्णाति अनुयाजेभ्यो हि तद्गृह्णाति छन्दांसि ह्यनुयाजा इति । एवं चानुयाजार्थस्यैव वचनात्प्रयाजेषु विनियोगः । यथा प्रयाजार्थस्योत्तराघारे ॥ २०६ ॥

यदुक्तं पश्वातिथ्यादर्शनादिति । न तद्दर्शनं किं तर्हि वचनं तत्—

पश्वातिथ्ययोर्वचनात् ॥ २०७ ॥

यदा सकलस्यानुयाजार्थता तदानुयाजाभावे उपभृत्यग्रहणे प्राप्ते वचनाच्चतुर्गृहीतं विधीयते । प्राप्तिपूर्वकं हि दर्शनं भवति । न चेह प्राप्तिरस्तीत्यतो वचनमिदमिति । अत्र वदामः । स्यादेतदेवं यदि कृत्स्नमनुयाजार्थत्वेनोपदिश्येत । न तूपदिश्यते । एवं हि शाखिनां वचनम् । यदष्टौकृत्व उपभृति गृह्णाति प्रयाजानुयाजेभ्यस्तद् गृह्णातीत्युभयार्थतया विधानम् । यत्पुनरुक्तम् । अनुयाजेभ्यो हि तद्गृह्णातीति, तदनेनोभयार्थत्वविधानादनुवादः स इति । ननु स एव विधिरयमनुवाद· कस्मान्न भवति । न, तेन सकलस्यानुयाजार्थत्वे प्रयाजार्थतानुवदितुं शक्या, उभयार्थविधाने पुनर्यथाप्राप्तावनुयाजांशोनूद्यत इत्यदोषः । कृत्स्नोपदेशे हि स्यादेतदेवम् । नायं कृत्स्नोपदेशः । पश्वातिथ्ययोश्च वचनं स्यात् । यद्युभयार्थता न स्यात् । उक्तेन न्यायेनोभयार्थत्वे प्राप्तिपूर्वकत्वाद्दर्शनमेव तदिति । किं च वचनं सत्येतस्मिन्न ह्यत्रानुयाजा भवन्तीति हेतुरसमर्थः स्यात् । तस्मादपि दर्शनमेवेति । आह च । उभयार्थविधानं चेदितरस्यानुवादता ॥ २०७ ॥

ध्रुवायां च जुहूवत् ॥ २०८ ॥

चशब्दादुपभृति च । किं सिद्धं भवति सकृत्त्रिर्वामन्त्रवचनम् । तच्च वचनपरिप्राप्तं त्रिस्त्रिरेव यजुषा गृह्णीयादिति विधाय पुनराह तदनुसकृत्सकृदेवेति ॥ २०८ ॥

इध्मं प्रोक्षति विस्रꣳस्य वेदिं च बर्हिः प्रतिगृह्य वेद्यां कृत्वा पुरस्ताद्ग्रन्थि कृष्णोसीति प्रतिमन्त्रम् ॥ २०९ ॥

इध्मादिप्रोक्षति । कृष्णोसीत्येवमादिभिर्मन्त्रैः प्रतिमन्त्रम् । कथं पुनरिध्मं विस्रꣳस्य प्रोक्षति बर्हिश्च प्रतिगृह्य वेद्यां कृत्वा पुरस्ताद्ग्रन्थि प्रतिग्रहणं च समर्पणपूर्वकं प्रत्युपसर्गप्रयोगसामर्थ्यात् ।

तथा च वचनम् अथास्मै बर्हिः प्रयच्छन्तीति । इध्मस्याग्न्यर्थस्य प्रोक्षणम् । मन्त्रलिङ्गवाक्यशेषाभ्याम् । अग्नये त्वा जुष्टं प्रोक्षामीति मन्त्रवर्णः । इध्मं प्रकृत्य चाह । तन्मेध्यमेवैतदग्नये करोतीति । प्रयोजनम् । तादर्थ्याभावे न प्रोक्षणम् । यथावभृथेष्ट्यां परिश्रित्सु परिधिसंस्कारार्थस्येध्मकाष्ठस्य वेदेरपि वानेन कारणेन स्तरणाभावे न प्रोक्षणम् । यथा गृहमधीये, तत्रापि हि मन्त्रलिङ्गम् । बर्हिषे त्वा जुष्टां प्रोक्षामीति । तन्मेध्यामेवैतद् बर्हिषे करोति वाक्यशेषः । उपसत्सु तु स्तृताया अप्येकवृत्स्तरणमस्त्येवेति प्रोक्षणं प्रवर्त्तत एव । बर्हिर्मन्त्रः स्रुग्भ्यस्त्वेति समवेतवचनत्वात् स्रुग् द्वित्वैकत्वयोर्विपरिणम्यते । स्रुगभावे च ज्योतिष्टोमेनूबन्ध्यापक्षे स्रुक्शब्दस्याप्रयोगः ॥ २०९ ॥

## शेषं मूलेषूपसिञ्चत्यदित्यै व्युन्दनमिति ॥ २१० ॥

अत्र शेषस्य द्वितीयान्तनिर्देशात्, मूलानां च सप्तम्या गुणविभक्त्या निर्दिष्टत्वात्, शेषार्थतेति केचित् । नेत्यपरे । वेदवाक्ये हि शेषस्य मूलार्थतैव गम्यते । एवं ह्याह । अथयाः प्रोक्षण्यः परिशिष्यन्ते ताभिरोषधीनां मूलान्युपनिनयादितीति तत्संस्कार इव दृश्यते । ता इमा आर्द्रमूला ओषधय इति । किं च प्रयोजनवत् द्रव्यसंस्कारावगतेरिति प्रयोजनवद् बर्हिर्द्रव्यं तदनेन संस्क्रियत इति । सूत्रं च यथावेदवाक्यं नेयम् । यश्चाथ याः प्रोक्षण्यः परिशिष्यन्त इति शेषस्य व्यपदेशः सोपि सामस्त्यार्थः । प्रयोजनं नाशदोषादौ मूलोपनिनयनं कर्त्तव्यमेव ॥ २१० ॥

## पवित्रे निधाय प्रणीतासु बर्हिर्विस्रंस्य पुरस्तात्प्रस्तरग्रहणं त्रिष्णोरिति ॥ २११ ॥

प्रणीतासु निधानं वाचानिकम् । बर्हिर्विमुच्य पूर्वस्मात्प्रदेशात् त्रिमुष्टिप्रस्तरग्रहणं विष्णोरित्यनेन मन्त्रेण । स चायमपच्छेदे मन्त्रः पुरस्तादुगृह्णातीति वचनात् । ततश्च यत्रापच्छेदो नास्ति तथा पितृयज्ञे परिच्छिन्न एव गृहीतोसाविति तत्र मन्त्रो निवर्त्तते ॥ २११ ॥

## ब्रह्मणे प्रदाय सन्नहनं विस्रंस्य दक्षिणस्यां

वेदिश्रोणौ निधायान्यैरवच्छाद्य वेदिꣳस्तृणा-
त्यूर्णम्रदसमिति त्रिवृत् ॥ २१२ ॥

ब्रह्मणे प्रदाय प्रस्तरं बर्हिः सन्नहनं विस्रꣳस्य विमुच्य दक्षिणस्यां वेदिश्रोणौ स्थापयित्वा अन्यैस्तृणैरेव प्रच्छाद्य वेदिं तृणच्छादयति ऊर्णं म्रदसमित्यनेन मन्त्रेण । त्रिवृदिति त्रिधातुम् । मन्त्रस्य नोदितार्थाभिधायकत्वात्पितृयज्ञे विपरिणामो बर्हिषः ॥ २१२ ॥

उपपत्त्या वा१ ॥ २१३ ॥

२बहुलम् ॥ २१४ ॥

स्तृणाति ॥ २१४ ॥

अधरमूलम् ॥ २१५ ॥

तृणाति अधरमूलानि३ करोति ॥ २१५ ॥

पश्चादपवर्गम् ॥ २१६ ॥

४पश्चाच्चापवर्गः समाप्तिर्भवति । न प्रागुदग्वा । ब्रह्मणे प्रदानं दृष्टाथम्, व्यापृतहस्तः स्तरणं कथं नामकुर्यादिति । तेन पितृयज्ञे न भवति । गृहमेधीयेपि च केचित्स्तरणाभावान्न प्रदानमिच्छन्ति । नेत्यपरे । अस्ति हि तत्र व्यापारः । सन्नहनविस्रंसननिधानाच्छा-

---

१ न त्रिवृत, अपितु यावतीभिरावृद्भिर्भवति वेदेः स्तरणं तावतीभिः कर्त्तव्यमित्यर्थः ।

२ निविडं घनं यथा स्यात्तथाच्छादयतीत्यर्थः ।

३ पूर्वस्तृतस्य बर्हिषो मूलानि पश्चात्तीर्यमाणबर्हिषोऽग्रैः प्रच्छादनीयानीत्यर्थः ।

४ वेदेः पूर्वभागादारभ्येति शेषः । एकं मुष्टिं वेदेः पूर्वभागेस्तीर्त्वा द्वितीयं मुष्टिं वेदेर्मध्यमभागे पूर्वस्तृतबर्हिषो मूलान्यग्रैश्छादयन् स्तृणाति, ततस्तृतीयं मुष्टिं वेदेः पश्चिमप्रान्ते पूर्ववत् द्वितीयमुष्टिस्तरणेन सम्बद्धं स्तृणीयात् । अयमेकः प्रकारः ।

दनानि । प्रकृतौ हि तानि प्रत्तप्रस्तरेणाऽध्वर्युणानुष्ठितानि इहापि तद्वत्क्रियेति ॥ २१६ ॥

१प्रवृहन्वा ॥ २१७ ॥

वृहान्निष्कर्षे, निष्कृष्य अथो अपि प्रवर्हं स्तृणीयादिति वचनात् । अस्मिंश्च पक्षे मन्त्रावृत्तिं नेच्छन्ति । स्तरणक्रियासात्त्यात् । इतरत्र प्रतिमुष्टिक्रियाविच्छेदान्मन्त्रावृत्तिरिष्यते । स्तरणद्रव्यान्यत्वात् । यद्यपि च स्तीर्यमाणैकवेदिविषया स्तरणक्रिया मन्त्रोपि तत्परः । अथापि स्तरणद्रव्यान्यत्वमात्रमङ्गीकृत्य सूत्रकृता मन्त्रावृत्तिरभिहिता, न ग्रहणलवनस्तरणाद्यग्रहणेष्विति ॥ २१७ ॥

अत्रोद्वासनमाहवनीयश्रापिणः ॥ २१८ ॥

विरोधात् आहवनीयकल्पने हि हवींषि दह्येरन् । यद्येवं कपालोद्वासनमपि कर्त्तव्यम् ॥ २१८ ॥

इध्मात्समिधमादायाहवनीयं कल्पयत्पुपरि

र्युपरि प्रस्तरं धारयन् ॥ २१९ ॥

उपर्युपरीति सामीप्ये, प्रस्तरं धारयत्समिधाऽऽहवनीयं समर्थं करोति२ । तच्चैत्समर्थीकरणमग्नेरेव दृष्टार्थत्वात् । नतत्कार्यापन्नानामपां परिश्रितां वा ॥ २१९ ॥

उल्मुके उदूहत्यनुयाजाश्चेत् ॥ २२० ॥

अनुयाजार्थमुल्मुकोदूहनम् । तत्संस्पर्शनेन ह्यग्नेरनुयाजा-

---

१ एवं च प्रागपवर्गमेव कृतं भवति । वेदेः पश्चिमपार्श्वे स्तीर्त्वा तस्याग्राणि यष्ट्यादिनोत्पाट्य तेषामधस्तादन्यस्य बर्हिषो यथा मूलानि भवन्ति तथा स्तृणीयात् ।

२ समिदाघातेन क्लृप्तमिन्धनेध्मादेर्ज्वालनसमर्थं करोति । लोकेऽपि काष्ठादिना पूर्वमग्निमाहृत्य पश्चात् सन्धुक्षणं क्रियते, एवमत्रापीति भावः ।

र्थस्यायातयामतोपजन्यते । तत्संस्कारप्रयोजनत्वाच्चोल्मुकयोराहवनीयानुगमने ततो नानयनं गार्हपत्यादेव प्रणीयत इति । तयोश्च पुनरनुसंस्पर्शनविस्मरणेऽनुयाजनिर्वृत्त्युत्तरकालं, नाहवनीये तत्संस्पर्शनं तदर्थसंस्कारत्वात् । ननु चोत्तरपदार्थार्थमग्निसंस्कारार्थतापीष्यते । तथा ह्याह । ते पुनरनुसंस्पर्शयन्तीति प्रकृत्य अयातयाम्नियदत ऊर्द्ध्वमसंस्थितं यज्ञस्य तत्तनवा महा इति । न केवलानुयाजार्थत्वात् । तत्कुतो वचनात् । ते वा एते उल्मुके उदूहन्त्यनुयाजेभ्य इति । इतरदर्थवादप्रायम् । तथाच सूत्रकारः । अनुयाजाश्चेदिति । तच्चैतद्यागाभिनिर्वर्त्त्यर्थद्रव्यादृष्टसंस्कारत्वादुदकेपि भवति ॥ २२० ॥

परिधीन्परिदधात्यार्द्रानेकवृक्षीयान्बाहुमात्रान्पालाशवैकङ्कतकार्ष्मर्यबैल्वान्पूर्वालाभेपूर्वालाभ उत्तरान् खादिरौदुम्बरान्वा मध्यमदक्षिणोत्तरान् गन्धर्व इति प्रतिमन्त्रम् ॥ २२१ ॥

परिधीयन्त इति परिधयः । संज्ञा चैषा यौगिकी । न हि लोके परिधिशब्दः प्रत्यस्तमितावयवार्थवृत्तितया गवादिशब्दवत्क्वचिद्रूढः । न च यूपादिवत् संस्कारनिमित्तता शक्यावसातुम् । संस्काराणामविधानात् । गम्यते चात्रावयवार्थः सर्वतो धानात्परिधय इति । यूपे त्ववयवार्थो नावगम्यते । तत्संस्काराश्च विहिताश्छेदनादयः । तेन तन्निमित्ततावगम्यते यूपशब्दस्य । ननु चैवं सति परिधानात्परिधय इति चत्वारः प्राप्नुवन्ति । नोपदेशसामर्थ्यान्मध्यमदक्षिणोत्तरानिति । यत्र तु नैवं विधं वचनं न च चोदकानुवृत्तिस्तत्र चत्वार एव भवन्ति । यथा पितृमेधे वारणान्परिधीन्परिधायेति । प्रवर्ग्येपीति चेत् । न, मध्यमश्रवणात् । बहुत्वान्न मध्यमे परिधावुपश्रयति इति त्रयाणां च मध्यमो भवति । पैतुदारवेषु चतुःसंख्यास्त्विति चेत् । न, सूत्रारम्भसामर्थ्यात्पूर्ववदिति । परिधानयोगनिमित्तत्वे च परिधिशब्दस्य पितृमेधादौ न धर्मप्राप्तिर्न ह्यत्र ध-

र्मोपलक्षणार्थः परिधिशब्दो ऽग्निहोत्रादिशब्दवत् । संज्ञा तर्ह्यनर्थिका । न, संव्यवहारार्थत्वात् । परिधिपरिधानः शकलान्याधाय मत्येति । एकवृक्षीयानिति । उत्तरसूत्रादेवैकजातीयत्वे प्राप्ते एकवृक्षव्यक्त्यर्थमेवैकवृक्षीयग्रहणम् । अपरे तु वचनाभावान्नैवमिच्छन्ति । नह्येकत्वव्यवच्छिन्नवृक्षव्यक्तिपरं वचनमस्ति । अस्ति च जातिपरं वचनम् । ते वै पालाशाः स्युरिति । ननु पालाशादिग्रहणादेतत्सिद्धम् । सत्यमेवम् । अभाव उत्तरानित्युक्तत्वादेकस्य द्वयोर्वाभावे उत्तरजातिर्मा भूदित्येकवृक्षीयग्रहणम् । बाहुमात्रान् बाहुप्रमाणान् । पालाशादीनां पूर्वस्य पूवस्यालाभे उत्तरोत्तरस्य ग्रहणम । स चायं प्रतिनिधिः स्यात्पूतीकादिवत् । न वानर्थप्राप्तत्वात् । न ह्यर्थेन परिधिमात्रं प्राप्नोति येन जातिर्नियम्येत । तस्माद्विधानमेवेदम । पूतिकेषु तु द्रव्यापचारे सामर्थ्यात्सदृशद्रव्यप्राप्तौ ईषत्सदृशपूतीकनियम उपपद्यते । प्रयोजनं पूर्वाभावेपि न प्रायश्चित्तमिति । खादिरौदुम्बरत्वात्ते चामी खादिरौदुम्बराः अभावभिधानाभावात्पालाशैः सह विकल्प्यन्ते । अपरे तु बैल्वैःसह विकल्पमिच्छन्ति । एवं ह्याम्नायते । ते वै पालाशाः स्युरिति प्रकृत्य यदि पालाशान्न विन्देदथो अपि वैकङ्कताः स्युर्यदि वैकङ्कतान्न विन्देदथो अपि काष्मर्यमयाः स्युर्यदि काष्मर्यमयां न विन्देदथो अपि बैल्वास्युरथो खादिरा अथो उदुम्बरा इति । तेन कार्ष्मर्यमयाभावे बिल्वखादिरौदुम्बरा विकल्प्यन्ते । आह च—

अभावे च पलाशस्य विकङ्कतविधिर्यतः ।
तेन बिल्वविकल्पार्हौःखादिरौदुम्बराविति ॥

मध्यमदक्षिणोत्तरानिति । त्रित्वार्थं क्रमार्थं च गन्धर्व इत्येभिर्मन्त्रैः प्रतिमन्त्रं परिदधाति । त्वाशब्दस्याग्निपरत्वादवभृथे विपरिणाममिच्छन्ति । अग्निपरता च तत्संस्काराभिप्रवृत्तेः । सूर्यस्त्वा पुरस्तात्पात्विति च व्यक्तमग्निपरत्वम् । अतोस्यापि तत्परतैवेति । तदेतन्नातीव सुविचार्यालोचितमिव । परिधिपरत्वात्त्वाशब्दस्य । तत्कथमेकवाक्यत्वात् परिधिर्ह्यत्राभिधीयते । गन्धर्वस्त्वा विश्वावसुः परिदधात्विति यजमानस्य परिधिरसीति च स्पष्टैव परिधिपरता तस्मादवभृथेप्यनूह एव । यत्पुनरुक्तं सूर्यस्त्वा पुरस्तात्पात्विति अग्निप-

रतेति। यदि तस्याग्निपरतास्य किमायातम। अतोयमनुपन्यास्यः। इन्द्रस्य बाहुरसि दक्षिण इत्यौपचारिकमेतत। न तेन दाक्षिणादिकसंस्थितत्वाद्दाक्षिण इति। कुतो, लिङ्गात्। एष वै वीर्यवत्तमो य इन्द्रस्य बाहुर्दक्षिण इति। तेन पितृयज्ञे न विपरिणामः। मित्रावरुणौ त्वोत्तरतः परिधत्तामिति युक्तरूपोत्र विपरिणामः। उत्तरशब्दस्य समवेतवचनत्वात्॥ २२१॥

## प्रथमं परिधिᳲ समिधोपस्पृश्य वीतिहोत्रमित्यादधाति॥ २२२॥

प्रथमग्रहणं द्वितीयतृतीयव्युदासार्थम्। उपस्पर्शनं च तत्संस्कारः। द्वितीयानिर्देशात्। वाक्यशेषाच्च। तेनैतानग्ने समिन्धे इति। प्रयोजनेमवभृथेपि क्रियते। अग्नौ तु समिदाधानं दृष्टार्थम्। ततश्चावभृथे न भवति॥ १२२॥

## अनुपस्पृश्य द्वितीयाᳲ समिदसीति॥ २२३॥

द्वितीयाग्रहणादुपस्पर्शनमपि प्राप्तं निषिध्यते॥ २२३॥

## सूर्यस्त्वेति जपत्याहवनीयमीक्षमाणस्तद्वचनत्वात्॥ २२४॥

त्वाशब्दोग्निपरत्वादवभृथे विपरिणम्यते। पुरस्ताच्छब्दश्च दिक्परत्वात्पितृयज्ञे सूर्यस्त्वादक्षिणतः पात्विति। सम्प्रदाये त्वस्याविपरिणाममिच्छन्ति। तेषामयमभिप्रायः। पुरस्ताच्छब्दोग्रवचनो न दिग्वाचीति। तच्चैतत्परिधिपरिधानाद्यवेक्षणान्तमेकं कर्मकार्यैकत्वात्। एकं हि कार्यमग्निसंस्कारः। तत्कुतो, वाक्यशेषात्। वज्राद्वै वषट्काराद् बिभेमीति प्रकृत्य तद्वमैवैतदग्नये नह्यतीति। तथा गुप्त्यै वा अभितः परिधयो भवन्त्यथैतत्सूर्यमेव पुरस्ताद्गोप्तारं करोति। एककर्मत्वे च नैमित्तिकमते भवति। अग्निसंस्कारत्वादग्निकार्यापन्नास्वप्सु परिश्रित्सु च भवति। ननु च वषट्कारभृतिनिमित्तं परिधानमिति। तेनावषट्कारे जुह्वोतौ न प्रवर्त्तेत इति। नैतदेवम्। न हि कश्चिद्वषट्काराद्बिभेति न च तद्भयं प-

रिधिभिरपनीयते । तेनाग्निसंस्काराविध्यर्थवादप्रायमेतत् । स चाद-
ष्टोऽग्निसंस्कारो दृष्टस्यासम्भवात् ॥ २२४ ॥

१आवृत्य वेदिं बर्हिस्तृणेतिरश्चीनि दधाति
सवितुरिति ॥ २२५ ॥

अथस्तीर्णां वेदिमुपावर्त्तते स तृणे आदाय तिरश्चीनि दधाति हि श्रूयते । तिरश्ची इत्युदगग्रे । अत एव प्रागग्रवंदेस्तरणम् । आवृत्य वेदिमित्यवाच्यम् । सामर्थ्यादेव तत्प्राप्तेः स्याद्वेद्यधिकरणार्थत्वात् । अन्यथा हि न ज्ञायते क्वैते तृणे निधीयेते इति ॥ २२५ ॥

अन्ये वायुक्तत्वात् ॥ २२६ ॥

अन्ये वा तृणे उपादेये न वेदिसम्बन्धिनी । कुत एतत् । अयुक्तत्वादन्येषां इतरेषां च बर्हिस्तृणानां वेदिस्तरणे विनियुक्तत्वात् । न च विनियुक्तं वचनमन्तरेणार्थान्तरे विनियोगमर्हति । वेदितृणेऽध्वर्युरादत्त इति यथा । नत्वत्रापि वचनमस्ति तस्या द्वे तृणे आदायेति । न । पञ्चम्यभावात् । पञ्चम्या ह्ययमर्थो लभ्यते । षष्ट्यापि ह्ययमर्थो लभ्येत इति चेत् । सत्यं, लभ्यते विभक्तिव्यत्ययेन । अस्तु व्यत्यय इति चेत् । न, न्यायविरोधात । षष्ठ्यर्थस्यासम्भव इति चेत् । सप्तम्यर्थे षष्ठी भविष्यति । एवं चावश्यं भाविनि व्यत्यये न न्यायविरुद्धो विनियुक्तस्य विनियोग आश्रितो भवति । तस्मादप्रकृते तृणे आदाय वेद्यां निदधातीति सूत्रार्थः ॥ २२६ ॥

तथाचोत्तरसूत्रम्—

---

१ अध्वर्युर्वेदिं प्रत्यावृत्य आहवनीयसमीपाद्वेदिं प्रत्यागत्य स्तृतस्यैव बर्हिषो द्वे तृणे आदाय मध्ये स्तृतस्य बर्हिष उपरि आहवनीयस्य पश्चात् प्रदेशे तिरश्ची उदगग्रेस्थापयति । आपस्तम्बः ' समावनन्तर्गर्भौ दर्भौ विधृती कुरुतः ' इति, तथा ' अन्तर्वेद्युदगग्रे निधायेति ' च । काठके च ' पुरस्तात्प्रस्तरादनन्तर्गर्भौ विधृती आदाय वेद्यामुदञ्चौ निधाय ' इति । अत एव तिरश्ची इति सूत्रितमिति देवभाष्ये ।

अन्यत्रापि तृणार्थ इति ॥ २२७ ॥

अतोऽन्यत्रापि तृणार्थेऽन्यान्येव तृणानि गृहीतव्यानि । यथोपावीरसीति तृणमादायेति । कुत एतदयुक्तत्वादेव । युक्तग्रहणं ह्यादरं करोति । अथस्तीर्णायै वेदेर्द्वे तृणे अध्वर्युरादत्त इति । ननु विशये लौकिकमित्यनेनैव सिद्धत्वादवाच्यमेतत् । नैतदेवम् । तद्धि सर्वार्थनिराकरणविषयम् । सर्वार्थतया ह्यग्निद्रव्ये प्राप्ते अग्निमुपसमाधाय स्तुवन्तीत्यत्र, उल्कुषीमेवादायोपपरेयादित्यत्र च, लौकिकमुपादेय इत्येवमर्थम् । ननु चैवमग्नीनां सर्वार्थता विरोधः । न, निर्दिष्टकार्यसर्वार्थत्वाददोषः । इदं च सर्वार्थत्वात्कार्यविशेषद्रव्यनिराकरणविषयम् ॥ २२७ ॥

यूपाञ्जने च सर्पिः ॥ २२८ ॥

अन्यदेव ग्राह्यम् । प्रकरणे ह्यसंयुक्तविधानात्स्थाल्यस्य सर्वार्थता तेन पशावपि सर्वार्थमेवैतदाज्यमिति यूपाञ्जनमाशङ्क्यते । यद्येवं किमिति न भवति । प्राकृतकार्यविशेषसम्बन्धादित्यदोषः । कार्यविशेषसम्बन्धाविशेषादस्य विशये लौकिकमित्यनेन तर्हि पुनरुक्तम् । न, तद्वाक्यावगतकार्यविशेषसम्बन्धविषयम् । इदं तु प्रकरणावगतमित्यदोषः । अन्यत्रापि तृणार्थ इत्यस्यापराव्याख्या । अन्ये वायुक्तत्वादित्यनेनैवोपाकरणतृणादिष्वप्यन्यत्वासिद्धाववाच्यमेतदिति । अतोऽन्यथा व्याख्यायते । अन्यत्रापि तृणार्थे बर्हिस्तृणसदृशेभ्योऽन्यानि तृणानि भवन्ति । तत्सादृश्यं च संस्कारैर्भवति । तेभ्योन्यान्यसंस्कृतानीत्यर्थः । कुत एतत् । बर्हिः शब्दस्य जातिनिमित्तत्वात् । संस्कारनिमित्तताप्याशङ्क्यत एवेति चेत् । संस्कृतेषु बर्हिस्तृणेषु बर्हिः शब्दं प्रयुञ्जते याज्ञिकाः । नासंस्कृतेष्वपि शब्दप्रयोगात्, बर्हिरादाय गावो गता इति । सादृश्यात्सम्प्रयोग इति चेत् । न, इतरेतराश्रयप्रसङ्गात् । यदि संस्कारनिमित्तस्तदा सादृश्याज्जातौ प्रयोगः । तत्र कथं बर्हिः शब्देन जातिनिमित्तेनैवोद्दिश्य संस्कारविधानमुपपद्यते । बर्हिरासादयति । बर्हिः प्रोक्षतीति च । जातिनिमित्तत्वे पुनरेष दोषो न भवति । तस्माज्जातिनिमित्तः । एवं चेद् बर्हिषा यूपावटं स्तृणातीत्येवमादौ संस्काराणामप्राप्तिः । अतइदमुक्तमन्यत्रापि तृणार्थे

इति । यूपाञ्जने च सर्पिरित्येतदपि केचिदेवं व्याचक्षते । तदयुक्तमुक्तो ह्ययमर्थो घृतमाज्ये लिङ्गादिति । तस्माद्यथोक्तैव व्याख्या ॥ २२८ ॥

पुरोडाशपयस्याधानासु चेच्छन् ॥ २२९ ॥

पुरोडाशमात्रामैन्द्रवायवे प्रास्यति । पयस्यां मैत्रावरुणे, आश्विने धाना इति । अत्रेच्छया लौकिकानि गृह्यन्ते । इच्छया प्राकरणिकानि । तुल्यशास्त्रत्वाद्विकल्पः । अपरे तु न्यायत एव विकल्पमिच्छन्ति । सवनीययागशेषस्य हविः शेषभक्ष इत्यनेन यजमानाशने विनियोगः । अत्र च पुरुषार्थत्वादभक्षणेऽप्यदोषः । ननु चैवं सतिप्राकृतं चतुर्द्धा करणं कस्मान्न भवति । नान्यत्र विनियोगशासनात् अत इदमुक्तं पुरोडाशपयस्याधानासु चेच्छन्निति१ ॥ २२९ ॥

तयोः प्रस्तरं स्तृणात्यूर्णम्रदसमिति ॥ २३० ॥

तयोर्विधृत्योरुपरि प्रस्तरं स्तृणात्यूर्णम्रदसमित्यनेन मन्त्रेण । अङ्गप्रधानार्थजुहूधारणार्थत्वात् । पितृयज्ञे देवपितृभ्य इति विपरिणस्यते मन्त्रश्चोदितार्थाभिधानात् ॥ २३० ॥

आभिनिदधात्यात्वावसव इति ॥ २३१ ॥

---

१ पितृभूत्याचार्यास्त्वेवं व्याचक्षते ' च शब्दस्तुशब्दस्यार्थे, पुरोडाशपयस्याधानासु तु योऽप्राकृतान्युपादद्यात् स इच्छयैवोपादद्यात् न तु शास्त्रतः, अशास्त्रार्थ एवायम् यत् प्राकृतादन्यस्योपादानम्, कुतः ? पुरोडाशादिषु द्वितीयादर्शनात् पुरोडाशादीनामेवायं प्रतिपत्तिरूपः संस्कारो न ग्रहाणाम्, प्रतिपत्तिश्च विद्यमानानां क्वचिदुपयुक्तानां भवति ; न प्रतिपत्त्यर्थमुत्पाद्यन्ते, अपि चावयवश्रवणान्येतानि; विद्यमानानां चावयवा गृह्यन्ते नावयवार्थमुत्पाद्यन्ते, तस्मात् द्विदेवत्यपात्रेषु प्रतिपादितशेषं यजमानेन भक्षितव्यम्, इति ।

अत्रार्थे जैमिनीयं ' अपनयस्त्वेकदेशस्य विद्यमानसंयोगात्' इति तार्तीयिकाष्टमपादस्थत्रयस्त्रिंशत्सूत्रमपि गमकम् ।

अभिनिधानं पाणिद्वयेन क्रियेत प्रसिद्धिलिङ्गाभ्यामित्युक्तमुत्कराभिन्यासे ॥ २३१ ॥

सव्यासून्ये जुहूं प्रतिगृह्य निदधाति घृताचीति ॥ २३२ ॥

अभिनिहित एव सव्येन पाणिना भवत्यथ दक्षिणेन जुहूं प्रतिगृह्णातीति श्रूयते। प्रतिग्रहणं च समर्पणपूर्वकं प्रत्युपसर्गप्रयोगसामर्थ्यात्। बर्हिषि च श्रुतौ समर्पणे विहिते ऽथास्मै बर्हिः प्रयच्छन्तीति। सूत्रे, तं बर्हिः प्रतिगृह्येति। घृताच्यसीति मन्त्रश्चोदितार्थाभिधानाद्विकृतौ विपरिणम्यते। यथा गृहमेधीयादावनाज्यस्रुगासादने घृताच्यसीति पदद्वयं निवर्त्तते। घृतमंचितमस्यामिति घृताची। अपरे त्वाहुः। घृतमच्यतेनयेति घृताची। तदेतदयुक्तमिव। उपभृति ध्रुवायां चासम्भवात्। न हि ताभ्यां घृतमच्यते। चिन्तायाः प्रयोजनं करणपक्षे न विपरिणामः। प्रियेण धाम्नेत्यस्याप्यप्रयोगमिच्छन्ति केचित्। धामशब्दस्याज्याविषयत्वात्। एतद्वै देवानां प्रियतमं धाम यदाज्यमिति हि श्रूयते। या त्वं घृताच्यसि जुहूश्च नाम्ना सेदं प्रियं सद आसीद प्रियेण धाम्नाज्येनोपेता सतीति वाक्यार्थः। तदेतदनुपपन्नम्। न हि धामशब्द आज्यविषयः। धामानि त्रयाणि भवन्ति स्थानानि नामानि जन्मानीति चेति ह्यभियुक्तोपदेशः। तस्मात्प्रियेण धाम्ना भिहिता सतीदं प्रियं सद असीदेति। यत्तु धामशब्द आज्ये दृश्यते। स कथं चिदुपचारवृत्त्या प्रतिपत्तव्यः ॥ २३२ ॥

एवमितरे उत्तराभ्यां प्रतिमन्त्रं बर्हिष्युपभृतं ध्रुवायां चावकृष्टेनुपूर्वम् ॥ २३३ ॥

एव मितरे उत्तराभ्यां प्रतिमन्त्रं बर्हिष्यासादयति। के इतरे इत्यत आह। उपभृतं ध्रुवाञ्च। अनुपूर्वमवकृष्टे मन्त्रान्तरविधानाद्। बर्हिषीति च प्रस्तरनिरासार्थम्। एवशब्दः प्रतिग्रहणविषयः। समर्प्पणपूर्वकं यथा स्यादिति। नन्वितरे इत्युक्तत्वादुपभृतं ध्रुवां चेत्यवाच्यम्। वाच्यं वा स्रुगासादनप्रतिपत्त्यर्थ-

त्वात् इतरथा ह्याधेयस्यासादनं प्रतीयेत । न गुणत्वावधिकरणस्य । अथ पुनरुपभृद्ध्रुवाग्रहणे क्रियमाणे स्रुगा सादनमेतदिति ज्ञापितं भवति । तत्कथमिति चेद्वचनात् । घृताच्यसि जुहूर्नाम्नेति जुहूं, उपभृन्नाम्नेत्युपभृत, ध्रुवानाम्नेति च ध्रुवाम् । मन्त्रलिङ्गाच्च । जुहूर्नाम्नेत्येवमादि । प्रयोजनमाज्याभावेऽप्यासादनमिति । अपरे तूपभृद्ध्रुवाग्रहणस्य फलं व्यावर्णयन्ति । पृषदाज्यपात्रस्यासादन व्युदासार्थम् । तत्पुनराचार्येणाभिहितमेवोपभृतासादनमित्युक्त्वा प्रियेण धाम्नेति वा विशेषोपदेशादिति । पृषदाज्यपात्रस्य वावकृष्टत्वव्युदासार्थमुपभृद्ध्रुवाग्रहणम् । तत्कथमनुपभृद्धिकारत्वाद्युपभृतो ह्युपधारणं कार्यम् । न च तत्पृषदाज्यपात्रेण क्रियते । अत एवार्थगृहीतत्वात्तस्य सादनादि न भवति ॥ २३३ ॥

१ पुरोडाशावभिघार्योद्वास्योपस्तीर्णे निधायानक्ति

यस्ते प्राणः पशुषु प्रविष्टो देवानां

विष्ठामनु यो वितस्थे आत्मन्वान्

सोम घृतवान् हि भूत्वाग्निं

गच्छ स्वर्यजमानाय

विन्देति ॥ २३४ ॥

उपस्तीर्णे इति पूर्वतरं द्रष्टव्यम् । तद्भूतोपदेशादुद्वास्योपस्तरणमशक्यं कर्तुम् । अभिघारणं हविर्मात्रस्य तत्सम्बन्धेनोपदेशात् । यद्वै हविरभिघारितं तन्मेध्यमिति । सूत्रकारस्तु पुरोडाशौ लक्षयति ॥ २३४ ॥

---

१ अयमत्र क्रमः प्रथमं वेदेन पुरोडाशविभस्मीकरणम्, ततः पात्र्याः स्थापनम्. पुरोडाशयोरभिघारः, पात्र्याः स्थानद्वये उपस्तारः, अथवा प्रथमं पात्र्यामुपस्तारस्ततः पुरोडाशयोरभिघारः, उदगुद्वासनम्, वेदेन पुनर्विरजस्करणम्, स्थापनम्, पात्र्या उपरि प्राणदानमिति देवभाष्ये ।

यथा देवतमन्यत् ॥ २३५ ॥

इति उक्तार्थम् ॥ २३५ ॥

प्रत्यनक्ति कपालानि यानि घर्मे कपाला-
न्युपचिन्वन्ति वेधसः पूष्णस्तान्यपि-
व्रतऽइन्द्रवायू विमुञ्चतामिति ॥ २३६ ॥

कपालोद्देशेन विधानसामर्थ्यात्प्रतिकपालमञ्जनम् । युगपच्चाशक्यत्वात् । एवं सति यानि कपालानीति बहुवचनमञ्जनक्रियाव्यवच्छिन्नसमुदायापेक्षम् । पात्रप्रोक्षणमन्त्रवत्पूजार्थं वा ॥ २३६ ॥

तूष्णीं वा ॥ २३७ ॥

कपालाञ्जनम् ॥ २३७ ॥

संख्ययोद्वासयति ॥ २३८ ॥

संख्याशब्देन करणभूतेनोद्वासयतीत्येतदुक्तं भवति । तत्रैतद्विचार्यते । किमेकमेकमिति प्रयोगः सर्वत्र । उत एकं द्वे त्रीणीति । उत प्रथमं द्वितीयं तृतीयमिति । एकमुद्वासयामीति प्रतिकपालं प्रयोगः । एकमिति हि संख्याशब्दः च स प्राथम्यादविरोधाच्च सर्वत्र प्रयुज्यत इति । तदेतदयुक्तम् । न ह्येकशब्दः सर्वत्र प्रयुज्यमानः समर्थो भवति । एवं चेदेकं द्वे त्रीणीति प्रयोगस्तथा सति यथावत्संख्यासंख्येयसम्बन्धात्सामञ्जस्योपपत्तिः । एतदपि नोपपद्यते । न हि द्वितीये कपाले द्वित्वविशिष्टमुद्वासनं तथा तृतीये चतुर्थे च । अतः पूरणप्रत्ययान्ता संख्या परिगृह्यते । प्रथमं द्वितीयं तृतीयमित्येवमादि । एवं संख्ययोद्वासनं कृतं भवति । यथावत्संख्यासंख्येयसम्बन्धश्च । तथा च कपालनाशसंवित्तेः प्रायश्चित्तवचनमुपपद्यते । ननु च प्रथमशब्दस्य द्वितीयापेक्षत्वाद्विकृतावेककपालेऽप्रयोगः । उच्यते । न विकृतिवशेन प्रकृतौ पदार्थावधारणमुपपद्यते । प्रकृतिवशेन हि विकृतावधारणं युक्तरूपमतो यत्किञ्चिदेतदिति ॥ २३८ ॥

प्रियेण धाम्नेति हवीꣳषि वेद्यां कृत्वा ध्रुवा अस-

दन्निति सर्वाण्यालभते ॥ २३९ ॥

बहुवचनं स्थाल्यपेक्षया । सर्वशब्दश्च जौहवाद्यपेक्षः । मुख्यक्रमेण वासादनालम्भने । क्रमान्तराभावात् । यज्ञपतिशब्दश्च बहुयजमानके विपरिणम्यते ॥ २३९ ॥

पाहि मामित्यात्मानम् ॥ २४० ॥

आलभत इति वर्त्तते । स चायमात्मसंस्कारः करिष्यमाणप्रयोजनः ।[१]ततश्चाश्वमेधे विरोधात्प्रतिप्रस्थाता सवनीयाद्यासादनालम्भने कृते ऽध्वर्युरन्नहोमाभिप्रवृत्त एवात्मानं संस्पृशतीति ॥ २४० ॥

अत्र वा व्रतोपायनम् ॥ २४१ ॥

तुल्यशास्त्रत्वात् ॥ २४१ ॥

इति कात्यायनसूत्रविवरणे कर्कोपाध्यायकृतौ
द्वितीयोऽध्यायः ।

---

१ ततः पशौ सुत्यायां च पुनः पुनर्हविरासादने कृते न भवति ; प्रथमत एव सकृत् कृतेनात्मनः कर्मसमाप्तिपर्यन्तं संस्कृतत्वा[त्] इति देवभाष्ये ।

# अथ तृतीयोऽध्यायः ।

१ होतृषदनं कृत्वा परेण वेदिं श्रोणिं वोत्तरेणे-
ध्मात्समिधमादायाग्नये समिध्यमानायानु
ब्रूहीत्याह ॥ १ ॥

होता यस्मिन्त्सीदति तद्धोतृषदनम् । समाचारादवेधविद्धं स्यात् । तच्च कुशोत्तरीयम् । उपरिष्टात्तृणनिरसनोपदेशसामर्थ्यात् । कृत्वेति । करोतिरयमभूतप्रादुर्भाववचनः । शब्दसामर्थ्यात् । दृश्यते च कर्ममध्येप्युत्पत्तिर्यूपादीनाम् । स्थापनार्थो वापरेण वेदिमिति प्रदेशनिर्देशात् । किं च कृते चोदितत्वात् । प्रक्लृप्तद्रव्यस्य च कर्मण्यभिवृत्तिसामर्थ्यात् । क्रियासातत्याविच्छेदाच्च । यूपादीनां त्वाहत्यैवोत्पत्तिश्चोद्यते । तस्माद्वैषम्यमनेन । यत्तु करोतिरभूतप्रादुर्भाव इति । तदनैकान्तिकम् । अन्यत्रापि दृष्टत्वात् । पादौ करोतीति संस्कारे । गोमयानि करोतीति संहारे । घटमत्र कुर्विति स्थापने । तस्मात्स्थापनार्थ एव । अपरेण वेदिमिति लिङ्गादध्यवसानम् । एषवां लोक इत्युदङ्ङेजतीति प्रकृत्याह । अन्तरा वा एतदाहवनीयं च गार्हपत्यं चास्त इति । श्रोणिं वोत्तरेणेति तु शास्त्रात् । यद्येवं श्रोणिमुत्तरेपीवेत्यवधारणा । ननु लिङ्गविरोधः । नोदूगमनविधिशेषत्वात् । एष वां लोक इत्युदङ्ङेजतीत्यभिधाय संस्तौति । अन्तरा वा एतदाहवनीयं च गार्हपत्यं चास्त इति । स चोपचारवृत्त्या अन्तरा शब्दोन्तरे वान्तरे-

---

१ अध्वर्युर्वेदिमपरेण वेदेः पश्चाद्गार्हपत्याहवनीययोरन्तराले होतुरुपवेशनार्थं वारणादिवृक्षजं शुष्ककुशैरास्तीर्णमासनं स्थापयित्वा, तत ' एहि? होतर् ' इति होतारमामन्त्र्य तत्रागते सति इध्मादेकां समिधं हस्ते गृहीत्वाग्नये समिध्यमानायानुब्रहीत्येवं होतारं प्रति ब्रवीतीति सूत्रार्थः ।

ति । इध्मात्समिधं गृहीत्वा अग्नये समिध्यमानायेत्यमुं मन्त्रमाह । स चायमग्निशब्दो जात्यपेक्षः । जातेः पदार्थत्वात् । ततश्च वरुणप्रघासेष्वनूहः । दृश्यते च आसाद्य हवींऽष्यग्निं मन्थतीति प्रकृत्याध्वर्युरेवाहाग्नये समिध्यमानायानुब्रूहीत्यूहाभावः । तथा प्रतिपराणीयोदैति प्रतिप्रस्थाता सम्मृजन्त्यग्निंऽ सम्मृष्टेग्नाविति । तथाचाध्वर्युरेवाह ब्रह्मन्प्रस्थास्यामि समिधमाधायाग्निमग्नीत्सम्मृड्ढीत्येकवचनान्तोग्निशब्दः । एवं च सति आज्येपि तुल्यत्वादविपरिणाम एव आज्येनोदेहीत्येवमादौ । ननु चाग्निभ्यां प्रह्रियमाणाभ्यामनुब्रूहीति द्विवचनमपि दृश्यते । तच्च जातिपरे नोपपद्यत इति । नैष दोषः । वचनं हि तद्व्यक्तिपरम् । व्यक्तेर्हि जातिशब्दमन्तरेण प्रत्यायनानुपपत्तिरिति ॥ १ ॥

## होतरिति चैके ॥ २ ॥

होतरित्येवं चैक आहुः । तच्चैतद्धोतृपदमनुब्रूहीत्यस्मात्प्राग्वक्तव्यम् । तदुहैक आहुरग्नये समिध्यमानाय होतरनुब्रूहीति वचनात् ॥ २ ॥

## प्रथमस्थानेन प्राक् स्विष्टकृतः[१] ॥ ३ ॥

स्थानशब्दः सवनाभिप्रायः ॥ ३ ॥

## मध्यमेनेडायाः ॥ ४ ॥

स्विष्टकृत्प्रभृतीडान्तं मध्यमेन सवनेन[२] ॥ ४ ॥

## शेषमुत्तमेन[३] ॥ ५ ॥

---

१ सर्वे मन्त्राः स्विष्टकृतः प्राक् स्विष्टकृत् प्रैषा अपि उपांश्वपेक्षया किञ्चिदुच्चैर्भवता स्वरेण प्रयोक्तव्या इति ।

२ प्रयोज्यमित्यध्याहारः ।

३ इडात आरभ्य कर्मापवर्गान्तं सर्वे मन्त्रा उत्तमेन सवनेन प्रयोज्याः । अत ‘ उपांऽशुप्रयोगः श्रुतेः ’ इत्यस्य दर्शपूर्णमासयोरप्रवृत्तिः । स्वरान्तरविधानात् ।

स चायं सवनधर्म उच्चैर्धर्मकाणाम् । न यजुषाम् । यस्य ह्युच्चैर्धर्मस्तस्य तद्गतो विशेषो वक्तुं युज्यत इति ॥ ५ ॥

सन्तत्वन्निव मेनुब्रूहीत्याह यजमानः ॥ ६ ॥

स चायं होतृसम्बोधनार्थत्वात् प्रोषितेन न प्रयोक्तव्यः । इहैव होतृसम्बोधनमन्यः करोति । तदुक्तं गुणेषु प्रतिनिधिः परार्थत्वादिति । सत्रेषु चैक एवानुवदति । न ह्यत्रात्माभिवादिपदसम्बन्धेप्यात्मनः किं चित्प्रार्थ्यते यदनुच्चारणे यजमानानां संस्कारपरिलोप आशङ्क्यते । तस्मादेक एवाहेति ॥ ६ ॥

अङ्गुष्ठाभ्यां चावबाधते पाद्याभ्यां वेदमहममुमवबाध इति द्वेष्यम् ॥ ७ ॥

अङ्गुष्ठाभ्यां चावबाधते । अवबाधनमाक्रमणम् । च शब्दाद्यजमानः । इदमहममुमवबाध इत्यनेन मन्त्रेण द्वेष्यम् । एवं च अमुमित्यस्यस्थाने द्वेष्यस्य नामादेशः । स च क्रत्वर्थो न पुरुषार्थः भ्रातृव्यमित्युपदेशसामर्थ्यात् । यदि हि पुरुषार्थत्वं स्यान्न द्वेष्यस्याभावे भ्रातृव्यावबाधनमुपदिश्येत । उपदिश्यते च । तस्मात्क्रतूपकारार्थद्वेष्यस्यावबाधनमिति निरवद्यम् । पाद्याभ्यां वेति इयमवधारणा । माध्यन्दिनीयायां ह्यविशेषपाठः । तस्मादेतास्वनूच्यमानासु यं द्विष्यात्तमंगुष्ठाभ्यामवबाधेतेति । काण्वीयायां तु विशेषपाठः । पाद्याभ्यामङ्गुष्ठाभ्यामिति । इष्यते च सामान्यस्य विशेषविषयता । अतो न विकल्पः । पाद्याभ्यामेवेत्यवधार्यत इति । इदमहमिति च सत्यप्यात्माभिवादिपदप्रयोगे पुरुषार्थरूपताभावात्सत्रेष्वविपरिणामः । अतएवैकः कुर्यादिति ॥ ७ ॥

अभावे द्विषन्तं भ्रातृव्यमिति वा ॥ ८ ॥

द्वेष्यस्याभावे द्विषन्तमवबाधे भ्रातृव्यमिति वा प्रयोगः । अत्र च क्रत्वर्थेप्यवबाधने अमुष्येति द्विषच्छब्देभिचरन्नन्यत्रापीत्यभिधानाद्यद्यभिचरन्नामादिशति तत उदकोपस्पर्शनं भवति । ननु च द्वेष्यद्विषतोर्नामादेशोवश्यम्भावी तत्र को विशेषः । उच्यते बुद्धिस्थ इति ब्रूमः । यदाभिचारबुद्ध्या नामादेशस्तदैवोदकस्पर्शन-

म् । न क्रत्वर्थरूपतायामिति । अन्यत्वेनैवाभिचारमिच्छन्ति । न ह्यत्र वचनमस्ति । यथा वज्राभिमर्शनजपे द्विषतो बध इति । यदि नाभिचरेदित्युक्त्वा यद्यु अभिचरेदमुष्य बध इति ब्रूयादिति । एवं स्फ्योदकप्रहरणेपि वचनम् । तथा स्तम्बयजुर्हरणे यद्यु अभिचरेदमुमतो मा मौगिति ब्रूयादिति । वचनपूर्वकं च तत्सूत्रं अमुष्येति द्विषच्छब्देभिचरन्नन्यत्रापीति । न चेह वचनमतोभिचाराभावात्कुत उदकोस्पर्शनम् ॥ ८ ॥

## यावत्सामिधेनि वेदेदमहं तावतिथेन वज्रेणेति ॥९॥

प्रयोगार्थमिदमारभ्यते । यावत्यः सामिधेन्योऽस्मिन्कर्मणीति वेद विजानीयादिदमहं तावतिथेन वज्रेणेति[1] । ननु चात्र पञ्चदशैव सामिधेन्यः । तत्र यावत्सामिधेनि वेदेत्यवाच्यम् । सत्यमेवमेव हि ता अभिविधीयन्ते । अथ चैकविंशतिसंख्याप्रवृत्तिज्ञापनार्थम् । एकविंशतिसामिधेनीरपि दर्शपूर्णमासयोरनुब्रूयादिति । इदमहममुमवबाध इत्यत्राभिहित एव इदमहमिति शब्दः । पुनरहोच्चारणं तावतिथेन वज्रेणेत्यस्यावसरार्थम् । तावतिथ इति च पूरणप्रत्ययान्तः । तावतां पूरणस्तावतिथ इति । पञ्चदशानां पूरणः पञ्चदश इति । यद्येवं पित्र्यायां सामिधेनीत्रित्वे तीयप्रत्ययान्तत्वात्तृशब्दस्य तृतीयेनेति प्रयोगः । उपसत्सु च नान्तादसंख्यादेर्मडिति मट् प्रत्ययान्तत्वान्नव शब्दस्य नवमेनेति प्रयोगः[2] ॥ ९ ॥

## प्रतिप्रणवमाधानम् ॥ १० ॥

सामिधेन्यनुवचनं कुर्वतो होतुः प्रणवे प्रणव इध्माधानं कुर्यात् । स चायं कालार्थः संयोगः उभयोरग्न्यर्थत्वात् । इध्मो ह्यग्नीन्धनार्थः, सामिधेन्योपीध्यमानानुवादिन्यः । न च वचनमन्तरेण गुणयोर्गुणगुणितेष्यते । यत्तु सामिधेनीयाज्या इध्मएवाहुतिरिति स्तु-

---

१ द्विषन्तमवबाध इति शेषः ।

२ तथा च 'इदमहं तृतीयेन, इदमहं नवमेन, इदमहं चतुर्विंशेन, इदमहं एकविंशेन' इत्यादि पित्र्यायामुपसत्स्विष्टकापशौ प्राजापत्यपशौ च यथासंख्येन प्रयोगः ।

तिमात्रं तत् कालार्थेऽप्युपपद्यते । प्रयोजनं मानुषादपचारादनुक्तायां सामिधेन्यां प्रक्षिप्ते इध्मकाष्ठे सामिधेन्यनूच्यत एवेति । उभयं चैतदिन्धनाभावे ऽवभृथादौ निवर्त्तते ॥ १० ॥

समिद्ध इति प्रागतः सर्वमिध्ममेकवर्जमनुयाजाश्चेत् ॥ ११ ॥

समिद्ध इत्यतः प्रतीकात् प्राक् यः प्रणवस्तत्र सर्वमिध्ममभ्यादधाति । एकमिध्मकाष्ठं वर्जयित्वा, यद्यनुयाजाः सन्ति । तच्चैतदिह वैकल्पिकत्वादनुयाजानां विकृतिविषयम् । समिद्ध इत्यतः शब्दोपादानसामर्थ्यात् । केचित्सामिधेनी विवृद्धावागन्तूनामन्त्यायां सर्वेध्मप्रक्षेपमिच्छन्ति । तत्पुनरनुपपन्नम् । प्रकृतौ हि समिध्यमानो अध्वर इत्यस्याः प्रणवे सर्व्वेध्मप्रक्षेपः कृतो विकृतावपि चोदकानुग्रहात्तत्रैव कार्यः । किं च यत्र बह्वयो धाय्या भवन्ति तत्रानुपपत्तिः काष्ठानामष्टादशेध्ममित्युक्तपरिमाणत्वात् । अथ विवृद्धिरुपगम्यते । सा हि निष्प्रमाणिका स्यात् । न हि सामिधेनीनामिध्मस्य च परस्परतोगाङ्गिभावः । तस्मात्समिद्ध इति प्रागत इत्यत्र श्रुतिरनुकृता । एवं हि श्रवणं समिद्धो अग्न आहुतेत्यतः प्राचीनꣳ सर्वमिध्ममभ्यादधाति ॥ ११ ॥

अनुवचनान्ते वेदेनाहवनीयं त्रिरुपवाज्य स्रुवेण पूर्वमाघारमाघार्याहाग्निमग्नीत्सन्मृड्ढीति ॥१२॥

अनुवचनान्तः सामिधेन्यन्त उच्यते । त्रिरेव प्रथमा त्रिरुत्तमामनवानन्ननुब्रूयादिति हि प्रकृत्य आह । एतदनुवचनमिति । अपरे तु कल्पकारान्तराभिप्रायात्सुयजा च यजेत्येतदनुवचनं मन्यन्ते । तदभिप्रायः । अग्ने महाꣳ असि ब्राह्मण भारतेत्यादीध्यमानाप्रवचनुवादितया सामिधेन्यनुवचनैकदेशभूतमिति । तदन्ते वेदेनाहवनीयस्य त्रिरुपवाजनं कृत्वा स्रुवेण पूर्वमाघारमाघारयति । तदेतदुपवाजनं प्रसिद्धितादर्थ्यादृष्टार्थम् । उचितं ह्यग्नौ काष्ठान्याधायेन्धनायोपवाजनमिति । धर्ममात्रं वा द्रव्यविशेषनियमाद्वेदेनेति । संख्यानियमाच्च त्रिरिति । न च वेदद्रव्येण त्रित्वविशिष्ट उपवाजने

इष्टार्थाभिनिवृत्तिः । तस्माद्धर्ममात्रम् । प्रयोजनमबादावपि क्रियते । स्रुवग्रहणं जुह्वा निवृत्यर्थम् । होमे हि जुहूः परिभाषितेति। आघारमिति संज्ञानिर्देशः । आघार्येति च ऋज्वादिगुण परिग्रहार्थम् । अत्र च प्रजापतिर्देवता । निरुक्तत्वात्सूत्रकारप्रस्थानाच्च । पूर्वो देवता सामान्यादिति । स्वाहाकारः स्यात्परिभाषितत्वात् स्वाहाकारः सर्वत्रेति । न वा प्रतिषिद्धत्वात् । न स्वाहेति वचनात् । अनिरुक्तं हि मन इति । परिभाषान्यविषया । अग्निमग्नीत्सम्मृड्ढीत्ययं मन्त्रश्चोदितार्थाभिधायी विकृतौ विपरिणम्यते । पदार्थत्वाच्च पूर्वाघारो यावदुक्तं निवर्त्तते । उपवाजनं तु द्रव्यसंस्कारात्प्रवर्त्तत एव ॥ १२ ॥

इध्मसन्नहनैरनुपरिधि सम्मार्ष्ट्यग्ने वाजजिदिति त्रिस्त्रिः परिक्रामम् ॥ १३ ॥

इध्मसंप्रहनैः करणभूतैरनुपरिध्यग्निं त्रिस्त्रिः परिक्रम्य संमार्ष्ट्यग्ने वाजजिदित्यनेन मन्त्रेण। स चायं होमसाधनभूताहवनीयद्रव्यसंस्कारत्वात्सम्मार्गो यावदुक्तेपि प्रवर्त्तते । मन्त्रस्तु चोदितार्थाभिधायित्वादवभृथेष्ट्यां विपरिणम्यते । अत्र केचिदग्निद्रव्याभिधायकत्वात्सकृन्मन्त्रवचनमिच्छन्ति। देशभेदान्नेत्यपरे । परिध्युपलक्षिता हि भिन्ना देशाः । तथा च लिङ्गमथोपरिष्टात्तूष्णीं त्रिरिति । प्रतिदिशं हि मन्त्रप्राप्तौ तूष्णीमिति वचनमर्थवद्भवति । प्रतिदिश तु सकृत्सकृन्मन्त्रवचनमिष्यते । तदुक्तमेकद्रव्ये कर्मावृत्ताविति ॥ १३ ॥

तूष्णीमुपरि ॥ १४ ॥

णमुल्वचनानुवृत्तिसामर्थ्यात्परिक्रम्येत्यत्रापि भवति । अनुपरिध्युपदेशसामर्थ्याद्यथोपाहितमिति केचित् । नेत्यपरे । न ह्ययं परिधिसंस्कारो येनाभिप्रवृत्त्या तत्क्रम आश्रीयते । अग्निसंस्कारस्त्वयम् । तेन प्रदक्षिणोपचारोदक्संस्थता सम्पादनाय प्रथमं दक्षिणं ततः सम्मार्गः ॥ १४ ॥

अपरमाहवनीयादञ्जलिं करोति नमो देवेभ्यः

स्वधा पितृभ्य इति दक्षिणत उत्तानम् ॥ १५ ॥

आहवनीयस्यापरतो नमो देवेभ्य इत्यनेन मन्त्रेणाञ्जलिं करोति । नमस्कारार्थत्वाच्च पुटाञ्जलिं करोति । स्वधा पितृभ्य इत्यनेन दक्षिणत उत्तानमञ्जलिं करोति । तदेतदञ्जलिकरणमुत्तरार्थम् । स स्रुचोत्तरमाघारमाघारयिष्यन्पूर्वेण स्रुचावञ्जलिं निदधाति इति वचनात् । प्रयोजनं तदभावे ऽभावः ॥ १५ ॥

अप उपस्पृश्य सुयमेम इति जुह्वपभृतावादायोत्तरां जुहूं कृत्वा दक्षिणातिक्रामत्यङ्घ्रिणा विष्णविति ॥ १६ ॥

अपामुपस्पर्शनं पित्र्यं मन्त्रमुक्त्वेति परिभाषितत्वादवाच्यमतः प्राचीनावीत्यादि व्युदासार्थम् । सुयमेम इत्यनेन मन्त्रेण जुह्वपभृतावादत्ते । किं तूत्तरां जुहूं कृत्वा पूर्वतरम् । नन्वेतदवाच्यं पाणिभ्यां जुहूं परिगृह्योपभृत्याधानमादानकाल इत्युक्तत्वात् । उच्यते । तत्सर्वविषयम् । एतदुत्तराघारार्थमित्यदोषः । सर्वार्थतयैवात्रापि प्राप्तेरवाच्यतेत्येवं चेत् । मन्त्रवदादानस्योत्तराघारार्थतां ज्ञापयति । इतरथा हि जुह्वपभृतोरादानोद्देशेन विधानसामर्थ्यात्तदादानमात्रे प्रवृत्तिराशङ्क्येत । अथ पुनरुत्तरां जुहूं कृत्वेति सूत्रारम्भे सति कर्मार्थस्रुगादानादन्यदेतदिति ज्ञापितं भवति । ननु च पारिभाषिकस्य सर्वार्थता कथमवगम्यते । उच्यते । वाक्यस्याविशेषविषयत्वात् । इत्थमेव कुर्यादुभाभ्यामेव पाणिभ्यां जुहूं परिगृह्योपभृत्यधिनिदध्यादिति । इदं तूत्तराघारावान्तरप्रकरणात्तदर्थमिति निरवद्यम् । दक्षिणातिक्रामत्यङ्घ्रिणा विष्णवित्यनेन मन्त्रेण । यजतिस्थानं प्रतिगमने मन्त्रः । अयमपि चोत्तराघारार्थगमनविषय एवावान्तरप्रकरणादेव ॥ १६ ॥

१परिधीनपरेण सञ्चरो होष्यतः ॥ १७ ॥

---

१ परिधीनां पश्चात्स्रुचां पूर्वेण होमं करिष्यतो ऽध्वर्योर्गमनागमनमार्गः सञ्चरः ।

इति । अपरेणेति तृतीया । न हि एनत् प्रत्ययोऽत्र एनबन्यतरस्यामदूरे पञ्चम्या इति । सर्वार्थं होष्यत इति सम्बन्धात् ॥ १७ ॥

## सव्येनेतो दक्षिणेनामुतो ॥ १८ ॥

गच्छतीत्यध्याहारः । इतो गच्छन्यजति स्थानं सव्येन गच्छति अमुत आगच्छन् दक्षिणेनेति । न च सव्यदक्षिणयोरितरेतरनिरपेक्षयोर्गमनसामर्थ्यमस्ति । तेन प्रवृत्त्युपलक्षणार्थं वचनम् । एतदपि सर्वार्थमेवाविशेषविधानसामर्थ्यात् । अथातोऽतिक्रमणस्यैवेति हि प्रकृत्य य आश्रावयिष्यन्सव्येनातिक्रामति दक्षिणेनाश्राव्येति । ननु चैवं सति आश्रावणविशिष्टएवातिक्रमणे सव्येतरपादनियमो भवति न सर्वत्र । ततश्चोत्तराघारे न भवति । अत्रोच्यते । अतिक्रमणं हि प्रकृत्य सव्येतरपादनियमाभिधानम् । तस्मिंश्चाश्रावणेन विशेष्यमाणे विशिष्टानुवादलक्षणोवाक्यभेदः प्रसज्यते ऽतः सर्वार्थतेत्युक्तम् । अत एव सूत्रकारेणेहोपनिबद्धम् । आह च । आश्रावणविशिष्टे तु नियमो यद्ययं भवेत् । विशिष्टस्यानुवादत्वाद्वाक्यभेदः प्रसज्यते । तस्मात्सर्वार्थतैव ॥ १८ ॥

## वसुमतीमित्यवस्थायेत इन्द्र इति जुहोत्युत्तराघारम् ॥ १९ ॥

अवस्थानवचनमुपवेशननिषेधार्थम् । जुहोतित्वादूध्युपवेशनं प्राप्नोति । अतो वचनात्तिष्ठति क्रियोच्यते । तिष्ठं स्तमाघारयति यं वा व आघारयतीति श्रूयते । अत एव च दर्विहोमेष्वपि तिष्ठतैवोत्तराघारआघार्यते । मन्त्रवर्णाच्चेन्द्रोदेवता ततश्च दर्विहोमेष्विन्द्राय स्वाहेति होमः । दक्षिणतश्च होमोऽस्य दक्षिणतस्तिष्ठन्नाघारयतीति वचनात् । पूर्वाघारे तु जुहोति स्थानादेवोत्तरत आघारणं सिद्धम् । आघारौ प्रकृत्य स यदुभयत आघारयतीनि हि श्रूयते । स चायं पदार्थत्वाद्यावदुक्ते निवर्त्तते । प्रयाजार्थद्रव्येण वचनसामर्थ्यात्क्रियते । चतुर्गृहीतं वा एतदभूत्तस्याघारमाघार्यत्रिरितः प्राचीनं प्रयाजान्यजतीति । प्रयाजार्थता चास्य वाचनिकी । स यच्चतुर्जुह्वां गृह्णाति प्रयाजेभ्यो हि तद्गृह्णातीति । एवं

च प्रयाजार्थद्रव्याभावे ऽवश्यकर्त्तव्यत्वादाघारस्य स्थाल्यादेवैकगृहीतेन निर्वर्त्त्यते । यथा दर्विहोमेषु ॥ १९ ॥

आघारयास्रंस्पर्शयन् स्रुचावेत्य जुह्वा ध्रुवाꣳ समनक्ति संज्योतिषेति ॥ २० ॥

जुहोत्युत्तराघारमिति क्रियानिर्देशादवाच्यमाघारयेति । उच्यते । ऋज्वाद्यर्थोयमारम्भः । श्रूयते हि जुमाघारयति तथा सन्ततं दीर्घं प्राञ्चमिति । असंस्पर्शयन्नसंलागयन् स्रुचावेत्य यजति स्थानात् जुह्वा ध्रुवाꣳ समनक्ति संज्योतिषेत्यनेन मन्त्रेण । गच्छतामित्यध्याहारः । यद्यपि जुह्वा श्रूयते तथाप्यञ्जनक्रियोपदेशसामर्थ्याज्जौहवपरतैव न्याय्या । ननु चैवं सति जौहवेनानक्तीति सूत्रमारब्धव्यम । नेत्याह । तथा च सति स्रुवस्य करणता स्यात् । अथ पुनर्जुह्वेत्युक्ते तस्याएव करणतेति साधूक्तम । स चायं ध्रुवासंस्कारोप्युत्तराघारे सति प्रवर्त्तते । एवं ह्याह । शिरो वै यज्ञस्योत्तर आघार आत्मा वै ध्रुवा तदात्मन्येवैतद्यज्ञस्य शिरः प्रति दधातीति ॥ २० ॥

निधायेध्मसन्नहनान्यादाय ओश्रावयेत्याह ॥ २१ ॥

निधाय स्रुचाविध्मसन्नहनानि गृहीत्वोश्रावयेत्येवमाह । स्रुङ्निधानं च वाचनिकम । इतरथा हि युक्तयोराप्रयोजनाभिनिर्वृत्तेर्विमोकः स्यात् । एवं च सति स्विष्टकृदन्तेपि निधानोपदेश उपपद्यते । निधाय सञ्चरमभ्युक्ष्य प्राशित्रमवद्यतीति ॥ २१ ॥

अस्तु श्रौषडित्यग्नीत् ॥ २२ ॥

अस्तु श्रौषडित्येवं पुनरग्नीदाह ॥ २२ ॥

वेदिबर्हिरिध्मशकलमपच्छिद्यैके ॥ २३ ॥

आश्रावणं कुर्वन्ति । एवं ह्यत्र वचनम । तद्धैके वेदे स्तीर्णायै बर्हिरभिपद्याश्रावयन्तीध्मस्य वा शकलमपच्छिद्याभिपद्याश्रावयन्तीति । एवं च इध्मशकलस्यापच्छेदो बर्हिषस्त्वभिपत्तिमात्रमेव ॥२३॥

एवं सर्वत्राश्रुतप्रत्याश्रुतेषु ॥ २४ ॥

उपग्रहद्रव्याणीति केचित् । तदयुक्तम् । न ह्याश्रावणमात्रे विधानमेषामिति । होतृवरणे तु विधानमेषाम् । इदं वै किञ्चिद्यज्ञस्येदं यज्ञमभिपद्यथ होतारं प्रवृणा इति । तस्मादेवं सर्वत्राश्रावणे ध्वर्युः प्रत्याश्रावणे चाग्नादिति । तथा च लिङ्गमाश्रावयत्यध्वर्युस्तदग्नीधं यज्ञ उपावर्त्तते सोग्नीन्नापव्याहरेदाप्रत्याश्रावणात् । प्रत्याश्रावयत्यग्नीत्तत्पुनरध्वर्युं यज्ञ उपावर्त्तत इति अध्वर्य्वग्नीधोराश्रुतप्रत्याश्रुते दर्शयति ॥ २४ ॥

अथ प्रवृणीतेग्निर्देवो दैव्यो हेता देवान्यक्षद्विद्वांश्चिकित्वान्मनुष्वद्भरतवत् ॥ २५ ॥

अथेत्यवाच्यं पाठादेव तदर्थप्राप्तेः । तेन वरणे यजमानस्य प्राप्तत्वादध्वर्य्वर्थोयमथ शब्द इति केचित् । तदेतदनुपपन्नम् । आनत्यर्थे हि वरणे यजमानः परिभाषितो नादृष्टसंस्कारर्थे । न चैतदानत्यर्थम । प्रवृत्तत्वाद्धोतुः । अतो यजमानस्याप्रवृत्तिरेव । अथ शब्दप्रयोगस्तर्हि किमर्थः । इध्मसन्नहनादि गृहीत्वाश्रवणं कृतम । तच्च तावन्मात्र एव माभूत् । अत उपग्रहद्रव्यस्योत्तरत्रानुकर्षणार्थोऽथ शब्दः । अथ प्रवृणीते गृहीतेनैवेध्मसन्नहनादिना प्रवृणीते इत्येतदुक्तं भवति । तदर्थमेव ह्युपग्रहद्रव्यं श्रूयते । इदं वै किञ्चिद्यज्ञस्येदं यज्ञमभिपद्याथ होतारं प्रवृणा इति । अथ वा श्रुतप्रत्याश्रुतयोः वरणार्थत्वज्ञापनायाथ शब्दः । स वै प्रवरायाश्रावयतीति हि श्रूयते । अग्निर्देवो दैव्य इति देवताग्नेरभिधानं स्यात्प्रकृतत्वात् । न वा सविशेषणत्वात् । होतृपदोपसंहितो ह्ययमग्निशब्दः । तेन स्विष्टकृदग्न्यभिधायकः स्यात् । दृश्यते हि तत्र होतृपदोपसन्नहनमावाहने प्रयाजाज्यभागप्रधानदेवतासङ्कीर्त्तनोत्तरकालम । अग्निं होत्रायावहेति तदग्निं होत्रायावोढवा आहेति । तथा स्विष्टकृति यक्षदग्नेर्होतुः प्रियाधामानीति प्रकृत्याह । तदस्मा एतां देवा आहुतिं कल्पयित्वा थेनेनैतद्भूयः समशाम्यन्निति स्विष्टकृदग्नेर्ह्याहुतिः परिकल्पिता । अतो होतृतदोपसंहितः स्विष्टकृदग्निः । तथा सूक्तवाके अग्निर्होत्रेणेदं हविरजुषतावीवृधतेति । तदेतन्नोपपद्यते । स्विष्टकृदग्नेरप्रकृ-

त्त्वात् । न हि स्विष्टकृत्मन्त्रोयम् । किं च होतृसंस्काराभिप्रवृत्तेः । तेनाग्निर्देवो दैव्यो होता स होतर्यध्यारोप्यते तदभिष्टवाय । एवं प्रकृतवस्त्वभिधायकत्वं मन्त्रस्याभ्युपगतं भवति । इतरथा ह्यप्रकृतवस्त्वन्तरार्थता प्रकृतवस्त्वभिधायकत्वैकवाक्यत्वे सत्ययुक्तापद्यते । किं च एकवाक्यतानुपपत्तेः । न ह्यग्न्यभिधायकत्वे एकवाक्यतोपपद्यते । देवान्यक्षद्विद्वांश्चिकित्वानिति प्रकृत्य भरतवदित्याह । भरतश्चाग्निरभिधीयते । एष हि देवेभ्यो हव्यं भरतीति । न चाग्निवदग्नेर्यष्टृत्वं सम्भवति । होतुस्तु सम्भवत्यग्निवद्यष्टृत्वम् । तेनाग्न्यभिधायकत्वे भरतवदिति दृष्टान्तानुपपत्तिः । किं च ब्रह्मण्वदिति च नोपपद्यते । उक्तेनैव न्यायेन ब्रह्म ह्यग्निरित्याह । एवं सति सर्वपदानां सामञ्जस्येनैकवाक्यता । तस्मान्न स्विष्टकृदग्न्यभिधानार्थमिदमुच्चारणमिति । चिन्तायाः प्रयोजनं प्रधानदेवताभिधायकत्वे आग्नेयविकारे सौर्यादौ विपरिणामः । स्विष्टकृदग्न्यभिधायकत्वेऽवभृथेष्ट्याम् । अस्मदभिप्राये त्वविकृत एव सर्वत्र प्रयुज्यते ॥ २५ ॥

अमुवदमुवदिति यजमानार्षेयाण्याह परस्तादर्वाञ्चि त्रीणि ॥ २६ ॥

अमुवदिति आर्षेयोच्चारणम् । त्रीणीति कुतः । त्रीन्वृणीत इति वचनात् । इदं हि पितैवाग्रेथ पुत्रोथ पौत्र इति लिङ्गात् । यजमानग्रहणं च ऋत्विगार्षेयव्युदासार्थम् ॥ २६ ॥

यावन्तो वा मन्त्रकृतः ॥ २७ ॥

वा शब्दः पक्षान्तरपरिग्रहे । यावन्तो वा मन्त्रकृतस्तावन्तो नियमेनैव । यावन्ति यस्य प्राप्नुवन्ति तावन्ति प्रवृणीते न त्रीणीति । तत्कथं आर्षेयं प्रवृणीत इत्येषोत्र विधिः । एकं वृणीते द्वौ वृणीते त्रीन् वृणीत इत्यनुवादः । तथा न चतुरो वृणीते न पञ्चातिवृणीत इति । आर्षेयाणि ह्येकत्वद्वित्वत्रित्वपञ्चत्वपरिच्छिन्नानि प्रावरिकायां पठ्यन्ते । तेनार्षेयं वृणीत इतीयतैव यावन्ति यस्य प्राप्नुवन्ति तावन्त्येव क्रियन्ते । त्रित्वविधानं तु केवलमेकत्वद्वित्व-

योरवयुत्यवादसम्भवमात्रादेवाभ्युपेयते[1] । मन्त्रकृतो मन्त्रदृश उच्यन्ते । न हि मन्त्राणां करणं भवति । अनित्यत्वप्रसङ्गात् । तेन दर्शनार्थः कृञिति व्यवसीयते । दृश्यते चानेकार्थता धातूनाम् । गन्धनावक्षेपण सेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञ इति आत्मनेपदप्रतिपादने गन्धनादीनर्थान् कृञो दर्शयति ॥ २७ ॥

[2]पुरोहितार्षेयेण वा ॥ २८ ॥

तच्चैतद्राजविषयम् । पुरोहितोपपत्तेः । तथाचोत्तरसूत्रम् ॥२८॥

क्षत्रियवैश्ययोश्च नित्यम् ॥ २९ ॥

क्षत्रियोभिषेकक्रियारहितोभिप्रेतोधस्तनसूत्रारम्भवैयर्थ्यप्रसङ्गात् । अनयोर्नित्यं पुरोहितार्षेयोच्चारणं, राज्ञस्तु विकल्पः ॥ २९ ॥

मनुवदिति वा सर्वेषाम् ॥ ३० ॥

ब्राह्मणादीनां मनुवदिति प्रवरणम् । तच्च सकृदेवाभ्यासे कारणाभावात्[3] । यच्चोक्तमिदं हि पितैवाग्रेथ पुत्रोथ पौत्र इति तत्प्रदर्शनार्थम् ॥ ३० ॥

[4]ब्रह्मण्वदा च वक्षद्ब्राह्मणा अस्य यज्ञस्य प्रा-

---

१ अत्र ' ऊर्ध्वज्ञुमासीनः होतारं वृणीते मनुष्वद्भरतवदमुवदिति यथार्षेयो यजमानस्त्रीण्यथ ऽऋषि मन्त्रकृतो वृणीते ऽपि वा एकं द्वौ त्रीन् पञ्च न पञ्चातिवृणीते ' इत्यापस्तम्बवचनमप्यनुकूलम् ।

२ राज्ञो यजमानस्य पुरोहितार्षेयाणि स्वकीयानि वा वृणीत इत्यर्थः ।

३ आपस्तम्बः ' पुरोहितस्य प्रवरेण राजा वृणीते ' इति, ' अपि वा नार्षेयं वृणीते मनुवदित्येवं ब्रूयात् ' इति च । मनुः 'यद्यब्राह्मणो यजेत पुरोहितस्य प्रवरेण प्रवृणीयात् ' इति ।

४ आर्षेयो च्चारणादनन्तरं ब्रह्मण्वदित्यादिकं मन्त्रशेषं ब्रूयात् । तदन्तेऽसौ मानुष इत्यत्रासावित्यस्य पदस्य स्थाने अमुकशर्मेति होतुर्नाम ग्रहणं कुर्यात् ।

पितारोऽसौ मानुष इति होतृनामग्रहणम् ॥३१॥

ब्रह्मण्वदित्यारभ्य होतृनामग्रहणान्तो मन्त्रः ॥ ३१ ॥

उपांशु वा ॥ ३२ ॥

होतृनामग्रहणं भवति। एवमपि हि श्रूयते। तच्चैतद्धोतृवरणमदृष्टसंस्कारस्तथा च यावदुक्तेपि प्रवर्त्तते ॥ ३२ ॥

सम्मृष्टा उपविशतः ॥ ३३ ॥

अथाध्वर्युं चाग्नीधं च सम्मृशतीति सम्मर्शनविधानात्। तावेवोपविशतः सन्निधानात् ॥ ३३ ॥

अग्निर्होतेति स्रुगादापनं प्रयाजेषु सन्निधेः ॥३४॥

स्रुगादापनविधानसामर्थ्यात्। १सर्वत्र परिप्राप्ताविदमुच्यते। सन्निधानात्प्रयाजार्थस्रुगादापनविषयतैवास्य वाक्यस्य। एवं च सति पशावेकादशप्रयाजोत्कर्षे पुनरुच्चारणम् ॥ ३४ ॥

घृतवतीमित्युक्ते स्रुचावादायातिक्रम्याश्राव्याह समिधो यजेति पञ्च प्रयाजान्समिद्धतमे ॥ ३५ ॥

घृतवतीमित्यस्मिन्सकले मन्त्रवाक्ये उक्ते स्रुचौ गृहीत्वातिक्रम्याश्रावयति। ततश्च पुरोनुवाक्याभावः। अथ यदपुरोनुवाक्याः प्रयाजाभवन्तीति श्रूयते। पञ्चग्रहणं कर्मभेदज्ञापनार्थम्। पञ्च ह्येतानि कर्माणि। समिद्धहोमेन ह्येवसमृद्धा आहुतय इति वचनात् समिद्धतम इत्युक्तम् ॥ ३५ ॥

यज यजेति शेषम् ॥ ३६ ॥

समिधो यजेति हि प्रथममुक्तम्। शेषं यज यजेत्येव वक्तव्यम्। अथ यज यजेत्येवोत्तरानाहेति वचनात् ॥ ३६ ॥

---

१ अन्वर्थसंज्ञाविज्ञानात् सर्वत्र प्राप्नोति तेन प्रयाजेष्विति नियम्यते; समाख्यातः सन्निधेर्बलवत्त्वादित्याशयः।

[1]ध्रुवस्तिष्ठन् ॥ ३७ ॥

इति वचनम् । अभिक्रमणमुत्तरसूत्रे वक्ष्यति ॥ ३७ ॥

[2]पूर्वं पूर्वं वाभिक्रामम् ॥ ३८ ॥

णमुलयं ततश्चाभिक्रम्याभिक्रम्येति द्रष्टव्यम् । तस्मादभितरामभितरामेव क्रामेदभितरामभितरामाहुतीर्जुहुयादिति । तेन ध्रुवपक्षे समिद्धतमे, अभिक्रमणपक्षे पूर्वे पूर्वमिति ॥ ३८ ॥

उपभृतो जुह्वामानयत्यनवमृशंश्चतुर्थम् ॥ ३९ ॥

चतुर्थं प्रयाजं प्रति उपभृतो जुह्वामानयति । तच्चानवमृशन् स्रुचौ । स वा अनवमृशन्समानयतीति [3] ॥ ३९ ॥

अधिकारमुपजीवन्नाह--

एवं प्रवृद्धौ ॥ ४० ॥

प्रयाजप्रवृद्धौ चतुर्थे चतुर्थे समानयति[4] ॥ ४० ॥

अनुयाजेषु ॥ ४१ ॥

चैवमेव प्रतिपत्तव्यम ॥ ४१ ॥

---

१ एकस्मिन् स्थाने स्तम्भ इव तिष्ठन् पञ्च प्रायाजान् यजति, अपक्रमणकारणे सत्यपि नापक्रामेदिति भावः। अत्र 'सर्वान्वैकध्यम' इत्यापस्तम्बसूत्रमुपोद्बलकम ।

२ अभिक्रम्याभिक्रम्याहवनीयसंमुखं गमनं कृत्वा पूर्वे पूर्वे प्राक्संस्थपङ्क्त्या पञ्चापि प्रयाजान् पृथक् पृथक् स्थाने जुहोतीत्यर्थः । 'पञ्च प्रयाजान् प्राचः प्रति दिशं वा, सामिधः पुरस्तात्तनूनपातं दक्षिणत इडः पश्चाद्बर्हिरुत्तरतः स्वाहाकारं मध्ये' इत्यापस्तम्बसूत्रे ।

३ आपस्तम्बः ' त्रीनिष्ट्वार्धमौपभृतस्य जुह्वामानीय प्रत्याक्रम्य शेषेण ध्रुवामभिघार्यानुपूर्वं हवींष्यभिघारयन्त्युपभृतमन्तत " इति ।

४ अत एव 'चतुर्थसप्तमदशमेषु समानयन्ति' इति याज्ञिकोक्तिः ॥

उत्तरां जुहूमध्युह्य प्राचीमवहृत्य जुहोति ॥ ४२ ॥

उत्तरैव जुहूरित्यवाच्यं उत्तरामिति। तेनोत्तरां प्राचीमवहृत्येति सम्बन्धः। इत्थमेव कुर्यात् प्राचीमेव स्रुचमुपावहृत्येति हि श्रूयते। अध्युह्याध्युह्य जुहोति न सकृदवतारितया। हुत्वा तेनैवाधिहृत्योपभृत्यधिनिदध्यादिति वचनात् ॥ ४२ ॥

एवꣳ सर्वत्र ॥ ४३ ॥

न प्रयाजमात्र एवैतत्। न हि प्रयाजान् प्रकृत्य श्रूयते इदम्। होममात्रोद्देशेन च श्रवणम्। अथ तौ होमस्यैवेति प्रकृत्यैतच्छ्रूयत इति ॥ ४३ ॥

नाभिदेशे धारणम् ॥ ४४ ॥

प्रकृतयोर्जुहूपभृतोः। अथातोधारणस्यैवेति हि प्रकृत्यामनन्ति। अथ हैष मध्यमः प्राणस्तस्मादुतमुपन्यच्यवैवे धारयेदिति। सर्वत्र शब्दश्चानुवर्त्तते। तथा च सर्वविषयमेतद्धारणं भवति न प्रयाजेष्वेव। अनारभ्य ह्येतत्पठ्यते ॥ ४४ ॥

प्रयाजानुमन्त्रणमेको ममैका तस्य योस्मां-
द्वेष्टि यं च वयं द्विष्म इति ॥ ४५ ॥

प्रयाजे इष्टे सत्यनुमन्त्रणं कर्त्तव्यम्। एको ममेति। तच्चैतद्याजमानं अकरणत्वात्। आत्माभिवादिपदसम्बन्धे सत्यप्याशीर्योगाभावात् अनेकयाजमानके कर्मण्यविपरिणामः ॥ ४५ ॥

एवं मिथुनैर्यथासंख्यम् ॥ ४६ ॥

उत्तरत्र यथा संख्यमेवमनुमन्त्रणानि कार्याणि। एवं ह्याम्नायते। तस्मात्प्रथमे प्रयाजे इष्टे ब्रूयादेको ममेति, तथा द्वौ ममेति द्वितीये प्रयाजे, त्रयो ममेति तृतीये प्रयाजे इत्येवमादि। तदेवमर्थम्। लाघविक आचार्यः सूचयत्येवं मिथुनैर्यथा संख्यमिति ॥ ४६ ॥

न तस्य किंचनेति पञ्चमे ॥ ४७ ॥

पञ्च मम न तस्य किं चनेत्येवं पञ्चमे प्रयाजे प्रयोगः ॥ ४७ ॥

त्विषिमानपचितिमान्यशस्वी ब्रह्मवर्चस्यन्नाद इति च ॥ ४८ ॥

एतैश्च यथा संख्यमनुमन्त्रयीत साकाङ्क्षत्वात् । अभूयासमिति प्रति पदमध्याहारः । स च श्रुतावभिहित एव । प्रथमं प्रयाजमनुमन्त्रयेत् त्विषिमान् भूयासमिति । पूर्वस्माच्चैतदनुमन्त्रणं भिद्यते । पृथग्विधानसामर्थ्यात् । प्रयोजनं संहितावत्प्रयोगः । त्विषिमान्भूयासमित्येवमाद्याशीर्योगसामर्थ्यादनेकयजमानके विपरिणम्यते । अनुमन्त्रणस्य चासन्निपातात्प्रोषितोपि यजमानः करोति ॥ ४८ ॥

आगन्तूनां चतुर्थपञ्चमाभ्यां स्थानात् ॥ ४९ ॥

नव प्रयाजान्यजतीत्येवमादौ प्रयाजधर्मपरिप्राप्तौ सन्देहे इदमारभ्यते । आगन्तूनां चतुर्थपञ्चमाभ्यां यो धर्मः प्राप्तस्तेन सम्बन्धं कुर्यात् । स चानुमन्त्रणस्थानादिकः । कुत एतत् । स्थानात् । क्रमादित्यर्थः । चतुर्थपञ्चमयोर्ह्यन्तराले आगन्तवः पठ्यन्ते । अतश्च सन्निधानात्तद्धर्मसम्बन्ध इष्यते । धर्मापेक्षायां हि सन्निहितव्यतिक्रमे कारणं नास्ति ॥ ४९ ॥

प्रथमचतुर्थाभ्यां वा यथालिङ्गम् ॥ ५० ॥

प्रथमचतुर्थयोर्वाधर्मेण सम्बन्धः कर्त्तव्यो लिङ्गात् । यो बहुदेवत्यस्तस्य प्रथमधर्म य एकदेवत्यस्तस्य चतुर्थधर्मः इति । लिङ्गं ह्यत्र पर्युपस्थापकम् । ननु चैवं सतिद्वितीयतृतीययोरप्यविशेषाद्धर्मप्रवृत्त्या भवितव्यम् । नेत्युच्यते । प्रथमचतुर्थयोर्हि कारणमन्यदप्यस्ति । एकत्र प्राथम्यमितरत्रानन्तर्यम् ॥ ५० ॥

[१]सर्वान्वोत्तमेनोपायित्वात् ॥ ५१ ॥

अथ वा उत्तमधर्मेण सर्वान् सम्बध्नीयात । कुत एतत् । उपायित्वात् । तमेव पञ्चमं होतव्यं प्रति तत्साकल्यसञ्जननाय उपायिन

---

१ सिद्धान्तमाह ।

आगन्तवः । कथमवगम्यते । येन नव प्रयाजान्यजतीत्यत्राभ्यासेन संख्यापूरयितव्या । न हि नवैतानि कर्माणि । उत्पन्नसंयोगात्संख्यायाः । एवं च सति न्यायादन्त्यस्याभ्यासः प्राप्नोति । न हि पूर्वाभ्यासो युज्यत इत्यन्त्यस्याभ्यासोयम् । तेन पञ्चमधर्मसम्बन्ध एवात्र युज्यते१ ॥ ५१ ॥

एत्य जुह्वाभिघारणं ध्रुवाया हविष उप-
भृतश्च ॥ ५२ ॥

सन्निधानाद्यजति स्थानस्थितस्यैवाभिघारणं मा भूदित्यत एत्येत्युच्यते । ध्रुवादीनामुच्चारणं स्थाल्युदासार्थम् । तत्कथं, न हि स्थाल्यामभिघारणस्य प्राप्तिरस्ति । उत्तमप्रयाजसङ्कीर्त्तितदेवतासम्बद्धहविरभिघारणमत्रेष्यते । तच्च ध्रौवं पुरोडाशावौपभृतं च । एवं ह्यत्र वाक्यशेषस्त उत्तमे प्रयाजे स्वाहाकारेणैव सर्वं यज्ञं समस्थापयन्निति प्रकृत्याग्न्यादयः सङ्कीर्त्तिताः । ततश्चात्रैव सर्वयागपरिसमाप्त्यायातयामानि हवींषि संवृत्तानीति । पुनराह ते देवा अकामयन्त कथं त्विमं यज्ञं पुनराप्याययेमेति प्रकृत्य स यज्जुह्वामाज्यं परिशिष्टमासीद्येन यज्ञं समस्थापयंस्तेनैव यथापूर्वं हवींष्यभ्यघारयन्निति । ततश्च स्थाल्या अनभिघारणम् । हविः शब्दश्चात्र गोबलीवर्दन्यायेन पुरोडाशयोर्वर्त्तते । अत्रैतद्विचार्यते । किं हविः संस्कारोयमुत प्रयाजशेषप्रतिपत्तिः? किं तावत् प्राप्तम् । हविः संस्कारोयं द्वितीया निर्देशात् । द्रव्ये च तृतीया श्रूयते । प्रयाजशेषेण हवींष्यभिघारयति । लिङ्गञ्च । पुनरेवैतानि तदाप्याययत्ययातयामानि करोतीति । प्रयाजशेषप्रतिपत्तिर्वा दृष्टार्थत्वात् । दृष्टो ह्यत्रार्थो जुह्वारिक्तता । तया ह्याज्यभागाविज्येते । अतस्तद्द्रव्यसंसर्गाभावे दृष्टार्थता । इतरथा हि हविरभिघारणाददृष्टं कल्प्येत । तच्चान्याय्यं दृ-

---

१ एवं च नवैकादशप्रयाजादावपि 'पञ्चमम न तस्य किञ्चन योस्मान् द्वेष्टि यञ्च वयं द्विष्मः अन्नादो भूयासम्' इत्येवानुमन्त्रणम् । अत्र तनूनपान्नाराशंसयोर्विकल्पः, शतपथे विशेषाश्रवणेपि शाखान्तरे विशेषश्रुतेः ।

ष्टे सति । यदुक्तं हविषि द्वितीया द्रव्ये च तृतीया । तत्रापि वस्तुबला तृतीया द्वितीयार्थे, द्वितीया च सप्तम्यर्थे, सुपां सुपो भवन्तीति । लिङ्गं त्वर्थवादप्रायम । चिन्तायाः प्रयोजनम् । हविः संस्कारे पशुपुरोडाशाभिघारणार्थः प्रयाजशेषः स्थापयितव्यः । शेषप्रतिपत्तौ सन्निहितेष्वेव कार्यं इति ॥ ५२ ॥

आज्यभागाभ्यां चरत्याग्नेयेन सौम्येन ॥ ५३ ॥

आज्यभागाविति कर्मणोः संज्ञा । असौ च संव्यवहारार्था आज्यभागप्रभृतीडान्त्यमेक इत्येवमाद्यर्था । ताभ्यां चरति । चरति रनुष्ठानार्थः । तावनुतिष्ठतीत्यर्थः । स चैक आग्नेयो ऽपरः सौम्यः । अग्निदेवत्य आग्नेयः । सोमदेवत्यश्च सौम्यः । स्मर्यते हि देवता तद्धितो ऽग्नेर्ढक् सोमाद्यणिति च । आग्नेयमस्मिन् कर्मणि द्रव्यमित्याग्नेयः । एवं सौम्यः ॥ ५३ ॥

चतुरवत्तं सवषट्कारासु ॥ ५४ ॥

सवषट्कारास्वाहुतिषु चतुरवत्तं होतव्यम् । चतुरवत्तं जुहोतीति हि श्रूयते ॥ ५४ ॥

अनिधायावदायावदाय ध्रुवामभिघारयति, आप्ययतां ध्रुवा हविषा घृतेन यज्ञं यज्ञं प्रति देवयद्भ्यः सूर्यायाऊधो अदित्या उपस्थ ऊरुधारा यज्ञे अस्मिन्निति ॥ ५५ ॥

अनेन मन्त्रेण । अनिधाय स्रुचावित्युच्यते । वाचनिको हि तयोर्विमोकः । ते एतच्छिष्टकृति विमोचनमागच्छत इत्यादि । अवदायावदायेति वीप्सा प्रति स्रुवविषया । चतुरवत्तविषयत्वे ह्यनुपपत्तिः । आहवनीययजतयो ध्रुवाया इति परिभाषितम् । अतस्तदभिघारणमुच्यते । आज्यभागयोर्यजति त्वाद्याज्यापुरोनुवाक्यावत्व म । अनुवाक्या च प्रेषितेनानूच्यते । तत्रैतत्सन्दिह्यते । किमवदानोत्तरकालमनुवाचनमुत सहाहोस्वित्पूर्वमिति? । न चेहाचार्येण वि-

शेषः प्रदर्शितः । किं तु विकृतावनुप्रवृत्तिर्दृश्यते । पशौ गृहीत्वानुवाचनम् । तत्पुरोडाशे च सहानुवाचनम् । अवद्यन्त हीन्द्राग्निभ्यामिति । क्वचिच्च पूर्वानुवाचनम् । यथावरुणप्रघासेषु मारुत्यां, सव्येन स्रुचौ गृहीत्वेति । तत्र पूर्वानुवाचनमेवयुज्यते । तस्य हि विकृत्यनुप्रवृत्तिदर्शनं मारुत्यामित्युक्तम् । नन्वितरयोरप्यस्ति । सत्यमेवम् । तत्तु वाचनिकम् । अस्यापि वाचनिकत्वमिति चेत् । न वचनस्यान्यपरत्वात् । वास आलम्भोत्र विधीयते । स चाप्राप्तस्तस्मात्पूर्वानुवाचनं प्रकृतितः प्राप्तमेवानूद्यत इति । पशुपुरोडाशादौ त्वनन्यपरत्वात् वचनस्य सहानुवचनादि परैव । तस्मात्पूर्वमनुवचनम् । ततोवदानं । पुनरतिक्रम्य प्रवचनमिति । तदपि प्रदर्शितमाचार्येणातिक्रम्याश्राव्याह समिधो यजेत्येवमादौ १सर्वयजतिष्वेष क्रम इति ॥ ५५ ॥

अनुब्रूहीत्युक्त्वा नापव्याहरेद्धोता चाश्रावणात् ॥ ५६ ॥

अनुवचनोत्तरकालमध्वर्युर्नापव्याहरेत्, होता चाश्रावणं यावत् ॥ ५६ ॥

२आश्राविते ग्नीदाप्रत्याश्रावणात् ॥ ५७ ॥

प्रत्याश्रावणमस्तु श्रौषडिति । आ तत इत्येतदुक्तं भवति ॥५७॥

---

१ आपस्तम्बः ' आग्नेयः सौम्यश्चाज्यहविषा चाज्यभागौ चतुर्गृहीताभ्यां जमदग्नीनां तु पञ्चावत्ताभ्यामथ जामदग्न्यो जामदग्न्यमामन्त्र्य पञ्चावत्तं कुर्वीति सर्वत्रावद्यन्नमुष्मै अनुब्रूहीति पुरोनुवाक्यां सम्प्रेषयत्यवदायावदाय स्रुवेण प्रस्तरबर्हिः समज्य जुहूपभृतावादाय दक्षिणातिक्रम्याश्राव्य प्रत्याश्राविते ऽमुं यजेति याज्यामिति सार्वत्रिकम ' इति ।

२ अध्वर्युणा आश्रावणे कृते आ प्रत्याश्रावणमग्नीन्नापव्याहरेत् । ' ओश्रावय ' ' अस्तु श्रौषड् ' इत्यनयोरन्तरा नापव्याहरणमग्नीध इति ।

प्रत्याश्राविते ध्वर्युराहोतृप्रैषात् ॥ ५८ ॥

यजेति होतृप्रैषः, आ ततो नापव्याहरेदिति ॥ ५८ ॥

होता वषट्कारात् ॥ ५९ ॥

नापव्याहरेदिति वर्त्तते । सोनुब्रूहीत्येवोक्त्वाध्वर्युर्नापव्याहरेदिति प्रक्रम्यैतच्छ्रूयते ॥ ५९ ॥

सोमे च ग्रहं गृहीत्वोपाकरणात् ॥ ६० ॥

सोमे चाध्वर्युर्ग्रहं गृहीत्वा नापव्याहरेदास्तोत्रोपाकरणात् ॥ ६० ॥

उपाकृत उद्गातार आ होतृप्रैषात् ॥ ६१ ॥

उपाकृते स्तोत्रे उद्गातारो नापव्याहरेयुराहोतृप्रैषात् । होतृप्रैष उत्तमस्तोत्रीयायाः प्रस्तावसमनन्तरं एषोत्तमेति येन होता सम्बोध्यते ॥ ६१ ॥

१होता वषट्कारात् ॥ ६२ ॥

नापव्याहरेदिति वर्त्तते । कियन्तं कालम् । आ ग्रहसम्बद्धहोमवषट्कारात् । अथ सौम्येध्वरे स वै ग्रहं गृहीत्वाध्वर्युर्नापव्याहरेदिति प्रकृत्यैतदपि हि श्रूयते ॥ ६२ ॥

आग्नेयमुत्तरापूर्वार्द्धे दक्षिणपूर्वार्द्धे सौम्यम् ॥ ६३ ॥

आग्नेयमाज्यभागमुत्तरपूर्वार्द्धे जुहोति। दक्षिणपूर्वार्द्धे सौम्यं ॥ ६३ ॥

समिद्धतमे वा ॥ ६४ ॥

उत्तरार्द्धपूर्वार्द्धे हैकं आग्नेयमाज्यभागं जुह्वतीति प्रक्रम्यैतच्छ्रूयते ॥ ६४ ॥

हविर्भ्यां च ६५ ॥

---

१ सूत्रे होतृग्रहणं सकलशस्त्रकर्तॄणामुपलक्षकम्, तेन प्रशास्त्रादयोपि एषोत्तमेति प्रैषोत्तरं शस्त्रव्यतिरिक्तं किमपि न ब्रूयुः ।

चरतीति वाक्यशेषः । समिद्धतम इति च । समिद्धहोमेन ह्येव समृद्धा आहुतय इति श्रूयते ॥ ६५ ॥

पुरोडाशावन्तरेणाग्नीषोमा उपाꣳश्वाज्यस्य ॥ ६६ ॥

पुरोडाशयागयोर्मध्ये उपाꣳश्वाज्यस्याग्नीषोमौ यजति । अत्र पुरोडाशाविति द्वितीयोपपदविभक्तिः१ ॥ ६६ ॥

विष्णुर्वामावास्यायाꣳ हौत्राम्नानात् ॥ ६७ ॥

अमावास्यायां विष्णुर्वेज्यते अग्नीषोमौ वा । एवं हि होत्रे आम्नायते । वैष्णवश्चेदिदं विष्णुरिति२ ॥ ६७ ॥

यावद्धविरुत्तरार्द्धात्स्विष्टकृत् ॥ ६८ ॥

यावन्ति हवीꣳषि सर्वेषामुत्तरार्द्धात्स्विष्टकृदिज्यते । सम्प्रतिपन्नदेवतैकत्वाच्च सकृत्प्रक्षेपः । प्रतिपत्त्यर्थकर्म चैतदुत्तरार्द्धात् प्रतिपाद्यते । यागश्च निर्वर्त्यते । अत एव च यावदुक्तेपि प्रवर्त्तते॥६८॥

तत एव होमः ॥ ६९ ॥

---

१ अयं क्रमः, आग्नेय आज्यभागो ध्रुवातश्चतुर्गृहीतेन, सौम्य आज्यभागोऽपि, आग्नेयेन पुरोडाशेन यागः तत्राग्नये ऽनुब्रूहीत्यनुवाचनम् जुह्वां ध्रुवाया स्रुवेणाज्यं गृहीत्वोपस्तारः, आज्यस्थाल्या सकाशाद्ध्रुवाया अभिघारणम् पुरोडाशमध्यादङ्गुष्ठपर्वमात्रं तिरश्चीनमवदानं ग्राह्यम् द्वितीयं पूर्वार्धात् पश्चावत्तिनस्तृतीयं पश्चार्धात् ध्रौवेणोपर्यभिघारः पुनर्ध्रुवाया आप्यायनम् आज्यस्थाल्याज्येनावत्तस्य हविषोऽवदानयोः प्रत्यभिघारः अतिक्रम्याश्राव्याग्निं यजेत्युक्त्वा वषट्कृते सह वा स्रुक्पार्श्वेनहोमः, आज्यभागवत् ध्रुवातश्चतुः पञ्चकृत्वो वावदायोपांशुयागः, आग्नेययागवत् द्वितीयेन पुरोडाशेनाग्नीषोमीययागः स्विष्टकृदिति देवभाष्ये ।

२ व्यवस्थितोऽयं विकल्पः संनयतोऽग्नीषोमौ असंनयतो विष्णुरिति, शाङ्खायनः ‘ ऐन्द्रं सान्नायं संनयतो माहेन्द्रं वा ; वैष्णवं त्वसंनयन्नुपांशुयाजम्, इति ।

उत्तरत एव होमो भवति । शेषात्स्विष्टकृते समवद्यतीत्येतदुक्तम् ॥ ६९ ॥

उपांशुयाजशेषादपि ध्रौवात्स्विष्टकृदवदाने प्राप्त आह—

नाज्यादशेषात् ॥ ७० ॥

न स्विष्टकृदर्थमवदानं ध्रौवादाज्याद्ग्रहीतव्यम् । कुत एतत् । अशेषत्वात् । न ह्येतच्छेषभूतम् । ननूपांशुयाजनिर्वृत्त्युत्तरकालं शेषव्यपदेशोऽस्येति । नेति ब्रूमः । न ह्येतदुपांशुयाजायैव गृह्यते । सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यमिति । न च सर्वार्थस्यैकदेशे निवृत्ते शेषव्यपदेशोऽस्ति१ ॥ ७० ॥

असꣳसृष्टामाहुतिभिः ॥ ७१ ॥

स्विष्टकृदाहुतिं जुहोतीति वाक्यशेषः । स वा अभ्यर्द्ध इवेतराभ्य आहुतिभ्यो जुहोतीति प्रक्रम्याह रुद्रियः स्विष्टकृद्रौद्रयेण ह पशून्प्रसज्येद्यदितराभिराहुतिभिः सꣳसृजेदिति ॥ ७१ ॥

निधाय स्रुवमभ्युक्ष्य प्राशित्रमवद्यति यवमात्रं पिप्पलमात्रं वाऽन्यतरत आज्यमुभयतो वाभ्येयात् ॥ ७२ ॥

स्रुग्निधानं वाचनिकम् । ते एतास्विष्टकृति विमोचनमागच्छत इति । स्रुवश्च परिधीनपरेण स्रुवोऽभिप्रेतः । तस्य चाभ्युक्षणा-

१ अपरा व्याख्या । न ह्याज्यं शेषरूपमस्ति शेषस्य हि कृतार्थस्य प्रतिपत्त्यपेक्षस्य स्थितस्य प्रतिपत्त्यर्थानि शेषकार्याणि । न चाज्यमेवं विधमस्ति । न ह्युपांशुयाजार्थं पूर्वं पृथक् प्रकल्पितमस्ति यस्य शेषो भवति । अतः साधारणादेव ध्रौवाद्वचनेनोपांशुयाजार्थं गृह्यते । यत्तावद्ध्रुवायामुपांशुयाजार्थे गृहीतेऽवशिष्टमाज्यम् तत्पश्चाद्द्वाद्युपस्तरणाभिघारणाद्युपयोगीत्यकृतार्थं न प्रतिपत्त्यर्हम् । सर्वान्ते च तेन निःशेषेण समिष्टयजुर्हूयत इति न ततः शेषकार्यम् । यज्जुह्वां चतुर्गृहीतं तन्निःशेषं हुतमिति शेषाभावादेव तत्सम्बन्धि कार्यस्याभाव इत्यनन्तदेवाः ।

मनुयाजार्थम् । स्विष्टकृत ऊर्ध्वमनुयाजार्थं ह्यनेन सञ्चरेण सञ्चरणम् । ननु प्राशित्रसमर्पणार्थं कस्मान्न भवति । न, तस्य पाक्षिकमनेन समर्पणम् । अपाक्षिकं चाभ्युक्षणम् । तेन करिष्यमाणप्रयोजनत्वादनुयाजार्थतैव न्याय्या । प्रयोजनं तदभावेऽभाव इति । पशौ च त्र्यङ्गस्विष्टकृदुत्तरकालमभ्युक्षणं न पुरोडाशस्विष्टकृतीति । ज्योतिष्टोमे च तृतीयसवने सौम्ययागसमनन्तरमभ्युक्षणम् । नेतरयोः सवनयोरनुयाजाभावात् । केचित्तु तृतीयसवनेऽपि स्विष्टकृद्यागसमनन्तरमेवाभ्युक्षणमिच्छन्ति न सौम्यसमनन्तरम् । तदनन्तरमेव दृष्टत्वात् । युक्तरूपतरमिवचैतदिति । प्राशित्रमिति ब्रह्मणो भागस्तदवद्यति । अवद्यति शब्दोपादानसामर्थ्याद्विरिति प्रतिपत्तव्यम् । अवद्यतेर्हि द्विरवदानसम्बन्धो दृष्टः । त्रित्वसम्बन्धोपीति चेत् । न, विशेषसंयोगात् । त्रिर्जमदग्नीनामिति । तथा च प्राशित्रं प्रकृत्य पठ्यते । द्विर्हविषोवदायेति । तेन यदवद्यति तद्यवमात्रं पिप्पलमात्रं वेति । शाखिनां तु पठ्यते । द्वे शकलेवद्यति यवमात्रे पिप्पलमात्रे वेति । पिप्पलमात्रमिति च पिप्पलफलमभिप्रेतम् । न पिप्पलमात्रेण सहोच्चारणात् । क्वचिच्च दर्शनाद्यथाम्रं वोदुम्बरंवा पिप्पलं वा बन्धनात्प्रमुच्येतेति फलविषय एव पिप्पलशब्दः । आज्यं चान्यतरतो भवत्युभयतो वा अन्यतरत आज्यं कुर्यादधस्ताद्वोपरिष्टाद्वेति वचनात् । तथा स आज्यस्योपस्तीर्य द्विर्हविषोवदायाथोपरिष्टादाज्यस्याभिघारयति । तद्यथैव यज्ञस्यावदानमेवमेवतदिति । आग्नेयान्मस्तकं विरुज्य द्वे शकलेवद्यति यवमात्रे पिप्पलमात्रे वेति । वचनमङ्गीकृत्याग्नेयादित्युक्तम् ॥ ७२ ॥

भागांश्च ॥ ७३ ॥

गृह्णातीति सूत्रशेषः । तांश्चाग्नेयादेव प्राशित्रसह चरतया । स चायमुपदेशः । क्रमस्तूपरिष्टाद्वक्ष्यते । स्थितं तावदपर्यवसितमन्तरान्यत्प्रक्रियते । तत्किमर्थं चतुर्द्धाकरणसिद्धान्तसमानन्यायतयेति निरवद्यम् ॥ ७३ ॥

अध्वर्युसञ्चरेण ब्रह्मणे प्रदाय पूर्वेणैके
ऽप उपस्पृश्येडां पञ्चावत्तां दक्षिणतो म-

ध्याच्च यावद्धविस्स्विष्टकृद्वदाज्यम् ॥ ७४ ॥

प्रक्रान्तं प्राशित्रमध्वर्युसञ्चरेण समर्प्य पूर्वेण वाहवनीयं ततोप उपस्पृशति । रुद्रियः प्राशित्रमिति । ततश्च तदभावे न भवति । तत इडां पञ्चावत्तां गृह्णाति । यावद्धविरिति । प्रतिपत्तित्वात् । ननु च दक्षिणतो मध्याच्च स्विष्टकृद्वदाज्यमिति चोक्ते पञ्चावत्तग्रहणमवाच्यम् । सर्वेषां तुल्यत्वप्रज्ञापनायेति केचित् । तदेतदसत् । न हि पुरोडाशस्याज्यस्य च तुल्यता शक्याभ्युपगन्तुम् । प्रतिपाद्यते ह्यत्र पुरोडाशो नाज्यमसंयुक्तविधानात् । तेन पत्नीसंयाजेडायामपि पञ्चावत्तता यथा स्यादिति पञ्चावत्तग्रहणम् । ननु चानुक्तेपि पञ्चावत्तमेवेदम् । ततश्च तत्रापि भविष्यत्येव । नेह पुरोडाशप्राधान्यात्तत्कार्ये च पत्नीसंयाजेष्वाज्यप्रसङ्गाद्द्विरेवाज्यं प्राप्नोति । नोपस्तरणाभिघारणप्राप्तिरिति । तेन सुष्ठूच्यते पञ्चावत्तामिति ॥ ७४ ॥

यजमानभागं पूर्वार्द्धाद्दीर्घं प्रशीर्य पुरस्ताद्ध्रुवायाः करोति ॥ ७५ ॥

पूर्वार्द्धे पुरोडाशस्य प्रशीर्य पुरस्ताद्ध्रुवायै निदधातीति श्रुतत्वात् । अयं च भागानामवसरः । ततश्च विनियोगक्रमेण पूर्वमग्नीधस्ततो ब्रह्मणस्ततो यजमानस्येति । ध्रुवायाः पुरस्तादिति व्यतिरिक्ते देशे करोति ॥ ७५ ॥

इडाꣳ होत्रे प्रदायाविसृजन् दक्षिणातिक्रामति ॥ ७६ ॥

भागैर्व्यवहितत्वादिडाग्रहणं क्रियते । ताꣳ होत्रे प्रदायाविसृजं दक्षिणातिक्रामति ॥ ७६ ॥

इडां प्रतिगृह्य होतुरङ्गुलिपर्वणी अनक्ति ॥ ७७ ॥

प्रकृतत्वादिडाग्रहणमकार्यं क्रियते च पर्वाञ्जनं यथा ततः क्रियेतेत्येवमर्थम् । तथा च दर्शयति । स होतुरिह निलिम्पति तद्धोतौष्ठयोर्निलिम्पत इति प्रकृत्याह एतद्धवै मनुर्विभयाञ्चकारेदं वै मे तनिष्ठं

यज्ञस्य यदियमिडा पाकयज्ञिया यद्वै म इह रक्षाꣳसि यज्ञं न हिꣳस्युरिति तमेतत्पुरा रक्षोभ्यः पुरा रक्षोभ्य इत्येव प्रापयत तथो एवैनामेष एतत्पुरा रक्षोभ्यः पुरा रक्षोभ्य इत्येव प्रापयते ऽथ यत्प्रत्यक्षन्न प्राश्नाति तेनेदनुपहूतां प्राश्नानीत्येतदेवैनां प्रापयते यदोष्ठयोर्निलिम्पत इति इडाया अङ्गुलिपर्वाञ्जनं दर्शयति । नेन प्रकृतायामपीडायां पुनरिडाग्रहणम् । पर्वशब्दः सन्धिवचनो लिङ्गात् । काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परीति । तथा काण्डात्काण्डाद्ध्येषा पर्वणः पर्वणः प्ररोहतीति दूर्वोच्यते । तत्र पर्वशब्दं सन्धिवचनं दर्शयति ॥ ७७ ॥

## अवान्तरेडामादधाति पूर्ववत् ॥ ७८ ॥

अवान्तरेडामिडाया एव होतुः पाणौ समवद्यति । अथ होतुः पाणौ समवद्यति समवत्तामेव सतीं तदेनां प्रत्यक्षꣳ होतरि श्रयतीति श्रूयते । पूर्ववद्ग्रहणाच्च पश्चावत्तामिति । पुरोडाशावदानादेव पश्चावत्तता । न ह्याज्यं संसृष्टरूपत्वाद्विवेकेन गृहीतुं शक्यते इति॥७८॥

## इडाश्च ॥ ७९ ॥

[1]आदधातीति वर्त्तते ॥ ७९ ॥

## सर्वे ऽन्वारभन्ते ॥ ८० ॥

प्रकृतत्वादिडामिति केचित् । अपरे तु वाक्यसामर्थ्याद्धोतुरन्वारम्भमिच्छन्ति स्वर्गस्य लोकस्यैतद्द्वारं यद्धाता तस्माद्धोतारमन्वारभेतेति ॥ ८० ॥

## इडोपहूतेत्युच्यमाने आग्नेयं बर्हिषदं करोति ब्रध्नपिन्वस्वायुर्मे धुक्ष्व प्रजां मे धुक्ष्व पशून् मे धुक्ष्व ब्रह्म मे धुक्ष्व क्षत्रं मे धुक्ष्व विशो मे धुक्ष्व योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तस्य प्रजया पशुभिराप्यायस्वेति ॥ ८१ ॥

---

१ होतुर्हस्ते इति शेषः ।

इडोपहूतेत्येवमुच्यमाने आग्नेयं बर्हिषदं करोति ब्रह्मपिन्त्रस्वेत्यनेन मन्त्रेण । विपरिणम्यते चासावनेकयजमानके कर्मणि ॥ ८१ ॥

तं चतुर्द्धा कृत्वा ॥ ८२ ॥

तन्निर्द्देशाच्चतुर्द्धा कृतं बर्हिषदं करोति। आग्नेयं चतुर्द्धाकरोतीति वचनादाग्नेयमित्युक्तम् । चतुर्द्धाकरणस्य च व्यादेशार्थत्वात्तस्य च यजमानकर्तृकत्वात् क्त्वाप्रत्ययसामर्थ्याच्च यजमानश्चतुर्द्धा करणे । सत्रेषु च व्यादेशाभावादभावश्चतुर्द्धा करणस्य ॥ ८२ ॥

बर्हिषि ऋत्विग्भ्य आदिशति ॥ ८३ ॥

बर्हिषीति नियमार्थमुच्यते । आदेशश्च वाचनिको न समर्पणं तावत् । तेनेदं ब्रह्मण, इदं होतुरित्येवमाद्यादेशः ॥ ८३ ॥

उभौ वाविशेषात् ॥ ८४ ॥

उभौ वा चतुर्द्धा क्रियेते नाग्नेय एव । कुतोऽविशेषात् । अथ यत्र प्रतिपद्यते तच्चतुर्द्धा पुरोडाशं कृत्वा बर्हिषदं करोतीत्यविशेषश्रवणात् । किं च चरितार्थत्वाविशेषात्संस्कार्यत्वाविशेषाच्च । तथा प्रतिपत्तिसव्यपेक्षत्वादिति याज्ञिकाः । अत्रोच्यते । स्यादेतदेवं यद्यविशेषः स्यात् । अस्ति तु विशेषः । आग्नेयं चतुर्द्धाकरोतीति । यद्यपि च माध्यन्दिनीयायां पुरोडाशमात्रश्रवणम् । तथापि त्वाग्नेयमिति वचनाद्विशेषनिष्ठतैव न्याय्या । न चाग्नीषोमीय आग्नेयः । यत्र हि निरपेक्षादग्निपदात्तद्धित उत्पद्यते स आग्नेयः । न च सोमसव्यपेक्षस्याग्निपदस्य सामर्थ्यमस्ति । सापेक्षं चासमर्थं भवतीति समर्थानां प्रथमाद्वेति ह्यधिकृत्य तद्धिताम्नानम् । तेनाग्नीषोमीयस्यानाग्नेयत्वाच्चतुर्द्धा करणाभाव इष्यते । यद्येवमुभौ वाविशेषादिति सूत्रं किमर्थम् । आशङ्कानिवृत्त्यर्थम् । अपि च प्राशित्रभागानां आग्नेयादिति सूत्रितम् । आग्नेयाद्भागांश्चेति । तत्सिद्धान्तार्थं वक्तव्यमुभौ वाविशेषादिति । तत्कुतो वचनात् । हविर्मात्रस्य हि प्राशित्रं श्रूयते । द्विर्हविषोवद्यतीति । भागानां च । पूर्वार्द्धे पुरोडाशस्य प्रशीर्येति पुरोडाशसंयोगः । यद्येवं किमर्थं सूत्रमाग्नेयादिति । आग्नेयान्मस्तकं विरुज्येत्यतोवचनादस्तु तदर्थतेति चेत् ।

न, प्रदेशविधिपरत्वाद्वाक्यस्य । तस्मात्सर्वत्र प्राशित्रग्रहणं न्याय्यम् । भागास्तु पुरोडाशसंयोगात्सान्नाय्ये न प्रवर्त्तन्ते । याज्ञिकसिद्धान्तेपि न चतुर्द्धा करणं सान्नाय्यस्यापुरोडाशत्वात् । तस्य च पुरोडाशसंयोगात् । प्रकृतौ ह्यौपदेशिका धर्माः । सान्नाय्यविकारे च पशौ चतुर्द्धाकरणाभावात् । अथ पशुं सम्मृशन्तीति हि प्रकृत्याहैतर्हि सम्मर्शनस्य कालोथ यत्पुरा सम्मृशति य इम उपतिष्ठन्ते ते विमथिष्यन्त इति शङ्कमानो यद्यु विमथनान्न शङ्केतात्रैव सम्मृशेदिति चतुर्द्धा करणाभावो विमथनाशङ्कायां सम्मर्शनविधिसंस्तव इति ॥ ८४ ॥

## अत्र पितर इति यजमानो जपति ॥ ८५ ॥

चतुर्द्धाकृतं पुरोडाशमालभ्य उत्तरत्र विसर्गोपदेशात् । अत्र पितर इति जयमानो जपेत् ॥ ८५ ॥

## विसृज्यामी मदन्तेति ॥ ८६ ॥

जपतीति वर्त्तते । अयं च कैश्चित्प्रोषितस्यापि यजमानस्येष्यतेऽनाश्रितत्वात् । तत्पुनरनुपपन्नम् । आलम्भपूर्वकत्वाद्विसर्गस्य । तेन यथापूर्वेऽध्वर्युरेवमुत्तरेपीति । चतुर्द्धा करणे च सत्यनयोः प्रवृत्तिस्तत्र पितॄणां भोजनेनेति वाक्यशेषात् ॥ ८६ ॥

## एकैकमाहरति ॥ ८७ ॥

भागिने भागमिति वाक्यशेषः । तच्च पक्वान्नोपहारतादर्थ्याद्भक्षणार्थं हरणम् । द्रव्यसंस्कारत्वाच्च । अन्वाहार्येपि तथेति चेत् । न, परिक्रयार्थत्वादद्रव्यसंस्कारत्वाच्चेति ॥ ८७ ॥

## द्यावापृथिव्योरुपव्हानेग्नीधे षडवत्तम् ॥ ८८ ॥

अथ यत्राहोपहूते द्यावापृथिवी इति तदग्नीध आदधातीति हि श्रूयते । तत्र कैश्चिद्भागद्वयं उपस्तरणाभिघारणोपेतं षडवत्तमिष्यते । अन्यथा षडवत्ताभावात्तत्पुनर्नोपपद्येत । न ह्यत्रोपस्तरणाभिघारणे विहिते । कथं तर्हि षडवत्तमुच्यते । प्रत्यस्तमितावयवार्थवृत्तितया षडवत्तशब्दोग्नीद्भाग उपचरित उपलभ्यते । अश्वकर्णादिशब्दवत् ॥ ८८ ॥

प्राश्नात्युपहूता पृथिवी इति ॥ ८९ ॥

तत्षडवत्तमग्नीत्प्राश्नात्युपहूता पृथिवीत्यनेन मन्त्रेण । अथ द्वितीयमुपहूतो द्यौरिति श्रुतमपि सूत्रकृता नोपनिबद्धम् । वाक्यभेदादेव तदर्थोपलब्धेः ॥ ८९ ॥

आशासाने मयीदमिति यजमानो जपति ॥ ९० ॥

भूयसि हविष्करण उपहूत इत्येवमाद्याशीः प्रार्थनमाशासनम् । एषा वा आशीरिति वचनात् । अत्र मयीदमिति यजमानो जपति । अत्र यजमानग्रहणं शक्यमकर्तुम् । पुरुषयोगिमन्त्रसंस्कारयोस्त्यागे सामर्थ्यादिति परिभाषितत्वात् । एवं तर्हि पत्नीसंयाजेडायामपि यजमानो यथाजपेदिति । तत्र हि पत्न्युपहवः कचिदाम्नातः । उपहूतेयं पत्नीति । आशीर्वचनेनैकवाक्यत्वात्तस्या एव जपो मा भूदिति यजमानग्रहणम् ॥ ९० ॥

उपहूतां प्राश्नन्ति युक्ताः ॥ ९१ ॥

उपहूतामिडामृत्विजः प्राश्नन्तीत्यर्थः । यजमानश्च । सा चैषा इडा प्राशित्रभागाश्च यावदुक्तेपि वर्त्तते । द्रव्यसंस्कारत्वात् ॥ ९१ ॥

१ पवित्रयोर्मार्जयन्ते परेण वेदिꣳ सुमित्रिया न इति ॥ ९२ ॥

तृतीयार्थे सप्तमी । न ह्यत्र सप्तम्यर्थसम्भवः । करणता तु सम्भवति मार्जनं प्रति । सुपां हि स्थाने सुपः छन्दसि भवन्तीति । छन्दोवत्सूत्राणि चेति स्मर्यते । तेनात्र सप्तमी तृतीयार्थे । लिङ्गाच्च । पवित्रपूता यदत ऊर्ध्वमिति । केचिच्चात्रोदकेन मार्जनमिच्छन्ति । मन्त्रलिङ्गात् । सुमित्रिया न आप इति । तन्पुनरविधायकत्वान्मन्त्राणामनुपपन्नम् । उदकानुपदेशाच्च । न चान्यदत्र मृज्यर्थे करणं नास्ति । यथा पशुवपान्ते । न च पवित्राभ्यां मृज्यर्थो न सम्भवति । लि-

---

१ वेदिमपरेणोपविष्टाः पवित्राभ्यामात्मानं मार्जयन्ते शोधयन्त इत्यर्थः ।

ङ्गाच्च । पवित्रेण पूताः पवित्रपूता इति । यदि चोदकमपि साधनं स्यात् । पवित्रपूता इति समासो न स्यादसामर्थ्यात् । यच्च श्रूयते पवित्रवति मार्जयन्त इति । तत्रापि पवित्रवद्वस्तुनिर्देशादनध्यवसाय एवेत्यन्यथानेयमिति । मन्त्रश्च सुमित्रिया न आप ओषधयः सन्त्वित्येवमन्तः स्यात्परिसमाप्तत्वाद्वाक्यस्य । न च दुर्मित्रिया इति प्रदेशान्तरे न विनियुक्तः । न च परादिना पूर्वान्तन्यायोत्र सम्भवत्यप्रकरणसमधीतत्वात्तस्य । प्रकरणान्तरसमधीते तु यत्नाद्वाक्यसमुच्चयो भवति । यथा ज्योतिरसीति समिदन्तेन ॥ ९२ ॥

यजमानस्य प्राणापानौ पातमिति प्रस्तरे ते करोति ॥ ९३ ॥

प्रकृतत्वात्पवित्रप्राप्तौ ते इत्यवाच्यम् । उच्यते च । तेन शाखापवित्रव्युदासार्थमिति । तस्यापि समस्य मार्जनात्प्राप्तिरतस्ते इति यत्नः क्रियते । अनेकयजमानके च विपरिणामो मन्त्रस्य । मार्जनं चेडाभक्षनिमित्तत्वात्तदभावे न भवति । पवित्रप्रतिपत्तिस्तु भवति प्रतिपत्तेरेव ॥ ९३ ॥

तूष्णीं वा ॥ ९४ ॥

पवित्रयोः प्रस्तरे करणम् ॥ ९४ ॥

अत्र वा ब्रह्मा प्राश्नाति ॥ ९५ ॥

तुल्यश्रुतित्वादत्र वा प्राशित्रभक्षणम् ॥ ९५ ॥

१भागमस्मै परिन्तिहरति ॥ ९६ ॥

अस्मै ब्रह्मणे पूर्वेणाहवनीयं भागं समर्पयतीत्यर्थः ॥ ९६ ॥

यजमानभागं चाप्रोषिते ॥ ९७ ॥

---

१ अयं च चतुर्धाकरणभागव्यतिरिक्तः, तेषां दानस्य पूर्वमेव विहितत्वात् ।

अप्रोषिते यजमानभागं च परिहरति१ ॥ ९७ ॥

२अन्वाहार्यमभिघार्योद्वास्यान्तरा ब्रह्मयजमानौ हृत्वा वेद्यां निधायालभते प्रजापतेर्भागो ऽस्यूर्जस्वान् पयस्वान् प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानव्यानौ मे पाह्यूर्ग-स्यूर्जं मे धेह्यक्षितिरसि मा मे क्षेष्ठा अमुत्रा-मुष्मिन् लोक इह चेति ॥ ९८ ॥

सर्वार्थत्वात्स्थाल्येनाभिघारणम् । आलम्भो यजयानस्य स्यात् । मन्त्रलिङ्गात् । दाने च तस्याधिकारात् । अध्वर्योर्वा करणत्वात् । करणमन्त्रविषयाशिषां च यजमानयोगित्वं न्यायात् । तत्कथं आध्वर्यवः पदार्थः मन्त्रोपि । लिङ्गेन यजमान आशङ्क्येत । प्रधानभूतश्च पदार्थः । गुणभूतश्च मन्त्रः । तेनाध्वर्योरालम्भेधिकारो युज्यते । तन्मन्त्रेपि लक्षणया यजमानाभिधानमित्यदोषः । तथा च लिङ्गं यां वै काश्च यज्ञे ऋत्विज आशिषमाशासते यजमानस्यैव सेति । ऊर्गसीत्यस्यान्नविषयत्वाद्द्रवादौ विपरिणामः । ऊर्जं मयि धेहीत्यत्रापि केचिदिच्छन्ति । तत्पुनर्विचारयितव्यम् । न हि प्रकृतोर्ग्विषयतेष्यते । तेनान्यदेवोर्जोन्तरं प्रार्थ्यते । ततश्चाविपरिणाम इष्यते । मयि धेहीति गणयज्ञे विपरिणम्यते । अभिघारणं तु गवादेरनुपकारकत्वान्न प्रव-

---

१ यदि तु यजमानः प्रोषितो भवति तदाऽध्वर्युणा दत्तं यजमानभागं ब्रह्मा गृहीत्वा प्राशित्रे निदधाति, प्रस्तरहोमोत्तरं तु स हूयत इत्यर्थः ।

२ भागपरिहरणानन्तरमध्वर्युरन्वाहार्यमभिघार्य स्थालीस्थेनाज्येनोपरि निक्त्वा उत्तरत उद्वास्य दक्षिणाग्नेरुपरिष्टादुत्तार्य गार्हपत्यदक्षिणाग्न्योरन्तरालेन प्रत्यङ् नीत्वा दक्षिणाग्नेर्दक्षिणेन अन्तरा ब्रह्मयजमानौ हृत्वा ब्रह्मयजमानयोरन्तरालेन नीत्वा तत्रापि यजमानं दक्षिणेन ब्रह्माणमुत्तरेण पूर्वेणाहवनीयं प्रणीतोत्करावन्तरा हृत्वा वेदिमध्ये आसाद्यालभतेऽध्वर्युरित्यर्थः ।

र्त्तते। स्वादिम्ने ह्योदनोऽभिघार्यते। न च गोः स्वादिम्ना प्रयोजनम्। ब्रह्मयजमानयोस्तु अन्तराहरणं गोर्न भवति। वाससस्तु प्रवर्त्तते ऽविरोधादिति॥ ९८॥

[1]सा दक्षिणा॥ ९९॥

स दक्षिणेति वक्तव्ये दक्षिणागतलिङ्गान्तर्भावेन सेत्युक्तम्। अयं च परिक्रयार्थः। ततश्च पक्वान्नोपहारतादर्थ्येऽपि दानसमनन्तरं भक्षणं न भवति। चतुर्द्धाकरणे तु द्रव्यसंस्कारात्पक्वान्नोपहारतादर्थ्याच्चानन्तरमेव भक्षणम्॥ ९९॥

उदगुद्वासयति हविश्च॥ १००॥

उदगुद्वासनमन्वहार्यस्य हविषश्च पुरोडाशादेः॥ १००॥

[2]समस्योल्मुके समिधमादायाह ब्रह्मन्प्रस्थास्यामि समिधमाधायाग्निमग्नीत्सम्मृड्ढीति॥ १०१॥

समास आहवनीय एव प्रतिक्षेपः। ते पुनरनुसंस्पर्शयन्तीति हि श्रूयते। समिच्च या सावनुयाजार्थं परिशेषिता तामादायाह ब्रह्मन्प्रस्थास्यामीत्येवमादि। प्रैषद्वयं चैतत्। तत्रैकोऽनुयाजार्थस्ततश्च तदभावे आतिथ्यादौ न भवति। सम्मार्गप्रैषस्तु सम्मृजिद्वारेण सर्वार्थत्वात्प्रतिपत्त्यर्थकर्मसाधनभूताहवनीयसंस्कारोपजनकत्वेनानुयाजाभावेऽपि प्रवर्त्तत एव। तथा च सम्मार्गे प्रकृत्याह युक्तो यदत ऊर्ध्वमसंस्थितं यज्ञस्य तद्वहादिति। अत्र केचित्पूर्वं समिदादानमिच्छन्ति। तत उल्मुकसमासः। कुत एतत्। एवं विकृतौ ह्यनुप्रवृत्तिर्दृश्यते। पात्रप्रक्षालनान्तेऽनुयाजाः समिदादीनि। तदेतदनुपपन्नमिव। न ह्यत्र सूत्रभङ्गे किञ्चित्कारणमस्ति। तदभावे च यथाऽव्यवस्थितसूत्रव्याख्यैव युज्यते। यत्तु समिदादीत्युक्तम्। तन्न्यायपूर्वकत्वादेक-

---

१ य एषोऽन्वाहार्य उक्तः सा दर्शपूर्णमासयोर्दक्षिणा भवति।

२ अध्वर्युरुल्मुके आहवनीये प्रक्षिप्य प्राक् परिशेषितां समिधमादाय 'ब्रह्मन् प्रस्थास्यामि' इति ब्रह्माणं प्रति ब्रवीति; अग्नीधं चाग्निमग्नीत्सम्मृड्ढीति ब्रवीतीत्यर्थः।

स्यादिशब्दस्य लोपेन समिध आदौ यत्तदादीति द्रष्टव्यम् । समिदादानं च प्रैषाङ्गं केचिदिच्छन्ति । तदुत्तरकालीनप्रैषविधानात् । न चाध्वर्योः समिदाधानं येन दृष्टार्थता स्यात् । अत आदानस्य प्रैषार्थतेति । तच्चानुपपन्नमदृष्टार्थप्रसङ्गात् । दृष्टार्थश्चात्र आधानं ततश्च तादर्थ्ये नादृष्टपरिकल्पनं भवति । नन्वाधानमग्नीधो नाध्वर्योरिति कथं दृष्टार्थता स्यात् । उच्यते । अर्थादग्नीधः समर्पयिष्यत्येवं दृष्टार्थता सम्भवति । तस्मादाधानार्थमेव । एवं च सत्यवभृथेनुयाजसद्भावादाधानाभावादनादानमिति । उल्मुकसमासश्चानुयाजार्थ आहवनीयसंस्कारः । तथाचाऽस्मृतावनुयाजनिर्वृत्त्युत्तरकालं पुनरसमासः । स्वावयवेनोपचयस्य संस्कारत्वादवभृथेष्ट्यामपि प्रवर्त्तते । अग्निमग्नीत्सम्मृड्ढीति वाक्यस्य विपरिणामश्चोदितार्थाभिधानात् ॥ १०१ ॥

## एषात इति होतानुमन्त्रयते ॥ १०२ ॥

अनुमन्त्रणं च समिधः स्यात् । तां होतानुमन्त्रयत इति वचनात् । मन्त्रलिङ्गाच्च । ततश्च वरुणप्रघासेषु विपरिणामः । एते ते समिधौ ताभ्यामिति ॥ १०२ ॥

## १अजानति यजमानः ॥ १०३ ॥

स यदि मन्येत न होता वेदेत्यपि स्वयमेव यजमानोनुमन्त्रयेतेति वचनात् ॥ १०३ ॥

## संमार्ष्टि पूर्ववदपरिक्राम॒ सकृत्सकृत्ससृत्रा॒ समिति ॥ १०४ ॥

पूर्ववदग्निं सम्मार्ष्टि अपरिक्रम्य सकृत्सकृत् । त्रिस्त्रिः परिक्रम्येति मा भूत् । ससृत्रा॒समिति च विशेषमन्त्रस्य चावभृथे परिणामः ॥ १०४ ॥

---

१ अनुमन्त्रणं कर्तुं होतरि अजानति यजमानः एषात इति समिधमनुमन्त्रयते इत्यर्थः ।

ब्रह्मानुज्ञातोनुयाजैस्त्रिभिश्चरत्यौपभृतꣳ समानीय ॥ १०५ ॥

ब्रह्मानुज्ञात इत्यवाच्यम् । सामर्थ्यादेव तत्प्राप्तेः । उक्तं च । एतं त इति समिदामन्त्रितः प्रसौतीति । वाच्यं वा तदनुज्ञोत्तरकालं प्रवृत्तिर्यथा स्यादिति । अथवा प्रैषसमनन्तरं तदर्थप्रवृत्तिर्माभूत् न्यायतो हि प्रैषसमनन्तरं प्रैषार्थः प्राप्नोति तन्माभूदित्यत इदमुच्यते । ब्रह्मानुज्ञात इति । तद्यथानुज्ञात उत्तरेणाहवनीयꣳ सम्प्रति निदधातीति । त्रिभिरिति चानुयाजत्रित्वप्रज्ञापनायोच्यते । अथवा चतुर्थस्यानुयाजाभावप्रज्ञापनार्थम् । यद्येवमनुयाजान्ते स्रुचं जुहोतीति प्राक् ततः स्रुचहोमः प्राप्नोति । नैतदेवम् । अनुयाजाङ्गं ह्यसौ तदन्त एव निरुपचरितान्तस्तस्माददोषः । औपभृतꣳ समानीय जुह्वाम् ॥ १०५ ॥

अतिक्रम्याश्राव्याह देवान्यजेति ॥ १०६ ॥

अतिक्रम्याश्रावणवचनमनुवाक्यानिरासार्थम् । याज्यापुरोनुवाक्यावन्तो यजतय इत्यनेन प्राप्तत्वात् । अथ यदपुरोनुवाक्यका अनुयाजा भवन्तीति विशेषवचनात् तन्निरासः । तस्मात्साध्वभिहितमतिक्रम्याश्राव्याह देवान्यजेति ॥ १०६ ॥

यज यजेत्युत्तरौ ॥ १०७ ॥

उत्तरौ द्वावनुयाजौ प्रति यज यजेत्येवं वक्तव्यम् । एवं हि श्रूयते ॥ १०७ ॥

देवान् देवानिति वा सर्वत्र नियमशब्दात् ॥ १०८ ॥

सर्वत्र देवान्यजेत्येवं प्रयोगः । कुत एतत् नियमशब्दात् । देवान्यजेत्येवाध्वर्युराह, देवं देवमिति सर्वेषु होतेति । अथ यज यजेत्युत्तरयोरभिधीयते तत्रैवकारो न समर्थितः स्याद्देवान्यजेत्येवाध्वर्युराहेति ॥ १०८ ॥

किञ्च—

विकृतिदर्शनाच्च ॥ १०९ ॥

विकृतौ हि दर्शनं भवति । अतिक्रम्याश्राव्याह देवान्यजेति । सोऽग्यबर्हिषौ द्वावनुयाजौ यजतीति । तेन नियमशब्दाद्देवान् देवानिति धा सर्वत्र । यजेति चोत्तरयोरिति तु शास्त्रान्तरात् । एवं च सति वरुणप्रघासादौ यत्र यज यजेति पुनर्वचनम् तत्र नियम एवेष्यत इति सम्प्रदायः ॥ १०९ ॥

१प्रतीचो जुहोति ॥ ११० ॥

प्रत्यञ्चोऽनुयाजास्तदपानमिति वचनात् ॥ ११० ॥

उपसत्सु च ॥ १११ ॥

अधिकारमुपजीवन्नाह । उपसत्सु च प्रत्यञ्चो होमाः । तुल्यं हि शास्त्रमत्रापि ॥ १११ ॥

प्रतीचो जुहोतीति वचनात्कर्तुरपि प्रत्यगपसरणे प्राप्ते ऽनियमे वा नियमार्थमाह—

२ध्रुवः ॥ ११२ ॥

चतुर्थं समानीय प्राचीम् ॥ ११३ ॥

चतुर्थं होमं प्रति औपभृतं समानीय प्राचीमाहुतिं जुहोति । स्थ यजति स्थानादेत्य । यजतीनां हि स्थानं परिभाषितम् । तिष्ठन्नुदङ् प्राङिति । तथाचोक्तं परिधीनपरेण सञ्चरो होष्यत इति । ननु च होममात्राभिसम्बन्धात्सर्वत्रैवं प्राप्नोति । नाश्रावणाभिसम्बन्धाद्य आश्रावयिष्यन् सव्येनातिक्रामति दक्षिणेनाश्राव्येति । नन्वाश्रावणातिक्रमणविशेषे इदं वचनं अनाश्रावणहोमे त्वनियम इति । उच्यते । एतन्मूलमेवैतत्सूत्रं वचनान्तराभावात् । तस्मादाश्रवणसम्बन्धेष्वेवातिक्रमणं नेतरत्रेति । इतरहोमस्तूत्तरत एव व्यवस्थितेन कर्तव्यः । तच्चोक्तमुत्तरत उपचारो यज्ञ इति । चतुर्थग्रहणं चाऽनुयाजाङ्गत्वप्रज्ञापनार्थम् । इतरथा ह्यनुयाजत्रयव्यतिरेके-

---

१ एतांस्त्रीननुयाजानध्वर्युः प्रत्यक् संस्थान् जुहोतीत्यर्थः ।

२ अध्वर्युरेकत्र स्थित एव त्रीननुयाजान् प्रत्यक् संस्थान् जुहोति न प्रत्यनुयाजं प्रत्यगपसरतीत्यर्थः ।

णान्यदपूर्वोत्पादकं होमान्तरमाशङ्क्येत । अतश्चानुयाजप्रवृत्तौ प्रवृत्तिरस्य न तदभाव इति। एवं च सत्यनुयाजान्ते स्वरुं जुहोतीति साङ्गानुयाजकर्माभिनिर्वृत्त्युत्तरकालं स्वरुहोमः सिद्धो भवति। अथ वा देवानामेव देवतात्वमत्रापि यथा स्यादिति चतुर्थ-ग्रहणम् । मन्त्राभावेपि चात्र स्वाहाकारोस्त्येवेति वक्ष्याम उपरिष्टात् ॥ ११३ ॥

अभिचरन्ननुयाजानुमन्त्रणमशन्यमुं जहि ह्रादुन्यमुं जह्युल्कुष्यमुं जहीति ॥ ११४ ॥

अभिचरन्ननुयाजानुमन्त्रणं करोति । अशन्यमुं जहीति । एवमादिभिः प्रतिमन्त्रं वाक्यभेदात् । तच्चाध्वर्युः पुरुषयोगाभावात्समाख्यानाच्च ॥ ११४ ॥

एवं प्रवृद्धौ समं विभजेत् ॥ ११५ ॥

एवमनुमन्त्रणानां विकारेनुयाजप्रवृद्धौ समो विभागः कर्त्तव्यः । समं स्यादश्रुतित्वादिति न्यायात् । अनुयाजप्राप्तौ च पुरुषार्थस्वरूपस्याप्यनुमन्त्रणस्य प्रवृत्तिरिष्टैवेत्यभिप्रायः ॥ ११५ ॥

स्वस्थानान्त्येन वोपायित्वात् ॥ ११६ ॥

न वा समो विभागः कर्त्तव्यः । किं तर्हि विकृतौ पठ्यमानानुयाजमन्त्राणां यत्स्वं स्थानं तदन्त्येन धर्मसम्बन्धः कर्त्तव्यः । ततश्च द्वितीयादीनां नाराशंसानुमन्त्रणमितरेषां स्विष्टकृदनुमन्त्रणमिति। कुत एतदुपायित्वात् । प्रथमे ह्यभिनिर्वृत्ते द्वितीयेचानिर्वृत्ते तमेव प्रत्यपेक्षा न प्रथमं तृतीयं वा । एवं द्वितीयेभिनिर्वृत्ते तृतीयविषयापेक्षेति । ततश्च स्वस्थानान्त्ययोरेवायमभ्यास इति । यद्यपि च पूरणेन्त्यस्याभ्यासो न्याय्यः । तथापि पाठक्रमाद्द्वितीयस्याभ्यास इष्यते । प्रयाजेषु च चतुर्थान्त एव पाठ इति । तेन युक्तस्तत्र पञ्चमस्यैवाभ्यासः। प्रयोजनम्। प्राङ्नाराशंसादभ्यासविनाशे साभ्यासो द्वितीय आवर्त्तते। एवं तृतीयेपि द्रष्टव्यम्। आह च—

अनुत्पत्तौ तु या संख्या साभ्यासेनैव पूर्यते।
इष्टस्तेनानुयाजानामभ्यासो विकृताविति ॥

तस्यान्त्याभ्यास इष्येत न स्यात्पाठो यदान्तरा ।
सति त्वन्तरपाठे हि नान्त्यस्याभ्यास इष्यते ॥
देवीर्द्वारो यदि ह्येष प्रथमाभ्यास इष्यते ।
निवृत्तत्वात्स्वरूपेण तस्य न ह्युपपद्यते ॥

किञ्च—

अकृते हि द्वितीये च तदपेक्षैव युज्यते ।
स्वस्थानान्त्येन वोपायादिति सूत्रमुदाहृतम ॥
प्रयाजेषु तु पाठस्य न्यायेनाभिन्नवाक्यता ।
अतः पञ्चम एवासौ पौनः पुन्येन भाव्यते ॥

अत्रोच्यते। एवं प्रवृद्धौ समं विभजेत् । स्वस्थानान्त्येन वोपायादिति । अनेनानुमन्त्रणविषयो निर्णयः कृतः । न च पुरुषार्थस्वरूपस्यानुमन्त्रणस्य विकारे अनपेक्षितत्वात्प्रवृत्तिरस्ति । न च खादिरं वीर्यकामस्य यूपं कुर्यादिति वत् प्रवृत्तिरिष्यते । तत्र हि खादिरः क्रत्वपेक्षयैव प्रवृत्तः। इह त्वनुमन्त्रणनिबन्धनोभिचारो, न चानुमन्त्रणं क्रत्वपेक्षया गृह्यते । अतदर्थत्वात् । तेन न्यायोपदर्शनार्थमिदमुक्तम । धर्मान्तरविवक्षया वा । स च स्थानादिः । यद्वाभ्यस्यमानप्रज्ञापनायेत्युक्तमेव ॥ ११६ ॥

एत्य जुहूपभृतौ व्यूहत्यग्नीषोमयोरिति जुहूं प्राचीं दक्षिणेनोत्तानेनाग्नीषोमौ तमितीतरेणेतरां नीचा प्रतीचीम् ॥ ११७ ॥

एत्येत्यध्वर्युविषयमवाच्यम। प्राप्तत्वादेव । तेन यजमानस्येत्यव्यूहनं यथा स्यादेवमर्थमुच्यते । जुहूपभृद्ग्रहणं च न कार्यम । जुहूं प्राचीं दक्षिणेनेत्यभिहितत्वात् । इतरेणेतरामिति चोक्तत्वात् । अतस्तद्विकाराणां व्यूहनव्युदासार्थमिति केचित् । न हि तद्विकाराणां शूर्पादीनां चोदकेन व्यूहनं प्राप्तं निवर्त्तयितुं शक्यम् । प्रतिषेधशास्त्राभावादिति । कस्तर्हि जुहूपभृद्ग्रहणस्य समाधिः । उच्यते । जुहूपभृतौ व्यूहतीत्युक्ते विशेषार्थं पुनर्वचनं, जुहूं प्राचीं दक्षिणेनेति । इतरेणेतरां प्रतीचीमिति च । अपि चोपभृत्संशब्दनं पुनरत्र नास्त्येव । तेन जुहूपभृतौ व्यूहतीति पूर्वमभिहिते इतरशब्देनोपभृच्छक्यते वक्तुम । तस्मादपुनरुक्ततेति । अग्नीषोमयोरित्यनेन मन्त्रे-

ण दक्षिणेन हस्तेन जुहूं प्राचीं व्यूहतीति । अग्नीषोमौ तमितीतरेण सव्येन इतरामुपभृतं नीचा प्रतीचीं व्यूहति । अत्र प्रतीचीमिति प्रत्यङ्मुखीमुपभृतं कृत्वा प्रतीचीमेव केचित्प्रेरयन्ति । तदेतन्नोपपद्यते। यत्कारणं प्रतीचीमित्येकः शब्दः स यदि वा प्रेरणेन सम्बध्यते स्रुचा-वेति । तत्र प्रेरणाभिसम्बन्धो युज्यते । यत उपभृतं प्रतीचीं सव्येनेत्येव मुक्त्वाह अपाश्चं तमपोहति योऽस्मा अरातीयतीति । अथ कस्मात्प्रतीचीमित्यस्य प्रेरणसम्बन्धः स्रुक् सम्बन्धश्च नेष्यते । अस्ति किल शाखिनां वचनं नानाविषूची नौ व्यूहतीति । नैतदेवं वचनमास्ति नास्तीति सन्दिग्धम् । अथाप्यस्ति तथापि माध्यन्दिनपाठार्थ एव तस्यापि वचनस्य नानाविषूचीं नौ व्यूहतीति । विष्लृव्याप्तौ । उचीसमवाये । नानाव्याप्तिसमवायिनी व्यूहतीत्यर्थः । तेन प्राञ्ची प्रतीचीमित्येतदेवोक्तं भवति । ततश्च प्राच्येव प्रतीची प्रेर्यते ॥ ११७ ॥

यथा देवतमन्यत् ॥ ११८ ॥

प्रकृत्यर्थ एवायमारम्भः । विकृतौ सूत्रारम्भसामर्थ्यात् । यथार्थमूहश्चोदित इति । तेन प्रकृतावेवाग्नीन्द्रमित्रावरुणाद्यर्थं वचनम् । ननु चैवं सति इन्द्राग्न्योरिति व्यूहनमवाच्यम् । समाम्नायप्रदर्शनार्थत्वाददोषः । तत्पुनर्वचनं परादिना पूर्वान्त इत्यनेन इन्द्राग्न्योरुज्जितिमित्यस्यापि प्राप्तिर्मा भूदिति प्रकृत्यर्थम् । उपांशुयाजपुरोडाशाग्नीषोमयोस्तु तन्त्रेणोच्चारणं गुणभेदाभावात् ॥ ११८ ॥

अध्वर्युर्वानूज्जयत्वयं यजमानो वाजस्यैनमिति पूर्वे, यमयं यजमानो द्वेष्टि यश्चैनं द्वेष्टीत्युत्तरे ॥ ११९ ॥

अध्वर्युर्वा स्रुचौ व्यूहति । तुल्यशास्त्रत्वात् । यदि स्वयं यजमानो यद्यु अध्वर्युरिति । तदा मन्त्रे विशेषमाह । अनूज्जयत्वयं यजमानो वाजस्यैनमिति पूर्वे । यमयं यजमानो द्वेष्टि यश्चैनं द्वेष्टीत्युत्तर इति । यजमानपदस्य चात्र समवायादनेकयजमानके सविशेषणस्य विपरिणामः । व्यूहनस्य चेष्टदेवतासङ्कीर्त्तनार्थतया कृतप्रयोजनस्रुक्संस्कारद्वारेण चान्तापच्छिन्नेपि प्रयोगः । यथेडान्तातिथ्यास-

न्तिष्ठत इति । तत्रापि हि देवतासङ्कीर्त्तनमिष्यते । इष्टत्वाद्देवतायाः कृतप्रयोजनकत्वात्स्रुचाम् । तथाच सूत्रप्रस्थानं व्यूहनपरिध्यञ्जने कृत्वैक इति ॥ ११९ ॥

अभ्युक्ष्य जुह्वा परिधीननक्ति यथापूर्वं वसुभ्य इति प्रति मन्त्रम् ॥ १२० ॥

अभ्युक्षणं च जौहवः स्यात् । कार्याभिसम्बन्धात् । जुह्वेति जौहवेनेत्यर्थः । यथापूर्वमिति न्यायात् । अथ वा प्रदक्षिणोपचारोदकसंस्थतासम्पत्त्या दक्षिणस्य प्रथमं मा भूदिति । अस्तु तथेति चेत् । न, तस्य स्मार्त्तत्वात् । एतत्तु वाचनिकमिति । वसुभ्य इत्यनेन मन्त्रेण प्रति मन्त्रम् । अत्र रुद्रेभ्यस्त्वेति चतुर्थ्यन्तनिर्देशाद्रौद्रोयमिति केचित् । ततश्च तदन्त उदकोपस्पर्शनमिति । तदयुक्तम् । परार्थत्वाद्रुद्रपदस्य । नात्र रुद्रस्य देवतात्वम् । हविर्भाग्वा देवतास्यात्सूक्तभाग्वा । न चात्र रुद्रो हविर्भजते, न च सूक्तम् । परिधिपरत्वान्मन्त्रस्य । रुद्रेभ्यस्त्वाअनज्मीत्यज्यमानपरिध्यभिधानम् । अतस्तत्प्रशंसार्थं वस्वाद्युच्चारणम् । एवं प्रशस्तमिदमञ्जनं यत्क्रियमाणं वसुभ्यो रुद्रेभ्यश्च क्रियत इति । तस्मादरौद्रत्वान्नोदकोपस्पर्शनमत्रेति ॥ १२० ॥

प्रथमं परिधिं गृहीत्वाश्राव्याहेषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहीति ॥ १२१ ॥

प्रथमग्रहणमनियमव्युदासार्थम् । अन्यथा हि यः कश्चिद्गृह्येत । परिधिग्रहणं च परिधिसंस्कारार्थम्, ग्रहणक्रियाकर्मभावनिर्देशात् । परिधिमभिपद्याश्रावयतीति । तथा परिधिभ्यो ह्येतदाश्रावयतीति आश्रावणस्य तादर्थ्यं दर्शयति । तथा आश्राव्याहेषिता दैव्या होतार इति प्रकृत्याह । दैव्या वा एते होतारो यत्परिधय इति परिध्यर्थतां मन्त्रस्य दर्शयति । सूक्तवाकप्रेषणक्रियोपग्रहार्थं वा । तदागमे विधानाल्लिङ्गाच्च । इषिता दैव्या होतार इति दैव्या वा एते होतारो यत्परिधयोग्नयो हीष्टा दैव्या होतार इति । दैव्या होतारः

प्रेषिता इदानीं भद्रवाच्याय भद्रवदनाय मानुषं होतारं सूक्तवाका-य प्रसौतीत्येकवाक्यतासामर्थ्यात्तादर्थ्यमवगम्यते । अन्यथा ह्येकवा-क्यता समधिगता भिन्नवाक्यता अन्याय्यापद्यते । तत्रैतदुक्तं भवति । एते परिधयः प्रेषिता इदानीं मानुषो होता प्रेष्यत इति । ग्रहणक्रि-याकर्मभावः प्रैषार्थत्वेप्यविरुद्धः । प्रयोजनं प्रैषाभावे परिध्यनाल-म्भो यथा दर्विहोमेषु ॥ १२१ ॥

पशौ प्रैष्येति ॥ १२२ ॥

ब्रूहीत्यस्य स्थाने पशौ प्रैष्येति वक्तव्यम् । तत्र हि मैत्रावरुणस्य प्रैषाम्नानम् ॥ १२२ ॥

सञ्ज्ञानाथामिति प्रस्तरादानम् ॥ १२३ ॥

कर्तव्यमिति सूत्रशेषः ॥ १२३ ॥

विधृती स्थाने कृत्वानक्त्येनं व्यन्तु वय इति ॥ १२४ ॥

विधृत्योस्थानमाहवनीयः । सर्वहविषां तदधिकरणत्वात् । अन-क्त्येनं प्रस्तरं व्यन्तु वय इत्यनेन मन्त्रेण ॥ १२४ ॥

कथम्—

अग्रं जुह्वामुपभृति मध्यं मूलमितरस्याम् ॥ १२५ ॥

ध्रुवायाम् । प्रस्तरसंस्कारश्चायम् । तथा चोपभृदाद्यभावेपि प्रस्तरोऽज्यत एवेति ॥ १२५ ॥

मरुतामिति नीचैर्हृत्वा तृणमादायानुप्रहरति ॥ १२६ ॥

मरुतामित्यनेन मन्त्रेण प्रस्तरम् नीचैर्हृत्वा ततस्तृणमा-दायानुप्रहरति ॥ १२६ ॥

हस्तेनाचरति ॥ १२७ ॥

आचरणमुपसमूहनम् । तच्च सामर्थ्यात्काष्ठादिनां प्राप्तं व-

चनसामर्थ्याद्धस्तेनैवोच्यते । तमङ्गुलिभिरेव योयुष्येरन्न काष्ठैरिति ॥ १२७ ॥

हस्ताचरणाधिकारमुपजीवन्नाह—

यजमानभागं च प्रोषिते ॥ १२८ ॥

प्रोषिते यजमाने तद्भागं च हस्तेनैवाचरति । तच्च स्वावसर एव, गुणपरत्वाद्वचनस्य ॥ १२८ ॥

क्षत्रियवैश्ययोश्च नित्यम् ॥ १२९ ॥

क्षत्रियवैश्ययोः पुनर्नित्यमेव हस्तेन भागो होतव्यः ॥ १२९ ॥

अहं त्वदस्मि मदसि त्वमेतन्मम त्वं योनिस्तव योनिरस्मि ममैव सन्दिवि देवेष्वधि पुत्रः पित्र्ये लोककृज्जातवेदः स्वाहेति ॥ १३० ॥

अनेन मन्त्रेण ॥ १३० ॥

सूक्तवाकान्ते ॥ १३१ ॥

इत्यस्य तृणमादायानुप्रहरतीत्यनेन सम्बन्धः । एवं ह्यामनन्ति सूक्तवाकेन प्रस्तरं प्रहरतीति । तत्रैतत्सन्दिह्यते । किं सूक्तवाकप्रस्तरहणयोरङ्गाङ्गिलक्षणः संयोगः । उत कालार्थ इति ?। किं तावत्प्रतिभाति । अङ्गाङ्गिलक्षण इति । कुत एतत् । सूक्तवाकेनेति करणविभक्त्या निर्देशात् । प्रस्तरमिति च कर्मविभक्त्या । सूक्तवाके एव याज्या प्रस्तरमाहुतिरिति चामनन्ति । तत्रायं यागः प्रस्तरद्रव्यकः । अग्न्यादिदेवताकश्च । अग्न्यादयो ह्यत्र सूक्तवाके सङ्कीर्त्यन्ते । मन्त्रस्य च क्रियासाधनप्रकाशकत्वमुचितम् । तेनात्र प्रस्तरद्रव्यस्याग्न्यादयो देवता इति गम्यते । स्पष्टतरं चैतदभिधीयते । अग्निरिदं हविरजुषतावीवृधतेति । इदमिति सन्निहितं प्रस्तरद्रव्यं निर्दिशति । अपि च । फलसङ्कीर्त्तनं भवति । आयुराशास्त इत्येवमादि । तेन प्रस्तरद्रव्यकः सूक्तवाकमन्त्रकश्चाग्न्यादिदेवताकश्चायुरादिफलको होम इति । तदेतदपरे नेच्छन्ति । उभयोः परार्थत्वात् । प्रस्तरस्य हि स्रुग्धारणार्थता ज्ञाता । प्रस्तरे जुहूं

सादयतीति । सूक्तवाकस्य चेष्टदेवतासङ्कीर्त्तने दृष्टार्थ इति तादर्थ्याऽध्यवसानं युक्तम् । अतो निर्ज्ञातार्थयोर्यः संयोगः स कालार्थ एव भवति । यथेध्मप्रक्षेपसामिधेन्यनुवचनयोरिति । तदन्ते प्रक्षिप्यमाणः प्रस्तरः सूक्तवाकेनैव प्रहृतो भवतीति वचनं सूक्तवाकेन प्रस्तरं प्रहरतीति । सूक्तवाक एव याज्या प्रस्तरं आहुरिति चैवमेव द्रष्टव्यम् । यच्चाग्न्यादिसङ्कीर्त्तनं तत्प्रधानयागेष्टदेवताभिधानपरम् । कर्मनिर्वृत्त्युत्तरकालमपि हि कृताकृतप्रज्ञप्त्या देवतास्मरणं दृष्टार्थमेव भवति । अतो न प्रस्तरदेवतात्वेनाग्न्यादिसङ्कीर्त्तनमिति । न हि प्रस्तरस्य चाग्न्यादीनां च सम्बन्धो ज्ञातः । येन प्रस्तरदेवतासङ्कीर्त्तनं भवेदिति । यच्चाग्निरिदꣳ हविरिति सन्निहितप्रस्तराभिनिर्देशक इति । तदपि प्रस्तरस्य प्रतिपाद्यस्य हविष्ट्वानुपपत्तेः तत्प्रतिनिर्देशाभावात्पुरोडाशादिविषयमेव । यच्चायुरादिफलसङ्कीर्त्तनं तदपि स्तुतिमात्रपरम् । न ह्यायुरादिफलता प्रस्तरप्रहरणस्य वाक्यादवगता । न च मन्त्रे सङ्कीर्त्तनमात्रादेव निर्ज्ञातप्रधानसम्बन्धस्य फलवत्ता शक्याऽभ्युपगन्तुम् । न चाफलवत् फलवतोऽङ्गं भवति वचनमन्तरेण । तस्मान्नाङ्गिलक्षणः संयोग इति । प्रयोजनं प्रस्तरप्रहरणाभावेप्यातिथ्यादौ सूक्तवाकः प्रयुज्यत एव ॥ १३१ ॥

अग्नीदाहानुप्रहरेति ॥ १३२ ॥

अग्नीद्वचनं न कर्त्तव्यम् । प्रैषार्थेध्वर्युः प्रैषेचाग्नीदित्युक्तत्वात्स्वयं चाविरोधादित्यत्र । तेन वरुणप्रघासादिष्वविपरिणामार्थमिति केचित् । तत्कथम् । वचनात् । वचनं हि तत्र भवति । अथाग्नीदाहानुप्रहरेति ता उभावेवानुप्रहरत इति । तदेतदसत् । न हि वरुणप्रघासेष्वनुप्रहरेत्यस्य विपरिणामो न युज्यते । प्रकृतौ प्रहरणक्रियाकर्तुरेकस्य प्रैषणम् । विकृतौ द्वयोः कर्त्रोरिति । न च भेदेन प्रैषदानं प्रयोगवचनो मा बाधीति । तस्माद्युक्तरूप ऊहः । न च तत्राग्नीदाहानुप्रहरेति विधानम् । प्रकृतितः प्राप्तत्वात् । अतो यथाप्राप्तस्यानुवादोयम् । अतः श्रुत्यनुकरणमेतत् । अथवा ऽध्वर्योः प्रैषार्थकर्तृत्वे सति यः कश्चिदध्येषणायां स्यात्तत्राध्वर्युप्रत्यासत्तेरग्नीद्यथा स्यादित्येवमर्थमग्नीद्ग्रहणम् । न्यायतः प्राप्त एव चात्राग्नीदभिधीयते अन्यत्रापि स एव यथा स्यादिति । यथा हन्त्यन्यो दृषदुपले इति । यथा

चातः पत्न्यवहन्त्यन्यो वेति । एवं च सत्यनेनैव न्यायेन ज्योतिष्टोमे प्रतिप्रस्थातुः प्रैषे ऽधिकारः । अपि चाह—

उक्तत्वात्प्रेषणेऽन्यस्य तद्विशेषो वसीयते ।
तेन सूत्रकृता प्रोक्तमग्नीद्ग्रहणमत्र तु ॥ १३२ ॥

प्रास्य तृणं चक्षुष्पा इत्यात्मानमालभते ॥ १३३ ॥

प्रस्तरसम्बद्धं तृणमाहवनीये प्रास्य चक्षुष्पा इत्यात्मानमालभते । स चायं तृणप्रहरणे सति भवति । तेनो अप्यात्मानं नानुप्रवृणक्तीति लिङ्गात् । करिष्यमाणप्रयोजनात्मसंस्कार इत्यपरे । तथा च सर्वत्र प्रवृत्तिः ॥ १३३ ॥

सम्वदस्वागानग्नीदगञ्छ्रावय श्रौषट् स्वगादैव्या होतृभ्यः स्वस्तिर्मानुषेभ्यः शंयोर्ब्रूहीत्येतेषां सम्वदस्वागञ्छ्रौषडित्यग्नीच्छेषमितरो व्यत्यासं ब्रूतः ॥ १३४ ॥

सम्वदस्वेत्येवमादीनां सम्वदस्वागञ्छ्रौषडित्यग्नीदाह शेषं चाध्वर्युर्व्यत्यासेन । तस्य चास्य शंयोर्वाकार्थत्वात्तदभावे निवृत्तिः । शंयोर्वाकश्चार्थकर्मत्वाद्यावदुक्ते निवर्त्तते ॥ १३४ ॥

परिधीननुप्रहरति यं परिधिमिति प्रथममितरौ च युगपदग्नेः प्रियमिति ॥ १३५ ॥

प्रतिपत्तिश्चरितार्थत्वात् । ततश्च यावदुक्तान्तापच्छिन्नयोरपि प्रवृत्तिः । प्रहरणमन्त्रयोश्चाग्न्याभिधायकत्वादवभृथे विपरिणामः ॥ १३५ ॥

स्रुचौ प्रगृह्णाति सं स्रवभागा इति सं स्रवां जुहोति ॥ १३६ ॥

प्रग्रहणे मन्त्रः स्यात् । स सम्प्रगृह्णाति सं स्रवभागास्थेति वचनात् । होमे वा स्वाहाकारवषट्कारयोस्तदर्थत्वात् । तयोश्च तत्र भा-

वालिङ्गाच्च । तद्यथावषट्कृतं हुतमेवमस्यैतद्भवतीति । यत्पुनर्वचनं तद्धोमोपलक्षणार्थम् । प्रतिपत्त्यर्थकर्म चैतत् । ततश्चान्तापच्छिन्नेऽपि प्रवर्त्तते । अविशेषितत्वाच्च संस्रवाणां नाज्यसाधनयागशेषभूतता । अतश्च सर्वत्र प्रवृत्तिः । विश्वे देवाश्चात्र देवता । इमां वाचमभिविश्वे गृणन्त इति मन्त्रलिङ्गात् । वाक्यशेषाच्च । स वै विश्वेभ्यो देवेभ्यः सम्प्रगृह्णातीति । एवं च सति दर्विहोमेषु विश्वेभ्यो देवेभ्यः स्वाहेति होमः । अथ जुहूं चौपभृतं च सम्प्रगृह्णातीति द्वयोः प्रग्रहणविधानसामर्थ्यात् उभाभ्यामपि होमः ॥ १३६ ॥

घृताची इति धुरि निदधात्यनसि-
वद्ग्रहणम् ॥ १३७ ॥

घृताची इत्यनेन मन्त्रेण धुरि स्रुचौ निदधाति । चरितार्थत्वाद्द्रव्यसंस्कारः । अतश्चान्तापच्छिन्नेऽपि प्रवृत्तिः । अयं धुर्यशब्दः कैश्चित् पत्नीयजमानविषयतया वर्ण्यते । धुर्याविव धुर्यौ । यथा धुर्यावनड्वाहावनसः प्रणेतारौ एवं दम्पती अपि यज्ञस्येति । एवं च सति पितृयज्ञे धुर्यं पाहीति विपरिणामः । पत्न्यभावात् । सम्प्रदाये तु नेष्यते । धुर्यशब्दस्यानडुद्विषयत्वात् । यद्यपि च तावत्र नस्त एव तथापि त्वनसानडुत्सम्बन्धोऽस्तीति । तत्र निधीयमानाभ्यां स्रुग्भ्यां तद्धिंसा मा भूदिति धुर्यौ पातमिति स्रुगभिधानं युक्तरूपम् ॥ १३७ ॥

स्फ्ये पात्र्यां चेत् ॥ १३८ ॥

पात्र्यां चेद्ग्रहणं स्फ्ये सादयति ॥ १३८ ॥

यज्ञ नमश्च त इति वेदिमालभते ॥ १३९ ॥

स चायं वेदिसंस्कारः समिष्टयजुः साधनभूतद्रव्यप्रयुक्तः । ततश्च तदभावे ऽभाव इति ॥ १३९ ॥

वेदं होता स्रुक्स्रुवमध्वर्युराज्यस्थली-
मग्नीदादाय पत्नीसंयाजेभ्यो गार्हपत्यं
गच्छन्ति ॥ १४० ॥

तेवै पत्नीः संयाजयिष्यन्तः प्रतिपरायन्तीति प्रकृत्य जुहूं च स्रुवं चाध्वर्युरादत्ते वेदꣳ होताज्यविलापनीमग्नीदिति ह्यामनन्ति । प्रतिपरायन्तीति वचनाद्गार्हपत्यो गम्यते । विकृत्यनुप्रवृत्तिदर्शनाच्च । गृहपतेरेव गार्हपत्ये जाघन्या पत्नीः संयाजयन्तीति । स्रुवग्रहणं च उपभृद्व्युदासार्थम् । उपभरणार्थे न हि तत्प्राप्तिरिति ॥ १४० ॥

अध्वर्युः पूर्वदक्षिणेन गार्हपत्यमेत्य पूर्वेणापरेणान्तरेण पत्नीमेकेषाम् ॥ १४१ ॥

पूर्वेणाहवनीयम् । अपरेण वा गार्हपत्यम् । तत्राप्येकेषामन्तरेणा वाह्यतो वा पत्नीमिति ॥ १४१ ॥

१उपविश्य दक्षिणं जान्वाच्य ॥ १४२ ॥

सोमादीन्यजति ॥ १४२ ॥

अधिकारमुपजीवन्नाह—

एवꣳ सर्वत्रोपविष्टहोमेषु ॥ १४३ ॥

उपविश्य दक्षिणं जान्वाच्य । यजतित्वात्तिष्ठति क्रियायां प्राप्तायां उपविश्येत्युच्यते । जान्वञ्चनं च भूमौ पातनं समाचाराल्लिङ्गाच्च । ततो देवा यज्ञोपवीतिनो भूत्वा दक्षिणं जान्वाच्योपासीदन्निति ॥ १४३ ॥

उपाꣳशु चरन्ति ॥ १४४ ॥

पत्नी संयाजैरिति ॥ १४४ ॥

अधिकारमुपजीवन्नाह—

चरणशब्दे सर्वं देवतान्यत्र ॥ १४५ ॥

यत्र चरणशब्दस्तत्र सर्वमुपांशु भवति । तथा पितृयज्ञ उपांशु चरन्तीति । देवतान्यत्र, चरणशब्दादन्यत्रोपांशुत्वश्रवणे देवतामात्रमुपांशु ॥ १४५ ॥

---

१ यजतित्वात्तिष्ठद्धोमे प्राप्ते आह उपविश्येति ।

यजति सोमं त्वष्टारं देवनां पत्नीरग्निं गृहपतिमिति ॥ १४६ ॥

स्थाल्येनाज्येन सोमादीन्यजति । चतस्रो देवतायजतीति प्रकृत्याह ता वा आज्यहविषा भवन्तीति ॥ १४६ ॥

तृतीयेऽन्तर्द्धानं पुरस्तात् ॥ १४७ ॥

तृतीये पत्नीसंयाजे पुरस्तात्कटादिनान्तर्द्धानं, स यत्र देवानां पत्नीर्यजति तत्पुरस्तात्तिरः करोतीति श्रुतेः ॥ १४७ ॥

पत्न्यन्वारभतेध्वर्युम् ॥ १४८ ॥

अधिकारात्तृतीय एव पत्नीसंयाजेन्वारम्भः । अध्वर्युग्रहणाच्च न द्रव्यान्वारम्भः । स चायमध्वर्युसंस्कारो द्वितीयानिर्देशात् । ततश्च पत्न्यभावेपि यः कश्चित्करोति ॥ १४८ ॥

शंय्वन्तं भवतीडान्तं वा ॥ १४९ ॥

यदेतत्पत्नीसंयाजकर्म तच्छय्वन्तमिडान्तं भवति । न चात्र विकल्पः । शंयुरिडा वान्ते भवति, किं तर्हि इडाभवत्यत्र । शंयोर्विकल्पः । कुत एतद्यत इदमामनन्ति । तदिडान्तं भवतीति कृत्य उतो प्रस्तरस्यैव रूपं क्रियते स यदि प्रस्तरस्य रूपं कुर्यात् वेदस्यैकं तृणमाच्छिद्येत्येवमादि यावच्छंयोर्ब्रूहीति१ ॥ १४९ ॥

शंय्वन्ते वेदतृणमादायानक्ति प्रस्तरवत्स्रुचि स्रुवे स्थाल्यां च ॥ १५० ॥

---

१ गृहपतियागानन्तरं पूर्ववदिडां पञ्चावत्तामादायेडां होत्रे प्रदायाविसृजन्दक्षिणातिक्रामतीडां प्रतिगृह्य होतुरङ्गुलिपर्वणी अनक्त्यवान्तरेडामादधाति पूर्ववदिडां च सर्वेन्वारभन्ते मयीदमिति यजमानो जपत्युपहूतां प्राश्नन्ति युक्ता यजमानश्च पवित्रयोरभावाद्दर्भैर्मार्जयन्ते ऽपरेण वेदिं सुमित्रियान इत्येतावदिडान्तं भवतीत्यभिप्रायः ।

शंय्वन्ते कर्मणि वेदतृणं गृहीत्वा प्रस्तरवदनक्ति अग्रं जुह्वां मध्यं स्रुवे बुध्नं[1] स्थाल्यां व्यन्तु वय इत्यनेन मन्त्रेण अनक्ति । प्रस्तरवदित्युपदेशात् ॥ १५० ॥

अग्नीदाहानुप्रहरेति ॥ १५१ ॥

कृतं व्याख्यानम ॥ १५१ ॥

प्रास्य तृणादि पूर्ववत् ॥ १५२ ॥

प्रास्यतृणं तदादि पूर्ववत्कर्म भवति ॥ १५२ ॥

शंय्वन्ते स्रुक् स्रुवं प्रगृह्यात्यग्ने दब्धायविति ॥ १५३ ॥

शंयोर्वाकान्ते स्रुक् स्रुवं प्रगृह्णाति अग्नेदब्धायविति जुहोति । अधिकाराद्गार्हपत्ये । प्रतिपत्त्यर्थकर्म चैतत् । पत्नीसंयाजशेषत्वाच्च तदभावे निवृत्तिः । न च पशौ भवति । प्रतिपाद्यद्रव्याभावात् । पत्नीसंयाजानां चार्थकर्मत्वाद्यावदुक्ते निवृत्तिः ॥ १५३ ॥

सव्येनावृत्य दाक्षिणाग्नौ जुहोत्यग्नय इति सरस्वत्या इति च ॥ १५४ ॥

सव्यावर्त्तनविधानशास्त्राभावादतीत्य निष्क्रमणप्रज्ञापनार्थम् । ततश्च यदि पूर्व्वदक्षिणेन गार्हपत्यं प्रविष्टस्तदेतद्भवति नेतरत्र । तत्रापि केचित्सव्येनावृत्य इडां करोतीति सूत्रमभिसम्बन्धयन्ति । होमार्थत्वात्प्रवेशनस्य । तदयुक्तम् । अव्यवहितसम्बन्धेपि तदर्थोपपत्तेः । न च होमायैव प्रवेशनम् । विशेषानवगतेः । अतः साङ्गपत्नीसंयाजनिवृत्युत्तरकालमतीत्य निष्क्रमणम् । तेन सव्येनावृत्य दक्षिणाग्नौ जुहोतीति एवमभिसम्बन्धः । तच्चैतदर्थकर्म ततश्च यावदुक्तान्तापच्छिन्नादौ निवृत्तिः ॥ १५४ ॥

उलूखले मुसले यच्च शूर्पे आशिश्लेष दृषदि यत् कपाले उत्प्रुषो विप्रुषः सत्याः सन्तु

---

[1] ' बुध्नम ' मूलमित्यर्थः ।

यजमानस्य कामाः स्वाहेति पिष्टलेपां जुहोति ॥ १५५ ॥

अधिकाराद्दक्षिणाग्नावेव । पिष्टलेपसाधनत्वाच्च तच्छब्देनाहुत्यभिधानम् । अथवा पिष्टसम्बन्धिनो लेपास्तैराहुतिरिति । एवं च सति प्रतिपत्तिरेषा ततश्चेडान्तेपि कर्मणि प्रवर्त्तते । यच्च कैश्चिदभिधीयते । आज्याहुतिरेषेति । तदपि पिष्टलेपग्रहणादवसन्नम् । प्रतिपाद्यमानेपि हि द्रव्ये जुहोति संशब्दनादत्र देवतया भवितव्यम् । देवतोद्देशेन हि परित्यक्तस्य द्रव्यस्य प्रक्षेपे जुहोति शब्दो वर्त्तते । न चात्र देवता गम्यते । तद्धितेन चतुर्थ्या वा । मन्त्रोपि चानिर्दिष्टदेवता लिङ्ग एव । उलूखलादीनां चात्रोपादानमाश्लिष्टविशेषणत्वेन न देवतात्वेन । यदुलूखलादिष्वाश्लिष्टं तज्जुहोतीति सम्बन्धो न तेभ्य इति । कामानामपि चात्र सत्यता प्रार्थ्यते । ततश्च तेषामपि न देवतात्वम् । एवञ्चानवगतदेवताको होम इत्यनुपपन्नम । अत्रोच्यते । अनादिष्टदेवतालिङ्गेष्वपि मन्त्रेषु देवतापेक्षायां सत्यां किं यत्किञ्चिद्देवतान्तरं परिकल्प्यतामुत प्रकृतैव गृह्यतामिति । तत्र प्रकृतपरिग्रहोन्याय्यः । सन्निधानात् । अप्रकृतोपदाने पुनरसन्निधानात्सन्देह इति । तथा च नैरुक्ताः । तद्येनादिष्टदेवतामन्त्रास्तेषु देवतोपपरीक्षा यद्देवतः स यज्ञो वा यज्ञाङ्गं वा तद्देवता भवतीति । तत्राप्याग्नेयोपांशुयाजाग्नीषोमीयसन्निधाने पुरोडाशसम्बन्धिनः पिष्टलेपा इति सन्निधानविशेषादाग्नेयाग्नीषोमीयदेवतापरिकल्पनं न्याय्यतरम् । तदुद्देशेन हि तद्द्रव्यं गृहीतं यच्छेषोयमिति । उपांशु याजसान्नाय्यदेवतानामसम्बन्धादतद्देवतात्वम् । केचित्तु सम्बन्धाविशेषे सत्यप्येकयैव देवतया कार्याभिनिर्वृत्तेर्मुख्यत्वादग्निमेव प्रकल्पयन्ति । विकारेतर्हि कथम् । तत्रापि वैकृतदेवताभिसम्बन्धात् तद्देवत्यत्वपरिकल्पने प्राप्त उच्यते । प्रकृतदेवताभिस्तद्वानेव मन्त्रो विकृतिमुपाच्छेतीति न वैकृत्यदेवता घटते । न ह्यस्य विकृतौ पाठ इति । तस्माद्विकृतावपि प्रकृतदेवताकत्वमेवेति ॥ १५५ ॥

पत्नी वेदं प्रमुञ्चति वेदोसीति योक्त्रं च प्रमामुञ्चामि वरुणस्य पाशाद्येन मा बध्ना-

त्सविता सुशेवः ऋतस्य योनौ सुकृतस्य लोकेऽरिष्टां मा सह पत्या दधात्विति ॥१५६॥

च शब्दात्पत्न्येव, कृतप्रयोजनत्वात्प्रतिपत्तिरूपता । ततश्चान्तापच्छिन्नेपि प्रवृत्तिः ॥ १५६ ॥

स्तृणात्यावेदेः ॥ १५७ ॥

तꣳ होता आवेदेस्तृणातीत्येतच्छ्रूयते । द्रव्यविषयोयमाङ्शब्दप्रयोग इति मर्यादा प्रतिपत्तव्या । कर्मविषये त्वभिविधिरिति परिभाषितम् । आमुष्मादिति कर्मसु तच्चेति । अथ हौत्रे स्पष्टतरं वचनं ततोत्राप्यभिविधिरस्तु ॥ १५७ ॥

ध्रौवꣳ समिष्टयजुर्जुहोति देवागातु विद इति ॥१५८॥

समिष्टयजुरिति कर्मणः संज्ञा । समिष्टयजुरन्तं भवतीत्येवमाद्यर्थः । जुह्वा वचन इति जुह्वैव होमः । जुहोतित्वाच्चोपविष्टस्य । तिष्ठन् ध्रुवया समिष्टयजुर्जुहोतीति तु नोपनिबद्धम् । अर्थकर्मचैतत् । ततश्चान्तापच्छिन्ने निवृत्तिः । वातश्चात्र देवता । स्वाहा वातेधा इति लिङ्गात् । ननु च देवागातु विद इति सम्बुद्धिनिर्दिष्टानां देवानां देवतात्वमस्तु । नेत्युच्यते । न हि ते हविः सम्बन्धितया सम्बोध्यन्ते । किं तर्हि विसर्गाय देवागातु विदोगातुं यज्ञं वित्वा गातुं गन्तव्यमितो गच्छतेति । तथा च लिङ्गम् । तदेतेन यथायथं व्यवसृजन्तीति । तेन विसर्गाय सम्बोधनम् । मनसस्पतेस्तर्हि देवतात्वमस्तु । तस्य हि सम्बोधनं मनसस्पत इमं देवयज्ञमिति देवयज्ञसम्बन्धस्तस्यावसीयत इति । नैतदेवम् । तस्यापि ह्यत्र पारार्थ्येनैव श्रवणम् । मनसस्पतिरुच्यते इमं यज्ञं वाते धेहीति । न यज्ञसम्बन्धो मनसस्पतेः । गतेषु देवेषु मनसस्पतिरिमं यज्ञं वाते स्थापयत्वित्याशास्यते । एवं सप्तमीनिर्दिष्टस्यापि तस्यैव देवतात्वमनुरूपतरम् । यज्ञशब्देन चात्र लक्षणया द्रव्यं वोच्यते, कर्मवा । द्रव्यवचनत्वे द्रव्यस्य वेति स्थापनं तदुद्देशांशेनैवोपपद्यते, नान्यथा । कर्मवचनेपि च कर्मणोपि तत्साधनभावाभ्युपगमने वाते ऽवस्थानमुपपद्यते । तस्माद्वात एवात्र देवतेति । प्रयोजनं जुहोतौ वाताय स्वाहेति प्रयोगः ॥ १५८ ॥

बर्हिः सम्बर्हिरिति ॥ १५९ ॥

जुहोतीति वर्त्तते । सम्बर्हिरित्यनेन मन्त्रेण बर्हिर्जुहोति । प्रतिपत्तिश्चरितार्थत्वात् । तश्चान्तापच्छिन्नेप्यनिवृत्तिः ॥ १५९ ॥

वेद्यां प्रणीतानिनयति परीत्य कस्त्वेति ॥ १६० ॥

परिगमनं कर्तुरेव न प्रणीतानाम् । तत्परिगमने हि प्रणीये-त्येवमवक्ष्यत् । प्रतिपत्तिश्चरितार्थत्वादिति । प्रणीतासम्बन्धादाह-वनीयं परीत्येति ॥ १६० ॥

पुरोडाशकपालेन कणानपास्यत्यधः कृष्णा-जिनं रक्षसामिति ॥ १६१ ॥

पुरोडाशकपालयोर्भूतपूर्वगत्या सम्बन्धविवक्षेयम् । न हि व-र्त्तमानः कपालस्य पुरोडाशेन सम्बन्धोस्ति । तस्य करणत्वेन निर्दे-शाद्यद्यपि पुरोडाशो नास्ति यथा चर्विष्ट्यां तत्रापि कपालमात्रमुपादे-यम् । तच्चैतद्देवताभिसम्बन्धात्प्रतिपत्त्यर्थकर्म कैश्चिदिष्यते । देवता-भिसम्बन्धश्च मन्त्रवर्णाद्रक्षसां भागोसीति । वाक्यशेषाच्च । ततो देवाः सर्वं यज्ञं संवृज्येति प्रकृत्य । अथ यत्पापिष्ठं यज्ञस्य भागधेय-मासीत्तेनैनां निरभजन्नस्नापशोः फलीकरणैर्हविर्यज्ञादिति रक्षांसि फलीकरणैर्निर्भक्तानीत्याह । ततश्च तेषां देवतात्वमिति । नैतदेवमि-त्यपरे । न ह्यत्र देवता चोद्यते । नात्र चतुर्थीतद्धितो वा । येन देवता-गम्यते । मन्त्रवर्णादपि देवताकल्प्यते यत्र जुहोति चोदना । तत्र हि देवतोद्देशेन परित्यक्तस्य द्रव्यस्य प्रक्षेपो युज्यते । तत्रावश्यम्भावि-न्यां देवतायां मन्त्रवर्णस्य च क्रियासाधनाभिधायित्वसामर्थ्यात्ततो देवतापरिकल्प्यते । न चेह होमश्चोद्यते । तस्मान्न देवता प-रिकल्प्यते । मन्त्रवर्णवाक्यशेषो त्वर्थवादप्रायः प्रयोजनं न देवता-भिधानमत्र । न चायं रक्षोभिधायकः । द्रव्यपरत्वान्निर्देशस्य । ततश्च नोदकोपस्पर्शनमत्र ॥ १६१ ॥

पूर्णपात्रं निनयति परीत्य सन्ततं यजमानो-

अञ्जलिना प्रति गृह्णाति संवर्च्चसेति ॥ १६२ ॥

आहवनीयं परीत्य पूर्णपात्रं निनयति । संस्थिते यज्ञे दक्षिणतः परीत्य पूर्णपात्रं निनयतीति वचनात् । सन्ततमित्यव्यवच्छिन्नम् । यजमानश्च तदञ्जलिना प्रतिगृह्णाति संवर्च्चसमित्यनेन मन्त्रेण । पदार्थश्चायं ततश्चान्तापच्छिन्ने निवर्त्तते । तत्रैतद्विचार्यते । किं नयनं प्रधानमुत ग्रहणमिति? । किं चातः । यदि निनयनस्य प्राधान्यम् । प्रोषितेऽपि यजमान इहैव कर्त्तव्यम् । अथ ग्रहणस्य प्राधान्यम् । यत्र यजमानस्तत्र पूर्णपात्रो निनेयः । पूर्णपात्रं निनयतीति वचनात् निनयनस्य प्रधानताग्रहणस्य तु तादर्थ्यम्।तदञ्जलिना प्रतिगृह्णातीति ग्रहणार्थता वा निनयनस्य । चोदितत्वाविशेषात् । दृष्टोपकाराभिनिर्वृत्तेश्च । सञ्जनयति हि निनयनं ग्रहणस्य दृष्टमुपकारम् । अन्यथा ग्रहणानभिनिर्वृत्तिः । न तु ग्रहणं निनयनस्य दृष्टोपकारोपजनकम् । तदभावेपि निनयनोपपत्तेः । तस्माद्ग्रहणार्थं निनयनमिति द्वादशाहे सर्वैर्ग्राह्यः ॥ १६२ ॥

मुखं विमृष्टे ॥ १६३ ॥

अधिकाराद्यजमान एव ॥ १६३ ॥

विष्णुक्रमान्क्रमते दिवि विष्णुरिति प्रति मन्त्रं पृथिव्यामितीत ऊर्ध्वो वा ॥ ६४ ॥

पृथिव्यामिति इतो मन्त्रपदादूर्ध्वो वा । क्रमणं तु प्रागुदग्वाऽयमपि पदार्थ एव ॥ १६४ ॥

अस्मादन्नादिति भागमवेक्षते ॥ १६५ ॥

साकाङ्क्षत्वान्निर्भक्त इत्यनुषङ्गः । भागसंस्काराच्चान्तलुप्तेपि प्रवृत्तिः । एतस्मादेव बहुयजमानकेष्वेकः करोति । स्वांशावेक्षणमित्यपरे । एककर्तृकत्वे चान्वारम्भः ॥ १६५ ॥

अस्यै प्रतिष्ठाया इति भूमिम् ॥ १६६ ॥

अवेक्षत इति क्रियापदानुषङ्गः । मन्त्रे च ततोनिर्भक्त इत्येवमादि । स चायं पदार्थोऽर्थकर्मत्वादन्तलुप्ते निवर्त्तते ॥ १६६ ॥

अगन्मस्वरिति प्राङ् ॥ १६७ ॥

ईक्षत इति वर्त्तते । एतदप्यर्थकर्मैव । नात्र प्रतिपत्तिरूपतेति ॥ १६७ ॥

संज्योतिषेत्याहवनीयम् ॥ १६८ ॥

ईक्षत इति च वर्त्तते । अप्रत्तिपत्तिरूपत्वादेतदप्यर्थकर्म । ज्योतिषा हि सम्भवनमत्रप्रार्थ्यते । तेन यागसाधनभूताहवनीय इत्यसम्बन्धेपि सति न तत्संस्कारपरिकल्पनम् । एवं चान्तलोपे निवृत्तिः ॥ १६८ ॥

स्वयम्भूरिति सूर्यम् ॥ १६९ ॥

स्वयम्भूरित्यनेन मन्त्रेण सूर्यमवेक्षते ॥ १६९ ॥

वर्च्चोदा इति यं वा कामं कामयते ॥ १७० ॥

वर्च्चोदा असीत्यत्र मन्त्रप्रयोगः । यं वा कामं कामयते तद्वाचि पदप्रयोगो वा । सूर्यावेक्षणमपि अर्थकर्म एव ॥ १७० ॥

सूर्यस्येत्यावर्त्तते प्रदक्षिणम् ॥ १७१ ॥

प्रदक्षिणग्रहणादितरथावृत्तिव्युदासः । अथवा श्रौतमेतदिति । आवृत्तिसामन्त्येषु प्रदक्षिणमिति तस्मार्त्तम् । श्रौते सति कोविशेष इति चेत् । श्रौतं प्रायश्चित्तं तदपचारे यथा स्यादिति ॥ १७१ ॥

प्रदक्षिणाधिकारमुपजीवन्नाह—

ग्रहग्रहणप्रतिगरहोमेषु च तूष्णीम् ॥ १७२ ॥

ग्रहग्रहणादिषु तूष्णीं प्रदक्षिणावर्त्तनम्[1] ॥ १७२ ॥

---

[1] कर्त्तव्यमिति शेषः । इदमत्रानुसन्धेयम्, सशस्त्रग्रहेष्वेवायं धर्मः न शस्त्रमात्रे प्रतीगीर्ये न ग्रहग्रहणमात्रे न होममात्रे इति । प्रदक्षिणक्रियाशेषत्वान्मन्त्रोपि प्राप्तस्तूष्णीमित्यनेन व्यावर्त्यत इति ।

गार्हपत्यमुपतिष्ठतेऽग्ने गृहपत इति शत
हि मा इति ब्रूयाद्वा ॥ १७३ ॥

नवेति मन्त्रे विशेषः । एतदप्यर्थकर्म ॥ १७३ ॥

सूर्यस्येत्यावर्त्तते प्रदक्षिणम् ॥ १७४ ॥

गच्छति प्राङुरु विष्णविति ॥ १७५ ॥

ततोसि तन्तुरस्यनुमा तनुह्यस्मिन्यज्ञे ऽस्या
साधुकृत्यायामस्मिन्नन्ने ऽस्मिल्लोक इदं मे
कर्मेदं वीर्यं पुत्रोऽनुसन्तनोत्विति पुत्रस्य
नाम गृह्णाति ॥ १७६ ॥

पुत्रस्याशीः प्रार्थनार्थत्वाद्द्वादशाहे प्रतियजमाने पुत्रनाम ग्रहणम् ॥ १७४ ॥ १७५ ॥ १७६ ॥

आत्मनो ऽविद्यमाने तन्तवे त्वा ज्यो-
तिषे त्वेति वा ॥ १७७ ॥

अविद्यमाने पुत्रे आत्मनो नाम गृह्णीयात् । तत्स्थाने तन्तवे त्वा-ज्योतिषत्वेति वा प्रयोगः ॥ १७७ ॥

आहवनीयमुपतिष्ठते तूष्णीम् ॥ १७८ ॥

मन्त्राभावाल्लौकिकवागुच्चारणप्रतिषेधः ॥ १७८ ॥

व्रतं विसृजते येनोपेयात् ॥ १७९ ॥

येन मन्त्रेणोपेयात्तेनैवोत्सर्गः ॥ १७९ ॥

संयज्ञपतिराशिषेति भागं प्राश्नाति ॥ १८० ॥

साकाङ्क्षत्वात् युज्यतामित्यध्याहारः । व्रतविसर्गभागप्राशन-

नयोरन्तापच्छिन्नेपि प्रवृत्तिः प्रतिपत्तिरूपत्वात् ॥ १८० ॥

ब्राह्मणं तर्प्पयितवै ब्रूयाद्यज्ञमेवैतत्तर्प्पयतीति श्रुतेः ॥ १८१ ॥

श्रुत्युपादानसामर्थ्यात्तदनुष्ठानं यथा स्यात् प्रैषवचनमात्रमेव मा भूदिति ॥ १८१ ॥

इत्युपाध्यायकर्ककृतौ कात्यायनसूत्रविवरणे
तृतीयोऽध्यायः समाप्तः ।

# चतुर्थोऽध्यायः ।

## अपराह्णे पिण्डपितृयज्ञश्चन्द्रादर्शने ऽमावास्यायाम् ॥ १ ॥

श्रुत्यर्थमनुविधित्सुनाचार्येण पौर्णमासमनुविहितमिदानीमवसरप्राप्तं दर्शस्यानुविधानं कर्त्तव्यम, तत्र च प्राक्कालीनः पिण्डपितृयज्ञः सोनुविधेय इत्यत आह । अपराह्णे पिण्डपितृयज्ञः । अन्होपरोभाग अपराह्णः । तृतीयो भाग इत्यपरे वाक्यशेषात् । पूर्वाह्णो वै देवानामित्युपक्रम्य अपराह्णः पितृणामिति । पिण्डपितृयज्ञ इति पिण्डदानकर्मनाम । अर्थानुगमात्संज्ञेयम यौगिकी पिण्डैः पितृणां यज्ञः पिण्डपितृयज्ञ इति । होमस्य च तादर्थ्यदर्शनात् । स देवैः प्रसूतोथैतत्पितृभ्यो ददातीति । मासि मासि वोशनमिति च प्रकृत्य यदैवैष न पुरस्तान्न पश्चाद्ददृशेथैभ्यो ददातीत्याह पिण्डदानमेवाभिधीयते । न जपहोमादि । प्रयोजनं तद्करणेभ्यावृत्तिः । चन्द्रादर्शनमभ्रादिनापि भवति, तन्माभूदित्यमावास्यया विशेष्यते । तदेवोच्यतामिति चेत्, न अमावास्या शब्दस्य कर्मविषयतापि दृश्यते । चतुर्होत्रा पौर्णमासीमभिमृशेत्पञ्चहोत्रामावास्यामिति । तत्र को दोषः । चतुर्दश्युपवासपक्षेपि प्राप्नोति । अस्तुतथेति चेत् । न श्रुतिविरोधात् । यदैवैष न पुरस्तान्न पश्चाद्ददृश इति । अनेन च क्षयो लक्ष्यते तस्मिन् क्षीणे ददातीति श्रूयते । स च परमः क्षयः । इतरस्तु प्रत्यहमेव भवति । एवं च सति परमक्षयविशिष्ट एव काले पिण्डपितृयज्ञो नान्यत्रेति । यथा राजसूये पक्षमध्य अमावास्ये दाक्षायणीच । खर्विकामावास्यायां दृष्टेपि चन्द्रमस्यपराह्णे परमक्षय इति क्रियत एव काले पिण्डपितृयज्ञः । यदैवैष न पुरस्तान्न पश्चाद्ददृश इति क्षयोपलक्षणार्थत्वात् । तस्मिन्क्षीणे ददातीत्यथ यदक्षीणे दद्यात्समदं ह कुर्याद्देवेभ्यश्च पितृभ्यश्चेति ॥ १ ॥

दक्षिणाग्नौ श्रपणꣳ होमश्च ॥ २ ॥

गार्हपत्याहवनीयापवादोयं वचनात् ॥ २ ॥

परिस्तीर्य तं पूर्ववत्पात्रासादनमेकशः ॥ ३ ॥

तमित्यवाच्यमाने न ज्ञायते कस्य परिस्तरणमिति तन्निर्देशः। पूर्ववदिति श्रपणस्य पश्चादुत्तरतश्चार्थवच्चेति । द्वन्द्वता मा भूदेकश इति ॥ ३ ॥

अपरेण गार्हपत्यं चरुमपूर्णꣳ स्रुवं वा तूष्णीं गृहीत्वोत्तरेण दक्षिणाग्निमवहन्ति तिष्ठन् ॥ ४ ॥

स जघनेन गार्हपत्यमिति वचनात् । अपूर्णता चरोः स्रुचश्च । अपूर्णं पितृणामिति । तूष्णीमिति च लौकिकवागुच्चारणप्रतिषेधो, न ह्यत्र मन्त्रप्राप्तिरस्त्यपूर्वत्वात्। उत्तरेण दक्षिणाग्निं तिष्ठन्नवहन्तीति वचनात् ॥ ४ ॥

सकृत्फलीकरोति ॥ ५ ॥

फलीकरणं पुनः पुनर्लोके प्राप्तं सकृदुच्यते ॥ ५ ॥

सारतण्डुलमपूर्णꣳ श्रपयित्वाभिघार्योद्वास्य मेक्षणेन जुहोत्यग्नये इति सोमायेति च ॥ ६ ॥

सारशब्दः सकलतण्डुलवाची । प्रसिद्धेः । ईषत्स्विन्नता वा वाक्यशेषात् । शृताशृतं पितृणामिति । प्रसिद्धिरनैकान्तिकी । गुरुण्यपि सारशब्दप्रयोगात् । पूर्णं वै देवानामर्द्धपूर्णं मनुष्याणामुपर्यर्द्धं पितृणामित्यपूर्णग्रहणम् । श्रपयित्वाभिघारयत्याज्येन । तत्कुतोन्यत्रापि दर्शनात् । आज्येनाभिघार्येति । तच्च यथाकथं चिदभिघारणमात्रं नियमाभावात् । उद्वासनं दक्षिणतः पित्र्यत्वात्। पूर्वेणानीय मेक्षणेन जुहोत्यग्नय इति सोमायेति च । तच्च वैकङ्कतमाहुतिसम्बन्धात् । होमश्च यज्ञोपवीतिना प्राङ्मुखेनैव दैवत्वात् । स उद्वास्याग्नौ द्वे आहुती जुहोति देवेभ्य इति । न वा पित्र्यकर्मा-

ङ्गत्वात् । प्रधानोपचारन्यायाच्चाङ्गानाम् । महापितृयज्ञे च देवाज्यग्रहणे यज्ञोपवीतित्वविधानात् । स यज्ञोपवीती भूत्वाज्यानि गृह्णातीति । प्राप्तानुवाद इति चेत् । नानन्यपरत्वाद्वाक्यस्य । मन्त्रलिङ्गाच्च । कव्यवहनाय पितृमत इति कव्यवाहनः पितृणामिति पितृसम्बन्धात् । तस्मात्पित्र्यवदेव होमः ॥ ७ ॥

प्रास्य तद्दक्षिणेनोल्लिखत्यपहता इत्यपरेण वा ॥ ७ ॥

अग्नौ मेक्षणमभ्यादधातीति । दक्षिणेनापरेण वाग्नेरेव स्फ्येनेति शाखान्तरात् ॥ ८ ॥

उल्मुकं परस्तात्करोति ये रूपाणीति ॥ ८ ॥

लेखायाः ॥ ८ ॥

उदपात्रेणावनेजयत्यपसव्यं सव्येन वोद्धरणसामर्थ्यात् ॥ ९ ॥

अत्राभिनये श्रुतिरुद्घाटितोद्धरणसामर्थ्यादिति । इतीव वै देवेभ्यो जुह्वत्युद्धरन्ति मनुष्येभ्योथैवं पितृणामिति । पाणौ हि तीर्थचतुष्टयम् । अग्रे देवतीर्थम् । मूले मनुष्याणामिति । अथैवमित्यङ्गुष्ठमूलं वा कनिष्ठिकाप्रदेशो वा । तत्राङ्गुष्ठमूलः पितृतीर्थं स्मर्यत इत्यपसव्यमिति । कनिष्ठिकोद्देशे हि सव्यता भवति । सा च पित्र्यनुचितेति ॥ ९ ॥

असाववनेनिक्ष्वेति यजमानस्य पितृप्रभृतित्रीन् ॥ १० ॥

असाविति नामादेशपूर्वकं यजमानस्य पितृप्रभृतित्रीनवनेजयति ॥ १० ॥

उपमूलं सकृदाच्छिन्नानि लेखायां कृत्वा यथावनिक्तं पिण्डान् ददात्यसावेतत्त इति ॥ ११ ॥

अन्नमिति चाध्याहारः । उपरवमूलमित्यन्यपदविग्रहो नित्यसमासः । मूलसमीपे यानि सकृदाच्छिन्नानि तान्युपमूलं दितानि बर्हिस्तृणानि अन्यत्रापि तृणार्थ इत्युक्तत्वात् लेखायां कृत्वा यथावनिक्तं यत्र यत्रावनेजनं कृतं तत्र तत्र पिण्डान् ददात्यसावेत्त इति पितृप्रभृति ॥ ११ ॥

[1]ये चत्वामन्विति चैके ॥ १२ ॥

मन्त्रशेषं कुर्वन्ति ॥ १२ ॥

अत्र पितर इत्युक्त्वोदङ्ङास्त आ तमनात् ॥ १३ ॥

पिण्डानामाभिमुख्येनोक्त्वाऽप्रदक्षिणं गत्वोदङ्ङास्ते [2]तमनादर्वाक् ॥ १३ ॥

आवृत्यामीमदन्तेति जपति ॥ १४ ॥

आवर्त्तनन्तेनैव मार्गेण । अथोपपल्ययय्य जपतीत्युपदेशात् ॥ १४ ॥

अवनेज्य पूर्ववन्नीविं विस्रस्य नमो व
इत्यञ्जलिं करोति ॥ १५ ॥

विस्रंसनोपदेशात्पूर्वमेव नीविमत्परिधानम । प्रति नस्मकारं चाञ्जलिकरणम । षट्कृत्वो नमस्करोतीति वचनात् । षट्कृत्वो नमस्करोतीति सूत्रकारानुपदेशान्नेति चेत् । स्यान्महापितृयज्ञे उक्तत्वात् । षड्वा नमस्कारमिति श्रुतेश्च । तुल्यत्वात् षट् कृत्वो नमस्करोतीति ॥ १५ ॥

---

१ यदि द्विपितृकः स्यादेकैकस्मिन् पिण्डे द्वौ द्वावुपलक्षयेदिति विशेषः । शौनकः 'नामान्यविद्वान् पितः पितामह प्रपितामह' इति । व्याघ्रपात् ' गोत्राज्ञाने काश्यप ' इति ।

२ तमनं ग्लानिः, आ ग्लानिपर्यन्तमित्यर्थः । विष्णुः ' यथाशक्ति प्राणनिरोधं कृत्वासीत ' इति ।

एतद्द इत्युपास्यति सूत्राणि प्रति पिण्डम् ॥ १६ ॥

बहुवचनोपदेशात् त्रिणि त्रीणि ॥ १६ ॥

ऊर्णा दशा वा ॥ १७ ॥

वेति विकल्पः ॥ १७ ॥

वयस्युत्तरे यजमानलोमानि वा ॥ १८ ॥

उत्तरग्रहणादेव यवसी अभिप्रेते । ततश्चोर्ध्वे पञ्चाशतः ॥१८॥

ऊर्जमित्यपो निषिञ्चति ॥ १९ ॥

पिण्डमूलेषु । तर्पयत मेपितृनिति लिङ्गात् ॥ १९ ॥

अवधायावजिघ्रति यजमानः ॥ २० ॥

स चायं यजमानसंस्कारः । स यजमान भाग इति वचनात् । ततश्च नाध्वर्युरवजिघ्रति । अथावजिघ्रति प्रत्यवधाय पिण्डानिति । प्रतिप्रयोगसामर्थ्यादध्वर्युरेव । प्रत्यवधाने ल्यप् प्रयोगान्नेति चेत् । स्यात्कायार्थत्वात् । निरुप्याज्यं प्रातर्दोहनामिति यथा ॥ २० ॥

उल्मुकसकृदाच्छिन्नान्यग्नौ ॥ २१ ॥

अभ्यादधातीति वाक्य शेषः । तत्र च पूर्वं सकृदाच्छिन्नानि तत उल्मुकम् । अग्नौ सकृदाच्छिन्नान्यग्नावभ्यादधाति पुनरुल्मुकमपि सृजतीति वचनात् । अजादित्वादल्पाक्षरत्वाच्च पूर्वनिपातः ॥ २१ ॥

१ आधत्तेति मध्यमपिण्डं पत्नी प्राश्नाति पुत्रकामा ॥ २२ ॥

---

१ पुत्र कामा यजमानपत्नि 'आधत्तगर्भम' इत्यनेन मन्त्रेण मध्यमपिण्डं प्राश्नाति, भुनक्तीति यावत् ।

प्रसवसमर्थेति वाक्यशेषः ॥ २२ ॥

पिण्डपितृयज्ञस्याधिकारनिरूपणायाह—

प्रेतेभ्यो ददाति जीवपितृकोपि जीवान्त-
र्हितेपि ॥ २३ ॥

दानं प्रवर्त्तत एव । पितृशब्दस्याविशेषविषयत्वात् ॥ २३ ॥

जीवत्पितृकस्य होमान्तम् ॥ २४ ॥

कर्म स्यात् ॥ २४ ॥

व्यवेते जातूकर्ण्यः ॥ २५ ॥

कुतः । यस्मान्न जीवेन व्यवेते दानं मेने जातूकर्ण्यः ॥ २५ ॥

किमिति न व्यवेते—

न जीवन्तमतीत्य ददातीति ॥ २६ ॥

शाखान्तरेषु श्रवणात् । अतो होमान्तं कर्म स्यात् । यद्येवमनारम्भ एव श्रेयान् । कुतः । दानस्य प्रधानभूतत्वात् । न च प्रधानाभावेऽङ्गानां प्रवृत्तिरस्ति । अतोनारम्भ एवेत्यवधार्यते । चतुर्दश्युपवासपक्षेऽमावास्यायां पूर्वाह्णे दर्शयागः । तत्र चापराह्णे पश्चात्पिण्डपितृयज्ञः । अमावास्योपवासे पूर्वः प्राप्नोति ॥ २६ ॥

तत्रानियमे प्राप्त आह—

पूर्वो वाङ्गत्वात् पिण्डपितृयज्ञः ॥२७ ॥

पूर्व एव दर्शात्पिण्डपितृयज्ञो न पश्चात् । कुतः । एतदङ्गत्वप्रतिपादकवाक्यात् । पूर्वेद्युः पितृभ्यो यज्ञं निपृणीय प्रातर्देवेभ्यः प्रतनुत इति । अमावास्यायामेव पूर्वो भवति ॥ २७ ॥

इदमेव विचार्यते । किं पिण्डपितृयज्ञो दर्शाङ्गमुतानङ्गमिति? । किं तावत्प्राप्तम् । अनङ्गमिति ब्रूमः—

## प्रकरणकाललिङ्गानुग्रहवचनाहिताग्नि-श्रुतिभ्यो नाङ्गम् ॥ २८ ॥

प्रकरणभेदात् । प्रकरणपठितमङ्गं भवति, न चायं तत्प्रकरणे पठ्यते । किं च कालभेदात् । पूर्वाह्णे पराह्ण इत्यङ्गानां चैककालता भवति । अपि च लिङ्गं भवति । यक्ष्मणा गृहीतः पौर्णमासेन यजेत । पिण्डपितृयज्ञेनैवामावास्यामवरुन्धे आमावस्यमन्तरेणापि पिण्डपितृयज्ञं दर्शयति । तच्चानङ्ग उपपद्यते । अनुग्रहवचनं च पृथग्दर्शाद्भवति । कथमेषां पितृयज्ञोऽनन्तरितो भवतीति । अथाङ्गं स्यात् । कथमेषामावास्यं हविरनन्तरितं भवतीत्युक्ते दध्ना चेत्य-मावास्यानुग्रहेणैवानुगृहीतः पितृयज्ञोऽनुग्रहवचनं पृथक् नोपपद्यते । अपि चानाहिताग्निश्रुतिर्भवति । अथ नाहिताग्निना कार्य इति अङ्गत्वे हि दर्शे असति न क्रियेत । ततोऽप्यनङ्गमिति ॥ २८ ॥

## अङ्गं वा समभिव्याहारात् ॥ २९ ॥

अथवाङ्गं पिण्डपितृयज्ञः । कुत एतत् । समभिव्याहारात् । समित्येकीभावेनाभिव्याहारो वाक्यं वाक्यादित्यर्थः । पूर्वेद्युः पितृभ्यो निक्रयं कृत्वा प्रातर्देवेभ्यः प्रतननम् । यच्च येन विना न भवति तत्तदर्थं, तादर्थ्यलक्षणं तु शेषत्वं, तस्मादङ्गमिति । यत्तु प्रकरणभेदादनङ्गमिति । प्रकरणान्तरसमधीतमप्यङ्गं भवत्येव । यथा प्रवर्ग्यः सौत्रामणी चेति । भिन्नकालमप्यङ्गं भवति । यथाग्निहोत्रार्थमुद्धरणलिङ्गं वचनं द्रष्टव्यम् । अनुग्रहवचनमर्थवादोऽङ्गत्वेऽप्युपपद्यते । अप्यनाहिताग्निना कार्य इति वचनम् । तस्मादङ्गं पिण्डपितृयज्ञ इति ॥२९॥

पिण्डपितृयज्ञः प्राक्कालत्वादनुविहित इदानीमावास्यमनुविधीयते—

## श्वो नोदेतेत्यदृष्टे वा पर्णशाखां छिनत्ति शाल्मलीं वेषेत्वेत्यूर्जेत्वेति ॥ ३० ॥

श्वः न उदेता चन्द्रमा इति ज्ञात्वा पर्णशाखां छिनत्ति । कुत एतत् । तद्धैके दृष्ट्वा उपवसन्तीति वचनात् । अदृष्टे वा । तत्कुतः । अमावास्यायां अमावास्यया यजेतेति श्रुतत्वात् । पर्णः पलाशः । शा-

मीलीं१ वा। शमीमयम् वेत्यर्थः। इषेत्वेत्यूर्जेत्वेति वा तामाच्छिनत्तीषेत्वोर्जेत्वेति हि श्रूयते। न चानयोर्मन्त्रयोः करणत्वात्समुच्चयः ॥३०॥

छिनद्मीति वोभयोः साकाङ्क्षत्वात् ॥ ३१ ॥

छिनद्मीति उभाभ्यां सम्बध्यते। कुतः साकाङ्क्षत्वात्। उभयोश्छेदने विनियुक्तत्वात्। तामाच्छिनत्तीषेत्वोर्जेत्वेति ॥ ३१ ॥

सन्नमयामीति वोत्तरे ॥ ३२ ॥

तत्कुतः। ऊर्जे त्वेत्यनुमार्ष्टीति वचनात्। अनुमार्ष्टीति च प्रगुणीकरणम्। तच्च मन्त्रलिङ्गादेव प्राप्तमाचार्येण नाभिहितम्। एवं च सति द्वावपि मन्त्रौ माध्यन्दिने पाठाच्छेदने विनियुज्येते विकल्पेन। उत्तरस्त्वनुमार्जन एव काण्वपाठात्२ ॥ ३२ ॥

बहुलपलाशामशुष्काग्रां प्रागुदीचीमन्यतमां वा ॥ ३३ ॥

अन्यतमामिति वचनं न सर्वदिग्विषयम्। प्राचीमाहरति उदीचीमाहरति प्रागुदीचीमाहरतीति वचनात् ॥ ३३ ॥

व्रतमुपैति ॥ ३४ ॥

अनिर्ज्ञातकालस्य शाखाच्छेदनस्यावसरविवक्षयेदमुक्तम्। ततश्च व्रतोपायनीयाशनोत्तरकालं छेदनमिति। तत्प्राप्तिश्च प्रकरणाविभागात्। सूत्रकारोपदेशाच्च। पौर्णमासवदन्यदिति ॥ ३४ ॥

व्रतग्रणे नियमो माभूदित्याह—

३यथोक्तं वा ॥ ३५ ॥

---

१ शम्या अवयवः शामीली ताम्, 'शम्याः ष्ट्लञ्, टिड्ढाणञ्' इति पाणिनिसूत्राभ्यां ष्ट्लञ्ङीष्प्रत्ययाभ्यां रूपम्।

२ तथा चापस्तम्बः 'ऊर्जेत्वेति सन्नमयत्यनुमार्ष्टि वा' इति। सन्नमनमृजूकरणम्।

३ यस्मिन् काले वैकल्पिकमुक्तम् तत्र काले वा भवति इह वेति सूत्रार्थः।

## मातृभिर्वत्सान्सꣳसृज्य वत्सꣳ शाखयो पस्पृशति वायव स्थेति ॥ ३६ ॥

संसर्गश्च मेलापकः । वत्सस्य चोद्दिश्यमानत्वात्प्रतिवत्समुपस्पर्शनम् । लिङ्गं चाविवक्षितमुद्दिश्यमानत्वादेव । क्वचिच्चोपदेशात्पुंवत्सामिति । यदि वत्सशब्दः स्त्रीविषयोपि तदैतदुपपद्यते । तथा च पाणिनिः । ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री इति । स्त्री शब्दः साधुर्भवति तरुणेषु पुंशब्द इति । एवं च सति स्त्रीवत्सा अपि गावो गृह्यन्ते ॥ ३६ ॥

## उपायव स्थेति चैके ॥ ३७ ॥

मन्त्रशेषं कुर्वन्ति।उपस्पर्शनं च पृथक्करणार्थं उत्तरसूत्रात्॥३७॥

## देवो व इति मातृणामेकां व्याकृत्य ॥ ३८ ॥

शाखयोपस्पृशति । वत्सेन व्याकृत्येति वचनात् । एकस्याश्चोपस्पर्शने सर्वासां संस्कार इति । कुत एतन्मन्त्रे बहुवचनोपदेशात् । आप्यायध्वमघ्न्या इति । ततश्च वाहिनी दध्येन्द्रमित्यत्र मन्त्रो विपरिणाम्यत इति सम्प्रदायः । अपरे तु न्यायनिगदत्वादविपरिणाममिच्छन्ति । यैवोपस्पृश्यते तस्या एव संस्कार इति । बहुवचनं पूजार्थम् । एता उत्या उषसः केतुमक्रतेति वत् ॥ ३८ ॥

## ऐन्द्रं भवति माहेन्द्रं वा ॥ ३९ ॥

मन्त्रे हीन्द्रशब्द एव दृश्यते स एव मा भूदित्यत आह माहेन्द्रं वेति । अतश्च विकल्पः । तच्च वचनात् । तद्धैके महेन्द्रायेति कुर्वन्ति ॥ ३९ ॥

## यजमानस्य पशूनित्यग्न्यगारस्यान्यतरस्य पुरस्ताच्छाखामुपगूहति ॥ ४० ॥

द्वे ह्यग्न्यगारे तयोरन्यतरस्य पुरस्तादुपगूहनम् । यजमानग्रहणं च पशुविशेषणत्वाद्बहुजमानकेऽपि नोह्यते । पशूनां तु कृत्व-

ङ्गभूतानां पालनमिहेष्यते । ततश्च बहिनीदधनि विपरिणामः ॥ ४० ॥

मूलादुपवेषं करोति ॥ ४१ ॥

वेषोस्युपवेष इति । मूलतः शाखां परिवास्योपवेषं करोतीति वचनात । उपवेषनिष्पत्तौ च मन्त्रः । शाखायाश्च परिवासनं संस्कारः । ततश्च केवलायामामिक्षायां तूष्णीमेव शाखापरिवासनम । परिवासितया हि पयसोपाकरणमिति ॥ ४१ ॥

सान्नाय्ये शाखासंयोगात् ॥ ४२ ॥

सान्नाय्ये एवोपवेष. । कुतः । शाखासंयोगात् । शाखां परिवास्योपवेषं करोतीति ॥ ४२ ॥

उपधानाद्वोभयोः ॥ ४३ ॥

वाशब्दः पक्षव्यावृत्तौ । उपधानार्थत्वादुपवेषस्योभयत्र प्रवृत्तिः । ततश्च शाखाभावे वारणो भवति ॥ ४३ ॥

वसोः पवित्रमिति पवित्रमस्यां बध्नाति कुशौ ॥ ४४ ॥

वसोः पवित्रमित्यनेन मन्त्रेण कुशावेवपवित्रं बध्नाति शाखायाम । ते चैते परिवासनपवित्रबन्धने शाखोपगूहनात्पूर्वे कर्त्तव्ये । अर्थाद्धि पाठो बाध्यत इत्युक्तं विरोधेर्थस्तत्परत्वादिति । पश्चाच्च परिवासनादौ क्रियमाणे सति उपगूहनमदृष्टार्थं स्यात् । दृष्टार्थता चास्याः शाखाया अनाश इति । दृष्टे च सति नादृष्टपरिकल्पना साध्वी । अतः पश्चादुपगूहनमिति ॥ ४४ ॥

त्रिवृद्वा ॥ ४५ ॥

[१]त्रिवृत् वेण्यभिधीयते । तां बध्नाति । वाशब्दो विकल्पार्थः ॥ ४५ ॥

यत्राग्वाग्निहोत्रहोमः सन्नयतस्तां रात्रिम् ॥ ४६ ॥

तां रात्रिमिति वचनात् पक्षमध्ये आमावास्ये न यवागू नियमः ॥ ४६ ॥

---

[१] आपस्तम्बः, 'त्रिवृद्दर्भमयं पवित्रं शाखायां शिथिलमवसजति' इति ।

हुत उपसृष्टां प्रब्रूतादित्याह ॥ ४७ ॥

हुतेऽग्निहोत्रे दोग्धारमाहोपसृष्टां प्रब्रूतादिति ॥ ४७ ॥

प्रोक्ते द्यौरसीति स्थाल्यादानम् ॥ ४८ ॥

उपसृष्टेति प्रोक्ते दोग्धा प्रति प्रश्ने द्यौरसीति स्थाल्यादानम । तच्चाधिश्रयणार्थमतश्च वायव्ये पयसि अधिश्रपणाभावादनादानम । एवं कार्यापत्त्या च वपाश्रपण्योरादाने विपरिणामः । द्यौ स्थः पृथिवी स्थ इति ॥ ४८ ॥

मातरिश्वन इत्यधिश्रयति ॥ ४९ ॥

स्थालीम ॥ ४९ ॥

वसोः पवित्रमिति पवित्रमस्यां करोत्युदग्वा ॥५०॥

प्राग्वेति विकल्पः । तच्चैतच्छ्रौतं प्रागुदग्ग्रहणम । स्मार्त्ते हि वचनमन्तरेणापि प्राप्नोत्येव । प्रयोजनं तदपचारे श्रौतं प्रायश्चित्तम ॥ ५० ॥

वाग्यतो दोहयत्यशूद्रेण ॥ ५१ ॥

दोहयतीति कारितत्वादध्येषणा गां धुक्ष्वेति । शूद्रपर्युदासाच्च क्षत्रियवैश्ययोरभ्यनुज्ञा ॥ ५१ ॥

स्थाल्यन्वारब्धे देवस्त्वेत्यासिच्यमाने जपति ॥५२॥

स्थाल्यन्वारब्धे यजमाने देवस्त्वेत्यासिच्यमाने जपत्यध्वर्युः ॥ ५२ ॥

कामधुक्ष इति प्रश्नः ॥ ५३ ॥

कां दुग्धवानसीति दोग्धारं पृच्छति ॥ ५३ ॥

प्रोक्ते सा विश्वायुरित्याह ॥ ५४ ॥

अमूमिति प्रोक्ते गोनाम्नि सा विश्वायुरिति आह ॥ ५४ ॥

एवमितरे उत्तराभ्यां प्रतिमन्त्रम् ॥ ५५ ॥

एवमितरे द्वे दोहयति । एवं शब्दाच्च समस्तः क्रियोपदेशः । अयं तु विशेषः । उत्तराभ्यां प्रतिमन्त्रमभिदधाति ॥ ५५ ॥

विसृष्टवागुत्तरा अनन्वारब्धे ॥ ५६ ॥

दोहयतीति वाक्यशेषः । अन्वारम्भवाग्यमयोश्च प्रतिषेधात्तयोर्भवत्येव । उत्तरा दोहयतीत्येतावत्युक्ते न ज्ञायते ॥ ५६ ॥

कियत्यो दुह्यन्त इत्यत आह—

यावत्स्वमधिकारात् ॥ ५७ ॥

यावत्यश्चास्य गावस्तावत्य इति । कुत एतत् । अधिकारात् । अपरिज्ञाने सत्यधिकारो व्यवच्छेदकः ॥ ५७ ॥

तिस्रो वा नित्यत्वात् ॥ ५८ ॥

तिस्रो वा दुह्यन्ते । त्रित्वे हि नित्यं बहुवचनं व्यवस्थितम् । ननु चतुर्थादावपि भवत्येव । सत्यमेव ॥ ५८ ॥

आदिसामर्थ्यात् ॥ ५९ ॥

त्रित्वगतमेव बहुत्वमाद्रियते । उक्ते हि बहुत्वे कृतः शास्त्रार्थ इति किमित्युत्तरं गम्यते ॥ ५९ ॥

दर्शनाच्च ॥ ६० ॥

दृश्यते चायमर्थो यथा बहुवचनश्रवणे त्रित्वगतमेवोपादीयते । कृष्णा भौमा धूम्रा आन्तरिक्षाः बृहन्तो दिव्याः शबला वैद्युताः सिध्मास्तारका इति । पञ्चबहुवचनान्यनुक्रम्य पञ्चदश दर्शयति । अर्द्धमासानां वा एतद्रूपं यत्पञ्चदशिनो यत्पञ्चदशिन आलभत इति ॥ ६० ॥

परिक्षालनमानयति सम्पृच्यध्वमिति ॥ ६१ ॥

तच्चाध्वर्युरानयति दोहमाने ऽन्यस्य श्रुतत्वात् ॥ ६१ ॥

**उद्वास्यातनक्ति प्राग्घुतशेषेणेन्द्रस्य त्वेति ॥६२॥**

प्रातर्हुतशेषेणेति सम्प्रदायः । नेत्यपरे । तदा प्रातर्हुतशेषेणेत्येवावक्ष्यत् । अतः प्राक् शब्दस्य पूर्वकालवाचित्वात्पूर्वं यद्धुतशेषं प्रायं होमशेषमित्यर्थः । आतनक्तीति आतञ्चनतत्पर्वसङ्कोचनार्थः । सङ्कोचः काठिन्यं तत्सायं होमशेषेण सुकरमिति । इन्द्रस्यत्वेति चोपलक्षणम् । महेन्द्रस्यापि भावात् । तद्धैकेन्द्रायेति कुर्वन्तीति ॥ ६२ ॥

**सोदकेनापिदधात्यमृन्मयेन [1]विष्णो हव्यमिति ॥ ६३ ॥**

अथोदकवतोत्तानेन पात्रेणापिदधातीति वचनात् ॥ ६३ ॥

**निधाय वत्सापाकरणं पूर्ववत् ॥ ६४ ॥**

निधाय तत्पयो वत्सापाकरणं पूर्ववत् । तच्च पयस ऐन्द्रं पयोऽमावास्यायामिति ॥ ६४ ॥

**प्रातराग्नेय ऐन्द्राग्नश्च द्वादशकपालोऽसन्नयतः ॥ ६५ ॥**

स एष उभयत्राच्युत आग्नेयोऽष्टाकपाल इत्याग्नेयग्रहणाम् । अमा वै नोद्य वसुर्वसतीत्युपक्रम्य तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवतीत्याह । तच्चैतदसन्नयतः ॥ ६५ ॥

**निरुप्याज्यं प्रातर्दोहनमन्यस्मिन् ॥ ६६ ॥**

आज्यनिर्वापे कृते प्रातर्दोहनमन्यस्मिन्पात्रे कर्त्तव्यम् । अन्यस्मिन्निति ग्रहणात्सायं दोहस्य तत्रैवान्तञ्चनम् ॥ ६६ ॥

**परिक्षालनान्तं कृत्वा सायं दोहमाहृत्य प्रातर्दोहः श्रपयित्वाभिघार्योद्वास्योभावनक्ति ॥ ६७ ॥**

---

[1] यदि मृन्मयं स्यात्तृणं दारु वान्तर्दधाति ।

प्रातर्दोहं श्रपयित्वा सायं दोहाहरणम् । यथासूत्रे दृष्टार्थता भवति । अभिघारणं च पयसः । उभावनक्तीति प्राणदानं तदुभयोः ॥ ६७ ॥

शृतस्याग्रेवद्यतीति श्रुतेः ॥ ६८ ॥

अपन्यायत्वाच्छ्रुतिग्रहणम् । दध्नो हि पूर्वं क्रम इति । यदवद्यति तच्छृतस्य प्रथमम् ॥ ६८ ॥

समस्य मार्जनम् ॥ ६९ ॥

शाखापवित्रेण सह मार्जनम् । तच्च पुनः शाखायामेव कर्तव्यम् । मार्जनमात्र एव श्रवणात् ॥ ६९ ॥

इन्द्राग्न्योरिति व्यूहनम् ॥ ७० ॥

ननु च यथा देवतमन्यदित्युक्तत्वादवाच्यमेतत् । न समाम्नायज्ञापनार्थत्वात् । अज्ञाप्यमाने हि समाम्नाये परादिना पूर्वान्तन्यायेन इन्द्राग्न्योरित्यस्य पूर्वव्यूहनशेषतैव प्राप्नोति । तस्मात्साधूक्तमिन्द्राग्न्योरिति व्यूहनमिति ॥ ७० ॥

सह शाखाया प्रस्तरानुप्रहरणम् ॥ ७१ ॥

प्रस्तरप्रहरणस्य निर्ज्ञातकालत्वात् शाखाप्रहरणस्य चानिर्ज्ञातकालत्वात् प्रस्तरेण सह शाखां प्रहरतीति वाक्यार्थः ॥ ७१ ॥

परिधिभिः सहोपवेषं जुहोति जोहोमि त्वा सुभगसौभगाय पुरुत्तमं पुरुहूतश्रवस्यन्निति॥७२॥

मन्त्रभेदाच्च कर्तृभेदस्ततश्चाग्नीदुपवेषं जुहोति१ ॥ ७२ ॥

पौर्णमासवदन्यदसद्यः ॥ ७३ ॥

---

१ प्रतिपत्तिरियम्, चरितार्थत्वात् । अतो नाशदोषादौ सकृद्गृहीतेनाज्येन होमः ।

न चायमतिदेशः । प्रकरणसाधारण्यात् । साधारणत्वाद्धर्माणाम् । एवं चोभयत्र गुणकामप्रवृत्तिरविरुद्धा । १ इयांस्तु विशेषः । असद्यः ॥ ७३ ॥

## सोमयाजी सन्नयेत् ॥ ७४ ॥

सोमयाजिनो नियमः ॥ ७४ ॥

## कामादितरः ॥ ७५ ॥

तस्माद्प्यसोमयाजी समवनयेदिति ॥ ७५ ॥

## त्रिꣳ शतं वर्षाणि दर्शपूर्णमासाभ्यां यजेत ॥७६॥

तस्मादु त्रिꣳ शतमेव वर्षाणि यजेतेति श्रुतत्वात् । दर्शपौर्णमासग्रहणं न कर्त्तव्यम् । उपक्रमादेतत्सिद्धेः । कर्त्तव्यं वा । आनन्तर्यात्सान्नाय्यस्य तद्गुणकविषयतैव मा भूदिति ॥ ७६ ॥

## पञ्चदशदाक्षायणयज्ञी ॥ ७७ ॥

यद्युदाक्षायणयज्ञी स्यादथो अपि पञ्चदशैव वर्षाणि यजेतेति ॥ ७७ ॥

## अग्निहोत्रमेव वा जुहुयात् ॥ ७८ ॥

एव शब्द इवार्थे । यथाग्निहोत्रं यावज्जीवं एवं दर्शपूर्णमासावपीति । उभयोस्तुल्यशास्त्रत्वात्२ । यावज्जीवमग्निहोत्रं जुहोति । यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति । दर्शपूर्णमासयोः सान्नाय्यवतोश्चानुविधानं कृतम् । इदानीं दाक्षायणगुणकयोः कर्त्तव्यम् । तत्र च पयस्या विद्यते । सा च दधिपयोभ्यां भाव्यते । विकारत्वाच्च धर्मातिदेशं प्रत्यपेक्ष्य किमत्र दध्नो धर्मा उत पयस इति । अनेनाति-

---

१ अत्र ‘ उक्तादन्यत् सर्वं दर्शपूर्णमासवद्भवति ’ इति शेषः ।

२ अतश्च विकल्पः, तथाचापस्तम्बः स्वर्गकामो दर्शपूर्णमासावेवाकामः सर्वकामो वा युगपत् कामयेताहारपृथक्त्वे वा यावज्जीवं यजेत त्रिꣳशतं वर्षाणि वा जीर्णो वा विरमेत् ’ इति ।

देशप्रसङ्गेन यावानतिदेशः स सर्वोऽभिधीयते । तत्पूर्वकत्वाच्च विशेषातिदेश ऊहो बाधश्चेति ॥ ७८ ॥

तत्र तावदतिदेशविचारः क्रियते। यावद्वैकृतीषु चादेनासु यागत्वं नच प्रतिपाद्यते सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः अग्नीषोमीयमजमालभेतेति चैवमाद्यासु किं यावदुक्तं निर्वापमात्रं आलम्भमात्रं च उत यागा एत इति? । शब्दलक्षणत्वात्कर्म्मणो यावदुक्तान्येतानीति प्राप्त उच्यते—

## कर्मशब्दो द्रव्यदेवतायुक्तो यजतिः ॥७९॥

कर्म शब्द आख्यातशब्दो व्यापारशब्दो यो द्रव्यदेवतायुक्तः स यजतिः प्रत्येतव्यः । यागः प्रत्येतव्य इत्यर्थः । यद्यपि यजतिर्यजिरिति च धातोर्निर्देशकस्तथापि तस्य द्रव्यदेवतासंयोगाभावात् तदर्थ एव गृह्यते । द्रव्यदेवतायुक्तः कर्मशब्दो याग इति। कुत एतत् । द्रव्यदेवतासंयोगात् । यश्च द्रव्यस्य देवतोद्देशेन त्यागः स याग इति । द्रव्यदेवतायुक्तं च कर्मशब्दे यागं दर्शयति । मैत्राबार्हस्पत्यं चरुं निर्वपतीत्यभिधाय तयोरुभयोरवद्यन्नाह मित्राबृहस्पतिभ्यामनुब्रूहीत्याश्राव्याह मित्राबृहस्पती यजेति वषट्कृते जुहोतीति सहानुवाचनविधिपरे वाक्ये यागं दर्शयति । तथा पशावग्नीषोमाभ्यां छागस्य हविः प्रेष्येति वषट्कृते जुहोतीति प्रैषविशेषविधिपरे वाक्ये यागं दर्शयति। एकदेशस्थितमपि च लिङ्गं स्थालीपुलाकवत् सर्वत्रगमकम्भवति न्यायस्य तुल्यत्वात् । तस्माद्यागा एत इति ॥ ७९ ॥

यागेषु सत्सु किं यागमात्रं भवत्युत धर्मा अपि सन्तीति ? । यदा च सन्ति तदा किं पूर्णाहुतिका, उताग्निहोत्रिका, उतदर्शपौर्णमासिका, उत ज्योतिष्टोमिका इति, अथ दर्शपूर्णमासिका एवेति । किं तावत्प्राप्तं धर्माणामनाम्नानादधर्मका इति, एवं प्राप्तेऽभिधीयते—

## दर्शपूर्णमासधर्मा इष्टिपशुषु सामर्थ्यात् ॥ ८० ॥

सामर्थ्यादित्ययं हेतुर्धर्मसत्तायां तद्विशेषे च । साधारणधर्म

सत्त्वायां तावत् एवमेताश्चोदनाः समर्था भवन्त्यर्थवन्त्यो भवन्तीत्यर्थः । इतरथा सापेक्षाः सत्योनर्थिकाः स्युः । तत्कथम् । सौर्ययागेन ब्रह्मवर्चसम्भावयेदित्यपरिपूर्णं वाक्यं१, यच्च नामापरिपूर्णं तदध्याहारेण वानुषङ्गेण वा पूरयितव्यम् । न हि वेदे मात्रामात्रस्याप्यानर्थक्यमिष्यते । तेनात्र विध्यन्तोनुषक्तव्यो वाक्यपूरणायानर्थक्यं मा भूदिति । स च दार्शपौर्णमासिकः सामर्थ्यादेव । स एवात्र शेषीभवितुं समर्थः । व्यक्तचोदनाचोदितत्वेन निर्वपति संशब्दनेन च प्रतीयमानत्वात् । नान्य इति । विध्यन्तानुषङ्गेण च धर्माणामनुषङ्ग इति दर्शपौर्णमास धर्मा इति सूत्रितम् । इष्टिपशुष्विति च इष्टिषु पशौ चेति द्रष्टव्यम् । पश्वन्तरेषु ह्यग्नीषोमीयधर्मप्राप्तिं वक्ष्यत्यग्नीषोमीयदर्शनादिति ॥ ८० ॥

## दर्शनाच्च ॥ ८१ ॥

दृश्यते चायमर्थो यथा दर्शपूर्णमासधर्मा इष्टिपशुषु प्रवर्त्तन्त इति । सावित्रीमिष्टिं निर्वपतीति प्रकृत्याह । तस्यै प्रयाजेषु तायमानेषु ब्राह्मणो वीणागाथी दक्षिणत उत्तरमन्द्रामुदाघ्नं स्तिस्रः स्वयं सम्भृता गाथागायतीति गाथागानविधिपरे वाक्ये प्रयाजान्दर्शयति । तथा पशौ स उत्तरमाघारमाघार्यासं स्पर्शयन् स्रुचौ पर्येत्य जुह्वा पशुं समनक्तीति पशुसमञ्जनविधिपरे वाक्ये उत्तराघारं दर्शयति ॥ ८१ ॥

एवं सर्वेष्टिष्वेवानुमानिकवचनेन धर्मप्राप्तिरभिमिता । इदानीं तदपवादत्वेन प्रत्यक्षशिष्टेन धर्मप्राप्तिरभिधीयते—

## वैश्वदेवधर्माश्चातुमास्येषु वचनप्रवृत्तिभ्याम् ॥ ८१ ॥

वैश्वदेवमिति चातुर्मास्यानां प्रथमं पर्व, तस्य धर्मा उत्तरेषु पर्वसु प्रवर्त्तन्ते, कुतो, वचनात् । वचनादिति हेतुश्चायमुपदेशश्च । ततश्च यत्रैव वचनं तत्रैव प्राप्तिः । प्रतिपर्व वचनं भवति, एतान्येव

१ किम, केन, कथम, इत्यंशत्रयेषु कथमंशाभावादपरिपूर्णता वाक्यस्य ।

पञ्च हवीꣳषि भवन्तीति। तानि चाग्नेयादीनि वैश्वदेविकानि पञ्चचोद्यन्ते। तेषां चोपक्षीणत्वात्तद्धर्मकाणीति गम्यते। धर्मप्रवृत्तिं च दर्शयति शुनासीरीये। आद्येथैतान्येव पञ्च हवीꣳषि भवन्तीत्यभिधाय तस्यावृन्नोपकिरन्त्युत्तरवेदिं न गृह्णन्ति पृषदाज्यं न मथन्त्याग्निमिति प्रतिषेधति। प्रतिषेधश्च प्राप्तिपूर्वको भवति। अप्राप्तत्वाच्चोत्तरवेदिप्रतिषेधोनुवादकः॥ ८२॥

## सोमाच्चावभृथे सामप्रतिषेधात्॥ ८३॥

सोमिकादवभृथाद्वारुणप्रघासिके धर्मप्राप्तिः। कुतो वचनात्। च शब्देन वचनमनुकृष्यते। उच्यते अनेनशब्देनेति वचनं नामधेयमवभृथ इति। सामप्रतिषेधाच्च। सोमिकादवभृथान्नाम सामान्येन सामगानं प्राप्तम्। तत्प्रतिषेधो विधीयते। नाप्राप्तं प्रतिषेधति। तत्र न सामगीयत इति॥ ८३॥

## कणवत्पशौ न मन्त्रोपदेशात्॥ ८४॥

कणापासनक्रियावच्च रुधिरापासनक्रिया तथो एवासृक्पशोरिति वचनेन प्राप्नोति। सा च प्रतिषिध्यते। न मन्त्रोपदेशादिति। यद्यशेषक्रियाप्राप्तिः स्यात् न मन्त्रे उपदिश्येत उपदिश्यते च रक्षसां भागोसीति तस्मात्तावन्मात्रमेव भवति। अशेषक्रियाविषयं वचनमित्याशङ्कानिवृत्त्यर्थमिदमुक्तम्॥ ८४॥

## विशये लौकिकमयुक्तत्वात्॥ ८५॥

विशयः संशय उच्यते। यथा आज्यदोहेषु सामसु अग्निमुपधाय स्तुवन्तीति, किं लौकिकं अग्निद्रव्यं उत वैदिकमिति। अत्र लौकिकं ग्रहीतव्यम्। अयुक्तत्वात्। इतरस्य च विशिष्टकार्यसंयोगादिति। ननु अन्ये वायुक्तत्वादित्यभिहित एवायं न्यायः। न प्रकरणसमधीतविषयता तस्येति। अस्य पुनरप्रकरणसमधीतविषयतेति योगान्तरारम्भः॥ ८५॥

दर्शपौर्णमासधर्माः सौर्यादिष्वपि भवन्तीत्येतदुक्तम्। दर्शपौर्णमासयोश्च षट् प्रधानानि। तत्रैतच्चिन्त्यते किं यस्मिन्कस्मिंश्चिद्वैकृते प्रधाने यतः कुतश्चिद्धर्मपरिप्राप्तिरुत नि-

यमकारिकारणं किं चिदस्तीति? । किं तावत्प्राप्तं नियमकारणाभावादनियम इति । एवं प्राप्त उच्यते—

विधिविशेषः कर्मण्येकद्विशब्दपरिमाण-
द्रव्यदेवतागुणसामान्येभ्यः ॥ ८६ ॥

विधेर्विशेषः विधिविशेषः वैकृते प्रधाने एकत्वादिभिर्विशेषैर्विशेषेण धर्मप्राप्तिः । यथा सौर्ये देवतैकत्वे नावान्तरसामान्येनाग्नेयधर्मप्राप्तिः । सत्यपि व्यक्तत्वे निर्वपति संशब्दे न च नाग्नीषोमीयादिभ्यः । सदृशे हि प्रतीतिर्भवति । प्रतीतेन च धर्मसम्बन्ध इष्यते । द्विदेवतत्वाच्चाग्नावैष्णवे चाग्नीषोमीयविध्यन्तः । द्वित्वसामान्यात् । ऐन्द्राग्नस्यापीति चेत् । न शब्दपरिमाणात् । उभौ हि पञ्चाक्षराविति । मारुते च शब्दपरिमाणादैन्द्राग्नविध्यन्तः । द्रव्यसामान्येन च विध्यन्तप्राप्तिर्यथा पुरोडाशे पौरोडाशिकाः । सान्नाय्ये च सान्नायस्य । देवतासामान्येन च विध्यन्तप्राप्तिर्यथाग्नेये आग्नेयस्य । ननु चैतदवाच्यम्, एकत्वेनैव गतार्थत्वात् । वाच्यं वा, सौम्ये चरावग्नीषोमीयधर्मपरिप्रापणार्थं तत्र हि सोमोऽप्यस्तीति । इन्द्रसद्भावादैन्द्राग्नविध्यन्त ऐन्द्रे पुरोडाशे । तदेतदनुदाहरणम् । न ह्यत्र देवतासामान्यमस्ति समुदायात्तद्धितोत्पत्तेः । कस्तर्ह्यत्र समाधिः । वक्ष्यति द्रव्यदेवताविरोधे द्रव्यस्य समवायादिति । तादर्थ्येन देवतासामान्योपन्यासः । गुणसामान्येनापि विध्यन्तप्रवृत्तिरिष्यते । यथा प्रतिकामाग्नेये पौर्णमास्यां क्रियमाणे पौर्णमासाग्नेयविध्यन्तः । अमावास्यायाममावास्याग्नेयविध्यन्त इति । कालो ह्यत्र गुण इति । तदेतदपरेऽनुदाहरणमाहुः । न हि कालो गुण इति शक्यते वक्तुम् । सगुणं हि कर्म काले विधीयत इति । गुणसामान्ये तर्हि किमुदाहरणम् । अस्ति वैश्वदेवो द्वादशकपालस्तत्र देवतानेकत्वसामान्यादैन्द्राग्नविध्यन्तेनाग्नीषोमीयविध्यन्तेन वानियमेन भवितव्यमित्येवं प्राप्त आह । गुणसामान्यादैन्द्राग्नविध्यन्तः । उभौ हि द्वादशकपालाविति । शब्दपरिमाणन्तत्रोदासीनमेव ॥ ८६ ॥

अथ द्रव्यदेवताविरोधे किं द्रव्यसामान्येन विध्यन्तनियमोऽस्तु उतदेवतासामान्येनेति? । यथावैष्णवे नवकपाले द्रव्यसामान्येन

पौरोडाशिको देवतासामान्येनोपांशुयाजविध्यन्त इति । तत्र नियमकारिकारणाभावादनियमे प्राप्त आह—

नियमो द्रव्यदेवताविरोधे द्रव्यस्य समवायात् ॥ ८७ ॥

अत्र नानियमो द्रव्यस्य सामान्येन पौरोडाशिको विध्यन्तो नोपांशुयाजकस्य । द्रव्यदेवतयोरुभयोरपि विध्यन्तपर्युपस्थापकत्वे द्रव्यमेव बलीयः । कुत एतत् । समवायात् । द्रव्यं हि यागं समवैति । तद्धि त्यज्यमानं यागमभिनिर्वर्त्तयति । देवतातूद्देशेनोपकरोति । तेनासौ विप्रकृष्टेति सन्निकृष्टे सम्प्रत्ययः । अथवा समवायादिति द्रव्यमेव विशेष्यत्वेन हृदि समवैति । देवताविशेषणत्वेन । विशेषणविशेष्ययोश्च विशेष्ये सम्प्रत्ययः ॥ ८७ ॥

१आमिक्षायामुभयोस्तन्निवृत्तेः ॥ ८८ ॥

आमिक्षायामुभयोर्दधिपयसोर्धर्मप्राप्तिस्ताभ्यां ह्यसौ निर्वर्त्यते ॥ ८८ ॥

नैकचोदनात् ॥ ८९ ॥

नैतदस्ति यदुक्तमुभयोर्द्धर्मप्राप्तिरिति । किं कारणम् । एकचोदनात् । एकाहीयं चोदना मैत्रावरुण्यामिक्षेति । सा चैकासती नोभे विकर्तुमर्हति । अतोन्यतरस्य विध्यन्त इति ॥ ८९ ॥

२दध्नः संघातात् ॥ ९० ॥

दध्नो हि विध्यन्तः प्रवर्त्तते । सङ्घातत्वसामान्यात् ॥ ९० ॥

---

१ 'दाक्षायणे श्रूयते' 'मैत्रावरुणी पयस्या' इति, चातुर्मास्येषु 'वैश्वदेवी पयस्या' इति, पयस्या वारुणी मारुती च । सा च पयस्या दधिपयोभ्यां निष्पाद्यते । तत्र सन्देहः, किमस्यामुभयोर्धर्मा, उत दध्नः, उत पयसश्चेति ? । तत्राद्यं पक्षमुद्भावयति' इति देव भाष्ये ।

२ द्वितीयं पक्षमनुवदति ।

## १पयसस्तद्भावात् ॥ ९१ ॥

पयसो वा तत्र विध्यन्तः प्रवर्त्तते । कुतस्तद्भावात् । अतो ह्यामिक्षा भवति घनीभावयितुं दध्यानीयते । अथवा तद्भावादिति तद्रसस्य भावादामिक्षायां मधुरं पयो मधुरा चामिक्षा ॥ ९१ ॥

पशौ देवतासामान्यादग्नीषोमीयविध्यन्ते प्राप्त आह—

## पशोः सान्नाय्यस्य तदुक्तम् ॥ ९२ ॥

पशौ सान्नाय्यस्य विध्यन्तः । तदुक्तम् । द्रव्यदेवताविरोधे द्रव्यस्य समवायादिति । ननु नैवात्र द्रव्यदेवतयोर्विरोधो विद्यते । पशुद्रव्यस्य चोदितत्वात् । इतरेतरप्रभवत्वेन पशुद्रव्ये प्रतीते सान्नाय्ये प्रतीतिर्भवति । प्रतीत्या च धर्मसम्बन्ध इष्यते । सान्नाय्यधर्माणां पशुद्रव्यं पर्युपस्थापकम् । देवतापौरोडाशिकानाम् । अतो द्रव्यदेवताविरोध एवायम् । ननु तेनैव गतार्थत्वादवाच्यमेतत् । न, तत्राव्यवहितं द्रव्यं, इह पशुद्रव्येण व्यवधानादारम्भः ॥ ९२ ॥

## प्रायश्चित्तश्रुतेश्च ॥ ९३ ॥

पशूखा चेत्स्रवेत्सान्नाय्योखा वा तामभिमन्त्रयतेति पशावप्युखां दर्शयति । सा च सान्नाय्यस्य विध्यन्ते घटते । ननु विपरीतमेतल्लिङ्गम् । सान्नाय्यस्य विध्यन्ते हि सति तदुखा श्रुत्यभिमन्त्रणं पशूखायां प्राप्नोत्येव । विधाने तु सुतरामप्राप्तिर्गम्यते । सत्यम् । सान्नाय्ये च प्रधानस्य श्रुतिः पशावुपसर्जनभूतस्योदकस्येति । तेन द्रव्यान्यत्वात्पुनरुच्यते ॥ ९३ ॥

सङ्घातत्वसामान्यात्पशौ दध्नो विध्यन्ते प्राप्त आह—

## पयसः कालानन्तर्यधर्मानुग्रहेभ्यः ॥ ९४ ॥

पयसो वा विध्यन्तः प्रवर्त्तते । एककालता पयसः पशोश्च । यदा वै योषा रेतो धत्तेऽथ पयो धत्त इति । तथा यदा पशुर्जायतेऽथ

---

१ सिद्धान्तमाह ।

पयो जायत इति। अथवा सद्यः कालः पशुः पयोपि सद्यः कालमेव। अनन्तरं च पशोः पयः। दधि तु पयोवस्थाया व्यवहितम्। अत आनन्तर्यात्पयो विध्यन्तः। धनुर्मानुग्रहश्च भवति। पयः पात्राणां प्रोक्षणादयो धर्माः प्रवर्त्तन्ते न दध्नः। तेषां चानुग्रहः कृतो भवति॥ ९४॥

प्राकृतं धर्मजातं विकृतिषु चोदकेन प्राप्नोतीत्युक्तम्। ततो द्व्यहकालतायामपि प्राप्तायामिदमाह—

## सद्यस्त्वं काशकृत्स्निः॥ ९५॥

काशकृत्स्निः सद्यस्त्वम् मेने विकृतीनाम्। य इष्ट्या सोमेन पशुनाग्रयणेन वा यक्ष्यमाणः स पौर्णमास्याममावस्यायां वा यजेतेति वचनात्॥ ९५॥

## अनुवादः पूर्वस्येति वात्स्यबादरी॥ ९६॥

वात्स्यश्च बादरिश्च वात्स्यबादरी तावाहतुः। विकृतिविषयत्वेन पौर्णमासी वामावास्या वोच्यते। तच्च प्रकृतितोपि चोदकेन प्राप्त एवातोनुवादोयमिति॥ ९६॥

स्थितं तावदपर्यवसितमन्यदन्तरा चिन्त्यते। यन्नाम प्राकृतस्य द्रव्यस्य कार्ये वैकृतमन्यद्द्रव्यान्तरं विधीयते। यथा मौद्गं चरुं निर्वपेच्छ्रियै श्रीकाम इति। किं तत्प्राकृतद्रव्यधर्मान् लभते उत न लभत इति। किं तावत्प्राप्तम्। व्रीहीनवहन्तीति व्रीहिसंयोगेन श्रुता धर्माः कथमिव मुद्गेषु भविष्यन्तीत्यत आह—

## स्थानापत्तेर्द्रव्येषु धर्मलाभो विप्रतिषिद्धः॥९७॥

यद्वैकृतं द्रव्यं प्राकृतस्य कार्यापन्नं भवति। तद्धर्मान् लभते। कुतः। कार्यापत्तेः। प्राकृतस्य हि द्रव्यस्य धर्मसम्बन्धोऽपूर्वप्रयुक्तो न स्वरूपप्रयुक्तः। आनर्थक्यात्। अपूर्वसाधनविशेषकारितो ह्यसौ एवं च वैकृतेपि सोस्तीति प्रवर्त्तत एव॥ ९७॥

वैकृतद्रव्यं प्राकृतकार्यापन्नं तद्धर्मैर्युज्यत इत्युक्तम्। तेन तन्मन्त्राभिधानमपि लभते। इदं तु सन्दिह्यते, किमूहितेनाभिधानं क-

ऽव्यमुतानूहितेनेति । किं तावत्प्राप्तं अर्थबाधो मा भूदित्यनूहितेनेति प्राप्त आह—

## यथार्थमुहश्चोदिते ॥ ९८ ॥

चोदिते वैकृत्ये प्रधाने द्रव्ये यथार्थमूहः कर्त्तव्यः। १यथा तमर्थं प्रकाशयति तथा तथोह्यते । यत्कारणम् । प्रकृतौ तेन मन्त्रेण यागसाधनं द्रव्यमभिहितं विकारेपि हि तेन तदेव कर्त्तव्यम्। न चाविपरिणतरूपः शक्नोति कर्तुमित्यर्थाद्विपरिणम्यते ॥ ९८ ॥

प्रकृतावनेकपत्नीके यागे पत्नीशब्दस्य विपरिणामे प्राप्त आह—

## न प्रकृतावपूर्वत्वादिति ॥ ९९ ॥

न प्रकृतौ विपरिणामोस्ति, अपूर्वत्वात्प्रकृतेः । न हि प्रकृतेरन्या प्रकृतिरस्ति यद्विक्रियते । विकृतौ तु प्रकृतिवद्भावाद्विपरिणामः ॥ ९९ ॥

प्रकृतिवद्विकृतिः कर्त्तव्येत्यनेनाशेषधर्मपरिप्राप्ताविदमाह—

## विकृतौ वचनार्थलोपविरोधेभ्यो ऽप्रवृत्तिः ॥ १०० ॥

विकृतौ वचनादप्रवृत्तिर्भवति । यथा पितृयज्ञे न होतारं वृणीते नार्षेयमिति । अर्थलोपादप्रवृत्तिर्भवति । यथा मुद्गेष्ववघातस्य । विरोधादपि निवर्त्तते । यथा चरौपेषणमिति ॥ १०० ॥

किमेतावदेव विकृतौ न प्रवर्त्तते नेत्याह—

## परार्थोत्पत्तेस्तदभावे ऽभावः ॥ १०१ ॥

परस्यार्थे निष्पद्यमाने यदुत्पन्नं तस्य परस्याभावे तस्याऽप्यभावो भवति । यथा साम्नाय्येष्टयां कणापासनस्य ॥ १०१ ॥

---

१ यथा प्रकृतौ 'अग्नीषोमाभ्यां छागस्य वपायै मेदस' इति मन्त्रघटकछागपदस्थाने 'मेषस्य' इति भवत्यैन्द्रमेषादौ । तदुक्तम् 'शब्दे अविप्रतिपत्तिः' इति ।

परार्थोत्पन्नस्य पराभावे ऽभावे प्राप्त आह—

चोदितत्वाद्वा भावः ॥ १०२ ॥

परार्थानुत्पत्तावपि भवत्येव । यत्र यथा चोदना भवति । यथा यूपशकलेन ध्रुवं सम्मार्ष्टीति, यूपाभावेपि शकलमात्रं गृह्यते ध्रुवसम्मृज्यर्थम१ ॥ १०२ ॥

स्थितादुत्तरमुच्यते । पौर्णमास्याममावास्यायां वा यजेतेत्यनुवादोयमित्युक्तम । तत्र प्रति विधीयते—

न विपक्षे क्रियाः स्युः समभिव्याहारात् ॥१०३॥

किं चिद्विगतं पक्षं स्यंति विपक्षः प्रतिपदुच्यते । तत्र च वैकृत्यः क्रिया न स्युः । क तर्हि । पक्षान्त एव स्युः । कुतः। पौर्णमास्याममावास्यायां वा यजेतेति वचनात् । ननूक्तमयमनुवाद इति । नानुवादः । अनुवादे हि पौर्णमासीशब्देन गौण्या वृत्त्या प्रतिपल्लक्ष्यते । तत्र श्रुतिः परित्यक्ता भवति । न चैतद्युक्तं यल्लक्षणानुरोधेन श्रुतिर्बाध्यते । अपि चानुवादो ऽप्रवृत्तिविशेषकरत्वादनर्थक एव भवति । सोमस्य चैतदेव कालविधानं य इष्ट्या सोमेन पशुना ऽऽग्रयणेन यक्ष्यमाणः स पौर्णमास्याममावास्यायां वा यजेतेति । न ह्यत्र सोमस्य पौर्णमास्यमावास्ये विहिते अतोपि नानुवादः२ ॥ १०३ ॥

दर्शपौर्णमासयोः सान्नाय्यवतोरसान्नाय्यवतोश्चानुविधानं कृतमिदानीं दाक्षायणयज्ञोनुविधीयते—

दाक्षायणयज्ञः प्रजापशव्नयशस्कामस्य ॥१०४॥

---

१ यत्र तु क्रिया द्रव्यार्था तत्र साधनभूतद्रव्याभावे तदभावः, यथा पौष्णचरौ कण्डनस्य ।

२ ‘ यइष्ट्येत्यत्रेष्टिग्रहणेनैवाग्रयणग्रहणे प्राप्ते पुनस्तदुपादानं पौर्णमास्यमावास्यकालग्रहणार्थम । अतः । ‘ दर्शपूर्णमासानीजान इत्यादावनिष्टावप्ययं कालः सिद्धो भवतीति भावः ।

दाक्षायणयज्ञ इति कर्मणो नामधेयम् । द्रव्यगुणसंस्कारेष्वप्रसिद्धत्वात् । तस्माद्दाक्षायणयज्ञो नामेति वचनात् । स च प्रजापश्वन्नयशस्कामस्य भवति । पर्यायेण च योगासिद्धिः । न हि कामानां युगपदुत्पत्तिसम्भवः ॥ १०४ ॥

## नामफलगुणयोगात्कर्मान्तरम् ॥ १०५ ॥

तद्वैतत्कर्मान्तरं न दर्शपौर्णमासाविति । कुतः । नामान्यत्वात् । अन्यद्धि नाम दाक्षायण इति । नामान्यत्वे चान्या प्रतीतिर्भवति । यथा देवदत्तादन्यो यज्ञदत्त इति । फलान्यत्वाच्च । अन्यद्धि फलं श्रूयते । प्रजादिफलान्यत्वे च फलिनोन्यत्वं भवति । गुणान्यत्वाच्च । गुणान्यत्वं च दृश्यते । मैत्रावरुण्यामिक्षेत्येवमादि । गुणान्यत्वे च गुणिनोन्यत्वं गम्यते । अतः कर्मान्तरमिति ॥ १०५ ॥

## गुणविधानं वा सन्निधिसम्पद्वचनाभ्याम् ॥ १०६ ॥

अथवा न कर्मान्तरम् । तावेव गुणविकृतौ दर्शपौर्णमासाविति । कुत एतत् । सन्निधेः । दर्शपौर्णमासौ हि प्रकृत्याह तस्मात् त्रिंशतमेव वर्षाणि यजेतेत्यभिधाय यद्युदाक्षायणयज्ञी स्यादथो अपि पञ्चदशैव वर्षाणि यजेतेति । सन्निहिते च तत्प्रतीतिर्भवति । तथा च सम्पद्वचनं अत्र ह्येव सा सम्पत्सम्पद्यत इति । यदि तदेव कर्म तदा साभ्यासैर्यागैस्त्रिंशत्सम्पत्पञ्चदशभिर्वर्षैः सम्पाद्यते । यत्तु नामान्तरत्वादिति । भवत्येकस्यापि नामान्तरं हस्तः करः पाणिरिति । धर्मान्तरत्वाच्च नामान्यत्वं ब्राह्मणपरिव्राजकवत् । फलं गुणाश्रयम् । गुणान्यत्वेपि च न गुणिनोन्यता । न हि देवदत्तस्योन्मादादिनान्यत्वं भवति । तस्मात्तदेवेदं कर्म गुणविकृतमिति । [1]प्रयोजनं दर्शपूर्णमासयोरक्रिया ॥ १०६ ॥

---

१ अस्याग्रे ' दाक्षायणयज्ञानुष्ठानपक्षे ' इति शेषः । अत एव 'अञ्जसा ह वा अस्य दर्शपूर्णमासाभ्यामिष्टं भवति ' इति श्रुतावपि दाक्षायणानुष्ठानोत्तरं दर्शपूर्णमाससमाप्तिरुक्ता ।

अग्नीषोमीयः पौर्णमास्यामैन्द्राग्नोमावास्यायाम् ॥ १०७ ॥

क्रियते इति वाक्यशेषः । एवं हि श्रूयते पूर्वेद्युरग्नीषोमीयेण यजते पौर्णमास्याम् । तथैन्द्राग्नेन यजते ऽमावास्यायामिति ॥१०७ ॥

सान्नाय्यवत्प्रातः ॥ १०८ ॥

सान्नाय्यशब्दो यागार्थे दधनि पयसि च वर्त्तते । तच्च नोभयमुभयत्र भवति । अमावास्यायां हि पयस्योच्यते । पौर्णमास्यां पुनराग्नेयः पुरोडाशो भवत्यैन्द्रं सान्नाय्यमित्येतावदेव । उभयरूपे ह्युभयत्र प्रवर्त्तमाने सत्यथ प्रातराग्नेयः पुरोडाशो भवति मैत्रावरुणीपयस्यानेघन्नाद्यानीति त्वेषाग्नेयः पुरोडाशोऽथैतयैव मित्रावरुणौ द्वे देवते इति देवताद्वित्वं नोपपद्यते । उभयरूपे हीन्द्रोपि प्राप्नुयात् । तस्माद्विभागेन सान्नाय्यवत्प्रातरेवं चोपांशुयाजो न भवति१ ॥ १०८ ॥

अमावास्यायां पयस्या मैत्रावरुणी२ ॥ १०९ ॥

---

१ अत्र मुख्यायां पौर्णमास्यामुद्धरणादिकर्मापवर्गान्तमग्नीषोमीयं सद्य एव प्रातः परिसमाप्य पुनरुद्धृत्याग्न्यन्वाधानव्रत्याशनशाखाच्छेदनदध्यर्थवत्सापाकरणोपवेषकरणपवित्रबन्धनानि यथाकालं कृत्वा सायं होमानन्तरं दोहयित्वा निधानान्तं कृत्वा प्रातर्दोहार्थं वत्सापाकरणं शाखोपगूहनं च कुर्यादिति देवभाष्ये ।

२ अत्र [मुख्यायाममावास्यायां प्रातः काले सद्य एवोद्धरणादि कर्मापवर्गान्तं कृत्वा तदानीमेव पुनरुद्धृत्याग्न्यन्वाधानपिण्डपितृयज्ञव्रत्याशनशाखाच्छेदनसन्नमनोपवेषकरणपवित्रबन्धनानि यथाकालं कृत्वा सायं होमानन्तरं मैत्रावरुणपयस्यार्थं वत्सापाकरणं कुर्यात् । अत्र ‘ मित्रावरुणाभ्यां भागमिति ’ गोरुपस्पर्शने विशेषः शाखोद्गूहनं चेति देवभाष्ये ।

१तत्रैव दोहनᳲशृते वा दध्यानयति ॥ ११० ॥

दधनि वा दोहनम् ॥ ११० ॥

वाजिनं निषिच्योत्करे करोति ॥ १११ ॥

वाजिनमवसेचनमुच्यते । तस्य च यागसम्बन्धाद्यागधर्माः प्रवर्त्तन्ते । वेद्यामासादने प्राप्ते उत्कर इत्युच्यते । न चात्र वेदिधर्माः प्रवर्त्तन्ते । स्वरूपप्रयुक्तत्वात् ॥ १११ ॥

अनाज्यलिप्तं वा ॥ ११२ ॥

तत्रस्थाभिघारस्य विकल्पः । अनाज्यलिप्तं निषिच्येति वचनात् । ततश्च प्राणदानं भवत्येव२ ॥ ११२ ॥

प्रहृत्य तृणं तेन चरति विमुच्य वा

स्रुचौ ॥ ११३ ॥

---

१ तत्रैव तस्मिन् लौकिकदधन्येवाज्यानिर्वापानन्तरं पयस्यार्थं दोहनं कर्तव्यम, प्रथममुखायां लौकिकं घनीभूतं दध्यासिच्येत्यर्थः । अथवा पयसि शृते तप्ते सति पश्चाद्दध्यानयति न प्रथमम् । अत्र देवयाज्ञिकभाष्ये व्याख्याद्वयं दृश्यते, तत्र ' तत्रैव दोहनम् ' इत्यत्र ' सांनाय्यवत् ' इत्यनेन सायम्प्रातश्च दोहे प्राप्ते प्रातरेवेति नियमः, एवं ' शृते वा दध्यानयति ' इत्यत्र वाशब्दो पादानादशृते पयसि लौकिकदध्यानयनमित्याद्या । द्वितीया तु उभयत्र दधिपयसोर्विद्यमानत्वेन तत्रैव दोहने प्राप्ते पयो विकारत्वात्पयस्याया प्रातर्दोहनं कर्तव्यम, अथवा शृते प्रातर्दोहे सायंदोहदधि आनयतीति । वस्तुतस्तु स्वशाखायां पयस्याप्रकारस्यानुपदेशात् शाखान्तरोक्त प्रकारस्य ज्यायस्त्वादिदमेव मतं साधु भाति । अत्रार्थे ' तप्ते प्रातर्दोहे सायन्दोहमानयति ' इति आपस्तम्बवचनं मूलम् ।

२ अथवा वाजिनस्याज्यलेपो न कार्य इत्यर्थः । अत्र वाजिनस्य तप्ताभिघारणप्राणदानापस्तरणाभिघारणादयो न भवन्ति ।

एवं हि श्रूयते इति ॥ ११३ ॥

बर्हिरवसिञ्चन् गृह्णाति तद्वृषभेषु रेतो दधातीति श्रुतेः ॥ ११४ ॥

ग्रहणं च यथा कथञ्चित् न स्रुवेण । अवद्यतीत्यश्रवणात् । अपश्यायश्चावसेक इति श्रुतिग्रहणम् ॥ ११४ ॥

वाजिभ्योनुवाचयति ॥ ११५ ॥

पूर्वानुवाचनं मा भूदित्यत उच्यते ॥ ११५ ॥

प्रति वषट्कारं हुत्वा वाजिनशेषेण दिशो व्याघारयति दिश इति प्रति मन्त्रं प्रदक्षिणं पुरस्तात्प्रथमम् ॥ ११६ ॥

वाजिनशेषं च तुल्यम । प्रदक्षिणग्रहणं च श्रौतं न स्मार्त्तम । अतस्तदपचारे श्रौतमेव प्रायश्चित्तम् ॥ ११६ ॥

उत्तमाभ्यां मध्ये पूर्वार्द्धेच ॥ ११७ ॥

१मन्त्राभ्यां मध्ये पूर्वार्धे च व्याघारणम् ॥ ११७ ॥

स्वाहाकारः सर्वत्र साकाङ्क्षत्वात् ॥ ११८ ॥

साकाङ्क्षा ह्येते । क्रियापदाभावात् । अतः स्वाहाकारविधानम । मन्त्राश्च यथा श्रुता एव । न चतुर्थ्यन्तेन प्रयोगः । सुपां सुपो भवन्तीति चतुर्थ्यर्थे एव प्रथमा । एवं च सति जयाहोमेपि यथा श्रुताएव मन्त्राश्चित्तं च चित्तिश्चेति न चतुर्थ्यन्तेन प्रयोगः ॥ ११८ ॥

---

१ दिश इत्यादिमन्त्राणां मध्ये 'उद्दिशः' 'दिग्भ्यः' इत्याभ्यामिति भावः ।

[१]शेषमुपह्वयस्वेत्यामन्त्र्यामन्त्र्य भक्षणमुपहूत इति प्रसूतः ॥ ११९ ॥

उपह्वयस्वेत्यामन्त्रणं प्रत्यृत्विजां प्रसूत इत्यनुज्ञातः ॥११९॥

पितृकृतैर्नामभिरामन्त्रणे प्राप्ते—

युक्तनामभिर्वेत्याह ॥ १२० ॥

युक्तनामानि होत्रादीनि । एवं हि श्रूयते तद्वै पश्चैव भक्षयन्ति होताचाध्वर्युश्चेत्येवमादि ॥ १२० ॥

अधिकारमुपजीवन्नाह—

सोमे च ॥ १२१ ॥

सोपहवं भक्षणं कर्त्तव्यम् । नानुपहूतः सोमः पातव्य इति वचनात् ॥ १२१ ॥

साधारणेषु वा सामर्थ्यात् ॥ १२२ ॥

एवमनुज्ञावचनमर्थवद्भवति ॥ १२२ ॥

इदानीं भक्षमन्त्रानाह—

ऋतूनां त्वा वाजिनां वाजिनं भक्षयामीति ॥१२३॥

वाक्यभेदाच्च विकल्पः ॥ १२३ ॥

इदानीं भक्षयितृनाह—

वाज्यहं वाजिनस्योपहूतस्योपहूतोभक्षयामीति वा ॥ १२४ ॥

वाजे वाजी भूयासमिति वा ॥ १२५ ॥

---

२ शेषं भक्षणार्थं हस्ते कृत्वा ऽमुकोपह्वयस्वेति होत्रादीन् पृष्ट्वा पृष्ट्वा उपहूत इति तेनानुज्ञातः सन् शेषभक्षणं करोतीत्यर्थः ।

होत्रध्वर्युब्रह्माग्नीध्रयजमानाः ॥ १२६ ॥

भक्षयन्तीति वाक्यशेषः। समासोक्तावपि हि क्रमोऽयमेवाश्रयितव्यो येन यजमानस्य प्राथम्यमुच्यते ॥ १२६ ॥

प्रथमो वोभयतस्तु यजमानः ॥ १२७ ॥

प्रथमो वेति। तत्र कुतः। प्रथमो यजमानो भक्षयतीति। उभयतस्त्विति प्राथम्यपक्षे उत्तमोऽपि भक्षयेत्। अथो अप्युत्तम इति वचनात् ॥ १२७ ॥

दाक्षायणं वा दक्षिणा ॥ १२८ ॥

दाक्षायणं सुवर्णमुच्यते। अन्वाहार्यो वेति विकल्पः ॥१२८॥

संवत्सरं वा यजेत ॥ १२९ ॥

पञ्चदशवर्षाणीत्युक्तमेव। संवत्सरश्चात्र सावनः परिगृह्यते। अत्रापि सैव यागसम्पत्कर्त्तव्यतेति। सा च सावन उपपद्यते न चान्द्रमस इति ॥ १२९ ॥

सस्त्र्यनृतसूत्रकृतवासाꣳसि वर्जयेत् ॥ १३० ॥

अहनि माꣳसमैथुने वर्जयेदिति तत्कर्माणि वर्त्तमाने द्रष्टव्यम्। अहनीति वचनात्। एतत्पुनरादर्शप्रयोगादन्तरालधर्मो वचनसामर्थ्यादिति ॥ १३० ॥

दर्शपूर्णमासप्रकरण एव काम्ये आग्नेय आम्नातः। यत्कामो ह एत्रा एतेन यज्ञेन यजेत सोऽस्मै कामः समृध्यते इति। तं च प्रकृत्योपांशुत्वविधानम्। उपांशु तस्यै देवतायै यजति यस्या इष्टिं निर्वपतीति। तदनुविधानप्रसङ्गेन यस्य यस्योपांशुत्वं तस्य तस्योच्यते—

उपांशु काम्यदेवता ॥ १३१ ॥

काम्ये कर्मणि देवतानामुपांशुत्वं भवति। देवताग्रहणं न कर्त्तव्यम्। चरणशब्दे सर्वदेवतान्यत्रेत्युक्तत्वादुपांशुत्वस्य। एवं चेद्व्यक्तचोदना देवतास्वेवोपांशुत्वं नाव्यक्तासु सोमविकारेष्विति देवताग्रहणम्। सौत्रामण्यां तर्हि व्यक्तत्वादुपांशुत्वमस्तु।

नैतदेवम् । तन्त्रभेदस्तु तत्र । एकतन्त्रे चोपांशुत्वमित्याचार्याभिप्रायः येनैन्द्रवायोधसयोरुपांशुत्वं विदधातीष्टिषु च । एवं च राजसूयेष्वनुमत्यादिषु नैवोपांशुत्वं तन्त्रभेदात् । प्रजाकामवैश्वदेवे तर्ह्यस्तु उपांशुत्वं व्यक्तत्वादेकतन्त्रत्वाच्चोदनैकत्वात् काम्यत्वाच्च । तथा पञ्चबिले । नैतदेवम् । न हि तत्र काम्यतयैवोत्पत्तिस्तेन यत्र व्यक्तत्वं चोदनैकत्वं चैकतन्त्र्यं च कामार्थं चोत्पत्तिस्तत्रैवोपांशुत्वम् । यथा मित्रविन्दायाम् । आह च ।

व्यक्तत्वे चोदनैकत्वे तन्त्रैक्ये यत्र कामना ।
तादर्थ्येनैव वोत्पत्तिस्तत्रैव स्यादुपांशुता ॥ १३१ ॥

## आग्रयणे वैश्वदेवः ॥ १३२ ॥

उपांशुर्भवति ॥ १३२ ॥

## एककपालाश्चावरुणाः ॥ १३३ ॥

वारुणवर्जम् ॥ १३३ ॥

## प्राजापत्यः ॥ १३४ ॥

उपांशुर्भवति । तस्माद्यत्किञ्च प्राजापत्यं यज्ञे क्रियत उपांश्वेव तत्क्रियत इति वचनात् ॥ १३४ ॥

## सावित्रश्चातुर्मास्येषु ॥ १३५ ॥

उपांशु ॥ १३५ ॥

तत्रैव—

## वैश्वदेवी ॥ १३६ ॥

पयस्या ॥ १३६ ॥

## वायव्यं ॥ १३७ ॥

पयः, नपुंसकलिङ्गोपदेशात् । यवाग्वां तर्हि न प्राप्नोति । प्राप्स्यति यागधर्मत्वात् । न हि द्रव्यधर्मोऽयं अपूर्वप्रयुक्तत्वात् । दर्शयति च पर्वाणि प्रकृत्य तेषां वै चतुर्णां द्वयोस्त्रीणि त्रीणि हवींष्यनिरुक्तानि

भवन्ति द्वे द्वे द्वयोरिति वैश्वदेवशुनासीरीययोस्त्रयाणामनिरुक्ततां दर्शयति। तस्माद्यत्राग्यामप्युपांशुत्वम ॥ १३७ ॥

१तनूहवीꣳषि ॥ १३८ ॥

दीक्षणीयाप्रायणीयातिथ्यादेवताः ॥ १३९ ॥

देवसूदेविकाहवीꣳषि ॥ १४० ॥

उपाꣳशुभवन्ति। दीक्षणीयादिषु देवताग्रहणं वागन्तपक्षार्थम। सहप्रधानेन दीक्षणीयादौ वागन्तेन मा भूदिति ॥ १४० ॥

वायव्योग्नौ ॥ १४१ ॥

मैत्रावरुणी च ॥ १४२ ॥

अग्नावेव ॥ १४२ ॥

ऐन्द्रः सौत्रामण्यां प्रथमः ॥ १४३ ॥

वायोधसश्च ॥ १४४ ॥

उपांशु ॥ १४४ ॥

आग्नेयं प्रतिकाममाहरेत् ॥ १४५ ॥

आग्नेयं प्रकृत्य श्रूयते। सोस्मै कामः समृध्यते यस्मै कामायाग्निं निर्वपतीति ॥ १४५ ॥

वर्षार्थे पुनः प्रकृतौ वा ब्रूयाद्वृष्टिकामोस्मीति ॥ १४६ ॥

अध्वर्यु ब्रूयात्पुरोवातं च विद्युतं च मनसाध्यायेति ॥ १४७ ॥

---

१ तानिचाग्नये पवमानायग्नये पावकायाग्नयेशुचये इत्यवमादीनि।

एवमादि निगदव्याख्यातम् । सर्वाण्येतानीति चार्थनिर्देशो न शब्दनिर्देशः । यत्कारणम् । न ह्येतानीत्येतावता नैरुत्सुक्यं भवति । अतः प्रतिपदमुच्चारणमिति ॥ १४७ ॥

इदानीं दर्शपूर्णमासयोरेवारम्भनिमित्तमङ्गमाह—

अभ्राण्यग्नीधम् ॥ १४८ ॥

स्तनयित्नुं च वर्षं चेति होतारम् ॥ १४९ ॥

सर्वाण्येतानीति ब्रह्माणम् ॥ १५० ॥

अन्वारम्भणीयाग्नावैष्णव एकादशकपालः सरस्वत्यै [1]चरुः सरस्वते द्वादशकपालो दर्शपूर्णमासारम्भे ॥ १५१ ॥

एकादशकपालग्रहणं न कर्त्तव्यम् । अग्नीषोमीयविकारत्वादेव तत्प्राप्तेः । कर्त्तव्यं वा, कपालानां प्रत्यक्षविधानं यथा स्यादिति । ततश्च तद्गतगुणकामप्रवृत्तिरिति केचित् । दर्शपूर्णमासारम्भ इति श्रुतत्वात्प्रथमप्रयोग एव भवति । एवं हि श्रूयते । दर्शपूर्णमासावारप्स्यमानोन्वारम्भणीयया यजेतेति । आरम्भस्य च विद्यमानत्वाद्विकारेपि प्रवृत्तिः । यथाग्रयणेष्ट्यां चातुर्मास्येषु चारम्भस्य एकत्वात्सकृदेव भवति । क्षामवत्यादिषु त्वारम्भभेदात्पुनः पुनः प्रयोगः ॥ १५१ ॥

पष्ठौही दक्षिणा मिथुनौ वा ॥ १५२ ॥

पृष्ठेनया वोढुं समर्था वृषभं सा पष्ठौही । मिथुनौवेति । मिथुनौद्वौ द्वौ दद्यादिति ॥ १५२ ॥

इन्द्राय विमृध एकादशकपालः पौर्णमासमनु ॥ १५३ ॥

---

१ चरुलक्षणं छन्दोगपरिशिष्टे 'स्वशाखोक्तश्च सुस्विन्नो ह्यदग्धोऽकठिनः शुभः न चातिशिथिलः पाच्यो न चरुश्चारसस्तथा' इति ।

पौर्णमासेनेष्ट्वेन्द्राय विमृधेऽनुनिर्वपतीति वचनात् ॥ १५३ ॥

स चायम्—

१आदिविकल्पः ॥ १५४ ॥

शाखान्तराददित एवारभ्यान्ताद्विकल्पः ॥ १५४ ॥

आदित्येभ्यश्चरुरामावास्यम् ॥ १५५ ॥

अनुभवतीति सूत्रशेषः ॥ १५५ ॥

आग्रयणमैन्द्राग्नमग्रपाकस्य ॥ १५६ ॥

आग्रयणमिति कर्मणो नामधेयं वक्ष्यमाणस्य। तत्र च प्रथमं हविरैन्द्राग्नम्। तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवतीति। अग्रपाकग्रहणेन च शरद्वसन्तौ लक्ष्येते। तत्कथमग्रे पाकोऽग्रपाकः प्रथमपाक इत्यर्थः। स च शरद्वसन्तयोर्भवति। शरद्वसन्तयोराग्रयणमिति शाखान्तरात् ॥ १५६ ॥

व्रीहीणां यवानां च ॥ १५७ ॥

चरुरपि यावो यथा स्यादिति यवग्रहणम्। तेषामेव नियमो माभूदिति व्रीहिग्रहणम्। व्रीहिकाले व्रीहीणां यवकाले यवानाम्। अत एव च यावश्चरुर्भवति ॥ १५७ ॥

वैश्वदेवश्चरुः ॥ १५८ ॥

तस्मादेष वैश्वदेवश्चरुर्भवतीति ॥ १५८ ॥

पयसि वा ॥ १५९ ॥

स च वा पयसि भवति। पयःपक्षे अत्र प्रणीता धर्माः कार्याः ॥ १५९ ॥

---

१ आदावारम्भ एव विकल्पो यस्य सः। आरभ्यते न वेति, यद्यारभ्यते तदा यावज्जीवं क्रियत एव। तदुक्तम् 'रूपं कालोऽनुनिर्वापो देवता श्रपणं हविः, आदौ ये विधृताः पक्षास्त इमे सर्वदा मताः, इति।

## द्यावापृथिवीय एककपालः ॥ १६० ॥

अस्य च वैश्वदेविकद्यावापृथिवीयप्रकृतित्वम् लिङ्गदर्शनात् । तस्य हि सर्वहुतं करोति अपर्यावर्त्तं जुहोतीति चाम्नायते । तेचैते सर्वहोमापरिवृत्ती आज्ययागविधिपरे वाक्ये अनुवदति । तस्य परिचक्षा यस्यै वै कस्यै च देवतायै हविर्गृह्यते सर्वत्रैव स्विष्टकृदन्वाभक्तोथैतः सर्वमेव जुहोति न स्विष्टकृतेवद्यति सा च परिचक्षोतो हुतः पर्यावर्त्तत इति सा द्वितीया परिचक्षा । तच्चैतदुभयमप्यनिर्ष्टामित्याज्यस्यैव यागः कर्त्तव्य इति । तस्माद्वैश्वदेविकैककपालप्रकृतित्वमिति । एवं च सति त्रेधा बर्हिरहतवासः परिधानं चेहापि भवति । नवप्रयाजाद्यपीति चेत् । नैन्द्राग्नवैश्वदेवविरोधात् । आज्ययागेपि वासः परिधानादि भवत्विति चेत् । नैतदेवम् । पुरोडाशेन हि तत्पर्युपस्थाप्यते । न चाज्यस्यासौ धर्मः । तस्मादप्रवृत्तिरिति । यत्तु वायव्ये पयसि द्रव्यान्यत्वेप्युपांशुत्वं भवति । युक्तं तत्र प्रत्यक्षो ह्यसौ धर्मः । इह पुनश्चोदकत इति ॥ १६० ॥

## १उद्वास्यान्ताश्छादयेदाज्येन ॥ १६१ ॥

तच्चैतदाज्यं लौकिकमपूर्वत्वात् ॥ १६१ ॥

## आज्यस्य वा यजेत् ॥ १६२ ॥

तस्मादाज्यस्यैव यजेदिति वचनात् ॥ १६२ ॥

## पुराणानां वा चरुः ॥ १६३ ॥

वैश्वदेवश्चरुर्वा पुराणानां कर्त्तव्यः । तं वै पुराणानां कुर्यादित्याहुरिति वचनात् । वा नवानाम् । तौ वा उभावेव नवानां स्यातामिति ॥ १६३ ॥

## प्रथमजो गौर्दक्षिणा ॥ १६४ ॥

---

१ द्यावापृथिवीयमुद्वास्य प्राणदानानन्तरमस्यान्तानाज्येन लौकिकघृतेनाच्छादयेदित्यर्थः ।

प्रथमजश्च गौर्न गोकुलस्याप्रतीतत्वात् । गौश्च जन्मना सम्बन्धोतः प्रतीतत्वात्प्राथम्यं तदपेक्षम् ॥ १६४ ॥

प्रसङ्गमुपजीवन्नाह—

वैश्वदेवस्य च ॥ १६५ ॥

प्रथमाजा गौर्दक्षिणा ॥ १६५ ॥

दर्शपूर्णमासानीजानो दक्षिणाग्निपक्कं चानुष्प्राश्यं ब्राह्मणान् भोजयेत्किञ्चिद्दद्यात् ॥ १६६॥

आहिताग्निः सन्यावद्दर्शपूर्णमासौ न करोति अथ चाग्रयणकालातिपत्तिर्भवति तत्राग्रयणे विशेषः कथ्यते । नवानां दक्षिणाग्निपक्कं चातुष्प्राश्यं ब्राह्मणान् भोजयित्वा किञ्चिद्दद्यात् । ततो यच्छक्नुयात्तद्दद्यादिति वचनात् । अस्य चाग्रयणत्वात् पौर्णमास्यमावास्या वा काल इति ॥ १६६ ॥

अग्निहोत्रायणिनो नवैः सायम्प्रातरग्निहोत्रहोमः ॥ १६७ ॥

अग्निहोत्रेणैव यो नामायनं गमनं कर्तुमिच्छति अग्निहोत्रेणैवाग्रयणं गमयतीत्यर्थः । स न वैः सायं प्रातरग्निहोत्रहोमं कुर्यात् । यः सायं प्रातरग्निहोत्रहोमः स न वै कर्त्तव्यः । न ह्यनदाग्रयणं सायं प्रातर्ग्रहणादेवात्राग्रयणाऽवाप्तिरिति । तथा च दर्शपूर्णमासानीजानस्य चातुष्प्राश्यविधिपरे वाक्ये अग्निहोमं प्रतिषेधति । नाग्निहोत्रे जुहुयादन्यद्धा आग्रयणमन्यदग्निहोत्रमिति । अतश्चात्र न यजनीयकालनियम इति ॥ १६७ ॥

१तदाशिताया वा पयसा ॥ १६८ ॥

नवाशिताया वा गोः पयसा जुहोति ॥ १६८ ॥

---

१ तन्नवान्नमाशिता तदाशिता तस्याः, नवान्नं खादिताया वा गोः पयसा सायं प्रातरग्निहोत्रहोम इत्यर्थः ।

दीक्षितव्रतं च ॥ १६९ ॥

तत्कालातिपाते नवाशितायां गोः पयसा कर्त्तव्यम् ॥१६९॥

उपसत्सु रौहिणौ कुर्वीत ॥ १७० ॥

उपसत्सु वर्त्तमानासु नवद्रव्येण रौहिणौ कर्त्तव्यौ ॥ १७० ॥

सुत्यासु सवनीयाः ॥ १७१ ॥

कर्त्तव्याः ॥ १७१ ॥

सौम्यः श्यामाकचरुरारण्यस्य ॥ १७२ ॥

आरण्याग्रयणं श्यामाकनीवारादि । आरण्यग्रहणाच्च सौम्ये कृते तत्र भक्ष्यत इति ॥ १७२ ॥

१वैणवो ग्रीष्मे ॥ १७३ ॥

सौम्यः कर्त्तव्यः । श्यामाकचरोश्च कालानिर्देशात् शरद्येव भवति ॥ १७३ ॥

पुनः संस्कृतो रथो दक्षिणा क्षौमं मधुपर्को वर्षाधृतं वा वासः ॥ १७४ ॥

क्षौममानस्य मुच्यते । वर्षासु यत्परिहितं उतमित्यके । तत्र धृतशब्दो नाञ्जसो भवति । तस्माद्वर्षासु यद्धृतं परिहितं तदेव ग्रहीतव्यमिति ॥ १७४ ॥

अमावास्यायामग्न्याधेयम् ॥ १७५ ॥

अग्न्याधेयमिति कर्मणो नामधेयम । तच्च समुदायस्य तेन ह्यसावग्निराधीयते उत्पाद्यते निष्पाद्यते । न मन्थनमात्रं स्थापनमात्रं

---

१ वैणवः वेणुमयश्चरुरित्यर्थः । तथाचापस्तम्बः—‘ वेणुयवानामिष्टिमेके समामनन्ति ’ इति ।

वा। आहवनीयशब्दो हि संस्कारनिमित्तः न जातिनिमित्तो योगनिमित्तो वा। तेषु सत्सु शब्दप्रयोगदर्शनात्। अतश्च यावान्कश्चिद्दृष्टार्थो अदृष्टार्थो वा तत्संस्कारायाम्नायते स सर्वोऽग्न्याधेयशब्दवाच्यः। एवं च सति संस्कारैकदेशाभावेऽपि अनाहवनीयता। अतश्च सकलकर्मसमुदायाभ्यावृत्तिरिति सम्प्रदायः। अत्र वदामः। कश्चित्संस्कारोऽङ्गवान्भवति। यथा पूर्णाहुत्यामाज्याधिश्रयणाद्यङ्गंतूष्णीम्। अग्निहोत्रे च परिस्तरणादि। इष्टिषु चाग्न्यन्वाधानादि। यस्यैवाङ्गिनोऽङ्गापचारस्तस्यैवावृत्तिर्युक्तरूपा न सकलस्याधानस्येति। न चेहाङ्गापचारेऽपिप्रायश्चित्तं भवत्याहवनीयाद्यधिष्ठानाभावात्। ननु च विद्यन्त एवाहवनीयादयस्त्रिभिरक्षरैर्गार्हपत्यमादधाति पञ्चभिराहवनीयमादधातीति प्रयोगदर्शनात्। नेत्युच्यते। यदीयतैवाहवनीयाद्युत्पत्तिः स्यात् शेषं व्यर्थमेव स्यात्। तस्मात्पञ्चभिराहवनीयमादधातीति भाविनीवृत्तिः। अतो नैमित्तिकहोमस्याभावः। यद्येवं पूर्णाहुत्यादि होमोऽप्यत्र न भवति। उच्यते। आहुत्याहवनीयसंस्कारायैव विधानादित्यदोषः। तस्मादिह विहितानां भाविनीवृत्तिर्युक्ता न तु नैमित्तिकहोमानां। ते हि सत्याहवनीये विधीयन्ते। पूर्णाहुत्यादयस्तु तदुत्पत्यर्थतयेति विशेषः। अमावास्या शब्दश्चात्र गौण्या वृत्त्या प्रतिपद्विषयः। एवम् हि श्रूयते आधानं प्रकृत्य यदहरेवैष न पुरस्तान्न पश्चाद्दृश्येत तदहरुपवसेदिति। उपवासशब्दश्च यमनियमापेक्षः। यदहरस्याश्चाग्न्याधेयं स्याद्दिवैवाश्नीयादित्येवमादिविधानात्। तस्मादमावास्यायामुपक्रम्य प्रतिपद्याधानम्। कृत्तिकादिषु तु नैवं, न हि तत्रैवं वचनमस्तीति ॥ १७५ ॥

## कृत्तिकारोहिणीमृगशिरःफल्गुनीषु ॥ १७६ ॥

स चायं विकल्पः। कृत्तिकास्वग्नी आदधीतेति निरपेक्षविधानात्। ननु चामावास्यायां कृत्तिकास्विति च किमिति न भवति। नैतदेवम्। एवं हि समामनन्ति स योमावास्यायामग्नी आधत्ते यथा विवृतायां द्वारि द्वारा पुरं प्रपद्येत स तत एव स्वर्गं लोकमियादेवं तदित्यमावास्यायां विधाय नक्षत्रनिषेधेन संस्तौति। अथ यो नक्षत्र आधत्ते यथा पिहितायां द्वार्यद्वारा पुरं प्रतिपि-

स्सेत्स जिह्मः पुरः स्यादेवन्तदिति । तस्मादत्रापि नक्षत्रविकल्पः॥१७६॥

हस्तो लाभकामस्य ॥ १७७ ॥

स चायं विशिष्टो लाभ उच्यते न लाभमात्रं य इच्छेत्प्रमे दीयतेति वचनात् । तस्मात्प्रतिग्रहलाभः । अतश्च ब्राह्मणविषय एवायम् ॥ १७७ ॥

चित्रा च क्षत्रियस्य ॥ १७८ ॥

च शब्दाल्लाभकामस्य ॥ १७८ ॥

वसन्तो ब्राह्मणब्रह्मवर्चसकामयोः ॥ १७९ ॥

तस्माद्ब्राह्मणो वसन्त आदधीतेति वचनात् । ब्रह्मवर्चसकामो वसन्त आदधीतेति । ब्रह्मवर्चसं च ब्राह्मणस्यैवोचितम् । तस्मात्सकामनिष्कामयोर्ब्राह्मणयोरिति ॥ १७९ ॥

ग्रीष्मः क्षत्रियश्रीकामयोः ॥ १८० ॥

ग्रीष्मः क्षत्रियस्याधानकालो भवति । तस्मात् क्षत्रियो ग्रीष्म आदधीतेति वचनात् । श्रीकामो ग्रीष्मआदधीतेति हि श्रूयते । सर्वविषयं चैतत् । विशेषानवगमात् ॥ १८० ॥

वर्षाः प्रजापशुकामवैश्यरथकृताम् ॥ १८१ ॥

आधानस्य कालो भवति प्रजाकामपशुकामवैश्यरथकृताम् । कामसम्बन्धश्च सर्वविषयः न वैश्य विषय एव । वैश्यो वर्षास्वादधीतेति च निष्कामस्यापि वैश्यस्य । वर्षासु रथकार आदधीतेति च रथकारस्य वर्षाः ॥ १८१ ॥

इदानीं पूर्वेषु रुपक्रममाह—

अग्न्यगारे कुर्वन्ति ॥ १८२ ॥

बहुवचनोपदेशात्प्रकृताः ॥ १८२ ॥

उदग्वंशं वा परम् ॥ १८३ ॥

वा प्राग्वंशपूर्वं तु प्राग्वंशमेव ॥ १८३ ॥

दक्षिणपूर्वे द्वारे ॥ १८४ ॥

अपरस्य दक्षिणम् पूर्वस्य पूर्वम् । न ह्येकैकस्य द्वारद्वय-विधानमुपपद्यते । यस्मादपरस्य पूर्वं सामर्थ्यपरिप्राप्तम् ॥ १८४ ॥

पौर्णमासवद्वपनम् ॥ १८५ ॥

भवति । वतिना च अविशेषमतिदिश्यते । विकल्पस्य तु सूत्रान्तराभिहितत्वात् । ऋतुनक्षत्रसम्भारसामवपनादीन्न वा कुर्यादिति ॥ १८५ ॥

क्षौमे वस्ते ऽहते पत्नी च ॥ १८६ ॥

क्षौमे आतसे अहते अधौते पत्नी च । क्षौमे वसानावग्नी आदधीयातामिति वचनात् ॥ १८६ ॥

सꣳस्थिते ऽध्वर्यवे देये ॥ १८७ ॥

ते च परिसमाप्ते ऽध्वर्यवे देये ॥ १८७ ॥

गार्हपत्यागारे निर्मथ्याभ्यादधाति ॥ १८८ ॥

मन्थनसन्निधानात्प्रकृताभ्यामेवारणिभ्यां, अनयोर्हि सन्निधानात् ॥ १८८ ॥

वैश्यकुलाम्बरीषमहानसाद्वा ॥ १८९ ॥

वैश्यकुलादपरिगृहीतो हुतोच्छिष्टो वा परिगृह्यते । अम्बरीषो भ्राष्ट्रः कन्दुरिति यः प्रसिद्धः । महानसो यत्राक्षीणोऽग्निर्यथा लौकिकेषु सत्त्रेषु ॥ १८९ ॥

दिवाश्नाति रात्रौ वा ॥ १९० ॥

यदहरस्य श्वोऽग्न्याधेयꣳस्याद्दिवैवाश्नीयादिति । न चायं दिवसनियमः । किं तर्हि रात्र्यशनविकल्पार्थमिदमुक्तम् । तद्व्यपिकाममेव नक्तमश्नीयादिति ॥ १९० ॥

उपास्तमयं देवाः पितरः पितरो देवा योऽह-
मस्मि स सन्यजे यस्याहमस्मि न तमन्तरयामि
स्वं म इष्टꣳ स्वꣳ श्रान्तꣳ स्वꣳ हुतमस्त्विति ॥ १९१॥

इत्याह्वयति । तत्कुतः । स यो हैवं विद्वान् देवाः पितर इति ह्वयतीत्याह्वाने विनियोगात् ॥ १९१ ॥

पूर्वेण प्रविशति दक्षिणेन पत्नी ॥ १९२ ॥

पूर्वेण द्वारेण यजमानो दक्षिणेन पत्नी ॥ १९२ ॥

पश्चादग्नेरुपविशतो दक्षिणतः पत्नी ॥ १९३ ॥

गार्हपत्यागारनिहितस्याग्नेः पश्चाद्दक्षिणतः पत्नीमनुवचनात् ॥ १९३ ॥

अश्वत्थशमीगर्भारणी प्रयच्छति ॥ १९४ ॥

अश्वत्थश्चासौ शमीगर्भश्च अश्वत्थशमीगर्भस्तत्सम्बन्धिन्यौ अरणी प्रयच्छति यजमानाय । ते चाग्न्युत्पत्त्यर्थं परिगृह्येते । एवं च सति ते एव व्यक्ती सर्वदा भवतः । अन्ते च प्रतिपत्तिदर्शनात् । अरणी वृषणयोरिति । तथा च सत्यनयोरभावे नारण्यन्तरादुपादानं शक्यं कर्तुं व्यक्तिनियमात् ॥ १९४ ॥

अभावे ऽगर्भस्य ॥ १९५ ॥

शमीगर्भाभावे ऽश्वत्थमात्राद्गृह्येते ॥ १९५ ॥

वाचं यच्छापूर्णा हुतेरित्याहास्तमिते निशायां
पर्युदयं वा प्रधान कालत्वात् ॥ १९६ ॥

अस्तमित आदित्ये रात्रौ यजमानमाहेति शाखान्तरश्रवणात् । अस्तमित इति श्रुतत्वादस्तमितग्रहणम् । रात्राविति च श्रुतत्वान्निशाग्रहणम् । पर्युदयमिति च वाग्यमस्य पदार्थधर्मत्वात् ।

तेषां च पर्युदयकालता दृष्टा यतवाक्त्वेन हि पदार्थाः सुखेनानुष्ठीयन्त इति दृष्टार्थता भवति । इतरथा ऽदृष्टार्थता स्यात् । तस्मात्पर्युदयमेवेति । यत्तु अस्तमिते आदित्ये रात्राविति च श्रूयते तदुदयसमीपेपि भवत्येव । प्रागुदयाद्धि रात्रिरेव भवतीति । अपरे तु विकल्पमेवेच्छन्ति ॥ १९६ ॥

गार्हपत्यागारे ऽजं बध्नाति न वा विद्यमानं प्रातरग्नीधे दद्यात् ॥ १९७ ॥

तद्धैके ऽजमुपबध्नन्तीति प्रकृत्याह । तदु तथा न कुर्याद्यद्यस्याजः स्यादग्नीधएवैनं प्रातर्दद्यात्तेनैवं तं काममाप्नोतीति । तेन यद्यजो नास्ति ततो नियोगतो बध्यते । अविद्यमाने प्रातरग्नीधे संस्थिते कर्मणि दानं संस्थित इति काण्वपाठात् । एतां रात्रिमजं बध्नातीति चास्तमितग्रहणम् ॥ १९७ ॥

१अस्तमिते रोहिते चर्मण्यानडुहे चत्वारि हविष्यपात्राणि मिमीते तं चातुष्प्राश्यं पचति ॥ १९८ ॥

हविष्याश्च व्रीहयो न यवाः । ओदननिर्देशात् । अथ चातुष्प्राश्यमोदनं पचन्तीति । तं चातुष्प्राश्यं पचतीति तमितिनिर्देशात्तण्डुला एव मीयन्ते न व्रीहयः । कण्डनस्याश्रुतत्वात् । पात्राणि च प्रसृतिपरिमाणानि भोक्तृतृप्तिपरिमाणं ह्यत्र व्यवच्छेदकम् ॥ १९८ ॥

उद्वास्यासेचनं मध्ये कृत्वा सर्पिरासिच्याश्वत्थीस्तिस्रः समिधो घृताक्ता आदधाति समिधाग्निमिति प्रत्यृचम् ॥ १९९ ॥

---

१ सूर्ये ऽस्तमुपगते रक्तवृषभचर्मणि व्रीहिपूर्णानि चत्वारि पात्राणि स्थापयति । चतुर्णां ऋत्विजां तृप्तिपर्याप्तं तं चातुष्प्राश्यं गार्हपत्येऽग्नौ पचति इत्यर्थः ।

चातुष्प्राश्यस्थासेचनं मध्ये कृत्वा सर्पिरासिच्य तेनाक्तास्तिस्रः समिध आदधाति समिधाग्निमिति प्रत्यृचमिति ॥ १९९ ॥

उपत्वेति जपति ॥ २०० ॥

त्रिभिरादधात्येकं जपतीति हि श्रूयते ॥ २०० ॥

१द्वितीयां वाध्वर्युः ॥ २०१ ॥

द्वितीयां वा जपति । येनैवं श्रूयते । समिद्वतीभिर्घृतवतीभिर्ऋग्भिरभ्यादधतीति समिच्छब्दवतीभिर्घृतशब्दवतीभिश्चेति । द्वितीया च न समिच्छब्दवती अतो द्वितीयामेव जपतीति । पाठक्रमस्तु लिङ्गेन बाध्यते । अध्वर्युग्रहणं च पाठक्रमव्युदासार्थम् । अतश्च समिदाधानान्ते जपः । अपरे तु जपं याजमानमिच्छन्ति । मन्त्राश्चाकर्मकरणा इति सूत्रितत्वात्तेनाध्वर्युरित्युच्यते ॥२०१॥

चत्वार ऋत्विजः प्राश्नन्ति ॥ २०२ ॥

तमोदनम् ॥ २०२ ॥

राद्धस्ते ब्रह्मौदन इत्याह ॥ २०३ ॥

अध्वर्युः ॥ २०३ ॥

वरं ददाति ॥ २०४ ॥

ऋत्विग्भ्यो यजमानः । चातुष्प्राश्येन चाननतेर्निर्वर्त्तित्वादृत्विक्षु ब्रह्मवरणं न भवति । अमति चातुष्प्राश्ये भवत्विति चेत् । नाध्वर्यवादिवत्प्रवृत्तत्वात् । अग्न्याधेय ब्रह्मा सामानि गायतीति प्रवृत्तक्रिय एवासाविति ॥ २०४ ॥

संवत्सरं वापुरस्तात्कुर्यात्ततः सर्वानादधीत ॥ २०५ ॥

---

१ अथवा न उपत्वेति ऋचं जपत्यपि तु सुसमिद्धायेतीमां जपतीत्यर्थः ।

इदमन्यत्पक्षान्तरम् । पुरस्तादाधानस्य संवत्सरं यावत् मानादिवरदानान्तमोदनं कुर्यादिति । अस्मिंश्च पक्षे उत्तमरात्रिसंयोगेन चत्वारः पदार्था भवन्ति । अशननियमः । अजबन्धनम् । जागरणम् । वाग्बन्धश्चेति । उत्तमसंयोगेन ह्येते श्रूयन्ते । यदहरस्य श्वोऽग्न्याधेयꣳ स्याद्दिवैवा श्नीयादिति अशननियमः । तथा एताꣳ रात्रिमजं बध्नन्तीति अजबन्धनम् । तथा जाग्रति देवा इति प्रकृत्याह । स स देवतरः श्रान्ततरस्तपस्वितरोग्नी आधत्त इत्याधानकालता भवति । वाग्बन्धस्य प्रधानकालत्वादित्युक्तमेवेति । ततः सर्वानादधीत । तत एवाग्नेः सकाशात् सर्वेग्नय आधीयन्ते । सभ्योपि तत एव सर्वग्रहणात् । तस्य हि मन्थनं विहितम् । सभ्यं च निर्मथ्येति ॥ २०५ ॥

अत्राधानोत्तरकालं कर्मविरच्यते—

गार्हपत्येनुगते ग्रामाग्निमाहृत्य चातुष्प्राश्यं पक्त्वा विहरेत् ॥ २०६ ॥

विहरणोपदेशादग्निहोत्रकाले गार्हपत्यानुगमने लौकिकमग्निमाहृत्य चातुष्प्राश्यं पक्त्वा चतुर्भ्यो दत्वा तमेव विहृत्याग्निहोत्रहोमं कुर्यात् । पुनः स्वयोनेराहरणम् । गुणविधित्वाच्च नात्र मानादि भवति ॥ २०६ ॥

रात्रिं जागरणधारणे ॥ २०७ ॥

जागरणं यजमानस्य धारणमग्नेः ॥ २०७ ॥

शकलैर्वा ॥ २०८ ॥

प्रसिद्धैः । गोमयादिभिर्वा । ननु चैतदवाच्यम् । सामर्थ्यसिद्धत्वात् । वाच्यं वान्यतरनियमो यथा स्यादिति ॥ २०८ ॥

व्युष्टायामुपशमय्य दक्षिणा वा सꣳ हरेदन्वाहार्यपचनश्चेत् ॥ २०९ ॥

व्युष्टायां रात्रावुपशमय्यतमग्निं दक्षिणा वा संहरेत् । यद्य-

न्वाहार्यपचनो नित्योभिप्रेतः स एवं भवति ॥ २०९ ॥

स्थानमुल्लिख्याभ्युक्ष्यान्वारब्धे हिरण्यं निधायो-
षाखूत्करान्निवपत्यन्तेषु शर्कराः ॥ २१० ॥

उपशमितस्याग्नेः स्थानमुल्लिख्यान्वारब्धेभ्युक्ष्य हिरण्यं निधायोषाखूत्करान्निवपत्यन्तेषु शर्कराः । अन्तग्रहणाच्च उषाखूत्करैर्वृत्ताकारः कर्त्तव्यः । ततोन्तेषु शर्करा इति । अत्र चोल्लेखनोपलक्षिताः स्मार्त्तोऽपि पदार्थाः परिसमूहनादयः पूर्वं कर्त्तव्याः । अभ्युक्षणं तु तन्त्रेणैव भवति ॥ २१० ॥

हिरण्यमुपर्येके ॥ २११ ॥

उपरिष्टादेके हिरण्यमिच्छन्ति । एवमपि हि श्रुतत्वात् ॥२११॥

एवमितरयोः ॥ २१२ ॥

आहवनीयदक्षिणाग्न्योः स्थाने कर्त्तव्ये ॥ २१२ ॥

अयं तु विशेषः—

पुरस्तादाहवनीयस्याष्टासु प्रक्रमेष्वेकादशसु
मत्या वा ॥ २१३ ॥

तं वा अष्टासु विक्रमेष्वादधीतेत्येवमादि वचनात् ॥ २१३ ॥

इतरस्य वितृतीये दक्षिणतः ॥ २१४ ॥

इतरस्य दक्षिणाग्नेः वितृतीये देशे दक्षिणतः स्थानं कर्त्तव्यम् ॥ २१४ ॥

उसृप्तोऽग्निमथनमनुसृप्त एके ॥ २१५ ॥

उदितेनुदिते वाग्निमन्थनं भवति ॥ २१५ ॥

उदिते तूद्धरणम् ॥ २१६ ॥

उद्धरणं तूदित एव कर्त्तव्यम ॥ २१६ ॥

अपरेण गार्हपत्यायतनम् ॥ २१७ ॥

मन्थनं भवतीति वाक्यशेषः ॥ २१७ ॥

तत्र च—

अश्वमानयेति ब्रूयात् ॥ २१८ ॥

तस्माद्यत्राग्निं मन्थिष्यंस्यात्तदश्वमानेतवै ब्रूयादिति। अतश्च यो मन्थिष्यन् स प्रैषं ददाति। स चाध्वर्युः शाखान्तरे विहितः। तस्मादध्वर्युः प्रत्यङ्मुखोमन्थतीति। अग्नीमनुप्रैषार्थं करोति ॥२१८॥

१स्थितेऽश्वे पुरस्तात् ॥ २१९ ॥

मन्थनं भवति ॥ २१९ ॥

जाते वरदानम् ॥ २२० ॥

जातेग्नौ वरदानं कर्त्तव्यम ॥ २२० ॥

मनसैके ॥ २२१ ॥

मनसा वा सङ्कल्पमात्रं कृत्वा पश्चाद्ददाति ॥ १२१ ॥

तस्याभिश्वासः प्राणममृते दध इति ॥ २२२॥

---

१ तत्र च प्रथममधरारणिमुत्तराग्रां निधाय उत्तरारण्या ईशानदिग्भागादष्टाङ्गुलदीर्घं द्व्यङ्गुलविपुलं प्रमन्थं छित्वा तस्य मूलं चात्रबुध्ने प्रवेश्य अधरारण्या मूलादष्टाङ्गुलं त्यक्त्वा अग्राच्च द्वादशाङ्गुलं त्यक्त्वा तदन्तराले अङ्गुलचतुष्टयपरिमिते पूर्वेऽरण्यन्ते मन्थनस्थानं कृत्वा चात्रबुध्नप्रोतस्य प्रमन्थस्याग्रं तत्र निधाय चात्राग्रकीलकस्योपर्युदगग्रामौविलीं निधाय यन्त्रं धारयित्वा चात्रं नेत्रेण प्रदक्षिणं त्रिर्वेष्टयित्वा तथा मन्थनं कुर्याद्यथा जातोऽग्निः प्राच्यां पतति। तत्र यजमानः प्राङ्मुखो यन्त्रधारणं करोति, पत्नी चात्रं नेत्रेण त्रिर्वेष्टयित्वा मन्थनं करोति। ततः शाखान्तरादध्वर्युश्च। 'तस्मादध्वर्युः प्रत्यङ्मुखो ऽभिमन्थति' इति। चात्रादीनां लक्षणमन्यत्र स्पष्टम्।

अभिश्वासेन च प्राण्यते अग्निः समर्थः क्रियते । ततश्च मुखेनाभिश्वासः क्रियते ॥ २२२ ॥

उच्छ्वासोमृतं प्राण आदध इति ॥ २२३ ॥

वायूपादानं उच्छ्वासः। सैव चापाननक्रिया। स पुनरपानिति तदेनमन्तरात्मन्नाधत्त इति । तदेनमग्निमन्तरात्मनाधत्त इति । यजमानसंस्कारोयमिति तत्कर्तृकः । अतश्च पुनराधेये न भवत्यग्निसंस्कारत्वात्। अभिश्वासस्तु भवत्येव। द्वावपि चैतावेककर्तृकौ। सपुनरपानितीति वचनात् । अभिश्वासः पुनर्जातसंयोगात्ततः सर्वानादधीतेत्यत्र न भवति । उच्छ्वासस्त्वात्मसंस्काराद्भवत्येवेति ॥२२३॥

[1]दारुभिर्ज्वलन्तमादधाति भूर्भुव इति सम्भारेष्वमुष्य त्वा व्रतपते व्रतेनादध इति यथर्षि ॥ २२४ ॥

यथर्षि ग्रहणेन शाखान्तरपरिपठितमार्षेयं गृह्यते । यद्यङ्गिरा अङ्गिरसां त्वा देवानां व्रतपते व्रतेनादध इति । यदि भृगवः भृगूणां त्वा देवानां व्रतपते व्रतेनादध इति । भार्गवाङ्गिरसव्यतिरिक्तानां आदित्यानां त्वा देवानामिति । एवं हि शाखान्तरे पठ्यते[2] ॥ २२४ ॥

---

१ तं जातमग्निं दारुभिर्यज्ञीयवृक्षकाष्ठैर्ज्वलन्तं दीप्यमानं सम्भारेषु सम्भारणां हिरण्यादीनामुपरि भूर्भुव इति मन्त्रेण अमुष्य त्वेति मन्त्रेण च स्थापयति; यथर्षि यस्य य ऋषिर्भवति तस्यामुष्येति स्थाने तदृषिवाचि पदं षष्ठ्यन्तं प्रयोज्यमित्यर्थः ।

२ तथा चापस्तम्बः ‘ भृगूणां त्वा देवानामिति यो भार्गवः स्यादङ्गिरसां त्वा देवानामिति यो ब्राह्मण आङ्गिरसः स्यादादित्यानां त्वा देवानामित्यन्यासां प्रजानां, वरुणस्य त्वा राज्ञो व्रतपत इति राज्ञ इन्द्रस्य त्वेन्द्रियेण व्रतपत इति राजन्यस्य मनोष्ठा ग्रामण्यो व्रतपत इति वैश्यानां आदित्यानां त्वेति रथकारस्येति यथर्ष्याधानमिति ।

वरुणस्य त्वेति क्षत्रियस्येन्द्रस्य त्वेति राजन्यस्य ॥ २२५ ॥

व्रतपते व्रतेनादध इत्युभयत्र सम्बध्यते । राजन्यग्रहणेन च कैश्चिदनभिषिक्तो गृह्यते । अनभिषिक्तः क्षत्रिय इति । एतच्चायुक्तम-यत्कारणं क्षत्रियायां ब्राह्मणाजातो राजन्य इति स्मर्यते । तस्मात्स एव गृहीतव्यः ॥ २२५ ॥

मनोष्ट्वा ग्रामण्य इति वैश्यस्य ॥ २२६ ॥

ऋभूणां त्वेति रथकृतः ॥ २२७ ॥

आदधाति । देवानामित्यत्रापि हि पठ्यते । रथकारशब्दः स्वजा-तिनिमित्त इत्युक्तम् ॥ २२७ ॥

रथन्तरं गायेति प्रेष्यति ॥ २२८ ॥

प्रैषप्रैषार्थयोः कर्तृभेदान्न ज्ञायते कः प्रैषे को वा प्रैषार्थ इत्यत आह—

गानमध्वर्योः ॥ २२९ ॥

समाख्यानात् । अध्वर्युवेदविहितं हि सामगानम् । उत्प-त्तिमात्रं हि सामवेदे । प्रैषार्थस्य च प्रधानभूतत्वात् ॥ २२९ ॥
एवं प्राप्त आह—

ब्रह्मा वा वेदयोगात् ॥ २३० ॥

ब्रह्मा वा सामगायति । कुत एतत् । ब्रह्मणोपि ह्यध्वर्युवेदवि-हितकर्मयोगोस्ति । वेदत्रयविहितं हि ब्रह्मत्वमतः समाख्यातस्तत्रापि घटते ॥ २३० ॥

युक्तत्वाच्चाध्वर्योः ॥ २३१ ॥

अपि च युक्तोध्वर्युः पदार्थान्तरेषु । तथा च सूत्रान्तरम् ।

प्रस्तोता परिसामानि गायति अग्न्याधेये सौत्रामण्यां च ब्रह्मेति। तस्माद् ब्रह्मैव सामगाने ॥ २३१ ॥

इध्मेनोद्धरणमुपयम्य ॥ २३२ ॥

परिधिवृक्षसम्बन्धिनेध्मेनाहवनीयोद्धरणम्। उपयमनीभिर्मृद्भिर्गृहीत्वा विस्रस्तत्वाच्च मृद्भिर्ग्रहणानुपपत्तिरतस्तत्रारोपणमात्रेणैवोपयमनम्। तत्र चेध्माग्रमारोप्यते। बुध्नाः पुनरग्नाविति ॥२३२॥

यथैनं धूम उपेयात् ॥ २३३ ॥

तथा चोद्धरणं कर्त्तव्यम्। यथा यजमानं धूम उपगच्छेत्। अनेन च प्रकारेण यजमानस्य धूमानुगमनं विधीयते ॥ २३३ ॥

वामदेव्यमिति प्रेष्यत्यश्वः पुरस्ताद्युवा तदभावे ऽयुवाश्वाभावे ऽनड्वान् ॥ २३४ ॥

तं यत्र प्राञ्चं हरन्ति तत्पुरस्तादश्वं नयन्तीति वचनात्। मन्थनकालाहृत एवायमश्वो नाश्वान्तरं तदभावे वानड्वान्भवति। अस्मिंश्च पक्षे अनभिधायकत्वादश्वमानयेति प्रैषाभावः ॥ २३४ ॥

१ सम्भारानधिष्ठाप्य दक्षिणपूर्वपादेन प्राञ्चं नीत्वावर्त्त्य स्थापयति ॥ २३५ ॥

दक्षिणपूर्वपादेनेति सन्निधानात्सम्भारानुत्तरेण प्राञ्चं नीत्वावर्त्त्य स्थापने क्रियमाणे सन्निहितो दक्षिणपूर्वपादः। एवं च सत्यग्नौ सव्येनाक्रमणम् ॥ २३५ ॥

---

१ एवं प्राङ् मुखे ऽश्वे अग्रतो नीयमाने आहवनीयखरसमीपं प्राप्य प्राङ् मुखस्यैवाश्वस्य दक्षिणपूर्वपादेनाग्रिमदक्षिणचरणेनाहवनीयखरस्थान् हिरण्यादिसम्भारानधिष्ठाप्य अश्वपादेनाक्रमय्य तमश्वं प्राञ्चं नीत्वा तत आवर्त्य प्रदक्षिणावर्तनेन प्रत्यङ् मुखं कृत्वा संमुखं स्थापयतीत्यर्थः।

वृहदिति प्रेष्यत्यग्निना पदं द्विरुपस्पृश्य तृतीयेनादधाति द्वितीयेन प्रथमेन वा भूर्भुवः स्वरिति पूर्ववत् ॥ २३६ ॥

अग्निना पदं द्विरुपस्पृश्य तृतीयेनोपस्पर्शनेनादधाति द्वितीयेन वा भूर्भुवः स्वरित्यनेन मन्त्रेण । पूर्ववच्छब्देन च यथर्षीति लभ्यते ॥ २३६ ॥

पुरस्तात्परिक्रम्येध्मपूर्वार्द्धं गृहीत्वा द्यौरिव भूम्नेत्याह ॥ २३७ ॥

पुरस्तात्परिक्रम्याग्नेः इध्मपूर्वार्द्धं गृहीत्वा द्यौरिव भूम्नेति मन्त्रं जपति । तच्चैतद्यजमानः करोति । इध्मपूर्वार्द्धान्वारम्भण इति अन्वारम्भोपदेशात् । तस्य च याजमानत्वात् । मन्त्रलिङ्गाच्च । अस्त्वग्निमन्नादमन्नाद्यायादध इति ॥ २३७ ॥

आयं गौरिति चोपतिष्ठते सार्पराज्ञीभिः ॥ २३८ ॥

शब्दाद्यजमानोऽग्न्युपस्थाने । सार्पराज्ञी ग्रहणं च संव्यवहारार्थम् । सार्पराज्ञीर्न वा कुर्यादिति ॥ २३८ ॥

दक्षिणाग्निमादधाति ॥ २३९ ॥

गार्हपत्यात् । नित्यपक्षे योऽसौ दक्षिणाहृतस्तमादधाति ॥२३९॥

सभ्यं च निर्मथ्य ॥ २४० ॥

चशब्दादादधातीति । तं च सभास्थाने । अथ य एष सभायामग्निरिति वचनात् । सभा च यत्र स्थितोऽध्यापयति व्याचष्टे वा ॥ २४० ॥

गां दीव्यध्वमित्याह ॥ २४१ ॥

दीव्यतिः क्रीडार्थः । गां पणं कृत्वा द्यूतं रभध्वमित्यर्थः । बहुवचनोपदेशात्प्रकृतत्वाच्च ऋत्विजोऽभिधीयन्ते द्यूतस्य कर्तृत्वेन ।

तच्चैतद्यूतं सभ्याङ्गम् । सभ्यस्य प्रकृतत्वात् । उपरितनसूत्रे च तद्धर्मोपदेशात् ॥ २४१ ॥

## धारणोपस्थानमत इति ॥ २४२ ॥

सभ्याङ्गत्वे च पुनराधेये न भवत्येव विद्यमानत्वादेव सभ्यस्य । यद्यपि च तनूहवींषि कालान्तरे क्रियन्ते तथापि तु सभासनमत एवारभ्य कर्त्तव्यमिति ॥ २४२ ॥

## श्यैतवारवन्तीययज्ञायज्ञियानीति च प्रेष्यति ॥ २४३ ॥

च शब्दः सभ्यानन्तर्यप्रज्ञप्त्यर्थः । श्यैतादीनां चैककालं प्रैषोच्चारणमिति सम्प्रदायः । प्रैषप्रैषार्थयोरानन्तर्याद्भेदे नेत्यपरे । ततश्च श्यैतगानोत्तरकालीनो वारवन्तीयप्रैषः । वारवन्तीयोत्तरकालीनश्च यज्ञायज्ञियस्य ॥ २४३ ॥

## दक्षिणेनाग्नीन्परीत्योदगुत्सृजति ॥ २४४ ॥

प्रदक्षिणमग्निपरिगमनं कृत्वा उदगुत्सृजत्यश्वम् । दक्षिणग्रहणाच्च नेतरथावृत्तिर्भवति ॥ २४४ ॥

## ऋतुनक्षत्रसम्भारसामवपनचातुष्प्राश्यजागरणेध्मपूर्वार्द्धान्वारम्भणसार्पराज्ञीर्न वा कुर्यात् ॥ २४५ ॥

ऋत्वादिविकल्पार्थमिदमुक्तम् । ऋतौ तावत् । ते वा एत ऋतव उभय एवापहतपाप्मान इति प्रकृत्याह तस्माद्यदैवैनं कदाच यज्ञ उपनमेदथाग्नीआदधीतेति । तथा यदैवैनं श्रद्धोपनमेदथादधातीति ऋत्वनादरः । तस्मान्न नक्षत्रं आदधीतेति नक्षत्रविषयोनादरः । नक्षत्रानादरे चामावास्यायां नियम इति सम्प्रदायः । तत्पुनर्नातीव युक्तरूपम् । यत्कारणं अमावास्या नक्षत्रं च भेदेन विहिते । कृत्तिकादिष्वादधीतेति नक्षत्रविधानम् । तद्-

नादरे चाकृत्तिकादिष्वपीति गम्यते । तथा चाह यद्यु नक्षत्रकामः स्यादेतद्वा अनपराद्धं नक्षत्रं यत्सूर्यः स एतेनैव पुण्याहेन यदेतेषां नक्षत्राणां कामयेत तदुपेत्सेदिति । एवं सत्यमावास्यायामकृत्तिकादिष्वप्याधानं भवत्येव । सम्भारेषु विहितप्रतिषेधाद्विकल्पः । न वै कञ्चनं सम्भारं सम्भरेदिति वचनात् । सामस्वपि बालोऽग्निस्तेजोवन्ति सामानि तस्मान्न गेयानीति । वपनेऽपि शाखान्तराद्विकल्पः । चातुष्प्राश्येऽपि चातुष्प्राश्यमोदनं पचन्तीति विधायाह यद्वा अस्य ब्राह्मणाः कुले वसंत्यृत्विजश्चानृत्विजश्च तेनैवतं काममाप्नोतीति विकल्पः । जागरणमपि विधायोच्यते । तद्वपि काममेव स्वप्यादिति । इध्मपूर्वार्द्धान्वारम्भणं च पूर्वार्द्धमुल्मुकानामभिपद्य जपतीत्युक्त्वाह स यदि कामयेत जपेदेतद्यद्युकामयेतापि नाद्रियेतेति । सार्पराज्ञ्युपस्थानमपि सर्पराज्ञ्या ऋग्भिरुपतिष्ठेतेति विधायाह तस्मान्न सर्प्यराज्ञ्या ऋग्भिरुपतिष्ठेतेति ॥ २४५ ॥

विकल्पप्रसङ्गेनेदमपरमुच्यते—

अग्निहोत्रं च तूष्णीं श्रुतेः पूर्णाहुत्यन्ते ॥ २४६ ॥

अग्निहोत्रशब्दोऽत्र धर्मवन्नैयमिकाग्निहोत्रधर्मातिदेशार्थः । वा जुहुयाद्वा न जुहुयादिति । कुत एतत् । एवं हि शाखान्तरे पठ्यते । होतव्यमग्निहोत्रं न होतव्यमग्निहोत्रं विधिप्रतिषेधाभ्यामाशङ्क्याग्निहोत्रं चेत्युक्तम् । तत्पुनरयुक्तम् । न ह्येतौ विधिप्रतिषेधौ । तूष्णीं होमप्रशंसैषा । यदि जुहोत्ययथाकुर्यादथ न जुहोत्यग्निः परापतेत्तस्मात्तूष्णीं जुहुयादिति । अतो न विकल्पः । तच्चैतदग्निहोत्रं सायारम्भं प्रातरपवर्गं प्रयोगद्वयपरिसमापनम् । आग्नेयी सायमाहुतिः सौरी प्रातराहुतिः प्रधानभूते । अत्र चैककालत्वादङ्गानि तन्त्रेण । प्रधानाहुती तु चतुर्गृहीतेनाग्नेयीं हुत्वा पात्रान्तरं तदुन्नीय चतुर्गृहीतान्तरेण सौरीम् शेषमेकीकृत्योत्तराहुतिरिति । तच्चैतत्पूर्णाहुत्यन्ते भवति ॥ २४६ ॥

पूर्णाहुतिविधानायाह—

निरुप्याज्यं गार्हपत्येऽधिश्रित्य स्रुक् स्रुवं च सम्मृज्योद्वास्योत्पूयावेक्ष्य गृहीत्वान्वार-

बध एव; सर्वत्र स्वाहेति ॥ २४७ ॥

पूर्णाहुतिरिति कर्मणो नामधेयम्। अन्वर्थसंज्ञा चैषा। तेन पूर्णैव होतव्या। तां वै पूर्णां जुहोतीति वचनात्। निरुप्याज्यं गार्हपत्येऽधिश्रयेत्। गार्हपत्यग्रहणं च आहवनीयव्युदासार्थम्। तत्रापि हि श्रपणं विहितं श्रपणं वाहवनीय इति। अपरे तु मन्यन्ते। अधिश्रयणं संस्कारमात्रमेवैतत्। न ह्येतच्छ्रपणं श्रापाक इति धात्वर्थः पाकेनैव त्वाज्यं संवृत्तं तस्मान्नाहवनीयव्युदासार्थम् गार्हपत्यग्रहणम्। कस्तर्ह्यत्र समाधिः। गार्हपत्यशब्दस्य संस्कारनिमित्तत्वात्तदभावाच्च भाविन्या वृत्त्या गार्हपत्यत्वाध्यारोपणार्थं गार्हपत्यग्रहणम्। एवं च सत्याहवनीयेऽप्ययमेव न्यायः। स्रुक् स्रुवं समुच्यते। होमसम्बन्धाद्धैकङ्कती स्रुक्। स्रुवश्च विशेषितत्वात्खादिर एव। तथा च अग्निहोत्र विधानसामर्थ्यात्। वैकन्तः स्रुवो भवति। उद्वास्योत्पूयावेक्ष्य स्रुवेण ग्रहणम्। स्रुवस्य सम्मार्जनविधानात्। ग्रहणार्थता सम्मार्जनोत्पवने च दर्भैर्येन कचित्पाणिना सम्मार्ष्टीत्याह। अन्वारब्धे जुहोति स्वाहेति। एवं सर्वत्र। यत्राव्यक्ता जुहोति चोदना तत्राधिश्रयणादि प्रवर्त्तते। कुत एतत्। जुहोति शब्दात्। अव्यक्तता सामान्याच्च ॥ २४७ ॥

वरं ददामीति वाग्विसर्जनम् ॥ २४८ ॥

वरदानं च पूर्णाहुत्यङ्गम्। तस्यां वरं ददातीति वचनात्। पूर्णाहुतिधर्माश्चानुदूधृताभ्यस्तमयाहुतौ विहिता गार्हपत्य आज्यमधिश्रित्योद्वास्योत्पूयावेक्ष्येत्येवमादि। इयं त्वविहितधर्मका तेन चोदनासारूप्येण ततो धर्मान् गृह्णाति। अत आचार्येण तदीया धर्मा इहोपदिष्टाः। तत्रान्वारम्भणवरदाने न विहिते। अतस्तयोरनतिदेशः। वाग्यमोऽपि चेहैवेति नातिदिश्यते ॥ २४८ ॥

द्वादशाहान्ते तनूहवी; षि निर्वपति मासे द्वितीये तृतीये षण्मास्ये संवत्सरे सद्यो वा न वेति ॥ २४९ ॥

निगदव्याख्यातम् ॥ २४९ ॥

तनूहवींष्युच्यन्ते—

अग्नये पवमानाय प्रथमा ॥ २५० ॥

इष्टिर्भवति ॥ २५० ॥

अग्नये पावकायाग्नये शुचये ॥ २५१ ॥

द्वितीया ॥ २५१ ॥

अदित्यै चरुस्तृतीया ॥ २५२ ॥

न चेयं तनूहविषां मध्ये पठ्यते। तेनास्या उपांशुत्वं न भवतीति सम्प्रदायः। शाङ्खायनशाखायां तूपांशुत्वमस्याः पठ्यते ॥२५२॥

आग्नेय एव वा पुरस्तादादित्यस्य ॥ २५३ ॥

आग्नेयो वा प्रागादित्यात् अथादित्यै चरुरुपांशुः ॥ २५३ ॥

षड्दक्षिणाः प्रतिविभज्य ददाति द्वादशचतुर्विंशतिं वा ॥ २५४ ॥

प्रतीष्टिविभागेन दक्षिणादानम् ॥ २५४ ॥

भूयसीश्च यथा श्रद्धम् ॥ २५५ ॥

उक्तसंख्याव्यतिरेकेण यथा श्रद्धं भूयसीश्च ददाति ॥ २५५ ॥

धेनुरादित्यस्य ॥ २५६ ॥

ताश्चैता दक्षिणा इष्टिसम्बन्धादिष्टयङ्गं न सकलस्याधानस्य। तथाचोक्तम्। उलूखलमुसलाभ्यां दृषदुपलाभ्यां हविर्यज्ञं घ्नन्तीति प्रकृत्य स एष यज्ञो हतो न ददक्षे तं देवा दक्षिणाभिरदक्षयन्निति तस्मादिष्टीनामेव दक्षिणा इति। प्रयोजनं इष्टयभावे तदभावः ॥ २५६ ॥

अनृतातिथ्यपनोदपूतिदार्वाधानबींसपक्कना-

व्युदकानि वर्जयेत् ॥ २५७ ॥

अनृतातिथ्यपनोदः स्मृतिप्राप्त एवानूद्यते । नानृतं वदेदिति स्मृतिः । अप्रणोद्योतिथिरिति च । तदनुवादोयम् । न वा आहिताग्निनानृतं वदितव्यमिति । तदेतन्नातीव युक्तरूपम् । यतोनुवादमात्रमनर्थकम् । विधौ च प्रवृत्तिविशेषकरत्वम् । तस्माच्छ्रौत एवायं सत्यवदननियमः । एवं च तदपचारे श्रौतं स्मार्त्तं च प्रायश्चित्तम । पूतिशब्दो दुर्गन्धिद्रव्यवाची प्रसिद्धेः । ऋबीसपक्कं यत्पृथिव्या गर्त्ते तिन्दुकादि पाचितम् । ऋबीसशब्दश्च पृथिवीवचनो नैरुक्ताभिप्रायात् । योप्स्वृबीसे पृथिव्यामग्निरिति । नाप्युदकं च । अग्निहोत्रार्थमुद्धृते ऽग्नावुदकदानप्रतिषेधः । स यद्युद्धृतेग्नावभ्यागताय नोदकं याचन्त इति । नौशब्दश्चात्राग्निहोत्रविषयो नौर्हवा एषा स्वर्ग्या यदग्निहोत्रमिति ॥ २५७ ॥

१ब्रह्मचार्यग्निनित्यधारीक्षीरहोम्यग्निमुपशायी-
द्वादशरात्रं षड्रात्रं त्रिरात्रमन्ततः ॥ २५८ ॥

निगदव्याख्यातम् । पुरुषधर्मश्चायम् । ततश्च सोमाधाने समारोपस्य क्रतुधर्मत्वात् पुरुषधर्मोऽग्निनित्यधारित्वं बाध्यते ॥२५८॥
अग्न्याधेयमनुविहितमवसरप्राप्तमिदानीं पुनराधेयमुच्यते—

२पुनराधेयमाधानाप्रतिज्ञातस्य ॥ २५९ ॥

---

१ यजमान आधानानन्तरं द्वादशरात्रम् अथवा षड्रात्रम्, अथवा अन्ततः अन्तिमपक्षे त्रिरात्रं ब्रह्मचारी भवेत् । अग्निनित्यधारी गार्हपत्याहवनीयदक्षिणाग्निसभ्यान्नित्यं धारयेत् । क्षीरहोमी दुग्धेनैवाग्निहोत्रं जुहुयात् । अग्निमुपशायी अग्निसमीप एव भूमौ शयीतेत्याद्यर्थः ।

२ सूत्रार्थस्तु योधनवृत्ताध्ययनादिमत्तयातिप्रसिद्धः पुरुषः स प्रतिज्ञात इत्युच्यते, न प्रतिज्ञातो ऽप्रतिज्ञातः, आधानलक्षणेन निमित्तेनाप्रतिज्ञातः आधानाप्रतिज्ञातः यः प्रागाधानाल्लुब्धप्रतिष्ठो ऽपि अग्न्याधानसमनन्तरं संवत्सरादर्वागेव वित्तमानादिहानेर्लाभाभावाद्वाप्रतिष्ठितो ऽप्रसिद्ध इव स्यात् अप्रतिष्ठ इव भवेत् तस्येदं दुष्टाग्न्यु-

पुनराधेयमिति कर्मणो नामधेयम् । तच्चाधानाप्रतिज्ञातस्य भवति । यस्याधानसमनन्तरमेव प्रतिज्ञातमपगतं स आधानाप्रतिज्ञातः । एवं हि श्रूयते । यस्याधानमनर्थकं स्यात् स पुनरादधीत । तथा योग्नी आधाय सर्वज्यानिं जायते स पुनरादधीत ॥ २५९ ॥

राज्ययशस्कामस्य वा ॥ २६० ॥

त्रिरात्रावरमग्नीनुत्सृज्य ॥ २६१ ॥

त्रिरात्रमवरं यस्य कालस्य स त्रिरात्रावरः । अतश्च त्रिरात्राद्यपि भवति । अग्नीनिति बहुवचनोपदेशात् त्रय एवोत्सृज्यन्ते । अतश्च सभ्यस्यानुत्सर्गः ॥ २६१ ॥

सद्यो वा ॥ २६२ ॥

तत्र विशेषं वक्ष्यति । सद्यश्चेदिति ॥ २६२ ॥

पुनर्वस्वोः ॥ २६३ ॥

पुनराधेयमादधीतेति वचनात् ॥ २६३ ॥

वर्षासु मध्यन्दिने वा ॥ २६४ ॥

स वै वर्षास्वादधीतेति वचनात् । तस्मादु मध्यन्दिन एवादधीतेति वा । स चायं विकल्पः । मध्यन्दिने वर्षाकालसम्पत्तेः । यो यदा मध्यन्दिनोथ वर्षा इति प्रकृत्य तस्मादु मध्यन्दिन एवादधीतेत्याह ॥ २६४ ॥

---

त्सर्गपूर्वकमदुष्टाग्न्युत्पादकं पुनराधेयसंज्ञकं कर्म भवतीत्यर्थः । तथाथर्वणे पठ्यते 'आधानाद् वृद्धिर्हानिश्चेदर्वाक् संवत्सराद्रोहिण्यामग्निहोत्रमुत्सृज्य पुनर्वस्वोः पुनरादधीत' इति । शाङ्खायनोऽपि 'काम्यं पुनराधेयमजानानस्य' इति पठितवान् । अथवा प्रतिज्ञातं प्रियं न प्रतिज्ञातमप्रतिज्ञातमाप्रियम् आधानसमनन्तरमेव सर्वस्वहानिपुत्रमरणादिहानिदर्शनादाधानमेव यस्याप्रियम्भवति तस्य पुनराधेयमिति । 'एतद्धास्य प्रियतमं धाम' इत्यादि दर्शनात्प्रतिज्ञातशब्दस्य प्रीतौ शक्तेः ।

## कुशैराधानम् ॥ २६५ ॥

उभयोरग्न्योः। तं वै दर्भैरुद्धरतीति हि श्रूयते ॥ २६५ ॥

## व्रीह्यपूपमर्कपलाशयोः पक्कं गार्हपत्यस्थाने निदधात्येवमाहवनीयस्य याव॒ सद्यश्चेत् ॥२६६॥

स चायमपूपः प्राक् सम्भारेभ्यः स्थाप्यते। सम्भारेषु ह्यग्निनिधानं विहितं भूर्भुव इति सम्भारेष्विति। न चापूपस्य सम्भारैः सह विकल्पो धर्ममात्रत्वात्। अतः परिसमूहनादीन्पञ्च पदार्थान् कृत्वा अपूपस्थापनम्। सद्यः पक्षे चापूपौ भवतः। न रात्र्यन्तरपक्षे। अपूपं प्रकृत्याह पूर्वाभ्यामेवै नावेतदग्निभ्यामन्तर्दधम इति। पुनस्त न्निराकरणायाह रात्रिभिर्ह्येवान्तर्हितौ भवत इति ॥ २६६ ॥

## आग्नेयः पञ्च कपाल उपा॒शु प्रागुत्तमादनुयाजात् ॥ २६७ ॥

तेनोपा॒शुचरन्तीति प्रकृत्याह उच्चैरुत्तममनुयाजं यजतीति। अतः प्रागित्युक्तम् ॥ २६७ ॥

## तद्वर्जं वा ॥ २६८ ॥

उत्तमानुयाजवर्जं वोपा॒शु भवति। उच्चैरुत्तममनुयाजं यजतीति। एतावानेव हि विधिः। आग्नेयं प्रकृत्याह तेनोपा॒शु चरन्तीति। चरणशब्दे च सर्वस्योपांशुताचार्येणोक्ता चरणशब्दे सर्वमिति। पञ्च कपाल एवैको भवति। नान्या इष्टयः। एवकारकरणात्। आग्नेयमेव पञ्च कपालं पुरोडाशं निर्वपतीति ॥ २६८ ॥

## अग्नीनिति वा प्रथमे प्रयाजे ऽनुयाजे च ॥२६९॥

वा समिधो यजेति देवान् यजेति वा। एवं श्रूयते प्रयाजान्प्रकृत्य स आश्राव्याह समिधो यजेति अग्नीन्यजेति त्वेव ब्रूयात्तेन विकल्पाशङ्कया अग्नीनिति वेत्युक्तम्। यद्येवमग्नीनित्येवेत्यवधारयित-

ध्यमम् समिधो यजेति हि तस्यैव संस्तवायोच्यते । अतोऽग्नीनिवेत्यवधार्यते ॥ २६९ ॥

अज्यभागो द्वितीयो ऽग्नये पवमानायेन्दुमते वा ॥ २७० ॥

सचायं वाचनिको देवता विकल्पः ॥ २७० ॥

हिरण्यं दक्षिणानड्वान्वाग्न्याधेयिकीश्चेच्छऊच्छ्रुतेः ॥ २७१ ॥

श्रुतिग्रहणं समुच्चयविधानार्थमिति केचित् । तदयुक्तम् । अग्न्याधेयिकीर्दत्वा पुनराधेयिकीर्ददात्ययमनुवाद एव । अग्न्याधेयिक्यो हि पूर्वं दत्तास्ततः पुनराधेयिक्यः । श्रुतिग्रहणं च विध्याशङ्कानिवृत्त्यर्थम् ॥ २७१ ॥

अग्न्याधेयवदन्यत्सद्यः ॥ २७२ ॥

उक्तव्यतिरेकेणान्यदग्न्याधेयवद्भवति । इयांस्तु विशेषः । सद्यः । अग्न्यगारकरणं अरणिप्रदानं उच्छ्वासश्च न भवति । अनग्निसंस्कारात् ॥ २७२ ॥

अपराह्णे मैत्रावरुणी वशानस्तमिते पुरोडाशेडान्तं कृत्वा रात्रिशृतया प्रातश्चरन्ति तत आधानम् ॥ २७३ ॥

इदमन्यत्पक्षान्तरम् । पूर्वेद्युरपराह्णे मैत्रावरुणीं वशामालभ्य रात्रौ श्रपयित्वा प्रातः प्रचारस्तत आदधीत । पुनर्वस्वोरेव नान्यत्र । न त्रिरात्रावरमुत्सर्गो नापूपाविति ॥ २७३ ॥

पुनराधेयमनुविहितमिदानीमग्निहोत्रस्यावसरस्तं प्रोत्सार्य शाखान्तरावगतक्रमेण तदङ्गभूतमुपस्थानमनुविधीयते—

सायमाहुत्यां हुतायां यजमानोऽग्नी उपतिष्ठ-

## ते वात्सप्रेण ॥ २७४ ॥

सायमुपतिष्ठेत सायं हि देवा उपातिष्ठन्तेति वचनात् । वात्सप्रमिति चोपस्थानक्रियानाम । यद्यपि च हुतायामित्युक्तम तथापि तु समिदाधानमन्त्रकर्मानन्तर्यात्तदनन्तरमेव कर्त्तव्यम । हुतशब्दश्च हुतप्रायविषयःयथा हुते च धारावर्जमिति ॥ २७४ ॥

## न वा ॥ २७५ ॥

न वोपतिष्ठेत। अथ यस्मादुपैवतिष्ठेताथ यस्मान्नोपतिष्ठेतेति । विहितप्रतिषिद्धत्वाद्विकल्पः ॥ २७५ ॥

## १तिस्तस्त्रिरुपप्रयन्तोस्य प्रत्नां परितो चित्रावसविति च ॥ २७६ ॥

प्रक्रमादेव त्रित्वसिद्धेस्तिस्र इति ग्रहणात् स्वस्थानस्थितानामेव त्रिरावृत्तिः । चित्रावसविति च त्रिरेव ॥ २७६ ॥

## सन्त्वमित्युपविश्य ॥ २७७ ॥

जपतीति वाक्यशेषः । एतावनुतिष्ठन् जपत्यथासीनः सन्त्वमिति वचनात् ॥ २७७ ॥

## गां गच्छत्यन्धस्थेति ॥ २७८ ॥

एतश्च सन्निधानात् कर्माङ्गभूतां गां प्रति गमनं सन्निहितप्रत्ययन्यायात् । एवं च सति गोपक्ष एवैतदुपस्थानं नान्यत्रेति ॥ २७८॥

## सꣳहितेत्यालभते ॥ २७९ ॥

गामेव ॥ २७९ ॥

## गार्हपत्यं गत्वोपतिष्ठत उपत्वेति ॥ २८० ॥

---

१ अत्रोपप्रयन्तो ऽध्वरमित्यारभ्य परिते दूडभ इत्यन्तं वात्सप्रोपस्थानं समाम्नायक्रमेणैव कर्त्तव्यम् । तत्र विशेषमाह—

अग्नी उपतिष्ठत इति द्विवचनोपदेशात् अधस्तनमाहवनीयस्य ॥ २८० ॥

गां गच्छतीड एहीति ॥ २८१ ॥

तामेव ॥ २८१ ॥

काम्या एतेत्यालभते ॥ २८२ ॥

सोमानमित्यनुदकं व्रतोपायनवत् ॥ २८३ ॥

अथान्तरेणाहवनीयं च गार्हपत्यं च प्राङ्तिष्ठन्नग्निमीक्षमाणो जपति सोमानमिति वचनात् । उदकसंस्पर्शनाविधानाच्चानुदकमिति ॥ २८३ ॥

पौर्णमासवत्पुत्रनाम ग्रहणम् ॥ २८४ ॥

वत्युपदेशाच्च तन्तवे त्वेत्यादिसर्वं प्रवर्त्तते । नाम ग्रहणान्तं वात्सप्रमिति ॥ २८४ ॥

भूर्भुवः स्वरिति वोभौः ॥ २८५ ॥

भूर्भुवः स्वरित्यनेन वा मन्त्रेणोभावप्यग्नी उपतिष्ठते । क्रमस्तु स एव । क्रमान्तराविधानात् । अस्य च वात्सप्रेण सह विकल्पः । यद्वा वा अदो दीर्घमग्न्युपस्थानमिति प्रकृत्य यत आह तस्मादेतेनैवोपतिष्ठेतेति । एतच्चागोपक्षेपि भवति । न ह्यत्र गां प्रति गमनं स्पर्शनं वास्तीति ॥ २८५ ॥

प्रवत्स्यन्सर्वान्नर्येति प्रति मन्त्रम् ॥ २८६ ॥

अधस्तनोपस्थानसमनन्तरमस्य पाठ इति प्रवसतो यजमानस्याग्न्युपस्थानमभिधीयते । प्रवसन्यजमानः सर्वानग्नीनुपतिष्ठते । नर्येति प्रति मन्त्रम् । नर्य प्रजां मे पाहीति च । गार्हपत्यं प्रथममुत्पत्तिक्रमात्तत आहवनीयं पुनर्दक्षिणाग्निम् । मन्त्राणां तु लैङ्गिको विनियोगः । नृभ्यो हितो नर्यो गार्हपत्यः ॥ २८६ ॥

गच्छति मत्या वाग्विसर्जनम् ॥ २८७ ॥

गमनं सामर्थ्यपरिप्राप्तमेव वाग्विसर्गावसरविधित्सयोच्यते । वाग्यमस्तूपस्थानसमनन्तरमेव भवत्यवसरान्तराविधानात् ॥ २८७ ॥

प्रवसन्याजमानं कुर्याद्यथाकालमात्मसंस्काराद्धर्ममात्रत्वाच्छ्रुतेश्च ॥ २८८ ॥

प्रोषितोपि याजमानं करोति यथा कालमिति । अग्निहोत्रकाले अग्निहोत्रं याजमानं पौर्णमासकाले पौर्णमास्यं एवं सर्वत्र । कुत एतत् । आत्मसंस्काराद्धेतुश्चायमुपदेशश्च । यदात्मसंस्कारकं तत्कर्त्तव्यम् । यथा व्रतग्रहणपावनमुण्डनादि । यजमानस्य ह्यसौ संस्कारः । प्रोषितोपि च यजमानो यजमान एव । यच्च धर्ममात्रं तत्कर्त्तव्यम् । यथा विष्णुक्रमादि । कुत एतत् । धर्ममात्रत्वादेव । न ह्येतत्कर्मणि सन्निपतितम् । श्रुतेश्च । श्रुतिरप्यमुमर्थं ज्ञापयति । यथा प्रोषितेनापि याजमानं कर्त्तव्यम् । यत्सदूरं परेत्याथ तत्र प्रमाद्यति कस्मिन्नस्य हुताहुतिगृहे यामस्य जुह्वतीति प्रकृत्याह यो जविष्ठो भुवनेष्वित्येवमाद्यभिधाय मन एवैतदाह मनसैवास्यानपप्रोषितं भवतीति मनसैवानुचिन्तनेन प्रत्यक्ष इव भवतीत्यमुमर्थं ज्ञापयति ॥ २८८ ॥

एत्य च मत्या वाग्यमनम् ॥ २८९ ॥

पुनरेत्य मत्या वाग्यमनं करोति ॥ २८९ ॥

समित्पाणिरनुपेत्य कश्चिदुपतिष्ठतं आहवनीयगार्हपत्यदक्षिणाग्नीनागन्मेति प्रति मन्त्रम् ॥२९०॥

समिद्भिर्गृहीताभिरागच्छति। गुर्वादिकमप्यनुपेत्य कं चिदाहवनीयादीनुपतिष्ठते अगन्मेति प्रति मन्त्रम् । समासे च सत्ययमेव क्रमः । स आहवनीयमेवाग्र उपतिष्ठतेति श्रुतत्वात् ॥ २९० ॥

समित्परिसमूहनानि चोपविश्य ॥ २९१ ॥

च शब्दादनन्तरमेव । तिष्ठत्समिधः सर्वत्रेत्युक्ते समिद्युपवेशनं वाचनिकम् । परिसमूहनानामपलुंपनमपनयः । अग्नेस्तृणान्यपचिनोतीति शाखान्तरात् । तृणप्रक्षेप इत्यपरे ॥ २९१ ॥

तूष्णीं वोपस्थानं पूर्ववत् ॥ २९२ ॥

येन क्रमेण गच्छता कृतं तेनैव क्रमेण । स वै खलु तूष्णीमेवोपतिष्ठेतेति प्रकृत्य यत आह स वेद गार्हपत्यः परिदम्मेदमुपागादिति स वेदाहवनीय इति च ॥ २९२ ॥

गृहा माविभीतेति एत्य च ॥ २९३ ॥

गृहानुपैति ॥ २९४ ॥

क्षेमाय व इति प्रविशति ॥ २९५॥

पूर्ववदेव । येन क्रमेणागच्छता कृतम् ॥ २९५ ॥

नहिं॒स्याद् गृह्यान्काम॒ श्वः ॥ २९६ ॥

गृहानेव । अत ऊर्ध्वं स्मार्त्तं पुत्रदर्शनजपादि प्रवर्त्तते ॥२९६॥
शाखान्तरपाठक्रमात् वात्सप्रोपस्थानमुक्तमिदानीमवसरप्राप्तमग्निहोत्रमनुविधीयते—

उद्धरेति यजमानो ब्रूयात्सायं प्रातरग्निहोत्रे ॥२९७॥

एतच्चाध्वर्युहोमपक्षे । स्वयं होमपक्षे तु स्वयमेवोद्धरणमिति प्रैषाभावः । अग्निहोत्रग्रहणाच्च सत्यप्युद्धरणे पौर्णमासादिषु न भवति । सायारम्भं प्रातरपवर्गमग्निहोत्रमिति सायमभिहितत्वान्मा भूत्प्रातः प्रैषाभाव इति प्रातर्ग्रहणम् । तत्कुतः । आचार्याभिप्रायादावृत्तिर्वा प्रधानकालादिति ॥ २९७ ॥

प्रत्यङ्मुखो वा सायं निदध्यात्

तस्मिंशायं प्रातर्होममेके ॥ २९८ ॥

गार्हपत्यं वाव स गच्छति गार्हपत्याद्धि स आहृतो भवतीति

श्रुतत्वात् । अनस्तमितानुदितयोरिति शाखात् । उदितहोमिनामपि अनुदित एवोद्धरणम् तस्मिन्प्रत्यङ्मुखविहिते एके सायं प्रातर्होमं कुर्वन्ति । एके विकल्पेन श्रुत्वात् ॥ २९८ ॥

नित्यो दक्षिणाग्निः ॥ २९९ ॥

स च दक्षिणा वा सꣳहरेदित्यस्मिन्पक्षे ॥ २९९ ॥
नित्याधिकारोपजिजीविषयेदमाह—

सर्वे गतश्रियः ॥ ३०० ॥

नित्याभवन्ति । धार्यो गतश्रिय इति वचनात् । गतश्रीश्च प्राप्तश्रीः । यं प्रति गता श्रीःएवं हि श्रूयते त्रयोह वै गतश्रियः ब्राह्मणः शुश्रुवान् क्षत्रियो विजयी राजा वैश्यो ग्रामणीरिति ॥३००॥

सदा वा हरणम् ॥ ३०१ ॥

दक्षिणाग्नेरधिकारात् । दक्षिणाग्निं कृत्याह अहरहरेवैनमाहरेयुरिति ॥ ३०१ ॥

एकेषामुपवसथे ॥ ३०२ ॥

उपवसथ एवैनमाहरेयुरिति वचनात् ॥ ३०२ ॥

१नवावसिते वा ॥ ३०३ ॥

नवावसिते वैनमाहरेयुरिति वचनान्न वावसिते वेत्युक्तम् ॥ ३०३ ॥

तस्मिन्पचेयुरमाꣳसम् ॥ ३०४ ॥

तस्मिन्नवावसिताहृते पचेयुरमाꣳसम् । तस्मिन्पचेयुस्तद्ब्राह्मणा अश्नीयुरिति वचनात् ॥ ३०४ ॥

---

१ नवासिते नवगृहे इत्यर्थः ।

१पाक्याभावे गोः पयोधिश्रयितवै ब्रूयात् ॥३०५॥

तच्च यजमानः। अध्वर्योरधिश्रयणे कर्तृत्वात् ॥ ३०५ ॥

तद्ब्राह्मणं पाययितवै ब्रूयात् ॥ ३०६ ॥

तच्चाध्वर्युः प्रत्याह। पयः पायने यजमानस्याधिकारात् ॥ ३०६ ॥

अन्तरेणापराग्नी गत्वा दक्षिणेन वा प्रदक्षिणमावहवनीयं परीत्योपविशति यजमानः ॥ ३०७ ॥

दक्षिणेन प्रवेशनमग्निहोत्र इति अन्तरेणापराग्निगत्वा दक्षिणेन वेति। अप्रदक्षिणमाहवनीयं परीत्योपविशति यजमानः। वचनादप्रक्षिणं परिगमनम् ॥ ३०७ ॥

पत्नी च पूर्ववत् ॥ ३०८ ॥

प्रत्यग्दक्षिणतोगार्हपत्यस्य। च शब्दाद्यजमानश्च पूर्ववत्। दक्षिणतो ब्रह्मयजमानयोरासने इति पौर्णमासे परिभाषितम्। वतिना तदतिदिश्यते ॥ ३०८ ॥

अपरेणाहवनीयं कूर्चं निदधाति कुशान्वा ॥३०९॥

कूर्चशब्द आसने निर्दिष्टः। कूर्चादुपावसर्पन्नुवाचेति। तथा हिरण्मये वा कूर्चे हिरण्मये वा फलक इति। स्रुचश्चैतदासनं कूर्चे निधायेति वचनात्। कुशानामपि वैकल्पिकत्वात्तदेवकार्यम् ॥३०९॥

परिस्तरणं वा सर्वेषां प्रागुदग्भिरुदगग्रान् दक्षिणाग्रान्करोतीति श्रुतेः ॥ ३१० ॥

---

१ पचनार्हतण्डुलाभावे 'गोः पयोऽधिश्रयितवै' इति यजमानोऽध्वर्युं ब्रूयात्।

परिस्तरणमाहवनीयस्य प्रागुदग्भिर्दर्भैःप्रागग्रैरुदग्रैश्च दर्भैः । एवं हि मृतकाग्निहोत्रे आहवनीयं प्रकृत्य श्रूयते । अथ यान्यमून्युदीचीनाग्राणि तृणानि भवन्ति दक्षिणाग्राणि तानि करोतीति वचनात् । अमूनीति चाग्निहोत्रतृणान्युच्यन्ते । तद्यदि तत्र प्रागुदग्भिस्तदेतदुपपद्यत इति । मृतकाग्निहोत्रे आहवनीयस्यैतद्दृष्टमिहापि तस्यैव परिस्तरणमित्याशङ्क्य वा सर्वेषामित्युच्यते । सर्वेषामेवैतत्परिस्तरणं कार्याविशेषात् ॥ ३१० ॥

आहवनीयं पर्युक्ष्योदधारां निनयत्यागार्हपत्यात् ॥ ३११ ॥

तं च ॥ ३१२ ॥

ततो दक्षिणाग्निम् ॥ ३१३ ॥

तं च पर्युक्ष्यततो दक्षिणाग्निं पर्युक्षतीति प्राक्संस्थेपि पर्युक्षणे गार्हपत्यसमनन्तरमेव दक्षिणाग्नेः पर्युक्षणम् । अतस्ततो दक्षिणाग्निमित्युक्तम् ॥ ३१३ ॥

हुते च धारावर्जम् ॥ ३१४ ॥

पर्युक्षतीति वाक्यशेषः । तच्च प्राग्व्रतविसर्गात् व्रतस्य हि पदार्थधर्मत्वात् । पर्युक्षणमपि हि पदार्थ इति ॥ ३१४ ॥

अग्निहोत्रीं दोहयति पुंवत्सामशूद्रेणस्थाल्यामार्यकृत्यामूर्द्धकपालायां दक्षिणतः प्राचीमुदीचीं वा ॥ ३१५ ॥

अग्निहोत्रशब्दः कर्मवाची सन्निहिततत्साधनभूते द्रव्ये द्रष्टव्यः । तदग्निहोत्राख्यं द्रव्यं यस्यां विद्यते सेयमग्निहोत्रिणी । अत्रापि मतुप्लोपे कृते अग्निहोत्रीमिति भवति । तथा च दृश्यते यथाग्निहोत्री दोह्यमाना वा श्येतेति । पयस्यपि चाग्निहोत्रशब्दो दृश्यते । यस्याग्निहोत्रं दोह्यमानममेध्यमापद्येतेति । पुंवत्सामिति वच-

नात् । तस्मादस्य पुंवत्साग्निहोत्री स्यादिति । अशूद्रेणेति वचनात् । दोहयतीति कारितः । तेन गां धुक्ष्वेति प्रैषदानम् । स्थाल्यामार्यकृत्याम् । आर्यशब्देन त्रैवर्णिक उच्यते । स्थाल्यामिति लिङ्गात् । यद्युनीची स्थाली स्याद्यदि वा भिद्येतेति । ऊर्ध्वकपालायाम् । न तिर्यक्कपालयां दक्षिणतो व्यवस्थितां प्राचीं दोहयति उदीचीं वेति तुल्यशास्त्रत्वात् । ननु परिभाषितत्वादवाच्यमेतत्प्राचीमुदीचीं वेति । कर्तृधर्मः स इत्यदोषः । एवं च सान्नाय्ये गवां न दिङ्नियमः ॥ ३१५ ॥

पूर्वेणाहवनीयमाहृत्य गार्हपत्येऽधिश्रयत्युत्तरतो निरुह्याङ्गारान् ॥ ३१६ ॥

पूर्वेणाहवनीयमिति वचनात् । गार्हपत्यग्रहणं च नियमार्थम् । उत्तरतो निरुह्याङ्गारानित्यङ्गारनिरूहणमत्रैवावसरे स्यात् । वत्युपदेशात् । आहृत्यानिरुह्याद्यधिश्रयतीति । न वा श्रुतिविरोधात् । य एवैतेङ्गारानिरूढा येष्वधिश्रयिष्यन् भवतीति । अतः पूर्वतरं निरूहणं तत आहरणमिति । अधिश्रयणं च श्रपणार्थम् । सुश्रृतेन जुहोतीति वचनात् । लिङ्गाच्च उदन्तपोष्णं निष्यन्दमानं मारुतमित्येवमादि । एतच्चाचार्येण प्रायश्चित्तेषूपनिबद्धं इह पुनरधिश्रित्यैव जुहुयादिति । अतश्च विकल्पः ॥ ३१६ ॥

एवमन्यत्रापि होमार्थस्याहरणम् ॥ ३१७ ॥

एवमेव पूर्वेणाहवनीयं पश्वातीयादौ होमार्थस्याहरणं कर्त्तव्यम् ॥ ३१७ ॥

दक्षिणेन वौषधम् ॥ ३१८ ॥

औषधं व्रीहियवादि । तदाहवनीयं दक्षिणेन वा नीयते । तत्प्रतियोगादुत्तरेण वा । अतश्च प्रागुद्धारनियमो गम्यते । तस्मिन्हि सति दक्षिणेनाहवनीयमुत्तरेण वा नयनं सम्भवति । तत्र दक्षिणेनानयने प्रदक्षिणोपचारात् स्मृत्यनुग्रहः । उत्तरत उपचारो वै यज्ञ इत्युत्तरेणाहरणे श्रुत्यनुग्रहः । बलीयस्त्वाच्चोत्तरेणैवेत्यवधार्यते ॥ ३१८ ॥

तृणेनावज्योत्यासिच्याप: पुनरवज्योत्य नि-
धाय त्रिरुद्वासयन्त्युदक् ॥ ३१९ ॥

तदधिश्रितं द्रव्यं तृणेनावज्योतयेत्।[1]अवज्योतनं च दृष्टार्थम्। तदवज्योतयति श्रुतं वेदानीति श्रुतिः । अतश्चाधिश्रयणाभावे तण्डुलादावनवज्योतनम्। अबासेकोपि च दृष्टार्थः। उदकस्य हि क्षयो यथा स्यान्न पयस इति । पुनरवज्योतनं च उदकक्षयसंवित्यर्थम् । न च यवाग्वामुदकासेको विरोधात् । अवज्योतनं तु तन्त्रेण भवति । घृते पुनरुदकासेको न भवत्येव विरोधात् । निधाय त्रिरुद्वासयत्युदगिति। णमुलयम् ततश्च मुक्त्वा मुक्त्वा त्रिरुद्वासयेत् । तथा च मृताग्निहोत्रे श्रूयते न त्रिःप्रतिष्ठाप्य हरति यत्त्रिः प्रतिष्ठापयन् हरेद्देवत्रा कुर्यात् ॥ ३१९ ॥

अस्तमिते जुहोति ॥ ३२० ॥

प्रधानसन्निधेश्चोद्धरणादूर्ध्वमस्तमित एव कर्त्तव्यम् । उद्धरणमात्र एव हि वचनमनस्तमित उद्धरतीति ॥ ३२० ॥

वैकङ्कतीं स्रुक्स्रुवं प्रतप्य पाणिना
सम्मार्ष्टि ॥ ३२१ ॥

होमार्थत्वाद्वैकङ्कती स्रुक् प्राप्नोत्येव स्रुवार्थोयमारम्भः ॥३२१॥

पुनः प्रत्यतप्योन्नेष्यामीत्याह ॥ ३२२ ॥

ओ३मुन्नयेति यजमानस्तिष्ठन् ॥ ३२३ ॥

प्रत्याह ॥ ३२३ ॥

चतुरः स्रुवानुन्नयति ॥ ३२४ ॥

चतुर्गृहीतं च होमद्वयार्थमुभयत्रोपयोगात्। अतश्च नाशे चा-

---

१ अवज्योतनं प्रकाशनम् ।

न्यतरस्यापि प्रयोक्तृत्वम् । प्राशनं तु शेषसाध्यत्वादप्रयोजकम् । तथा लिङ्गं स यत्स्रुचि परिशिनष्टि तदग्निहोत्रोच्छिष्टमिति ॥३२४॥

स्थाल्यां परिशिनष्टि तद्ब्राह्मणः पिबेत् ॥३२५॥

अब्राह्मणप्रतिषेधार्थोयमारम्भः । तद्वै नाब्राह्मणः पिबेदिति वचनात् ॥ ३२५ ॥

उपरि समिधं धारयन्वार्क्षीमध्यधि गार्हपत्या-
दाहवनीयꣳ हरति मुखमात्रे धारयन् ॥३२६॥

स्रुच उपरि समिधं धारयन्वार्क्षीम् । न गुच्छगुल्मलता सम्बन्धिनीम् । अध्यधिशब्दः सामीप्य उपरिभावे च गार्हपत्यादाहवनीयꣳ हरति मुखमात्रे स्रुचं धारयन् ॥ ३२६ ॥

मध्ये निगृह्योपविश्य समिधमादधात्यग्निज्यो-
तिषं त्वा वायुमतीं प्राणवतीꣳ स्वर्ग्याꣳ स्व-
र्ग्यायोपदधामि भास्वतीमिति ॥ ३२७ ॥

गार्हपत्याहवनीययोर्मध्ये निगृह्य नीचैर्गृहीत्वा पुनरुद्धृत्य मुखमात्र एव उपविश्य समिधमादधात्यग्निज्योतिषमित्यनेन मन्त्रेण । समिदाधानं दृष्टार्थम् । अतश्च नैमित्तिकेषु कुशस्तम्बादिषु न भवति ॥ ३२७ ॥

प्रदीप्तामभिजुहोत्यग्निर्ज्योतिरिति सजू-
रिति वा ॥ ३२८ ॥

विकल्प श्रुतेः ॥ ३२८ ॥

अग्निर्वर्च इति ब्रह्मवर्चसकामस्य ॥ ३२९ ॥

जुहुयादिति वाक्यशेषः ॥ ३२९ ॥

कूर्चे निधाय गार्हपत्यमवेक्षते होष्यन्न-

स्मिन् ॥ ३३० ॥

कालद्वयोपादानसामर्थ्याद्विकल्पः । होष्यन्वा अस्मिन्वा काल इति । होष्यत अवेक्षणमनुपसाद्यैव स्रुचम् । सोनुपसाद्य पूर्वामाहुतिमिति वचनात् ॥ ३३० ॥

तूष्णीमुत्तरां भूयसीम् ॥ ३३१ ॥

स वै कनीय इव पूर्वामाहुतिं जुहोति भूय इवोत्तराम् । उत्तराशब्दश्च देशपरोपि द्रष्टव्यः । अथ योत्तरास्विष्टकृद्भाजनमेव सा तस्मात्तामुत्तरार्द्धे जुहोतीति ॥ ३३१ ॥

भूयिष्ठं स्रुचि ॥ ३३२ ॥

परिशेषयतीति वाक्यशेषः ॥ ३३२ ॥

द्विः प्रकंप्य निदधाति ॥ ३३३ ॥

स्रुचं कुर्चे ॥ ३३३ ॥

उपमृज्य स्रुचं कूर्चे निमार्ष्टि नमो देवेभ्यः स्वधा पितृभ्य इति दक्षिणत उत्तानम् ॥ ३३४ ॥

अप उपस्पृश्य ॥ ३३५ ॥

उपमार्जनं च स्रुगग्रस्य । मध्ये द्रव्यस्य विद्यमानत्वात् । स्रुगग्रमुपमृज्य कूर्चस्योत्तरे प्रदेशे निमार्ष्टि नमो देवेभ्य इत्यनेन मन्त्रेण । स्वधा पितृभ्य इति दक्षिणत उत्तानं निमार्ष्टि । अतश्चोत्तानेनैव पाणिनोपमार्जनम् । अपामुपस्पर्शनं पित्र्यत्वे सत्यपि प्राचीनावीत्यादि व्युदासार्थम् ॥ ३३४ ॥ ३३५ ॥

इतरयोश्च पुष्टिकामः स्थाल्याः स्रुवेणेह पुष्टिं पुष्टिपतिर्दधात्विह प्रजां रमयतु प्रजा-

पतिः अग्नये गृहपतये रयिमते पुष्टिपतये स्वाहेति गार्हपत्ये ॥ ३३६ ॥

इतरयोरग्न्योः पुष्टिकामो जुहोति । च शब्दादपुष्टिकामश्च । स्थाल्याः स्रुवेणाहपुष्टिमित्यनेन मन्त्रेण गार्हपत्ये ॥ ३३६ ॥

तूष्णीं द्वितीयाम् ॥ ३३७ ॥

अग्नयेन्नादायान्नपतये स्वाहेति दक्षिणाग्नौ ॥३३८॥

जुहोति ॥ ३३८ ॥

तूष्णीं द्वितीयाम् ॥ ३३९ ॥

अनामिकया द्विः प्राश्नाति ॥ ३४० ॥

स्रौचं द्रव्यम् ॥ ३४० ॥

उत्सृप्य निर्लेढ्याचम्योत्सिञ्चति देवान् जिन्व पितॄन् जिन्व तृतीयामुदुक्षति सप्तऋषीन् जिन्वेति ॥ ३४१ ॥

उत्सृप्येति पात्रान्तरे नीत्वा । सृपिर्हि गत्यर्थः । चमुभक्षणे भक्षयित्वा द्रव्यपात्रं निर्लेढि लिह आस्वादने जिह्वया आस्वादयति तत उत्सिञ्चति । देवाञ्जिन्व पितॄञ्जिन्वेति । तृतीयां सप्तऋषीञ्जिन्वेति तृतीयामिति स्रुग्विषयम् । ततश्च भेदेन द्विः कृत्वः पूर्वं तृतीयं पुनः तदुत्पोत्सिञ्चति ॥ ३४१ ॥

चतुर्थीं कूर्चस्थाने त्रिर्निषिञ्चत्यग्नये पृथिवीक्षिते स्वाहा पृथिव्या अमृतं जुहोमिस्वाहाऽमृते अमृतं जुहोमि स्वाहेति ॥ ३४२ ॥

चतुर्थींस्रुचं पूरयित्वा कूर्चस्थाने त्रिःकृत्वो निषिञ्चति । अ-

ग्नये पृथिवीक्षित एवमादिभिर्मन्त्रैः प्रति मन्त्रं वाक्यभेदात् ॥३४२॥

स्रुक्स्रुवमाहवनीये प्रतप्य निदधाति ॥३४३॥

गार्हपत्ये संस्कारप्राप्ते आहवनीय उच्यते ॥ ३४३ ॥

समिध आदधाति सर्वेषु यथा पर्युक्षितं;
समिदसि समिद्धो मेऽग्ने दीदिहि समेद्धा ते
अग्ने दीद्यासमिति ३४४ ॥

सर्वेष्वग्निषु । यथा पर्युक्षितमिति क्रमार्थम् । स चायं मन्त्रो ब्राह्मणहस्तादिषु समवेतवचनत्वाद्विपरिणम्यते । ननु च प्रकृतौ विपरिणामो न युज्यते । यागसाधनभूताग्निविकारत्वाददोषः ॥३४४॥

वाग्यतो दोहप्रभृत्याहोमात् क्षीरहोता चेत् ॥३४५॥

क्षीरहोता प्रत्यस्तमितावयवार्थवृत्तितयाऽध्वर्युरुच्यते। चेच्छब्दो यद्यर्थः । यदि वाग्यतो यद्यवाग्यत इति । अतश्चाध्वर्योर्दोहप्रभृति वाग्यमविकल्पः ॥ ३४५ ॥

प्रातर्जुहोत्यनुदिते ॥ ३४६ ॥

सायं होमोऽनुविहित इदानीं प्रातर्होमस्य विशेषानुकथनं क्रियते प्रातर्जुहोत्यनुदित इति। अत्र च यत्र यत्र प्रातर्ग्रहणं तदेव प्रातरितरत्सामान्यम् । किञ्चिदधस्तादभिहितं किञ्चिदत्र तच्चोभयोरपि होमयोर्द्रष्टव्यम् । तच्चैवमभिधीयते कर्मैकत्वज्ञापनार्थम् । सायारम्भं प्रातरपवर्गमिदमेकं कर्मेति । तत्कुतः । अग्निहोत्रं जुहोतीत्यभिधाय सायं जुहोति प्रातर्जुहोतीति कालविधानम् । तथा दध्ना जुहोति पयसा जुहोतीति होमानुवादेन दध्यादि विधानम् । तथा अग्निर्ज्योतिरिति सायम् । सूर्यो ज्योतिरिति प्रातः । एवं सति सायं प्रातः सम्बद्धहोमविषयोऽग्निहोत्रशब्दस्तेन विशिष्टद्रव्यदेवताकालीनमिदमेकं कर्म । तदेतद्विनियुज्यते अग्निहोत्रं जुहुयात्स्वर्गकाम इति । आग्नेयी सायमाहुतिः । सौरी प्रातराहुतिः । सायं जुहोत्यग्निर्ज्योतिरिति वचनात् । अथ प्रातः सूर्योज्योतिरिति । अत्र च कालभेदा-

दङ्गानां भेदेनानुष्ठानम् । तदेतत्सूत्रकारेणापि प्रदर्शितम् आवृत्ति-र्वा प्रधानकालत्वादिति। एवं च सति कुण्डपायिनामयनादिषु प्रधा-नाहुतीभेदेन । अङ्गानि तु तन्त्रेण कालैकत्वात् । तथा च सूत्रकारेण केचिद्धर्माः सायं होमसन्निधौ विहिताः केचित्प्रातर्होमसन्निधावि-ति कर्मैकत्वज्ञापनायैव ॥ ३४६ ॥

अन्तरेणापराग्नी गत्वा दक्षिणेन वा प्रदक्षिणं गार्हपत्यं परीत्योपविशति यजमानः ॥३४७॥

स चायं प्रवेशः साधारणः। प्रातरित्यविशेषितत्वात् ॥३४७॥

पत्नी च यथा देशम् ॥ ३४८ ॥

योस्या देशः प्रदेशान्तरे विहितः प्रत्यग्दक्षिणत उपविष्टां गार्हपत्यस्येति । पत्न्युपवेशनं च विधीयते। अवाचमनावसरवि-धित्सया अवाचनश्चोभयत्र ॥ ३४८ ॥

अप आचामति वृष्टिरसि वृश्च मे पाप्मा-न॒ꣳ सत्येन व्रतमुपैम्यापः सत्यं मयि व्रतमिति ॥ ३४९ ॥

अप आचामति यजमानो वृष्टिरसीत्यनेन मन्त्रेण ॥ ३४९ ॥

वाचं विसृज्य पुनराचामति विद्युदसि वृश्च मे पाप्मानं जह्यपो ऽवभृथमभ्युपैमि मयि सत्यं गोषु मे व्रतमिति ॥ ३५० ॥

वाग्यमस्य च पदार्थधर्मत्वात् सर्वान्ते विसर्गः । अतश्च पू-र्वेणाचमनेन वाग्यमनमुत्तरेण विसर्गः । विसर्गस्य ग्रहणपूर्वकत्वात् मन्त्रलिङ्गाच्च । सत्येन व्रतमुपैमीति व्रतशब्देन च वाङ्नियमोभिधी-यते । तस्य च विसर्गः प्रागतीत्य निष्क्रमणात् ॥ ३५० ॥

उन्नयामीत्याह प्रातः ॥ ३५१ ॥

उन्नेष्यामीत्यस्य स्थाने उन्नयामीति ॥ ३५१ ॥

प्राक्सं॒स्थं॒ समित्पर्युक्षणं धाराचोभ-
यत्र वा ॥ ३५२ ॥

वेत्युक्तत्वात् उभयत्र वा प्राक्संस्थं समित्पर्युक्षणं भवति ॥ ३५२ ॥

अग्निशब्दे सूर्यः ॥ ३५३ ॥

सायं होममन्त्रेषु यत्राग्निशब्दस्तत्र सूर्यशब्दः प्रयोक्तव्यः। समाम्नायप्रदर्शनार्थं चैतत् । समाम्नाये यत्राग्निशब्दस्तत्र सूर्यशब्दः प्रयुज्यते । नाग्निपराग्निकयोरपि होममन्त्रयोः ॥ ३५३ ॥

रात्र्युषसान्हेति वा ॥ ३५४ ॥

रात्रिशब्द उषसेति वा प्रयोगः अन्हेति वा ॥ ३५४ ॥

ज्योतिः सूर्य इति वा प्रातः ॥ ३५५ ॥

अनेन मन्त्रेण प्रातर्होमस्तत्र च यदि रात्रौ हुतमग्निज्योतिरिति प्रातः तदा प्रातः सूर्योज्योतिर्ज्योतिः सूर्यः इति वा जुहोति । एवं हि श्रूयते अथ प्रातः सूर्योज्योतिर्ज्योतिः सूर्यः स्वाहेति । पुनश्चाहाथ प्रातर्ज्योतिः सूर्यः सूर्योज्योतिः स्वाहेत्यतश्च मन्त्रौ विकल्पितौ ॥ ३५५ ॥

प्रथमास्तमिते पर्युदयं च स्वर्गकामस्य ॥३५६॥

अस्तमितमात्रे उदयसन्निकृष्टे च स्वर्गकामस्य जुहुयात् । स चायं गुणफलसम्बन्धो न कर्मफलसम्बन्धः ॥ ३५६ ॥

तमोऽभ्यये सायं जुहुयाद्वियति प्रातरायु-

ष्कामस्य ॥ ३५७ ॥

तमोऽभ्यागमे सायमायुः कामस्य जुहुयात् । विगच्छति च तमसि प्रातः ॥ ३५७ ॥

अन्तः पशौ पशुकमास्य सायं प्रातः ॥ ३५८ ॥

सायं प्रविष्टेषु पशुषु पशुकामो जुहोति । प्रातश्चानिःक्रान्तेषु ॥ ३५८ ॥

शयाने श्रीकामस्य प्रातः ॥ ३५९ ॥

शयाने जनपदे श्रीकामस्य जुहुयात् ॥ ३५९ ॥

प्रथमसमिद्धे धूप्यमाने प्रजासु निहत्येव सहसान्नमत्स्यतः ॥ ३६० ॥

समिद्धमात्रे धूप्यमाने चाग्नौ यो नाम प्रजासु निहत्येवान्नमत्तुमिच्छति स एवं स्वरूपेऽग्नौ जुहोति । तच्चैतत् क्षत्रियविषयं न ब्राह्मणवैश्ययोर्जनपदस्य सम्भवः ॥ ३६० ॥

भूयिष्ठार्चिषि गृहीत्वेव सहसा ॥ ३६१ ॥

यो नाम गृहीत्वेव अधिष्ठायेवान्नमत्तुमिच्छति स एवं स्वरूपेऽग्नौ जुहुयात् । तदपि क्षत्रियविषयमेवोक्तहेतुत्वात् ॥ ३६१ ॥

प्रदीप्ततमे श्रीयशस्कामस्य ॥ ३६२ ॥

अथ यत्रैतत्प्रदीप्तो भवति तत्र श्रीयशस्कामो जुहुयात् । तच्चैतद्वर्णत्रयविषयमपि भवति ॥ ३६२ ॥

अर्चिः प्रत्यवाये मैत्रेणान्नमत्स्यतः ॥ ३६३ ॥

अथ यत्रार्चींषि प्रत्यवयन्ति तत्र मैत्रेणान्नमिच्छन् जुहोति । एतदपि सर्ववर्णविषयमेव ॥ ३६३ ॥

अङ्गारेषु चाकश्यमानेषु ब्रह्मवर्चसकामस्य ॥३६४॥

जुहुयात् । तच्चैतद्ब्राह्मणविषयमेव न हीतरयोर्ब्रह्मवर्चससंबन्धोस्ति ॥ ३६४ ॥

पयसा स्वर्गकामः पशुकामो वा ॥ ३६५ ॥

जुहोति ॥ ३६५ ॥

यवाग्वा ग्रामकामः ॥ ३६६ ॥

तण्डुलैर्बलकामः ॥ ३६७ ॥

दध्नेन्द्रिय कामः ॥ ३६८ ॥

अनधिश्रयणे च श्रुतिसामर्थ्याभ्याम् ॥ ३६९ ॥

न दध्यधिश्रयेदिति श्रुतिः । सामर्थ्यं च दधित्वमेवापैति । श्रुत्युपादाने सति सामर्थ्यग्रहणं क्रियमाणं तण्डुलार्थं भवति । दध्यधिश्रयणप्रतिषेधश्च लिङ्गम् । अनुवादो ह्ययम् ॥ ३६९ ॥

घृतेन तेजस्कामः ॥ ३७० ॥

जुहुयात् ॥ ३७० ॥

संवत्सरं जुहुयादेतेषामेकैकेन कामसंयोगे ॥३७१॥

एतेषां द्रव्याणां कामसंयोगे सति संवत्सरं जुहुयात् । एवं किल कामः समृध्यते । संवत्सरसम्मिता वै व्रतचर्येति श्रुत्वात् ॥ ३७१ ॥

सायं प्रातर्वा ॥ ३७२ ॥

वा शब्दात्पक्षो विपरिवर्त्तते । सायं प्रातर्वा कामसंयोगेन जुहोति न संवत्सरम् । अग्निहोत्रं हि सायं प्रातः परिसमाप्यते । तत्र चायं गुणसम्बन्धः । तस्मात्सायं प्रातरेवेति । संवत्सरसंमिता वै व्रतचर्येत्ययमन्यविषयोर्थवादः । अग्निविकल्पेषु संवत्सर इ-

ष्यते । तत्र अग्निविकल्पान्प्रकृत्याह एतेषामेकꣳ संवत्सरमुपेत्सैदिति ॥ ३७२ ॥

दक्षिणेन प्रवेशनमग्निहोत्रेष्टिषु ॥ ३७३ ॥

अयं च द्वारनियमो अग्निहोत्रे इष्ट्यां च । तत्रैव हि श्रूयत इति ॥ ३७३ ॥

सायं प्रातराहवनीयस्यासनोपस्थाने ॥ ३७४ ॥

यदेवसायं प्रातराहवनीयमुपतिष्ठत उपचास्त इति वचनात् । पूर्वमुपस्थानं पश्चादासनम् । अल्पाच्तरमिति कृत्वा पूर्वमासनमुक्तमाचार्येण । तच्चैतदुपस्थानं प्राक्पर्युक्षणाद्भवति । हुते हि पर्युक्षणमुक्तम् । हुते च धारावर्जमिति । उपस्थाने च पूर्वमक्रियमाणे हुतशब्द औपचारिकः स्यात् । वात्सप्रोपस्थानं तस्मादपि पूर्वतरम् । काण्वानां हि समिदाधानमन्त्रसमनन्तरं वात्सप्रमन्त्राणां पाठः ॥ ३७४ ॥

शय्यासनं वा गार्हपत्ये ॥ ३७५ ॥

अथ यदेव प्रतिपरेत्य गार्हपत्यमास्ते वा शेते वेति वचनात् ॥ ३७५ ॥

संव्रजन्मनसोपस्मृत्य दक्षिणाग्निम् ॥ ३७६ ॥

अथ यत्रैव संव्रजन्नन्वाहार्यपचनमुपस्मरेदिति । तच्चैतत्परिसमाप्योत्तरकालमतीत्य निष्क्रमणम् ॥ ३७६ ॥

अनशित्वा प्रातर्मुहूर्त्तꣳ सभासनꣳ सभ्यस्य ॥ ३७७ ॥

अथ प्रातरनशित्वा मुहूर्त्तꣳसभायामसित्वापि कामं पल्ययेतेति वचनात् ॥ ३७७ ॥

भस्मोद्धूतमुपेयात् ॥ ३७८ ॥

अथ यत्रैव भस्मोद्धृतमुपनिगच्छेत् तदेव तस्योपस्थानमिति। एतच्च पाठानुपूर्व्यात्प्रातरेव ॥ ३७८ ॥

स्वयं वा जुहुयात् ॥ ३७९ ॥

अध्वर्युर्वेति विकल्पः ॥ ३७९ ॥

उपवसथे नियमः ॥ ३८० ॥

स्वयं होमित्वस्य । स यो हैवं विद्वान् स्वयमुपवसथे जुहोतीति वचनात् । स चायमुपवसथसंयोगेनैव नियम इति ॥ ३८० ॥

इत्युपाध्यायकर्ककृतौ कात्यायनभाष्ये
चतुर्थोऽध्यायः समाप्तः ।

# पञ्चमोऽध्यायः ।

## चातुर्मास्यनिरूपणम् ।

अग्निहोत्रान्तानि कर्माण्यनु विहितानि इदानीं श्रुतिमन्त्रपाठक्रमेण चातुर्मास्यानामनु विधानं क्रियते । श्रुतिक्रमः प्रजापतिर्ह वा इदमग्र एक एवासेति । मन्त्रक्रमः प्रघासिनो हवामह प्रभृति । तत्रैतदादिसूत्रम् ।

### चातुर्मास्यप्रयोगः फाल्गुन्याम् ॥ १ ॥

[१]चातुर्मास्यशब्दः कर्मणो नामधेयम् । स च चातुर्मास्यैर्यजतेति यजति शब्दसामानाधिकरण्यात् यजति नामधेयम् । अतश्च दर्विहोमास्तदङ्गम् । तत्र चाग्नेयादीनि सौर्यान्तानि प्रधानानि तेषामन्तराये प्रयोक्तृत्वं, न दर्विहोमानाम् । यद्यपि चानेककर्मसन्निधौ चातुर्मास्यशब्दः श्रूयते तथापि यजति शब्दसामानाधिकरण्यादाग्नेयादिष्वेव वर्त्तते । तेषां प्रयोगः प्रारम्भः फाल्गुन्यां भवति । फाल्गुनी शब्देन च पौर्णमास्यभिधीयते । फाल्गुनी चैत्री वैशाख्याषाढीति च पौर्णमासीषु रूढाः शब्दाः । अतश्चातुर्मास्यानां प्रयोगः फाल्गुन्यां कर्त्तव्य इति सूत्रार्थः[२] ॥ १ ॥

---

१ चातुर्मास्यशब्देन वक्ष्यमाणानि वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयसंज्ञानि चत्वारि पर्वाण्यभिधीयन्ते, चतुर्षु मासेषु भवनीति व्युत्पत्त्या तत्र भावाधिकारे 'चतुर्मासाद्यञ्ञे ड्यो वक्तव्य इति वार्तिकाद्यञि निष्पन्नस्य तस्य यागधेयत्वमेवोचितमिति भावः ।

२ तथा च शाङ्खायनः 'फाल्गुन्यां पौर्णमास्यां प्रयोगश्चातुर्मास्यानां चैत्र्यां वा, वैश्वानरपर्जन्येष्टिः पूर्वस्याम् पौर्णमास्यामुत्तरस्यां वैश्वदेवम्' इति । आपस्तम्बः ' फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा वैश्वदेवेन ' इति ।

वैश्वानरपार्जन्यौ निरुप्येच्छन् ॥ २ ॥

वैश्वानर इति च गुणात्तद्धितः सौविष्टकृत इति वत् । अत्र हि गुणिनी देवता अग्निः । सा हि याज्यानुवाक्यासु दृश्यते । वैश्वानरोऽजीजनदग्निर्नो न व्यसीमिति । तथा पृष्टो दिवि पृष्टो अग्निः पृथिव्यामिति । तथा च वैश्वानरः पशुपुरोडाश इति प्रकृत्याह यदग्नय इति स्यादतितद्धचयोरिति । तथा चाभ्युदयेष्टयां पठ्यते अग्नये पथिकृते ऽष्टाकपालं पुरोडाशं इन्द्राय वृत्रघ्न एकादशकपालमग्नये वैश्वानराय द्वादशकपालमिति पठिते सूत्रकारेण गुणादेव तद्धितः प्रदर्शितः इन्द्राय वृत्रघ्न एकादशकपालो वैश्वानरश्चेति । एवं च सति यत्र यत्र वैश्वानरश्रवणं तत्र तत्राग्निर्गुणिनी देवता द्रष्टव्या । यथा यस्याग्निभिरन्यं याजयेयुर्यो वा यजेत वैश्वानरं निर्वपेदिति । वैश्वानरपार्जन्यौ निरुप्येच्छन्नित्यत्रेच्छया वैश्वानरपार्जन्याविच्छयान्वारम्भणीया । यत्कारणं वैश्वानरपर्जन्यौ प्रकृत्य द्विहविष्कान्वारम्भणीयेत्यामनन्ति । अनन्वारम्भणीयायां आन्वारम्भणीयशब्दः तत्कार्यलक्षणार्थः । तेनेच्छयान्वारम्भणीयां करोति इच्छया वैश्वानरपार्जन्याविति ॥ २ ॥

वैश्वानरो द्वादशकपलश्चरुरुत्तरः ॥ ३ ॥

निगदव्याख्यातम् । सा चैषान्वारम्भणीया सत्यपि यजतित्वे चातुर्मास्याङ्गभूता न चातुर्मास्यशब्दवाच्येति । यथा पौर्णमासान्वारम्भणीया न पौर्णमासशब्दवाच्या एवमिहापि । तथा च सत्यन्तराये अप्रयोक्तृत्वमस्याः ॥ ३ ॥

आग्नेयः सौम्यश्चरुः सावित्रो द्वादशक
पालो ऽष्टाकपालो वा सारस्वतश्चरुः
पौष्णश्चरुः प्रपिष्टानाम् ॥ ४ ॥

स च प्रपिष्टानां भवति । एवं हि श्रूयते । तस्माद्यं पूष्णे चरुं कुर्वन्ति प्रपिष्टानामेव कुर्वन्ति । एतच्च दर्शपूर्णमासप्रकरणपरिपठितमपि वाक्येन प्रकरणमुल्लङ्घ्य यत्र पूषा तत्र नीयते पेषणम् ॥ ४ ॥

## द्विदेवतोपि नियमसामर्थ्यात् ॥ ५ ॥

यत्रापि पूषा सद्वितीयस्तत्रापि पेषणं भवत्येव । कुतो नियमसामर्थ्यात् । पूष्णो नियोगतः पिष्टताप्रतिपाद्यते । इतरस्येन्द्रस्याग्नेर्वा अनियम इति ॥ ५ ॥

## अर्द्धपिष्टं वोभयसामर्थ्यात् ॥ ६ ॥

वा शब्दात्पक्षो विपरिवर्त्तते । यत्र पूषा सद्वितीयस्तमर्द्धपिष्टं कुर्यात् । उभावपि ह्येवं सङ्गतार्थावुचितार्थौ भविष्यतः । पिष्टं पूष्ण इतरस्यापिष्टमिति ॥ ६ ॥

## सौमापौष्णदर्शनाच्च ॥ ७ ॥

अपिच सोमापौष्णो नेमपिष्टानां दर्शयति । सौमापौष्णं चरुं निर्वपेन्नेमपिष्टानां पशुकाम इति ॥ ७ ॥

## अपिष्टो वा देवतान्यत्वात् ॥ ८ ॥

अपिष्टो वा भवति । द्विदेवत्यो न पिष्यते । कुत एतद्देवतान्यत्वात् । न ह्याग्नापौष्ण ऐन्द्रापौष्णे वा पूष्णो देवतात्वम् । यत्र पूषपदात्तद्धित उत्पद्यते तत्रैव पूष्णो देवतात्वं न पदान्तरात् । न च पदान्तरसत्यपेक्षात्पूषपदात्तद्धितोत्पत्तिः । सापेक्षत्वात् । सापेक्षं चासमर्थं भवति । समर्थानां प्रथमाद्वेति तद्धितोत्पत्तिरुक्ता । तस्माद्यत्र केवलः पूषा तत्रैव पेषणमिति ॥ ८ ॥

## सोमापौष्णे वचनात् ॥ ९ ॥

यत्तु दर्शनमुक्तं तद्विशिष्टविधानम् । सोमापौष्णदेवत्यश्चरुरर्द्धपिष्टानां पशुकामस्य भवतीति वचनं तन्न दर्शनमिति ॥ ९ ॥

## एतानि सर्वत्र ॥ १० ॥

एतानि पञ्च हवींषि सर्वत्र भवन्ति । सर्वशब्देन वरुणप्रघासा महाहविः शुनासीरीयं च ग्रहीतव्यम् । तत्र हि प्रतिपर्व वचनं भवति । अथैतान्येव पञ्च हवींषि भवन्ति ॥ १० ॥

मरुद्भ्यः स्वतवद्भ्यः सप्तकपालः ॥ ११ ॥

स्वतवद्गुणविशिष्टानां मरुतां सप्तकपालः कर्त्तव्यः ॥ ११ ॥

मरुतो वा ॥ १२ ॥

वैश्वदेवी पयस्या ॥ १३ ॥

एतत्प्रकृतित्वं च कैश्चित्पयस्यान्तर इष्यते । तत्पुनर्नातीव युक्तरूपमिव । येन प्रकृतितो विकृतौ धर्मप्रसव इष्यते । न विकृतितः प्रकृतौ । प्रकृतौ च दाक्षायणे धर्मवती पयस्या विद्यते । अथ प्रातराग्नेयः पुरोडाशो भवति मैत्रावरुणी पयस्येति । धर्माश्चास्या विहिताः । शृते वा दध्यानयतीति तथा वाजिनमनाज्यलिप्तं निषिञ्चति उत्करेकरोति । वाजिनयागश्च भक्षान्तः सधर्मको विहितः । एवं च सति प्राकृत्या एव पयस्यायाः सकाशात् वैकृत्यां धर्मप्रवृत्तिर्युक्तरूपेति । तथा च सूत्रकारप्रस्थानम् । अग्नौ पयस्याया उपांशुत्वं विहितं उपांशुकाण्डे वायव्योग्नौ मैत्रावरुणी चेति । वैश्वदेविकपयस्याप्रकृतित्वे हि उपांशुत्वं प्राप्नोत्येव न विधेयमिति ॥ १३ ॥

द्यावापृथिवीय एककपालः ॥ १४ ॥

एतत्प्रकृतित्वं चैककपालानामित्युक्तमेव ॥ १४ ॥

एतद्वैश्वदेवम् ॥ १५ ॥

अस्य पर्वणो वैश्वदेवमितीयं संज्ञा । असौ च संव्यवहारार्था प्रजाकामस्यापि वैश्वदेवमित्यादौ ॥ १५ ॥

प्राचीनप्रवणे ॥ १६ ॥

तच्च प्राचीनप्रवणे कर्त्तव्यम् । दर्शपूर्णमासयागधर्मत्वेन सम्प्राप्तौ प्राचीनप्रवणविधानम् ॥ १६ ॥

अहतवासाः पत्नी च ॥ १७ ॥

नियमार्थमेतदुक्तम् ॥ १७ ॥

ते एव वरुणप्रघासेष्वपि ॥ १८ ॥

एवकारकरणाच्च व्यक्तिविवक्षेयम् । एवं च सति वरुणप्रघासेषु तेषामेव प्रतिपत्तिः । तथा च नाशङ्कोषादौ वैश्वदेवधर्मित्वेनाहतवासः परिधानं भवत्येव । प्रतिपत्तिस्तु न कर्त्तव्या ॥१८॥

त्रेधा बर्हिः सन्नह्य पुनरेकधा ॥ १९ ॥

सन्नहनं कर्त्तव्यम् ॥ १९ ॥

कुशप्रस्वः प्रस्तर उपसन्नद्धः ॥ २० ॥

प्रस्वः प्रस्तरं गृह्णातीति वचनात् ॥ २० ॥

आसाद्याग्निमन्थनम् ॥ २१ ॥

आसाद्य हवींष्यग्निर्मन्थनं कर्त्तव्यम् । आसाद्य हवीꣳष्यग्निं मन्थतीति वचनात् । तथैवमभिहितेपि सम्मर्शनान्त एव कर्त्तव्यम् । प्रकृतावपि हि श्रूयते । आसाद्य हवीꣳषि सम्मृशतीति । व्यवाविष्टप्राकृतवैकृतसन्निपाते सन्निवेशे हि पूर्वं प्राकृतं कर्त्तव्यमित्युक्तमाचार्येण । प्राकृतं च विकृताविति । तथा च पशुसमञ्जनस्य पूर्वꣳ समनक्तीति । उत्तराघारमाघार्य जुह्वा ध्रुवाꣳ स मनक्तीति हि प्रकृतावुक्तं तन्मा भूदिति पशुसमञ्जनस्य पूर्वकालतोच्यते ॥२१॥

अग्नेर्जनित्रमिति शकलमादाय वेद्यां करोति ॥ २२ ॥

वृषणाविति कुशतरुणे तस्मिन् ॥ २३ ॥

शकले करोति ॥ २३ ॥

उर्वश्यसीत्यधरारणिं तयोः ॥ २४ ॥

उर्वश्यसीत्यनेन मन्त्रेण कुशतरुणयोरुपर्यधरारणिं करोति ॥ २४ ॥

आयुरसीत्युत्तरवाज्यस्थाली सꣳ स्पृश्य पुरू-

रवा इत्यभिनिधानं तयोः ॥ २५ ॥

अधरारण्यामभिनिधानं करोति पुरूरवा इत्यनेन मन्त्रेण ॥२५॥

अग्नये मथ्यमानायानुवाचयति ॥ २६ ॥

मथ्यमानायानुवाचनं कारयति । अनुवाचनं हि निर्ज्ञातकर्तृकं तेनाध्वर्योः प्रैषदानेधिकारः । अन्यत्र तु प्रैषार्थ इत्युक्तम् ॥२६ ॥

मन्थति गायत्रेणेति प्रतिमन्त्रं त्रिः प्रदक्षिणम् ॥ २७ ॥

पुनः प्रदक्षिणं चाप्रदक्षिणं च ॥ २७ ॥

जाते जातायेति ॥ २८ ॥

जाते ऽग्नौ जातायेत्यनुवाचयति । सापेक्षत्वाच्चाग्नय इत्यनुवर्तते ॥ २८ ॥

प्रह्रियमाणायेति प्रास्यन् ॥ २९ ॥

अग्नावग्निं प्रास्यन् अग्नये प्रह्रियमाणायेत्यनुवाचयति ॥२९॥

भवतन्न इति प्रास्यति ॥ ३० ॥

अग्नावग्निम् ॥ ३० ॥

अग्नावग्निरिति जुहोति स्थाल्याः स्रुवेण ॥३१॥

स्थालीग्रहणं च पूर्णाहुतिवदाज्यसंस्कारव्युदासार्थम् । स्रुवग्रहणं च प्रचरणी व्युदासार्थम् । ते हि सर्वहोमेष्वेव विहिते इति ॥ ३१ ॥

नवप्रयाजं नवानुयाजम् ॥ ३२ ॥

वैश्वदेवं भवति । नवानुयाजं भवतीति वचनात् । पञ्चमाभ्यासेन नवसंख्याप्रयाजानामित्युक्तमेव ॥ ३२ ॥

## वरुणप्रघासा महाहविश्च ॥ ३३ ॥

ननु वैश्वदेवधर्मित्वेन नवप्रयाजानुयाजता प्राप्तैव । अधिकहविः सम्बन्धार्थमित्यदोषः । तथा च मारुत्या अपि नवप्रयाजता भवति । इतरेषामप्यन्तराय इति । अपरेत्वन्तराये अङ्गानुष्ठानं नेच्छन्ति । समुदायस्य ह्यङ्गसम्बन्ध इति । तेषामपि मारुत्यर्थम् नवप्रयाजता वक्तव्या । तत्रोपसंहारोमा भूदिति वरुणप्रघासा महाहविश्चेत्युक्तम् ॥ ३३ ॥

## त्रीणि समिष्टयजूंषि जुहोति देवा गातुविदो यज्ञ यज्ञमेष त इति ॥ ३४ ॥

इहचोत्पन्नसंयोगात्संख्याया अभ्यासेन त्रित्वम् । वैश्वदेवधर्मित्वेन च वरुणप्रघासेषु महाहविषि च समिष्टयजुषां त्रित्वम् ॥ ३४ ॥

## पशौ च ॥ ३५ ॥

त्रीणि समिष्टयजूंषि भवन्ति ॥ ३५ ॥

## यां आवह इति वा पशौ ॥ ३६ ॥

मन्त्रविकल्पश्चायम् । पशूद्देशेन समिष्टयजुषां त्रित्वमभिहितम् । अग्नीषोमीयस्य च दक्षिणाग्निहोमान्तता वाचनिकी । अतश्च त्रित्वमितरपश्वर्थं, मा भूत्त्रित्वविधानानर्थक्यमिति ॥ ३६ ॥

## एकं वा वैश्वदेवे ॥ ३७ ॥

वचनाद्विकल्पः ॥ ३७ ॥

## पर्वसंस्थासुवपनं वा प्रागन्त्यात् ॥ ३८ ॥

पर्वसंस्थासु वपनं वा भवति, भवेच्चेत्प्रागन्त्याद्भवति । न हि तद्विहितमिति ॥ ३८ ॥

१अपरेण दक्षिणाग्निं दक्षिणं गोदानमुन्दति सवित्रा प्रसूता दैव्या आप उन्दन्तु ते तनूं दीर्घायुत्वाय वर्चस इति ॥ ३९ ॥

गविर्दीयत इति पृथिव्यां दीयत इति शयनकाले । उन्दयति क्लेदयति तिम्मयतीत्यर्थः ॥ ३९ ॥

त्रेण्याशलल्या विनीय त्रीणि कुशतरुणान्यन्तर्दधात्योषध इति ॥ ४० ॥

त्रेणी शलली प्रसिद्धा । तया केशविनयनं कृत्वा त्रीणि कुशतरुणान्यन्तर्दधात्योषध इत्यनेन मन्त्रेण ॥ ४० ॥

त्र्यायुषमिति यजमानो जपति ॥ ४१ ॥

त्र्यायुषमित्यमुं मन्त्रं यजमानो जपति ॥ ४१ ॥

शिवो नामेति लोहक्षुरमादाय निवर्त्तयामीति वपति ॥ ४२ ॥

लोहशब्देन ताम्रमभिधीयते । लोहित एव ह्यग्निरित्यर्थवादात् ॥ ४२ ॥

एवं पश्चादुत्तरश्च ॥ ४३ ॥

उन्दनादि कर्त्तव्यम् । क्षुरादानं तु कृतत्वान्न भवति जपश्च ॥ ४३ ॥

गृहेषु पौर्णमासः समारूढनिर्मथि तयोस्तथा चेत् ॥ ४४ ॥

---

१ दक्षिणाग्नेरपरस्यां दिशि प्राङ्मुखोपविष्टस्य यजमानस्य दक्षिणां गोदानं दक्षिणकर्णसमीपवर्तिनं शिरःप्रदेशमद्भिः क्लेदयतीत्यर्थः ।

गृहेषु पौर्णमासं कर्त्तव्यम् समारूढनिर्मथितयो रग्न्योस्तथा चेदिति । यदि समारोपनिमर्थनेस्तः । न च वैश्वदेवे समारोपनिर्मन्थने विहिते । दस्माच्चेच्छब्दो यत्रार्थः । यत्र समारोपनिर्थन्थने विहिते।ते च वरुणाप्रघासेषु साकमेधेषु च । अथ केशश्मश्रून्वा समारोह्याग्नी उदवसायेव ह्येतेन यजते इति ॥ ४४ ॥

प्रजाकामस्यापि वैश्वदेवम् ॥ ४५ ॥

भवतीति वाक्यशेषः ॥ ४५ ॥

एकेऽधः प्राङ्शायी मध्वाश्यृतुजायोपायी मा॑ंसस्त्र्यनृतानि वर्जयेदुदकाभ्यवायं च प्रागवभृथात् ॥ ४६ ॥

विकल्पमिच्छन्ति। एके मांसादीनि नियोगतो वर्जयेत् । अधः शयनादीनां सर्वेषामेव विकल्प इति सम्प्रदायः ॥ ४६ ॥

आषाढ्यामयन्ते योनिरिति समारोह्योदवसाय निर्मथ्य वरुणप्रघासाः ॥ ४७ ॥

आषाढीशब्देन च चतुर्मासोपलक्षितकालविधानम् । अथ यदेष एतैश्चतुर्थे मासि यजत इति श्रुतत्वात् । तथा च सहकारिवचनम् । पञ्चम्यां पौर्णमास्यां वरुणप्रघासा इति। अयन्तेयोनिरित्यनेन मन्त्रेण समारोह्याग्नी । कुत एतत् । अन्यत्र दर्शनात् । समारोह्याग्नीशालास्तम्भमिति । क्व समारोह्य अरण्योस्तत्कुतः अन्यत्र दर्शनादेव । समारोपणं हि प्रकृत्योच्यते ग्रामे वा विवत्सन्नरण्योरिति । तेन सूत्रत्रयसिद्धः समारोपः । क्वचिन्मन्त्रः क्वचिदग्नी क्वचिच्चारणी इति । इह च गार्हपत्य एव समारोपः । तत्र ह्याहवनीयोऽप्यन्तरा गर्भिणी न्यायेनास्तीति द्विवचनमग्नी इति । अपरे तु भेदेन कुर्वन्ति । उत्पूर्वो वस्यतिः प्रदेशान्तरगमने वर्त्तते । निर्मथ्य वरुणप्रघासाः कर्त्तव्या इति वाक्यशेषः। वरुणप्रघासा इति बहुवचनमवयवभेदापेक्षया ॥ ४७ ॥

पूर्वेद्युर्दक्षिणाग्नौ निस्तुषामभ्रष्टयवानां करम्भपात्रकरणम् ॥ ४८ ॥

पूर्वस्मिन्नहनि चतुर्दश्यां दक्षिणाग्नौ आमभ्रष्टयवानां करम्भपात्राणि कर्त्तव्यानि । दक्षिणाग्निग्रहणं च गार्हपत्यव्युदासार्थम् । निस्तुषग्रहणं च फलीकरणव्युदासार्थम् । एवं हि श्रूयते अथ पूर्वेद्युरन्वाहार्यपचने निस्तुषानि यवान्कृत्वा तानीषद्विवोपतप्य तेषां करम्भपात्राणि कुर्वन्तीति । श्रपणमात्रमेव च दक्षिणाग्नौ पर्य्यग्निकरणं तु गार्हपत्यादेव । गार्हपत्ये संस्कारा इति वचनात् ॥४८॥

यावन्तो यजमानगृह्या एकाधिकानि ॥ ४९ ॥

यावन्तो गृह्याः स्युरिति वचनात् । एकाधिकानि एकेनातिरिक्तानि भवन्तीति वचनात् ॥ ४९

प्रजायां वा जातश्रुतेः ॥ ५० ॥

प्रजायां वा सम्माय कर्त्तव्यानीति । प्रजासम्मितानि कर्त्तव्यानीत्यर्थः । कुत एतत् । जातश्रुतेः । तद्याश्चैवास्य प्रजा जाता आसन्याश्चाजातास्ता उभयीव रुणपाशात्प्रमुञ्चतीति । पूर्वं गृह्यशब्दाविशेषादभिहितम् । तद्याश्चैवास्य प्रजा जाता आसन्याश्चा जातास्ता उभयीर्वरुण इति विशेषावगतिः । तस्मात्प्रजा सम्मितान्येव कर्त्तव्यानीति ॥ ५० ॥

अप्रजस्याकरणे प्राप्ते द्विप्रजस्यैकप्रजस्य च प्रजासंख्यायां प्राप्तायामिदमाह—

त्रीणि वा नित्यत्वात् ॥ ५१ ॥

द्विप्रजैकप्रजानां त्रीणि कर्त्तव्यानि । बहुत्वविशिष्टं हि श्रवणम् करम्भपात्राणि कुर्वन्तीति । नित्यं च त्रिषु बहुवचनम् । न चैव प्रजा संस्कारः । क्रत्वर्थानि ह्येतानि क्रतुं प्रकृत्याम्नायन्ते । अतश्च द्विप्रजैकप्रजाप्रजानां त्रीण्येकाधिकानि कर्त्तव्यानि ॥ ५१ ॥

मेषमिथुनं च ॥ ५२ ॥

तत्रापि मेषं च मेषीं च कुर्वन्तीति वचनात् । पूर्वेद्युरेव कुर्वन्तीति केचित् । तदयुक्तम् । तत्रापीत्ययमेकः शब्दः स कालविषयो वा भवति द्रव्यविषयो वा । यदि कालविषयो न यवमयता प्राप्नोति द्रव्यविषये न कालनियम इति । तत्र द्रव्यविषयता युक्ता । कालविषये हि सत्यक्ताना प्रधानकालता बाधः । तथाचानुवदन्ति यवमयौ भवत इति । तस्मादुत्तरेद्युरेव मेषमिथुनकरणम् । तत्रापीति शब्दस्य द्रव्यविषयत्वात् । अधिकृतत्वादिदमुच्यते ॥ ५२ ॥

अनैडकीरूर्णाः प्रक्षाल्याश्लेषयेत्तयोः ॥ ५३ ॥

द्विप्रकारा ह्यूर्णा भवन्ति ऐडक्यः अनैडक्यश्च । तत्र नियमार्थमिदमुक्तम् ॥ ५३ ॥

कुशोर्णा वाभावे ॥ ५४ ॥

कुशोर्णा वा भवन्ति । ताश्चानैडकीनामभावे । एवं हि श्रूयते । यद्यनैडकीरूर्णा विन्देत्ताः प्रणिज्य निश्लेषयेद्यदु अनैडकीर्न विन्देदथो अपि कुशोर्णा एव स्युरिति ॥ ५४ ॥

आहवनीयस्य पुरस्ताद्वेदी करोति ॥ ५५ ॥

आहवनीयदेशस्य पुरस्तादित्येके । तदयुक्तम् । अनियतदेशत्वादाहवनीयस्य । आहवनीयमुद्धृत्य तस्य पुरस्तादित्यपरे । एतदप्यनुपपन्नम् । न ह्याहवनीयोद्धरणमत्र कृतम् । वरुणप्रघाससाधनभूतस्याहवनीयस्योत्तरवेदावग्निनिधानमुक्तम् । उत्तरवेदावग्निर्निधीयत इति । आचार्येणाप्युक्तम् । तस्यामग्निं निदधातीति । अथोत्तरवेदिकरणात्पूर्वं समुद्ध्रियते तथा सत्यदृष्टार्थता स्यात् । तस्मादाहवनीयस्य पुरस्तादिति । यावदाहवनीयो न भवति गार्हपत्याच्च पृथग्भूतस्याहवनीयव्यपदेशस्तस्मादाहवनीयोद्धरणस्य पुरस्तादिति सूत्रार्थः । तद्वे द्वे वेदी द्वावग्नी भवत इति वचनाद्वेदी करोतीत्युक्तम् ॥ ५५ ॥

प्रादेशोन्तरा पृथो वा ॥ ५६ ॥

प्रादेशः प्रसिद्धः। प्रसृतांगुलिपाणिरामणिबन्धात्पृथ उच्यते। तथा च कथनम्। न पृथेन न मुष्टिनेति ॥ ५६ ॥

रथमात्र्युत्तरा ॥ ५७ ॥

रथप्रमाणं चाभिहितं परिशिष्टकारेण। तत्राष्टाशीतिशतमीषेत्येवमादि ॥ ५७ ॥

चतुररत्निर्वा पश्चात्सप्तप्राची षड्वा त्रयः पुरस्तात् ॥ ५८ ॥

इदमपरं वैकल्पिकं प्रमाणम् ॥ ५८ ॥

तेषां मध्ये शंकुः ॥ ५९ ॥

त्रयाणां मध्ये शङ्कुनिखननं कर्त्तव्यम्। तेषामिति चानेन पुरस्तात्प्रमाणमुपलक्ष्यते। तत्र हि शंकुना कार्यमस्ति पुरीषनिवपनाय ॥ ५९ ॥

अपरिमिता वा ॥ ६० ॥

उक्तप्रमाणयोर्बहुतरा वा कार्या ॥ ६० ॥

स्फ्याद्यासम्मर्शनात्करोति ॥ ६१ ॥

स्फ्यश्च प्रोक्षितोऽङ्गभावं प्रकृतौ प्रतिपन्नः। प्रोक्षणं च प्रणीतोदकेन। प्रणीता अपि ब्रह्मणा विना न भवन्ति। अतः सर्वमपकृष्यते। स्फ्यादीनां च पात्राणामासादनादि कर्त्तव्यम्। तत्र केचित् षट्कमासादयन्ति। तत्पुनर्विचारणीयम्। न ह्यत्र खननमपकृष्यते। अतः स्वकाल एवास्यासादनमिति। अथ वेदिरपकृष्यमाणा सर्वसाधनान्यपकर्षयति। तदान्यैरवच्छादनान्यप्रकृष्येरन्। न चैतद्युक्तरूपमिव सर्वम्। सम्मर्शनान्ते च ज्योतिष्टोमे उत्तरवेदिर्दृष्टा इहापि सम्मर्शनान्त एव कर्त्तव्या। ज्योतिष्टोमविहिताया एवं वाक्येन विनियोगः। अतः स्फ्याद्यासम्मर्शनात्करोतीत्युक्तम् ॥ ६१ ॥

उभयोरेक उत्करः ॥ ६२ ॥

उभयोरपि वेद्योरेक उत्करो भवति ॥ ६२ ॥

अपरेण वेदिं प्रतिस्थातुः सञ्चरः ॥ ६३ ॥

स्तम्बयजुर्हरणाय सञ्चरनियमः ॥ ६३ ॥

उत्तरवेदिं निवपत्युत्तरस्याम् ॥ ६४ ॥

स उत्तरस्यामेव वेदावुत्तरवेदिमुपकिरतीति वचनात् ॥६४॥

शम्यामादाय चात्वालं मितीते पूर्वेणोत्करं सञ्चरं परिहाप्य ॥ ६५ ॥

इह च शम्यादानमप्राकृतकार्यार्थम् । अतस्तस्य आसादनादि न भवति । उत्करं पूर्वेण सञ्चरमुक्त्वा चात्वालमानम् । चत्वालश्च मानाद्यभिनिर्वर्त्त्येते आह ॥ ६५ ॥

शम्यामुदीची निदधाति पुरस्ताच्च ॥ ६६ ॥

उदीचीमेव ॥ ६६ ॥

दक्षिणतः प्राचीमुत्तरतश्च ॥ ६७ ॥

प्राचीमेव ॥ ६७ ॥

स्फ्येनान्तर्लिखति तप्तायनीति प्रतिनम् ॥ ६८ ॥

शम्या निधानानन्तरमेव परिलेखः कर्त्तव्यः । लाघविकेन सता सर्वतः शम्या निधानमुक्तम् ॥ ६८ ॥

त्रिदेदग्निरिति चात्वाले प्रहरति स्फ्येनान्वारब्धे ॥ ६९ ॥

विदेदग्निरित्यनेन मन्त्रेण । चात्वाले प्रहरत्यन्वारब्धे यजमाने ॥ ६९ ॥

अग्ने अङ्गिर इति पुरीषꣳ हरति ॥ ७० ॥

पुरीषं यदुत्खातं तदग्ने अङ्गिर इति हरति ॥ ७० ॥

हस्तेन च ॥ ७१ ॥

च शब्दात्स्फ्येन च ॥ ७१ ॥

योस्यामिति निवपति पूर्वार्द्धे शंकुसहितम् ॥७२॥

योस्यामित्यनेन मन्त्रेण शङ्कुसंलग्नं पुरीषं निवपति ॥ ७२ ॥

अग्नीदुत्करवत्तूष्णीꣳ हृतम् ॥ ७३ ॥

तमग्नीदभिनिदधाति उत्करवत्पाणिद्वयेन मन्त्ररहितम ॥ ७३ ॥

एवं द्विरपरं द्वितीयस्यां तृतीयस्यामिति विशेषः ॥ ७४ ॥

एवं द्विरपरं प्रहरणादि कर्त्तव्यम । यो द्वितीयस्यां तृतीयस्यामिति निवपने विशेषः। अन्वारम्भस्तु प्रहरणमात्र एव। तत्रैव श्रुतत्वात् ॥ ७४ ॥

अनुत्वेति चतुर्थं यथार्थमाहृत्य सिꣳ ह्यसीति व्यूहत्युत्तरवेदिम् ॥ ७५ ॥

अनुत्वेत्यनेन मन्त्रेण यथार्थपुरीषमाहृत्य यथार्थो निर्वर्त्यते तथा पुरीषमाहृत्य सिꣳ ह्यसीत्युत्तरवेदिं व्यूहति ॥ ७५ ॥

शम्यामात्रीं वितृतीयामपरिमितां युगमात्रीं यजमानदशपद्यां वा ॥ ७६ ॥

द्वात्रिंशदङ्गुला शम्या। वितृतीयामिति वेदेस्त्रिभागसम्मितामपरिमितां वा प्रमाणद्वयस्यैव। तत्र हि श्रूयते वितृतीयामपरिमितां वेति । युगमात्रीं यजमानदशपद्यां वोत्तरवेदिं व्यूहति ॥ ७६ ॥

सोमे वोत्तरे व्यपस्फुरणश्रुतेरसम्भवाच्च ॥ ७७ ॥

सोम एवोत्तरे द्वे प्रमाणे। अन्यान्यपि तत्र भवन्त्येव। तत्राविशेषश्रवणात्। सोम एवोत्तरे इति । कुत एतत् । व्यपस्फुरणश्रुतेः । व्यपस्फुरेते ह वा एते वेदिश्चोत्तरवेदिश्च । व्यपस्फुरणं च स्पर्द्धोच्यते । सा चातिमहत्वादुत्तरवेदेः स्पर्द्धोपजायते । असम्भवाच्च ॥ ७७ ॥

मध्ये नाभिं करोति प्रादेशसमां चतुःस्रक्तिम् ॥ ७८ ॥

उत्तरवेदि मध्ये प्रादेशपरिमाणां चतुः स्रक्तिं नाभिं करोति ॥ ७८ ॥

प्रोक्षत्युत्तरवेदिं सिकताश्च प्रकिरति सिंहीरसीति प्रतिमन्त्रम् ॥ ७९ ॥

आनन्तर्यान्नाभेरेव प्रोक्षणं मा भूदित्युत्तरवेदि ग्रहणम् ॥ ७९ ॥

छन्ना वसति ॥ ८० ॥

अथैनां च्छादयति सा छन्नैतां रात्रिं वसतीति श्रुतत्वात्। छादनमुत्तरवेदिसंस्कारः सोत्र प्रवर्त्तते। वसत्यर्थस्तु ज्योतिष्टोम एव। ननु ज्योतिष्टोम उत्तरवेदिरुत्पन्ना । स चेह वचनेन विनियुक्ता। स उत्तरस्यामेव वेदा उत्तरवेदिमुपकिरतीति तेन वसत्यर्थोपि प्राप्नोति। उच्यते। सद्यः कालत्वाद्विकृतीनां वसत्यर्थस्यात्राप्राप्तिः । छादनं तु संस्कारत्वाद्भवत्येव ॥ ८० ॥

प्रातः पञ्च गृहीतं गृहीत्वाग्नी प्रणयतीध्मा-भ्यामुपयम्य ॥ ८१ ॥

प्रातर्ग्रहणमपि तदर्थमेव। इहासम्भवात्। पञ्च गृहीतमाज्यं गृहीत्वाग्नी प्रणयति। तद्वे द्वे वेदी द्वावग्नी भवत इति। अग्नी इति द्विवचनम्। इध्माभ्यामुपयम्य। उपयमनीभिर्गृहीत्वा उत्तरवेदौ हीध्मेन प्रणयनं दृष्टं ज्योतिष्टोमे। इध्ममभ्यादधत्युपयमनीरुपकल्पयन्तीति। कृतानुकरणात्वेन च दक्षिणविहारेपि प्राप्तिमाशङ्क्योच्यते। इध्माभ्यामिति॥ ८१॥

सर्वं वा विभज्य प्राकृतत्वात् ॥ ८२ ॥

इध्मप्रणयनं हि सशेषस्याहवनीयस्य भवति। इहसर्वस्याहवनीयस्य विभज्य प्रणयनं कर्त्तव्यम्। कुत एतत्। प्राकृतत्वात्प्रणयनस्य। प्राकृतमेवेदं प्रणयनम्। प्रकृतौ वा शेषप्रणयनं दृष्टम्॥ ८२॥

प्रणयनः सोमाद्वाच्यत्वात् ॥ ८३ ॥

अथवा सौमिकमेतत्प्रणयनम्। कुत एतत्। वाच्यत्वाद्विधीयमानत्वादित्यर्थः। यच्च न प्राप्नोति तद्विधीयते। सौमिकं च न प्राप्नोति अतस्तस्य विधानमिति॥ ८३॥

प्रकृतेर्वा नामत्वात् ॥ ८४ ॥

अथवा प्रकृतेः सम्बन्ध्येतत्प्रणयनं न तत्सौमिकम्। कुत एतत्। अनामत्वात्। न ह्येतन्नामधेयम्। किं तर्हि। प्रपूर्वो नयतिः क्रियावाचको गच्छति पठति पचतीति वत्। नाम्ना च धर्मप्राप्तिर्भवति। न चैतन्नाम तिङन्तत्वात्। अतः अनामत्वाच्च सौमिकस्य नातिदेशः॥ ८४॥

कथं तर्हीदमुच्यते द्वयोः प्रणयन्तीति—

ग्रहणं गुणार्थमुत्तरवेद्यग्निनिधानात् ॥ ८५ ॥

प्रणयनग्रहणं गुणार्थम्। को गुण इति चेत्। द्वयोरुत्तरवेद्यग्निनिधानात्। द्वयोः पर्वणोरुत्तरवेदावग्निर्निधीयत इति। तस्मादसौमिकत्वान्नेहेध्मेन प्रणयनम्॥ ८५॥

आज्यप्रोक्षणीरुद्यम्याग्निभ्यां प्रह्रियमाणाभ्या मनुब्रूह्ये१कस्फ्ययानूदेहीति ॥ ८६ ॥

आज्यं पञ्च गृहीतं प्रोक्षणीरग्नी चोद्यम्याहाग्निभ्यां प्रह्रियमाणाभ्यामनुब्रूहीति आह । अयं च प्रकृतेपि प्रणयनेऽभ्यधिको गुणो यत्प्रणयनीयानुवाचनमिति ॥ ८६ ॥

त्रिरुक्तायां यथा वेदि हरणम् ॥ ८७ ॥

त्रिरुक्तायां प्रथमायामृचि यथा वेदि हरणम् । या यस्य वेदिरिति ॥ ८७ ॥

प्रतिप्रस्थाता स्फ्येन लिखत्यावेदिश्रोणेरुत्तरवेदेर्वा ॥ ८८ ॥

प्रतिप्रस्थाता स्फ्येन विलिखति वेदिश्रोणिं यावत्, उत्तरवेदेर्वा२ अयं च पदार्थः सौमिको न वारुणप्रघासिकः । तत्रैव विधानात् । अनूदेति प्रतिप्रस्थातैकस्फ्ययैतस्मान्मध्यमाच्छङ्कोर्य एष वेदेर्जघनार्धे भवति तद्यदेवात्रान्तः पातेन गार्हपत्यस्य वेदेर्व्यवच्छिन्नं भवति तदेवैतदनु सन्तनोतीति । अतश्च मर्यादामात्रमत्र द्रष्टव्यमावेदिश्रोणेरुत्तरवेदेर्वा । सौमिकस्यात्रोपदेशोतिदेशार्थः । अग्निं प्रणयत्यौपनिवपनात्कृत्वेति ॥ ८८ ॥

---

१ एकः स्फ्यः साधनमस्याः सेयमकस्फ्या रेखा तया युक्तस्त्वं पश्चाद्गच्छ यज्ञस्योर्ध्वभागं प्राचीं दिशं गच्छेत्यर्थः । इत्थम्भूतलक्षणे तृतीया । प्रतिप्रस्थाता स्फ्येन भूमौ रेखां कुर्वन्नग्निमनुगच्छतीति फलितोऽर्थः ।

२ अत्र लाट्यायनः ' अध्वर्युश्चेदूब्रूयाद्ब्रह्मन्नेकस्फ्ययोपसम्भिन्धीति स्फ्येनाहवनीयात्पांसून् समुदृधृत्योत्तरस्या वेदेर्दक्षिणादन्तात्कर्षन्नियादावेदि मध्यादेकाचेदिति ' । तेन वेदिद्वित्वे वरुणप्रघासेषु सौत्रामण्यां च दक्षिणवेदिश्रोणिं यावद्रेखाकरणम् । एकवेदिके महाहविः पशुबन्धसोमादौ तु वेदिमध्यस्थापरशङ्कुपर्यन्तमेव । तथा च श्रुतिः ' एतस्मान्मध्यमाच्छङ्कोर्य एष वेदेर्जघनार्धे भवति, इति ।

वेद्यन्तरे स्थित्वोदङ्ङुत्तरवेदिं प्रोक्षतीन्द्रघोष इति प्रतिमन्त्रं प्रतिदिशं यथालिङ्गम् ॥ ८९ ॥

छायोष्णन्यायेन च वेद्युत्तरवेद्योरन्तरे स्थित्वोदङ्ङुत्तरवेदिं प्रोक्षतीन्द्रघोष इत्येभिर्मन्त्रैः प्रतिमन्त्रं प्रतिदिशं यथालिङ्गम् ॥ ८९ ॥

दक्षिणां्ससहितं बहिर्वेदि शेषं निषिञ्चतीदमहं तप्तं वारित्यमुमित्यभिचरन् ॥ ९० ॥

दक्षिणांसलग्नं प्रोक्षणीशेषं निषिञ्चति बहिर्वेदि इदमहं तप्तमित्यनेन मन्त्रेण । अमुमित्यभिचरन्नामादिशेत् । स च बाह्-र्च्यायज्ञादित्यतः पूर्वो भवति ॥ ९० ॥

नाभ्याः श्रोण्यं्सेषु पञ्च गृहीतं जुहोत्यक्षया दक्षिणे्से श्रोण्याम्ंसे मध्ये च हिरण्यं पश्यन्सिं् ह्यसीति प्रतिमन्त्रम् ॥ ९१ ॥

उत्तरवेदिनाभ्याः श्रोण्यं्सेषु पञ्चगृहीतं जुहोति अक्षया दक्षिणे अंसे प्रथमं तत उत्तरस्यां श्रोण्यां पुनर्दक्षिणस्यां तत उत्तरे अंसे पुनर्मध्ये च हिरण्यं पश्यन् सिं् ह्यसीत्येभिर्मन्त्रैः प्रतिमन्त्रम् ॥ ९१ ॥

भूतेभ्यस्त्वेति स्रुचमुद्यच्छति ॥ ९२ ॥

स्रुक्च वैकंकती भवति होमसम्बन्धात् ॥ ९२ ॥

नाभिं पैतुदारवैः परिदधाति पूर्ववद्ध्रुवोसीति प्रतिमन्त्रम् ॥ ९३ ॥

पूर्ववदिति मध्यमदक्षिणोत्तरैः ध्रुवोसीत्येवमादिभिर्मन्त्रैः प्रतिमन्त्रम् ॥ ९३ ॥

अग्नेः पुरीषमिति निवपति [1]गुग्गुलुसुगन्धितेजनवृष्णेस्तुकाश्चोपरिशीर्षण्या अभावेऽन्याः ॥ ९४ ॥

अग्नेः पुरीषमित्यनेन मन्त्रेण । गुग्गुल्वादीनि नाभ्यां निवपति वृष्णेस्तुका उपरि शीर्षण्याः । तदभावेऽन्याः ॥ ९४ ॥

तेष्वग्निं निदधाति ॥ ९५ ॥

तेषु सम्भारेषु अग्निं मुञ्चति ॥ ९५ ॥

उद्धतावोक्षिते दक्षिणम् ॥ ९६ ॥

अग्निं निदधातीति वाक्यशेषः । पैतुदारवादि च सम्भारनिवपनान्तमत्र न भवति । उत्तरवेदिमात्रविधानात् । पैतुदारवादीनां चाग्न्यर्थत्वात् । एते हि ज्योतिष्टोमिकस्याग्नेरङ्गम् । शारीरः हैवास्य पीतुदार्वित्यभिधायाह तद्यदेवात्राग्नेर्न्यक्तं तदिहाप्यसदिति । न चेह ज्योतिष्टोमिकोऽग्निः । उत्तरवेदिमात्रविधानात् । किमिति तर्हि पैतुदारवादय उपन्यस्ताः । लाघवाय अतिदेशार्थम् । ज्योतिष्टोमे ह्यग्निप्रणयत्यौपानिवपनान्कृत्वेत्यनेन कथं नामतिदेशः स्यादिति । तथाचेध्मेनोद्धरणं निराकृत्योपयनीरुपनिवपतीत्युक्तमाचार्येण ॥ ९६ ॥

[2]उपयमनीरुपनिवपति ॥ ९७ ॥

प्रणीताद्यतः ॥ ९८ ॥

---

१ गुग्गुलुः प्रसिद्धः, सुगन्धितेजनं रोहीतः, वृष्णेः स्तुकाः शिरो रोमाणि, ताश्च शीर्षण्याः शीर्ष्णि भवाः, शृङ्गयोरन्तराले भवानि मेषरोमाणि, अन्याः अन्यस्मिन्मेषस्य शरीरप्रदेशे जाता इति देवः ।

२ अग्नेरुपयमन उपयुक्ता मृत्तिकाः सिकता वा उप समीपे अग्नेर्नीचैः प्रक्षिपतीत्यर्थः ।

प्रणीताप्रणयनस्यापकृष्टत्वात् प्रणीताप्रणयनादि न भवति। एवं चेत्प्रणीताप्रणयनं यस्यादौ तदादि भवति। तच्च परिस्तरणम्। एतदप्यनुपपन्नम्। अवसराभावात्। अद्याप्यग्न्यन्वाधानमकृतमास्ते तेन परिस्तरणस्यानवसरः। अतः प्रणीताग्रहणेन प्रणीतानामग्रहणम्। कथं तर्हि तत्। प्रणीत आहवनीयो यस्य कर्मण आदौ तदादि भवति। किं च तदग्न्यन्वाधानम् उद्धृत्य ह्याहवनीयमग्न्यन्वाधानस्यावसरः। तेन प्रणीताद्य इति अग्न्यन्वाधानमित्येतदेवोक्तं भवति। अथ वैकस्यादिशब्दस्य लोपेनोष्ट्रमुखन्यायेन प्रणीतादिमादौ कृत्वा भवतीत्यर्थः। एवं कृत्वा यत् कृतं तत्कृतमेव ब्रह्मवरणादि शेषमग्न्यन्वाधानादि प्रतिप्रसूयते ॥९८॥

## व्रतोपायनं वा कृतं चेत् ॥ ९९ ॥

अग्न्यन्वाधानसमनन्तरं व्रतोपायनीयस्य कालः। तदप्यत्र वा भवति। यदि न कृतं पूर्वम्। ननु च व्रतोपायनस्यायमेव प्रथमः कालः, कथमिदमुक्तमकृतं चेदिति। उच्यते। व्रतोपायनं पदार्थाङ्गं तेषां चापकर्षात्तस्यापि पक्षे अपकर्षः प्राप्नोति। तेनाकृतं चेदित्युच्यते। यद्येवं वा न भवत्येव व्रतोपायनम्। अत्र किं कारणम्। वैकल्पिकानामादावेवावधारणं कर्त्तव्यम्, मयास्मिन्काले व्रतोपायनं कर्त्तव्यमिति। तद्यद्यग्न्यन्वाधानोत्तरकालतावधार्यते तदा ब्रह्मवरणादीनामङ्गमिति दतपकर्षादपकृष्यते। एवं च कृत्वा नायं व्रतोपयानस्य काल इति। नन्वेवं सति अग्न्यन्वाधानोत्तरकालतापैति। किं क्रियताम्। ब्रह्मवरणादिष्वपकृष्यमाणेषु तदङ्गस्यापकर्ष एव। ब्रह्मवरणादयोऽपि हि अग्न्यन्वाधानादुत्तरकालीना एवासन्। तस्मादपरिचोदना एषा ॥ ९९ ॥

## नित्येभ्योऽधिकान्यैन्द्राग्नः पयस्ये वारुणी मारुती काय एककपालः ॥ १०० ॥

आग्नेयादिभ्यो नित्येभ्योऽधिकान्येतानि हवीꣳषि भवन्ति ॥१००॥

## नानाज्यनिर्वपणम् ॥ १०१ ॥

साधारण्याद्गार्हपत्यस्य निर्वापाधिश्रयणयोः सह प्राप्ताविदमुच्यते ॥ १०१ ॥

दक्षिणं प्रतिप्रस्थातुः ॥ १०२ ॥

अपरकालत्वादुत्तरं मा भूदिति ॥ १०२ ॥

ध्रुवायाः पुरस्तात्पृषदाज्यमाज्यं दधिमिश्रं पञ्चगृहीतं ज्योतिरसीति समिदन्तेन ॥ १०३ ॥

ध्रौवादाज्यात्पूर्वं पृषदाज्यमाज्यं दधिमिश्रं पञ्चगृहीतं गृह्यते । ज्योतिरसीत्यनेन मन्त्रेण । विश्वरूपमित्यत्र समाप्तत्वद्वाक्यस्य समिदन्तेनेत्युच्यते । न ह्यत्र परादिना पूर्वान्तन्यायः । प्रकरणान्तरपाठात् । मन्त्रस्त्वपूर्वोपि सन् सकृन्निर्वा प्राप्नोति । अनुयाजार्थस्य हि द्रव्यस्य प्रकृतौ एवमेव दृष्टत्वात् ॥ १०३ ॥

अनुयाजार्थः सर्वत्र ॥ १०४ ॥

यत्र पृषदाज्यग्रहणमुच्यते तत्रानुयाजार्थंनोच्यते । एवं चासंसर्गात् पृथक्पात्रतास्य भवति । तच्चोपकल्पनीयम् । न ह्युपभृत्कार्यापत्तिरस्य । उपभृत उपभरणार्थत्वात् । तेनोपभृद्धर्माः स्वरूपप्रयुक्ताः । नानुयाजार्थद्रव्यधारणप्रयुक्ता इति ॥ १०४ ॥

औपभृतासादनम् ॥ १०५ ॥

औपभृतमासादनं पृषदाज्यस्य भवति । अनुयाजार्थस्य ह्येवमेव दृष्टत्वात् ॥ १०५ ॥

प्रियेण धाम्नेति वाविशेषोपदेशात् ॥ १०६ ॥

अविशेषेण हि प्रियेण धाम्नेत्येतद्धविर्मात्रमुद्दिश्य विहितम् । न च प्रकृतावनुयाजार्थस्य द्रव्यस्य तदासादनम् । उपभृत एव तदिति ॥ १०६ ॥

उत्तरं वापरकालत्वात् ॥ १०७ ॥

उत्तरं वा गृह्यते । कुत एतत् । अपरकालत्वात् । अपरकालो हि तस्य विनियोग इति । एवं प्राप्ते पुनर्वा शब्देन व्यावर्त्यते । वा पूर्वं गृह्यते । उपभोगत्वात् । प्रकृतावपि ह्यपरकालीनेन सता पूर्वकालतैव उपभुक्ता । अतः प्रकृतिवत्पूर्वकालतैवेति ॥ १०७ ॥

प्रतिप्रस्थाता च ॥ १०८ ॥

पृषदाज्यं गृह्णाति ॥ १०८ ॥

न वा ॥ १०९ ॥

अथ यदि प्रतिप्रस्थातुः पृषदाज्यं भवतीति विकल्पेन श्रवणात् ॥ १०९ ॥

प्रणीतापत्नीसन्नहनाग्निमन्थनाश्रुतप्रैषयजमानवाचनहोतृषदनवरणप्राशित्राङ्गुलिपर्वाञ्जनावान्तरेडाभागापराग्न्यवभृथान्न प्रतिप्रस्थाता ॥ ११० ॥

प्रतिप्रस्थाता न करोति प्रणीतादीन् । प्रणीतास्तावद्विभवात् । भवन्ति ह्यध्वर्युणा कृताः प्रतिप्रस्थातुरपि । पत्नीसन्नहनं कृतत्वात् । अग्निमन्थनं तु शास्त्रात्, आश्रुतप्रत्याश्रुते च । प्रैषाः यजेतेत्येवमादयः । वाचनं यजमानस्य । वाचनस्य का प्राप्तिः । पृषदाज्यस्कन्दने चतुस्त्रिंशद्धोम इति केचित् । तत्र हि व्याहृतिहोमे वाचनं विहितम् । नेत्यपरे । एकैकस्या एव होमे तद्विहितमिति । एकैकां यथाकालं हुत्वा यज्ञस्य दोह इति वाचयतीत्युक्तत्वात् । कस्तर्ह्यत्र समाधिः । सपाशुकेषु यजमानवाचनं विहितम् । तदनुकरणात्प्रतिप्रस्थातुरपि मा भूदिति प्रतिषिध्यते । प्राशित्रं वचनात् । अङ्गुलिपर्वाञ्जनं कृतत्वात् । अवान्तरेडाभागांश्च कृतत्वादेव । अपराग्निहोमा वचनात् । अथाध्वर्युरेव प्रतिपरेत्य पत्नीः संयाजयत्युपास्त एव प्रतिप्रस्थाता इति वचनात् । अवभृथोपि वचनादेव न भवतीति ॥ ११० ॥

कृतानुकरोन्यत्र दक्षिणस्याम् ॥ १११ ॥

कृतानुकर एवं प्रतिप्रस्थातेति वचनात् ॥ १११ ॥

वाजिने निषिच्योभयोः करीराण्यावपति
शमीपलाशमिश्राणि ॥ ११२ ॥

तयोरुभयोरेव करीराण्यावपति । तथा तयोरुभयोरेव शमीपलाशान्यावपति । उभयोस्तुल्यत्वात् । न मिश्रणं फलानाम् । प्रयोजनं अन्तरायेपि तूष्यन्त एव । तत्रस्थाभिघाराच्च पूर्वमावापः । वाजिने निषिच्य करीराण्यावपति । एतानि च संस्कारकाणि न प्रदेयानि । अतः प्रदेयधर्मा न भवन्ति ॥ ११२ ॥

मेषमिथुनं च ॥ ११३ ॥

आवपतीत्यनुवर्त्तते । यश्चायमावापस्तदुद्वासनं पात्र्यां प्राप्तं वचनात्पयस्ययोः क्रियते ॥ ११३ ॥

मारुत्यां मेषम् ॥ ११४ ॥

पारिशेष्याद्वारुण्यां मेषीम् । अस्य च मेषमिथुनस्य पौरोडाशिकविध्यन्तेन केचित्कपालेषु श्रपणमिच्छन्ति । तदयुक्तम् । पिष्टकृतानां हि उन्डेरकादीनां कुंभ्यां श्रपणं प्रसिद्धम् । यथा पुरोडाशानां कपालेषु चरूणां च स्थाल्यामिति । यथा प्रसिद्धे च श्रपणादौ मन्त्रवन्नियमादि विधानम् । अतश्च कुंभ्योर्मेषमिथुनश्रपणम् । तयोश्चाकपालकार्यापत्तेश्चरोरिवोपकल्पनामिति । उदकमपि तत्रोपसर्जनी कार्यस्य निर्वृत्तत्वादन्यदेव भवति । प्रदेयधर्मास्तु प्रदेयत्वान्मेषमिथुनस्य सम्भवन्त्येव । कथं प्रदेयतेति चेत् । सोन्यतरेणावदानेन सह मेषमवदधातीति । प्रदानायैव चावदीयते। तथा च लिङ्गम् । एषवै प्रत्यक्षं वरुणस्य पशुर्यन्मेष इति । वरुणसम्बन्धान्मेषस्य प्रदेयतेति ॥ ११४ ॥

सर्वाणि हवीꣳष्युत्तरस्यामासादयति मारुतीꣳ

सहाज्यां प्रतिप्रस्थाता दक्षिणस्याम् ॥ ११५ ॥

सर्वग्रहणं करम्भपात्रार्थमिति केचित् । तदनुपपन्नम् । दक्षिणेऽग्नौ तेषां होमः । तत्रैवासादनं युक्तरूपमिति । सर्वग्रहणं किमर्थमिति चेत्, सह विधाने सति विभागार्थम् । मारुतीव्यतिरेकेण सर्वाण्युत्तरस्यां वेद्याम् मारुती तु सहाज्या दक्षिणस्यामासाद्यत इति । एवं च सति मारुत्याः पयस्यायाः प्रतिप्रस्थातुरेव कर्तृत्वं मेष्याश्च । एवं च सति यथा स्वं प्राणदानमिति ॥ ११५ ॥

सम्मार्जनाय प्रेषिते संमृष्टे प्रतिप्रस्थाता पत्नीमानेष्यन्नाह केन चरसीति ॥ ११६ ॥

असंमृष्टमेव भवति स प्रेषितमथ प्रतिप्रस्थाता प्रतिपरैति स पत्नीमुदानेष्यन्पृच्छति केन चरसीति ॥ ११६ ॥

सःस्तुतानाचष्टे ॥ ११७ ॥

ये संस्तुताः सङ्गता भर्तृव्यतिरेकेण तानाचष्टे ॥ ११७ ॥

तृणानि वोद्गृह्णाति प्रतिसःस्तुतम् ॥ ११८ ॥

अनाख्यातमहितं ज्ञातिभ्य इति श्रुतेः ॥११९॥

आख्याते प्रघासिन इत्येनां वाचयति नयन् ॥ १२० ॥

आख्यानोत्तरकालं प्रघासिन इत्यमुं मन्त्रं वाचयति पत्नीम् । अत एव मन्त्रवर्णात्करम्भपात्रेषु मरुतां देवतात्वं गम्यते । प्रघासिनो हवामहे मरुतश्चारिशादस इति वाक्यशेषाच्च । यथा पुरोनुवाक्यैव मेषैतयैवैनानेतेभ्यः पात्रेभ्यो ह्वयति ॥ १२० ॥

करम्भपात्राणि जुहोति शूर्पेण मूर्द्धनि कृत्वा दक्षिणेऽग्नौ प्रत्यङ्मुखी जाया पती वा दक्षिणेनाहृत्य तीर्थेन पूर्वेण वेदिम-

परेण वा यद्ग्राम इति ॥ १२१ ॥

करम्भपात्राणि शूर्पेण पत्नी जुहोति । दक्षिणेऽग्नौ प्रत्यङ्मुखी यद्ग्राम इत्यनेन मन्त्रेण । मूर्द्धनि कृत्वा गच्छति । दक्षिणेनाहरणं ब्रह्मयजमानयोश्चाग्नेश्चान्तरेण तीर्थेन प्रविश्य पूर्वेण वेदिमपरेण वेत्य यथोक्तं जुहोति । जायापती वा जुहुतः । तदा च यजमानोन्वारम्भं करोति१ ॥ १२१ ॥

मोषूण इति यजमानो जपति ॥ १२२ ॥

अक्रन्कर्मेत्येनां वाचयति प्रतिनयन् ॥ १२३ ॥

प्रतिशब्दप्रयोगात्तेनैव मार्गेण पत्नीं नयन्नक्रन्कर्मेतिं वाचयति ॥ १२३ ॥

आगते सम्मार्जनाद्याज्यभागाभ्याम् ॥ १२४ ॥

वैकृतावसरे प्राकृतानुवृत्त्यर्थमाह । आगते प्रतिप्रस्थातरि संमार्जनाद्याज्यभागान्तं कर्मक्रियते ॥ १२४ ॥

स्रुक्पाणिरास्ते प्रतिप्रस्थाता ॥ १२५ ॥

तत ऊर्ध्वं स्रुक्पाणिरास्ते प्रतिप्रस्थाता ॥ १२५ ॥

हविर्भिश्चरति ॥ १२६ ॥

अध्वर्युः ॥ १२६ ॥

---

१ अत्रापस्तम्बः 'अन्तरा वेदी गत्वा यजमानः पत्नी चोत्तरेण चोत्तरां वेदिमैषीके शूर्पे करम्भपात्राण्योप्य शीर्षन्नधिनिधाय पुरस्तात्प्रत्यञ्चौ तिष्ठन्तौ दक्षिणाग्नौ शूर्पेण जुहोति मोषूण इन्द्रेति यजमानः पुरोऽनुवाक्यामन्वाह यद्ग्राम इत्युभौ याज्यामक्रन्कर्म कर्मकृत इति परायतोऽपि वाऽध्वर्युः पतिप्रस्थाता वा जुहुयादप्यग्रेण दक्षिणमग्निं पुरस्तात्प्रत्यञ्चावतिष्ठेते शूर्पे शिरसोऽवधाय मोषूण इन्द्रेति यजमान उत्तरस्तिष्ठन् यद्ग्रामे यदरण्य इति जुहुतः शूर्पेण करम्भपात्राण्यक्रन्कर्म कर्मकृत इति व्युत्क्रामत ' इति ।

पयस्याप्रचरणकाले मेषौ व्यतिहरतः ॥ १२७ ॥

स यो मेषो भवति मारुत्यास्तं वारुण्यामवदधाति या मेषी भवति वारुण्यास्तां मारुत्यामवदधातीति वचनात् ॥ १२७ ॥

अन्यतरेणावदानेन सह मेषम् ॥ १२८ ॥

अन्यतरेण पयस्यावदानेन सह मेषमवदधातीति ॥ १२८ ॥

सव्येन स्रुचौ गृहीत्वा प्रतिप्रस्थातुर्वासो दक्षिणेन मरुद्भ्योनुवाचयति ॥ १२९ ॥

सव्ये पाणावध्वर्युः स्रुचौ कृत्वा दक्षिणेन प्रतिप्रस्थातुर्वासोन्वारभ्याह मरुद्भ्योनुब्रूहीति श्रुतत्वात् ॥ १२९ ॥

वारुणीवदवदानम् ॥ १३० ॥

मारुत्याः पयस्यायाः प्रतिप्रस्थाता करोति ॥ १३० ॥

हविर्भिश्चरित उभौ स्विष्टकृत्प्रभृति ॥ १३१ ॥

हविर्भिश्चरित इति कायेन प्रवयेत्येतदुक्तं भवति । उभावेव स्विष्टकृत्प्रभृतिकुर्वाते सर्वम ॥ १३१ ॥

इडामवदाय प्रतिप्रस्थात्रे प्रयच्छति ॥ १३२ ॥

तत्र प्रतिप्रस्थाता मारुत्याः ॥ १३३ ॥

द्विरवद्यति ॥ १३३ ॥

स्रुचौ व्यूहतोध्वर्यू ॥ १३४ ॥

अध्वर्युग्रहणं यजमानव्युदासार्थम ॥ १३४ ॥

समासिच्य वाजिनभक्षः ॥ १३५ ॥

समासिच्य वाजिनशेषौ भक्षः कर्त्तव्यः[१] ॥ १३५ ॥

---

१ तथा चापस्तम्बः ' उभौ वाजिनाभ्यां प्रचरतः शेषौ समवनीयोत्तरे विहारे पूर्ववद्भक्षयन्ति ' इति ।

अध्वर्युविकारात्प्रतिप्रस्थाता भक्षेषु ॥ १३६ ॥

अध्वर्युकर्मकुर्वन्नध्वर्युविकार इत्युच्यते । अतश्च कर्मनिमित्तत्वाद्भक्षेष्वपि भवति ॥ १३६ ॥

मैत्रावरुणश्च होत्रध्वर्युविकारात् ॥ १३७ ॥

यत्र मैत्रावरुणो विद्यते तत्र तस्यापि भक्षो भवति । कुत एतत् । होत्रध्वर्यू विकरोति । होतारं हि पुरोनुवाक्यानुवचनेन विकरोति प्रैषेण वा ऽध्वर्युम् । मैत्रावरुणः प्रेष्येति चानुचाहेति वचनात् । अतः सोऽपि तन्निमित्तैर्भक्षैर्युज्यत इति ॥ १३७ ॥

समिष्टयजूंषि तूष्णीं दक्षिणस्याम् ॥ १३८ ॥

वेद्यां भवन्तीति ॥ १३८ ॥

वारुणीनिष्काषेणावभृथम् ॥ १३९ ॥

कर्तुं अपः प्रतियन्तीति वाक्यशेषः । १निष्काषस्य करणत्वेन निर्देशात्पुरोडाशो निवर्त्तते ॥ १३९ ॥

तूष्णीमेत्याभ्यवेत्य मज्जयत्यवभृथेति ॥ १४० ॥

तूष्णीमेत्येति सामगानप्रतिषेधः । अभ्यवेत्य च तूष्णीमिति । अपोवक्रमणवाचनप्रतिषेधः । मज्जयति निष्काषस्थालीमवभृथेत्यनेन मन्त्रेण ॥ १४० ॥

---

१ पयस्यापाचनकाले तापवशादधः स्थालीतललग्नः पयस्याशेषः निष्काश उच्यते । अथास्यै वारुण्यै पयस्यायै क्षामकर्षमिश्रमादाय ' इति श्रुतेः । पात्रे संसक्तः कृष्यते विश्लिष्यते इति कर्षः, क्षामश्चासौ कर्षश्चेति क्षामकर्षः, स्थालीतललग्नः पयस्याशेष इति तदर्थः । अत्र च नाम्ना सौमिकादवभृथाद्धर्मप्राप्तिरतः सोमवदत्र सर्वं कर्तव्यम् । ततो प्रथमं चात्वालसमीप एवोरुं हीति वाचनम् । ततो निष्काषाज्यस्थालीस्रुक्समिद्बर्हिःश्रृतावदानस्फ्यपरिभ्रानवस्त्राद्युपयोक्ष्यमाणमादाय चात्वालोत्करावन्तरेण निष्क्रम्योदकसमीपं गच्छन्ति ।

जायापती स्नातोऽमज्जन्तौ ॥ १४१ ॥

अमज्जन्तावेव स्नानमाचरतः ॥ १४१ ॥

अन्योन्यस्य पृष्ठे धावतः ॥ १४२ ॥

धावुगतिशुध्योः । शोधयतः प्रक्षालयत इत्यर्थः ॥ १४२ ॥

अन्ये वाससी परिदधाते ॥ १४३ ॥

जायापती ॥ १४३ ॥

पूर्वे दद्यादधिकृतेभ्यो यस्मा इच्छेत् ॥ १४४ ॥

पूर्वे वाससी दद्यादधिकृतेभ्य ऋत्विग्भ्यो यस्मा एवेच्छा भवति । स यस्मै कामयेत तस्मै दद्यादिति वचनात् ॥ १४४ ॥

१यथेतमेत्याहवनीये समिदाधानं देवानाᳬ समिदसीति ॥ १४५ ॥

यथेतमिति तूष्णीमेवेत्येतदुक्तं भवति । तथा चामहीया जपप्रतिषेधः । आहवनीये समिदाधानं देवानाᳬ समिदसीत्यनेन मन्त्रेण ॥ १४५ ॥

पत्नी च गार्हपत्ये तूष्णीम् ॥ १४६ ॥

समिधमादधातीति वाक्यशेषः ॥ १४६ ॥

धेनुर्दक्षिणाश्वः षड्वा दश वा ॥ १४७ ॥

धेन्वादीनां विकल्पः ॥ १४७ ॥

कार्त्तिक्याᳬ साकमेधाद्व्यहम् ॥ १४८ ॥

---

१ यथागतमेत्य चात्कालोत्करावन्तरेण तूष्णीमेव एत्य गृहमागत्याहवनीये 'देवानाᳬ समित्' इति मन्त्रेण समिधमादधातीति सूत्रार्थः ।

कार्त्तिकीति कार्त्तिकपौर्णमास्युच्यते । स च चतुर्मासोपलक्षितः कालोभिधीयते । अथ यदेष एतैश्चतुर्थे मासि यजत इति । तथा च सूत्रकारान्तरम् । पञ्चम्यां पौर्णमास्यां साकमेधा इति । साकमेधा इति च कर्मणो नामधेयम् । तदवयवभेदापेक्षया बहुवचनम् । नाम च व्यवहारार्थम् । मासं साकमेधैरिति । द्व्यहमित्यवाच्यम् । उत्तरसूत्रादेव तत्प्राप्तेः । प्रातर्हुत्वा ऽहुत्वा वेति । वाच्यं वा । पूर्वेद्युः कर्त्तव्यस्यापि साकमेधसंज्ञा यथा स्यात् । इतरथा हि पौर्णमास्यामेव कर्त्तव्यस्य साकमेधसंज्ञा स्यात् । तन्माभूदिति द्व्यहग्रहणम् ॥ १४८ ॥

## पूर्वेद्युः पर्वाह्णेग्नये नीकवते पुरोडाशः ॥१४९॥

पूर्वस्मिन्नहनि चतुर्दश्यां अनीकवद्गुणविशिष्टायाग्नये पुरोडाशः । पुरोडाशग्रहणं च यजति प्रतिपत्त्यर्थम् । इतरथा ह्याहुतिरप्याशङ्क्येत ॥ १४९ ॥

## मरुद्भ्यः सान्तपनेभ्यो मध्यन्दिने चरुः ॥१५०॥

अल्पत्वाच्च कालस्य प्रधानमात्रं तत्र[1] ॥ १५० ॥

## समिष्टयजुरन्तं भवति ॥ १५१ ॥

सान्तपनीयं कर्म । कुत एतत् । सैव स्तीर्णावेदिर्भवति या मरुद्भ्यः सान्तपनेभ्य इति वचनात् । गृहमेधीये ॥ १५१ ॥

## बर्हिरनुप्रहरणवर्जं वा ॥ १५२ ॥

अथ वा बर्हिर्मात्रमेव न प्रह्रियते । येन प्रतिपत्त्युत्कर्षे पदार्थानामुत्कर्षो न न्याय्यः । तत्स्माद्बर्हिर्मात्रमेवोत्कृष्यते । एवमपि सति गृहमेध्यन्ते संस्थासंयुक्तपदार्थविधानात् । सान्तपनीयां संस्थाप्येति ब्राह्मणतर्पणं विधीयते । तेनैव च कर्मापवर्गः । एवं च सति बर्हिर्ब्राह्मणतर्पणप्रैषः ब्राह्मणतर्पणं कर्मापवर्गो च पदार्थ-

---

१ अत्र मध्यन्दिनशब्देन त्रिमुहूर्तात्मककालस्योक्तत्वात् सकलस्यानुष्ठानम् ।

चतुष्टयमेवोत्कृष्यते इति सम्प्रदायः। अपरे तु सैव स्तीर्णावेदिर्भवतीत्यनेन सर्वमेवोत्कर्षयन्ति। तथा सान्तपनीयां संस्थाप्येत्येतदनुरूपतरं भवतीति। अन्ये च पुनर्वचनसामर्थ्याद्बर्हिर्मात्रमेवोत्कर्षयन्ति सान्तपनीयासंस्था च बर्हिः प्रहरणेनैवाभिधीयत इति। स चायं पक्षः श्रेयस्करतर इवाभाति॥ १५२॥

## इध्मस्थाने शकलपरिधिनिधाय मरुद्भ्यो गृहमेधिभ्यः सायं चरुः पयसि॥ १५३॥

स्थानशब्दः कार्यवाची। कार्ये हि दृश्यते। शकलानां क्षालनम्। स्थाने निधायेति च प्रकृतिलिङ्गसंयोगात्प्राकृतमेव निधानम्। अस्ति हि प्रकृतावपरेण प्रणीतास्फ्यं निदधातीध्माबर्हिश्चेति प्रकृतिलिङ्गम्। एवं च स्थानमपि लभ्यते। तच्च निधानं पक्षे प्रेषितेन कर्त्तव्यम्। तत्र वज्रः प्रोक्षितोऽङ्गभावमुपयाति। तत्प्रोक्षणेन च ब्रह्मा प्रणीताद्यपकृष्यत इति। गृहमेधिगुणविशिष्टेभ्यो मरुद्भ्यः सायमपराह्णे चरुः कर्त्तव्यः। सायंशब्देन चापराह्णो लक्ष्यते। एवं हि श्रूयते। अथ मरुद्भ्यो गृहमेधिभ्योऽपराह्णे चरुरिति। स च पयसि श्रप्यते॥ १५३॥

## सान्नाय्यवत्॥ १५४॥

तच्च पयः सान्नाय्यधर्मवद्भवति। कुत एतत्। श्रुतेः। शाखया वत्सानपाकृत्य पवित्रवति सन्दोह्य तं चरुं श्रपयतीति। अपि च मेधो वै पयो मेधास्तण्डुला इति तण्डुलैस्समुच्चारणात्प्राधान्यमवगम्यते। तथा चरुं प्रकृत्य श्रूयते तस्य द्वय्यावृदिति। द्विप्रकारा क्रिया ओषधक्रिया सान्नाय्यक्रिया चेति॥ १५४॥
एवं प्राप्ते इदमाह—

## तूष्णीं वैकचोदनात्॥ १५५॥

वा शब्दः पक्षं व्यावर्त्तयति। अथ वा न सान्नाय्यधर्मवत्तत्पयो भवति। किं कारणम्। अप्रदेयत्वात्। कथमप्रदेयत्वम्। उपसर्जनभावात्। उपसर्जनत्वं च अधिकरणविभक्त्या निर्देशात्। पयसि श्रपयतीति॥ १५५॥

## एकचोदनात् ॥ १५६ ॥

एकाहीयं चोदना मरुद्भ्यो गृहमेधिभ्यश्चरुरिति । एका च चोदना नोभे विकर्तुमर्हतीति । अतश्चासान्नाय्ये सन्नाय्यधर्मा वाचनिकाः । शाखया वत्सानपाकृत्येत्येवमादयः । अत एव च मन्त्रोपि न प्रवर्त्तते । वत्सापाकरणमात्रस्य चोदितत्वात् । तथा च शाखान्तरे दर्शनम् । अयजुषा वत्सानपाकृत्येति । दर्शनं चैतन्न वचनम् । अप्रधानत्वात् । वत्सानपाकृत्येति बहुवचनोपदेशात् । केचिद्यावत्सन्दोहमिच्छन्ति । तथा च यदि बहु ओदनः स्यादित्युपपद्यते । गो बहुत्वे हि ओदनस्य बहुत्वं भवतीति । तत्पुनरयुक्तम् । बहुवचनोपदेशात्त्रय एवापाक्रियन्ते । ओदनबहुत्वं च तिसृणामपि गवां सम्भवत्येव । पयसो बहुत्वात् । तस्मात्त्रयाणामपाकरणम् । न च पयसोधिश्रयणमत्र । पवित्रवति सन्दोह्येत्येतावन्मात्र श्रवणात् ॥ १५६ ॥

## श्रपयित्वाभिघार्योद्वास्य शरावयोरुद्धरति पात्र्योर्वा ॥ १५७ ॥

श्रपणाभिघारणे अनूद्येते [१]पिशीलकविधानार्थम् । केचित्पिशीलकोपस्तरणनिषेधार्थमाहुः । तदनुपपन्नम् । न ह्यस्यान्वयप्राप्तस्य निषेधकं वचनमस्ति । शरावयोरुद्धरति पात्र्योर्वेति विकल्पः । अथ द्वे पिशीले वा पात्र्यौ वा निर्णेनिजतीति वचनात् निर्णेजनं श्रुतावनूद्यते । सूत्रकारेणान्वयप्राप्तत्वान्नोपनिबद्धम् । निर्णेजनं च सम्मार्ग उच्यते । प्रकृतौ हि दृष्टं सम्मार्गं प्रकृत्य पात्राणि निर्णेनिजतीति । तच्च गृहमेधिपिशिलीकस्यैव भवति न सौविष्टकृतस्य । शेषकार्यार्थत्वादप्रयोजकत्वं हि तस्य । एवं च सति पशावपि त्र्यङ्गानामभिघारणासादनालम्भा न भवन्ति ॥ १५७ ॥

## आसेचने मध्ये कृत्वा सर्पिरासिच्यत्याज्यार्थम् ॥ १५८ ॥

---

१ पिशीलिकः शराव उच्यते ।

ओदनस्य मध्ये सर्पिरासिञ्चत्याज्यकार्याय। आज्यकार्ये च आज्यभागाभिनिर्वृत्तिः ॥ १५८ ॥

यावदुक्तमतः ॥ १५९ ॥

अत ऊर्ध्वं यावदुक्तमधस्ताद्यावदुक्तमिति केचित्। तदयुक्तम्। प्रमाणाभावात्। तस्मादतः शब्दो हेत्वर्थे। अतो यावदुक्तम् येनान्वयप्राप्तावप्याज्यभागौ विधीयेते अत आज्यभागविधानेन यावदारादुपकारकं तत्सर्वमत्र न भवति ॥ १५९ ॥

स्तरणयजुषा वेदिमभिमृश्य तूष्णीं वा कृतत्वात्परिधिपरिधानम् ॥ १६० ॥

पुनः संस्कारशङ्कया स्तरणयजुषेत्युच्यते। अत इदमाह तूष्णीं वा कृतत्वादिति। कृतत्वात्संस्कारस्य तूष्णीमेवाभिमर्शनं कर्त्तव्यम्। ततः परिधिपरिधानं भवति। पूर्ववरं चान्वयोक्त्याहवनीयकल्पनमिति ॥ २६० ॥

शकलान्याधाय मत्योद्धृतावासादयति ॥ १६१ ॥

प्रतिग्रहणाच्च इध्मसंख्या न भवति। उद्धृताचोदनावासादयति। तत्र गृहमेध्योदने आज्यमोदनश्च द्वयमपि प्रयोजकम्। आसादनमन्त्रश्चातो विपरिणम्यते प्रियाभ्यां धामभ्यामिति। सौविष्टकृते त्वाज्यमेव प्रयोजकम्। ओदनस्य च ध्रुवस्थानत्वात्। घृताक्तस्योदनो नाग्नेति प्रयोगः। आलम्भश्चाज्ययोर्दक्षिणस्य चोदनस्य ॥ १६१ ॥

स्रुक्स्रुवं च सम्मार्ष्ट्यनुद्वास्य वा सम्मार्जनम् ॥ १६२ ॥

चोदनाव्यावृत्तेरनुद्वास्यैव सम्मार्जनम् ॥ १६२ ॥

आज्यभागाभ्यां चरत्याग्नेयं दक्षिणात् सौम्यमुत्तरात् ॥ १६३ ॥

गृहमेधिस्विष्टकृतौ चाज्यभागवत्समावदानौ ॥१६४॥

आज्यभागवदिति दक्षिणादेकः अपर उत्तरात् । समावदानाविति उभयोर्द्धवदानं नैकप्रत्यवायं स्विष्टकृत इति ॥ १६४ ॥

अप्रत्यभिघारणं च ॥ १६५ ॥

प्रत्यभिघारणं च क्षताभ्यङ्गो न भवति । सौविष्टकृते तु द्विरभिघारणमिति सम्प्रदायः । यथोक्तमुपरिष्टादाज्यस्याभिघारयतीति सोऽनुवादो यथाप्राप्तस्य ॥ १६५ ॥

अनुद्धृत्य वा सहितमाज्यमधिश्रयति ॥ १६६ ॥

वाशब्दो विकल्पार्थः । अनुद्धृत्य पिशीलकयोः स्थालीपक्षोयमुच्यते । सहितमाज्यमधिश्रयतीति आहवनीयश्चाप्यर्थमुच्यते । तदेव प्रतिवेशमाज्यमधिश्रयतीति वचनात् । अत्र च स्थालीध्रुवार्थे वर्त्तते । तेनाज्यनिर्वापकाले तत्सम्मार्गः क्रियते ॥ १६६ ॥

उद्वास्योभयमासादयति ॥ १६७ ॥

स्थालीमोदनं च तस्मिन्नेवावसर इति ॥ १६७ ॥

न प्राशित्रमिडान्तं भवति ॥ १६८ ॥

अथेडामेवावद्यति न प्राशित्रमिति वचनात् ॥ १६८ ॥

पूर्वे मार्जनमुपहूय ॥ १६९ ॥

पूर्वे पक्षे उपहूय मार्जनं ततो भक्षणम् ॥ १६९ ॥

प्राश्नन्ति युक्ताः ॥ १७० ॥

युक्तग्रहणं यजमानव्युदासार्थम् ॥ १७० ॥

यजमानगृह्या हविरुच्छिष्टाशा ऋत्विजो ब्राह्मणाश्चान्ये बहुश्चेत् ॥ १७१ ॥

बहुश्चेद्दोहनो हविरुच्छिष्टाशा उपनीताः ॥ १७१ ॥

अरिक्ता१ स्थालीं निदधाति ॥ १७२ ॥

अथैतामनिरशितां कुम्भीमपिधाय निदधातीति वचनात् । अपिधानं च सामर्थ्यप्राप्तत्वान्नोपनिबद्धम् ॥ १७२ ॥

सान्तपनीया१ स१स्थाप्य ॥ १७३ ॥

संस्था च सम्प्रदाये पदार्थचतुष्टयेन । केषांचिद् बर्हिर्होममात्रेणैवेति । बर्हिश्च सान्तपनीयासक्तं तत्प्रतिपत्त्या च समाप्तिर्भवत्येवेति ॥ १७३ ॥

प्रातर्वा शेषभावात् ॥ १७४ ॥

प्रातरेव वा परिसमाप्तिः कर्त्तव्या न इदानीम् । कुत एतत् । शेषभावात् । गृहमेधीयाशेषो हि विद्यते दर्विहोमः । तस्मात्प्रातः परिसम्मा(प्ति)ः ॥ १७४ ॥

मातृभिर्वत्सान्स१सृज्य [1]निवान्या वत्सं बध्नाति ॥ १७५ ॥

तस्यां रात्रौ ॥ १७५ ॥

यावाग्वाग्निहोत्रहोमः ॥ १७६ ॥

प्रातर्हुत्वा ऽहुत्वा वा स्थाल्या दर्व्यादत्ते पूर्णादर्वीति ॥ १७७ ॥

अग्निहोत्रं च हुत्वा अहुत्वा वा दर्विहोमः कर्त्तव्य । तत्र गृहमेध्याज्यभागपूर्वस्य विद्यमानत्वात् । आज्यभागयोरननुष्ठानम्॥ १७७ ॥

---

१ स्वयं नष्टवत्सा परकीयेण वत्सेन या गौर्दुह्यते सा निवान्येत्युच्यते ।

ऋषभमाह्वयितवै ब्रूयात् ॥ १७८ ॥

ऋषभो यथा रौति तथाह्वानं कुरुतेत्येतदुक्तं भवति ॥ १७८ ॥

रुते जुहोति ॥ १७९ ॥

ऋषभस्य ॥ १७९ ॥

अव्याहरति ब्रह्मा जुहुधीत्याह ॥ १८० ॥

ऋषभे ॥ १८० ॥

देहि म इति जुहोत्यृषभो दक्षिणा ॥ १८१ ॥

गृहमेधिशेषत्वेपि वार्चानिकी दक्षिणा । ज्योतिष्टोमोदवसानीयावत् । यस्य रुते जुहोति तमेव ऋषभं पूर्णदर्वाय दक्षिणां ददातीति वचनात् ॥ १८१ ॥

मरुद्भ्यः क्रीडिभ्यः सप्तकपालः ॥ १८२ ॥

अदित्यै चरुरन्यत्रापि ॥ १८३ ॥

यत्रादितिर्देवता श्रूयते तत्र चरुर्भवति । यथा राजसूये अदित्यै महिष्या इति । यद्येवं अदित्यै चरुस्तृतीयेति चरुग्रहणं न कर्त्तव्यम् । अतोन्यथा व्याख्यायते । यत्रादित्य इति चरुः श्रूयते तत्र न ज्ञायते किमदितिर्देवता उतादित्य इति । तत्रादितेर्देवतात्वमुच्यते । यथा सौत्रामाण्यादित्यश्चरुरन्ते चेति । एवं चेत् अदित्यै महिष्या इति चरुर्न लभ्यते वाक्योपलक्षणार्थतया । अथ श्वोभूते महिष्यै गृहान्परेत्यादित्यं चरुं निर्वपतीति । अयमेवावाक्प्राण आदित्येष्टिरिति पृथगङ्गसंस्तुत्यादित्येष्टिरिति च व्यपदेशात्पृथक् ॥ १८३ ॥

तन्त्रत्वे प्राप्त आह—

समानबर्हिषी वा कालकर्मैकत्वात् ॥ १८४ ॥

समानतन्त्रे भवतः । कुतः । कालकर्मैकत्वात् । नात्र कालो

भेदको न च कर्मभेद इति । अतः समानतन्त्रे भवति इति ॥ १८४ ॥

१महाहविरुदवसाय निमथ्यं ॥ १८५ ॥

कर्त्तव्यमिति वाक्यशेषः । उदवसायेव ह्येतेन यजत इति वचनात् । एतेनेति पर्वणा पर्वव्युपदेशश्च महाहविषयः ॥ १८५ ॥

पूर्वेद्युर्वा ॥ १८६ ॥

न चैतदेवम् । पूर्वेद्युरेवोदवसानमथने कर्त्तव्ये । किं कारणम् । अनीकवत्यादि हि त्रैयम्बकान्तं साकमेधाख्यमेकं पर्वेति । तथोच्यते उदवसायेव ह्येतेन यजत इति । तस्मात्पूर्वेद्युरेव२ ॥ १८६ ॥

३नित्येभ्योधिकान्यैन्द्राग्नो माहेन्द्रश्चरुर्वैश्वकर्मण एककपालः ॥ १८७ ॥

नित्येभ्यः पञ्चभ्योधिकान्यैन्द्राग्नादीनि भवन्ति ॥ १८७ ॥

उत्तरवेद्यग्निप्रणयनमन्थनपृषदाज्यं च वरुणप्रघासवत् ॥ १८८ ॥

उत्तरवेद्यग्निप्रणयनपृषदाज्यानि वरुणप्रघासवदिति युक्तम् । मन्थनं तु तत्रापि वैश्वदेविकं नोदकेनेहापि । तत्किमिति वरुणप्रघासवदित्युच्यते । उभयत्राधिकहविः सम्बन्धविधानार्थतयेत्यदोषः । अन्तरायेपि ह्यधिकानां मन्थनं यथा स्यादिति ॥ १८८ ॥

---

१ अथ महाहविराह—

२ अस्मिन्पक्षे केचिदेवमाहुः— समारोह्योदवसाय गार्हपत्यं निमथ्यं साकमेधार्थमेव साधरणावग्नी विहृत्यानीकवतीयादतिप्रणयनम् । ततश्च पित्र्यादिषु पूर्वो मध्याहवनीय एवोपस्थानादौ तस्य साधारणत्वात् । अयमपि पक्षो युक्ततर इव दृश्यते । अन्ते ऽग्न्योः समारोपविधानात् । ' अग्नी समारोह्य ' इति ।

३ अथ महाहविषि हवींष्याह—

ऋषभो दक्षिणा ॥ १८९ ॥

पितृयज्ञ उपांशु चरणम् ॥ १९० ॥

पितृयज्ञ इति कर्मणां नामधेयम् । पितृसम्बद्धो यज्ञः । पितरो वै त आसंस्तस्मात्पितृयज्ञो नामेति । तत्रोपांशु चरणशब्दात्सर्वमुपांशुभवति न देवतामात्रम् ॥ १९० ॥

पुरस्तादुपचारः ॥ १९१ ॥

अन्वयादुत्तरोपचारत्वे प्राप्ते यदनियतस्थानं तस्य पुरस्तादुपचारः । अनेन च दिग्विपर्ययो ज्ञायते । पित्र्यत्वात् दक्षिणामुखं कर्मणि प्राची उत्तरावदिति पुरस्तादुपचार इत्युक्तम् ॥ १९१ ॥

ब्रह्मयजमानयोश्च ॥ १९२ ॥

इदमन्वयप्राप्तमेवोच्यते । ब्रह्मयजमानायोश्च पुरस्तादुपचारः ॥ १९२ ॥

पूर्ववद्वा ॥ १९३ ॥

वाशब्दो विकल्पार्थः । पूर्ववच्छब्देन च दिग्विपर्यवशादपरादिक् गृह्यते । न दक्षिणा । तथाचोपरिष्टाद्वक्ष्यति पश्चात्परीतो ब्रह्मयजमानौ पुरस्तादग्नीदिति इत्याद्यजमानश्च ब्रह्मा च पश्चात्परीतः पुरस्तादग्नीदिति श्रुतेः । तथा हविर्भिश्चरिष्यन्तः प्रतिविपर्यन्तीति । तथा एतैर्हविर्भिः प्रचरिष्यन्त इत्याद्यजमानश्च ब्रह्मा च पुरस्तात्परीतः पश्चादग्नीदिति । अतः पूर्ववच्छब्देनापरादिक्परिगृह्यते ॥ १९३ ॥

अपत्नीकः ॥ १९४ ॥

पत्नीकर्तृकपदार्थनिवृत्तिरित्येके । यत्पत्न्या कर्त्तव्यं तदत्र न भवति आज्यावेक्षणादि । पत्नीप्रतिषेधात्प्रतिनिधिः करोतीत्यपरे । पदार्थः प्रधानभूतः कर्त्ता गुणभूतः । पदार्थप्राधान्याच्च कर्त्रन्तरमाक्षिप्यते । तस्मात्प्रतिनिधिना कर्त्तव्यम् । तत्पुनर्विचारयित-

ष्यम । प्रतिनिधिरभावे प्रवर्त्तते । यत्र पुनः शास्त्रतः पर्युदासस्तत्र कथं प्रतिनिधिरभावे प्रवर्त्तते । यं प्रतिनिधीयते स एव पर्युदस्त इति ॥ १९४ ॥

दक्षिणाग्निराहवनीयवत् ॥ १९५ ॥

वत्युपदेशात्स्वकार्यापरित्यागेन दक्षिणाग्निराहवनीयकार्ये विधीयते ॥ १९५ ॥

पूर्वेणाहवनीयं प्रणीताः परिहरत्यर्थवच्च ॥ १९६ ॥

न्यायसूत्रे एव गार्हपत्याहवनीययोरन्तरा गमनप्रतिषेधात् ॥ १९६ ॥

पितृभ्य सोमवद्भ्यः षट्कपालः ॥ १९७ ॥

सोमवद्गुणविशिष्टेभ्यः पितृभ्यः षट्कपालो भवति ॥ १९७

सोमाय वा पितृमते ॥ १९८ ॥

विकल्पेन श्रवणात् ॥ १९८ ॥

पितृभ्यो बर्हिषद्भ्यो धानाः ॥ १९९ ॥

भवन्ति ॥ १९९ ॥

पितृभ्योऽग्निष्वात्तेभ्यो मन्थः ॥ २०० ॥

भवतीति वाक्यशेषः ॥ २०० ॥

चतुर्वा ग्रहणम् ॥ २०१ ॥

पितृत्र्यत्वात्सकृद्ग्रहणे प्राप्ते अन्वयाच्चतुर्ग्रहणम ॥ २०१ ॥

गार्हपत्यस्य पुरस्तादवहननपेषणे ॥ २०२ ॥

उत्तरेणान्वाहार्यपचनं दक्षिणातिष्ठन्नवहन्तीति वचनात् ॥२०२॥

दक्षिणार्द्धे कपालोपधानम् ॥ २०३ ॥

दक्षिणार्द्धे गार्हपत्यस्य षट्कपालान्युपदधातीति वचनात् ॥ २०३ ॥

धानाभर्जनम् दक्षिणाग्नौ ॥ २०४ ॥

अन्वाहार्यपचने धानाः कुर्वन्तीति वचनात् ॥ २०४ ॥

श्रपणपेषणविपर्यासेऽपि धर्माः ॥ २०५ ॥

धानानां श्रपणपेषणयोर्विपर्यासः । तस्मिंश्च सति तद्धर्मा न भवन्तीत्याशङ्कानिवृत्त्यर्थं सूत्रम ॥ २०५ ॥

अभिमृश्यार्धाः पिष्ट्वा निवान्या दुग्धे सकृन्मथित एकशलाकया [1]मन्थः ॥ २०६ ॥

अभिमर्शनं श्रृताश्रृतसंवित्त्यर्थं प्रकृतावुक्तम । तमभिमृशति श्रृतं वेदानीति च । धानाभिमर्शनं न शक्यते कर्तुमित्यतोऽभिमर्शनं पुरोडाशविषयं द्रष्टव्यम । अभिमृश्य पुरोडाशमर्धाः धानाः पिष्ट्वा निवान्या दुग्धे सकृदुपमथित एकशलाकया मन्थो भवति ॥ २०६ ॥

अग्रहणं मन्थस्य ततोर्द्धाः पिंषन्तीति श्रुतेः ॥ २०७ ॥

अथपितृभ्यो बर्हिषद्भ्योन्वाहार्यपचने धानाः कुर्वन्ति ततोर्धाः पिंषन्तीति श्रुतत्वात्त ॥ २०७ ॥

ग्रहणं वा चोदितत्वात् ॥ २०८ ॥

वा शब्दः पक्षव्यावृत्तौ । ग्रहणं वा मन्थस्य भवति । चोद्यते हि अथ पितृभ्योऽग्निष्वात्तेभ्यो निवान्यायै दुग्धे सकृदुप-

---

१ मन्थ अङ्वालिताः सक्तव उच्यन्ते ।

मथित एकशलाकया मन्थो भवतीति। चोदितत्वात् अवहननश्रपणयोः सहसंयोगात् ॥ २०८ ॥

दक्षिणेन दक्षिणाग्निं परिवृतमुदग्द्वारं तन्मध्ये वेदिं करोत्यवान्तरादिक्-सूक्तिमाप्त्यान्ते ॥ २०९ ॥

दक्षिणाग्नेर्दक्षिणत उदग्द्वारं परिवृतमध्ये वेदिं करोति अवान्तरदिवक्स्रक्तिम। दिक्स्रक्तिर्हि चतुरस्रं पित्र्ये कर्मणि स्मर्यते। अत उच्यते अवान्तरदिक् स्रक्तिमिति ॥ २०९ ॥

दक्षिणाग्निं मध्येस्याः करोति ॥ २१० ॥

ततोन्वाहार्याधिश्रपणम्। मध्यशब्दो गर्भवाची ॥ २१० ॥

प्रणीतानुहरणं ब्रह्मयजमानौ चानुगच्छतः ॥ २११ ॥

न्यायसूत्रमेतत्। अतोन्यत्राप्यग्निप्रणयने प्रणीतानुहरणादि भवत्येव। वैकृतावसरे प्राकृतानुवृत्त्यर्थमिदमुच्यते ॥ २११ ॥

स्फ्यादानादि करोति ॥ २१२ ॥

यज्ञोपवीत्याज्यग्रहणे ॥ २१३ ॥

पित्र्यत्वात्प्राचीनावीतिप्राप्ताविदमुच्यते ॥ २१३ ॥

द्विर्वोपभृति ॥ २१४ ॥

ग्रहीतव्यम। द्विरुपभृति गृह्णीयादिति विधाय प्रतिप्रसव उच्यते। तद्दृष्टावेव कृत्व उपभृति गृह्णीयादिति। अतो विकल्पः॥२१४॥

प्राग्ग्रन्थि बर्हिः ॥ २१५ ॥

कर्त्तव्यमिति वाक्यशेषः ॥ २१५ ॥

विस्त्रꣳस्य यूनं चाग्रे गृहीत्वा त्रिस्तृणन्नग्निं पर्येति ॥ २१६ ॥

बर्हिर्विस्त्रꣳस्य यूनं चोभयमग्रे गृहीत्वा वेदिं स्तृणन् त्रिः पर्येति । तथा च स्तरणं कर्त्तव्यम् यथोत्तरतोपवर्गो भवति ॥ २१६ ॥

प्रस्तरमात्रꣳ शिष्ट्वा तावत्प्रतिपर्येति ॥ २१७ ॥

प्रस्तरमात्रं परिशिष्य त्रिरेव पर्येति ॥ २१७ ॥

तꣳ स्तृणात्यविधृतिम् ॥ २१८ ॥

समिति प्रस्तरनिर्देशः ॥ २१८ ॥

प्राक्सꣳस्थꣳ हविरासादनम् ॥ २१९ ॥

अवरोक्तमिति प्राप्तौ दिग्विपर्ययप्रसक्तये प्राक्सꣳस्थतोच्यते ॥ २१९ ॥

सामिधेनी प्रैषाद्याज्यभागाभ्यां यज्ञोपवीतिनः सर्वे ॥ २२० ॥

भवन्तीति वाक्यशेषः ॥ २२० ॥

पश्चात्परीतो ब्रह्मयजमानौ पुरस्तादग्नीत् ॥२२१॥

यदि पुरस्तादुपविष्टौ नोचेत् स्थितावेवेति ॥ २२१ ॥

आश्राव्य सीद होतरित्येव ब्रूयात् ॥ २२२ ॥

एवकारकरणान्न होतृवरणम् । पितृयज्ञे न होतारं वृणीते नार्षेयमिति वचनात् ॥ २२२ ॥

अपबर्हिषः प्रयाजा अनुयाजाश्च ॥ १२३ ॥

प्रजा वै बर्हिर्नेत्प्रजाः पितृषु दधातीति निषेधात् ॥ २२३ ॥

असमानयनं वा बर्हिः संयोगात् ॥ २२४ ॥

समानयनं चात्र न भवति । बर्हिः संयोगात् । चतुर्थे प्रयाजे समानयति बर्हिषीति । वा समानयनं भवति । चतुर्थसंयोगात् । चतुर्थे प्रयाजे समानयतीति । बर्हिषीत्यनुवाद एव । बर्हिः प्रयाजस्य चतुर्थत्वात् । तथान्यत्रापि चतुर्थे चतुर्थे समानयतीत्युक्तम् ॥ २२४ ॥

प्रत्यगतीत्य जुहोति ॥ २२५ ॥

एवमेव हि प्रयाजेषु श्रूयते । प्रसूतोध्वर्युः स्रुचावादाय प्रत्यङ्ङतिक्रामत्यतिक्रम्याश्राव्याह समिधो यजेति । सोपबर्हिषश्चतुरः प्रयाजान्यजति । तथानुयाजेष्वपि स्रुचावादाय प्रत्यङ्ङतिक्रामत्यतिक्रम्याश्राव्याह देवान्यजेति सोपबर्हिषौ द्वावनुयाजौ जयति । एवं चोभयत्र चोदकानुग्रह एव भवति । प्रकृतौ हि दक्षिणां दिशं गत्वा होमः कृतः इहापि दिग्विपर्ययेण प्रतीच्येव दक्षिणेति । प्रधाने तु चोदकप्राप्तस्य प्रत्यग्गमनस्य प्रत्यक्षः प्रतिषेधः । प्रत्यनक्त्यवदानानि नातिक्रामतीति ॥ २२५ ॥

हविर्भिश्चरिष्यन्तः प्रतिविपर्यन्ति ॥ २२६ ॥

प्रतिशब्दप्रयोगाद्यादि सामिधेनिप्रैषादादौ विपर्ययकृतः । अथ पश्चादुपविष्टौ ततो व्यवस्थितावेति ॥ २२६ ॥

सर्वेभ्योवद्यति यथा पूर्वं; सोमवद्भ्यो मध्यात्सकृत्सकृत्सहावदधाति ॥ २२७ ॥

एवं हि श्रूयते । स उपस्तृणीत आज्यमथास्य पुरोडाशस्यावद्यति स तेनैव सह धानानां तेन सह मन्थस्य तत्सकृदवदधातीति ॥ २२७ ॥

द्विरभिघारणमनतिक्रमणं च ॥ २२८ ॥

वाचनिकम् ॥ २२८ ॥

सोमवद्भ्य एवायं प्रकारो माभूदित्यत आह—

सोमाय वा पितृमत इति ॥ २२९ ॥

एवं बर्हिषद्भ्य उत्तरतो धानामन्थपुरोडाशानाम् ॥ २३० ॥

एवं शब्देन सर्वमतिदिश्यते ॥ २३० ॥

अग्निष्वात्तेभ्यो दक्षिणतो मन्थपुरोडाशधानानाम् ॥ २३१ ॥

अत्रैवं शब्दोनुवर्त्तते ॥ २३१ ॥

पुरस्तादग्नये कव्यवाहनाय यथापूर्वं स स्विष्टकृत् ॥ २३२ ॥

कव्यवाहनगुणविधानेन गुणान्तरस्य निवृत्तिर्मा भूदिति स स्विष्टकृदित्युच्यते । अस्तु तथेति चेत् । नादृष्टार्थत्वात् । हविषामवदानप्रदेशविधानं शाखान्तरात् । अत्र सोमवद्यागे यद्धानामन्थयोरवदानग्रहणं तद्गुणमात्रं न हि तयोस्तत्र देवता सम्बन्धः । अवदानमात्रश्रवणात् । उत्पत्तौ हि षट्कपालावरुद्धः सोमवद्यागउत्पन्नः । तेन धानानां मन्थस्य च न समुच्चयः शक्यते वक्तुम् । न हि विकल्पो न वैपरीत्येन बाध्यबाधकभावः । एवमेव गुणभावेन श्रवणमिति । प्रयोजनं तद्ग्रहणे यागस्यानावृत्तिरिति । एवं बर्हिषद्यागे अग्निष्वात्तयागे च ॥ २३२ ॥

ओं स्वधेत्यस्तु स्वधेति वा श्रुतप्रत्याश्रुते स्वधा नम इति वषट्कारः ॥ २३३ ॥

एतच्च प्रधानेषु कव्यवाहने च विकल्पेन श्रूयते । एतैर्हविभिः प्रचरिष्यते इति प्रक्रम्य तदुताश्रावयन्त्योंस्वधेत्यस्तु स्वधेति प्रत्याश्रवणां स्वधा नम इति वषट्कार इत्याह । तस्मात्सर्वमेतत् ॥ २३३ ॥

मन्थमुपहूय होताध्वर्युर्ब्रह्माग्नीदिवघ्रायं निदधाति ॥ २३४ ॥

एवमेव हि श्रूयते । तदेते प्रयच्छन्तीति नोपनिबद्धं सामर्थ्यपरिप्राप्तत्वात् ॥ २३४ ॥

प्राशित्रमवदायेडां वा सर्वे प्राश्नन्ति वा ॥२३५॥

प्राशित्रेडादि मन्थोपहवेन सह विकल्प्यते । इडां च सर्वे प्राश्नन्ति वा । अवजिघ्रन्ति वा। एवमेव हि श्रूयते । यथात्वेवेतरस्य यज्ञस्येडाप्राशित्रं समवद्यन्त्येवमेवैतस्यापि समवद्येयुस्तामुपह्वयावैवजिघ्रन्ति न प्राश्नन्ति इति प्रतिषिध्य प्रति प्रसवः प्राशितव्यं त्वेव वयं मन्यामह इति ॥ २३५ ॥

वेदिं त्रिः परिषिञ्चत्युदपात्रेणाध्वर्युर्यजमानो वा ॥ २३६ ॥

वेति विकल्पः ॥ २३६ ॥

स्रक्तिषु पित्रवनेजनं परिषिच्य परिषिच्य पूर्ववदुत्तरापरस्यां प्रथमम् ॥ २३७ ॥

स्रक्तिषु कोणेषु पितृसम्बद्धमवनेजनम । पूर्ववदित्यसाववनेनिक्ष्वेति उत्तरापरस्यां स्रक्त्यां प्रथमम । तच्च परिषिच्य परिषिच्य क्रियते ॥ २३७ ॥

सव्ये समवदाय सर्वेभ्यो यथावनिक्तं पिण्डान्ददात्यसावेतत्त इति ॥ २३८ ॥

सव्ये पाणौ कृत्वा सर्वेभ्यो हविर्भ्यः समवदाय येषु प्रदेशेष्ववनेजनं कृतं तत्र पिण्डान्ददात्यसावेतत्त इत्यनेन मन्त्रेण ॥ २३८ ॥

उत्तरपूर्वस्यां पाणी निमृष्टे ऽत्र पितर इति ॥२३९॥

उत्तरपूर्वस्यां स्रक्त्यां पाणिनिमार्जनं करोत्यत्र पितर इत्यनेन मन्त्रेण ॥ २३९ ॥

यज्ञोपवीतिनः सर्वे निष्क्रम्योदञ्चोक्षन्नमीमद-
न्तेत्याहवनीयमुपतिष्ठन्ते द्वाभ्याम् ॥ २४० ॥

ते सर्व एव यज्ञोपवीतिनो भूत्वेति श्रुतत्वात् । उदग्द्वारत्वात् परिवृतस्य उदञ्च इत्यवाच्यम् । प्राप्तत्वादेव पृष्ठतोनवलोकनार्थमुच्यते । अथ वानुपस्थानसम्बन्धः । उदञ्च उपतिष्ठन्त इति । द्वाभ्यामिति न वक्तव्यं परादिना पूर्वान्तप्राप्तेः । वक्तव्यं वा प्रकरणाभावात् । प्रकरणस्थानां हि स न्यायः ॥ २४० ॥

मनोन्वाह्वामह इति गार्हपत्यं तिसृभिः ॥२४१॥

उपतिष्ठन्त इत्यनुवर्त्तते ॥ २४१ ॥

प्राचीनावीती प्रविश्यामीमदन्तेति
दाता जपति ॥ २४२ ॥

अथ यतरो ददाति स पुनः प्राचीनावीती भूत्वाभिप्रपद्य जपतीति श्रुतत्वात् । दातुः प्राचीनावीतिग्रहणे न सर्वे प्राचीनावीतिनो भवन्ति । येनोपरिष्टाद्यज्ञोपवीति विधानम् । ते सर्व एव यज्ञोपवीतिनो भूत्वानुयाजाभ्यां प्रचरिष्यन्त इति ॥ २४२ ॥

अवनेज्य पूर्ववत्प्रदक्षिणम् ॥ २४३ ॥

परिषेकः प्रदक्षिणम् ॥ २४३ ॥

नीवीं विस्रस्य नमो व इत्यञ्जलिं करोति
षड्वा नमस्कारान् ॥ २४४ ॥

प्रत्यञ्जलिकरणं षट्कृत्वो नमस्करोतीति वचनात् ॥ २४४ ॥

गृहान्नः पितरो दत्तेति च ॥ २४५ ॥

जपति ॥ २४५ ॥

ब्रह्मामन्त्रणादि प्राक्स्रुग्व्यूहनात्प्रया-
जवत् ॥ २४६ ॥

ब्रह्मन्प्रस्थास्यामीति ब्रह्मामन्त्रणम् । तस्य यदादौ तदादि । उल्मुकसमासादित्यर्थः । उल्मुकसमासस्य ह्यनुयाजाङ्गत्वात् । प्रयाजवदिति च यज्ञोपवीतं देशगमनं च ब्रह्मयजमानयोर्वतिनातिदिश्यते प्राक्स्रुग्व्यूहनात् ॥ २४६ ॥

यज्ञोपवीतिविपर्ययम् ॥ २४७ ॥

स्रुग्व्यूहनादारभ्य पित्र्यत्वात्कर्मणः प्राचीनावीतित्वमेव भवति । न देशविपर्ययोऽविहितत्वात् ॥ २४७ ॥

न प्रस्तरमादत्ते ॥ २४८ ॥

नाध्वर्युः प्रस्तरꣳ समुल्लुम्पतीति ॥ २४८ ॥

अनुप्रहरेत्युक्ते न किञ्चनानुप्रहरति ॥ २४९ ॥

अथाग्नीदाहानुप्रहरेति स न किञ्चनानुप्रहरतीति वचनात् ॥ २४९ ॥

तूष्णीमात्मानꣳ सꣳस्पृशति ॥ २५० ॥

उपस्पृश्य परिधीन्नानुप्रहरति ॥ २५१ ॥

उपस्पर्शनं च केचिन्मन्त्रेण कुर्वन्ति तत्पुनर्न, वचनाभावात् । अपूर्वत्वाच्च ॥ २५१ ॥

शंय्वन्तं भवति ॥ २५२ ॥

पितृयज्ञकर्म शंय्वन्तं भवतीति वचनात् ॥ २५२ ॥

बर्हिः परिध्यग्नौ प्रास्यति ॥ २५३ ॥

अथैतद्बर्हिरनुसमस्यति परिधींश्चेति श्रवणात् ॥ २५३ ॥

हविरुच्छिष्टं च ॥ २५४ ॥

अनुसमस्यति ॥ २५४ ॥

अप्सु प्राश्यं वा ॥ २५५ ॥

अप्सु प्राश्यं वेति विकल्पः । अस्य चागन्तुत्वादन्ते निवेशः ॥ २५५ ॥

त्रैयम्बकान्निर्वपतिरौद्रानेककपालान् यावन्तो यजमानगृह्या एकाधिकान् ॥ २५६ ॥

त्रैयम्बकानिति नामधेयम । तस्मात्त्रैयम्बकानामेति । रुद्रदेवत्यान् एककपालान् यावन्तो यजमानगृह्या एकाधिकान् । गृह्यशब्दोत्र प्रजाविषयः । करम्भपात्रवत्तुल्यश्रुतित्वात् । एकेनातिरिक्ता भवन्त्येकाधिकान् ॥ २५६ ॥

चतुरो वा ॥ २५७ ॥

चतुःसंख्या वा द्विप्रजैकप्रजानाम् ॥ २५७ ॥

उदङ्मुखः सर्वम् ॥ २५८ ॥

उदङ्ङासीन एतान् गृह्णातीत्युक्त्वा अवोचत् स तत एवोपोत्थायोदङ्तिष्ठन्नवहन्त्युदीच्यौ दृषदुपले उपदधात्युत्तरार्द्धे गार्हपत्यस्य कपालान्युपदधातीति ॥ २५८ ॥

देशांश्च ॥ २५९ ॥

आखूत्करचतुष्पथस्थाणुवृक्षवल्मीकादीन् उदङ्प्रतिपद्यते ॥२५९॥

जुहोतयो वषट्कारान् ॥ २६० ॥

जुहोतय इति कुतः । मन्त्रे स्वाहाकाराम्नानात् । अन्वाहार्यपचनादुल्मुकमादायोदङ्परेत्य जुहोतीति च श्रवणात् । तथा पलाशस्य पलाशेन मध्यमेन जुहोतीति श्रवणात् । चतुष्पथे जुहोतीति च । अतो जुहोतय इत्युक्तम् । यद्येवमवषट्कारानिति किमुच्यते । यत्त्र्यम्बकैरयजन्तेति च यजत्याशङ्कानिवृत्त्यर्थम् । जुहोति शब्दश्च वषट्काराधिकेऽपि दृश्यते । उभयतो यूपं प्रत्यङ्मुखो जुहुत इति । होममन्त्रश्च । अस्तुतथेति चेत् । न, तत्राहत्य विधानात् । तौ वै वषट्कृतौ सन्तौ मन्त्रेण हूयेते इति । तस्मादवषट्कारानित्युच्यते ॥ २६० ॥

अक्तान्वा ॥ २६१ ॥

ते वा अक्ताः स्युरित्युक्त्वा त उ वा अनक्ता एव स्युरिति विकल्पः ॥ २६१ ॥

पात्र्यां कृत्वा दक्षिणाग्न्युल्मुकमादाय चतुष्पथे पलाशपत्रमध्यमेन होमः ॥ २६२ ॥

तांन्सार्द्धं पात्र्यां समुद्वास्येति वचनात् । एकपात्र्यां दक्षिणाग्न्युल्मुकम् । आदानस्य दृष्टार्थत्वात् । तत्रैव होमो भवति । यद्येवं चतुष्पथे जुहोतीति कथम् । तत्रैवोल्मुकं स्थापयित्वा हूयमाने चतुष्पथे हुतमेव भवति । द्व्यधिकरणा हि क्रियेयं श्रूयत इति । पलाशपत्राणां यन्मध्यमं तत्पलाशपत्रमध्यमम् । यद्वा पलाशपत्रं च तन्मध्यमं चेति पलाशपत्रमध्यमं तेन होमः ॥ २६२ ॥

सर्वेषामवदानं सकृत्सकृदतिरिक्तवर्जम् ॥२६३॥

एककपालानां वाचनिकं सकृदवदानम् । स सर्वेषामेवा वद्यत्येकस्यैव नावद्यति य एषोतिरिक्तो भवतीत्यतिरिक्तवर्जमित्युक्तम् ॥ २६३ ॥

अक्तेषु मिश्रणम् ॥ २६४ ॥

भवतीति सूत्रशेषः ॥ २६४ ॥

एष त इति जुहोति ॥ २६५ ॥

अतिरिक्तमाखूत्कर उपकिरत्येष त इति ॥२६६॥

उपकिरणं च तिरः करणम् । तिर इव वै गर्भास्तिर इवैतद्यदुपकीर्ण इति।आखूत्करस्य केचिदाहवनीयधर्मान् कुर्वन्ति। तथायुक्तं होमाश्रवणात् । उपकिरणं ह्यत्र विहितमिति ॥ २६६ ॥

आगम्याव रुद्र मदीमहीति जपन्ति ॥ २६७ ॥

अग्निं त्रिः परियन्ति पितृवत्सव्योरूनाघ्नाना-स्त्र्यम्बकमिति ॥ २६८ ॥

बहुवचनोपदेशात्सर्वेषां परिगमनम् । पितृवदिति वचनादपसव्यम् ॥ २६८ ॥

देववच्चेति प्रदक्षिणम् ॥ २६९ ॥

एतेनैव दक्षिणानाघ्नानाः ॥ २७० ॥

एतेनैव मन्त्रेण दक्षिणानाघ्नानाः परियन्ति ॥ २७० ॥

कुमार्यश्चोत्तरेणोभयत्र पतिकामा भगकामा वा ॥ २७१ ॥

उत्तरेण मन्त्रेणोभयत्र देववत्पितृवच्च पतिं कामयमानाः । सौभाग्यं वेति ॥ २७१ ॥

रौद्रान्यजमानोऽञ्जलिं नोदस्यत्यगोः प्रापणम् ॥ २७२ ॥

रौद्राः पुरोडाशा,ः तान्रौद्रान् पुरोडाशान् यजमानोऽञ्जलिनोत्क्षिपति । अगोः प्रापणम् । यथा गौर्नोदाप्नुयादिति ॥ २७२ ॥

पततः प्रतिगृह्णत्यैनानशक्य उपस्पर्शनम् ॥ २७३ ॥

अशक्ये ग्रहणे पतितानामुपस्पर्शनम् ॥ २७३ ॥

मूतयोः कृत्वा वेणुयष्ट्यां कुपे वा सञ्योभयतः स्थाणुवृक्षवंशवल्मीकानामन्यतमस्मिन्नुत्क्षेपणवदासजत्येतत्त इति ॥ २७४ ॥

१मूतयोः कृत्वा वेणुयष्ट्यां वा २कुपे वासञ्योभयतः स्थाण्वादीनामन्यतमस्मिन्नुत्क्षेपणवदगोः प्रापणं एतत्त इत्यनेन मन्त्रेणासजति । आसञ्जनं चावलगनम् । आसजत्यवलगयति ॥ १७४ ॥

कृत्तिवासा इति च ॥ २७५ ॥

मन्त्रमात्रोपदेशात् क्रियाया अनिर्दिष्टत्वात्तच्छिथिलीकरणमात्र क्रियात्र द्रष्टव्या । तथानिष्वापयत्येवैनमेतत्स्वपन्न हि कञ्चन हिनस्तीति वाक्यशेषः ॥ २७५ ॥

अनपेक्षमेत्योपस्पृशन्त्यपः ॥ २७६ ॥

पृष्ठतोनवलोकयन्त एत्यापामुपस्पर्शनं कुर्वन्ति बहुवचनोपदेशात् । अत्र च वाशब्दोयद्यर्थे ।अग्निपरिगमनादि कर्मापवर्गसमिदाधानान्ते कर्त्तव्यम् । आगन्तुत्वात् । तथा च वाक्यशेषः । ते प्रतीक्षं पुनरायन्ति पुनरेत्याप उपस्पृशन्ति । अनपेक्षमेत्याप उपस्पृशन्तीत्यतो रुद्रियेणात्र वा एतदचारिषुरिति भूतकालनिर्देशात् निर्वृत्तं रुद्रियं कर्मेति गम्यते । अथ वा पाठानु-

---

१ यत्र तृणमय आवपने धान्यं बध्यते तन्मूतम् ।

२ वेणुनिर्मितभाजनद्वययुक्तो दारुविशेषो वीवधापरपर्यायः कुपः ।

पूर्व्यां अव रुद्र मदीमहीति जपसमनन्तरं क्रियेत ततश्चाचारिषुरित्येतदनुपपन्नार्थं स्यादिति ॥ २७६ ॥

## शुनासीरीयमतः ॥ २७७ ॥

स यत्रैव सकामेधैर्यजते तच्छुनासीर्येण यजेतेति वचनात् ॥ २७७ ॥

## यदेच्छेत् ॥ २७८ ॥

यदा वा इच्छा भवति । तस्माद्यदैव कदाचैतेन यजेतेति श्रुतेः । उत्तरेषु वा ज्योत्स्नेष्विति च शाखान्तरात् ॥ २७८ ॥

## पौर्णमासधर्मा बर्हिर्वर्जम् ॥ २७९ ॥

अथैतान्येव पञ्च हवीꣳषि भवन्तीत्यनेन प्राप्तानां निवृत्यर्थमुच्यते । पौर्णमासधर्मा बर्हिर्वर्जमिति । तच्चैतच्छाखान्तरवचनाद्द्रष्टव्यम् । अपरे तु वर्णयन्ति तस्यावृश्चोपकिरन्त्युत्तरवेदिं न गृह्णन्ति पृषदाज्यन्न मन्थन्त्यग्निं पञ्च प्रयाजा भवन्ति त्रयोनुयाजा एकꣳ समिष्टयजुरिति । उत्तरवेदिपृषदाज्ययोः प्राप्त्यभावादनुवादः । एवं चेद् निषिद्धानां देवत्रासः प्रस्तरादीनां प्राप्तिर्भवत्येव । सूत्रकारेण च बर्हिर्वर्जं सर्वेषां निषेधः कृतः । तच्च शाखान्तरवचनादेवोपपद्यते ॥ २७९ ॥

## नित्येभ्योधिकानि शुनासीराभ्यां द्वादशकपालः ॥ २८० ॥

इन्द्राय वा शुनासीरायेति देवताविकल्पः ॥ २८० ॥

## वायव्यं पयः ॥ २८१ ॥

अथ वायव्यं पयो भवतीति वचनात् ॥ २८१ ॥

## लौकिकम् ॥ २८२ ॥

तच्च लौकिकं भवति धर्मरहितम् ॥ २८२ ॥

कुत एतत्—

## प्रतिधुक् श्रुतेः ॥ २८३ ॥

प्रतिधुक् शब्देन च प्रातर्दुग्धमात्रं धारोष्णमभिधीयते। तथा-चाह। गौर्वै प्रतिधुक् तस्यै श्टतमिति। एवं च धर्मानुष्ठाने सति आज्यनिर्वापकाले दोहः प्राप्नोति श्रपणं च। अत्र प्रतिधुक्त्वं विरुध्येत इति ॥ २८३ ॥

एवं प्राप्त इदमुच्यते—

## नाविरोधात् ॥ २८४ ॥

न लौकिकं भवति। वैदिकमेव धर्मवद्भवति। कुत एतत्। अविरोधात्। यागकाल एव दोहः करिष्यते। धर्माः प्रधानभूताः कालो गुणभूतः। अतो धर्मानुग्रहाय गुणभूतकालबाधेन तत्रैव धर्माः करिष्यन्ते। ये च विरुध्यन्ते ते एव न क्रियन्ते परिक्षालनश्रपणा-दयः। तस्मात्साधूक्तं नाविरोधादिति ॥ २८४ ॥

## प्रकृतिदर्शनाच्च ॥ २८५ ॥

यत्र प्रक्रियन्ते धर्माः सा प्रकृतिः। ऐन्द्रं पयो माहेन्द्रं पय इति तद्धितान्तता व्यक्तता वेति। सा चेह दृश्यते वाय-व्यं पय इति ॥ २८५ ॥

## यवागूर्वा ॥ २८६ ॥

तण्डुलैः शिथिलपक्का यवागूरित्युच्यते। वेति विकल्पः। य-वागूर्वा पयो वाभवति ॥ २८६ ॥

## सौर्य एककपालः ॥ २८७ ॥

भवतीति वाक्यशेषः ॥ २८७ ॥

## सीरं षड्योगं दक्षिणा ॥ २८८ ॥

सीरं लाङ्गलं षड्भिरनडुद्भिर्युक्तमित्यर्थः। इयं दक्षिणा ॥ २८८ ॥

ओष्टारौ वा ॥ २८९ ॥

वोढारौ महान्तौ बलीवर्द्दौ वेति विकल्पः ॥ २८९ ॥

श्वेतोऽश्वः सौर्यस्य ॥ २९० ॥

दक्षिणा । सौर्यं प्रकृत्याह तस्याश्वः श्वेतो दक्षिणेति ॥ २९० ॥

अभावो गौः ॥ २९१ ॥

अश्वाभावे गौर्भवति । यद्यश्वः श्वेतं न विन्देदपि गौरेव श्वेतः स्यादिति ॥ २९१ ॥

साकमेधसमनन्तरमुत्तरेषु वा ज्योत्स्नेष्विति शुनासीरीयमुक्तम् । अन्यदपि पक्षान्तरमस्ति तदर्थमाह—

संवत्सरेप्सोः फाल्गुन्युद्दृष्टे शुनासीरीयेणेष्ट्वा सोमेन पशुनेष्ट्या वा यजेत पौर्णमास्याम् ॥ २९२ ॥

यो नाम चातुर्मास्ययागैरहोरात्रद्वारेण संवत्सरं व्याप्नुमिच्छति स संवत्सरेप्सुः । तथा चोक्तम् । तद्धैके रात्रीरापिपयिषन्तीति । तस्य संवत्सरेप्सोः फाल्गुन्युद्दृष्टे शुनासीरीयम् । फाल्गुनापौर्णमास्यः पूर्वं यदुद्दृष्टं चन्द्रमसः शास्त्रतः प्रथममुद्दर्शनं तत्फाल्गुन्युद्दृष्टम् । फाल्गुनावतारप्रतिपदित्यर्थः । तत शुनासीरीयेणेष्ट्वा सोमेन पशुनेष्ट्या वा पौर्णमास्यां यजते । सोमोऽग्निष्टोमः । पशुरग्नीषोमीयः । इष्टिराग्नेयीति विकल्पः ॥ २९२ ॥

आवृत्तिरनीजानस्य ॥ २९३ ॥

सोमे पश्विष्टिभिरनीजानस्यावृत्तिर्भवति । एतदुक्तं भवति । उत्सर्गपक्ष एवैतैर्यजेतेति ॥ २९३ ॥

आवृत्तौ कर्मविवेचनायाह—

फाल्गुन्युपवसथे शुनासीरीयं प्रातर्वै-

श्वदेवम् ॥ २९४ ॥

फाल्गुन्या उपवसथः फाल्गुन्युपवसथः। उपवसथशब्देन प्राक्कालीनमहरुच्यते। चतुर्दशीति एतदुक्तं भवति। तत्र शुनासीरीयं प्रातः पौर्णमास्यां वैश्वदेवमिति ॥ २९४ ॥

सपाशुकान्यपि चातुर्मास्यानि सन्ति तदर्थमाह—

सपशुषु पशुतन्त्रं प्राधान्यात् ॥ २९५ ॥

सपशुषु चातुर्मास्येषु एकतन्त्राभ्युपगमन्यायान्यत्पशुतन्त्रमभ्युपेयम। कुत एतत् । प्राधान्यात्। प्रधानशब्दो महत्ववाची, महत्वात्पशुतन्त्रस्येत्यर्थः। न ह्यत्र गुणप्रधानभावः। चातुर्मास्यैरयजन्तेति यागाविशेषात्। तस्मात्प्रधानशब्दो महत्ववाचकः। महति च तन्त्रे लघुप्रक्षेप्तुं शक्यते। न लघुनि महदिति ॥ २९५ ॥

पूर्वेद्युर्वैश्वदेवे पाशुकम् ॥ २९६ ॥

कर्मभवतीति। एवमेव ह्यग्नीषोमीये दृष्टम। उत्तरवेदिच्छन्नावसतीति। सापि ह्याहवनीयवदङ्गप्रधानार्था। तत्प्रकृतित्वे ह्यत्रापि तथैव भवितव्यम ॥ २९६ ॥

सद्यो वा ॥ २९७ ॥

वाशब्दः पक्षव्यावृत्तौ। सद्यो वा भवति। न द्व्यहकालतया। सद्यस्त्वं विकृतीनामित्येतदुक्तमेव। यत्तु पूर्वेद्युरुत्तरवेदिच्छादनान्तमुक्तं स सौमिको विप्रकर्षो न पाशुक इति। पशुः पदार्थमात्रं च गृह्णाति सद्यस्त्वविधानान्न सौमिकं विप्रकर्षमिति ॥ २९७ ॥

वैश्वदेवः पशुः ॥ २९८ ॥

वैश्वदेवे भवति ॥ २९८ ॥

पशुपुरोडाशमनुहवीꣳषि निर्वपति ॥ २९९ ॥

वचनसामर्थ्यात् ॥ २९९ ॥

तेषाꣳ स्विष्टकृद् भूयस्त्वात् ॥ ३०० ॥

तेषां हविषां सम्बन्धी यजप्रैषः स्विष्टकृद्यागो भवति। भूयस्त्वाद् बहुत्वादित्यर्थः। बहूनां ह्यनुग्रहो युक्तो नैकस्येति ॥ ३०० ॥

यथोक्तमविरुद्धम् ॥ ३०१ ॥

यदविरुद्धं तद्यथोक्तं च कर्त्तव्यम। यथाश्ववालप्रस्तरस्य प्रसुतता ॥ ३०१ ॥

हृदयशूलान्ते वपनम् ॥ ३०२ ॥

पुनर्वचनसामर्थ्यान्नियोगतः कर्त्तव्यम ॥ ३०२ ॥

वरुणप्रघासेषु वारुणः ॥ ३०३ ॥

पशुः ॥ ३०३ ॥

महाहविषि माहेन्द्रः ॥ ३०४ ॥

पशुः ॥ ३०४ ॥

शुनासीराभ्यां चतुर्थः ॥ ३०५ ॥

कृतानुकरणतया प्रतिप्रस्थातुरपि पशुर्मा भूदिति चतुर्थग्रहणम ॥ ३०५ ॥

पुरस्ताद्वा पर्वणः पर्वणेति वा ॥ ३०६ ॥

पशुर्भवति। महाहविषि माहेन्द्र इति वचनात्। तस्यैव पुरस्तात्पशुरन्ते वा न साकमेधानामिति भेदेन पश्वनुष्ठाने पशुरपि पर्वशब्दवाच्य एवेति। अतस्तस्यापि पर्वदक्षिणेति सम्प्रदायः। नेत्यपरे। पशोर्हि स्वदक्षिणापरिप्राप्तेः। समानतन्त्रत्वे तु पर्व एव तादृगिति पर्वदक्षिणैव भवति ॥ ३०६ ॥

श्रुत्यनुसारेणाचार्येण चातुर्मास्यान्यनुविहितानि इदानीं श्रुतिमन्त्रपाठानुसारेण ज्योतिष्टोमः प्राप्तः। तं प्रोत्सार्य हविर्यज्ञत्वसामान्यान्मित्रविन्दानुविधीयते—

मित्रविन्दा श्रीराष्ट्रमित्रायुष्कामस्य ॥ ३०७ ॥

मित्रविन्देति कर्मणो नामधेयम् । अभिधायकत्वात् । श्रीराष्ट्रमित्रायुष्कामस्य । पर्यायेण च योगसिद्धिः ॥ ३०७ ॥

दशहविः ॥ ३०८ ॥

सैतां दशहविषमिष्टिमपश्यत् इति वचनात् । उपक्रमादेव तत्सिद्धेरवाच्यमेतदिति चेत् । उपहोमेष्वपि मित्रविन्दाशब्दो मा भूदिति दशग्रहणम् ॥ ३०८ ॥

आग्नेयः सौम्यश्चरुर्वारुणो दशकपालश्चरुर्वा यावो मैत्रश्चरुरैन्द्र एकादशकपालो बार्हस्पत्यश्चरुः सावित्रो द्वादशकपालोऽष्टाकपालो वा सारतश्चरुः पौष्णश्चरुस्त्वाष्ट्रो दशकपाल एकं प्रदानम् ॥ ३०९ ॥

वचनादेकं प्रदानम् । याज्यानुवाक्ययोश्च । सच देवताभिधानात् ॥ ३०९ ॥

समस्यानुवाचनम् ॥ ३१० ॥

अत्र चाविभक्तिलोपेन समासः । एवं हि पूर्वमभिहितं अनुवाचनप्रैषो यथादेवतममुष्मा अनुब्रूहीति । अमुष्मा इति चतुर्थ्यंतेनोक्तः । अपि च लुप्तसमासे सति द्वन्द्वे अजाद्यदन्तम् अल्पाच्तरमिति च पूर्वं निपतति । तत्र पाठक्रमो बाध्यते । तस्मादविभक्तिलोपेन समासः ॥ ३१० ॥

यजेति च ॥ ३११ ॥

अविभक्तिलोपेनैव समस्यते ॥ ३११ ॥

प्रैषाश्च ॥ ३१२ ॥

असमासेन भवन्ति । अत्र च प्रैषशब्देन स्विष्टकृन्निगदाभिधानम् । निगदशब्दः स्विष्टकृति दृष्टः।स्विष्टकृति निगदं ब्रूयादिति।निगदः प्रैष इति चानर्थान्तरम् । तस्मात्प्रैषाश्चेति सौविष्टकृतनिगदाभिधानम् । प्रैषाश्चेति बहुवचनं देवताभेदात् । अपरेन्यथा व्याचक्षते । याज्यादौ देवताभिधानं तल्लक्षणया प्रैषशब्देनोच्यते ॥ ३१२ ॥

उत्तरे निगमा यथेष्टं जोषणाश्रुतेः ॥ ३१३ ॥

उत्तराणि यानि सूक्तवाके निगमनानि यथेष्टं कर्त्तव्यानि । कुत एतत्। जोषणा श्रुतेः । एवं या इष्ट देवता भवन्ति ताः सम्पश्यन्त्यसौ हविरजुषतेति । इष्टाश्च प्रातिलोम्येन याज्यायामभिधानात् । त्वष्टा रूपाणि ददती सरस्वतीति ॥ ३१३ ॥

अनुलोमा वा चोदना गुणत्वात् ॥ ३१४ ॥

अनुलोमा वा निगमा भवन्ति । न प्रातिलोम्येन । येन सर्वैव निगमनेषूत्पत्तिचोदनानुस्मर्त्तव्या । तन्मूलत्वात् । इतरथा निगमनान्येव सम्भवतीति । तस्माच्चोदनापाठक्रमस्यैव सर्वत्र गुणभावः ॥ ३१४ ॥

हौत्रमप्यत्राभिहितं तदुच्यते—

पञ्चदशसामिधेन्यः ॥ ३१५ ॥

भवन्ति ॥ ३१५ ॥

पुष्टिमन्तावाज्यभागावग्निना रयिमश्नवत्
पोषमेव दिवे दिवे यशसं वीरमत्तमं गय-
स्फानो अमीवहा वसुवित्पुष्टिवर्धनः सुमि-
त्रः सोम नो भवेति ॥ ३१६ ॥

हविषोनुवाक्या अग्निः सोमो वरुणो मित्र
इन्द्रो बृहस्पतिः सविता यः सहस्री पूषा

नो गोभिरवसा सरस्वती त्वष्टा रूपाणि समनक्तु यज्ञैरिति ॥ ३१७ ॥

याज्या त्वष्टा रूपाणि ददती सरस्वती पूषा भगꣳसविता मे ददातु बृहस्पतिर्ददिन्द्रो बलंमे मित्रावरुणः सोमो ऽग्निरिति ॥ ३१८ ॥

हुत्वा स्थाल्याः स्रुवेणोपहुजोत्यग्निरन्नादोऽन्नपतिरन्नाद्यमस्मिन्यज्ञे मयि दधातु स्वाहा सोमो राजा राजपती राज्यमस्मिन्यज्ञे मयि दधातु स्वाहा वरुणः सम्राट् सम्राट्पतिः साम्राज्यमस्मिन्यज्ञे मयि दधातु स्वाहा मित्रः क्षत्रं क्षत्रपतिः क्षमस्मिन्यज्ञे मयिदधातु स्वाहेन्द्रो बलं बलपतिर्बलमस्मिन्यज्ञे मयि दधातु स्वाहा सविता राष्ट्रꣳ राष्ट्रपती राष्ट्रमस्मिन्यज्ञे मयि दधातु स्वाहा पूषा भगं भगपतिर्भगमस्मिन्यज्ञे मयि दधातु स्वाहा सरस्वती पुष्टिं पुष्टिपतिः पुष्टिमस्मिन्यज्ञे मयि दधातु स्वाहा त्वष्टा रूपाणाꣳ रूपकृद्रूपपती रूपेण पशूनस्मिन्यज्ञे मयि दधातु स्वाहेति ३१९ ॥

एवमादिभिर्मन्त्रैः प्रतिमन्त्रम ॥ ३१९ ॥

विराजौ संयाज्ये ॥ ३२० ॥

संयाज्याशब्देन च स्विष्टकृद्यागस्य याज्यानुवाक्ये भिधीयेते प्रेद्धो अग्न इमो अग्न इति ॥ ३२० ॥

सहस्रवत्यौ वा नू नो रास्व सहस्रवत्तोकवत्पुष्टिवद्वसु द्युमदग्ने सुवीर्यं वर्षिष्ठमनुपक्षितम्
उत नो ब्रह्मन्नविष उकथेषु देवहूतमः शं नः
शोचा मरुद्वृधोऽग्ने सहस्रसातम इति ॥ ३२१ ॥

नूनो रास्व सहस्रवदित्येवमादि ॥ ३२१ ॥

दशदक्षिणा सहस्रं वा ॥ ३२२ ॥

सहस्रं वेति विकल्पः ॥ ३२२ ॥

इति कात्यायनसूत्रे कर्कोपाध्यायविरचिते
पञ्चमो ऽध्यायः समाप्तः ।

# षष्ठोऽध्यायः ।

श्रुत्यनुकरणकारिणाऽऽचार्येण चातुर्मास्यान्यनुविहितानि इदानीं श्रुतिमन्त्रपाठावसरे ज्योतिष्टोमस्य तन्त्रस्तं प्रोत्सार्य हविर्यज्ञत्वसामान्यान्मित्रविन्दाऽनुविहिता। हविर्यज्ञत्वसामान्यादेव च इदानीं निरूढपशुबन्धोऽनुविधेयः। हविर्यज्ञत्वसामान्यं च हविर्यज्ञविधो ह वा अन्यः पशुबन्धः सवविधोन्य इति श्रुतत्वात्। अस्य च प्राणिसाधनकत्वसामान्यादग्नीषोमीयविध्यन्तग्राहकत्वम । अग्नीषोमीये हि धर्माणां विशनादीनां विहितत्वात् । इह चाविधानात्। तथा च विशसनादीनग्नीषोमीयात्प्राप्ताननुवदति । तस्मादुपांशुः संज्ञप्तं ब्रूयाच्छेतान्नुमुहूर्त्तमिति। तथा च तत एव यूपपरिप्राप्तौ सत्यां जात्यन्तरविधानम तस्मात्पालाशमेव यूपं कुर्वीतेति। तेन निरूढपशुबन्धमूरीकृत्य अग्नीषोमीयधर्मानुकथनं क्रियते। अग्नीषोमीयधर्माणां हि सौमिकैर्धर्मैरत्यन्तव्यतिषङ्गादिह धर्मानुकथनं युक्तरूपम। तत्रातिदेशेन धर्मान्वक्ष्यति। अत्र च केश्चित्सौत्रामणी पशुषु निरूढप्रकृतित्वमिष्यते । तत्पुनर्नातीव युक्तरूपम। येन न हि निरूढः प्रकृतिभूतः । तेनापि ह्यग्नीषोमीयादेव धर्मा गृहीताः । न च भिक्षुको भिक्षुकाद्याचत इति । अतस्तेप्यग्नीषोमीयविध्यन्तग्राहका एव। न हि तेष्वानुमानिकवचनापवादत्वेन प्रत्यक्षशिष्टं वचनं नाम वा विद्यते । यथा वैश्वदेवधर्माश्चातुर्मास्येषु सोमाद्यावभृथ इति च। तस्मादग्नीषोमीयप्रकृतित्वमेव तेष्वपीति । अग्नीषोमीयप्रकृतित्वे च सति आरम्भणीया न भवति । आरम्भनिमित्ताहिसा। न चाग्नीषोमीयस्यारम्भोस्ति। तेन पैतृकरिक्थन्यायेन अग्नीषोमीयाभावादिहापीति न भवति। ननु च दर्शपूर्णमासप्रकृतित्वे चारम्भणीया प्राप्ता, तत्र पृथगारम्भावान्न क्रियते। निरूढादिषु तु पृथगारम्भस्य विद्यमानत्वादस्त्वन्वारम्भणीयेति । यथान्वाहार्यो दर्शपौर्णमासप्रकृतित्वेनाग्नीषोमीये प्राप्तः सौमिक्या दक्षिणया निवर्त्तते। अतस्तद्विकारेषु यत्र दक्षिणाम्नानं नास्ति तत्र प्रवर्त्तते, एवमारम्भणी-

यापीति। नैतद्युक्तम्। अग्नीषोमीये हि आनन्तर्येण प्रवृत्तोन्वाहार्यो गवां शतेन निवर्त्यते। तद्विकारेषु तु वर्त्तमानः केन निवार्यते। आरम्भणीया पुनर्नकेन चिन्निवर्त्यते। आरम्भनिमित्तत्वात्। तदभावाच्चाग्नीषोमीयस्यानङ्गमारम्भणीया। अतस्तद्विकारेष्वप्रवृत्तिरिष्यत इत्यलमतिप्रसङ्गेन, प्रकृतमिदानीमभिधीयते।

पश्विज्या संवत्सरे संवत्सरे प्रावृषि ॥ १ ॥

कर्त्तव्येति सूत्रशेषः। पशुना इज्या पश्विज्या। सा च प्रतिसंवत्सरं कर्त्तव्येति। तेन संवत्सरे संवत्सर इत्युक्तम्। नित्यत्वं हि परिभाषायामुक्तमेव। दाक्षायणपशुषु प्रवृत्तेरिति। अपि चाह। तं वै संवत्सरो नानीजानोतीयादिति। सा च प्रावृषि। प्रावृट्छब्देन वर्षा उच्यते। तेन सुयवसे यजेतेति श्रुतेः। सुयवसाश्च वर्षाः१ ॥ १ ॥

आवृत्तिमुखयोर्वा ॥ २ ॥

पश्विज्या भवति, वा प्रावृषि। आवृत्तिशब्देन उदगयनदक्षिणायने उच्येते। तयोर्मुखमावृत्तिमुखम्। प्रथममहस्तत्र कर्त्तव्यम्। न पौर्णमास्यमावास्ये अपेक्ष्येते। संवत्सरे संवत्सरे इति चोक्तत्वादेकत्र क्रिया। नोभयोरपीति ॥ २ ॥

गृहेषु ॥ ३ ॥

देवयजनागारेऽग्नीषोमीयस्य दृष्टत्वादिहापि तन्मा भूदिति गृहेष्वित्युच्यते। तेन गृहेषु यजेतेति वचनात्। अपरे त्वयमनुवाद इति मन्यन्ते। न ह्युदवसानमग्नीषोमीयार्थम्। ज्योतिष्टोमप्रकरणे विधानात्। तादर्थ्याच्च प्रासङ्गिकोग्नीषोमीयस्य। एवं च सति न्यायसूत्रमेवैतद्गृहेष्विति। यद्येवं समारोपोपि प्रकरणसमधी-

---

१ सचर्तुः सर्वत्र चान्द्रमानेन गृहीतव्यः तदभावे सौरः। तथा च स्मरणम्—"श्रौतस्मार्तक्रियाः सर्वाः कुर्याच्चान्द्रेषु चर्तुषु, तदलाभे तु सौरेषु" इति।

त्वात् ज्योतिष्टोमार्थ एव । प्रासङ्गिकोऽग्नीषोमीये इति पश्वन्तरेषु न प्रवर्त्तते । नैतदेवम् । समारोपो ह्यग्निसंस्कारः । अग्नेश्चाङ्गप्रधानार्थता । यदाहवनीये जुहोतीति वचनात् । तस्मात्प्रवर्त्तत एव समारोपः । अत एव चोत्तरवेदिसम्भाराश्च प्रवर्त्तन्ते ॥ ३ ॥

यूपाहुतिं जुहोति चतुर्गृहीतं स्रुवेण वोरु विष्णविति ॥ ४ ॥

स यदि स्रुचा जुहोति चतुर्गृहीतमाज्यं गृहीत्वा जुहोति, यद्यस्रुवेण स्रुवेणैवोपहत्य जुहोतीति वचनाद्विकल्पः । इयं च यूपाहुतिरग्नीषोमीये यूपार्था दृष्टा१ । यूपं व्रश्चयन्वैष्णव्यर्चा जुहोतीति । तत्र च व्रश्चना कृताकृतप्रत्यवेक्षणां कृतमिहापि व्रश्चनोत्तरकालतैव गम्यते ॥ ४ ॥

आज्यशेषमादाय सतक्षा गच्छति यूपम् ॥ ५ ॥

यदाज्यं परिशिष्टं भवतीति वचनात् । वक्ष्यत्युपरिष्टात् यूपान्ते वाग्निं मथित्वेति । अतश्च विकल्पोयम् ॥ ५ ॥

अभिमृशत्यत्यन्यानिति ॥ ६ ॥

यूपमभिमृशत्यनेन मन्त्रेण ॥ ६ ॥

प्राङ्तिष्ठन्नभिमन्त्रयते वा ॥ ७ ॥

अनेनैव मन्त्रेणेति । स चायं तुल्यशास्त्रत्वाद्विकल्पः ॥ ७ ॥

पालाशं बहुलपर्णमशुष्काग्रमूर्द्धसकलशाखं मध्याग्रोपनतमव्रणम् ॥ ८ ॥

---

१ तेन 'खले वाली यूपो भवति' इत्यत्र न भवति, लुप्तार्थत्वात् । यूपं च्छेत्स्यता होतव्यमिति च्छेदनार्थो होमः, न च खले वाल्यां च्छेदनमस्तीति ।

निरूढे हि श्रूयते । तस्मात्पालाशमेव यूपं कुर्वीतेति । मध्याग्रोपनतत्वं च निरूढ एव तत्रैव पाठात् । अथ य एष आनतुपरिष्टादुपनतो मध्य इति । अन्यत्रानियमः ॥ ८ ॥

अभावे खदिरबिल्वरौहीतकान् ॥ ९ ॥

पलाशाभावे खदिरादयो भवन्ति ॥ ९ ॥

खदिराभावे सोम इतरान् ॥ १० ॥

ज्योतिष्टोमे खदिराभावे बैल्वान्रौहीतकान्वा कुर्यात्पालाशस्तु निरूढ एवेति सम्प्रदायः । खदिराभावे इतरानिति बहुवचनमुच्चारणार्थम् । यूपव्यक्तिभेदापेक्षं वा ॥ १० ॥

स्रुवेणोपस्पृशति विष्णवे त्वेति ॥ ११ ॥

दृष्टार्थत्वाद्यस्मिन्प्रदेशे च्छेदनं तत्रोपस्पर्शनम् ॥ ११ ॥

ओषध इति कुशतरुणं तिरस्कृत्य स्वधित इति परशुना प्रहरति ॥ १२ ॥

ओषध इत्यनेन मन्त्रेण तृणमन्तर्धाय स्वधित इत्यनेन मन्त्रेण परशुना प्रहरति ॥ १२ ॥

प्रथमशकलं निदधाति ॥ १३ ॥

कार्यार्थम् ॥ १३ ॥

अनक्षस्तम्भं वृश्चति ॥ १४ ॥

यथाक्षस्योपस्तम्भनं स्थाणुर्न भवति तथा छिद्यते ॥ १४ ॥

एकजम् ॥ १५ ॥

एक एव यो जातः ॥ १५ ॥

द्यां मालेखीरिति पतन्तमभिमन्त्रयते ॥ १६ ॥

यूपम् ॥ १६ ॥

स च—

न दक्षिणा पतेत् ॥ १७ ॥

अयꣳ हि त्वेति शोधनम् ॥ १८ ॥

कुत एतत् । मन्त्रलिङ्गात् । अयꣳ हि त्वा स्वधितिस्तेतिजानः प्रणिनायेति ॥ १८ ॥

अभिमन्त्रणशेषो वा विशेषोपदेशात् ॥ १९ ॥

वा शब्दः पक्षव्यावृत्तौ । अयꣳ हि त्वेत्यभिमन्त्रणशेष एव भवति न शोधने । कुत एतत् । विशेषोपदेशात् । तं प्रच्यवमानमनुमन्त्रयते द्यां मा लेखीरिति । मन्त्राणां चाविधायकत्वात् ॥ १९ ॥

अतस्त्वमित्यावृश्चने जुहोति ॥ २० ॥

आव्रश्चनं चापादानसाधनत्वेन स्थाणुरभिप्रेतः । आव्रश्चनमभिजुहोतीति श्रुतत्वात् ॥ २० ॥

यूपे वा तत्संस्कारत् ॥ २१ ॥

यूपे वा जुहोति न स्थाणौ । कुत एतत् । तत्संस्कारात् । यूपस्य हि संस्काराभिप्रवृत्तेः ॥ २१ ॥

स्थाणौ श्रुतेश्च ॥ २२ ॥

स्थाणौ वा जुहोति न यूपे । कुत एतत् । श्रुतेः । अथाव्रश्चनमभिजुहोतीति प्रकृत्याह नेदतो नाष्ट्रा रक्षाꣳस्यनूत्तिष्ठानिति । यूपं च्छिन्नमनुनेदतो नाष्ट्रारक्षाꣳसि अनूत्तिष्ठानिति । वज्रो वा आज्यं तद्वज्रेणैवैतन्नाष्ट्रा रक्षाꣳस्यवबाधत इति श्रुतेः । चशब्दान्मन्त्रवर्णाच्च । अतस्त्वं देववनस्पते शतवल्शो विरोहेति । यस्त्वं मत्तोः वृक्णः स शतशाखो विरोहेति मन्त्रवर्णेन स्थाणुरेवाभिधीयत इति । स्थाणावपि च होमे क्रियमाणे यूपीयस्थाणुरिति भवत्येवादृष्टो यूपसंस्कारः । अतः स्थाणावेव होम इति ॥ २२ ॥

परिवास्योच्छेदनं पुनः ॥ २३ ॥

परिपूर्वोवसिश्छेदनार्थः। परिवास्य च्छित्वा यूपाग्रं पुनश्छेदनं न कर्त्तव्यम् ॥ २३ ॥

त्र्यरत्निश्चतुररत्निर्वा ॥ २४ ॥

परिवास्यते। स वा एष त्र्यरत्निर्वैव चतुररत्निर्वा पशुबन्धयूपो भवतीति वचनात् ॥ २४ ॥

एकारत्निप्रभृतीनेके ॥ २५ ॥

एवमपि हि श्रूयते। स यत्पशुना यक्ष्यमाण एकारत्निं यूपं कुरुत इममेव तेन लोकं जयत्यथ यद्व्यरत्निमन्तरिक्षलोकमेव तेन जयतीति। एके तन्नेच्छन्ति। न ह्येतौ विधीयेते किं तर्हि अवयुत्यवादेन संस्तवोयं, यो नापसंहरति स वा एष त्र्यरत्निर्वैव चतुररत्निर्वा पशुबन्धयुपो भवतीति[1] ॥ २५ ॥

अष्टाश्रं करोत्युपरवर्जम् ॥ २६ ॥

अत ऊर्ध्वन्तक्ष्णो व्यापारः। एवं हि तक्ष्ण आनयनं दृष्टार्थं भवति। उपरवर्जमिति। उपरशब्देन उपरार्हः प्रदेशोभिधीयते।-उपरार्हप्रदेशवर्जमष्टाश्रिं करोति ॥ २६ ॥

अग्राच्चषालं पृथमात्रमष्टाश्रं मध्यसंगृहीतम् ॥२७॥

करोतीत्यनुषङ्गः। पृथशब्देन सङ्कुचिताङ्गुलिः पाणिरामणिबन्धादुच्यते ॥ २७ ॥

ऊर्ध्वमग्रे प्रतिमुञ्चति द्व्यङ्गुलं त्र्यङ्गुलं वा तद्र्मातिक्रान्तं यूपस्य ॥ २८ ॥

---

१ तथा चापस्तम्बः—" त्र्यरत्निश्चतुररत्निर्वा पालाशो निरूढपशुबन्धस्यातोऽन्यः सौम्यस्याध्वरस्येति वाजसनेयिन " इति।

स चायमुपदेशः । प्रतिमोकस्त्वञ्जनोत्तरकाल एव ॥ २८ ॥

पञ्चारत्निः पञ्चदशपर्यन्तः सोमे दशसप्तच-
तुर्दशवर्जमपरिमितो वा ॥ २९ ॥

भवति यूपः । एवमपि हि श्रूयत इति ॥ २९ ॥

सप्तदश वाजपेये ॥ ३० ॥

एकविꣳशतिरश्वमेधे ॥ ३१ ॥

यथाकायꣳ स्थविमा ॥ ३२ ॥

स्थौल्यं च यथाकायमेव भवति । न च तक्षणेन अग्रतुल्यप्रमाणात् ॥ ३२ ॥

वेदिं करिष्यन् षड्ढोतारं पञ्चगृहीतं मनसानुद्रुत्य जुहोत्येकामाहुतिं पञ्च वा द्यौष्पृष्ठमन्तारिक्षमात्माङ्गैर्यज्ञं पृथिवीꣳ शरीरैः वाचस्पते ऽछिद्रया वाचा छिद्रया जुह्वा दिवि देवतावृधꣳ होत्रामैरयन्स्वाहेति ॥ ३३ ॥

प्राग्वेदिकरणात् । षड्ढोतारं मन्त्रं मनसानुद्रुत्य पञ्चगृहीतं जुहोति । पर्श्वभिर्वा विग्रहैः । स चायं होमो निरूढ एव भवति । तत्रैव पाठात् । नाग्निषोमीय इति ॥ ३३ ॥

वेदिं करोति ॥ ३४ ॥

किमर्थमनवसरे वेदिकरणमुक्तम् । परिस्तरणादीनुपरिष्टाद्वक्ष्यत्याचार्य इति। उच्यते । ज्योतिष्टोमे ह्युत्तरवेदिर्विहिता । तत्र चाहवनीयनिधानमुक्तम् । अग्निं वा अस्यामाधास्यन् भवतीत्यनेन । स चायमग्निसंस्कारः । अङ्गप्रधानार्थत्वाच्चाग्नेरग्निषोमीये प्राप्नोति अग्नीषोमीयाच्च पश्वन्तरेषु । न च वेद्या विनोत्तरवेदिर्भवति । अतः स्वावसराद्वेदिरपकृष्यते । तेन वेदिं करोतीत्युक्तम् ॥ ३४ ॥

वरुणप्रघासवत्स्फ्याद्याग्निनिधानात् ॥ ३५ ॥

वारुणप्रघासिकोपदेशोयम् न धर्मपरिप्राप्तिः ॥ ३५ ॥

एकमिध्मेन प्रणयति ॥ ३६ ॥

तत्र हि कर्परप्रणयनं द्वयोश्च । इह एकमिध्मेनोच्यते । तत्कुतः । ज्योतिष्टोमेहीध्मेन प्रणयनं इष्टम् । स चाहवनीयसंस्कारः । अङ्गप्रधानार्थत्वाच्च तस्याग्नीषोमीये प्राप्तिः । तत्प्रकृतित्वाच्च पश्वन्तरेषु । तेनैकमिध्मेनेत्युच्यते । एवं च कृत्वा समारोपोप्यत्र भवत्येव ॥ ३६ ॥

व्रतोपायनप्रणीताज्यभागावदानपूर्णपात्रविष्णुक्रमान्कुर्याद्धविर्यज्ञविधे ॥ ३७ ॥

व्रतोपायनप्रणीताज्यभागानामन्वयप्राप्तानां सत्रविधे प्रतिषेधार्थं निरूढे च प्रतिप्रसवार्थं वचनम्। भागावदानानि तु क्लोमं ब्रह्मणे प्लीहं यजमानाय पुरीततमध्वर्यवे इत्येवमादीनि अग्नषोमीयमायातानि । तत्र शाखान्तरे प्रतिषेधात् विकारपशूनुपार्च्छन्ति। तेनेह विधानमग्नीषोमीयनिषेधार्थम्। तत्र च निषेधात् पश्वन्तरे प्रवृत्तौ निरूढे विकल्पं वक्ष्यति क्लोमप्लीहाध्यूध्नीपुरीतत्श्चेच्छन्निति । अतो भागावदानानामग्नीषोमीये अभाव एव निरूढे विकल्पोऽन्यत्र नियम इति । पूर्णपात्रविष्णुक्रमयोस्त्वस्मिन्निरूढ एव विधानम् । दक्षिणाग्निहोमान्तत्वादग्नीषोमीयस्यान्यत्राप्रवृत्तिरेव। तथा चाह हविर्यज्ञविधो ह वा अन्यः पशुबन्ध इति स हैष हविर्यज्ञविधो यस्मिन्व्रतमुपनयति यस्मिन्नपः प्रणयति यस्मिन्पूर्णपात्रन्निनयति यस्मिन्विष्णुक्रमान्क्रमत्यथ हैष सत्रविधो यस्मिन्नेतानि न क्रियन्त इति ॥ ३७ ॥

परिस्तरणपात्रसंसादनप्रोक्षणाज्यनिर्वपणाधिश्रयणानि कृत्वोत्तरपरिग्रहादि करोत्याज्यासादनात् ॥ ३८ ॥

परिस्तरणादीनामुपादानं वैकृतपदार्थोक्तिसमनन्तरं प्राकृतानुसम्बन्धनार्थम् । खननावसरविधानार्थं च । उत्तरपरिग्रहादि करोत्यनेन च उत्तरपरिग्रहस्य यदादौ तदादि करोत्याज्यासादनादिति ॥ ३८ ॥

अत्र विशेषः—

सपृषदाज्यमाज्यग्रहणम् ॥ ३९ ॥

तस्य चानुयाजार्थतेत्युक्तमेव ॥ ३९ ॥

बर्हिषि प्लक्षशाखास्तृणाति ॥ ४० ॥

अवसरान्तराविधानाच्च स्तरणाधिकारात् बर्हिस्तरणसमनन्तरमेव प्लक्षशाखास्तरणम् ॥ ४० ॥

देवस्य त्वेत्यभ्रिमादाय यूपावटं परिलिखतीदमहमित्याहवनीयस्य पुरस्तादन्तर्वेद्यर्द्धम् ॥ ४१ ॥

अन्तर्वेदिश्च न यूपार्द्धस्याङ्गत्वेनोच्यते किं तर्हि देशलक्षणोयम् । यूपमानं प्रकृत्य वचनं हि भवति अर्द्धमन्तर्वेद्यर्द्धं बहिर्वेदीति । तत्र यूपार्द्धस्याङ्गत्वेन वेदिविधाने अर्द्धं बहिर्वेदीत्येतदपि विधेयम् । तथा च वाक्यभेद प्रसङ्गः । देशलक्षणायां त्वेषदोषो न भवति । न चैकवाक्यत्वे सत्यनेकवाक्यतायुक्तरूपा।अनेकादृष्टपरिकल्पनाप्रसङ्गात् । चिन्तायाः प्रयोजनन्तीव्रसुति प्राची वेदिर्न कर्त्तव्येति अनङ्गत्वात् ॥ ४१ ॥

उपरसम्मितं खनति ॥ ४२ ॥

उपरशब्देन चोपरार्हः प्रदेशो लक्ष्यते । उपरार्हप्रदेशसम्मितं खनतीत्यर्थः ॥ ४२ ॥

प्राचः पांसूनुद्वपति ॥ ४३ ॥

तदग्रेण यूपं प्राञ्चं निदधाति ॥ ४४ ॥

तच्छब्देनावटः परामृश्यते ॥ ४४ ॥

कुशमुष्टिमुपरि तस्मिन् ॥ ४५ ॥

यूपे ॥ ४५ ॥

प्रथमशकलं च ॥ ४६ ॥

चशब्दादुपर्येव ॥ ४६ ॥

अग्रमुत्तरेण चषालम् ॥ ४७ ॥

निदधातीत्यनुवर्त्तते ॥ ४७ ॥

यवोसीत्यप्सु यवानोप्य प्रोक्षत्यग्रमध्यमूला-
नि दिवे त्वेति प्रतिमन्त्रम् ॥ ४८ ॥

आपश्च सतीष्वेव प्रणीतासु लौकिका एव गृह्यन्ते । सान्नाय्ये ह्यङ्गार्थाः प्रणीताः तद्विकारे च पशावङ्गार्थानामेव प्रतिप्रसवः। तेनापूर्वत्वाद्यूपकर्मादावप्रवृत्तिरिति ॥ ४८ ॥

प्रोक्षामीति सर्वत्र साकाङ्क्षत्वात् ॥ ४९ ॥

प्रयोगः ॥ ४९ ॥

अवटे शेषमासिञ्चति शुन्धन्तामिति ॥ ५० ॥

शेषप्रतिपत्तिरवटसंस्कारश्चायम । अतः यूपैकादशिन्यां सर्वावटसंस्कारः कर्त्तव्यः ॥ ५० ॥

बर्हीꣳषि प्राञ्च्युदञ्चि च प्रास्यति पितृषद-
नमसीति ॥ ५१ ॥

अवटे बर्हींषि प्रागग्राण्युदगग्राणि च प्रास्यति पितृषदनमसीत्यनेन मन्त्रेण ॥ ५१ ॥

प्रथमशकलं चाग्रेणीरसीति ॥ ५२ ॥

प्रास्यतीत्यनुवर्त्तते ॥ ५२ ॥

स्रुवेणावटे जुहोति तूष्णीम् ॥ ५३ ॥

तूष्णीमित्युक्तत्वात् स्वाहाकारोपि न भवति ॥ ५३ ॥

पुरस्तात्परिक्रम्याध्वर्युर्यजमानो वा यूपमन-
क्त्युदङ्ङुपविश्य ॥ ५४ ॥

परिक्रमणं च यजमानस्योच्यते । मा भूत्सान्निधानात् अपरि-
क्रमणमिति ॥ ५४ ॥

यूपायाज्यमानायानुवाचयति ॥ ५५ ॥

अज्यमानस्य यूपस्यानुवाचनं कारयतीत्यर्थः । तच्चैवं यूपा-
याज्यमानायानुब्रूहीति ॥ ५५ ॥

देवस्त्वेत्यनक्ति ॥ ५६ ॥

यूपम् ॥ ५६ ॥

चषालमुभयतः ॥ ५७ ॥

अनक्तीति वर्त्तते । देशभेदाच्चोभयत्रमन्त्र इत्युक्तमग्निसं-
मार्गे ॥ ५७ ॥

अक्तं प्रतिमुञ्चति सुपिप्पलाभ्य इति ॥ ५८ ॥

अक्त एव पुनरक्तवचनं चषालनिर्देशार्थम् । चषालं प्रतिमुञ्च-
तीत्यर्थः । प्रतिमुञ्चामीति चात्र मन्त्रशेषः ॥ ५८ ॥

सोपरमग्निष्ठादेशमक्त्वा परिव्ययणदेशं
समन्तं परिमृश्याध्वर्युर्नावसृजेदापरिव्य-
यणात् ॥ ५९ ॥

सहोपरेणाग्निष्ठादेशं पुनरक्त्वा परिव्ययणदेशं समन्तं परिमृ-
श्य यूपमध्वर्युर्नावसृजेदापरिव्ययणात् । सोपराग्निष्ठादेशाञ्जनं च

त्काप्रत्ययोपदेशादध्वर्योरिति केचित् । अभिप्रवृत्तत्वाद्यजमानस्येति सम्प्रदायः ॥ ५९ ॥

उच्छ्रीयमाणायानुवाचयति ॥ ६० ॥

यूपायेत्यत्रानुवर्त्तते ॥ ६० ॥

द्यामग्रेणेत्युच्छ्रयति ॥ ६१ ॥

यूपम् ॥ ६१ ॥

यात इति मिनोत्यग्निष्ठासम्प्रत्याहवनीयम् ॥ ६२ ॥

यात इत्यनेन मन्त्रेण अवटे प्रक्षिपति यथाग्निष्ठासम्प्रत्याहवनीयं भवति । एवं च सति यूपैकादशिन्यां सर्वाग्निष्ठाः सम्प्रत्याहवनीयं कर्त्तव्याः ॥ ६२ ॥

ब्रह्मवनित्वेति पाꣳसुभिः पर्यूहति ॥ ६३ ॥

पांशुभिः पूरयति गर्त्तम् ॥ ६३ ॥

ब्रह्म दृꣳहेति मैत्रावरुणदण्डेन समन्तं त्रिः पर्यृपति ॥ ६४ ॥

मैत्रावरुणदण्डेन दृढीकरोति ॥ ६४ ॥

समं भूमिकृत्वाद्भिरुपसिच्य विष्णोः कर्माणीति वाचयति यूपमन्वारब्धम् ॥ ६५ ॥

समं भूमिकृत्वाद्भिरुपसिच्य गर्त्तम् विष्णोः कर्माणीति वाचयति यजमानम् यूपमन्वारब्धम् । सचायमुभयसंस्कार इति सम्प्रदायः । यूपसंस्कार एवेत्यपरे । उभयसंस्कारपक्षे च बहुयजमानके सर्वेषां वाचनमेकस्यान्वारम्भः ॥ ६५ ॥

तद्विष्णोरिति चषालमीक्षमाणम् ॥ ६६ ॥

वाचयतीत्यनुवर्त्तते ॥ ६६ ॥

परिवीयमाणायानुवाचयति त्रिगुणा त्रिव्यामा कौशी रशना तया नाभिमात्रे त्रिवृतं परिव्ययति परिवीरसीति ॥ ६७ ॥

त्रिगुणया त्रिव्यामया कौश्या रशनया नाभिमात्रे त्रिवृतं परिव्ययति परिवीरसीति । नाभिमात्रं च प्रमाणत्वाद्यजमानविषयम् ॥ ६७ ॥

संसृज्यान्यतरस्यामन्तं प्रवेशयति ॥ ६८ ॥

संसृज्य रशनामन्यतरस्यां रशनायां अन्तं गोपायति ॥ ६८ ॥

यूपशकलमस्यामवगूहत्युत्तरेणाग्निष्ठां दिवः सूनुरसीति ॥ ६९ ॥

यूपशकलमस्यां रशनायामवगूहत्युत्तरेणाग्निष्ठां उद्गूहति दिवः सूनरसीति ॥ ६९ ॥

बहुषु यथास्वम् ॥ ७० ॥

बहुषु यूपेषु यथास्वमवगूहनम् ॥ ७० ॥

उपवीरसीति तृणमादाय तेन पशुमुपस्पृशत्युपदेवानिति ॥ ७१ ॥

पशुमात्रप्राप्ताविदमुच्यते—

छागं मन्त्राम्नानात् ॥ ७२ ॥

स च पशुश्छागो ग्रहीतव्यः । कुत एतत् । मन्त्राम्नानात् । अग्नीषोमौ च्छागस्य हविष आत्तमिति । तेन पशुशब्दश्छागविषय इति गम्यते ॥ ७२ ॥

पञ्चदमव्यङ्गम् ॥ ७३ ॥

उपस्पृशति। पन्नदो निगमेषु जातदशन उक्तः। अभ्यङ्ग-श्चानूनाङ्गः ॥ ७३ ॥

यथामन्त्रवर्णं प्रोक्षणे ॥ ७४ ॥

प्रोक्षणमन्त्रे यादृशोभिहितः अनुत्वा माता मन्यतामनु पितानु भ्राता इत्येवमादि। मातृमान्भ्रातृमानिति च मन्त्राभिधान-सामर्थ्यात् ॥ ७४ ॥

नाचोदितत्वात् ॥ ७५ ॥

नैतदेवम्। न ह्येवं विधा चोदनेति। मन्त्राणां चाविधा-यकत्वात् ॥ ७५ ॥

अग्निं मन्थत्याहोमात्करोति ॥ ७६ ॥

गुणविधित्वाच्चास्य धर्माभावे धर्मपरिप्राप्त्यर्थमाहोमादि-त्युच्यते ॥ ७६ ॥

उपाकरणमन्थने वा ॥ ७७ ॥

उपाकरणं तृणेनोपस्पर्शनमुक्तम्। तस्य पुनरुच्चारणं मन्थ-नसन्नियोगशिष्टार्थम्। सन्नियुक्तेर्विकल्पोयथास्यादिति ॥ ७७ ॥

द्विगुणरशनया द्विव्यामया कौश्या पाशं कृत्वाऽन्तराशृङ्गमभिदक्षिणं बध्नात्यृतस्य त्वेति ॥ ७८ ॥

पाशं कृत्वा प्रतिमुञ्चतीति वचनात् ॥ ७८ ॥

देवस्य त्वेति यूपे ॥ ७९ ॥

बध्नातीत्यनुवर्त्तते ॥ ७९ ॥

ऐन्द्राग्नः सौर्यः प्राजापत्यो वा यमिच्छेत् ॥ ८० ॥

त्रयोपि हि देवता विशेषा विकल्पेन श्रूयन्ते। वाशब्दाद्विक-

त्पपरिप्राप्तौ यमिच्छेदित्यादिविकल्पार्थमुक्तम् । यमिच्छेत्तं सर्वं दैव कुर्यात् ॥ ८० ॥

अन्नयस्त्वेति पशुं प्रोक्षणीभिः प्रोक्षति ॥८१॥

प्रोक्षणीशब्दश्च यौगिकोपि संस्कृतप्रोक्षणीविषयः प्रोक्षण्युपादानसामर्थ्यात् ॥ ८१ ॥

अपां पेरुरित्यास्य उपगृह्णाति ॥ ८२ ॥

आस्योपग्रहणं च पानाय । नादृष्टार्थम् । दृष्टार्थत्वात् । तथा चाश्वमेधे श्रूयते तर्पयित्वाश्वं पुनः संस्कृत्य प्रोक्षणीभिरितरान्पशून्प्रोक्षतीति ॥ ८२ ॥

आपो देवीरित्यधस्तादुपोक्षति ॥ ८३ ॥

अथाधस्तादुपोक्षतीति वचनात् ॥ ८३ ॥

इध्मप्रैषादि करोत्याप्रयाजेभ्यः ॥ ८४ ॥

वैकृतसमनन्तरं प्राकृतानुवृत्त्यर्थमिदमुक्तम् । आदिग्रहणेन च होतृषदनादि द्रष्टव्यम् । तदेव हि पूर्वं न कृतमिति ॥ ८४ ॥

उत्तराघारमाघार्य पशुं पूर्वं समनक्ति ललाटं सश्रोणीषु सन्त इति प्रतिमन्त्रम् ॥ ८५ ॥

प्रकृतौ हि उत्तराघारसमनन्तरं ध्रुवासमञ्जनमुक्तम् । तेनेहोच्यते । पशुं पूर्वं समनक्तीति । अनेन च ज्ञापकेन यत्र प्राकृतयोः समावेशस्तत्र पूर्वं प्राकृतमिति । यथासाद्य हवींषि सम्मृशत्यासाद्य हवींष्यग्निं मन्थतीति । यथा च प्रहृत्य तृणमात्मानमालभते । प्रहृत्य तृणं वाजिनेन चरतीति । समङ्गानि यजत्रैरित्यत्र गच्छन्तामित्यध्याहारो नानुषङ्गः । एकवाक्यताभावात् । एवं च सति संयज्ञपतिराशिषेत्यत्रापि गच्छतामित्यध्याहार एव नानुषङ्गः । पूर्वेण व्यवहितत्वात् । अतश्चोभयत्र संहितावत्प्रयोगो न भवति । प्रायश्चित्तगतश्च विशेषः । अनुषङ्गविनाशे श्रौतं प्रायश्चित्तम् । अध्या-

हारे त्ववैदिकत्वात्स्मार्त्तमिति । यज्ञपतिशब्दश्च अनेकयजमानके विपरिणम्यते । यूपाहुत्यां परिव्ययणे ऽग्निमन्थने च ॥ ८५ ॥

प्रवृत्य होतारमाश्राव्याहाग्निर्ह दैवीनां विशां पुर एतायं यजमानो मनुष्याणाꣳ सुन्वन्निति सुत्ये तयोरस्थूरि गार्हपत्यं दीदयच्छतꣳ हिमा द्वा यू राधाꣳसीत्सम्पृञ्चानावसम्पृञ्चानौ तन्व इति ॥ ८६ ॥

आश्रावणं च मैत्रावरुणार्थम् । स मैत्रावरुणायाहैवाश्रावयतीति वचनात् । अग्निर्ह दैवीनां विशां पुर एत इति । यजमानस्य चानेकयजमानके यथार्थं विपरिणामः । सुन्निति सुत्ये इत्यृतुयाज्यावरणसुन्वन्यजमान इति प्रयोगः ॥ ८६ ॥

मैत्रावरुणाय दण्डं प्रयच्छति मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा प्रयच्छामीत्यौदुम्बरं यजमानमुखमात्रम् ॥ ८७ ॥

मैत्रावरुणासन्निधानात्तस्यैव मुखमात्रो मा भूदिति यजमानमुखमात्रमित्युक्तम् ॥ ८७ ॥

दीक्षितदण्डꣳ सोमे ॥ ८८ ॥

दीक्षितदण्डं समर्पयति ॥ ८८ ॥

क्रीते वा ॥ ८९ ॥

अस्मिन्वावसर इति ॥ ८९ ॥

एकादशप्रयाजा अनुयाजाश्च ॥ ९० ॥

इयं चैकादशसंख्योत्पन्नसंयोगिनी । चोदकप्राप्तेषु प्रयाजेषु संख्या श्रूयते साऽभ्यासेन पूर्यते । या पुनरुत्पत्तौ संख्या श्रूयते

सा पृथक्त्वनिवेशाद्भेत्त्री भवति । यथा प्रकृतौ पञ्चप्रयाजान्यजति । अभ्यासे च सति अन्त्यस्यैवाभ्यासो न्याय्यः । एवं च सति अभ्यासविनाशे अन्त्य एवावर्त्तत इति । अनेकदेवताको ऽनेकयाज्यावांश्च पञ्चम एवायमिति । एवं यत्र यत्रोत्पन्नसंयोगिनी संख्या तत्र तत्राभ्यासेन पूर्यते । यथा त्रीणि समिष्टयजूꣳषि जुहोतीति कर्माभ्यासः । तिस्रोनूचन्ध्या एकविंशतिरग्नीषोमीयाः पशव इति द्रव्याभ्यासः । कार्यं तु सर्वत्रैकमेवेति ॥ ९० ॥

समैत्रावरुणे प्रेष्येत्याह यजस्थाने वचने ॥९१॥

समैत्रावरुणे कर्माणि यजेत्यस्य स्थाने प्रेष्येति वक्तव्यम् । यत्र मैत्रावरुणस्य प्रैषवचनमस्ति । एवं च सति पशौ पत्नीसंयाजेषु प्रैषवचनाभावाद्यजेत्येव वक्तव्यम् ॥ ९१ ॥

दशेष्ट्वा प्रयाजानाह शासमाहरेति ॥ ९२ ॥

यूपशकलमाहरेति च काण्वानां पठ्यते । माध्यन्दिनीयायां तु शासमाहरेत्येव ॥ ९२ ॥

स्वरुमादायाक्त्वोभौ जुह्वग्रे ताभ्यां पशोर्ललाटमुपस्पृशति घृतेनाक्ताविति ॥ ९३ ॥

स्वरुं गृहीत्वोभावपि स्वर्वंशी जुह्वाग्रेऽक्त्वा ताभ्यामेव पशोर्ललाटमुपस्पृशति घृतेनाक्तावित्यनेन मन्त्रेण ॥ ९३ ॥

स्वरुमवगुह्यासिं प्रयच्छन्नाहैषा ते प्रज्ञाताश्रिरस्त्विति ॥ ९४ ॥

स्वरुं यूपे प्रत्यवगुह्य शमित्रे ऽसिं प्रयच्छन्नाहैषा ते प्रज्ञाताश्रिरस्त्विति ॥ ९४ ॥

सादयित्वा स्रुचौ चात्वालमुत्तरेण शामित्रायोल्लिखति ॥ ९५ ॥

स्रुक्स्सादनं च वचनात् । उल्लेखनोपलक्षिताश्च परिसमूहनादयः सर्वे भवन्तीति सम्प्रदायः ॥ ९५ ॥

पर्यग्नयेऽनुवाचयति ॥ ९६ ॥

पर्यग्निकरणे क्रियमाणे यदनुवचनं तत्कारयति । कथं च तत्कारयति । पर्यग्नये नुब्रूहीत्येवम । तथाच श्रुतिरप्याह पर्यग्नये नुब्रूहीति । पर्यग्निकरणं चाग्नीत्कर्तृकं प्रैषश्च तदङ्गत्वादग्नीध एवेति सम्प्रदायः । तथा च श्रूयते यदेवाव कर्म करोति स एव तस्योपचारं वेदेति । अपरे त्वध्वर्योरेव प्रैषदानमिच्छन्ति । पर्यग्निकरणमात्र एव वचनमिति ॥ ९६ ॥

आहवनीयोल्मुकमादायाग्नीत्त्रिः समन्तं पर्येति पश्वाज्यशामित्रदेशयूपचात्वालाहवनीयान् ॥ ९७ ॥

आहवनीयोल्मुकं गृहीत्वापश्वादीनग्नीत्त्रिः पर्येति ॥ ९७ ॥

आज्यपशुशामित्रान्वा ॥ ९८ ॥

पर्येति न सर्वानिति । वाशब्दो विकल्पार्थः ॥ ९८ ॥

प्रतिप्रास्योल्मुकं तावत्प्रतिपर्येति ॥ ९९ ॥

आहवनीये प्रक्षिप्योल्मुकं त्रिरेव प्रतिशब्दप्रयोगाच्चाप्रदक्षिणम ॥ ९९ ॥

पुनरादायोदङ्प्रतिपद्यते ॥ १०० ॥

पुनरग्नीदाहवनीयोल्मुकमादायोदङ्प्रतिपद्यते ॥ १०० ॥

पशुश्चान्वक् ॥ १०१ ॥

पशुश्च उल्मुकमनुनीयते । एवं हि श्रूयते शमितैनं कण्ठे बध्वा नयति ॥ १०१ ॥

प्रतिप्रस्थातान्वारभत एनं वपाश्रपणीभ्यां काष्मर्यमयीभ्यां विशाखाविशाखाभ्याम् ॥ १०२॥

तं वपाश्रपणीभ्यां प्रतिप्रस्थातान्वारभत इति वचनात् ॥१०२॥

तमध्वर्युर्यजमानोऽध्वर्युम् ॥ १०३ ॥

अन्वारभत इत्यनुवर्त्तते ॥ १०३ ॥

वेदितृणे ऽध्वर्युरादायाश्राव्याहोपप्रेष्य होतर्हव्या देवेभ्य इति ॥ १०४ ॥

अनन्तरं यजमानस्याभिहितत्वादध्वर्युग्रहणम् ॥ १०४ ॥

रेवति यजमान इति वाचयति ॥ १०५ ॥

रेवति यजमान इत्यनुमन्त्रं यजमानं वाचयति ॥ १०५ ॥

शामित्रं नातीयात् ॥ १०६ ॥

शामित्रमतीत्य न गच्छेत् ॥ १०६ ॥

शामित्रेऽग्निं निदधाति ॥ १०७ ॥

यतो गृहीतोऽग्निस्तत्र निधानं मा भूदिति पुनः शामित्रग्रहणम् ॥ १०७ ॥

निर्मन्थ्यमेके ॥ १०८ ॥

अग्निं निदधाति । तुल्यश्रुतत्वाद्विकल्पः ॥ १०८ ॥

पश्चात्तृणमुपास्यति वर्षोवर्षीयसीति ॥ १०९ ॥

शामित्रस्य पश्चात् । मन्त्रश्चानेकयजमानके विपरिणम्यते॥१०९॥

तस्मिन्नेनन्निघ्नन्ति प्रत्यक्शिरसमुदक्-

पादम् ॥ ११० ॥

तस्मिन् स्तृणे पशुं प्रत्यक्शिरसमुदक्पादं निघ्नन्ति ॥ ११० ॥

प्राक्शिरसं वा ॥ १११ ॥

उदक्पादमिति वर्त्तत एव । शिरसोदिङ्नियमेपि सति पुरुषस्योदक्पादता वाचनिकत्वात्कर्त्तव्या । चोदकानुग्रहाय ॥ १११ ॥

संगृह्य मुखं तमयन्त्यवाश्यमानम् ॥ ११२ ॥

मुखग्रहणपूर्वकं तमनं यथा शब्दं न करोति ॥ ११२ ॥

वेष्केण वा ॥ ११३ ॥

तमयन्ति । वेष्कश्चावलक उच्यते ॥ ११३ ॥

एत्याहवनीयमावृत्यासते ॥ ११४ ॥

अध्वर्य्वादयः ॥ ११४ ॥

संज्ञपयान्वगन्नित्येव ब्रूयात् ॥ ११५ ॥

अनेन मन्त्रेण शमितोच्यते संज्ञपनं कुरु । अन्वगन्निति देवान्प्रत्यनुगच्छत्वित्यर्थः । तथा च श्रुतिः । स यदाहान्वगन्नित्येतर्हि ह्येष देवाननुगच्छति इति । एवं च कृत्वाऽनेकपाशुकेऽस्य पदस्य विपरिणामः ॥ ११५ ॥

स्वाहा देवेभ्य इति जुहोति ॥ ११६ ॥

पूर्णाहुतिविकारत्वात्सकृद्गृहीतेन तद्धर्मवत् ॥ ११६ ॥

संज्ञप्तः पशुरिति प्रोक्ते शेतान्नुमुहूर्त्तमित्याहासोमे ॥ ११७ ॥

संज्ञप्तः पशुरिति प्रोक्ते शेतान्नुमुहूर्त्तमित्याहासोमे । सोमग्रहणेन च निरूढोभिधीयते । तमेव हि प्रकृत्यै तत्पठ्यते । तस्मादुपांशु संज्ञप्तं ब्रूयाच्छेतान्नुमुहूर्त्तमिति ॥ ११७ ॥

देवेभ्यः स्वाहेति जुहोति ॥ ११८ ॥

पूर्णाहुति संस्कृतेनैवाज्येन ॥ ११८ ॥

न वैते जुहुयात् ॥ ११९ ॥

वाशब्दो विकल्पार्थः । एवं हि श्रूयते ते वा एते परिपशव्ये इत्याहुती स यदि कामयेत जुहुयादेते यद्यु कामयेतापि नाद्रियेतेति ॥ ११९ ॥

वपाश्रपणीभ्यां नियोजनीं चात्वाले प्रास्यति माहिर्भूरिति ॥ १२० ॥

रशनाबहुत्वेपि विकारे अहिपृदाकुशब्दौ उपमानार्थत्वान्न विपरिणम्येते । उपमायाश्चानङ्गत्वादविपरिणामः । अङ्गभूतं हि प्रकाशयितव्यम् । न चोपमाङ्गभूतेति । भूरिति तु पदं रशनापरत्वाद्विपरिणाम्यत एव ॥ १२० ॥

प्रतिप्रस्थातः पत्नीमुदानयेत्याह नेष्टरिति सोमे ॥ १२१ ॥

सोमग्रहणं च सोमविषयमेव । तत्र हि नेष्टा विद्यते । एवं च सति सोमबाह्येषु पशुषु प्रतिप्रस्थातरिति वक्तव्यम ॥ १२१ ॥

पान्नेजनहस्तां वाचयति नयन्नमस्त अतानेति ॥ १२२ ॥

पान्नेजनहस्तां पत्नीं नयन् वाचयति नमस्त आतानेति । पत्नीबहुत्वे च क्रत्वर्थत्वादेकैव पान्नेजनहस्ता । संस्कारार्थत्वात्सर्वासां वाचनमिति ॥ १२२ ॥

पशोः प्राणाञ्छुन्धति पत्नी ॥ १२३ ॥

प्राणशब्देन प्राणायतनान्यभिधीयन्ते । तानि पान्नेजनीभिः पत्नी शोधयतीत्यर्थः ॥ १२३ ॥

तानीदानीमाह—

मुखं नासिके चक्षुषी कर्णौ नाभिं मेढ्रं पायुं पादान्त्सꣳहृत्य वाचं ते शुन्धामीति प्रतिमन्त्रम् ॥ १२४ ॥

मेढ्रं प्रजननमुच्यते। शेषं प्रसिद्धमेव ॥ १२४ ॥

शेषेण यजमानश्च शिरः प्रभृत्यनुषिञ्चतो मनस्त इति शिरः ॥ १२५ ॥

पान्नेजनीशेषेण यजमानश्च शब्दादध्वर्युश्च। अध्वर्युः काण्वीयायां पठ्यते। अध्वर्युश्च यजमानश्चेति विलिङ्गत्वादभिधीयते। मनस्त इति शिरः शेषमन्त्रा यथार्थं विनियुज्यन्ते ॥ १२५ ॥

यत्ते क्रूरमित्यङ्गानि ॥ १२६ ॥

अनुषिञ्चत इत्यनुवर्त्तते ॥ १२६ ॥

शमहोभ्य इति पश्चात्पशोर्निषिञ्चतः ॥ १२७ ॥

संस्कारत्वाच्चाव्यतिरिक्ते। निषिञ्चामीति च मन्त्रेऽध्याहारः ॥ १२७ ॥

उत्तानं पशुं कृत्वाग्रेण नाभिं तृणं निदधात्योषध इति ॥ १२८ ॥

नाभ्यग्रे हि वपायाः स्थानम् ॥ १२८ ॥

स्वधित इति प्रज्ञातयाभिनिधाय च्छित्वाग्रꣳ सव्ये कृत्वा दक्षिणेन मूलमुभयतोनक्ति लोहितेन रक्षसामिति ॥ १२९ ॥

प्रज्ञाता च घृताक्ता प्रदेशोच्यते । यया पशुसमञ्जनं कृतम् । छित्वा सतृणं चर्म तृणाग्रं सव्ये पाणौ कृत्वा दक्षिणेन मूलं द्विगुणीकृत्योभयतोनक्ति लोहितेन रक्षसामित्यनेन मन्त्रेण ॥१२९॥

निरस्तमित्यपास्यति ॥ १३० ॥

अक्तं मूलम् ॥ १३० ॥

इदमहमित्यभितिष्ठति यजमानः ॥ १३१ ॥

रक्षोभिध्रायकत्वादुदकोपस्पर्शनम् । अत्र च बहुयजमानके एक एवाभितिष्ठति क्रत्वर्थत्वात् ॥ १३१ ॥

वपामुत्खिद्य वपाश्रपण्यौ प्रोर्णौति घृतेन द्यावापृथिवी इति ॥ १३२ ॥

प्रोर्णौति वपाया वेष्टयति । वपाश्रपण्योश्च उक्ताकार्योपस्या तन्मन्त्रेणोहितेनाशानं द्यौस्थः पृथिवीस्थ इति ॥ १३२ ॥

परिवास्य चात्वालेवसिच्य शामित्रे प्रतपति ॥ १३३ ॥

परिवासनं च च्छेदनमुच्यते ॥ १३३ ॥

शामित्रैकदेशमाहवनीये प्रास्यत्यग्नीत् ॥ १३४ ॥

तच्च पुनरुल्मुकमग्नीदादत्त इति पुनः शब्दोपादानान्निर्मन्थ्यपक्षे शामित्रैकदेशस्य न प्रासनमिति। कण्वानामपि च तत्पुनरप्यर्जतीति पठ्यते । पुनः शब्दस्य कृतार्थवृत्तित्वात् ॥ १३४ ॥

तृणाग्रं चाध्वर्युर्वायो वेरिति ॥ १३५ ॥

तृणाग्रमाहवनीये प्रास्यतीत्यनुवर्त्तते । अधस्तनपदार्थेऽग्नीयुक्तश्चशब्देन तस्यानुकर्षणं मा भूदित्यध्वर्युग्रहणम् । एवं चानेनैव ज्ञापकेन ज्योतिष्टोमे नेष्टा तोत इत्येनां वाचयतीत्युक्त्वा सोमक-

यथया च समीक्षमाणामित्यत्र च शब्देन नेष्टुरेवानुकर्षणं युक्तम् । तथा च ब्राह्मणम् । तं नेष्टा वाचयतीति प्रकृत्याथैनां सोमक्रयण्या संख्यापयतीत्याह ॥ १३५ ॥

उत्तरतस्तिष्ठन्प्रतप्य वपामन्तरायूपाग्नी हृत्वा दक्षिणतः प्रतिप्रस्थाता श्रपयति परीत्य ॥ १३६ ॥

उत्तरतस्तिष्ठन्नाहवनीये प्रतप्य वपामन्तरेण यूपाग्नी हृत्वा पूर्वेण यूपं परीत्य दक्षिणतो व्यवस्थितः प्रतिप्रस्थाता श्रपयतीति । सम्प्रदाये तु चात्वालावसेकादि प्रतिप्रस्थाता चात्वालेऽवसिच्य शामित्रे प्रतपतीति । प्रतपनं च श्रपणैकदेशः । तां पशुश्रपणे प्रतपति तथोहास्यात्रापि शृता भवतीति हि श्रूयते । श्रपणं च प्रतिप्रस्थातृकर्तृकमिति सम्प्रदायः ॥ १३६ ॥

वपां स्रुवेणाभिघारयत्यग्निराज्यस्येति ॥ १३७ ॥

अभिघारणं तु प्रकृतमेव । प्रकृतिलिङ्गसंयोगात् । अतश्च स्वाद्यमाज्यमिति ॥ १३७ ॥

स्तोकेभ्योनुवाचयति शृतायां शृताप्रचरेत्याह प्रतिप्रस्थाता स्वाहाकृतिभ्यः प्रेष्येति ॥ १३८ ॥

स्वाहाकृतिशब्देनोत्तमः प्रयाज उच्यते ॥ १३८ ॥

हुत्वात्रपामभिघारयति पृषदाज्यं ध्रुवां प्रथममाज्यभागौ चेत् ॥ १३९ ॥

चेच्छब्दो यद्यर्थः । यद्याज्यभागावत्र क्रियते इति । निरूढे ह्याज्यभागयोर्विकल्पः ॥ १३९ ॥

तेनोच्यते—

अत्राज्यभागौ कुर्वन् ॥ १४० ॥

आज्यभागौ कुर्वन्नत्रावसरे करोति । अग्नीषोमीये पुनराज्यभागौ नस्त एवेत्युक्तमेव ॥ १४० ॥

वपया चरिष्यन्नुपस्तीर्य हिरण्यमवधाय वपामवद्यन्नाहेन्द्राग्निभ्यां छागस्य वपायै मेदसोऽनुब्रूहीति ॥ १४१ ॥

उपस्तीर्य जुह्वामाज्यं हिरण्यशकलमवदधाति । अवद्यन्नाहेति च सहानुवाचनार्थम् । इन्द्राग्निभ्यां च्छागस्येति च प्रयोगोपप्रदर्शनार्थम् । न सौर्यादि व्युदासार्थम् । विकल्पेन ह्यत्र देवताः श्रूयन्त इति ॥ १४१ ॥

हिरण्यमवधाय द्विरभिघारणं सोमे ॥ १४२ ॥

निरूढे तु सकृदभिघारणम् । सा वा एषा पञ्चावत्ता वपा भवतीति वचनात् । सोमशब्दनं चाग्नीषोमीयोपलक्षणम् । अतस्तद्विकारेषु निरूढवर्जं सर्वत्र द्विरभिघारणमिति ॥ १४२ ॥

आश्राव्याहेन्द्राग्निभ्यां च्छागस्य वपां मेदः प्रेष्येति ॥ १४३ ॥

एतदपि प्रयोगोपप्रदर्शनार्थमेव ॥ १४३ ॥

प्रस्थितमिति च प्रसुते ॥ १४४ ॥

प्रसुतशब्देन सवनीयोऽभिधीयते । तद्विकारेषु च प्रस्थितशब्दे प्राप्ते सौत्रामण्यामुपसंहारादन्यत्र न भवतीति । उपसंहृतो हि प्रस्थितशब्दः सौत्रामण्यां प्रस्थितमिति च त्रिपशोः सर्वमिति ॥१४४॥

हुत्वा वपाश्रपण्यावनुप्रास्यति प्राचीं विशाखां प्रतीचीमितरां स्वाहाकृते इति ॥१४५॥

वपाश्रपणीबहुत्वे मन्त्रस्य विपरिणामः ॥ १४५ ॥

चात्वाले मार्जयन्ते सपत्नीका इदमापः प्रवहतेति ॥ १४६ ॥

मन्त्रलिङ्गाच्चाद्भिर्मार्जनमिति ॥ १४६ ॥

विशास्ति पशुमन्यः ॥ १४७ ॥

शशुर्हिंसायाम् । अन्यः पशुं हिनस्ति मारयतीत्यर्थः । कुत एतदन्य इति । संज्ञाभेदात् । अन्या हि संज्ञा शमितेति । संज्ञाभेदाच्च संज्ञान्तरे प्रतीतिर्भवति देवदत्तो यज्ञदत्त इति यथा ॥ १४७ ॥

एवं प्राप्त उच्यते—

ऋत्विजां वैको ऽप्रक्लृप्तत्वाच्छामित्रे ॥ १४८ ॥

ऋत्विजां वैकः करोति संज्ञपनं नान्यः कुत एतत् । अप्रक्लृप्तत्वाच्छामित्रे । शमनकर्मणि संज्ञपने नैव कश्चित्प्रकल्पितो दृश्यते वेदे। ननु शमितैनं कण्ठे बध्वा नयतीत्यस्ति प्रकल्पनम् । उच्यते । ऋत्विजामेवैकः शमनक्रियायोगाच्छमितेति । तस्मादृत्विजामेवैकः करोति ॥ १४८ ॥

किं च—

उपगादर्शनाच्च ॥ १४९ ॥

दृश्यते चायमर्थो यथा ऋत्विग्व्यतिरिक्तस्याप्रकल्पने ऋत्विजामेव कर्तृत्वमिति । हो इत्यृत्विऽज उपगायन्त्योमिति यजमान इत्यृत्विजमुपगानं दर्शयति । विधिरिति चेत् । नैवम् । हो इत्येवं परत्वाद्वाक्यस्य । न्यायप्राप्तान् ऋत्विजोनुवदिति । तद्विधाने हि वाक्यभेदप्रसङ्गः । तथा नाध्वर्युरुपगायतीति अध्वर्योः प्रतिषेधं ब्रुवन्नृत्विजामुपगानं दर्शयति । एवं तावत्केषां चिदयमेव सिद्धान्तः । अत्रोच्यते । यदुक्तमप्रक्लृप्तत्वाच्छामित्र इति । तन्नैवं येन ऋत्विग्व्यतिरिक्तस्य शमितुः प्रकल्पनं च दृश्यते । शमितैनं कण्ठे बध्वानयतीति । तथाशृतꣳ हविः शमितरिति । तत्र शमितारं दर्शयति । ननु च ऋत्विजामेवैकः शमनं कुर्वन् शमिता भविष्यति । तस्यैतद्दर्शनमिति ।

नेत्युच्यते । व्यापृतेषु ऋत्विक्षु शमितृशब्दश्रवणादन्य इति गम्यते।प्रतिप्रस्थाता पशुमन्वारभते तमध्वर्युर्मैत्रावरुणो ऽग्निगुप्रैषे अग्निगो होता ऽग्नीदुल्मुकमादायाग्रतो गच्छति । ब्रह्माकृताकृतप्रत्यवेक्षणो । एवं सर्वर्त्विक्षु व्यापृतेषु शमिता श्रूयते । अतस्तेभ्यो ऽन्य इति गम्यते । यश्चोपगादर्शनमुक्तम् । तदप्रकल्पितविषयम्।अपि च संज्ञपने ऋत्विक् कर्तृके समाख्ययाध्वर्युः प्राप्नोति । तत्राध्वर्युशमितृसंवादे इदमनुपपन्नार्थं भवति । अनेनाध्वर्युर्भवति शमितरितदेनो भवतीति ।तस्मादन्यः शमितेति।अथवानेन सूत्रेण विकर्त्तनमेव चिन्त्यते विशास्तिपशुमन्यः । अन्यः पशुविकर्त्तनं करोति ।न ऋत्विगिति। कुत एतदभिप्रवृत्तत्वात् । मारणे हि शमितुरभिप्रवृत्तत्वाद्विकर्त्तनेपि स एवेति । एवं प्राप्त उच्यते । ऋत्विजां वैकोप्रक्लृप्तत्वाच्छामित्रे । ऋत्विजामेवैकः पशुविकर्त्तनं करोति । कुत एतत् । अप्रक्लृप्तत्वाच्छामित्रे । शामित्रशब्देन विकर्त्तनमभिधीयते । तत्र नान्यः प्रकल्पितः । यत्र नाम नान्यः प्रकल्प्यते तत्रर्त्विजां कर्तृत्वम् । उपगादर्शनाच्चेति व्याख्यातम् ॥ १४९ ॥

विक्रयी त्वन्यः शूद्रसंयोगात् ॥ १५० ॥

विक्रयी पुनरन्यो भवति । कुतः । शूद्रसंयोगात् ॥ १५० ॥

अङ्गान्यवद्यत्यभञ्जन् ॥ १५१ ॥

अनवखण्डयन् ॥ १५१ ॥

हृदयं जिह्वां क्रोडः सव्यसक्थिपूर्वनडकं पार्श्वे यकृद्वृक्कौ गुदमध्यं दक्षिणा श्रोणिरिति जौहवानि ॥ १५२ ॥

क्रोडशब्देन वक्षोभिधीयते । यकृच्छब्देन च कालेयम् । गुदः पक्वाशयावस्थानं तन्मध्यम् । दक्षिणा च श्रोणिः । एतानि जौहवानि जुह्वामवदेयानि ॥ १५२ ॥

दक्षिणासक्थिपूर्वनडकम् ॥ १५३ ॥

सक्थिः सचतेरासक्तोऽस्मिन्काय इति खवकोऽभिधीयते । तस्य यः पूर्वः प्रथमो नडकः सोऽवदेयः ॥ १५३ ॥

गुदतृतीयाणिष्ठम् ॥ १५४ ॥

गुदतृतीयस्य लघुतरम् । १५४ ॥

सव्या च श्रोणिरित्यौपभृतानि ॥ १५५ ॥

उपभृत्यवदेयानि ॥ १५५ ॥

वर्षिष्ठमुपयड्भ्यः ॥ १५६ ॥

यद्वर्षिष्ठं महत्तरं गुदतृतीयं तदुपयड्ढोमार्थम् । एवमेव हि विभागश्रवणात् ॥ १५६ ॥

अवदानकाले प्रभागः ॥ १५७ ॥

जौहवौपभृद्विवेकार्थं ह्येतद्वचनम् ॥ १५७ ॥

वनिष्ठुजाघनी चावद्यति ॥ १५८ ॥

वनिष्ठुस्थूलान्त्रम् । जघनप्रदेशे भवा जाघनी प्रसिद्धैवम् ॥ १५८ ॥

क्लोमप्लीहाध्यृध्नीपुरीततं चेच्छन् ॥ १५९ ॥

अवद्येत । क्लोमो गलकनाडी।प्लीहः प्रसिद्धः । अध्यूध्नी ऊधप्रदेशस्योपरिभवति । पुरीतच्छब्देन हृदयमवच्छादितं येन तदुच्यते । पुरीतत्पुरीषं हृदयं तत्पुरीतता प्रच्छादयतीति श्रुतत्वात् । एतानि भागावदानानि । एषामत्र विकल्पः । अन्यत्र नियमः । अग्नीषोमीये त्वभाव एवेत्युक्तमेव ॥ १५९ ॥

उदरमेदोवाशिष्टं गुदे प्रास्यति कृशश्चेत् ॥ १६० ॥

उदरे यन्मेदः अङ्गग्रहणेनागृहीतं तदवशिष्टं गुदे प्रास्येद्यदि कृशः पशुर्भवति । कृशो दुर्बल उच्यते ॥ १६० ॥

श्वभ्र उवध्यमवधाय तस्मिंल्लोहितं रक्षसामिति ॥ १६१ ॥

श्वभ्रे गर्त्ते उवध्यमवधाय तस्मिंल्लोहितं रक्षसामित्यनेन मन्त्रेणावदधाति । प्रतिपत्तिश्चेयं, अतश्च बहुषु पशुषु सर्वेषां प्रतिपत्तिः ॥ १६१ ॥

शूले हृदयं प्रतृद्य शामित्रे श्रपयति ॥ १६२ ॥

सान्नाय्यविकारादुखायां श्रपणे प्राप्ते वचनात् शूले प्रतृद्य श्रपणम् । शूलस्य चोखाकार्यापत्त्या तन्मन्त्रेणादानम् ॥ १६२ ॥

पशुं चोखायाम् ॥ १६३ ॥

चशब्दाच्छामित्र एव श्रपयति । अत्र हि वचनं भवति । अथ यमेतमुदश्चं पशुश्रपणायाहरन्तीति ॥ १६३ ॥

पशुदेवतायै पुरोडाश एकादशकपालः ॥ १६४ ॥

अग्नीषोमीयोतः पशुस्तद्देवत्यः पशुपुरोडाश इति तद्देवत्यता विहिता । इह कपालार्थोयमारम्भः । अग्नीषोमीये एकादशकपालः पशुपुरोडाशोन्वयप्राप्त्या तदन्वयाच्चेहैकादशपालता भवतीत्युक्तम् ॥ १६४ ॥

अग्नीषोमीयो वा विशेषोपदेशात् ॥ १६५ ॥

वाशब्दः पक्षव्यावृत्तौ । न चैकादशकपालता कर्त्तव्या । किं कारणम् । येनाग्नीषोमीये देवताद्वित्वसामान्यविशेषणैकादशकपालता भवति । तथा चाभिषेचनीये नूद्यते । अग्नीषोमीयमेकादशकपालं पुरोडाशं निर्वपति तदनु देव स्वाꣳ हवीꣳषि निरुप्यन्ते इति । न चाग्नीषोमीयपशुपुरोडाशविकारः पश्वन्तरेषु पशुपुरोडाशविकार एवायम् । तस्मादेकद्विशब्दपरिमाणादिभिरिह कपालसंख्या । नैकादशकपाल इति ॥ १६५ ॥

अत्रैव हविष्कृदाह्वानमिज्यैकत्वात् ॥ १६६ ॥

हविष्कृदाह्वानाहननयोरेककालत्वमुक्तम् । स यत्रैष हविष्कृतमुद्वादयति तदेको दृषदुपले समाहन्ति इति । हविष्कृदाह्वानं च हन्त्यर्थम् । हविष्करोतीति हविः कृत् । तेनौषधे प्राप्नोति । आह्वानकालत्वाच्चाहननमपि अत्रैवाशङ्क्यते । तेनोच्यते हविष्कृदाह्वानमेवात्र भवति । आहननं तु पशुपात्रप्रोक्षणोत्तरकालमेव । तस्य हि पश्विज्यया सहैकवाक्यत्वमाह्वानस्य च पुरोडाशेज्ययेति ॥ १६६ ॥

अवद्यन्नाहेन्द्राग्निभ्यां पुरोडाशस्यानुब्रूहीति ॥ १६७ ॥

सहानुवाचनं द्वयोश्चारणवचनात् । इहाग्निग्रहणं तु प्रयोगप्रदर्शनार्थम् । सूर्यप्रजापत्योरपि पक्षे भावात् ॥ १६७ ॥

उपभृति चावद्यति स्विष्टकृद्वत् ॥ १६८ ॥

च शब्दादनन्तरमेव । स्विष्टकृदर्थस्यैव स्विष्टकृद्वदित्युच्यते। स्विष्टकृदवदानस्याकालत्वात् । अपि च स्विष्टकृदवदानं जुह्वां प्राप्तं तदिहोपभृतीति वत्करणम् ॥ १६८ ॥

इन्द्राग्निभ्यां पुरोडाशमिति प्रेष्यति ॥ १६९ ॥

प्रयोगप्रदर्शनार्थमेवेदमुक्तम् ॥ १६९ ॥

हुत्वा समानीयाग्नये प्रदाय ॥ १७० ॥

हुत्वा जौहवमौपभृतं समानीय अग्नये प्रदानं करोति ॥१७०॥

सगुणस्थानेऽगुणः ॥ १७१ ॥

स्विष्टकृद्गुणरहितायाग्नये ॥ १७१ ॥

कुत एतत्—

सर्वविकार एकत्वात् ॥ १७२ ॥

सर्वस्मिन्विकारे एकत्वं निर्गुणाभिधायकत्वं दृश्यते । अनुवाक्यायामिडामग्न इति निर्गुणमभिधानम् । तथा मैत्रावरुणप्रैषे होता

यक्षदग्निं पुरोडाशस्य जुषतामिति । याज्यायामपि च स्वदस्व हव्या-समिषो दिदीह्य इति । एवं सर्वत्र निर्गुणमभिधानम् । यदि चाध्वर्यु-रपि अनुवाचनप्रैषयोर्निर्गुणमभिधानमस्विष्टकृच्छब्दकं करोति तदा याज्यानुवाक्यप्रैषैः सहैकवाक्यता भवतीतरथा क्वचित्सगुणं क्वचि-न्निर्गुणमभिधानमित्यसामञ्जस्यं स्यात् ॥ १७२ ॥

यथाम्नातं वा वचिभेदात् ॥ १७३ ॥

यत्र यथाम्नातं तत्र तथैव कर्त्तव्यम् । भिन्नैर्वाक्यैर्याज्यापुरो-नुवाक्याप्रैषविकाराणां विधानम् । यथा वचनं सर्वत्र कर्त्तव्यता युक्ता । तेन वाशब्दात्पक्षो विपरिवर्त्तते१ ॥ १७३ ॥

इडामवद्यत्यक्रियान्यस्य समानार्थत्वात् ॥१७४॥

इडाग्रहणं शेषकार्योपप्रदर्शनार्थं न्यायस्य तुल्यत्वात् । न त-द्व्युदासार्थम् । इडादीन्येवावद्यति । पशुपुरोडाशे चोदकप्राप्तस्या-ग्न्यान्वाधानादेरदृष्टोपकारकस्याक्रिया । कुत एतत्समानार्थत्वात् । यमेवोपकारं पशौ प्रयाजादीनि कुर्वन्ति पशुपुरोडाशेपि तमेव । अतः पश्वर्थमनुष्ठितानां पुरोडाशेप्युपकारप्रसङ्ग इति ॥ १७४ ॥

न चोदनाभेदात् ॥ १७५ ॥

नैतदस्ति यदुक्तम् । किं कारणम् । चोदनाभेदात् । भिन्ने ह्येते चोदने । अग्नीषोमीयमजमालभेत । अग्नीषोमीयस्य वपाया प्रचर्या-ग्नीषोमीयमेकादशकपालं पुरोडाशं निर्वपतीति । यत्र ह्येकेन शब्दे-नोपादाय फले विधानम् यथा वैश्वदेवेन प्रजाकामं याजयेदिति । तत्रोपादेयत्वेन विधानात् साहित्यविवक्षायाम् युगपदङ्गोपकारा-पेक्षा । तेनागृह्यमाणविशेषात्सन्निधानाविशेषाच्च तन्त्रेणाङ्गोपकार-

१ अपरे त्वेवमाहुः– अत्र शाखान्तरे श्रूयते अग्निं यजतीति, तेन याग एव निर्गुणोऽग्निर्विहितः, अतो यो यागे निर्गुणो ऽग्निर्विहितः स सर्वविकारो भवति, सर्वेषां होतॄणामध्वर्यूणां च विकारो भवति, कुतः, एकत्वात्, यतोऽनुवाचनप्रैषयाज्यादिष्वेक एक एवायमग्निर्न भिन्नः । एकश्च क्वचित्सगुणः क्वचिदगुण इति न विरुद्धरूपतामर्ह-ति, तस्मात्सर्वत्र निर्गुण एवेति सिद्धान्तः ।

सम्बन्धः । इह पुनश्चोदनाभेदादेतन्न सम्भवति ॥ १७५ ॥

कालगुणभेदाच्च ॥ १७६ ॥

अन्यस्मिन्काले पशोः प्रयाजाः कृता अन्यकालीनस्य कथं पुरोडाशस्योपकुर्युरिति। तथा गुणभेदाच्च । एकादशसंख्यागुणका हि प्रयाजाः पशोः पञ्चसंख्यागुणकाः पुरोडाशस्य । अतोऽपि न तन्त्रेणोपकारसम्बन्धः । एवमाचार्येण पक्षद्वयोपन्यासः कृतः । अत्र य एव न्याय्यतरः स एवाङ्गीकर्त्तव्यः । कश्चासौ । अक्रियान्यस्य समानार्थत्वादिति । अङ्गोपकारस्य हि आम्नानसामर्थ्यादन्त्येन यावत्सम्बन्ध इष्यते । इतरथाङ्गप्रधानयोरसम्बन्ध एव भवति । यदाङ्गानि न तदा प्रधानानि प्रधानकाले च नाङ्गानीति । एवं च सति यद्यप्यत्र चोदनाभेदस्तथापि प्रयाजकृतापूर्वस्य विद्यमानत्वात् पशुपुरोडाशेऽपि प्रसज्यत एव । चोदनाभेदोऽत्राकारणमिति । तथा कालभेदो गुणभेदश्च । तस्मात्साध्वभिहितमिडामवद्यत्यक्रियान्यस्य समानार्थत्वादिति ॥ १७६ ॥

पशुर्दक्षिणा धेनुर्वरो वा मार्जिते ॥ १७७ ॥

पशुरेव पशोर्दक्षिणेति पुंपशुर्गृह्यते । वरशब्देन स्वाधीनं द्रव्यमभिरुचितमुच्यते । मार्जितग्रहणाच्च सन्निधानात्पशुपुरोडाशेडामार्जनं गृह्यते । तथा च श्रुतिः । पशुपुरोडाशेडायामेवोपहूतायां दक्षिणा नयेदिति । आचार्येण संज्ञपनं वपोद्धरणप्रसङ्गेन पशुविकर्त्तनाद्युखाप्रक्षेपणान्तमभिहितम् । अवसरः पुनरयम् । येनैवं श्रूयते । अथ यद्वपया प्रचर्यैतेन पुरोडाशेन प्रचरतीति प्रकृत्य तस्माद्वपया प्रचर्यैतेन पुरोडाशेन प्रचरत्येषत्वेवैतस्य बन्धुर्यत्र क्वचैष पशुं पुरोडाशोऽनुनिरुप्यतेऽथ पशुं विशास्तीति । तथा शाखान्तरे अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशमनुनिर्वपतीति। अतोऽत्रैव पशुविकर्त्तनाद्युखाप्रक्षेपणान्तम् ॥ १७७ ॥

१ततः शमितारं शास्ति त्रिः प्रच्यावयता-

---

१ अयमर्थः— हे शमितस्त्वं पशुं त्रिः प्रच्यावयतात् प्रच्यावय उत्कालय त्रिःप्रच्युतस्य ऊर्ध्वमावृत्तस्य हृदयमुपरि स्थापयेति ।

त्रिः प्रच्युतस्य हृदयमुत्तमं कुरुताद्यत्वा
पृच्छा शृतꣳ हविः शमिता३रिति शृतमित्ये
व ब्रूतान्न शृतं भगवो न शृतꣳ हीति ॥ १७८ ॥

हृदयमुत्तमं कुरुतादित्यनेकपाशुके विपरिणम्यते । यत्वा पृच्छादित्येवमादि द्वितीयमनुशासनमतस्तृतीयसवने शमित्रनुशासनप्रभृतीनि यदुक्तं तदेवमादिप्रत्येतव्यम् । पूर्वानुशासनस्य त्वर्थो निर्वृत्त एव ॥ १७८ ॥

त्रिःप्रच्युते हृदयं प्रवृह्योत्तमं करोति ॥ १७९ ॥

प्रच्यावनं चोत्सेचनमुच्यते । वृहन्निष्कर्षः शूलान्निष्कृष्य हृदयमुत्तममवदानोत्तमं मांसानां करोति ॥ १७९ ॥

शूलं चाभूमौ ॥ १८० ॥

करोतीति वर्त्तते ॥ १८० ॥

जुह्वा पृषदाज्यस्यादायोपनिष्क्रम्य पृच्छति-
शृतꣳ हविः शमिता३रिति त्रिरभिक्रामम् ॥ १८१ ॥

जुह्वा पृषदाज्यं गृहीत्वा चात्वालोत्करावन्तरेणोपनिष्क्रम्य त्रिः कृत्वः पृच्छति । शृतं हविः शमिता३रित्यभिक्रम्याभिक्रम्य ॥ १८१ ॥

प्रोक्ते तद्देवानामित्याहोपाꣳशु ॥ १८२ ॥

शृतमिति प्रोक्ते शमित्रा प्रतिप्रश्ने तद्देवानामित्याहाध्वर्युरुपांशु ॥ १८२ ॥

---

यत् यदा त्वां कश्चित्पृच्छात्पृच्छेत् कथम् शृतꣳहविः शमिता३रिति तदा त्वं शृतमित्येव ब्रूतात् ब्रूहि । नहि पुनरेवं ब्रूतात् कथं शृतं भगव इति । तथा एवमपि न ब्रूतात् कथं शृतꣳहीति । तदुक्तं भवति, शृतमित्येतावदेव प्रतिवक्तव्यम्, भगवच्छब्दो वा हिशब्दो वा न परत उच्चारणीय इति ।

सन्ते मन इति हृदयमभिघार्य सर्वम् ॥ १८३ ॥

पशुमभिघारयतीति सूत्रशेषः। पृथक् च हृदयग्रहणात् पृषदाज्येनाभिघारणम। इतरस्येतरेणाज्येन तूष्णीमेव। प्रकृतत्वादाभिघारणस्य। मन्त्रस्तु वचनात्तस्यैव हृदय एव ॥ १८३ ॥

पश्वसी वपावद्धृत्वा दक्षिणतः प्रतिप्रस्थाता वेद्यां प्लक्षशाखास्ववद्यति ॥ १८४ ॥

वपावदित्यन्तरायूपाग्न्योर्हृत्वा दक्षिणतो वेद्यामासादयति। उत्तरत आसादने प्राप्ते वचनाद्दक्षिणत इत्युच्यते। उखास्थस्य साम्नाय्यविकारात्सादने प्राप्ते वचनाद्वेद्यामित्युच्यते प्रतिप्रस्थाता तु प्लक्षशाखास्ववद्यति वचनात्। आलम्भनान्तमध्वर्योरेव ॥ १८४ ॥

जुहूपभृतोरुपस्तृणीते वसाहोमहवन्यां पात्र्यां च मनोतायै हविषोवदीयमानस्यानुब्रूहीत्युक्ते स्रुचोरवद्यति यथोक्तं द्विर्द्विः ॥ १८५ ॥

यथोक्तग्रहणाज्जौहवानि जुह्वामौपभृतान्युपभृति। द्विरवदानं वचनात् तानि द्विर्द्विरवद्यतीति ॥ १८५ ॥

अशेषे गुदतृतीये ॥ १८६ ॥

गुदतृतीये पुनरशेषे गृह्यते ॥ १८६ ॥

वपावद्धिरण्यम् ॥ १८७ ॥

अधस्ताच्चोपरिष्टाच्च। मनोताप्रैषस्तु प्रतिप्रस्थातुरेवेति सम्प्रदायः ॥ १८७ ॥

रेडसीति वपां गृहीत्वा द्विरभिघार्य प्रयुतमिति पार्श्वेन संसृजत्यसिना वा ॥ १८८ ॥

रेडसीत्यनेन मन्त्रेण वसाहोमहवन्यां वसां गृहीत्वा द्विरभिघार्य प्रयुतमित्यनेन मन्त्रेण पार्श्वेनासिना वाऽऽलयति ॥ १८८ ॥

शेषमिडापात्र्यामासिच्य क्रोडमनस्थीनि च प्रास्यति श्रोणिवर्जम् ॥ १८९ ॥

चोदकपरिप्राप्त्या ग्रातः पूर्वं प्राशित्रग्रहणम् । तत आसेचनादि ॥ १८९ ॥

जाघनीगुदन्निधायाहेन्द्राग्निभ्यां च्छागस्य हविषोऽनुब्रूहीति ॥ १९० ॥

जाघनीगुदनिधानमुच्यते पशुसम्मर्शनाभावप्रज्ञप्त्यर्थम् । प्रतिपत्तिर्हि पशुसम्मर्शनम् । न चैते प्रतिपाद्ये कार्यार्थत्वात् । इन्द्राग्निभ्यां छागस्य हविषो ऽनुब्रूहीति प्रयोगप्रदर्शनार्थमुक्तमेव ॥ १९० ॥

आश्राव्याहेन्द्राग्निभ्यां च्छागस्य हविः प्रेष्येति ॥ १९१ ॥

एतदपि प्रयोगोपप्रदर्शनार्थमेव ॥ १९१ ॥

प्रस्थितमिति च प्रसुते ॥ १९२ ॥

प्रसुतशब्देन सवनीयो लक्ष्यते नानुबन्ध्योपि । येन सवनीयविकारे त्रिपशौ प्रस्थितशब्दमुपसंहरति । प्रस्थितमिति च त्रिपशोः सर्वमिति ॥ १९२ ॥

अर्धर्चान्तरे याज्यायै वसैकदेशं जुहोति घृतं घृतपावान इति ॥ १९३ ॥

याज्याया इति षष्ठ्यर्थे चतुर्थी ॥ १९३ ॥

दैवतं हुत्वा प्रदक्षिणमावृत्य जुह्वा पृषदाज्यस्योपघ्नन्नाह वनस्पतये ऽनुब्रूहीति ॥१९४॥

प्रदक्षिणग्रहणमितरथावृत्तिव्युदासार्थम् । उपपूर्वो हन्तिश्च

ग्रहणार्थो ऽन्यत्रापि दृष्टः । अथ स्रुवेणोपहत्याज्यमिति । समिधाज्यस्योपहत्येति च ॥ १९४ ॥

आश्राव्याह वनस्पतये प्रेष्येति ॥ १९५ ॥

अस्य च स्विष्टकृद्विकारत्वं सङ्कर्षे उक्तम् । देवतासङ्कीर्त्तनानि चात्र स्विष्टकृद्वदुपलभ्यन्ते । प्रयोजनम् नोपांशुयाजविध्यन्तः स्वरश्च सौविष्टकृत इति ॥ १९५ ॥

हुत्वा समानीय सौविष्टकृतम् ॥ १९६ ॥

हुत्वा वानस्पत्यं समानीय सौविष्टकृतं द्रव्यमौपभृतं स्विष्टकृद्यागं करोतीति सूत्रशेषः । समानयमाने च स्विष्टकृदनुवाचनं कर्त्तव्यम् । अथ यान्युपभृत्यवदानानि भवन्ति तानि समानयमान आहेति वचनात् ॥ १९६ ॥

प्रत्येत्य वा दिशो व्याघारयति वसाशेषेण वाजिनवत् ॥ १९७ ॥

न्यायास्तत्रस्थस्यैव व्याघारणे प्राप्ते वाशब्देन पक्षं व्यावर्त्य जुहोतित्वात् जुहोतिस्थानमुच्यते । वाजिनवत् व्याघारयति॥ १९७ ॥

इयांस्तु विशेषः—

सर्वं जुहोति ॥ १९८ ॥

ऐन्द्रः प्राण इति पशुं सम्मृशति ॥ १९९ ॥

पशु शब्दश्च मांसोपलक्षणार्थः । तानि चोपयुक्तव्यतिरिक्तानि ग्रहीतव्यानि । तत्संस्काराद्विमाथाशङ्कादर्शनाच्च । विमाथाशङ्का हि तत्रैव भवति नोपयुक्तेषु । अथ पशुं संमृशतीति प्रकृत्याहाथ यत्पुरा संमृशति य इम उपतिष्ठन्ते विविमथिष्यन्त इति शङ्कमान इति । तस्मात्प्राशित्रेडाजाघनीगुदव्यतिरिक्तानां सम्मर्शनम् ॥ १९९ ॥

अवदाय वेडां प्राक् प्रदानात् ॥ २०० ॥

पशुसम्मर्शनम् । वाशब्दो विकल्पार्थः । तच्च जाघनी गुदनिधानोत्तरकालं प्राक्प्रदानादित्युक्तत्वात् ॥ २०० ॥

इडामादधाति ॥ २०१ ॥

वैकृतावसरे प्राकृतानुवृत्त्यर्थम् । अतश्च प्राशित्रप्रदानं पूर्वम् ॥ २०१ ॥

उपहूतायां वनिष्ठुमग्नीधे ॥ २०२ ॥

प्रयच्छति ॥ २०२ ॥

अध्यूध्नीं होत्रे ॥ २०३ ॥

समर्पयति ॥ २०३ ॥

अवान्तरेडा वा ॥ २०४ ॥

अध्यूध्नी भवति । अवान्तरेडाकार्येऽध्यूध्नी भवतीत्यर्थः । अस्मिंश्च पक्षे ऽवान्तरेडा न दीयते । क्लोमादीनामप्यस्मिन्नेवावसरे समर्पणम् । शाखान्तरात् । क्लोमं ब्रह्मणे प्लीहं यजमानाय पुरीततमध्वर्यव इति । एषां चात्र विकल्प इत्युक्तमेव ॥ २०४ ॥

मार्जिते प्रेष्यत्यग्नीदौपयजानङ्गारानाहरोपयष्टरुपसीद ब्रह्मन्प्रस्थास्यामि समिधमाधायाग्निमग्नीत्सम्मृड्ढीति ॥ २०५ ॥

मार्जितग्रहणं च पवित्रप्रतिपत्त्युल्मुकसमासोपलक्षणार्थमपि । येन वैकृतप्रैषसमनन्तरं ब्रह्मन्प्रस्थास्यामीति प्राकृतमाह ॥ २०५ ॥

शामित्रादङ्गारानाहृत्य वेदिश्रोण्यां निवपत्युत्तरस्याम् ॥ २०६ ॥

अग्नीदुपयड्ढोमार्थम् ॥ २०६ ॥

आग्नीध्रीयाद्वा सोमे होतृधिष्ण्ये ॥ २०७ ॥

आग्नीध्रीयाद्वा अङ्गारानाहरति । सोमे शामित्राद्वेति विकल्पः । इयांस्तु विशेषो होतृधिष्ण्ये निवापः ॥ २०७ ॥

प्रतिप्रस्थातोपयजति गुदतृतीयस्य प्रच्छेद-
मनुयाजेषु समुद्रं गच्छेति प्रतिमन्त्रम् ॥ २०८ ॥

प्रतिप्रस्थातोपयजति गुदतृतीयस्य प्रच्छिद्य प्रच्छिद्य समुद्रं गच्छेति प्रतिमन्त्रम् । अङ्गाराहरणस्य दृष्टार्थत्वात् । अङ्गारेषु जुहोति हस्तेनैव हस्तेन गुदकाण्डं जुहोतीति वचनात् ॥ २०८ ॥

प्रतिवषट्कारं हुत्वा मनो म इति
मुखोपस्पर्शनम् ॥ २०९ ॥

प्रतिप्रस्थाता करोतीति वाक्यशेषः ॥ २०९ ॥

अनुयाजान्ते स्वरुं जुहोति दिवं ते
धूम इति ॥ २१० ॥

अन्तग्रहणाच्च धारानुयाजान्ते स्वरुहोमः । चोदितार्थाभिधानाच्च मन्त्रस्य स्वरुबहुत्वे विपरिणामः ॥ २१० ॥

पशुदेवतावनस्पतिभ्यां स्रुग्व्यूहनम् ॥ २११ ॥

स्विष्टकृद्विकारत्वात् वनस्पतेरप्राप्तं सङ्कीर्त्तनं वचनादभिधीयते । पशुदेवतायाश्च गुणार्थमुच्चारणम् ॥ २११ ॥

जाघन्या पत्नी संयाजनम् ॥ २१२ ॥

आज्यकार्यापत्तेश्च आसादनालम्भने अस्याः क्रियेते । जाघनी बहुत्वे चासादनमन्त्रे विपरिणामः ॥ २१२ ॥

उत्तानाया देवानां पत्नीभ्यो ऽवद्यति ॥ २१३ ॥

वचनात् ॥ २१३ ॥

इडां च ॥ २१४ ॥

उत्तानाया एव ॥ २१४ ॥

परिवर्त्त्याग्नये गृहपतये ऽग्नीधे च ॥ २१५ ॥

अवद्यति वचनादेव ॥ २१५ ॥

आज्येन पूर्वे ॥ २१६ ॥

द्वे कर्मणी कर्त्तव्ये। पत्नी साधनक एव हि यागे जाघनी विहिता अथ जाघन्याः पत्नीः संयाजयन्तीति ॥ २१६ ॥

सर्वा वा जाघन्याविशेषात् ॥ २१७ ॥

सर्वा एव वा जाघन्या कर्त्तव्याः । कुत एतत् । पत्नीसंयाजत्वाविशेषात् । ते वै पत्नीः संयाजयिष्यन्तः प्रतिपरायन्तीति प्रकृत्य चतस्रो देवता यजतीति ॥ २१७ ॥

बर्हिर्हुत्वापो गच्छन्ति हृदयशूलमादाय ॥२१८॥

अथ हृदयशूलेनावभृथं यन्तीति श्रुतेः । अवभृथशब्दश्चात्रौपचारिक अपांगमनसम्बन्धात् । अतश्च यागो न भवति । तथाच-सूत्रकारः । बर्हिर्हुत्वापो गच्छन्ति हृदयशूलमादायेति । शूलस्यादानमात्रं न शूलेनावभृथमिति । प्रतिपत्तित्वाच्चानेकशूले सर्वेषां प्रतिपत्तिः ॥ २१८ ॥

आहवनीयं वोपस्थाय व्रतादीनि चेत् ॥ २१९ ॥

वाशब्दो विकल्पार्थः । यत्र व्रतादीनि तानि च हविर्यज्ञविध इति ॥ २१९ ॥

अभ्यवेत्य शुष्कार्द्रसन्धौ हृदयशूलमुपगूहति शुगसि तमभिशोच योऽस्मान्द्वेष्टि यं च वयं द्विष्मो मापो मौषधीरिति च ॥ २२० ॥

अभ्यवेत्येत्यवतीर्योदकं शुगसीत्यनेन मन्त्रेण । उदितार्थाभिधानाच्चास्यानेकशूले विपरिणामः ॥ २२० ॥

ग्लायन्नुदपातं निषिच्य पूर्वेण यूपं यथोक्तमुपगूहति ॥ २२१ ॥

ग्लैहर्षक्षये। ग्लायन्निति उदकं प्रतिगमनमनुत्सहन्नग्रेण यूपमुदपात्रं निषिच्य शुष्कार्द्रसन्धौ यथोक्तं शूलमुपगूहते ॥ २२१ ॥

धाम्नो धाम्नः सुमित्रिया न इत्युपस्पृशन्त्यपः ॥ २२२ ॥

मन्त्राभिधानसामर्थ्यात्। वरुणशब्देन ह्यापोऽभिधीयते ॥ २२२॥

उपगूहनशेषो वा पूर्वः ॥ २२३ ॥

पूर्वो मन्त्र उपगूहनशेष एव भवति। विशेषेणोपगूहन एव पठ्यते इति ॥ २२३ ॥

अभिमन्त्रणं वोत्तरेण ॥ २२४ ॥

सुमित्रयान इत्यनेनाभिमन्त्रणं वा भवत्यपामुपस्पर्शनं वा। माध्यन्दिनायायां ह्यभिमन्त्रणं पठ्यते अथाभिमन्त्रयन्ते सुमित्रिया न इति। काण्वीयायां चोपस्पर्शनम् अथाप उपस्पृशन्ति सुमित्रियां न इति। अतो विकल्पः ॥ २२४ ॥

न सोमेनूबन्ध्या वर्जम् ॥ २२५ ॥

स चायं शूलावभृथः सोमे नूबन्ध्यावर्जं न भवति। एवं हि श्रूयते स वै नाग्नीषोमीयस्य पशोः करोति नाग्नेयस्यवशाया एवानूबन्ध्याया इति। नञश्चात्र न प्रतिषेधार्थता। अतुल्यप्रमाणशिष्टत्वात्प्रकरणेन ह्यग्नीषोमीयस्य प्राप्नोति वाक्येन प्रतिषेधः। विकल्पस्य चान्याय्यत्वात्। अन्याय्यो हि विकल्पः। पक्षे बाधात्। अतः पर्युदासरूपेण नाग्नीषोमीयस्य करोति नाग्नेयस्येति। अग्नीषोमीयसवनीयव्यतिरिक्तेषु शूलावभृथ इति वसाया एवानूबन्ध्याया इति नित्यानुवादः ॥ २२५ ॥

वरुणप्रघासवत्समिदाधानम् ॥ २२६ ॥

भवतीति सूत्रशेषः ॥ २२६ ॥

व्रतं विसृज्यापराग्नीनां पूर्वे चतुर्गृहीतं यूपा-

## हुतिवत् ॥ २२७ ॥

व्रतविसर्गोपदेशाच्च यत्रैव व्रतं तत्रैव भवति नाग्नीषोमीय इति ॥ २२७ ॥

## सविहारोतः ॥ २२८ ॥

अतः परमयं विहारः। अत्र कर्मापवर्गा दीयन्त इति केचित्। तदयुक्तम्। अतिप्रणीतस्य पश्वङ्गाभिनिवृत्यर्थत्वात्। तदङ्गत्वाच्च कर्मापवर्गायाः। नित्याधार्यार्थमित्यपरे। अतिप्रणीतो हि पश्वर्थमुद्धृतस्तदपवर्गे च स एव विहारो न्याय्य इति। सम्प्रदाये तु स विहार इत्यग्निहोत्रार्थमुच्यते। अग्निषोमीयविकारत्वादस्तमिते परिसमाप्तिरस्य। तन्त्रं चाग्निहोत्रविहारस्य धारकमतः सविहार इत्यग्निहोत्रार्थमुक्तम्। गताश्रियः पक्षस्त्वत्र न्याय्यतर इवाभाति। अग्निहोत्रार्थत्वं हि विहारस्यासम्भव एव। इदमग्निहोत्रं पशुयागान्ते वा हुयेत तन्त्रमध्ये वा। यदि तन्त्रमध्ये प्रसङ्गादतिप्रणीत एव प्राप्नोति। अथान्ते ततोपवृत्तकर्मा लौकिक इति पुनरुद्धरणं प्रयोजयति। यत्पुनरुच्यते अग्निहोत्रं विहारस्य धारकमिति। तदनुपपन्नमन्यार्थे विहारे तत्परिसमाप्तौ कर्मान्तरं विहारस्य धारकमिति दुःशक्यं वक्तुम् ॥ २२८ ॥

## समारूढनिर्मथिते वा ॥ २२९ ॥

अपराग्नीनां पूर्वे इयमाहुतिर्भवति ॥ २२९ ॥

## यथोत्साहं दद्यादस्याम् ॥ २३० ॥

ततो यच्छक्नुयात्तद्दद्यादिति वचनात् ॥ २३० ॥

## अग्निं प्रणीय सदो हविर्द्धानाग्नीध्रहोतृधिष्ण्यान्यथोक्तं गृहीत्वाज्यान्यग्नीध्रप्रणयनमग्नीषोमीयदर्शनात् ॥ २३१ ॥

सद आदीनि ह्यग्नीषोमीये दृश्यन्ते। सदसि स्थितेन होत्रा वषट्कारः कृतः। उत यत्सुन्वन्ति तत्सामिधेनीरन्वाहेति हविर्द्धाने

सामिधेन्यनुवचनम् । अग्नीध्रे प्रत्याश्रावणम् । होतृधिष्ण्य उपयद्धोमः । गृहीत्वाज्यान्याग्नीध्रप्रणयनम् । आग्नीध्रीयादङ्गाराहरणम् । एतानि ह्यग्नीषोमीये दृष्टानि तद्विकाराच्चात्रापि भवन्तीति ॥ २३१ ॥

## न सोमार्थत्वात् ॥ २३२ ॥

सोमार्थानि हि सद आदीनि । सोमं प्रकृत्य श्रूयते । तदुदरमेवास्य सदः शिर एवास्य हविर्धानं बाहव आग्नीध्रीयश्च मार्जालीयश्चेत्येवमादि ॥ २३२ ॥

## प्रसङ्गाद्दर्शनम् ॥ २३३ ॥

सोमप्रयुक्तानामेषां प्रासङ्गिकमग्नीषोमीये दर्शनम् ॥ २३३ ॥

दर्विहोमेष्विदानीं चिन्त्यते । किमपूर्वा दर्विहोमाः उत पूर्ववन्त इति । तत्रेदमुच्यते—

## दर्विहोमाः पौर्णमासधर्मा जुहोत्यविशेषात् ॥ २३४ ॥

दर्विहोमास्त्रैयम्बकादयः । ते पौर्णमासधर्मा भवन्ति । पौर्णमासशब्देन दर्शस्याप्युपलक्षणम् । पयः साधनकेषु हि द्रव्यसामान्यात् सान्नाय्यधर्मा इष्यन्ते । कुत एतत् पौर्णमासधर्मा इति । जुहोत्यविशेषात् । जुहोति यजत्योर्यतो ऽविशेषः । उभयत्र हि द्रव्यदेवतात्वम् । त्रैयम्बकान्निर्वपति रौद्रानिति । निर्वपतिशब्देनौषधमवगम्यते । सौर्यादिषु दृष्टत्वात् । तथान्यत्र धानाभिर्जुहोति सक्तुभिर्जुहोति लाजैर्जुहोतीति द्रव्यविधानम् । मान्त्रवर्णिक्यो देवता । ततोभयत्र द्रव्यदेवतावत्त्वाद्यजतिजुहोत्योरविशेषः । अधर्मकाश्च दर्विहोमाः । धर्मापेक्षायां च सत्यां द्रव्यदेवतावत्त्वसामान्यात्पौर्णमासधर्मा इति युक्तरूपता ॥ २३४ ॥

किं च—

## जुहूदर्शनाच्च ॥ २३५ ॥

मारुतानि प्रकृत्य श्रूयते । कथमस्यैते पुरोनुवाक्यवन्तो याज्यवन्तो वषट्कृते स्रुचा हुता भवन्तीति प्रश्नपूर्वकमाह एतेषां वै

सप्तपदानां मारुतानां यानि त्रीणि प्रथमानि पदानि सा त्रिपदा गायत्री पुरोनुवाक्याथ यानि चत्वार्युत्तमानि सा चतुष्पदा त्रिष्टुब्याज्येदमेव कपुत्सलमयं दण्ड इति स्रुगनुग्रहः । एतेषां च पौर्णमास इष्टानामनुग्रहं ब्रुवन्पौर्णमासधर्मित्वं दर्शयति ॥ २३५ ॥

एवं सर्वधर्मपरिप्राप्ताविदमाह—

तूष्णीमनर्थलुप्ताः ॥ २३६ ॥

वचनान्मन्त्रनिवृत्तिः । अनर्थलुप्ता इति । दृष्टेनार्थेनालुप्ता इत्यनर्थलुप्ता । यथैकाग्नित्वेपि गार्हपत्यश्रवणादिनीति ॥ २३६ ॥

एकाग्नयः ॥ २३७ ॥

एकाग्निसाध्या एव पदार्था भवन्ति ॥ २३७ ॥

अप्रयाजा अननुयाजा असामिधेनीकाः ॥ २३८ ॥

तूष्णीमित्युक्तत्वात्सामिधेनी सहचरितकाष्ठनिवृत्तिः ॥२३८॥

अनिगदाः ॥ २३९ ॥

निगदशब्देन स्विष्टकृल्लक्ष्यते । अस्विष्टकृत इत्यर्थः ॥ २३९ ॥

प्रतिनिगद्य होमाः ॥ २४० ॥

तूष्णीमित्युक्तत्वाद्देवतां प्रतिनिगद्य होम उच्यते । वषट्कारनिवृत्त्यर्थमुच्यते ॥ २४० ॥

स्वाहाकारप्रदानाः ॥ २४१ ॥

परतन्त्रोत्पत्तयो जुहोतिमात्राः ॥ २४२ ॥

परतन्त्रोत्पत्तयः । यथा वाजपेये ऽन्नहोमे सर्वमेधे च तन्त्रस्य विद्यमानत्वादिति न्यायसूत्रमेतत् ॥ २४२ ॥

पाकयज्ञपशुष्वाग्नीषोमीयविध्यन्त इष्यते तत्प्रसङ्गेन पाकयज्ञविषयमिदमाह—

पाकयज्ञेष्ववत्तस्यासर्वहोमः ॥ २४३ ॥

पाकयज्ञशब्देन च स्मार्त्ता होमा उच्यन्ते । तत्र होमाय यदवत्तं तस्य असर्वस्य होमः कर्त्तव्यः ॥ २४३ ॥

हुत्वा च शेषप्रासनम् ॥ २४४ ॥

कुत एतत्—

अग्निहोत्रे तदस्य पाकयज्ञस्येवेति श्रुतेः ॥२४५॥

अग्निहोत्रे हिं शेषप्राशनं विहितम् । अथैतदग्नौ हुत्वोत्सृप्याचामति निर्लेढि तद्यस्मै पाकयज्ञेन संस्तवं करोति तदस्य पाकयज्ञस्य रूपं पशव्यो हि पाकयज्ञ इति । यदि पाकयज्ञे प्राशनमुचितम् तत एतदुपपद्यते नान्यथेति ॥ २४५ ॥

अग्नीषोमीयात्पशुषु ॥ २४६ ॥

प्राशित्रसाधनकत्वसामान्याद्विद्ध्यन्तप्रवृत्ताविदमाह ॥ २४६ ॥

शाखानियोजनम् ॥ २४७ ॥

शाखायां पशुनियोगः कर्त्तव्यो न यूपे ॥ २४७ ॥

वपां हुत्वा त्रीणि पञ्च सर्वाणि वावद्यति न सर्वाण्येवेति ॥ २४८ ॥

सर्वाभावे शेषात्स्विष्टकृतः ॥ २४९ ॥

प्रधानावदानशेषात्स्विष्टकृदर्थं ग्रहीतव्यम् ॥ २४९ ॥

स्थालीपाकेन सह प्रदानम् ॥ २५० ॥

सहयुक्ते प्रधाने तृतीयाविभक्तिर्भवतीति । तथा च सहत्वमात्रं स्थालीपाकस्य नावदानैस्तुल्यता । प्रयोजनमन्तराये प्रयोक्तृत्वमिति ॥ २५० ॥

पूर्णपात्रो दक्षिणा वरो वा वरो वा ॥ २५१ ॥

ओषधस्य मानपात्रं पूर्णं पूर्णपात्रः । स्वाधीनं द्रव्यमभिरुचितं च वरशब्दवाच्यमिति ॥ २५१ ॥

इति षष्ठोऽध्यायः समाप्तः ।

# सप्तमोऽध्यायः ।

## सोमयागनिरूपणम् ।

श्रुत्यर्थमनुविदधता ऽचार्येण हविर्यज्ञा अनुविहिताः इदानीं श्रुतिमन्त्रपाठावसरप्राप्तो ज्योतिष्टोमो ऽनुविधेयः । श्रुतिपाठो हि देवयजनं जोषयन्त इति । मन्त्रपाठश्च एदमगन्म देवयजनम् । अत्र च क्रम निरूपणायाधिकरणमारब्धवानाचार्यः ।

दर्शपूर्णमासाभ्यामिष्ट्वान्येन यजेतेति श्रुतेः ॥१॥

फलवत्सु क्रमं प्रत्यनियमोभिहितो ऽनियमः फलसंयुक्तेष्विति । इह पुनर्वाचनिकः क्रम इष्यते । दर्शपूर्णमासाभ्यामिष्ट्वान्येन यजेत नानिष्ट्वेति । एवं हि श्रुतिर्भवति देवरथो वा एतौ यज्ञस्य यद्दर्शपूर्णमासौ स य एताभ्यामिष्ट्वाथान्येन यजते यथा ह वा रथस्पष्ट एवावसाने देवानामवस्यतीत्यनेन दर्शपूर्णमासपूर्विकान्यत्र प्रवृत्तिरुच्यते । अपरे तु वर्णयन्ति । दर्शपूर्णमासाभ्यामिष्ट्वान्येन यजेतेति श्रुतेरितीयमेवेति करणपरिच्छिन्ना श्रुतिः । अस्या एव च देवरथौ वा एतौ यज्ञस्य यद्दर्शपूर्णमासावित्ययमर्थवाद इति । अन्यशब्देन च यजतेरेवाभिधानं न जुहोतेरपि । अन्येन यजेतेति वचनात् । तथा च प्रागप्यग्निहोत्रं न निवार्यते । न्यायप्राप्तानियमव्युदासार्थं च श्रुतिग्रहणम् ॥ १ ॥

किमेष एवोत्सर्गः नेत्युच्यते—

सोमेन वोपक्लृप्तसोमः ॥ २ ॥

सोमेन वा इष्ट्वान्येन यजेत य उपक्लृप्तसोमोऽग्निमाधत्ते । उपकल्पितं द्रव्यं येन सोमयागाय स उपक्लृप्तसोमः तस्याधानसमनन्तरमेव सोमे प्रवृत्तिः ॥ २ ॥

कुत एतत्—

आधानस्य सोमप्राधान्यात् ॥ ३ ॥

सोमप्रधानं ह्याधानं सोमप्रयुक्तम् । एवं हि श्रूयते सोमेन यक्ष्यमाणो नर्तुमृच्छेन्न नक्षत्रमिति । यक्ष्यमाण इत्यनद्यतने लृट् विभक्तिर्भविष्यत्यनद्यतने लृट् स्मर्यते । यक्ष्यमाण इति च विशेषणोपादानसामर्थ्यादपि चायमर्थोऽवगम्यते । न हि कश्चिदयक्ष्यमाणः सर्वस्य विहितत्वात् । तेनानन्तरं यक्ष्यमाण इतिगम्यते । वाशब्दश्च व्यवस्थितविभाषार्थः । उपक्लृप्तसोमस्य सोमपूर्वत्वम् इतरस्येष्टिपूर्वत्वमिति । सोमपूर्वत्वेपि चान्येषां यागानां दर्शपूर्णमासपूर्वतैव वाचनिकीति ॥ ३ ॥

यक्ष्यमाण आदधीतेति सोमप्रयुक्त आधाने सोमापवर्गेऽस्याप्यपवर्ग इति परिचोदित उत्तरसूत्रम्—

नाविशेषात् ॥ ४ ॥

नैतदेवम्, सोमापवर्गेऽप्यपवृज्यत इति । कुत एतदविशेषात् । सर्वकर्मार्थो ह्यग्नयः । आधानं चाग्न्यर्थम् । सोमेन यक्ष्यमाण इत्यनेनाधानस्य कालान्तरतोच्यते न सर्वार्थतापनीयत इति ॥ ४ ॥

वसन्तेऽग्निष्टोमः ॥ ५ ॥

अग्निष्टोमग्रहणं ज्योतिष्टोमोपलक्षणार्थं नोक्थ्यादिनिवृत्त्यर्थम् । वसन्ते ज्योतिष्टोम इत्येतदेवोक्तं भवति । यद्वा यद्वसन्ते वसन्ते ज्योतिषा यजेतेति तदग्निष्टोमसंस्थेन । प्राथम्यान्नित्यत्वाच्च । चतुःसंस्थेपि ज्योतिष्टोम उक्थ्यादीनामनित्यत्वं श्रूयते । पशुकाम उक्थ्यं गृह्णीयात् षोडशिना वीर्यकामस्तुवीतातिरात्रेण प्रजाकामं याजयेदिति । प्रकृतिभूताग्निष्टोमसंस्थतां हि प्रकृत्यधर्माम्नानम् । नित्यानित्यसंयोगविरोधात्।इतरासु तद्धर्मप्रसव इति[1]।तस्मात्साधूक्तं वसन्ते-

---

[1] अत एव हरिस्वामिभिरप्युक्तम् ' संस्कारमध्यपाठात्त्वग्निष्टोमाद्याः सप्तसंस्थाः निष्कामैरपि कार्या ' इति । ' चतुः संस्थस्यापि ज्योतिष्टोमत्वात् अविशेषाच्च येन केनापीष्टे प्रतिवसन्तं ज्योतिष्टोमेनेष्टमेव भवतीति नाग्निष्टोम एवेत्ययं नियम ' इत्यपरे । युक्तं चैतत्,

ग्निष्टोम इति ॥ ५ ॥

ऐन्द्राग्नं पुनरुत्सृष्टमालभ्य द्विपुरुषासो-
मपीथिनः ॥ ६ ॥

पुनरुत्सृष्टो गौर्गृह्यते । तस्य हि वाहनेन दौर्बल्यादुत्सर्गः सम्भवति । क्वचिच्च दृश्यते । पुनरुत्सृष्टो गौरग्नीषोमीय इति । छागो वा स्यादन्वयात् । तस्यापि हि हिमवत्प्रदेशे वाह्यमानस्योत्सर्गः सम्भवति । अतश्चोदकानुग्रहाय छाग एवेति सम्प्रदायः । यत्तु श्रूयते । पुनरुत्सृष्टो गौरिति तच्च गोग्रहणादन्यत्रागौरिति भवति । द्विपुरुषासोमपीथिन इति यस्य पित्रा पितामहेन वा सोमो न पीतः तस्यैन्द्राग्नो भवति । एवं श्रूयते यस्य पितामहः सोमं न पिबेदथ स पिपासेत्स ऐन्द्राग्नं पुनरुत्सृष्टमालभेतेति । अत्र च निमित्तवाक्यत्वात्प्रत्येकं वाक्यपरिसमाप्तिः । तथा चान्यतरस्यापि सोमापाने भवत्येवैन्द्राग्न इति । अयं चान्वारम्भणीयावत् आरम्भे श्रूयते न च दीक्षणीयावत्तन्त्रमध्ये । अतः पुरुषसंस्कारकत्वात्पूर्वतरं यजनीये ऽहनि कर्त्तव्यः । पुरुषसंस्कारता चास्य यस्यपिता पितामहः सोमं न पिबेत्स दुर्ब्राह्मण इति श्रवणात् । दौर्ब्राह्मण्यनिरासार्थं च श्रुत्या विधानमस्यातः पुरुषसंस्कारोऽयमिति सकृत्क्रिया ॥ ६ ॥

षोडशर्त्विजो ब्रह्मोद्गातृहोत्रध्वर्युब्राह्मणा-
च्छंसिप्रस्तोतृमैत्रावरुणप्रतिप्रस्थातृपोतृप्र-
तिहर्त्रच्छावाकनेष्ट्रग्नीत्सुब्रह्मण्यग्रावस्तुदुन्ने-

---

वचनं विना सङ्कोचस्यायुक्तत्वादिति । अथवाग्निष्टोमसंस्थस्योक्थादीन्प्रति प्रकृतित्वज्ञापनार्थमग्निष्टोम इत्युक्तम् । अतोऽग्निष्टोमसंस्थाप्रकृतिभूता तामेव प्रकृत्य धर्माणामाम्नात्, इतरासु च संस्थासु ततो धर्मप्राप्तिरिति ।

तृन्वृणीते१ ॥ ७ ॥

उपक्रमादेव तत्सिद्धेः षोडशग्रहणं न कर्त्तव्यम् । वा कर्त्तव्यम् । चमसाध्वर्युव्युदासार्थम् । तेषामपि हि श्रुतौ यजतामृत्विगाख्या मा भूदिति । अस्त्विति चेत् । न, संख्यातत्वात् । ज्योतिष्टोमस्य यज्ञक्रतोः षोडशर्त्विज इति । अतश्च तेषामृत्विक् निबन्धनं कार्यं न भवति ॥ ७ ॥

चतुरो२ वाद्यांस्तत्पुरुषा इतरे यथा वेदम् ॥ ८ ॥

आद्यांश्चतुराश्चर्त्विजो वृणीते तस्मात्तत्पुरुषा इतरे यथावेदम् । ये ये यद्वेदविहितस्य कर्त्तारः ते तेषामाद्यर्त्विजां पुरुषाः । प्रधानपुरुषवरणेन च तेपि वृता एव भवन्तीत्यभिप्रायः । तथा च लिङ्गमश्वमेधे यन्महर्त्विजो ब्रह्मौदनं प्राश्नन्ति तदेव होतृकाऽन्वाभक्ता इति । वा सर्वान्वृणीते । न चतुर एव । वरणं ह्यानत्यर्थम् । भृतिश्च न चान्यस्मिन्वृते भृते वान्यो वृतो वा भृतो वा भवति । दर्शयति च पृथग्भृति दक्षिणादानं प्रकृत्य अथ पोत्रेथ नेष्ट्रेथाच्छावाकायाथोन्नेत्र इत्येवमादि ॥ ८ ॥

---

१ वरणं नाम करिष्यमाणकर्मस्वरूपदक्षिणाद्रव्यतत्परिमाणश्रावणपूर्वकं स्वयमप्रवृत्तानां ब्रह्मत्वादिषु कर्मसु कर्तृत्वेनाभ्यर्थना । तद्यथा हिरण्यशतगवदक्षिणेन वासोऽश्वदक्षिणेन च रथन्तरपृष्ठेन चतुष्टोमेनाग्निष्टोमसंस्थज्योतिष्टोमेनाहं यक्ष्ये तत्र मे त्वं ब्रह्मा भवेति । अतोऽपि पूर्वं षड्विंशब्राह्मणोक्तं दैवर्त्विग्वरणम् । तद्यथा अग्निर्मे होतादित्यो मेध्वर्युश्चन्द्रमा मे ब्रह्मा पर्जन्यो म उद्गाता आपो मे होत्राशंसिन इति । होत्राशंसिपदेन च ब्राह्मणाच्छंसि प्रभृतिद्वादशर्त्विग्ग्रहणम् । ततो रश्मयो मे चमसाध्वर्यव इति च ।

२ आपस्तम्बः 'सोमेन यक्ष्यमाणो ब्राह्मणानार्षेयानृत्विजो वृणीते यूनः स्थविरान्वानूचानानूर्ध्ववाचो ऽनङ्गहीनानिति प्रकृत्य तान् वृणीते चतुरः सर्वान्वैकैकशोऽध्वर्युं प्रतिप्रस्थातारं नेष्टारमुन्नेतारमित्यध्वर्यून् ब्रह्माणं ब्राह्मणाच्छंसिनमाग्नीध्रं पोतारमिति ब्रह्मणो होतारं

ब्राह्मणाच्छंस्यग्नीत्पोतारो ब्रह्मणः ॥ ९ ॥

समासलक्षणेन पूर्वं पोतुरग्नीध उच्चारणम् ॥ ९ ॥

देवयजनं जोषयन्ते ॥ १० ॥

ऋषिरीक्षणार्थः । तद्धै देवयजनमीक्षन्त इति वचनात् ॥ १० ॥

उच्चतमं सममविभ्रंशि ॥ ११ ॥

तद्वर्ष्म सत्समं स्यादिति वचनात् । अविभ्रंशीति अविनश्वरं भ्रश्यते हि भूमिर्गर्त्तैः । यत्रौषधयो न भ्रश्यन्त इत्यपरं ॥ ११ ॥

अभितो देवयजनमात्रदेशं पुरस्ताद्वर्जम् ॥ १२ ॥

न पुरस्ताद्देवयजनमात्रमतिरिच्येतेति वचनात् ॥ १२ ॥

प्राक्प्रवणमुदग्वा यत्किञ्चानूचानर्त्विजः[1] ॥ १३ ॥

अनूचानाः अनुवचनसमर्था ऋत्विजो यदेवाध्यवस्यन्ति तदेव शोभनम् देवयजनमिति ॥ १३ ॥

उद्धतौषधिमूले परेन्ते विमितं कुर्वन्ति ॥ १४ ॥

उद्धता ओषधयो मूलानि च यस्मिंस्तदुद्धतौषधिमूलं देवयजनं

---

मैत्रावरुणमच्छावाकं ग्रावस्तुनमिति होतॄन् उद्गातारं प्रस्तोतारं प्रतिहर्तारं सुब्रह्मण्यमित्युद्गातॄन् सदस्यं सप्तदशं कौषीतकिनः समामनन्ति स सर्वकर्मणामुपद्रष्टा भवति ' इति ।

१ आपस्तम्बः दक्षिणात उन्नतमुदीचीनावनतं प्राक्प्रवणमुदक्प्रवणं वा देवयजनं यत्र वा बहवो ब्राह्मणा न संराधयेयुरग्नयो वाव देवयजनं यत्र क्वचनाग्निनाधाय यजते देवयजन एव यजत इति विज्ञायते दक्षिणा वाव देवयजनं दक्षिणाश्चेत्कल्याणीर्ददाति देवयजन एव यजत इत्येके ।

तस्यापरेते विमितं कुर्वन्ति । विमितशब्दः समचतुरस्रवाची[१] ॥१४॥ तच्च—

प्राग्वꣳशम् ॥ १५ ॥

यस्य पूर्वापरायतः पृष्ठवंशः ॥ १५ ॥

पुरस्तादुच्चम् ॥ १६ ॥

वचनात् ॥ १६ ॥

प्रतिदिग्द्वारम् ॥ १७ ॥

दिक्ष्वतीकाशान् करोतीति वचनात् ॥ १७ ॥

उदग्वर्जं वा ॥ १८ ॥

वाशब्दः पक्षव्यावृत्तौ । न ह्युदग्द्वारविधायकं वाक्यमस्ति । पूर्वापरद्वारे तु विहिते उभयतो द्वारे अनुविहिते । तद्वा उभयतो द्वारꣳ हविर्द्धानं भवति उभयो द्वारꣳ सदः। तथा शालाया दक्षिणमपि द्वारमवगम्यते। धर्मदुघां हि प्रकृत्याह यथैनाꣳ होताभिष्टुवन्परापश्येदिति । होतुर्हि नियतं स्थानं, न च दक्षिणद्वारमन्तरेण तत्सन्दर्शनं भवति । तथा च सूत्रकारः दक्षिणतो निखनति होतुः सन्दर्शन इति । अतो द्वारत्रयमेव सप्रमाणमित्युदग्वर्जमेवेत्युक्तम् । यत्तु दिक्ष्वतीकाशान्करोतीति तद्दिक्त्रित्वेऽप्युपपद्यत एव ॥ १८ ॥

शालां[२] वा ॥ १९ ॥

---

१ ' विमितं चतुरश्रꣳ स्याद्दशारत्निप्रमाणत ' इति परिशिष्टकारप्रामाण्यात् ।

२ शालाप्रमाणं चोक्तं परिशिष्टे ' विꣳशत्यरत्निः शाला स्यात्तदर्धेन तु विस्तृता ' इति । तत्साधनं च ' प्रमाणार्धे वाभ्यस्याभ्यासषष्ठे लक्षणं करोति तन्निरञ्छनम् ' इति शुल्वोक्तम् । अत्र विंशत्यरत्निर्मूलरज्जुः दशारत्निरभ्यासरज्जुः तस्याः प्रथमे षष्ठे भागे निरञ्छनम् तस्या अर्धे पञ्चारत्निमिते श्रोण्यन्ताङ्कनार्थमिति ।

करोति विमितं वेति विकल्पः । शालादीर्घचतुरस्रा ॥ १९ ॥

परिवृते[1] चोत्तरापरे ॥ २० ॥

क्रियेते इति वाक्यशेषः ॥ २० ॥

दीक्षाप्रभृतिशुक्लपक्षे पञ्चमीं सप्तमीं वा प्रसुतः ॥ २१ ॥

शुक्लपक्षे दीक्षेतेति वचनात् । तत्प्रभृति पञ्चमीं सप्तमीं वा प्रसुतो भवति सौत्यमहर्भवतीति । एका दीक्षा तिस्रो दीक्षा इति वाक्यद्वयमुपनिबद्धम । दीक्षैकत्वं पञ्चमीं प्रसुतः त्रित्वे च सप्तमीमिति । एका दीक्षा तिस्रो दीक्षा इति वक्तव्ये यत्पञ्चमीं सप्तमीं वा प्रसुत इत्युक्तं तद्दीक्षा शब्दवाच्यार्थव्याचिख्यासया । दीक्षाशब्दो ह्यलौकिकस्तस्य किं वाच्यमित्यत उक्तं पञ्चमीं सप्तमीं वा प्रसुत इति । कृष्णाजिनादिभिर्दीक्षितः सन्यावन्त्यहानि प्राक्प्रायणीयायाः दीक्षितधर्मैरास्ते तानि दीक्षाशब्दवाच्यानि तेषामियं संख्या एका दीक्षा तिस्र इत्येवमादि । तथा चाहीनेषु मासापवर्गतामभिधाय दीक्षाः सुत्योपसच्छेषेणेत्युक्तम । तथा दीक्षाणामुत्तमे ऽहनि वेद्यग्निमानमिति । अहः शब्देन रात्रिरप्युपलक्ष्यते । तेनाहोरात्रपरिच्छिन्ना दीक्षेति ज्ञापयति । तासु दीक्षासु तेष्वहोरात्रेषु यूपच्छेदनमहावीरकरणवनीवाहनानि ॥ २१ ॥

कालातिक्रमे नियतक्रिया प्राप्तकालत्वात् ॥ २२ ॥

मानुषादिप्रतिबलात्कालव्यतिक्रमे नित्यानि कर्त्तव्यानि । प्राप्तो हि तेषां काल इति ॥ २२ ॥

न समत्वात् ॥ २३ ॥

समं ह्यत्र कारणम । दीक्षितस्य सतो नित्यानामक्रिया । सोऽपि दीक्षित एवेति ॥ २३ ॥

---

१ परि समन्तात् कटादिना वृतं परिवृतं, तस्मिन् ।

द्वादशदीक्षा अपरिमिता वा[1] ॥ २४ ॥

भवन्तीति वाक्यशेषः ॥ २४ ॥

पुण्याहे दीक्षा क्रयः प्रसव उत्थानम् ॥२५॥

शिष्टानुस्मरणात् ॥ २५ ॥

प्रक्रमोत्थाने विरोधे ॥ २६ ॥

प्रक्रमोत्थाने वा पुण्येहनि भवतः । इतरत्र तु श्रुतिविरोधो नियतकालत्वात् ॥ २६ ॥

न वा चोदितत्वात् ॥ २७ ॥

न चैतदङ्गीकर्त्तव्यम् । कुतः । अचोदितत्वात् । न ह्यत्र चोदना । स्मृतिस्त्वियम् । तेन यत्र श्रुतिविरोधो नास्ति तत्रास्याः प्रामाण्यमेव । विरोधे त्वप्रामाण्यमिति ॥ २७ ॥

दीक्षासु यूपच्छेदनं यूपाहुतिं प्राग्घुत्वा यूपान्ते वाग्निं मथित्वा दीक्षितस्याग्निहोमप्रतिषेधश्रुतेः ॥ २८ ॥

दीक्षासु यूपच्छेदनं कर्त्तव्यम् । दीक्षाणामेव पूर्वं यूपाहुतिं हुत्वा यूपान्ते वाग्निं मथित्वा । कुत एतत् । दीक्षितस्याग्निहोत्रहोमप्रतिषेधश्रुतेः । न दीक्षितस्याग्नावेतामाहुतिं जुहोत्याज्यं चारणी चादाय यूपान्तेऽग्निं मथित्वा यूपाहुतिं जुहोतीति सम्प्रदाये विकल्पः । दीक्षा-

---

१ अत्र चत्वारो दीक्षापक्षाः । एका दीक्षा तिस्रो दीक्षा द्वादशदीक्षा अपरिमिता वा दीक्षेति । अत्रापस्तम्बः ‘ दशाहमवरार्ध्यं दीक्षितो भवति मासꣳ संवत्सरं वा यदा कृशः स्यादित्यपरं विज्ञायते च यदा वै दीक्षितः कृशो भवत्यथ मेध्यो भवति यदास्मिन्नन्तर्न किञ्चनभवत्यथ मेध्यो भवति यदास्य कृष्णं चक्षुषोर्नश्यत्यथ मेध्यो भवति यदास्य त्वचास्थिसन्धीयतेऽथ मेध्यो भवति पीवा दीक्षेत कृशो यजेत यदास्याङ्गानाꣳ हीयते जुहोत्येव तदिति विज्ञायत इति ’

सु यूपच्छेदनमित्यस्य सूत्रस्यापराव्याख्या । यूपच्छेदात्प्राग्यूपाहुतिं हुत्वा यूपं वक्ष्यन्वैष्णव्यर्चा जुहोतीति श्रुतत्वात् । यूपान्तिके वाग्निं मथित्वेति वाशब्दो विकल्पार्थः । यत्पुनरुक्तम् हि दीक्षितस्याप्रावेतामाहुतिं जुहोतीति स यूपान्तिकमन्थनविधिशेषभूतोर्थवादो न प्रतिषेधविधिरिति । अपि च यूपाहुतिसमनन्तरमेव श्रूयते यदाज्यं परिशिष्टं भवति तदादत्ते यत्तक्षणः शल्कं भवति तत्तक्षादत्ते त आयन्ति स यं यूपं जोषयन्त इति । अतश्च दीक्षाणां प्राग्यूपाहुतिं हुत्वेत्यपव्याख्या ॥ २८ ॥

## उच्छ्रयणकाले वोभयोः होमच्छेदने सन्निधेः ॥ २९ ॥

उच्छ्रयणकाले वा होम च्छेदने भवतः । कुतः । तत्सन्निधौ हि शिष्येते । यूपं वक्ष्यन्वैष्णव्यर्चा जुहोतीति । दीक्षास्वेव वा । दीक्षासु यूपं छिनत्तीति वचनात् । सन्निधिर्वचनेन बाध्यते ॥ २९ ॥

## समारोह्याग्नी शालास्तम्भं पूर्वार्द्धे गृहीत्वारणिपाणिराहेदमगन्मेति ॥ ३० ॥

समारोपः सूत्रत्रयसिद्ध इत्युक्तम् । स च नित्यधारिपक्षे सर्वार्थत्वान्न भवति सर्वार्थं हि धारणमिति । सोमाधानेपि अग्निनित्यधारीति न समारोप इति सम्प्रदायः । अत्र पुनः शक्यते वक्तुम् । पुरुषधर्मोग्निनित्यधारिता । क्रतुधर्मश्च समारोपः । तदकरणे च क्रतोर्वैगुण्यमितरत्र पुरुषस्य । क्रतोश्च साद्गुण्यं कर्त्तव्यं विरोधे न पुरुषस्य । गतश्रियः पक्षेपि तथैवेति चेत् । न । सर्वकर्मार्थत्वाद्धारणस्य । अरण्योरभावात् । अरण्यभावेपि च न भवति । तथा च मन्त्रलिङ्गम् । अयं ते योनिर्ऋत्वियो यतो जातो अरोचथा इति । ये पुनरत्रापि समारोपमिच्छन्ति त एव प्रष्टव्याः । अरण्योरभावे च शालास्तम्भप्रपादने लौकिकारणिपाणिर्भवत्येव यजमानसंस्कारात् । अथारणी पाणौ कृत्वा शालामध्यवस्यतीति । तस्यैतद्याजमानम् । सवै न सर्वेणेव संवदेतेति यजमानं हि प्रकृत्याहाथारणीपाणौ कृत्वेति । द्वादशाहे च सर्वे अरणिपाणयो गृहपतिमन्वारभन्ते

शालास्तम्भप्रपादनं कुर्वाणं तदुक्तमविभवति गृहपत्न्यन्वारम्भ इति ॥ ३० ॥

शालायाᳲ राजनं निदधात्याहृतश्चेत् ॥ ३१ ॥

यद्यरण्यादाहृतः ॥ ३१ ॥

प्राक्क्रयादन्नमुपहरत्यस्मै हविष्यममाᳲसम् ॥ ३२ ॥

हविष्यं व्रीहियवादि । हविष्यत्वेपि च मांसप्रतिषेधः ॥ ३२ ॥

अग्निं विहृत्य सप्तसु प्रक्रमेष्वर्द्धव्यामे च साग्निचित्ये ॥ ३३ ॥

विहरणेन च मन्थनमर्थाक्षिप्तमिति । गार्हपत्यस्योद्धतात्सप्तप्राचः प्रक्रमान्प्रक्रामति ततः प्राञ्चं व्यामं विमिमीते तस्य मध्ये आहवनीयायोद्धत्यावोक्षतीति वचनात् । सप्तसु प्रक्रमेष्वर्द्धव्यामे चेत्युक्तम् । अनग्निचित्ये तु अनियम इति ॥ ३३ ॥

अपराह्णेऽश्नातीष्टमुपपन्नं वा न वा ॥ ३४ ॥

अश्नाति ॥ ३४ ॥

क्रत्वर्थमुपदिश्यान्यथस्मा उत्तरे परिवृत उदकुम्भवत्यप्सु दीक्षा ॥ ३५ ॥

क्रत्वर्थोपदेशश्च तदर्थद्रव्यसंस्कारः, विधानसामर्थ्यात् । अधस्तनसूत्रेऽपराह्णग्रहणं उत्तरे परिवृत उदकुम्भवत्यप्सुदीक्षेति अपराह्णे दीक्षेतेति वचनात्[१] ॥ ३५ ॥

---

१ अथवैवं योजना—अपराह्णे ऽश्नातीष्टमुपपन्नं वा न वा क्रत्वर्थमपदिश्यान्यस्मै । यजमानो ऽन्यस्मै क्रत्वर्थमपादिश्य अपराह्णे इष्टमश्नाति, अथवा उपपन्नमश्नाति, न वाश्नाति । पत्न्यप्येवमेवाश्नाति समानन्यायात् । इयं योजना साधीयसी, अन्यथा पत्न्यन्वयानुपत्तेः । तथाच मानवे—' इदं दास्यामिति निर्दिश्य दैक्षमशनमश्नीता दध्ना मधुमिश्रेण यजमानः पत्नीच ' इति । काठके च–' पत्नीयजमानश्चा-

नापित उपतिष्ठते नखानि निकृन्तत्यङ्गुष्ठ-प्रभृतीनि दक्षिणहस्तस्य प्रथमम् ॥ ३६ ॥

स वै नखान्येवाग्रे निकृंतत इति प्रकृत्य सर्वं श्रूयत इति॥३६॥

दक्षिणं गोदानं वितार्योनत्तीमा आप इति ॥३७॥

वितारणं च केशोन्मोचनं कंकतादिना । उनत्ति । उन्दीक्लेदने । उनत्ति क्लेदयति तिम्मयतीति । इमा आप इत्यनेन मन्त्रेण । गोदानं च दक्षिणं शिरसः पार्श्वे गवि पृथिव्यां दीयत इति गोदानम् ॥ ३७ ॥

यूपवत्कुशतरुणम् ॥ ३८ ॥

अन्तर्दधाति ॥ ३८ ॥

क्षुरेण चाभिनिधाय ॥ ३९ ॥

यूपवदेव ॥ ३९ ॥

छित्वोदपात्रे प्रास्यति ॥ ४० ॥

छित्वा केशानुदपात्रे प्रास्यति ॥ ४० ॥

एवमुत्तरं तूष्णीम् ॥ ४१ ॥

उन्दनादि सर्वङ्गोदानं करोति ॥ ४१ ॥

नापिताय क्षुरं प्रयच्छति ॥ ४२ ॥

तेन केशश्मश्रुवपति ॥ ४३ ॥

---

श्नीत ' इति । आपस्तम्बसूत्रे च अन्नमश्नाति सर्पिर्मधुमिश्रं दधि मधु वा यदस्य मनसः प्रियं तदश्नाति तदेवास्यामुष्मंल्लोके भवतीति विज्ञायते तथाशितः स्याद्यथा ततो दीक्षासु कनीयः कनीयो व्रतमुपेयात्पुरस्ताद्वा केशवपनाद्वाससो वा परिधानाद्वांजनमेके समामनन्ति ' इति ।

श्मश्रुणश्च क्षुरान्यत्वं प्रसिद्धम । अतस्तेनेत्युच्यते ॥ ४३ ॥

आपो अस्मानिति स्नात्वोदिदाभ्य इत्युत्क्रा-
मत्युत्तरपूर्वार्द्धम् ॥ ४४ ॥

दृष्टार्थत्वाच्चोदकुम्भोदकेनैव[1] स्नानम । उदिदाभ्य इत्यनेन मन्त्रेण उत्क्रामत्युत्तरपूर्वार्द्धम ॥ ४४ ॥

क्षौमं वस्ते निष्पेष्टवै ब्रूयादहतम् ॥ ४५ ॥

क्षौममातसमहतमधौतम । निष्पेष्टवै ब्रूयादिति प्रैषपूर्वकं प्रक्षालनं कृत्वा परिधत्ते ॥ ४५ ॥

चेदद्भिरभ्युक्ष्य ॥ ४६ ॥

अद्भिरभ्युक्ष्य वा परिधत्ते ॥ ४६ ॥

स्नातवस्यं वामौतधौतं विचितकेशं प्रसारि-
तदशं दीक्षातपसोरिति ॥ ४७ ॥

स्नातवस्यं वा अरजकशौचीकृतं विचितकेशप्रसारितदश-मित्यहतमपि । दीक्षातपसोरित्यनेन मन्त्रेण ॥ ४७ ॥

न नीविं कुरुते ॥ ४८ ॥

अनीविकं परिधत्ते । समाचारपरिप्राप्तमुत्तरीयम[2] ॥ ४८ ॥

एवं प्रतिप्रस्थातापरस्मिन्परिवृते पत्नीं
तूष्णीम् ॥ ४९ ॥

---

१ तड़ागादिष्वित्यन्ये । अत्र 'स्थावरास्वप्सु स्नाति' इत्याद्याः सूत्रकारोक्तयः शरणम् ।

२ 'तत उत्तरीयं च धारयति' इति काण्वपाठात । एकमेवेति हरिस्वामी, सर्वत्र तथैव दर्शनादेकत्वस्याविवक्षायां प्रमाणाभावात । अत्रार्थे 'तावन्ये वाससी' इत्याद्याः श्रुतयो मूलम । एकं चाधो वासो नीविदर्शनात ।

दीक्षयतीति वाक्यशेषः ॥ ४९ ॥

वपनं वा ॥ ५० ॥

वपनं च वा भवति वा न भवति । वपनाभावे च वितारणो-न्दनादि न भवति, वपनार्थत्वात् ॥ ५० ॥

धेन्वनडुह्योर्नाश्नीयात् ॥ ५१ ॥

धेन्वनडुन्मासं नाशितव्यम् । स धेन्वै चानडुहश्च नाश्नीया-दिति वचनात् ॥ ५१ ॥

क्रतुमध्ये समाम्नानात् क्रतुधर्मोयमिति प्राप्त आह—

पुरुषधर्मो वासम्भवात् ॥ ५२ ॥

पुरुषधर्म एवायं क्रतावसम्भवात् । प्राप्तिपूर्वको हि प्रतिषे-धो भवति । न चेह प्राप्तिरस्ति । कथं, येन दीक्षितस्य पयो व्रतो विहितो निवृत्ते च पयसि हविः शेषभक्षतोक्ता । अतः प्रतिषेधस्या-सम्भवात् पुरुषधर्म एवायमिति सम्प्रदायः । इष्टाशनविषयोयं प्रतिषेध इत्यपरे । तथा च प्रकरणस्याबाध इति ॥ ५२ ॥

अंसलभोजनं वा ॥ ५३ ॥

अंसलः पावा स्थूल उच्यते । तस्य वा भोजनं भवति । अ-श्नास्येवाहमंसलं चेद्भवतीति ॥ ५३ ॥

प्रपाद्याग्नावैष्णव एकादशकपालः ॥ ५४ ॥

प्रपाद्य बाहुगृहीतं विमिते प्रवेश्याग्नावैष्णव एकादशकपालः कर्त्तव्यः । एकादशकपाल इति श्रुतिरनुक्तना एकद्विशब्दपरि-माणादिभिः प्राप्नोति कपालसंख्येति ज्ञापनाय ॥ ५४ ॥

आदित्येभ्यो वा चरुः ॥ ५५ ॥

सा चेयं स्वपदगतविभावात्तच्चैक आदित्येभ्यश्चरुं निर्वपन्तीति वचनात् ॥ ५५ ॥

प्राक्समिष्टयजुषः करोति ॥ ५६ ॥

दीक्षणीयां हि प्रकृत्य श्रूयते तस्मात्तस्य यज्ञस्य समिष्टयजुष्वन्नं जुह्वति ॥ ५६ ॥

समिष्टयजुवर्जं वा ॥ ५७ ॥

समिष्टयजुरेव वा न जुहोति । सर्वेत्वायैव समिष्टयजुरेव न जुहोतीति वचनात् । अतश्च बर्हिर्होमादयः प्रवर्त्तन्त एव । ध्रौवाज्यस्यौद्ग्रभणेषु विनियोगउक्तः पञ्चमं जुह्वां ध्रौवमासिच्येति । तद्विनियोगोत्तरं बर्हिर्होमादय इति न्याय्यम् ॥ ५७ ॥

उपांशु चरन्ति प्रागग्नीषोमीयात् ॥ ५८ ॥

तस्माद्यत्किञ्चित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरन्तीति वचनात् ॥ ५८ ॥

वागन्तेन वा दीक्षणीयां नीचैस्तरां नीचैस्तरामितरे ॥ ५९ ॥

यावत्या वाचा कामयेत तावत्या दीक्षणीयायामनुब्रूयात् मन्द्रं प्रायणीयायाम् मन्द्रतरमातिथ्यायाम् ॥ ५९ ॥

उपांशूपसदः[1] ॥ ६० ॥

उपांशूपसत्स्वित्युपांशूपसदो भवन्ति । उपसदामुपांशुत्वविधानात्प्रागग्नीषोमीयादुपांशुपक्षादिदमन्यत्पक्षान्तरं तत्रैव दीक्षणीयादिषु स्वरविकल्प इति । तथा च वागन्तपक्ष एव तन्त्रौ सहेत्य-

१ 'धारयति ध्रौवमाज्यं यत्प्राचीनमग्नीषोमीयात्तेनापांशु चरन्त्यथैकेषां यावत्यस्य वाग्भवति तावतीं दीक्षणीयायामन्वाह ततो नीचैस्तरां प्रापणीयां ततो नीचैस्तरमातिथ्यायामुपांशूपसत्सूच्चैरग्नीषोमीये, मन्द्रेण वा दीक्षणीयायां मन्द्रतरेण प्रायणीयायां मन्द्रतमेनातिथ्यायामुपांशूपसत्सूच्चैरग्नीषोमीय, उपांशु वा दीक्षणीयायामुपांशुतरं प्रायणीयायामुपांशुतममातिथ्यायामुपांशूपत्सूच्चैरग्नीषोमीय' इत्यापस्तम्बसूत्रमप्यत्र गमकम् ।

ध्वर्युरुपांशिवन्युपांशुत्वमुच्यते प्रागनीषोमीयावुपांशुपक्षे च दीक्षितोयं ब्राह्मण इत्याह त्रिरुच्चैरित्युच्चैष्ट्वमुच्यते ॥ ६० ॥

शालां पूर्वेण तिष्टन्नभ्यंक्ते कुशेषु नवनीतेन शीर्ष्णोध्यनुलोमं सपादको महीनां पयोसीति ॥ ६१ ॥

शालायाः पुरस्तात्कुशेषु व्यवस्थितं यजमानमध्वर्युरभ्यङ्क्ते । तमभ्यनक्तीति वचनात् । नवनीतेन शिरस आरभ्य अनुलोमं महीनां पयोसीत्यनेन मन्त्रेण सपादकश्चाभ्यङ्क्त इति ॥ ६१ ॥

वृत्रस्येत्यक्ष्यावनक्ति त्रैककुदाञ्जनेन ॥ ६२ ॥

वृत्रस्येत्यनेन मन्त्रेणाक्षी अनक्ति । त्रिककुत्पर्वतः । तदीयमञ्जनं त्रैककुदाञ्जनम् यत्सौवीरकमिति प्रसिद्धं तेनाञ्जनेन स्वयमेव यजमानः ॥ ६२ ॥

अभावे ऽन्यत् ॥ ६३ ॥

त्रैककुदाभावेन्येनाञ्जनेन ॥ ६३ ॥

द्विर्दक्षिणं त्रिरुत्तरं पराक् ॥ ६४ ॥

परागुपानक्तीति वचनात् । परागज्येते नैतश्चामुतश्च ॥ ६४ ॥

सकृत्सकृन्मन्त्रः ॥ ६५ ॥

द्रव्यान्तरत्वाच्च । प्रत्यञ्जनं मन्त्रपरिप्राप्तौ वचनात् सकृन्मन्त्रवचनम् ॥ ६५ ॥

शरेषीकया साग्रया ॥ ६६ ॥

सतूलयाक्ष्यावनक्तीति ॥ ६६ ॥

कुशपवित्रैश्चित्पतिर्मेति पावयति सप्ताभिः सप्ताभिः प्रतिमन्त्रमच्छिद्रेणेति सर्वत्र द्विरु-

परि नाभ्युन्मृज्य प्रदक्षिणꣳ सकृदवाङ् ॥६७॥

कुशा एव पवित्राणि कुशपवित्राणि । तैर्यजमानं पावयति सप्तभिः सप्तभिश्चित्पतिर्मेति प्रतिमन्त्रम् । अच्छिद्रेणेति सर्वत्र अनुषङ्गः । द्विरुपरि नाभ्युन्मार्जनम् । प्रदक्षिणꣳ सप्तभिः सप्तभिः । सकृच्चावाङ्नाभेः सप्तभिरेव च । एवं च सप्तभिः सप्तभिः पावयतीत्युपक्रम्य एकविंशतिरेवैव सम्पादित्युपपद्यते ॥ ६७ ॥

एकेन त्रिभिः सप्तभिर्वा ॥ ६८ ॥

एवमपि हि श्रूयते पवित्रं प्रकृत्य तद्वा एकꣳ स्यात् अथो अपि त्रीणिस्युः अथो अपि सप्तस्युरिति एता एवोभयत्र पवित्रव्यक्तयोवाङ्नाभेरुपरिष्टाच्चेति । काण्वीयायां तु नवकृत्वः पावयति इति श्रूयते । तत्कथमुपपद्यते । चित्पतिर्मेत्येवमादिभिर्मन्त्रैः साभ्यासमेकं पावनमुपरि नाभि, तथा द्वितीयम् । एवमेव सकृदवाङिति । एवं चाभ्यासापेक्षया नवकृत्वः पावयवयतीत्युपपन्नार्थं भवति । अभ्याससमुदायापेक्षया च द्विरुपरि नाभि सकृदवाङिति च सूत्रं नेयम् ॥ ६८ ॥

एकशतेन वा राजसूये ॥ ६९ ॥

पावयति वाशब्दो विकल्पार्थः ॥ ६९ ॥

आवोदेवास इति वाचयति ॥ ७० ॥

बहुयजमानके सर्वेषां वाचनम् । ब्रूतेति च प्रयोगः ॥ ७० ॥

स्वाहा यज्ञमित्यङ्गुली अचते नाना हस्तयोः ॥ ७१ ॥

नाना पृथक् हस्तयोः । द्वे अपि कनिष्ठिके सङ्कोचयति स्वाहा यज्ञमित्यनेन मन्त्रेण ॥ ७१ ॥

एवꣳ शेषं प्रतिमन्त्रम् ॥ ७२ ॥

एवमेवाङ्गुल्यचनं शेषं प्रतिमन्त्रम् ॥ ७२ ॥

उत्तमेन मुष्टी कृत्वा स्वाहेत्युक्त्वा वाग्यतः ॥ ७३ ॥

उत्तमेन मन्त्रेण मुष्टी कृत्वा स्वाहेत्युक्त्वा वाग्यतो भवति ॥ ७३ ॥

अङ्गुष्ठौ तत्सहिते चोत्सृजति ॥ ७४ ॥

अङ्गुली उत्सृजति ॥ ७४ ॥

वाग्यतं प्रवेशयत्याहवनीयगार्हपत्यावन्तरेण ॥ ७५ ॥

वाग्विसर्गकालस्यानुक्तत्वादेवमन्त एव वाग्यम इति । एवं मुष्टिकरणवाग्यमनोत्कर्षे प्रवेशने न वाग्यम इति । वचनाच्चाहवनीयगार्हपत्यावन्तरेण प्रवेशनम् ॥ ७५ ॥

सोस्य सञ्चर आ प्रसवात् ॥ ७६ ॥

सोस्य यजमानस्य सञ्चरो भवत्या सुत्यायाः । आङ्प्रयोगसामर्थ्याच्च मर्यादा द्रष्टव्या नाभिविधिरिति ॥ ७६ ॥

एवं प्रतिप्रस्थाता पत्नीमभ्यञ्जनादि तूष्णीम् ॥ ७७ ॥

दीक्षयतीति वाक्यशेषः ॥ ७७ ॥

अपरेण वा प्रवेशयति ॥ ७८ ॥

प्रकृतत्वाद्गार्हपत्याहवनीयौ वा अन्तरेणेति विकल्पः । बहुयाजमानके अभ्यञ्जनादि बाहुगृहीतप्रपादनान्तं एकैकस्य संस्कारवत्त्वात् । अप्सु दीक्षायामपि प्रपादनान्तमेकैकस्यैव ॥ ७८ ॥

औद्ग्रभणानि जुहोति स्थाल्याः स्रुवेणाकूत्या इति प्रतिमन्त्रम् ॥ ७९ ॥

औद्ग्रभणानीति वैदिकी संज्ञा । तथा हि संव्यवहारो दृश्यते । प्राकृतान्यौद्ग्रभणानि जुह्वति । स्थाल्याः सकाशात् स्रुवेण आकूत्यै इति प्रतिमन्त्रम् ॥ ७९ ॥

तृतीयं जपत्येव ॥ ८० ॥

तृतीयं मन्त्रं जपत्येव न जुहोति।एवकारकरणाच्च स्वस्थानावस्थितस्यैव जपः ॥ ८० ॥

पञ्चमं जुह्वां ध्रौवमासिच्य द्विश्च स्थाल्याः स्रुवेण तृतीयꣳ स्रुवमभिपूरयति विश्वो-देवस्येति ॥ ८१ ॥

पञ्चमं होमं प्रति ध्रौवमाज्यं जुह्वामासिच्य द्विश्च स्थाल्या स्रुवेणासिच्य तृतीयꣳ स्रुवमभिपूरयति।अधिकारात् स्थालीत एव । अभिपूरणस्य दृष्टार्थत्वात् । जुह्वामासिच्य ॥ ८१ ॥

एतामेव वा पूर्णां जुहुयात् ॥ ८२ ॥

तमेवैकामाहुतिं पूर्णां जुहुयात् । तं वै यद्येकां जुहुयात्पूर्णां जुहुयादिति श्रुतेः । दीक्षणीयाद्रव्यशेषसाध्यत्वाद्दीक्षणीयाङ्गमौद्ग्रभणानि। एवं सति दीक्षणीयाभावे अग्नियज्ञे न भवन्ति । अत ऊर्द्ध्वं बर्हि होमादय इति ॥ ८२ ॥

आहवनीयं दक्षिणेन कृष्णाजिने माꣳससहिते स्यूतान्ते तद्गर्मसु पश्चादासञ्जनवतीं निदधाति ॥ ८३ ॥

दक्षिणेनाहवनीयं प्राचीनग्रीवे कृष्णाजिने उपस्तृणातीति वचनात् । माꣳससहिते मांसोपलक्षितप्रदेशसम्बद्धे । स्यूतान्ते विबुतन्तुसन्ताने । तस्य कृतसम्प्रसारणस्यैतद्रूपं स्यूतान्त इति । परिषीविता अन्ताययोस्ते स्यूतान्ते । तद्गर्मसु पश्चात् चर्मणो हि विकर्त्तनकाल एव कीलकैर्विततनं क्रियते। तेन पक्त्वाकीलकाच्छिद्रेषु परिसं-

चनम् अन्यत्रानियमः । आसञ्जनवती नागदन्तका येनासज्यते तदासञ्जनं अवलगनमित्यर्थः । उक्तलक्षणे कृष्णाजिने निदधाति ॥ ८३ ॥

एकं चेत्पश्चात्पादाद्विगुणम् ॥ ८४ ॥

एकं चेन्निदधाति पश्चात्पादौ गृहीत्वा द्विगुणं क्रियते तत्पश्चादग्नं प्रत्यस्यतीति वचनात् ॥ ८४ ॥

दक्षिणं जान्वाच्यास्ते पश्चादेनयोः ॥ ८५ ॥

यजमानः । स हि दीक्षते इति । जान्वाच्य भूमिं गमयित्वास्ते । प्राङ्जान्वक्त उपविशतीति श्रुतेः ॥ ८५ ॥

शुक्लसन्धिमालभते ऋक्सामयोरिति ॥ ८६ ॥

कृष्णाजिनयोः ॥ ८६ ॥

दक्षिणजानुनारोहति शर्म्मासीति तेनास्तेऽपरेन्ते ॥ ८७ ॥

तेनैव दक्षिणजानूपलक्षितप्रदेशेन अपरेन्ते कृष्णाजिनस्यास्ते ॥ ८७ ॥

मेखलां बध्नीते वेणिं त्रिवृतां शणमुञ्जमिश्रामन्तरां वासस ऊर्गसीति ॥ ८८ ॥

मेखलां बध्नीते ऊर्गसीत्यनेन मन्त्रेण । वेणिं ग्रथितां न रज्जुवद्वलिताम् । त्रिवृताम् त्रिग्रथितां सा वै त्रिवृद्भवतीति । शणमुञ्जमिश्रां शाणी भवति । मुञ्जवलशैनां न्वस्ताभवतीति वचनात् । अन्तरां वाससः । तस्मादेषान्तरा वाससो भवतीति । मेखलाबन्धनमध्ययोर्मेखलया यजमानं दीक्षयती श्रुतेः ॥ ८८ ॥

नीविं कुरुते सोमस्य नीविरसीति ॥ ८९ ॥

नीविरपवर्त्तिकोच्यते ॥ ८९ ॥

शिरः प्रोर्णुते ॥ १० ॥

विष्णोः शर्म्मेति ॥ १० ॥

कृष्णविषाणां त्रिवलिं पञ्चवलिं वोत्तानां दशायां बध्नीते ॥ ११ ॥

सामर्थ्यपरिप्रापितत्वाद्योत्तरं सिचि बध्नीत इति नोक्तम् । तां चाध्वर्युर्बध्नाति । कृष्णविषणया यजमानं दीक्षयतीति वचनात् ॥ ११ ॥

तया कण्डूयनम् ॥ १२ ॥

क्रियते ॥ १२ ॥

उपस्पृशत्येनया दक्षिणस्य भ्रुव उपरीन्द्रस्य योनिरिति ॥ १३ ॥

एनया कृष्णविषाणया । स च कृष्णविषाणा संस्कार इति सम्प्रदायः । मन्त्रलिङ्गादिन्द्रस्य योनिरसीति । एवं च नाशे न्यापि संस्कर्त्तव्येति । नेत्यपरे । दीक्षितसंस्काराभिप्रवृत्तेरसंस्कारोयमिति गम्यते । मन्त्रस्य च क्रियासाधनभूतद्रव्याभिधानमुचितमेव क्रिया च यजमानार्थेति ॥ १३ ॥

भूमौ चोल्लिखति सुसस्या इति ॥ १४ ॥

अदृष्टोपकाराय ॥ १४ ॥

मुखसम्मितमौदुम्बरं दण्डं प्रयच्छति ॥ १५ ॥

अध्वर्युर्यजमानाय ॥ १५ ॥

उच्छ्रयस्वेत्येनमुच्छ्रयति ॥ १६ ॥

तमुच्छ्रयतीति वचनात् ॥ १६ ॥

तं दक्षिणत उपधत्ते ॥ १७ ॥

तन्निर्देशाद्यार्थलक्षणमुपधानम न पदार्थतया ॥ ९७ ॥

अत्र वा मुष्टिकरणवाग्यमने ॥ ९८ ॥

अत्र हैकेङ्गुलीश्चन्यश्चन्ति वाचं च यच्छन्तीति वचनात् । वाशब्दो विकल्पार्थः ॥ ९८ ॥

एवं प्रतिप्रस्थाता पत्नीं तूष्णीं युगपन्मेखलादि ॥ ९९ ॥

दीक्षयतीति वाक्यशेष ॥ ९९ ॥

योक्रेण वा ॥ १००॥

सन्नह्यति । वा न सन्नह्यति । योक्रेण पत्नीं दीक्षयतीति वचनात् । दीक्षार्थमेतत् । प्रसङ्गात्पत्नीसन्नहनं च । स योक्त्राया इति योक्रनिवृत्तिरुक्ता । एवं यत्कैश्चिद्दृष्टिकयोक्रधर्मा क्रियन्ते इति तदयुक्तम ॥ १०० ॥

जालं वा शिरसि त्रिपर्यायम् ॥ १०१ ॥

जालं शिरसि पत्न्या भवति । त्रिपर्यायमेकपर्यायं वा ॥ १०१ ॥

पृथुमुखो यज्ञियवृक्षशङ्कुः कण्डूयने ओल्लेखनात्करोति मेखलादि चेत् ॥ १०२ ॥

कर्म भवति । तत उल्लेखनात्करोतीत्यर्थः ॥ १०२ ॥

कृष्णाजिनादि चेद्दण्डान्तम् ॥ १०३ ॥

अथ कृष्णाजिनादि दण्डान्तम । इदं श्रूयते आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणः । तथा कृष्णाजिनेन दीक्षयति मेखलया दीक्षयति कृष्णविषाणया दीक्षयति दण्डेन दीक्षयति । तत्रैतत्सन्दिह्यते । किमाग्नावैष्णवेन दीक्षासंस्कारः क्रियते उत कृष्णाजिनादिभिः । अथ वा सर्वैरिति । किं तावत्प्राप्तं आग्नावैष्णवेनेति । कुत एतत् । एवं हि श्रूयते । आग्ना वैष्णवमेकाद-

शकपालन्निर्वपेद्दीक्षिष्यमाण इति । दीक्षासंस्कारेण व्याप्यमानो गृह्यमाण आग्नावैष्णवं निर्वपतीति । एतच्चैवमुपपद्यते यद्यनेन दीक्षा संस्कार उपजन्यत इति । एवं च सति कृष्णाजिनादीनां सम्पत्त्यर्थता भवति । कृष्णाजिनेन दीक्षयति । कृष्णाजिनमस्य सम्पादयति । कृष्णाजिनवन्तं करोतीत्यर्थः । तथा कृष्णविषाणया सम्पन्नं करोति, दण्डेन चेति । अथ प्रयोजनमेषां कृष्णाजिनस्यासनम् । कृष्णविषाणया कण्डूयनम् । दण्डस्य गवादिनिवारणम् । किं चिदर्थात् किञ्चिद्वाक्यादतः सम्पत्त्यर्थतैषामित्येवं प्राप्त उच्यते । नैतदेवम् । न हि दीक्षिष्यमाण आग्नावैष्णवं निर्वपतीत्यनेन दीक्षासंस्कारः क्रियत इत्युच्यते । किं तर्हि भविष्यन्ती दीक्षा आग्नावैष्णवानुष्ठानाय निर्दिश्यते। अयं हि लृडन्तः शब्दः लृड्विभक्तिश्चानद्यतने भविष्यति भवति । भविष्यत्यद्य कृष्णाजिनादिभिर्दीक्षेत्याग्नावैष्णवं निर्वपेदित्यस्यार्थः । नाग्नावैष्णवेन दीक्षा क्रियत इति । यथा भोक्ष्यमाण आचामेदिति भविष्यन्ती भुजिक्रिया आचमनविधानाय निर्दिश्यते । नाचमनेन भुजिर्निष्पाद्यते । एवमिहापि दीक्षिष्यमाण आग्नावैष्णवं निर्वपेन्न तेन दीक्षितः क्रियत इत्युच्यते । यथा सोमेन यक्ष्यमाण आदधीतेत्यनया लृड्विभक्त्या सोमयाग आधानं प्रतिनिर्दिश्यते । एवमिहापीति । अपि च कृष्णाजिनादीना साक्षात्कारेण दीक्षासंस्कारः प्रतिविधीयते। कृष्णाजिनेन दीक्षयतीत्येवमादिना । तेषां सम्पत्त्यर्थत्वे लक्षणाश्रिता भवति श्रुतिश्चबाधितेति । अतश्च कृष्णाजिनादीन्येव दीक्षाकरणानि नाग्नावैष्णव इति । यद्येवमेककार्यत्वाद्विकल्पः कस्मान्न भवति । नात्र विकल्प अदृष्टसंस्कारोपजनकत्वात् । अदृष्टो हि दीक्षासंस्कार एभिरुपजन्यते । अत एककार्यत्वेपि न विकल्पः । यथाधारे स्रुग्वादीनामिति। तथा च पाके कर्त्रादीनाम्। कर्तृनावत्करणानि समाधत्ते। स्थालीसंयवनसम्प्रधारणम करोति, काष्ठानि ज्वलनमभिनिर्वर्त्तयन्ति, दर्वी च घट्टनमिति, एकप्रयोजनत्वेप्यवान्तरकार्यभेदान्न विकल्पः । एवमिहाप्याम्नानसामर्थ्यादवान्तरकार्याणि कृष्णाजिनादीनां कल्प्यन्ते । तस्मान्न विकल्पः । ननु च कृष्णविषाणया कण्डूयतीति कण्डूयनार्थता कृष्णविषाणाया इति। सत्यमेवम्, तत्परिग्रहकाले निर्दिष्टकार्ये तु न निवार्यते । तस्माद्दीक्षार्थमेवोत्पन्नायाः कण्डूयनार्थतापीति । अपि च भगवतः कात्यायनाचार्यस्यायमेवाभिप्रायो येनास्मिन्यज्ञे दीक्षणीया पुरुषसंस्काराद्दीर्वर्जमिति

सूत्रितम् । यदि हि दीक्षणीया पुरुषसंस्कारार्थास्यात् भेदेनोपादानं नाकरिष्यत् । करोति च । तस्मादपुरुषसंस्कारार्थताग्नावैष्णवस्य क्रतूपकाराय ह्याम्नानमस्येति । स च देवतापरिग्रहद्वारेणेत्युक्तमेवाचार्येण । अभ्युपगम्यापि ब्रूमः । यद्यपि चाग्नावैष्णवस्य दीक्षार्थता भवेत् दण्डान्तैरेव दीक्षितो भवति न तावन्मन्त्रेणेति । चिन्तायाः प्रयोजनं यदि नाम मानुषादेः प्रतिबालात्प्राग्दण्डप्रदानादग्निहोत्रकाल आपतेत् प्राप्तनिमित्तत्वाददीक्षितत्वाच्च होतव्यमेवाग्निहोत्रमिति । एवं तावदाग्नावैष्णवस्य दीक्षासंस्कारकरणे ऽनुप्रवेशो नास्तीत्युक्तम् । यथानुप्रवेशो भवति तथोच्यते । लङ्विभक्तिः क्रियार्थत्वेपि स्मर्यते । तुमुण्वुलौ क्रियायां क्रियार्थायामित्यनुवर्त्तमाने लृट्चेति सूत्रितं चशब्दात् क्रियायां क्रियार्थायामिति । अत्रोदाहरणं करिष्यामीति व्रजति हरिष्यामीति व्रजतीति । एवमिहापि दीक्षिष्यमाणो निर्वपेदित्याग्नावैष्णवस्य दीक्षासंस्कारकरणे ऽनुप्रवेशः शक्योवक्तुम् । एवमपि हि दण्डान्तैरेव दीक्षितो भवति । नाग्नावैष्णवेनेति ॥ १०३ ॥

अन्यो दीक्षितोयं ब्राह्मण इत्याह त्रिरुच्चैः॥१०४॥

अन्यशब्देन चाध्वर्युसन्निकर्षात्प्रतिप्रस्थाता गृह्यते । स ह्यन्यश्च भवति । समाख्यानुग्रहश्च । उच्चैरिति चोपांशु पक्ष उच्यते॥ १०४॥

ब्राह्मण इत्येव वैश्यराजन्ययोरपि श्रुतेः ॥ १०५॥

तस्मादपि राजन्यं वा वैश्यं वा ब्राह्मण इत्येव ब्रूयादिति वचनात् ॥ १०५ ॥

आस्तमयाद्वाचं यच्छति ॥ १०६ ॥

स वाचं यम आस्त आस्तमयात् इति ॥ १०६ ॥

अस्तमिते दीक्षितवाचं विसृजस्व पत्नि वाचं विसृजस्वेति त्रिराह ॥ १०७ ॥

दीक्षित वाचं विसृजस्वेति त्रिरुक्त्वा पत्नि वाचं विसृजस्वेति त्रिरुच्यते । लाघवाय समासेनोक्तम् । अनेकयजमानके विपरिणामः॥१०७॥

अग्निमभ्यावृत्य व्रतं कृणुतेति वाग्विसर्जनं
विरुक्त्वाग्निर्ब्रह्मेति च सकृत् ॥ १०८ ॥

व्रतं कृणुतेत्यस्य व्रतकरणार्थता सामर्थ्यात् । अग्निर्ब्रह्मेति तु वाग्विसर्गार्थम् । तथोच्यते । अनेनैव वाचं विसर्जयेद्व्रतं कृणुत व्रतं कृणुतेति तद्वाग्विसर्गस्य कालोपलक्षणार्थम् ॥ १०८॥

भूर्भुवः स्वरिति वा ॥ १०९ ॥

वाचं विसृजते वा भोऽग्निर्ब्रह्मेति विकल्पः ॥ १०९ ॥

अत ऊर्ध्वमामुष्टिविसर्गादनस्तमितेऽनुदिते
च त्रिराह दीक्षित वाचं यच्छ पत्नि वाचं
यच्छेति ॥ ११० ॥

पूर्ववत्त्रिसंख्याभ्यावृत्तिः ॥ ११० ॥

यथोक्तं विसर्जनम् ॥ १११ ॥

इह वाग्विसर्जनकाल उक्त एवास्तमिते वाचं विसृजस्वेति । उदिते त्वग्न्याचार्येण वाग्विसर्गोऽभिहितः । स यथोक्तग्रहणेन गृह्यते । तत्र स्रुक्तमुखाया भस्मोद्वपनमस्तमिते पात्रे वाचं विसृज्य समिदाधानमित्युपक्रम्य एवमुदिते भस्मोद्वपनादि इत्युक्तम् ॥ १११ ॥

व्रतदुघे दोहयति ॥ ११२ ॥

कारितशब्दादध्येषणा गावौ धुक्ष्वेति ॥ ११२ ॥

तत्क्षीरव्रतौ भवतः ॥ ११३ ॥

तयोः क्षीरं तत्क्षीरम् तद्व्रतौ भवतो दम्पती । तत्र विभागेनैककस्य गौरेकैकस्य । वक्ष्यति हि दक्षिणाग्नौ पत्न्या व्रतश्रपणमिति ॥ ११३ ॥

प्रथमे व्रते व्रीहियवयोरन्यतरमात्रपत्यु-

भावेके ॥ ११४ ॥

तद्वैके प्रथमे व्रत उभौ व्रीहियवावावपन्तीति प्रकृत्य तस्मादन्यतरमेवावपेदित्युक्तम् । अतो विकल्पः ॥ ११४ ॥

तद्व्रतमदोहे ॥ ११५ ॥

अदोहे व्रतदुहः तद्व्रतं भवति । तच्च प्रथम एव । अन्यत्र प्रतिनिधिरित्युक्तमेव व्रते प्रसङ्गो न नियमशब्दादिति ॥ ११५ ॥

सर्वौषधꣳ सर्वसुरभि चैके ॥ ११६ ॥

सर्वौषधं सर्वा ओषधयः सर्वसुरभिः पिप्पलादिः ॥ ११६ ॥

गार्हपत्ये दीक्षितस्य श्रपणं दक्षिणाग्नौ पत्न्याः॥ ११७॥

दीक्षितव्रतस्य पत्नीव्रतस्य च ॥ ११७ ॥

यवागू राजन्यस्यामिक्षा वैश्यस्य[1] ॥ ११८ ॥

व्रतं भवति । ते च तद्भूते उपादेये नेह श्रप्ये इति । अग्नावधिश्रितस्य भक्षणप्रतिषेधात् ॥ ११८ ॥

व्रतं प्रयच्छत्युत्सिक्तमपरराते सायं दोहमपराह्णे प्रातर्दोहम् ॥ ११९ ॥

अथास्मै व्रतं प्रयच्छतीति विहितत्वादध्वर्युः । ऊर्ध्वमसिक्तमनुत्सिक्तम् सायं दोहमपररात्रे प्रातर्दोहमपराह्णे ॥११९ ॥

दैवीं धियमिति व्रतायोपस्पर्शनꣳ स्वासने ॥१२०॥

---

१ तण्डुलानां शिथिलः पाको यवागू उच्यते । पयस्तप्तं कृत्वोपरि दध्यासिच्योदकमस्राव्य यद्घनीभूतं दधिसदृशं द्रव्यं स्थाल्यां तिष्ठति तदामिक्षोच्यते ।

उपस्पर्शनमाचमनम्[१]। कुत एतत् । लिङ्गात् । मानुषाय वा एष पुराशनायावनेनिक्तेऽथात्र दैव्यै धिये इति । यत्तत्पूर्वं मानुषाशनकालेऽवनेजनं तदेवेदमिति ज्ञापयति । तत्र च मन्त्रविधानम् । उदकोपस्पर्शनमात्रमेवेति सम्प्रदायः । आसनशब्देन च कृष्णाजिने अभिधीयेते ॥ १२० ॥

ये देवा इति व्रतयत्यमृन्मये पात्रे ॥ १२१ ॥

पत्नी लौहे ॥ १२२ ॥

ताम्रमये । तस्याश्च भक्षणमात्रमेव भवति नेतिकर्त्तव्यता । अविहितत्वात् ॥ १२२ ॥

श्वात्राः पीता इति नाभिमालभते ॥ १२३ ॥

यजमानः ॥ १२३ ॥

मेक्ष्य कृष्णविषाणया लोष्टं किञ्चिद्वा-
दत्त इयं त इति ॥ १२४ ॥

मिहसेचने । मूत्रपुरीषे कुर्वन्नित्यर्थः । लोष्टं किञ्चिद्वादत्ते । किञ्चिच्छब्देन च काष्ठपाषाणाद्यपि गृह्यते । वाशब्दो विकल्पार्थः ॥ १२४ ॥

अपो मुञ्चामीति मेहति ॥ १२५ ॥

पृथिव्या सम्भवेत्यात्तं निदधाति ॥ १२६ ॥

यद्गृहीतं तत्प्रतिमुञ्चति ॥ १२६ ॥

अग्ने त्वमित्युक्त्वास्वपित्यधः प्राङ्-

---

१ हरिस्वामिनस्तूपस्पर्शनपदेन स्पर्शमात्रं स्वीकुर्वन्ति । शतपथे सर्वत्रोपस्पृशतेस्तदर्थे प्रयोगात् ।

क्षिणतः ॥ १२७ ॥

दक्षिणत वितानस्य प्राक्शिराः स्वपिति ॥ १२७ ॥

अग्निमभ्यावृत्तं विबुद्धमस्वप्स्यन्तं पुनर्मन-
इति वाचयति ॥ १२८ ॥

अथ यत्र सुप्त्वा पुनर्नावद्रास्यन् भवाति तद्वाचयतीति वचनात् ॥ १२८ ॥

त्वमग्न इत्याह क्रुध्वा ऽवृत्यं वा व्याहृत्य॥ १ २ ९॥

अवृत्यं अश्लीलम् ॥ १२९ ॥

लब्धमालभ्य वाचयति रास्वे यदिति ॥ १ ३ ० ॥

रास्वे यदित्यमुं मन्त्रम् । आलभ्येति च कारितत्वादध्येषणा गामालभस्वेत्येवमादि ॥ १३० ॥

अशक्येभिन्त्रणम् ॥ १ ३ १ ॥

आलम्भनाशक्तावनेनैव मन्त्रेणाभिमन्त्रणं करोति ॥ १३१ ॥

शूद्रसम्प्रवेशसम्भाषाप्रत्युत्थानाभिवादनो-
दकावायवर्षाणि वर्जयेत्प्रागवभृथात् ॥ १ ३ २ ॥

दीक्षितधर्मा एते इति प्रागवभृथादित्युक्तम् ॥ १३२ ॥

परिह्वालं वदति ॥ १ ३ ३ ॥

परिह्वालं मृदूच्यते ॥ १३३ ॥

विचक्षणचनसितवतीं वाचम् ॥ १ ३ ४ ॥

विचक्षणा संस्कृतोच्यते । चनवती चन इत्यन्ननाम । अन्नवतीं अविद्वाणां चनसितवतीं सत्यवतीं वाचं वदति इति ॥१३४॥

शालासनास्वप्नौ सन्धिवेलयोः ॥ १ ३ ५ ॥

सन्धिवेलयोः शालायामासितव्यम् । न च स्वप्यात् ॥१३५॥

वेद्याꣳ सुत्यासु ॥ १३६ ॥

सुत्यासु वर्त्तमानासु वेद्यामासितव्यम् ॥ १३६ ॥

अप्रायश्चित्तमपराधे ॥ १३७ ॥

नात्रप्रायश्चित्तिरस्ति प्रतिगुप्यमेवैतस्मात् इति वचनात् ॥१३७॥

इतरेतरस्मिन्वोपहवमिच्छेरन् ॥ १३८ ॥

इतरेतरोपहवो वा भवति । स बहुयजमानके ॥ १३८ ॥

पत्न्यामेकदीक्षी ॥ १३९ ॥

एकदीक्षी तु पत्न्यामेवोपहवमिच्छति ॥ १३९ ॥

दीक्षान्ते प्रायणीयमदित्यै चरुं निर्वपति ॥१४०॥

चरुग्रहणं न कर्त्तव्यम् । अदित्यै चरुरन्यत्रापीत्युक्तत्वात् । कर्त्तव्यं वा, चरोः प्रायणीयज्ञापनार्थम् । आदित्यं चरुं प्रायणीयं निर्वपतीति वचनात् । एवं च पथ्यादीनां तदङ्गत्वादन्तराये सत्य-प्रयोक्तृत्वम् ॥ १४० ॥

आज्यभागाविष्ट्वाज्येन देवताश्चतस्रो

यजति पथ्याꣳ स्वस्तिमग्निꣳ सोमꣳ

सवितारं च ॥ १४१ ॥

च शब्दाददितिचोदनेनेति । पथ्यास्वस्त्योरभेदज्ञापनार्थं च तस्र इति ग्रहणम् ॥ १४१ ॥

चरुमेक्षणबर्हिर्निदधात्युदयनीयायै ॥ १४२ ॥

उदयनीयार्थं चर्वादीनां निधानम् ॥ १४२ ॥

सलेपं चरुं प्रमृष्टं मेक्षणम् ॥ १४३ ॥

ताः स्थालीः सक्षामकर्षी प्रमृज्य मेक्षणं निदधातीति वचनात् ॥ १४३ ॥

प्रक्षालयति ॥ १४४ ॥

वा चरुम् ॥ १४४ ॥

अनुप्रहरतीतरे ॥ १४५ ॥

मेक्षणबर्हिषी ॥ १४५ ॥

त एवर्त्विजः ॥ १४६ ॥

विप्रेतेष्वन्येपि ॥ १४७ ॥

प्रायश्चित्तव्युदासार्थमित्युक्तम् ॥ १४७ ॥

शंय्वन्तं भवति ॥ १४८ ॥

शंयुद्वये प्राप्ते इडाद्वये च किं पूर्वेण शंयुना शंय्वन्तं पूर्वया वेडयेडान्तमुत्तरेणेति । किं तावत्प्राप्तम् ॥ १४८ ॥

अन्तवचने पूर्वप्राप्तेः ॥ १४९ ॥

अन्तवचने पूर्वमेव ग्रहीतव्यम् । कुत एतत् । प्राप्ताहीडान्तता शंय्वन्तता चेति । कृते च शास्त्रार्थे किमित्युत्तरं यावद्गम्यत इति ॥ १४९ ॥

किं च—

अविशेषश्रुतेः ॥ १५० ॥

न चात्र विशेषः श्रूयते । अतः प्राप्तत्वात्पूर्वमेव शंय्विडान्तं ग्रहीतव्यमिति ॥ १५० ॥

उत्तरं वा प्रकृत्यनुग्रहानुयाजप्रतिषेधाभ्याम् ॥ १५१ ॥

उत्तरं वा शंय्विडन्तं ग्रहीतव्यम् । न पूर्वं । कुत एतत् । प्रकृ-

त्यनुग्रहात्। एवं बहवः प्राकृताः पदार्था अनुगृहीता भवन्ति। वृद्धौ च फल भूयस्त्वं भवतीत्यभिप्रायः। अनुयाजप्रतिषेधश्च भवति। तदिडान्तं भवति नानुयाजान्यजन्तीति। तथा तच्छंय्वन्तं भवति न पत्नीः संयाजयन्तीति। एतच्चोत्तरे शंय्वन्ते इडान्ते चोपपद्यते। न पूर्व इति ॥ १५१ ॥

एवं प्राप्त आह—

ग्रहणादप्रवृत्तिः ॥ १५२ ॥

शंय्वन्तग्रहणादिडान्तग्रहणाच्चोत्तरत्राप्रवृत्तिः। कुतः। कृत एव शास्त्रार्थ इति ॥ १५२ ॥

संत्वराश्रुतेश्च ॥ १५३ ॥

आतिथ्याᳪ हविर्निरवपन्निति प्रकृत्याह तस्येडोपहूता साध्याजग्मुस्तस्मात्स यज्ञ इडान्त इति। असुरेभ्यो बिभ्यद्भिर्देवैः त्वरमाणैरिडान्ते एव परित्यक्तमिति। एतच्च पूर्व एवोपपद्यते नोत्तर इति ॥ १५३ ॥

अनुयाजप्रतिषेधस्य तर्हि समाधिर्वक्तव्यः। सोभिधीयते—

नित्यानुवादोनुयाजप्रतिषेधः ॥ १५४ ॥

अनुयाजप्रतिषेधः स इडान्तसंस्तवार्थः। एवं प्रशस्तमिडान्तं येनात्रानुयाजा अपि नेज्यन्त इति ॥ १५४ ॥

उपरवदेशे प्रतिप्रस्थाता रोहिते चर्मण्यानडुहे सोमं निवपति ॥ १५५ ॥

स्थापयति ॥ १५५ ॥

विक्रय्येनं विचिनोति कौत्सः शूद्रो वा ॥ १५६ ॥

कुत्सितं कर्मकरोति कौत्सः। विचयनं च पर्वशोवखण्डनम् ॥ १५६ ॥

ब्राह्मण उपास्ते ॥ १५७ ॥

स च प्रकृत एव ऋत्विग्विशेषः । ब्रह्मपुरुषो ब्राह्मणाच्छंसी । कृताकृतप्रत्यवेक्षणाय ब्रह्मा हि व्यापृतः प्रायणीये ॥ १५७ ॥

उदकुम्भश्च पुरस्तात् ॥ १५८ ॥

भवति शाखान्तरात् । स्वशाखायामपि च दृश्यते । अथ यदपामन्ते क्रीणातीति । क्रयार्थश्च निवापः ॥ १५८ ॥

शालाद्वाराण्यपिधाय ध्रौवं जुह्वां चतुर्विगृण्हाति ॥ १५९ ॥

उपरिष्टादूद्वारापावरणविधानादिहापिधानम् । ध्रौवं जुह्वां चतुः कृत्वो विगृह्णाति ॥ १५९ ॥

तत्र च—

बर्हिस्तृणेन हिरण्यं बध्वात्रदधात्येषा त इति ॥ १६० ॥

अनेन मन्त्रेण । बर्हिर्ग्रहणाच्च विनियुक्तमेव ग्रहीतव्यम् ॥ १६० ॥

जूरसीति जुहोति ॥ १६१ ॥

चतुर्गृहीतम् ॥ १६१ ॥

शुक्रमसीति हिरण्यमुद्धृत्य वेद्यां तृणं निदधाति ॥ १६२ ॥

शुक्रमसीत्यनेन मन्त्रेण हिरण्यमुद्धृत्य वेद्यां तृणं निदधाति ॥ १६२ ॥

सूत्रबद्धं हिरण्यं कुरुते ॥ १६३ ॥

यज्जुह्वां प्राप्तं तदेव । अत्र प्रायणीयाप्रतिपत्तिः समाप्तिः । तच्छेषभूतद्रव्यं हि विनियुक्तमिति । प्रायणीयाशेषभूतद्रव्यसाध्यापि सतीयमाहुतिः सोमक्रयार्था । एवं हि श्रूयते । वाग्वै सोमक्रयणी निदानेन तामेतयाहुत्या प्रीणाति प्रीतया सोमं क्रीणानीति । एवं च

सत्युदयनीयायां न भवति ॥ १६३ ॥

चतुर्गृहीतं गृहीत्वान्वारभस्व यजमानेत्याह ॥ १६४ ॥

अध्वर्युः । तं च यजमानोन्वारभते ॥ १६४ ॥

अपावृतद्वारे निष्क्रामतः ॥ १६५ ॥

अपावृतद्वारमुद्घाटितद्वारम् । द्विवचनोपदेशाध्वर्युध्वयजमानौ निष्क्रामतः । प्रतिप्रस्थाता द्वितीय इति सम्प्रदायः ॥ १६५ ॥

दक्षिणेन द्वारं सोमक्रयणी तिष्ठत्यलक्षिताव्यङ्गा प्रवीता रज्जुबद्धा बभ्रुः पिङ्गला पिङ्गलाभावेरुणारुणाभावे रोहिण्यश्येताक्षी ॥ १६६ ॥

अलक्षिता अनङ्किता अव्यङ्गा अनङ्गहीना अप्रवीता अकामिता । अबद्धैवारज्जुबद्धा । बभ्रुः पिङ्गला बभ्रुवर्णा पिङ्गाक्षी तदभावेरुणा तस्या अभावे रोहिण्यश्येताक्षी रोहिणी रक्तवर्णा अश्येताक्षी अरक्ताक्षी दक्षिणेन द्वारं तिष्ठति ॥ १६६ ॥

चिदसीत्येनामभिमन्त्रयते ॥ १६७ ॥

सोमक्रयणीम् मन्त्रश्च साण्डे विपरिणम्यते ॥ १६७ ॥

उदीचीन्नीयमानामनुगच्छतो वत्स्यसीति ॥ १६८ ॥

द्विवचनोपदेशात् द्वयोरपि मन्त्रः । चोदितार्थाभिधानाच्च साण्डे विपरिणामः ॥ १६८ ॥

षट्पदान्यतीत्य सप्तमं पर्युपविशन्ति ॥ १६९ ॥

सोमक्रयण्याः । अथ सप्तमं पदं पर्युपविशन्तीति वचनात् । पर्युपवेशनं च ब्रह्मयजमानाध्वर्युप्रतिप्रस्थातॄणाम् ॥ १६९ ॥

हिरण्यमस्मिन्निधायाभिजुहोत्यदित्यास्त्वेति ॥१७०॥

हिरण्यमस्मिन्सप्तमे पदे निधायाभिजुहोत्यदित्यास्त्वेत्यनेन मन्त्रेण ॥ १७० ॥

स्फ्येन पदन्त्रिः परिलिखत्यस्मे रमस्वेति ॥१७१॥

अनेन मन्त्रेण ॥ १७१ ॥

समुद्धृत्य पदं̐ स्थाल्यामावपत्यस्मे ते बन्धुरिति ॥ १७२ ॥

उद्धरणं हिरण्यस्य समुद्धृत्यहिरण्यमिति वचनात्पदं̐ स्थाल्यामावपत्यस्मे ते बन्धुरिति ॥ १७२ ॥

अप स्थाने निषिच्य यजमानाय पदं प्रयच्छति त्वे राय इति ॥ १७३ ॥

बहुयजमानकेस्य मन्त्रस्य विपरिणामः ॥ १७३ ॥

मेराय इति यजमानः प्रतिगृह्णाति पदम् ॥१७४॥

अयमपि अनेकयजमानके विपरिणम्यते। मन्त्रद्वयेप्यध्याहारः साकाङ्क्षत्वात् । रैशब्दस्य पशुविषयत्वाद्बहुवचनान्तता । त्वे राय इति त्वयि पशव इत्येवैतदाह मे राय इति मयि पशव इति श्रुतत्वात् ॥ १७४ ॥

मावयमित्यध्वर्युरात्मानं̐ सं̐स्पृशति ॥ १७५ ॥

आनन्तर्याद्यजमानो मा भूदित्यध्वर्युग्रहणम् ॥ ॥१७५ ॥

हृत्वा पत्न्यै पदं प्रयच्छति ॥ १७६ ॥

हृत्वेत्युक्तत्वादध्वर्युः प्रयच्छति ॥ १७६ ॥

नेष्टा तोत इत्येनां वाचयति ॥ १७७ ॥

पत्नीम् ॥ १७७ ॥

सोमक्रयण्या च समीक्षमाणाꣳ समख्य इति ॥ १७८ ॥

चशब्दाश्चैव पत्नीं वाचयति ॥ १७८ ॥

प्रक्षाल्य पाणी हिरण्यं बध्नीते ऽनामिकायाम् ॥ १७९ ॥

हिरण्यबन्धनस्य क्रयार्थता येनाग्निरेतसं वै हिरण्यमित्युपक्रम्याह सत्येनाꣳश्रनुपस्पृशानि सत्येन सोमं पराहणानीति ॥ १७९ ॥

अधिकारमुपजीवन्नाह—

अप्यायनाभिषवाꣳश्वदाभ्येषु च ॥ १८० ॥

पाणिप्रक्षालनहिरण्यबन्धने भवतः ॥ १८० ॥

प्रेष्यति च सोमोपनहनमाहर सोमपर्याणहनमाहरोष्णीषमाहरेति ॥ १८१ ॥

चशब्दादध्वर्युरेव प्रेष्यति ॥ १८१ ॥

अत्र वा निवपनम् ॥ १८२ ॥

अस्मिन्वा अवसरे सोमनिवापः । तुल्यशास्त्रत्वात् ॥ १८२ ॥

शोभनꣳ सोमोपनहनम् ॥ १८३ ॥

भवतीति वाक्यशेषः ॥ १८३ ॥

उष्णीषाभावे सोमपर्याणहनाद्द्व्यङ्गुलं त्र्यङ्गुलं वोष्णीषायावकृन्तति ॥ १८४ ॥

यद्युष्णीषं न विन्देत् सोमपर्याणहनस्यैव द्व्यङ्गुलं वा त्र्यङ्गुलं वावकृन्तेदिति वचनात् ॥ १८४ ॥

अध्वर्युर्यजमानो वा सोमोपनहनꣳ हरत्यन्य इतरे ॥ १८५ ॥

अध्वर्युर्यजमानो वा सोमोपनहनमादत्ते । य एव कश्च सोमपर्याणहनमिति वचनात् । अन्यशब्देन च प्रतिप्रस्थातोच्यत इत्युक्तमेव ॥ १८५ ॥

सोमं गच्छन्त्येषत इति वाचयति ॥ १८६ ॥

गमनाभिप्रवृत्तम् । चोदितार्थाभिधायकत्वात् । न्यग्रोधे विपरिणामः ॥ १८६ ॥

प्राङुपविश्यास्माकोसीति सोममालभते ॥१८७॥

अयमपिचोदितार्थाभिधायी । दिङ्नियमश्च श्रौतप्रज्ञापनार्थः ॥ १८७ ॥

न विचिनोत्यतस्तृणकाष्ठापासनमेके ॥ १८८ ॥

अत्र हैके तृणं वा काष्ठं वा विपास्यन्तीति वचनात् ॥ १८८ ॥

सोमोपनहनं द्विगुणं चतुर्गुणं वा स्तृणाति प्राग्दशमुदग्वा ॥ १८९ ॥

एवमेव हि श्रूयते । अथवाद्योद्विगुणं वाचतुर्गुणं वा प्राग्दशंवोपस्तृणातीति ॥ १८९ ॥

तस्मिन्त्सोमं मिमीते दशकृत्वोभित्यमिति ॥ १९० ॥

सोमोपनहने सोमं प्रक्षिपति दशकृत्वोभित्यमित्यनेन मन्त्रेण ॥ १९० ॥

सर्वाभिः प्रथमम् ॥ १९१ ॥

सर्वाभिरङ्गुलीभिः प्रथमः प्रक्षेपः ॥ १९१ ॥

अङ्गुष्ठप्रभृति चैकोत्सर्गम् ॥ १९२ ॥

एकैकाङ्गुलिरुत्सृज्यते प्रक्षेपे प्रक्षेपे ॥१९२ ॥

द्विः कनिष्ठिकया ॥ १९३ ॥

कनिष्ठिकया द्विः प्रक्षिपति ॥ १९३ ॥

एकोपचयं च ॥ १९४ ॥

एकैकाचोपचीयतेऽङ्गुलिः प्रक्षेपे प्रक्षेपे । एवं दशकृत्वो मितो भवति ॥ १९४ ॥

अञ्जलिना दशमम् ॥ १९५ ॥

दशमं प्रक्षेपणमञ्जलिना । दशकृत्वो मिमीत इति वचनात् । समस्याञ्जलिनाध्यावपतीति श्रवणात् ॥ १९५ ॥

अन्यद्वाध्यावापश्रुतेः ॥ १९६ ॥

अथवान्यदेकादशमञ्जलिना कर्त्तव्यम् । येनैतया सर्वाभिरित्युक्त्वा समस्याञ्जलिनाध्यावपतीत्याह । यत्पुनरुक्तं दशकृत्वोभित्यमिति तन्मन्त्रेणाभिसम्बध्यते दशकृत्वोभित्यमित्यनेन मन्त्रेण । तस्मादेकादशोध्यावापः ॥ १९६ ॥

अन्तान्त्संगृह्योष्णीषेण बध्नाति प्रजाभ्यस्त्वेति ॥ १९७ ॥

अथ सोमोपनहनस्य समुत्सार्यान्तानुष्णीषेण विग्रथ्नातीति वचनात् । बध्नामीति वाध्याहारः साकाङ्क्षत्वात् ॥ १९७ ॥

अङ्गुल्या मध्ये विवृणोति प्रजास्त्वानुप्राणन्त्विति ॥ १९८ ॥

अथ मध्येऽङ्गुल्या काशं करोति श्रुतेः ॥ १९८ ॥

तं विक्रयिणे प्रयच्छति ॥ १९९ ॥

सोमम् ॥ १९९ ॥

पञ्चकृत्वः सोमं पणते ॥ २०० ॥

पणान्यवहारे । पञ्चकृत्वः संव्यवहारं करोति ॥ २०० ॥

स आह सोमविक्रयिन्क्रय्यस्ते सोमो राजा इति ॥ २०१ ॥

क्रय्य इत्याह सोमविक्रयी ॥ २०२ ॥

तं वै ते क्रीणानीति ॥ २०३ ॥

मन्त्रत्रयमपि च चोदितार्थाभिधायी ॥ २०३ ॥

क्रीणीहीत्याह सोमविक्रयी ॥ २०४ ॥

कलया ते क्रीणानीति ॥ २०५ ॥

अध्वर्युः ॥ २०५ ॥

भूयो वा अतः सोमो राजार्हतीत्याह सोमविक्रयी ॥ २०६ ॥

भूय एवातः सोमो राजार्हति महांस्त्वेव गोर्महिमेत्यध्वर्युर्गोर्वै प्रतिधुक् तस्यै शृतं तस्यै शरस्तस्यै दधि तस्यै मस्तु तस्या आतञ्चनं तस्यै नवनीतं तस्यै घृतं तस्या आमिक्षा तस्यै वाजिनमिति ॥ २०७ ॥

भूयो वा अतः सोमो राजार्हतीति भूय एवातः सोमो राजार्हतीति च चोदितार्थाभिधायिनौ ॥ २०७ ॥

भूय एवेत्यतः प्रभृतिचतुरावर्त्तयति ॥ २०८ ॥

अध्वर्युरेव ॥ २०८ ॥

एकैकेनान्ते पणते शफेन पदार्द्धेन गवा ॥२०९॥

ते क्रीणामीत्यन्ततः ॥ २१० ॥

प्रश्नान्ते प्रश्नान्ते ॥ २११ ॥

भूय एवेत्यतः प्रभृति आवर्त्तयति । प्रश्नशब्देन चाध्वर्युसोमविक्रयिणोरुक्तिप्रत्युक्ती लक्ष्येते । मन्त्रान्ते शफादीनामेकैकेन पणतेऽध्वर्युः । उक्तिप्रत्युक्त्यन्ते च भूय एवेत्यतः प्रभृत्यावृत्तिः ॥ २११ ॥

अन्त्ये च पणने गवा ते क्रीणामीत्युक्ते

क्रीतः सोमाराजेत्यन्ते वयाᳲसि प्रब्रूहीत्याह सोमविक्रयी१ ॥ २१२ ॥

अयमपि चोदितार्थाभिधायी ॥ २१२ ॥

स आह चन्द्रं ते वस्त्रं ते च्छागा ते धेनुस्ते मिथुनौ ते गावौ तिस्रस्तेन्या इति ॥ २१३॥

तच्छब्देनाध्वर्युरभिधीयते ॥ २१३ ॥

शुक्रं त्वेति हिरण्यमालभ्य वाचयति ॥ २१४ ॥

चोदितार्थाभिधायी ॥ २१४ ॥

सग्मे त इति सोमविक्रयिणᳲ हिरण्येनाभिकम्पयति ॥ २१५ ॥

अभिकम्पयत्युपप्रलोभयति सन्दर्शनेन । अथ सोमविक्रयिणमभिप्रकम्पयतीति श्रुतेः ॥ २१५ ॥

---

१ वैश्यराजन्ययोः सोमयागे न्यग्रोधस्य सोमवत् क्रयणादिसंस्कारकरणम् ।

अस्मे त इति यजमानसहितं निदधाति ॥ २१६ ॥

हिरण्यम् ॥ २१६ ॥

सोमविक्रय्येतदादत्ते ॥ २१७ ॥

एतद्धिरण्यम् ॥ २१७ ॥

अजां प्रत्यङ्मुखीमालभ्य वाचयति तपस-
स्तनूरिति ॥ २१८ ॥

अथाजायां प्रतीचीनमुख्यां वाचयतीति वचनात् । कारितत्वादध्येषणात्र। चोदितार्थाभिधायी च मन्त्रः ॥ २१८ ॥

सव्येनाजां प्रयच्छन्मित्रो न इति दक्षिणेन
सोममादायागत उत्तिष्ठति वा ॥ २१९ ॥

आगते सोमे उत्तिष्ठति वा यजमानः । न चोत्तिष्ठति । मन्त्रश्चोदितार्थाभिधायी । उपमार्थत्वान्मित्रशब्दस्याविपरिणामः ॥ २१९ ॥

दीक्षितोरौ दक्षिणे प्रत्युह्य वासो निदधाती-
न्द्रस्योरुमिति ॥ २२० ॥

अयमपिचोदितार्थाभिधायी ॥ २२० ॥

स्वानभ्राजेति जपति सोमविक्रयिणमी
क्षमाणः ॥ २२१ ॥

अथ सोमक्रयणाननुदिशतीति वचनात् । अत एव यजमानः ॥ २२१ ॥

अपोर्णुते दीक्षितः शिरः ॥ २२२ ॥

स्वयमेव ॥ २२२ ॥

पत्नी च ॥ २२३ ॥

हिरण्यꣳ सहसाच्छिद्य पृषता वरत्राकाण्डेना-
हन्ति वा ॥ २२४ ॥

हिरण्यं झटिति हृत्वा सोमविक्रयिहस्तदाच्छिद्य पृषता चित्रेण वरत्राकाण्डेनाहन्ति सोमक्रयिणं न वाहन्तीति विकल्पः ॥ २२४ ॥

गृहीतसोमं परिमाम्न इति वाचयति ॥ २२५ ॥

गृहीतसोमग्रहणाद्गृहीतेनैव सोमेन वाच्यत इति ॥ २२५ ॥

उत्तरे च ॥ २२६ ॥

उत्तरे च प्रेकर्मणी यजमानाकर्तृके ॥ २२६ ॥

उदायुषेत्युत्थानꣳ १शीर्ष्णि सोमं कृत्वा पा-
णिमन्तर्द्धाय ॥ २२७ ॥

पाणिनान्तर्हितेन शिरसि सोमं कृत्वोदायुषेत्यनेन मन्त्रेणोत्तिष्ठति ॥ २२७ ॥

प्रतिपन्थामित्यनोभ्येति दक्षिणतस्तिष्ठच्छन्नꣳ
समङ्गि धौतं प्रउगाच्चोद्धते फलके ॥ २२८ ॥

समङ्गि सर्वाङ्गोपेतं दक्षिणतो व्यवस्थितं क्रयदेशस्यानस्तत्प्रतिगच्छति प्रतिपन्थामित्यनेन मन्त्रेण । तस्य चेषान्तरालादुद्धते फलके भवतः । उद्धते प्रउग्ये फलके इति वचनात् ॥ २२८ ॥

कृष्णाजिनमस्मिन्नास्तृणात्यदित्यास्त्वगिति ॥ २२९ ॥

अस्मिन्नित्यनोभिधीयते ॥ २२९ ॥

---

१ आपस्तम्बः ' अपि पन्थामगन्महीत्युद्धतपूर्वफलकेनानसा परिलिखितेन छदिष्मता प्राञ्चः सोममच्छ यान्ति शीर्ष्णा गिरौ क्रीतꣳ हरन्त्यपरेणोत्तरेण वा राजानं प्राग्गीषमुदग्गीषं वा नद्धयुगꣳ शकटम्' इति ।

तस्मिन्सोमं निदधात्यदित्यै सद इति ॥ २३० ॥

तस्मिन्कृष्णाजिने । मन्त्रश्चोदितार्थाभिधायी ॥ २३० ॥

अस्तभ्नाद्यामिति सोममालभ्भ्य वाचयति ॥२३१॥

आलभ्भ्येति कारितः । कारिते चाध्येषणा । न्यग्रोधे च सोमन्यग्रोधाविति । अस्तभ्नाद्द्यामिति चोदितार्थाभिधायी ॥ २३१ ॥

वनेषु व्यन्तरिक्षमिति सोमपर्याणह्नेन परितत्य कृष्णाजिनं पुरस्तादासजति सूर्यस्य चक्षुरित्यासनयोरन्यतरत् ॥ २३२ ॥

वनेषु व्यन्तरिक्षमित्यनेन मन्त्रेण सोमपर्याणहनेन परितत्य कृष्णाजिनमनसः पुरस्तादासजत्यवलगयति सूर्यस्य चक्षुरित्यनेन मन्त्रेण[1] ॥ २३२ ॥

एकं चेद् ग्रीवा[2] अवकृत्य ॥ २३३ ॥

एकं चेदासनं कृष्णाजिनं ग्रीवा अवकृत्यासजति ॥ २३३ ॥

अनड्वाहौ पुनक्त्युस्रावेतमिति[3] युगपत्तद्वचनात् ॥ २३४ ॥

अनस्यनड्वाहौ युनक्त्युस्रावेतमित्यनेन मन्त्रेण युगपत् । यौगपद्याभिधायकत्वान्मन्त्रस्य ॥ २३४ ॥

---

१ अत्रानसो वाससो वेष्टनमिति केचित् । तत्रोपष्टम्भकं च 'वनेषु व्यन्तरिक्षमिति वाससा पर्याणह्यन्ति' इति सूत्रान्तरम् । वस्तुतः परि समन्तादानह्यते सोमो येन तत्सोमपर्याणहनमिति व्युत्पत्त्या शब्दत एव पटकुटीकरणं प्रतीयत इति ।

२ ग्रीवाशब्दो वेदे प्रायेण बहुवचनान्तः ।

३ अत्रैवं विचार्यते, किं युगपदनडुहोर्योजनं भेदेन वेति? तत्र सूत्रेणैव पूर्वपक्षः 'युगपत्'।

१भेदे मन्त्रावृत्तिः सान्निपातित्वात् ॥ २३५ ॥

भेदेन वा योजनमशक्यत्वात्। न हि शक्यते दक्षिणेनैकेन पाणिना द्वयोर्योजनं कर्तुम्। योजनं च योक्त्रपरिहरणं न युगस्कन्धसन्निपातः। अतो भेदेन। भेदे च मन्त्रावृत्त्या भवितव्यं सन्निपतितो हि मन्त्रः क्रियाया उपकरोति। यथा च श्रुतिः स दक्षिणायुग्यमेवाग्रे युनक्त्यथ सव्यायुग्यमिति ॥ २३५ ॥

ईषान्तरे भूमिष्ठः सुब्रह्मण्यः पलाशशाखया प्राजति ॥ २३६ ॥

यत उद्धृते फलके तत्र भूमिस्थः सुब्रह्मण्यः पलाशशाखया प्राजति गमयत्यनड्वाहौ ॥ २३६ ॥

पश्चात्परीत्यापालम्बं गृहीत्वा सोमाय क्रीतायानुवाचयति पर्युह्यमाणायेति वा ॥ २३७ ॥

अनः परीत्य पश्चाद्व्यवस्थित अपालम्बं गृहीत्वा अपालम्बशब्देन पश्चाद्दाबद्धा रज्जुरभिधीयते२ ययावतारेऽनः प्रवर्त्तमानं विधार्यते तं गृहीत्वा सोमाय क्रीतायानुवाचयति। पर्युह्यमाणायेति वेति विकल्पः। मन्त्रश्चोदितार्थाभिधायी। क्रयोत्तरकालं चाभिषेचनीये बहुवचनान्ततोहः ॥ २३७ ॥

दीक्षितश्चान्वारभते ॥ २३८ ॥

सोमं पर्युह्यमाणं वै यजमानोन्वारभत इति वचनात् ॥ २३८ ॥

निरुक्तायां प्राङ् यात्वा दक्षिणावर्त्य

---

१ सिद्धान्तमाह 'भेदेन' इति।

२ पश्चाद्भागे लम्बमानं काष्ठमपालम्बशब्देनोच्यते येनोर्ध्वप्रदेशे प्रचलतः शकटस्य पर्यावर्त्तनं वार्यत इति हरिस्वामिनोऽन्ये च याज्ञिकाः।

शालां गच्छन्ति ॥ २३९ ॥

त्रिरुक्तायां प्रथमायां सोमपरिवहनर्चि पदार्थतया प्राङ्यात्वा प्रदक्षिणमावृत्य शालां गच्छन्ति ॥ २३९ ॥

भद्रो म इति वाचयति ॥ २४० ॥

वाचनं च गमनाभिप्रवृत्तस्य । मन्त्रश्चोदितार्थाभिधायी ॥२४०॥

सुब्रह्मण्यां चाह्वयति सुब्रह्मण्यो३ सुब्रह्मण्यो३मिति त्रिरुक्त्वा सकृन्निगदं यावदहे सुत्या तथाह ॥ २४१ ॥

सुब्रह्मण्यां चाह्वयति । चशब्दादध्वर्युः स्वयमेव । अध्वर्युर्वेदे हि विधानमस्या इति । सुब्रह्मण्योमिति त्रिरुक्त्वा इन्द्र आगच्छेति सकृन्निगदं ब्रूयात् । यावद्भिरहोभिः सौत्यमहर्भवति तावन्त्युच्चारयेत् । सुब्रह्मण्यः शकटसुब्रह्मण्यां निगदवर्जितां त्रिःकृत्वः प्राचि वर्त्तमाने अनसि षट् कृत्वः प्रतीचीति ॥ २४१ ॥

शालां पूर्वेणप्रतिप्रस्थाताग्नीषोमीयं पशुमादाय तिष्ठति कृष्णसारङ्गं मेध्यमभावे लोहितसारङ्गम् ॥ २४२ ॥

शालायाः पुरस्तात् प्रतिप्रस्थाताग्नीषोमीयं पशुमादाय तिष्ठति । अन्यवर्णे कृष्णावर्णेन सहितं[१] मध्यं[२] मेदुरम् तदभावे लोहितसारङ्गम् ॥ २४२ ॥

नमो मित्रस्येत्येनमालभ्य वाचयति ॥ २४३ ॥

एनं पशुम् ॥ २४३ ॥

---

१ कृष्णेन सारङ्गं कृष्णसारङ्गम् । अथवा कृष्णश्चासौ सारङ्गश्च कृष्णसारङ्गः तम् । सारङ्गः कर्बुरः वर्णान्तराऽनुविद्धः शुक्ल इत्यर्थः ।

२ मेध्यम् मर्त्तामिति देवभाष्ये ।

चरति पशौ वाचनमेव ॥ २४४ ॥

अटवीं गच्छति पशौ वाचनमेव भवति ॥ २४४ ॥

आहवनीयाच्चोल्मुकमाहृत्यैके ॥ २४५ ॥

वाचनं कुर्वन्ति । उल्मुकाहरणं च पशुसन्निधान एव । न चरति पशौ । एवं हि श्रूयते । तद्धैक आहवनीयादुल्मुकमाहरन्त्ययमग्निः सोमस्ताभ्याः सह सद्भ्यां निष्क्रेष्यामह इति ॥ २४५ ॥

समीपेऽन उपस्थाप्योत्तम्भनेनोपस्तभ्नाति वरुणस्योत्तम्भनमिति ॥ २४६ ॥

शालायाः समीपेन उपस्थाप्योत्तम्भकेनोपस्तभ्नाति वरुणस्योत्तम्भनमित्यनेन मन्त्रेण ॥ २४६ ॥

शम्ये चोद्वृहति वरुणस्य स्कम्भसर्जनी इति ॥ २४७ ॥

अनेन मन्त्रेण ॥ २४७ ॥

औदुम्बरीमासन्दीं [1]नाभिदघ्नामरत्निमात्राङ्गीमूताभाहरन्ति चत्वारः ॥ २४८ ॥

नाभिप्रमाणामरत्निमात्रैरङ्गैरीषोत्पलादिभिः उता मुञ्जरज्वा । सौत्रामण्यां हि श्रुतौ पठ्यते मुञ्जविवयना भवतीति । तत्र चाचार्येणोक्तम सोमासन्दीवदिति । चत्वार आहरन्त्यध्वर्यवः । अथ चत्वारो राजासन्दीमाददत इति श्रुतत्वात् ॥ २४८ ॥

अभिमृशत्येनां वरुणस्य ऋतसदन्यसीति॥ २४९ ॥

एनामासन्दीम् ॥ २४९ ॥

---

[1] नाभिदघ्नाम, नाभिः प्रमाणं यस्याः सा नाभिदघ्नी इति प्राप्ते छान्दसष्टाप्प्रत्ययः ।

कृष्णाजिनमस्यामास्तृणाति वरुणस्य ऋत-
सदनमसीति ॥ २५० ॥

अस्यामासन्द्याम् ॥ २५० ॥

तस्मिन्सोमं निदधाति वरुणस्य ऋतसदन-
मासीदेति ॥ २५१ ॥

तस्मिन्कृष्णाजिने सोमं निदधाति वरुणस्य ऋतसदनमासीदेति । मन्त्रश्च चोदितार्थाभिधायी ॥ २५१ ॥

शालां प्रवेशयन्ति दीक्षितसञ्चरेण ॥ २५२ ॥

अधिकाराच्चत्वार एव ॥ २५२ ॥

या त इति वाचयति ॥ २५३ ॥

चोदितार्थाभिधायी मन्त्रः ॥ २५३ ॥

आहवनीयं दक्षिणेन स्थापयन्ति ॥ २५४ ॥

सह सोमेनासन्दीम् ॥ २५४ ॥

उदपात्रमुपनिनयन्त्येके ॥ २५५ ॥

अत्रहैक उदपात्रमुमुपनिनयन्तीत्यभिधाय तस्मान्नोपनिनयेदित्युक्तं अतो विकल्प इति ॥ २५५ ॥

इति कर्कोपाध्यायविरचिते कात्यायनसूत्रभाष्ये
सप्तमो ऽध्यायः ।

# अष्टमोऽध्यायः ।

आतिथ्यं निर्वपति वैष्णवं नवकपालम् ॥ १ ॥

आतिथ्यमिति कर्मणो नामधेयम् । तस्मादातिथ्यं नामेति । शब्दस्य चाभिधायकत्वात् संव्यवहारार्थत्वम् । संव्यवहारश्चात्र दृश्यते । आतिथ्यहविः कृतः कृत्वेत्येवमादि तत्र च वैष्णवो नवकपालो भवति ॥ १ ॥

पत्न्यन्वारब्धस्तूर्णमेकविमुक्ते वा निर्वपेदग्ने-
स्तनूरिति पञ्चकृत्वः प्रतिमन्त्रम् ॥ २ ॥

तत्पत्न्यन्वारभत इति वचनात् । स वै संत्वरमाण इव गृह्णीयादिति तूर्णमित्युक्तम् । तत्रा अन्यतर एव विमुक्तः स्यादन्यतरोविमुक्तोथ गृह्णीयादित्येकविमुक्त इत्युक्तम् । वाशब्दो विकल्पार्थः । एवमपि श्रूयते विमुच्येव प्रपाद्य गृह्णीयादिति । पूर्वं निर्वपतिग्रहणं कर्मोत्पत्त्यर्थम् द्वितीयं निर्वापार्थम् । अग्नेस्तनूरित्येभिर्मन्त्रैः पञ्चकृत्वः प्रतिमन्त्रं निर्वपेत् । स गृह्णात्यग्नेस्तनूरसि विष्णवे त्वेति श्रुतत्वात् ॥ २ ॥

निर्वापे चोदकेन सवितृपदोपलक्षितो मन्त्रः प्राप्नोति । अत आह—

सावित्रनिवृत्तिः श्रुतिविरोधाभ्याम् ॥ ३ ॥

सावित्रस्य सवितृपदोपलक्षितस्य मन्त्रस्य निवृत्तिः । कुत एतत् । श्रुत्या मन्त्रान्तरस्य विहितत्वात् । स गृह्णात्यग्नेस्तनूरसि विष्णवे त्वेति । उभत्र च द्रव्याभिधायकस्त्वाशब्दः स विरुध्यत इति । केषाञ्चिदयमेव सिद्धान्तः[१] । अपरे तु व्याचर्णयन्ति । येनात्र श्रुतिर्भ-

---

१ अत एव बैजवापेन सूत्रितम् ' न सावित्रमाह ' इति । आप-

वति स वा अन्येनैव ततो यजुषा गृह्णीयाद्येनोत्तराण्यानि हवींषीति चोदकप्राप्तप्रत्यक्षशिष्टयोर्मन्त्रयोः समुच्चयो वार्त्तिकः । अत उभाभ्यामपि ग्रहणमिति । अपरं तु चोदकपरिप्राप्ते मन्त्रे त्वाशब्दमेवापनयन्ति । स एव विरुध्यते । अग्नेस्तनूरसि विष्णवे त्वेति त्वाशब्देन द्रव्यमभिधीयते । सावित्रेऽपि त्वाशब्दो द्रव्यपर एवातः प्रत्यक्षशिष्टेन चोदकप्राप्तस्त्वाशब्दो निवर्त्यत इति । तत्पुनर्विचारणीयम् । यदा वचनेन प्रत्यक्षशिष्टचोदकप्राप्तयोः समुच्चयो भवति तदा तदवयवभूतस्य त्वाशब्दस्यैकस्य निवृत्तिरित्यशक्यं वक्तुम् । अपि च प्रत्यक्षशिष्टेऽपि त्वाशब्दसमुच्चयो दृश्यते श्येनायत्वा सोमभृते विष्णवे त्वेति । अग्नये त्वा रायस्पोषदे विष्णवे त्वेति । अतः प्रत्यक्षशिष्टचोदकप्राप्तयोराम्नानसामर्थ्यात् समुच्चयः । पूर्वं चोदकप्राप्तः पश्चात्प्रत्यक्षशिष्ट इति । जुष्टशब्दस्तु चोदकप्राप्तोऽपि देवतादेशादुत्तर एव भवति । प्रकृतावेवमेव दृष्टत्वात् । सावित्रस्य तु ग्रहणत्रय एव प्रयोगः । प्रकृतौ दृष्टत्वात् । नोत्तरयोर्जुष्टशब्दस्य च ॥ ३ ॥

१ अग्न्यन्वाधानव्रतोपायनारण्यभोजनदानब्रह्मवरणानि दीक्षणीयाप्रभृति प्रागुदवसानीयायाः सोमे कृतत्वात् ॥ ४ ॥

निवर्त्तन्त इति शेषः । आग्न्यन्वाधानं तावत् देवतापरिग्रहार्थम् । स च देवतापरिग्रहः सौमिकेन कृतः । अग्नावैष्णवं निर्वपतीति प्रकृत्य येनैतदाह अग्निर्वै यज्ञस्यावरार्द्ध्यो विष्णुः परार्द्ध्यस्तत्सर्वाश्चैवैतद्देवताः परिगृह्य सर्वं च यज्ञं परिगृह्य दीक्षा इति । आग्नावैष्णवस्य च देवतापरिग्रहार्थतोच्यते । यद्येवं कृतत्वादित्यत्र न सम्भवतीत्यतः प्रभृतिशब्दः प्रायणीयादिविषयो द्रष्टव्यः । व्रतोपाय-

---

स्तम्बः ' पञ्चसु सावित्रं जुष्टं चानुषजति नोत्तरयोरित्येके वैष्णवो नवकपालः पुरोडाशो भवति विष्णुदेवात ऊर्ध्वं संस्कारा हविष्कृता वाचं विसृज्योत्तरमनड्वाहं विमुच्य वारुणमसि ' इत्यादि ।

१ सोमान्तस्तन्त्रभूतासु दीक्षणीयादिष्विष्टिषु चोदकेन प्राकृतेषु समस्तेष्वङ्गेषु प्राप्तेष्वाह—

नमपि सौमिकेन व्याप्तत्वान्निवर्त्तते । दीक्षितस्य हि सत्यवदननियम उक्तः तस्मादपि दीक्षितमाहुः सत्यं वदेति । अत्रापि प्रभृतिशब्दो नाऽऽस एव दण्डान्ते हि दीक्षितो भवतीति । अत ऊर्ध्वं व्रतोपायननिवृत्तिः स्यात्प्राकृतस्याभावात् । आरण्यभोजनमपि निवर्त्तते । सोमे द्रव्यविशेषनियमात् । निवृत्ते हि पयो व्रते हविः शेषभक्ष उच्यते । अस्ति चारण्यभोजनस्य प्राप्तिरतिरात्र आश्विने ऽतिक्रान्ते तन्निवृत्त्यर्थमिदमुक्तम् । औपवसथ्ये पुनरहनि वचनमेव । तस्मादुपवसथे नाश्नीयादिति । अथवा आरण्यभोजनप्रतिषेधः । सूत्रस्यैतन्मूलत्वम् । तस्मादुपवसथे नाश्नीयादिति । एवं चोपवसथविषय एवारण्यभोजनप्रतिषेधः । दानमपि निवर्त्तते । दीक्षणीयादिषु सौमिकेनैव दक्षिणादानेनानतेर्निर्वर्त्तित्वात् । ब्रह्मवरणं च सौमिकेन वरणेन कृतत्वात् । उदवसानीयायां तु अग्न्यन्तरत्वादग्न्यन्वाधानं प्रवर्त्तत एव । व्रतोपायनमप्युन्मुक्तदीक्षत्वात् दानं च विहितत्वात्।तस्य हिरण्यं दक्षिणेति । आनन्तर्यन्तरविधानाच्च ब्रह्मवरणम् । अतः प्रागुदवसानीयाया इति सूत्रितम् ॥ ४ ॥

पत्नीसन्नहनं च सयोक्त्रायाः ॥ ५ ॥

निवर्त्तते ॥ ५ ॥

यजमानभागश्च भक्षप्रतिषेधात् ॥ ६ ॥

प्रतिषेधश्च द्रव्यान्तरविधानात्[१] ॥ ६ ॥

[२]न कर्मगुणत्वात् ॥ ७ ॥

यजमानभागो न भक्ष्यत इति किं तर्हि भक्ष्यत एव । कर्मगुणो ह्यसौ पुरुषार्थे हि द्रव्यान्तरविधानमिति ॥ ७ ॥

उपसर्जनीरधिश्रयति [३]मदन्तीश्च व्रतवत् ॥ ८ ॥

---

१ एतावत्पर्यन्तं पूर्वपक्षः ।

२ सिद्धान्तमाह--

३ मदन्तीपदस्योष्णजलेशक्तिः । मदीहर्षग्लपनयोरित्यनुशासनेन तप्तास्वप्सुतस्य प्रयोगात् ।

उपसर्जन्यधिश्रयणं मदन्तीनामवसरविधित्सयोच्यते । व्रतवदिति गार्हपत्ये दीक्षितस्य श्रपणम् दक्षिणाग्नौ पत्न्या इति ॥ ८ ॥

आ मुष्टिविसर्गादुदकार्थस्ततः ॥ ९ ॥

कर्त्तव्यः ॥ ९ ॥

आतिथ्यायामेवापरो विशेष उच्यते—

कार्ष्मर्यमयाः परिधय आश्वबालः प्रस्तर ऐक्षव्यौ [1]विधृती बर्हिश्च ॥ १० ॥

विशेषाभावेपि बर्हिर्ग्रहणं चतुष्टयप्रतिपत्त्यर्थं वक्ष्यति हि ॥ १० ॥

एतदेवाग्नीषोमीयोपसत्स्वपि चतुष्टयम् ॥ ११ ॥

स चायं व्याक्तनियमः । एवकारकरणात् ॥ ११ ॥

आसाद्याग्निमन्थनमाहोमात्करोति ॥ १२ ॥

एतच्चेह विहितम् । तच्चातुर्मास्येषूपनिबद्धं पुनरिहातिदिष्टमिति ॥ १२ ॥

इडान्तं भवति[2] ॥ १३ ॥

तस्मात्स यज्ञ इडान्त इति वचनात् ॥ १३ ॥

ध्रौवं व्रतप्रदाने गृह्णात्यापतय इति ॥ १४ ॥

ध्रौवमाज्यं व्रतप्रदानभाजने गृह्णात्यापतय इत्यनेन मन्त्रेण ॥ १४ ॥

द्विश्चस्थाल्याः स्रुवेण तनूनप्त्रे शाक्वरायेति शक्वन ओजिष्ठायेति ॥ १५ ॥

---

१ बर्हिः प्रस्तरयोरन्तराले तिर्यक् प्रसार्यमाणौ दर्भौ विधृती इति प्रथमस्य तृतीयचरणे माधवाचार्याः ।

२ इदमातिथ्यमिति शेषः ।

मन्त्रत्रयेन स्थाल्याः स्रुवेण गृह्णाति ॥ १५ ॥

गृह्णामीति सर्वत्र साकाङ्क्षत्वात् ॥ १६ ॥

गृह्णामीति च मन्त्रानुषङ्गः साकाङ्क्षत्वात् । द्विश्च स्थल्याः स्रुवेण गृह्णातीति कुत एतत् । मन्त्रवाक्यभेदात् । आज्यानि गृह्णाना इति चाज्यबहुत्वश्रवणात् ॥ १६ ॥

पूर्वशेषौ वोत्तरौ ॥ १७ ॥

वाशब्दः क्षव्यावृत्तौ । पूर्वशेषभूतौ चोत्तरौ मन्त्रौ । न द्विः स्थाल्याः स्रुवेण ग्रहणम् । न ह्यत्र वचनमस्ति, न पूर्वमन्त्रेण सहैकवाक्यता, नोपापाततः । अनेकविशेषणविशिष्टो हि सर्वैरेतैर्वायुरभिधीयत इति । आपतये त्वा परिपतये गृह्णामीति हि प्रकृत्याह यो वा अयं पवत एष आवपतीति परिवपतीति । तथा एष तनूनप्त्रशाक्वर इति एष वै शाक्वौजिष्ठ इति । एकवाक्यतायां च गम्यमानायां भिन्नवाक्यता न युक्ता । अतो यन्मन्त्रवाक्यभेदात् द्विश्च स्थाल्याः स्रुवेणेति तन्नातीव युक्तरूपम् । यत्त्वाज्यानि गृह्णाना इत्याज्यबहुत्वं तत्प्रतिपुरुषग्रहणेन परिह्रियते । तस्मादेकमेवेदं ग्रहणम् न द्विः स्थाल्याः स्रुवेणेति सम्प्रदायः । अपरे तु द्विः स्थाल्याः स्रुवेण तूष्णीं ग्रहणमिच्छन्ति । तेषां पुनर्वचनमन्वेषणीयम् । न हि वचनमन्तरेणैषोऽर्थः शक्यते वक्तुमिति ॥ १७ ॥

तानूनप्त्रमेतत् ॥ १८ ॥

अस्य तानूनप्त्रमितीयं संज्ञा वैदिकी ॥ १८ ॥

दक्षिणस्यां वेदिश्रोणौ निधायावमृशन्त्यृत्विजो यजमानश्चानाधृष्टमिति ॥ १९ ॥

अनेन मन्त्रेण ॥ १९ ॥

अद्रोहस्तेभ्यो न सतानूनप्त्रिणे द्रोग्धव्यमिति श्रुतेः ॥ २० ॥

यैः सह तानूनप्त्रमाज्यं स्पृष्टन्तं तेतानूर्नाप्त्रिणः तेषां परस्परतो द्रोह इति ॥ २० ॥

पल्यङ्ग्य निदधात्यपिधायामृन्मयेन ॥ २१ ॥

पल्यंग्य चालयित्वा अपिधायामृन्मयेन निदधाति । प्रकृतत्वात्तानूनप्त्रम् ॥ २१ ॥

अपराह्णे व्रतमिश्रं दीक्षिताय प्रयच्छति ॥२२॥

अपराह्ण इत्यनुवाद एव प्राप्तत्वात् । व्रतस्य पुरुषार्थत्वाद्यद्यप्यसामर्थ्यं भवति तथापि क्रत्वर्थत्वात्तानूनप्त्रं दीयत एव ॥ २२ ॥

बहुषु गृहपतये ॥ २३ ॥

बहुषु यजमानेषु गृहपतय एव तानूनप्त्रप्रदानम् । यदि बहवो दीक्षेरन् गृहपतय एव व्रतमभ्युत्सिच्य प्रयच्छेयुरिति श्रुतेः ॥ २३ ॥

अग्ने व्रतपा इत्याहवनीये समिधमाधाय

मदन्तीरुपस्पृश्य गाढतरं मुष्टिमेखलं कुरुते ॥२४॥

अग्ने व्रतपा इत्यनेन मन्त्रेणाहवनीये समिधमभ्याधाय मदन्तीरुपस्पृश्य गाढतरं मुष्टिमेखलं करोति । अवान्तरदीक्षेयमिति यजमानः करोति ॥ २४ ॥

पत्नी च गार्हपत्ये तूष्णीम् ॥ २५ ॥

चशब्दात्समिधमाधाय मदन्तीरुपस्पृश्य गाढतरं मुष्टिमेखलं करोति । बहुयजमानके सर्वेषामवान्तरदीक्षा ॥ २५ ॥

मदन्तीरुपस्पृश्य यजमानषष्ठाः सोममाप्यायन्त्यꣳशुरꣳशुरिति ॥ २६ ॥

चतुर्णामप्याद्यर्त्विजां प्रतिवेदमाप्यायनमाम्नातं पञ्चमः प्रतिप्रस्थाता । एवं यजमान षष्ठा इति सम्प्रदायः । अपरे त्वग्नीधं पञ्चमं

मन्यन्ते । आप्यायनं चालम्भमात्रम् न सोमप्रक्षेपः । नियतपरिमाणत्वात् । सर्वाग्नेयपक्षे चाग्निष्टुदादिषु मन्त्रस्य विपरिणामः ॥२६॥

आज्यमालभ्योपस्पृशेदपः सोममालिप्समानस्तथाविपर्यस्य प्रत्येत्य प्रस्तरे निन्हुवत उत्तानहस्ता दक्षिणोत्ताना वेष्टा राय इति ॥२७॥

तत्रस्थस्यापि प्रस्तरे निन्हवः सम्भवति । तन्मा भूदिति प्रत्येत्येति ग्रहणम् । निन्हवश्च प्रस्तरे पाणयोः करणम् ॥ २७ ॥

व्यूहनपरिध्यञ्जने कृत्वैके ॥ २८ ॥

तानूनप्त्रग्रहणादि कुर्वन्ति । शेषान्तरात् । तानूनप्त्रादेरवसरविधित्सया व्यूहनपरिध्यञ्जने अनूद्येते । संस्कारकत्वाच्चेडान्तत्वेपि सत्येवमादीनां प्रवृत्तिरिष्यते । अपूर्वोत्पादकानां तु निवृत्तिर्युक्तरूपा । प्रतिपत्तित्वाच्च प्रतिपत्तीनां प्रवृत्तिरेव ॥ २८ ॥

समुल्लुप्य प्रस्तरमक्त्वा परिधींश्चादायाहाग्नीन्मदन्त्यापा३ इति ॥ २९ ॥

प्रस्तरं गृहीत्वाक्त्वा च परिधीनादाय विधृती चाग्नीन्मदन्त्यापा इत्याह ॥ २९ ॥

मदन्तीत्यग्नीत् ॥ ३० ॥

प्रत्याह ॥ ३० ॥

ताभिरेहीति ब्रुवन्नध्याहवनीयं हृत्वाभ्युक्ष्याग्नीधे प्रयच्छति निधानाय ॥ ३१ ॥

ताभिरेहीत्यमुं मन्त्रं ब्रुवन्नध्यध्याहवनीयं हृत्वा अध्यधिशब्दः सामीप्य उपरि भावे च मदन्तीभिरभ्युक्ष्याग्नीधे प्रयच्छति निधानार्थम् ॥ ३१ ॥

सुब्रह्मण्याञ्च प्रेष्यति ॥ ३२ ॥

चशब्दात्प्रतिपत्तीश्चपरिसमापयति । ताश्चपूर्वतरन्ततःसुब्रह्मण्याप्रैषः । आङ्गन्तुत्वात् ॥ ३२ ॥

प्रवर्ग्योपसदावतः ॥ ३३ ॥

अत ऊर्ध्वं प्रवर्ग्योपसदौ भवतः । अन्यत्र पठितस्यावसरविधित्सयेदमुक्तं न ह्यत्र प्रवर्ग्यस्य पाठ इति ॥ ३३ ॥

उपसदेव वाप्रवर्ग्ये ॥ ३४ ॥

अप्रवर्ग्यशब्देन प्रथमयज्ञोभिधीयते । तत्र प्रथमयज्ञे प्रवृंज्यादिति वचनात् । स च प्रथमप्रयोगः । द्वितीये वैव तृतीये वेत्यनुवादात् । प्रथमयज्ञ उपसदेव भवति । वा तत्रापि प्रवर्त्स्य॰ । शाखान्तरात् प्रथमयज्ञे ण्येक इति ॥ ३४ ॥

प्रणीताद्युपसत् ॥ ३५ ॥

प्रणितानां यदादौ तदादि वाचस्पतिप्रैषादीत्यर्थः । अग्न्यन्वाधानब्रह्मवरणयोरप्रसक्तत्वात् । उपसदिति च कर्मणो नामधेयम् । तेषु प्रेतेषूपसदो तन्वतेति हि श्रूयते ॥ ३५ ॥

१ हविष्कृतमाह्वयानाहननमपेषणे तीक्ष्णार्थत्वात् ॥ ३६ ॥

हविष्कृदाह्वानकाले यदाहननं तत्पेषणाभावे न भवति । कुत एतत् । तीक्ष्णार्थत्वात् । तीक्ष्णकरणाय हि दृषदुपले आहन्यते । तीक्ष्णीकृताभ्यां हिं पेषणमभिनिवर्त्यत इति ॥ ३६ ॥

---

१ इदानीमिदं विचार्यते किं पेषणाभावे चोदकप्राप्तं दृषदुपलयोराहननं भवत्युत न भवतीति? किं तावत्प्राप्तम्? तत्र सूत्रेणैव पूर्वपक्षं करोति—

१स्याद्वा धर्ममात्रत्वात् ॥ ३७ ॥

वाशब्दः पक्षव्यावृत्तौ । भवेद्वा पेषणाभावेप्याहननम् । नैतत् तैक्ष्णार्थम् । न हि शम्यया दृषदुपलयोस्तीक्ष्णतोपपादयितुं शक्यते । अतो धर्ममात्रमेतत् ॥ ३७ ॥

किं च—

श्रुतेश्च ॥ ३८ ॥

श्रुतिरप्यमुमर्थं ज्ञापयति धर्ममात्रमेतदिति । अत्र पुराकल्परूपा श्रुतिः । असुरघ्नी सपत्नघ्नी च वाक् यज्ञपात्राणि प्रविष्टा- सा यज्ञमेव यज्ञपात्राणि प्रविवेश ततो हैनां न शेकतुर्निर्हन्तुमिति प्रकृत्याह सैषासुरघ्नी सपत्नघ्नी वागुद्वदति स यत्रैष हविष्कृतमुद्वादयति तदेको दृषदुपले समाहन्ति इति दृषदुपलयोराहननं असुरसपत्नहननाय न तीक्ष्णीकरणाय तस्माद्धर्ममात्रमिति । नन्वेवमपि द्वितीयान्तनिर्देशाद्दृषदुपलसंस्कार एवायं स्रुक्सम्मार्गवत् । ततश्च पेषणाभावे न भवति । अत्रोच्यते । नैष दृषदुपलसंस्कारः । वागुद्वादनमात्रं चोद्यते । तस्मादेतामत्र वाचं प्रत्युद्वादयन्तीति प्रकृत्य पुनरुपसंह्रियते स यस्य हैवं विदुष एतामत्र वाचं प्रत्युद्वादयन्ति पापीयांसो हैवास्य सपत्ना भवन्तीति । उपक्रमोपसंहारयोर्वाक्यस्य वागुद्वादनार्थता गम्यते न दृषदुपलसंस्कारार्थतेति । एवं च भूतभव्यसमुच्चारणन्यायानुग्रहो भूतस्य भव्यार्थता न्याय्या न भाव्यस्याहननस्य भूतार्थता । नन्वेवं सति आहननाददृष्टं कल्पनीयम् । सत्यमेवं दृषदुपलसंस्कारपक्षेपि अदृष्टकल्पनास्त्येवेति तस्माददोषोयम् । अपरे तु व्यावर्णयन्ति । द्वन्द्वैकवद्भूतस्य दृषदुपलस्य गुणविभक्त्या सप्तम्या निर्देशोयं दृषदुपले समाहन्तीति । स्पष्ट एव दृषदुपलस्याहननं प्रति गुणभाव इति । एवं सत्याज्यसान्नाय्येष्टिषु भवत्येवावहननमिति ॥ ३८ ॥

परिस्तरणपात्रसंसादनप्रोक्षणाज्यनिर्वपणा-

---

१ सिद्धान्तमाह—

धिश्रयणानि कृत्वा स्फ्यादि करोति ॥ ३९ ॥

उपसदोऽपूर्वत्वज्ञापनार्थं परिस्तरणाद्युपादानम् । कुक्कुटाहननिरासार्थं च । तत्कुतः यावदुक्तं ह्युपसत्कर्म येनात्र स्रुवाघारो विधीयते तद्विधानेन च यावत्किञ्चिददृष्टोपकारकर्मविहितं तत्सर्वमेव न भवति । यथा हननं स्फ्योदञ्चप्रहरणं च तथोत्तराघारप्रयाजाज्यभागादि । स्फ्यादानं त्वत्र विधीयत एव । स्तृतत्वाद्वेदेस्तम्बयजुर्हरणस्य प्राप्त्यभावात् । अतः स्फ्यादानविधेर्वाचनिकं स्तम्बयजुर्हरणमिति । अत्र च यद्यपि पर्यग्निकरणं नोद्घाटितम् । तथापि द्रव्यसंस्कारादिष्यत एव । द्रव्यं चाघारादिविधानादाक्षिप्तमेव ॥ ३९ ॥

बर्हिषः प्रच्छेदं हरति ॥ ४० ॥

स्तम्बयजुर्हरणे बर्हिषोवयवं प्रच्छिद्य हरतीति । एवं च स्तृतैव वेदिरिति गम्यते ॥ ४० ॥

मदन्तीरिति वा प्रेष्यति ॥ ४१ ॥

वाशब्दश्चार्थ इति सम्प्रदायः । पुनर्वचनाच्च प्रैषस्य नियमः । मदन्त्युपादानसामर्थ्याच्च मदन्तीशब्दस्य ॥ ४१ ॥

मात्रावदिध्माबर्हिः ॥ ४२ ॥

अष्टादशसंख्याक इध्मे प्राप्ते मात्रावदित्युच्यते । नवसामिधेन्यः स्पृश्यानुपस्पृश्ये च द्वे एवमेकादशभवन्ति । बर्हिषश्चैकवृत्तरणविधानान्मात्रावदित्युक्तम् ॥ ४२ ॥

स्रुवतृतीयास्रुचः सम्मार्ष्टि ॥ ४३ ॥

स्रुग्बहुत्वाभावात्स्रुवेण सह बहुवचनम् । स्रुवतृतीयानां सम्मार्गो न वाच्यो अन्वयप्राप्तत्वात् । वाच्यो वाज्यस्थाल्याः सम्मार्गो मा भूदिति । कुतः प्राप्तिरिति चेत् । वक्ष्यति ह्याज्यस्थालीध्रुवार्थ इति । अनेन प्रापितः सम्मार्गो निवर्त्यते । यद्येवं कार्यापत्तेः प्राप्नोत्येव सम्मार्गः । नैतदेवम् । ध्रुवाकार्यापत्तिरेव स्थाल्या

न विद्यते। ध्रुवाया हि कार्यं स्थालीतो गृहीतस्य यज्ञार्थस्याज्यस्य धारणम् । तच्चेह न विद्यते। यद्येवं कथमुक्तमाचार्येणाज्यस्थालीध्रुवार्थे इति। प्रस्तराञ्जनार्थतयेत्यदोषः । न च ध्रुवायाः प्रस्तराञ्जनार्थद्रव्यधारणं कार्यं, निर्दिष्टत्वात् कार्यस्य । अथ यच्चतुर्ध्रुवायां गृह्णाति सर्वस्मै तद्यज्ञाय गृह्णातीति । यथा जुहूपभृतोरन्यकार्ययोः प्रकृतौ प्रस्तराञ्जनं विहितमेवं ध्रुवायामपि। एतच्चाङ्गीकृत्याचार्येणोक्तमाज्यस्थालीध्रुवार्थे इति । एवं च ध्रुवाकार्याभावात् स्थाल्याः सम्मृज्यर्थौ दुर्लभ इति। सम्प्रदाये तु प्रागाज्यनिर्वापात्स प्रैषः सम्मार्गः क्रियत एव ॥ ४३ ॥

अष्टगृहीतं जुह्वां चतुरुपभृति यथा
प्रकृति वा ॥ ४४ ॥

अष्टगृहीतं जुह्वां ग्रहीतव्यम् चतुर्गृहीतमुपभृति। स वा अष्टौ कृत्वो जुह्वां गृह्णाति चतुरुपभृतीति वचनात् । अथो इतरथाहुश्चतुरेव कृत्वो जुह्वां गृह्णीयादष्टौ कृत्व उपभृतीति श्रुतत्वात् यथाप्रकृति वेत्युक्तम् । अत्र गृह्णातीति प्रकृतिलिङ्गसंयोगात् प्रधानार्थत्वेपि सति प्रकृतिवदेव वचनात् ग्रहणं वचनाच्चानेनैव प्रधानाभिनिर्वृत्तिः ॥ ४४ ॥

एकवृत्स्तरणम् ॥ ४५ ॥

वचनादेव ॥ ४५ ॥

आज्यस्थालीध्रुवार्थे ॥ ४६ ॥

कृतव्याख्यानम् ॥ ४६ ॥

स्रुवाघारमाघार्य सम्मृष्ट आश्राव्य सीद हो-
तरित्येव ब्रूयात् ॥ ४७ ॥

स्रुवाघारविधानेन यावदुक्तमेतदिति गम्यते । सम्मृष्टेग्नौ आश्राव्य सीद होतरित्येव ब्रूयात् । अथाश्राव्य न होतारं प्रवृणीते सीद होतरित्येवाहेति वचनात् ॥ ४७ ॥

प्रसूतोऽतिक्रामन्नग्नयेऽनुवाचयति ॥ ४८ ॥

स आहातिक्रामन्नग्नये ऽनुब्रूहीति । प्रसवश्चात्र प्रयाजार्थोऽपि सन् वचनाद्भवति । उपविशति होता होतृषदन उपविश्य प्रसौति प्रसूतो ऽध्वर्युः स्रुचावादत्ते स आहातिक्रामन्नग्नये ऽनुब्रूहीति ॥४८॥

अर्द्धᳪं हुत्वा सोमाय विष्णवे समानीय[1] ॥४९॥

अर्द्धं हुत्वा सोमायार्द्धं ततो विष्णवे समानीय । उपभृत्यगृहीतपक्षे सर्वमेव जौहवं हुत्वा समानीय सोमाय विष्णवे च जुहोति । वचनसामर्थ्याच्च वैष्णवं समानयमानेनानुवाचनं कर्त्तव्यम । अथ यदुपभृत्याज्यं भवति तत्समानयमान आह विष्णवे ऽनुब्रूहीति ॥ ४९ ॥

सादयित्वा स्रुचौ सोमाप्यायनाद्यासुब्रह्मण्याप्रैषात् ॥ ५० ॥

आतिथ्यावत् ॥ ५० ॥

कर्मणि विशेष उच्यते—

अक्त्वा प्रस्तरमुपसदं जुहोति स्रुवेण यात इत्ययः शयामन्वारब्धे ॥ ५१ ॥

निगदव्याख्यातम ॥ ५१ ॥

द्विरेकया चरति सुसायᳪं सुपूर्वाण्हे च ॥ ५२ ॥

एकयोपसदा द्विश्चरति । सायं शब्दोपराह्णवाची । पूर्वाह्णशब्दः प्रसिद्ध एव ॥ ५२ ॥

एवमितरे अन्वहᳪं रजः शयाᳪं

---

१ मानवे 'घृतवतीमध्वर्यो स्रुचमास्यस्वेत्युच्यमाने स्रुचावदाय दक्षिणातिक्रम्य यथादेवतमनुवाचयत्यग्निं पूर्वार्धे यजति मध्ये सोममौपभृतं जुह्वाᳪं समानीय विष्णुं पूर्वार्धे' इति ।

## हरिशयां च ॥ ५३ ॥

एवमेवेतरे द्वे उपसत्कर्मणी अन्वहं कर्त्तव्ये । रजः शया हरिशयां च मन्त्रेणैवोपलक्षिते ॥ ५३ ॥

## एकाहस्त्र्युपसत्को द्वादश वा ॥ ५४ ॥

एकाहे प्रक्रान्त एव पुनरेकाहग्रहणं द्वादशोपसत्कस्यानेकाह-विषयप्रज्ञप्त्यर्थं इह पठितं द्वादशोपसत्कं वाक्येनोक्तत्वाल्पाहीनमुपनीतम् । तिस्र एव एकाह्नस्योपसदः कार्या द्वादशाहीनस्येति ॥ ५४ ॥

## त्रिस्तनं प्रथमायां दोहयति ॥ ५५ ॥

प्रथमायामुपसदि त्रिस्तनं व्रतम् ॥ ५५ ॥

## एकापचयेनोत्तरयोः ॥ ५६ ॥

उत्तरयोः पुनरुपसदोरेकस्तनापचयेन व्रतम् ॥ ५६ ॥

## विपर्यस्य वानग्निचित्ये ॥ ५७ ॥

अनग्निचित्ये अनग्निके सोमे विपर्यासो वा भवति । साग्निके तु त्रिस्तनाद्येव । एवमेव हि तत्र पठ्यते । ते त्रीन्स्तनानुपेयुः ते द्वौ त एकमिति ॥ ५७ ॥

## एवं प्रवृद्धौ समं विभजेत् ॥ ५८ ॥

उपसत्प्रवृद्धावेवमेव समो विभागः कर्त्तव्यः समं स्यादश्रुतत्वादिति न्यायात् ॥ ५८ ॥

## १स्वस्थानविवृद्धिः ॥ ५९ ॥

कर्तव्या । न दण्डकलितवदावृत्या । मन्त्राणामानुपूर्व्ययोगात् । इतरथा हरिशयां कृत्वायः शया प्राप्नोति । तत्र मन्त्रा नानुपूर्व्या युक्ता भवन्ति ॥ ५९ ॥

---

१ इदानीमिदं विचारणीयं किमुपसदां वृद्धिर्दण्डकलितवदावृत्त्योत ? स्वस्थानवृद्ध्या इति ? उभयथाप्यनियमे नियामकमाह—

औपवसथ्यात्पूर्वेऽहनि पौर्वाह्णिक्या प्रचर्य वेदिं मिमीते ॥ ६० ॥

औपवसथ्यमहश्चतुर्दशी । तस्याः पूर्वं त्रयोदशी । पौर्वाह्णिक्योपसदा प्रचर्य वेदिमानम् । वेदिशब्दश्च संस्कारनिमित्तोऽतस्तदर्थानां पात्राणां प्रयोजिका वेदिः । प्रणीतास्तु सम्प्रदाये न क्रियन्ते । युक्ता पुनः प्रणीतानामुत्पत्तिः । तत्संस्कारोऽभिनिर्वृत्यते च प्रतिपत्तिरिति ॥ ६० ॥

पूर्वार्द्धात्स्तम्भात्पुरस्तात्त्रिषु प्रक्रमेषु शङ्कुं निहन्ति सोऽन्तःपात्यः ॥ ६१ ॥

स्तम्भसम्मितात् द्वारमध्यात्त्रिषु प्रक्रमेषु शङ्कुनिखननम् । तस्मादयं पुरुष आत्तः सन्तृण्ण इति श्रुतेः । स्तम्भग्रहणं द्वारमध्योपलक्षणार्थम् । तथा च काण्वीया श्रुतिः स वै शालायाः पूर्वार्द्धात् प्राक्प्रक्रामतीति । शङ्कोश्चान्तःपात्यसंज्ञा संव्यवहारार्था । शङ्कुनिखननाच्चोत्तरकालं वेद्युपकरणानामासादनप्रोक्षणे ॥ ६१ ॥

तस्मात्पुरस्तात्षड्विंशति ॥ ६२ ॥

तस्मान्मध्यमाच्छङ्कोः प्राङ् षड्विंशतं विक्रमान्प्रक्रामति तच्छङ्कुं निहन्तीति ॥ ६२ ॥

दक्षिणोत्तरौ च पञ्चदशसु पञ्चदशसु ॥ ६३ ॥

चशब्दात्तस्मादेवान्तःपात्यात् । अथ यस्त्रिंशद्विक्रमा पश्चाद्भवतीति श्रुतत्वात् पञ्चदशसु पञ्चदशस्वित्युक्तम् ॥ ६३ ॥

अर्द्धसप्तदशेषु वा ॥ ६४ ॥

अथो अपि त्रयस्त्रिंशत्स्युरिति वचनात् ॥ ६४ ॥

पूर्वार्द्धाच्च द्वादशसु ॥ ६५ ॥

शङ्कुं निहन्ति । चतुर्विंशतिविक्रमा पुरस्ताद्भवतीति श्रुतेः ।

प्रक्रमणं च समाख्ययाध्वर्यवम् । परिमाणं तु याजमानमपि सद्गुणत्वाद्बाध्यते । प्रधाना हि क्रिया परिमाणं गुणभूतमिति ॥६५॥

पृष्ठ्यामायम्य स्फ्यादि करोति खादिरेनाच्छादनात् ॥ ६६ ॥

पृष्ठ्या संवरदण्डम् । मध्ये पूर्वापरायतमुत्थाप्य स्फ्यादानादि कर्म करोति खादिरेण वज्रेणाच्छादनान्तम् । खादिरग्रहणं शक्यमवक्तुं परिभाषितत्वात् । उच्यते च । तत्किमर्थम्। समानजातीयत्वाशङ्कानिवृत्यर्थम् । श्रूयते हि तस्मात्खादिरो यूपो भवति खादिरस्फ्य इति । वैल्वादिषु यूपेषु स्फ्यस्यापि मा भूत्ताज्जतीयतेति विशेषमाह ॥ ६६ ॥

उपरवदेशात्स्तम्बयजुर्हरति ॥ ६७ ॥

उत्तरां॒सात्पश्चादध्यर्द्धे पदे चात्वालम् ॥६८॥

करोतीति शेषः । प्रक्रमद्वयपरिमाणं पदं तस्मिन्नर्द्धाधिके उत्तरांसात्पश्चाच्चात्वालं करोति । श्रुयते हि तद्य एष पूर्वार्द्धे उत्तरार्द्धः शङ्कुर्भवति तस्मात्प्रत्यङ्प्रक्रामति त्रीन्विक्रमांस्तच्चात्वालं परिलिखतीति ॥ ६८ ॥

यथोक्तं वा ॥ ६९ ॥

वाशब्दो विकल्पार्थः । यथोक्तमिति पूर्वेणोत्कर॒सञ्चरं परिहाप्य । एवमपि श्रूयते नात्र मात्रास्ति यत्रैव स्वयं मनसा मन्येताग्रेणोत्करं तच्चात्वालं परिलिखेदिति ॥ ६९ ॥

१प्रातरुपसदौ समस्य पौर्वाण्हिक्या प्रचर्यार्द्धव्रतं प्रयच्छति ॥ ७० ॥

---

१ अथ सुत्यायाः प्राग्दिनकृत्यमाह—

प्रातश्चतुर्दश्यामुपसत्समासः । तत्र पौर्वाह्णिक्या प्रचर्यार्धव्रतप्रदानम् ॥ ७० ॥

सर्वं वाग्नौ ॥ ७१ ॥

साग्निके सर्वं वा प्रयच्छतीति विकल्पः ॥ ७१ ॥

उभाभ्यां चरिते प्रवर्ग्यमुत्सादयति यथोक्तं कुर्याच्चेत् ॥ ७२ ॥

उभाभ्यामुपसद्भ्यां चरिते प्रवर्ग्योत्सादनम् । यदि कृतः प्रवर्ग्यः ॥ ७२ ॥

अग्निं प्रणयत्यौपनिवपनात्कृत्वा हविर्धाने स्थापयति पृष्ठ्यामुभयतोऽक्षरत्न्यन्तरे प्रक्षालिते प्राची उभतः शालामावर्त्य वर्षीयो दक्षिणम् ॥ ७३ ॥

अग्निप्रणयनमुपयमन्युपनिवपनान्तं कृत्वा अनसी स्थापयति पृष्ठ्यामुभयतोऽक्षरत्न्यन्तरं प्रक्षालिते प्राङ्मुखे शालाया उभयत आसीनाय एकं दक्षिणेन द्वितीयमुत्तरेण । यद्वर्षीयस्तद्दक्षिणमिति श्रुतेः वर्षीयो दक्षिणम् । अग्निप्रणयनमुपयमन्युपनिवपनान्तम् निरूढपशुबन्धोदितमिहाभिधीयते । तदिह समाम्नातं सदङ्गप्रधानार्थत्वादाहवनीयस्य तत्संस्काराच्चाग्नीषोमीयस्य भवति । अतस्तद्विकारे निरूढ उपदिष्टमाचार्येणेह पुनरतिदिश्यत इति ॥ ७३ ॥

तयोश्छदिरध्यस्यति ॥ ७४ ॥

तयोर्हविर्धानयोश्छदिरारोपयति ॥ ७४ ॥

भित्तिं वाभावे ॥ ७५ ॥

छदिषोऽभावे भित्तिम् । यदिच्छदिर्न विन्देयुश्छदिः सम्मितां भित्तिमिति श्रुतेः । छदिश्चतुः स्रक्तिः पञ्चस्रक्तिश्च भित्तिः प्रसिद्धेः ॥ ७५ ॥

अन्यत्रापि ॥ ७६ ॥

च्छदिषोभावे भित्तिरेव भवति ॥ ७६ ॥

१रराट्यां पुरस्तादासजत्यैषीकीम् ॥ ७७ ॥

हविर्द्धानयोः पुरस्तात् रराट्यामिषीकामयीमवलगयति ॥७७॥

उच्छ्रायीभ्यां परिवार्य छदिः पश्चाच्च ॥ ७८ ॥

चशब्दात्पुरस्ताच्चारोपयति ॥ ७८ ॥

चतुर्गृहीतं शालाद्वार्ये जुहोति युञ्जत
इति ७९ ॥

अनेन मन्त्रेण ॥ ७९ ॥

स गार्हपत्योतः ॥ ८० ॥

अतः परं गार्हपत्यकार्यमत्र कर्त्तव्यम । तच्च ज्योतिष्टोमे समाम्नानादत्रैव भवति । एवं च सति कुण्डपायिनामयनेऽग्निहोत्रादिषु प्राजहित एव गार्हपत्यः । न ह्यग्निहोत्रं ज्योतिष्टोमे न ज्योतिष्टोमाङ्गमिति । अग्नीषोमीयविकारेषु निरूढादिषु तर्हि शालाद्वार्ये गार्हपत्यकार्यमस्तु तत्प्रकृतौ दृष्टत्वात् । नैतदेवम । न हि तदग्नीषोमीयाद्यर्थतयोच्यते किं तर्हि प्रकरणे विधानात् प्रकरणिनोपसङ्गृह्यते प्रकरणिनोपसङ्गृहीतत्वाच्च गार्हपत्यकार्यमगार्हपत्ये क्रियते । एवं च नैतदग्नीषोमीयार्थम । अतस्तद्विकारेषु प्रकरण्युपसङ्ग्राहको नास्त्यगार्हपत्ये गार्हपत्यकार्यस्य । तेन गार्हपत्यएव कार्यमिति । एवं च कृत्वाग्नीषोमीयोपयोगेपि सति तद्विकारेषु वेदिस्तद्रूपा न भवति ॥ ८० ॥

१ रलयोरैक्याल्ललाटमभिधीयते, तत्र भवा रराट्या, ललाटपट्टिकेति यावत् । तामिषीकामयीं करोति । रराटी हविर्धानस्य पूर्वद्वारे उपरिष्टात् कटिकेति धूर्तस्वामिनः । रराट्या तेजनीत्यनर्थान्तरमिति पितृभूतिः ।

अपरं दक्षिणे वर्त्मनि दक्षिणस्यानसो हिरण्यं निधायाभिजुहोतीदं विष्णुरिति ॥ ८१ ॥

अपरं चतुर्गृहीतं दक्षिणस्य हविर्द्धानस्य दक्षिणायां वर्त्तन्यां हिरण्यं निधायाभिजुहोतिदं विष्णुरित्यनेन मन्त्रेण। अस्य च चतुर्गृहीतस्य शालाद्वार्य एव संस्कारः ॥ ८१ ॥

दक्षिणया द्वारानीता पत्नी पाणिभ्यां शेषं प्रतिगृह्याक्षधुरावनक्ति परागदेवश्रुताविति युगपत्तद्वचनत्वात् ॥ ८२ ॥

दक्षिणया द्वारानीता पत्नी पाणिभ्यां चतुर्गृहीतशेषं गृहीत्वाक्षधुरौ परागुपानक्ति नेतश्चामुतश्च देवश्रुतावित्यनेन मन्त्रेण। तच्च युगपदञ्जनं द्वित्वाभिधायकत्वान्मन्त्रस्य ॥ ८२ ॥

भेदे मन्त्रावृत्तिः सान्निपातित्वात् ॥ ८३ ॥

भेदेन चाञ्जनम्। न हि दक्षिणेनैकेन पाणिना शक्यते युगपत्कर्तुमिति। तस्माद्भेदेन, भेदे च मन्त्रावृत्तिः सान्निपातित्वादिति ॥ ८३ ॥

स्रुक्स्थाल्यौ प्रतिगृह्य प्रतिप्रस्थातोत्तरस्येरावती इति पूर्ववत् ॥ ८४ ॥

प्रतिप्रस्थाता स्रुक्स्थाल्यौ गृहीत्वोत्तरस्य हविर्द्धानस्य दक्षिणायां वर्त्तन्यां हिरण्यं निधायाभिजुहोतीरावतीत्यनेन मन्त्रेण ॥८४॥

पत्नी चापरेणाग्नीन्परीत्योत्तरस्यानक्ति पूर्ववत् ॥ ८५ ॥

चशब्दादानीता सती। पर्याणयन्ति पत्नीमुभौ जघनेनाग्नी इति वचनात् ॥ ८५ ॥

हविर्द्धानाभ्यां प्रवर्त्त्यमानाभ्यामनुवाचयति ॥८६॥

अनुवचनं कारयति होतारं प्रेषणेन ॥ ८६ ॥

त्रिरुक्तायामुद्गृह्येव वर्त्तनम् ॥ ८७ ॥

त्रिरुक्तायां प्रथमायामृचि अनसोरुद्गृह्येव वर्त्तनम् । समुद्गृह्येव प्रवर्त्तयेयुर्यथा नोत्सर्जतामिति वचनात् ॥ ८७ ॥

प्राचीप्रेतमिति वाचयति ॥ ८८ ॥

यजमानम् ॥ ८८ ॥

स्वं गोष्ठमिति च खर्जति[१] ॥ ८९ ॥

चशब्दाद्वाचयति ॥ ८९ ॥

पश्चादुत्तरवेदेस्त्रिषु प्रक्रमेषु मत्यावानभ्यस्थे अभिमन्त्रयते ऽत्र रमेथामिति ॥ ९० ॥

ऽयवयवयोः पादयोः मध्यावयवस्थयोरभिमन्त्रणम् ॥ ९० ॥

उत्तरेण परिक्रम्य दक्षिणमुपस्तभ्नाति विष्णोर्नुकमिति ॥ ९१ ॥

द्वे अध्यनसी उत्तरेण परिक्रम्य दक्षिणमुपस्तभ्नाति विष्णोर्नुकमित्यनेन मन्त्रेण ॥ ९१ ॥

दक्षिणतःस्थूणामुपनिहन्ति विष्णवे त्वेति ॥९२ ॥

उपनिहन्मीति च शेषः । दक्षिणत इति च दक्षिणपूर्वकोणोभिधीयते ॥ ९२ ॥

दिवो वेत्युत्तरं प्रतिप्रस्थाता ॥ ९३ ॥

---

१ चक्रघर्षणजः शब्दः खर्जपदवाच्यः, एवं च खर्जति नाम चक्रघर्षणजं शब्दं कुर्वत्यनसीत्यर्थः ।

उपस्तभ्नातीत्यनुवर्त्तते ॥ ९३ ॥

उत्तरतः स्थूणां पूर्ववत् ॥ ९४ ॥

अध्वर्युरेवानिहन्ति । उत्तरत इत्यनेन तउत्तरपूर्वकोणोभिधीयते ॥ ९४ ॥

उभे वा दक्षिणतः ॥ ९५ ॥

उपनिहन्येते । तथा च दक्षिणापरे कोणे द्वितीया ॥ ९५ ॥

इतरस्ततस्ततः ॥ ९६ ॥

इतरत इत्यनेनोत्तरः कोणोभिधीयते ॥ ९६ ॥

यदु च मानुष इति श्रुतेः ॥ ९७ ॥

यच्च मानुषे व्यापारे स्थूणादि तच्च करोति[१] ॥ ९७ ॥

प्रतद्विष्णुरिति वाचयति मध्यमं छदिरालभ्य ॥ ९८ ॥

आलभ्येति कारितत्वादध्येषणा मध्यमं छदिरालभस्वेति ॥ ९८ ॥

उत्तरे च ॥ ९९ ॥

द्वे वाचने च शब्दात्क्रियेते ॥ ९९ ॥

विष्णोरराटमिति रराट्याम् ॥ १०० ॥

आलभ्य ॥ १०० ॥

विष्णोः श्नप्त्रेस्थ इत्युच्छ्राय्यौ ॥ १०१ ॥

---

१ अर्थात्, उपरि वलकादिनिधानवन्धनाधिकस्थूणानिखननादिभिर्यथा लोके छदिर्दृढी क्रियते तथा कुर्यात् ।

आलभ्य ॥ १०१ ॥

उदगग्राणि च्छदींषि पश्चाच्छ्रुतेः ॥ १०२ ॥

अथ यदिदं पश्चाच्छदिर्भवतीति श्रूयते । तस्योदगग्रेषु स-म्भवति ॥ १०२ ॥

द्वार्योः परिषीव्यति१लस्पूजनिप्रतिहृतया रज्ज्वा विष्णोः स्यूरसीति ॥ १०३ ॥

सूचीगतया रज्ज्वा द्वार्योः परिषीव्यति विष्णोः स्यूरसीत्यनेन मन्त्रेण ॥ १०३ ॥

विष्णोर्ध्रुवोसीति ग्रन्थिं करोति ॥ १०४ ॥

उपक्रान्ते प्रमुञ्चति ॥ १०५ ॥

ग्रन्थिम् । उत्तरपूर्वद्वार्यायां परिषीवणपरिसमाप्तिरिति स-म्प्रदायः ॥ १०५ ॥

प्राग्वंशं हविर्द्धानम् ॥ १०६ ॥

भवति ॥ १०६ ॥

निष्ठाप्य वैष्णवमसीत्यालभते ॥ १०७ ॥

हविर्द्धानम् ॥ १०७ ॥

भोजनभक्षणे चास्मिन्न कुर्युः ॥ १०८ ॥

पुरुषार्थरूपतया प्राप्तयोर्निषेधः ॥ १०८ ॥

अद्वारेण सदो हविर्द्धाने प्रेक्षमाणं ब्रूयान्मा

---

१ लष श्लेषणे; पूज पूजायाम, पूजितं शोभनं श्लेष्यते ऽनयेति पूजितश्लेषणीति प्राप्ते छान्दसत्वाल्लस्पूजनीति । स च दारुमयः सू-चक इति याज्ञिकदेवाः ।

प्रेक्षथा इति ॥ १०९ ॥

तच्चैतत्सदसि स्तोत्रशस्त्रकाले । एवं श्रूयते तद्वा एतद्वृषा साम योषामृचꣳ सदस्यध्येतीति प्रकृत्याह तस्माद्द्वारेण सदः प्रेक्षमाणां ब्रूयान्मा प्रेक्षथा इति । हविर्धानेपि अथैतद्वृषा सोमो योषा अपो हविर्धानेऽध्येतीति प्रकृत्य तस्माद्द्वारेण हविर्धानं प्रेक्षमाणां ब्रूयान्मा प्रेक्षथा इति ॥ १०९ ॥

पृष्ठ्यामुभयतो द्वार्ये ॥ ११० ॥

भवतः ॥ ११० ॥

दक्षिणस्यानसोधः प्रउगं खनत्युपरवान् १ ॥ १११ ॥

दक्षिणस्यानसः प्रउगस्याधस्तात् उपरवान् खनति ॥१११॥

अभ्र्यादि करोत्यवटवदापरिलेखनात् ॥ ११२ ॥

अभ्र्यादानादि यूपावटवत्परिलेखनान्तम् ॥ ११२ ॥

चतुरः ॥ ११३ ॥

उपरवान्परिलिखति ॥ ११३ ॥
तांश्च—

अक्ष्णया व्याघारणवत् ॥ ११४ ॥

उत्तरापरं वा प्रथमम् ॥ ११५ ॥

अक्ष्णयेति चैवमर्थेनैवोच्यते ॥ ११५ ॥

सम्यग्वा ॥ ११६ ॥

अथो अपि समीच एव परिलिखेदिति वचनात् ॥ ११६ ॥

---

१ उपरवा अवटाः, श्वभ्रा इति यावत् । प्रउगम्, प्राप्तयुगमीषासङ्गमाधम् ।

उत्तरपूर्वं त्वन्त्यम् ॥ ११७ ॥

सर्वपक्षेषु ॥ ११७ ॥

प्रादेशमात्रांस्तदन्तरान् ॥ ११८ ॥

परिलिखेत् ॥ ११८ ॥

वृहन्नसीति यथापारिलिखितं खनति ॥ ११९ ॥

येन क्रमेण परिलेखः कृतः ॥ ११९ ॥

इदमहमित्युत्किरति यथाखातं प्रतिमन्त्रम्॥१२०॥

पांसून् ॥ १२० ॥

उत्कृत्याङ्गिरामीति पश्चात्सर्वेभ्यः ॥ १२१ ॥

उत्किरेत्प्रदक्षिणम् ॥ १२१ ॥

बाहुमात्रान् ॥ १२२ ॥

खनेत् ॥ १२२ ॥

[1]अक्षणया सम्भिन्द्यादशक्तौ सम्यक् ॥ १२३ ॥

सम्भेदनम् । अस्मिन्पक्षे पूर्वयोरसम्भेदनमिति सम्प्रदायः । नासिकासंस्तवात् ॥ १२३ ॥

स्वराडित्यवमर्शयति यथाखातं प्रतिमन्त्रम् ॥ १२४ ॥

अवमर्शयतीति कारितत्वात् अध्येषणा । यजमानश्च स्वराडिति प्रतिमन्त्रमवमर्शनं करोति यथाखातम् । अपरे तु समाख्यया अध्वर्योरव मर्शनमिच्छन्ति प्रतिप्रस्थाता चाध्येषण इति ॥ १२४ ॥

---

१ अक्षणयाशब्दोऽयं कर्णवचनः, न भुजेन कोट्या वा सम्भिन्दन्ति किं तर्हि कर्णेन दक्षिणपूर्वमुत्तरापरं च छिद्रयन्ति; तथा दक्षिणापरं पूर्वोत्तरं चेत्यर्थः ।

अध्वर्युयजमानौ सम्मृशेते पूर्वदक्षिणेध्वर्यु-
रपरोत्तरे यजमानः ॥ १२५ ॥

हस्तौ प्रक्षिप्यावटयोः परस्परतः संमृशेते ॥ १२५ ॥

अध्वर्युः पृच्छति यजमान किमत्रेति ॥ १२६ ॥

भद्रमित्याह ॥ १२७ ॥

इति प्रयुक्ते—

तन्नौ सहेत्यध्वर्युरुपांशु ॥ १२८ ॥

अयं च मन्त्रश्चोदितार्थाभिधायी। अनेकयजमानके विपरिणम्यते। उपांशुत्वं च यागन्तपक्ष एव वक्तव्यं नोपांशु पक्ष इति ॥ १२८ ॥

पुनर्दक्षिणापरेध्वर्युः पूर्वोत्तरे यजमानो यजमानः पृच्छत्यध्वर्यो किमत्रेति भद्रमिति प्रोक्ते तन्म इति यजमानः ॥ १२९ ॥

आह। अयमपि मन्त्रश्चोदितार्थाभिधायी। अस्त्विति चाध्याहारः ॥ १२९ ॥

प्रोक्षत्येनान् रक्षोहण इति ॥ १३० ॥

अवटान्। भेदे न च प्रोक्षणं संस्कार्यभेदात् ॥ १३० ॥

भेदे च मन्त्रावृत्तिः सन्निपातित्वात् ॥ १३१ ॥

बहुवचनं मन्त्रे पूजार्थम् ॥ १३१ ॥

अवनयनावस्तरणे चावटवद्रक्षोहणो
रक्षोहण इति ॥ १३२ ॥

यूपावटवदनयनावस्तरणो कार्यौ । इयांस्तु विशेषो रक्षोहण इत्यनेन मन्त्रेण ॥ १३२ ॥

तनूनुपरि कुशान्कृत्वा धिषवणे फलके द्व्यङ्गुलान्तरे प्रक्षालिते प्राची अरत्नि मात्रे सन्तृण्णे वोपदधाति पर्यूहति च रक्षोहणौ रक्षोहणाविति ॥ १३३ ॥

तनूनस्थूलानवटानामुपरि कुशान्कृत्वाधिषवणे फलके द्व्यङ्गुलान्तराले प्रक्षालिते प्रागग्रे अरत्निमात्रे सन्तृण्णे वा अन्तः शाल्ये उपदधाति रक्षोहणाविति पर्यूहति च रक्षो हणावित्यनेन मन्त्रेण ॥ १३३ ॥

तयोश्चर्माधिषवणं परिकृत्तं सर्वरोहितं निदधाति वैष्णवमसीति ॥ १३४ ॥

तयोः फलकयोरुपरि चर्माधिषवणं परिकृत्तं सर्वरोहितं निदधाति वैष्णवमसीत्यनेन मन्त्रेण ॥ १३४ ॥

तस्मिन् ग्राव्णः पञ्च वैष्णवा स्थेति ॥ १३५ ॥

तस्मिन् चर्माधिषवणे ग्राव्णः पञ्च वैष्णवा स्थेत्यनेन मन्त्रेण निदधाति ॥ १३५ ॥

खरं पुरस्तात्करोत्युद्धतावोक्षिते सिकतोपकीर्णे चतुरस्रम् ॥ १३६ ॥

निगदव्याख्यातम् ॥ १३६ ॥

अन्तःपात्यात्षट् प्रक्रमान्प्राङ् यात्वा दक्षिणा सप्तमं महान्तं तत्रौदुम्बरीं मिनोति यजमानमात्रीम् ॥ १३७ ॥

सा च—

यूपवच्छेते ॥ १३८ ॥

अवटस्य पुरस्तात् ॥ १३८ ॥

अभ्र्यादि करोत्यावटस्तरणात् ॥ १३९ ॥

यूपावटवत् ॥ १३९ ॥

उद्दिवमित्युच्छ्रयति ॥ १४० ॥

उदुम्बरीम् ॥ १४० ॥

घृतान इति मिनोति ॥ १४१ ॥

अवटे प्रक्षिपति ॥ १४१ ॥

पर्यूहणाद्योपसेचनात्कृत्वा ध्रुवासीति वाचयत्यौदुम्बरीमालभ्य प्रजया भूयादिति पशुभिरिति वा ॥ ॥ १४२ ॥

मन्त्रगतो विकल्पः ॥ १४२ ॥

स्रुवेण विशाखे जुहोति घृतेन द्यावापृथिवी इति भूमिप्राप्ते स्वाहा करोति सर्वत्र मन्त्रवत्सु जुहोत्युपदेशात् ॥ १४३ ॥

स्वाहाकारेण वा वषट्कारेण वा देवेभ्यो हविः प्रदीयत इति ॥ १४३ ॥

अनाम्नातप्रतिषेधाच्च ॥ १४४ ॥

अनाम्नातेपि च स्वाहाकारे प्रतिषेधं ब्रुवन् स्वाहाकारप्रदानतां दर्शयति। न स्वाहा करोत्यहुतादो वै देवानां मरुत इति। अमन्त्रवत्सु पूर्णाहुत्यां स्वाहाकारो विहित एव। मन्त्रविषयोयमारम्भः ॥ १४४ ॥

नाभिदघ्नं सदः ॥ १४५ ॥

तच्च कुड्यप्रमाणापेक्षया । उच्छ्रिता ह्युपसर्पन्ति य उद्गातार आर्भव इत्येतदन्यथा नोपपद्यते ॥ १४५ ॥

मत्या वा ॥ १४६ ॥

प्रमाणं भवति । एवमपि श्रूयत एव ॥ १४६ ॥

उदग्वंशम् ॥ १४७ ॥

पृष्ठवंशेन ॥ १४७ ॥

अष्टादशारत्न्येकविंशतिश्चतुर्विंशतिर्वा ॥ १४८ ॥

आयामो भवति । आयामश्च दैर्घ्यमुच्यते ॥ १४८ ॥

नव तिर्यक् अधायामो वा ॥ १४९ ॥

दैर्घ्यस्य ॥ १४९ ॥

औदुम्बरीं मध्ये पृष्ठ्यामेके ॥ १५० ॥

तन्मध्य औदुम्बरीं मिनोतीति औदुम्बरीं मध्य इत्युक्तम् । पृष्ठ्यामेके । एतत्कुतः । अत्र हविर्धानस्य हि पृष्ठ्यामुभयतो द्वार्ये इत्युक्तम् । तस्मादयं पुरुष आत्तः सन्तृण्ण इति वचनात् सदोपि तथैव भवति । उदगायामस्य मध्ये पृष्ठ्या प्रागायामस्य च औदुम्बरीत्युभयानुग्रहात् ॥ १५० ॥

इन्द्रस्य च्छदिरिति मध्यमं च्छदिरारोप्यापरपूर्वे च ॥ १५१ ॥

छदिषी आरोपयति । चशब्दो मन्त्रानुकर्षणार्थः ॥ १५१ ॥

त्रिवर्गौ चोत्तरतः ॥ १५२ ॥

उत्तरतस्त्रीणि परस्त्रीणि इति वचनात् ॥ १५२ ॥

परित्वेति परिवार्य परिषीवणं ग्रन्थ्यभिमर्श-
नान्यैन्द्रैः ॥ १५३ ॥

परित्वेत्यनेन मन्त्रेण परिवारणं कृत्वा परिषीवणग्रन्थिकरणाभिमर्शनानि हविर्द्धानवदैन्द्रैर्मन्त्रैः कर्त्तव्यानि ॥ १५३ ॥

हविर्द्धानापरान्तमुत्तरेणाग्नीध्रमग्न्यागारद्वा-
रमन्तर्वेद्यर्द्धं भूयः सर्वं वा ॥ १५४ ॥

करोति । अथ हविर्द्धानयोर्जघनार्द्धं समन्वीक्ष्येति प्रकृत्यैवमेव श्रुतित्वात् ॥ १५४ ॥

निष्ठाप्य वैश्वदेवमसीत्यालभते ॥ १५५ ॥

आग्नीध्रम् ॥ १५५ ॥

धिष्ण्यान्निवपत्युद्धतावोक्षिते पुरीषन्निवपति
स्फ्येनान्वारब्ध उदङ्ङुपविश्य विभूरसीति
प्रतिमन्त्रम् ॥ १५६ ॥

धिष्ण्यान्करोति। उद्धतावोक्षितग्रहणे न च परिसमूहनादयः सर्व एव गृह्यन्ते स्मार्त्ता अग्न्यर्था हि गृह्येभिहिताः । तदपचारे च स्मार्त्तं प्रायश्चित्तम् । वेदेपि तनूद्यन्ते उद्धते वा अवोक्षितेग्निमादधतीति । पुरीषन्निवपति स्फ्येनान्वारब्ध उदङ्ङुपविश्य विभूरसीति प्रतिमन्त्रम् ॥ १५६ ॥

आग्नीध्रीयं पूर्वम् ॥ १५७ ॥

अग्नीध्रीयं धिष्ण्यं पूर्वम् ॥ १५७ ॥

सिकताश्चोपरि ॥ १५८ ॥

दीयन्ते ॥ १५८ ॥

रौद्रेणेति सर्वत्र ॥ १५९ ॥

अनुषङ्गः ॥ १५९ ॥

षट् सदसि ॥ १६० ॥

निवपति ॥ १६० ॥

प्रत्यङ्मुखो द्वारमपरेण होतुः ॥ १६१ ॥

धिष्ण्यान्निवपति ॥ १६१ ॥

दक्षिणपूर्वेणौदुम्बरीं मैत्रावरुणस्य ॥ १६२ ॥

धिष्ण्यं निवपति ॥ १६२ ॥

होतृधिष्ण्यमुत्तरेण चतुरः समान्तरान्ब्राह्मणाच्छꣳसिपोतृनेष्ट्रच्छावाकानाम् ॥ १६३ ॥

धिष्ण्यान्निवपति ॥ १६३ ॥

आग्नीध्राद्दक्षिणꣳ सम्प्रति वेद्यन्ते दक्षिणामुखो मार्जालीयम् ॥ १६४॥

सम्प्रतिशब्द आर्जवे ॥ १६४ ॥

सदो द्वारं पूर्वेण तिष्ठन्ननुदिशत्याहवनीयबहिष्पवमानदेशचात्वालशामित्रौदुम्बरिब्रह्मासनशालाद्वार्यप्राजहितान्त्सम्म्राडसीति प्रतिमन्त्रम् ॥ १६५ ॥

अनुदेशश्च सन्दर्शनमात्रम्१ । रौद्रेणेति च सर्वत्रानुषङ्गः । अयं च शाखान्तरादेकवचनान्तः । स्वशाखायां हि बहुवचनान्तः पठ्यते । तस्योपरिष्टाद्विनियोग इति वक्ष्यामः ॥ १६५ ॥

---

१ तथा चाहुर्माधवाचार्याः अनुदेशो नाम विद्यमानमेव पदार्थमनु त्वमेवं भवसीति निर्देश' इति ।

उत्करः समूह्योऽसि विश्ववेदा ऊनातिरिक्तस्य प्रतिष्ठेति ॥ १६६ ॥

अत्रापि च रौद्रेणेत्यनुषङ्ग एव शाखान्तरात् ॥ १६६ ॥

२परिस्तरणपात्रसंसादनप्रोक्षणाज्यनिर्वपणानि कृत्वोत्तरपरिग्रहादि करोति ॥ १६७ ॥

परिस्तरणाद्युद्घाटनं आहननव्युदासार्थमिति केचित् । तन्न। प्रतिषेधशासनाभावात् । एककर्तृकनियमार्थमित्यपरे । तदपि नैवं नियमशासनाभावात्।अतो गुणार्थमुद्घाटनम्।आज्यनिर्वपणान्ते महावेदेरुत्तरपरिग्रहादि करोतीत्येवमर्थम्।उत्तरपरिग्रहादि शब्देन च खननादि द्रष्टव्यम् सम्मर्शनान्तस्याभिनिर्वृत्तत्वात् । किं चाग्नीषोमीयस्य द्रव्यदेवता सम्बन्धो नैवाभिहितः येन परिस्तरणाद्यग्नीषोमीयार्थं सक्रियते । स कस्य हेतोः । शाखान्तरे हि अवान्तरदीक्षाविमोकोत्तरकालं अग्नीषोमीयस्य विधानम् । यथा ब्राह्मणं चाचार्य उपनिबध्नाति । तत्र चाचार्येणोक्तमग्नीषोमीयोतः पशुरित्यतोत्र परिस्तरणाद्यभिधानं वचनात् । सवनीयेष्ववकाशाद्याचनान्ते तद्विधानमाग्नेयमग्निष्टोम आलभेतेति । तत्रैव सूत्रकारेणोपनिबद्धम् । ध्रुवगोपं कृत्वा परिव्ययणादिकरोतीति सम्मूर्च्छनाकारं चापररात्रे परिस्तरणाद्यभिधानं कृतमाचार्येण । इदृश्येव हि तस्य शैली यथा ब्राह्मणमुपनिबध्नाति ॥ १६७ ॥

अन्तःपात्यसहितम् ॥ १६८ ॥

अनुमार्जनं कर्म भवति । एवं हि श्रूयते य एष वेदेर्जघनार्धे शङ्कुस्तत्प्रतियौतीति ॥ १६८ ॥

बर्हिरन्तं प्रेष्यति तत्र सर्वमासादयति ॥ १६९ ॥

यथा प्रेषितं सर्वग्रहणात् । स्फ्यश्च स्वकाले ॥ १६९ ॥

---

२ अथाग्नीषोमीपशोरुपक्रममाह ।

अत्रैव प्रोक्षणम् ॥ १७० ॥

इध्मवेदिबर्हिषाम् । उपरिष्टादपीध्मप्रोक्षणमभिहितं चोदकपरिप्राप्त्या इदमन्यदपूर्वम् । एवं च सत्यग्नीषोमीये द्विः प्रोक्षित इध्मो भवति ॥ १७० ॥

इध्मं निधायाग्नीषोमीयाय वेदेस्तरणमग्रहणं प्रस्तरस्यापराह्णे ॥ १७१ ॥

पदार्थतयाग्नीषोमीयार्थमिध्मं स्थापयित्वा वेदेस्तरणमपराह्णे सोपराह्णे वेदिꣳ स्तीर्त्वेति वचनात् । तत्र चाग्रहणं प्रस्तरस्य ॥ १७१ ॥

अर्द्धव्रते प्रत्ते प्रविश्य प्रणयनीयाधानम् ॥ १७२ ॥

प्रविश्येति निष्क्रमणं लक्ष्यते । तच्च कार्यार्थम् । कार्यं चोपरिष्टाद्वक्ष्यते परिवाप्यार्थे दोहनमिति । परिवाप्या इति च गवामपाकृतावस्थोच्यते । अतः शाखाच्छेदनार्थं निष्क्रमणम् प्रवेशनेन लक्ष्यते । शालायां प्रविश्य प्रणयनीयस्येध्मस्य शालाद्वार्ये आधानम् ॥ १७२ ॥

आज्याधिश्रयणस्रुक्सम्मार्जनोद्वासनावेक्षणानि कृत्वा शालाद्वार्यमपरेणास्ते यजमान उपस्थे सोमं कृत्वा ॥ १७३ ॥

अत्र विशेषः । आज्याधिश्रयणपर्यग्निकरणे कृत्वा स्रुक्संमार्जनाद्यर्थः खण्डप्रैषः । ततः स्फ्योदक् प्रहरणम् । प्रैषोत्तरकालं दृष्टत्वात् । पाण्योरवनेजनं तु सामर्थ्यात् पूर्वमेव क्रियते । आज्यावेक्षणं च पत्नीकर्तृकमत्र । इतरदुपरिष्टात्करिष्यते ॥ १७३ ॥

शालाद्वार्यमपरेण सोमक्रयणीपदं परिकिरति ॥ १७४ ॥

यत्र स्थालयामोप्तम् ॥ १७४ ॥

चतुर्द्धैकआहवनीयस्योपयमनीष्वाग्नीध्रीयस्या-
क्षोपाञ्जने च ॥ १७५ ॥

एके चतुर्द्धा पदप्रक्षेपं कुर्वन्ति । आहवनीयस्योपयमनीषु तथाग्नीध्रीयस्याक्षोपाञ्जने चशब्दादिह च । एक इति ग्रहणं विकल्पार्थम् ॥ १७५ ॥

आज्यप्रोक्षणीरन्तःपात्यदेश उत्पूय पश्वा-
ज्यग्रहणम् ॥ १७६ ॥

आज्यस्य प्रोक्षणीनां चान्तःपात्यदेश उत्पवनं कृत्वा पश्वाज्यग्रहणं कर्त्तव्यम् । पशोरनुक्तत्वात्पश्वाज्यग्रहणमित्युक्तम् ॥१७६॥

धारयत्याज्यानि ॥ १७७ ॥

नयनाय ॥ १७७ ॥

अपिव्रताश्चान्वारभन्ते यजमानम् ॥ १७८ ॥

१अपिव्रता गोत्रजास्तेन्वारभन्ते यजमानम् ॥ १७८ ॥

वाससा छादयत्येनान् ॥ १७९ ॥

स यजमानान् ॥ १७९ ॥

चरत्सु नाद्रियेत ॥ १८० ॥

चरत्स्वपि व्रतेष्वनादरः । ततश्च प्रायश्चित्तं न भवति ॥१८०॥

प्रदीप्तमिध्मं त्वꣳ सोमेति प्रचरण्याभि-
जुहोति ॥ १८१ ॥

१ अपिव्रतास्त उच्यन्ते येषां यजमानव्रते अपित्वमस्ति, दायाद्येनाविभक्ता इति पितृभूतिः । अपि संसर्गे व्रतमिति कर्म नाम, संसृष्टं साधारणं कर्म येषां ते अपिव्रता अविभक्ता दायादाः, ते ह्येकेनापि कृष्यादि कर्म कृतं सर्वे उपजीवन्तीति हरिस्वामिनः ।

प्रदीप्तं प्रणयनीयमिध्मं त्वं सोमेनेत्यनेन मन्त्रेण १प्रचरण्याभिजुहोति ॥ १८१ ॥

जुषाणो अप्तुरिति द्वितीयाम् ॥ १८२ ॥

आहुतिं जुहोति ॥ १८२ ॥

अग्नये प्रह्रियमाणायानुवाचयति सोमाय प्रणीयमानायेति वा ॥ १८३ ॥

वाशब्दो विकल्पार्थः ॥ १८३ ॥

आहवनीयं गच्छन्त्यादाय ग्रावद्रोणकलशसोमपात्राणीध्मचतुष्टयं च सन्नद्धं वपाश्रपण्यौ रशने शकलवृषणमरणी च ॥ १८४ ॥

ग्रावादीन्यादायाहवनीयं प्रति गच्छन्ति । २द्रोणकलशस्य स्वशब्दाभिधानात् । सोमपात्रशब्देन ग्रहपात्राणि गृह्यन्ते । न चमसादीनि । इध्मोऽग्नीषोमीयार्थः । चतुष्टयं च वपाश्रपण्यौ रशने च । शकलवृषणमरणी च मन्थनार्थानि । यद्यपि चात्र मन्थनं वैकल्पिकं तथापि सवनीयार्थं नयनमिति ॥ १८४ ॥

अग्ने नयेति वाचयति ॥ १८५ ॥

उत्तरेण सदो हृत्वाग्नीध्रेऽग्निं निदधाति ॥ १८६ ॥

ग्रावद्रोणकलशसोमपात्राणि च ॥ १८७ ॥

तानि च होमोत्तरकालम् । स निहिते जुहोतीत्यभिधाय तदेव निदधति ग्राव्ण इत्युक्तमिति ॥ १८७ ॥

---

१ प्रचरणी नाम पालाशी स्रुक् जुहूरेव, अन्यासु व्यापृतासु तया प्रचर्यत इति प्रचरणी इति ।

२ द्रोणकलशो द्रुममयः कलशाकारो वैकङ्कतः, यस्योपरि धारा ग्रहा गृह्यन्त इति ।

अयन्न इति जुहोत्यस्मिन् ॥ १८८ ॥

आहवनीये मा भूदित्यस्मिन्नित्युच्यते ॥ १८८ ॥

उत्तरेण परिक्रम्याहवनीयस्योत्तरतो निदधात्यन्यदाज्यं सोमवर्जम् ॥ १८९ ॥

आग्नीध्रीयमुत्तरेण परिक्रम्य आज्यसोमवर्जमाहवनीयस्योत्तरतो निदधाति ॥ १८९ ॥

धिष्ण्याव्यवायोध्वर्योः ॥ १९० ॥

अध्वर्युग्रहणादन्येषामनियमः । तस्मादध्वर्युः सप्तया धिष्ण्यन्नातीयादिति श्रुतत्वात् ॥ १९० ॥

इध्मप्रोक्षणादि करोति ॥ १९१ ॥

वैकृतावसरे प्रकृतानुवृत्त्यर्थमिदमुक्तम् ॥ १९१ ॥

खरोत्तरार्द्धे एकवृत्स्तरणं पश्चाद्वोत्तरवेदेः ॥१९२॥

इति विकल्पः शास्त्रस्य तुल्यत्वात् ॥ १९२ ॥

आहवनीयेक्षणात्कृत्वोरु विष्णविति जुहोति ॥ १९३ ॥

आहवनीयेक्षणादिति कुत एतत् । अत्र हि परिधिपरिधानपदार्थः परिसमाप्यत इति ॥ १९३ ॥

पुरस्ताद्वा समिधावायेति श्रुतेः ॥ १९४ ॥

पुरस्ताद्वा जुहोति । नाहवनीयेक्षणान्ते । अभ्याधाय समिधावथ जुहोतीति श्रुतत्वात् । अयं च मन्त्रश्चोदितार्थाभिधायी । इध्माभिहोमार्थाज्यसंस्कार एवेह भवतीत्याग्नीध्रीये च । वैसर्जनहोमार्थत्वात् । तस्य सर्वाणि चैतानि वैसर्जनानीति ॥ १९४ ॥

आसाद्याज्यानि दक्षिणेनासि कृष्णाजिनमा-

स्तीर्य तस्मिन्सोमं निदधाति देवसवितरिति॥ १९५॥

आज्यासादनं प्राकृतमेव ततश्चालम्भनमुदकोपस्पर्शनं च कृत्वेति । एवं श्रूयते आसाद्य हवीꣳषि सम्मृश्याप उपस्पृश्य सजानमादाय प्रतिपद्यत इति । आचार्येण चात्राज्यासादनमात्रमेवोक्तं व्यपदेशसामर्थ्यादालम्भादि लभ्यत एवेत्यभिप्रायः । एवं च सति यत्र प्राकृतवैकृतौ व्यपदेशौ तत्र प्राकृतमेव पूर्वं कर्तव्यमिति । यथासाद्य हवीꣳष्यग्निं मन्थत्यासाद्य हवीꣳषि सम्मृशतीति । मन्त्रश्चोदितार्थाभिधायी न्यग्रोधे विपरिणम्यते ॥ १९५ ॥

एतत्त्वमिति विसृज्योपतिष्ठते ॥ १९६ ॥

विसर्गोपदेशात्पूर्वतरमन्वारम्भः सोमस्य । तस्य याजमानत्वात् । यजमान एवोपस्थान इति । मन्त्रश्चोदितार्थाभिधायी ॥ १९६ ॥

स्वाहा निरिति निष्क्रम्याग्ने व्रतपा इत्याहवनीये समिधमाधाय मदन्तीरुपस्पृश्याङ्गुलीर्विसृजते ॥ १९७ ॥

अत्र च यजमानस्य कर्तृत्वं अङ्गुलिविसर्गोपदेशात् । व्यपदेशसामर्थ्याच्च । तथा च मन्त्रलिङ्गं स्वाहा निर्वरुणस्य पाशान्मुच्य इति । अवान्तरदीक्षोन्मोचनाच्चानेकयजमानके प्रतियजमानं भवति ॥ १९७ ॥

पत्नी च गार्हपत्ये तूष्णीं मदन्तीरुपस्पृश्य ॥ १९८ ॥

गार्हपत्ये समिधमाधाय मदन्तीरुपस्पृश्याङ्गुलीर्विसृजते ॥ १९८ ॥

चात्वाले मदन्तीः कृत्वा ॥ १९९ ॥

प्रतिपत्तिश्चरितार्थत्वात् ॥ १९९ ॥

नामग्रहणभोजने अस्यातः कुर्वन्ति ॥ २०० ॥

बहुवचनोपदेशात्पुरुषमात्रधर्मः । तस्मादस्याप्राश्नन्त्यत्र नाम गृह्णन्तीति वचनात्पूर्वं प्रतिषेधो गम्यते । विहितश्चासौ तस्माद्दीक्षितस्य नाश्नीयादिति । अतश्च भोक्तुरेव व्यतिक्रमे प्रायश्चित्तम् ॥२००॥

## व्रतनिवृत्तिः ॥ २०१ ॥

अतः परं व्रतं निवर्त्तते ॥ २०१ ॥

## हविः शेषभक्षः ॥ २०२ ॥

यद्भक्षयति तद्धविःशेषम् । तच्च प्रातः । येनाद्य निषेधस्तस्मादुपवसथे नाश्नीयादिति । प्रातः सोमान् हविःशेषांश्च भक्षयन्तीति श्रुतेः । स चायं सवनीयशेषो न हविर्मात्रस्य । सवनीयान्हि प्रकृत्य श्रूयते अथ यन्नानापुरोडाशा भूयोहविरुच्छिष्टमसत्समाप्त्या इति बहुयजमानके नाना पुरोडाशान्विधायोच्यते । भूयो हविरुच्छिष्टमसत्कथं नाम तच्च समाप्तिर्भविष्यति । अतः सवनीयशेषोयमिति गम्यते । सूत्रकारप्रस्थानाच्च । प्रत्यग्नि सवनीयपुरोडाशा भूयो हविरुच्छिष्टमसत्समाप्त्या इति श्रुतेः ॥ २०२ ॥

## अग्नीषोमीयोतः पशुः ॥ २०३ ॥

किमर्थमिदमुच्यते । अस्मिन्नेव ह्यवसरे पशोर्देवता सम्बन्धः श्रुतावभिहितः। यथा श्रुति च सूत्रकारः सूत्रमारभते । परिस्तरणादयो हि पदार्थाः सोमिकैर्व्यतिषक्ताः पठ्यन्ते तथैवोपनिबद्धाः । उपांशु चरन्ति प्रागग्नीषोमीयादित्येवमर्थमेवोच्यते अग्नीषोमीयोतः पशुरिति । साद्यस्के च श्रूयते पुरोडाशोर्वाग्नीषोमीयस्थान इति सोत्र यथा स्यादिति ॥ २०३ ॥

## तद्देवत्यः पशुपुरोडाशः ॥ २०४ ॥

यद्देवत्यः पशुर्भवति तद्देवत्यं पुरोडाशमनुनिर्वपतीति श्रुतेः । अतश्च पश्वन्तरेपि तद्देवत्यो भवति नाग्नीषोमीय इति ॥ २०४ ॥

## अभ्र्यादि करोति ॥ २०५ ॥

आज्यासादनान्तस्याभिनिर्वृत्तत्वात् अभ्न्यादेरेवावसर इति॥२०५॥

दक्षिणेन हविर्द्धानं पश्चिडा; हरति ॥ २०६ ॥

सदसि होतोपविष्टः, तं प्रति नीयमानायाः प्रादक्षिण्येन स्मृत्यनुग्रह इति ॥ २०६ ॥

गुदतृतीयं च ॥ २०७ ॥

दक्षिणेनैव ॥ २०७ ॥

मर्जालीयं दक्षिणेन जाघनीम् ॥ २०८ ॥

पत्नीशालां ह्यसौ नीयते । तत्र धिष्ण्यव्यवायो मा भूदिति ॥ २०८ ॥

प्रत्याहृत्य वा सोमाहवनीययोरव्यवायात् ॥२०९॥

प्रत्याहृत्य वा यूपाहवनीयावन्तरेणैतानि नीयन्ते । कुत एतत् । सोमाहवनीययोरव्यवायात् । दक्षिणेन वा प्रत्याहृत्य वेति दक्षिणेन स्मृत्यनुग्रहः । इतरत्र चोत्तरोपचारितया श्रुत्यनुग्रहः । तस्मात्प्रत्याहृत्यैवेत्यवधार्यते ॥ २०९ ॥

यूपैकादशिनीचेद्रथाक्षमात्राण्यन्तरानि ॥ २१० ॥

चेच्छब्दोयद्यर्थः । यदि यूपैकादशिनी वक्ष्यमाणं स्तोमायनं चेति । उभयं हि विकल्पेन श्रूयत इति तत्र रथाक्षमात्राणि यूपान्तरालानि ॥ २१० ॥

पूर्वार्द्धे वा समं विभज्य ॥ २११ ॥

पूर्वार्द्धसमविभागेन वा ॥ २११ ॥

पक्षसम्मिता वाग्नौ ॥ २१२ ॥

यथोक्तं वा ॥ २१२ ॥

यूपाहुत्यभ्रयादानयवावपनानि सकृत् ॥ २१३ ॥

भवन्ति । असन्निपातात् ॥ २१३ ॥

भेदेनान्यत्सान्निपातित्वात् ॥ २१४ ॥

मध्यमं पारिलिख्योत्तरं दक्षिणं वा व्यत्यास-
मितरान् ॥ २१५ ॥

मध्यमं यूपावटं परिलिख्य तदनन्तरमुत्तरं दक्षिणं वा परिलिखति । इतरांश्च व्यत्यासेन ॥ २१५ ॥

आवटहोमात्करोति ॥ २१६ ॥

पदार्थानुसमयेन ॥ २१६ ॥

अञ्जनाद्याचषालेक्षणात्कृत्वैकैकस्य ॥ २१७ ॥

काण्डानुसमयेन । पदार्थानुसमये प्राप्ते वाचनिकः काण्डानुसमयः ॥ २१७ ॥

श्वो वा दक्षिणोत्तराणामत्रगूहनान्तमाल-
म्भनासम्भवात् ॥ २१८ ॥

श्वो वा दक्षिणोत्तराणामवगूहनान्तं कर्म करोति । कुत एतत् । आलम्भनासम्भवात् । नह्यद्य पश्वालम्भः सम्भवति । अथवा आलम्भना सम्भवादिति । न ह्यद्य क्रियमाणे चषालेक्षणान्ते यूपालम्भः सम्भवति । उक्तं चैतदिदं वै यूपमुच्छ्रित्याध्वर्युरापरिव्ययणान्नान्वर्जतीति । अयं च वाक्यैकदेशोपन्यासः तस्मादुप्रातरेवोच्छ्रयेदित्यस्य शेषभूतः । न्याये हि सत्ये तस्मिन् वाचनिकी चषालेक्षणान्ततैव भवति । वचनं हि तत्र अपरिवीता वा एव एतां रात्रिं वसन्तीति । अतश्चषालेक्षणान्तता वाचनिकी । तस्मादु प्रातरेवोच्छ्रयेदित्येतदपि वचनम् । अतो विकल्प एवायम् । अपि वा चषालेखणान्ताः पक्षयूपाः श्वो वावगूहनान्ततेति । यश्चालम्भनासम्भवादिति सोऽर्थवादवाक्यैकदेशोपन्यासो न न्याय इति ॥ २१८ ॥

इयांस्तु विशेषः—

परिवीय मध्यममवगूहनान्तम् ॥ २१९ ॥

पार्श्वयूपानामभ्यञ्जनप्रभृत्यवगूहनान्तं करोति सौत्येहनि ॥ २१९ ॥

अग्निष्ठे चैषा; रशनाः परिवेष्टय वासयति ॥२२०॥

स चायं शेषयूपार्थोरशनासंस्कारोः नाग्निष्ठार्थः । एवं हि श्रूयते । अग्निष्ठा द्वे द्वे रशने आदायेतरान्परिव्ययति तेनैतानग्निष्ठान्करोति । एवं च सत्यश्वमेधे वसत्यर्थासम्भवेपि अग्निष्ठ रशनाः कृत्वा परिव्ययणं कर्त्तव्यमिति ॥ २२० ॥

अभ्यञ्जनप्रभृति करोति ॥ २२१ ॥

उक्तार्थम् ॥ २२१ ॥

यथाखातमुच्छ्रयति ॥ २२२ ॥

येन क्रमेणावटखननं तेनैव यूपोच्छ्रयणमिति । प्रवृत्या ॥ २२२॥

वर्षिष्ठो दक्षिणोनुपूर्वा इतरे ॥ २२३ ॥

स यो वर्षिष्ठः स दक्षिणार्द्धर्चः स्यादथ ह्रसीयानिति श्रुतत्वात् । ह्रसीयता चारत्निवशेनैव कर्त्तव्या नानियमेन । तेषां ह्यत्र श्रवणं पञ्चारत्निं परिवासयेदित्येवमादि । एवं चकृत्वा पञ्चारत्निः पञ्चदशपर्यन्तः सोम इत्यस्य पक्षस्यैकादशिन्यामप्रसङ्ग एव । अपरिमितपक्ष एव भवति । तथा चान्त्यः षोडशारत्निरन्ततो भवति ॥ २२३ ॥

तीव्रसुत्यग्निष्ठः प्राची च ॥ २२४ ॥

तीव्रसुत्यग्निष्ठो वर्षिष्ठः प्राची च यूपपंक्तिर्भवति ॥ २२४ ॥

यथा यूपं वेदिवर्द्धनम् ॥ २२५ ॥

रथाक्षमात्रान्तरा पक्षे ॥ २२५ ॥

वर्षिष्ठाद्दक्षिणं १वितष्टं द्वादशंनिदधात्येष त इति ॥ २२६ ॥

द्वादश उपशयो भवति वितष्टस्तं दक्षिणत उपनिदधातीति श्रुतेः। द्वादशग्रहणाच्च यूप एवायम्। तथा च श्रूयते उपशयो यूपो भवति द्वादश इति च श्रवणात् यूपैकादशिन्यामेव भवति न पञ्चपश्वादाविति ॥ २२६ ॥

प्रोक्षणाद्यत्रगूहनात्करोत्यनर्थलुप्तम् ॥ २२७ ॥

निखननाभावादवटसम्बन्धोनर्थः सोत्र लुप्यते। केचित् यूपधर्मानत्रनेच्छन्ति कार्यप्रयुक्तत्वात्तेषाम्। यूपस्य कार्यं पशुनियोगः। स चेह नास्ति तस्माद प्रवृत्तिर्धर्माणाम्। किं च उपशयो यूपो भवतीति वर्त्तमानापदेशात्। तस्मादप्यप्रवृत्तिर्धर्माणामित्यत्रोच्यते। स्यादेतदेवं यदि कार्यप्रयुक्ताः प्रोक्षणादयो भवेयुः। न त्वेते कार्यप्रयुक्ताः। किं तर्हि स्वरूपप्रयुक्ताः। न हि निष्पन्ने यूपस्वरूपे एते विधीयन्ते यूपं प्रोक्षति यूपमनक्ति यूपं परिव्ययतीति। न च सिद्ध एव यूपोस्ति यत्रैते धर्म्माः क्रियेरन्। तस्मादेभिरेव यूपो भाव्यत इति। यथौदनं पचति सक्तून् पिनष्टीति च पाकेनौदनमभिनिवर्त्तयति पेषणेन च सक्तून्। यत्र पुनः स्वरूपनिष्पत्युत्तरकालं धर्मविधानम् यथाहवनीयस्य सतः परिधिपरिधानं सम्मार्गश्चेति तत्र कार्यप्रयुक्तता युक्ता न चेह तथा, तस्मादप्यकार्यप्रयुक्तता धर्माणाम्। यत्तूक्तं वर्त्तमानापदेशान्न विधानमित्यत्र ब्रूमः। भवति वर्त्तमानापदेशस्यापि पञ्चमलकारपरिकल्पनया विधायकत्वम्। यथाग्नेयोष्टाकपालो भवत्यैन्द्र एकादशकपालो भवतीति। अत उपशयेपि धर्म्माणां प्रवृत्तिर्युक्तरूपैवेति न दुरुक्तम् ॥ २२७ ॥

अनुच्छित्य वोत्तरम् ॥ २२८ ॥

अस्य क्रिया ॥ २२८ ॥

---

१ वितष्टमनष्टास्रीकृतमिति पितृभूतिः।

यथोच्छ्रित; सवनीयानालभत एकतृणेनोपा-
कृत्याग्नेयसारस्वतसौम्यपौष्णबार्हस्पत्यवैश्वदे-
वेन्द्रमारुतैन्द्राग्नसावित्रवारुणान् ॥ २२९ ॥

उदक्संस्थता मा भूदिति यथोच्छ्रितग्रहणम् । विभवाभावेकतृणेनेत्युक्तम् ॥ २२९ ॥

एकयूपे पश्वेकादशिन्यामाग्नेयं नियुज्यत
स्मिंस्तस्मिन्नितरानुदीचः ॥ २३० ॥

एकयूपे यदा पश्वेकादशिनी भवति तत्राग्नेयं नियुज्य तस्मिन्पशावितरानुदीचो नीत्वा नियुनक्ति ॥ २३० ॥

आग्नेयः प्रथमो गच्छत्यन्वारब्धो
ऽनुपूर्व्या इतरे ॥ २३१ ॥

स्तोमायने तु युगपद्गमनम् ॥ २३१ ॥

दक्षिणं च निघ्नन्त्येनमुत्तरमुत्तर-
मितरान् ॥ २३२ ॥

दक्षिणमाग्नेयं निघ्नन्ति उत्तरमितरान् पशून् ॥ २३२ ॥

समानमुपप्रेष्य परिपशव्ये संज्ञपयान्वग-
न्प्रोक्षण्युल्मुकासिशामित्रान्तर्द्धानप्रच्छेद-
स्तोकसम्प्रैषशमितनुशासनसंवादवनस्प-
तिस्विष्टकृदिडादिग्व्याघारण; समासिच्य
प्रभूत्वात् ॥ २३३ ॥

प्रभवन्ति ह्येतानि सकृत्कृतानि। स्विष्टकृदिडस्य तु न द्रव्यभेदे गुणयोगादित्यनेनैव प्राप्तौ सत्यां ग्रहणार्थोऽयमारम्भः। युगपदेव नसमनन्तरमेव सौविष्टकृतानामैडानां च ग्रहणं मा भूदिति ॥ २३३ ॥

उखाशूलं वपाश्रयण्यौ च ॥ २३४ ॥

विभवात् तन्त्रेणाभिसम्बध्यत इति प्राप्त इदमाह—

न वसा सन्देहात् ॥ २३५ ॥

नैतानि तन्त्रेण भवन्ति। कुत एतत्। वसासन्देहात्। सन्दिह्यते हि वसा उखैकत्वे। प्रकृतौ चाग्नीषोमीये स्ववसा हुता। इहापि स्ववसैव होतव्या। सा च संसृष्टरूपत्वात् न ज्ञायत इति तस्मादुखाभेदः। तद्भेदाच्च शूलवपाश्रपण्योरपि ॥ २३५ ॥

सौत्रामणी दर्शनाच्च ॥ २३६ ॥

अपि च सौत्रामण्यां शूलभेदो दृश्यते। शूलैश्च मासरेण चावभृथमभ्यवयन्तीति ॥ २३६ ॥

एवं प्राप्त उच्यते—

नाविरोधात् ॥ २३७ ॥

नैतदेवम्। नैतानि तन्त्रभावे विरुध्यन्ते। शक्नोति ह्युखा सर्वपशूनां श्रपणं कर्तुम्। तथा शूलं वपाश्रपण्यौ च। यच्चोक्तं वसासन्देहादित्यत्र ब्रूमः। न हि प्रकृतावयमर्थः स्ववसा होतव्येति। वसां जुहोतीति हि श्रूयते। तच्चेहापि न विरुध्यते। यतूक्तं सौत्रामण्यां भेदो दृश्यते इति ॥ ॥ २३७ ॥

अत्र ब्रूमः—

पाकवैषम्यात्सौत्रामण्याम् ॥ २३८ ॥

उखाभेदः। विषमो हि तत्र पाकः पशूनां जातिभेदात् ॥ २३८ ॥

मनोतावसाहोमौ ॥ २३९ ॥

पृथग्भवतः ॥ २३९ ॥

कालभेदात् ॥ २४० ॥

यूपैकादशिन्यां वशावपामार्जनान्तं कृत्वा शालाद्वार्ये पत्नीयूपोच्छ्रयणं नाभिमात्रस्य ॥ २४१ ॥

वशावपामार्जनान्तग्रहणेपि सति गर्भसद्भावविरोधात्तन्निरूहणान्त एव कर्त्तव्यः । शालाद्वार्य इत्युक्तत्वाच्छालाद्वार्य आहवनीयः । पत्नीयूप इति संज्ञा । स च नाभिमात्रो भवति ॥ २४१ ॥

परिस्तरणपात्रसंसादनप्रोक्षणाज्यनिर्वपणाधिश्रयणानि कृत्वा स्फ्यादि करोति ॥२४२॥

किमर्थमिदमुच्यते । पशौ हि व्यस्तरूपाः पदार्थाः कृताः । पूर्वं स्फ्यादि ततः परिस्तरणादीनि । इह पुनर्विहितत्वादग्नीनां पौर्णमासिक एव क्रमेण स्फ्यादानादिः ॥ २४२ ॥

त्वाष्ट्रो बस्तः पर्यग्निकृतमुत्सृजन्ति ॥ २४३ ॥

त्वष्टृदैवत्यः त्वाष्ट्रः पशुः १बस्तः पूतिगन्धः पशुः त्वाष्ट्रं पात्नीवतमालभेति विधायोच्यते यत्पर्यग्निकृतं पात्नीवतमुत्सृजन्तीति ॥२४३॥

तत्रैतत्सन्दिह्यते । किं द्रव्योत्सर्गोयमुत कर्मोत्सर्गस्तदन्ताङ्गीतिविधानम । किं तावत्प्राप्तं द्रव्योत्सर्ग इति । कुत एतत्—

आज्येन संस्थापयतीति श्रुतेः ॥ २४४ ॥

आज्येन हि संस्थापनं श्रूयते उत्सृष्टे द्रव्ये द्रव्यान्तरेण परिसमापनं विधीयते । अपि च संस्थापनं प्रक्रान्तस्य भवति । प्रक्रान्तश्च त्वाष्ट्र इति ॥ २४४ ॥

---

१ बस्तो मुष्करः, प्रजनयिता । मुष्कावण्डौ, तौ विद्येते यस्य स मुष्करः ‘ उषशुषिमुष्कमधोर ’ इति पाणिनीयेनातिशये रः ।

पशुपर्यग्निकरणाच्च ॥ २४५ ॥

अपि च पशोः पर्यग्निकरणं श्रुतम् । पर्यग्निकृतस्य चोत्सर्ग उच्यते । यत्पर्यग्निकृतं पात्नीवतमुत्सृजन्तीति तस्मादपि द्रव्योत्सर्गः ॥ २४५ ॥

तदन्तं वा कर्म नामधेयात् ॥ २४६ ॥

वाशब्दः पक्षव्यावृत्तौ । तदन्तं वा कर्म भवति । कुत एतत् । कर्मनामधेयात् । पात्नीवतमिति कर्मणो नामधेयम् । तस्य चानन्तर्यादुत्सर्गसम्बन्धः । व्यवधानाच्च पर्यग्निकृतेनेति । तस्मात्पात्नीवतस्योत्सर्गो न द्रव्यस्य । यत्त्वाज्येन संस्थापयतीति श्रूयते तदनेनाख्यातेन द्वितीयं कर्म प्रकृतत्वाष्ट्रानुवृत्त्या सहोपध्युपक्रममाज्यसाधनकं विधीयते इति । यच्च पशुपर्यग्निकरणादित्युक्तम् पर्यग्निकृतमुत्सृजन्तीति । तत्तत्कालार्थम् । पर्यग्निकरणान्ते कर्मोत्स्रष्टव्यमिति ॥२४६॥

त्वष्टृवनस्पत्योश्च प्रयाजेष्विज्यादर्शनात् ॥ २४७॥

अपि च त्वष्टृवनस्पत्योः प्रयाजेष्विज्यां दर्शयति । यत्त्वष्टारं च वनस्पतिं चावाहयसि कनौ यजसीति प्रश्नपूर्वकमाह त्वाष्ट्री नवमी प्रयाजयाज्या वानस्पत्या दशमी तत्रैनौ भागिनौ करोति । एतच्च कर्मोत्सर्ग एवोपपद्यते । द्रव्योत्सर्गे हि द्रव्यान्तरेण त्वष्टृवनस्पती अभीज्येते एवेति तस्मादपि तदन्ताङ्गरीतिविधानमिति । समाप्तिप्रतिषेधश्च भवति । तत्र संस्थापयेत्पर्यग्निकृतमेवोत्सृजेदिति । तच्च कर्मोत्सर्ग एवोपपद्यते न द्रव्योत्सर्गे ॥ २४७ ॥

अग्नीषोमीयस्य वपामार्जनान्ते वसतीवरी-
ग्रहणꣳस्यन्दमानानामनस्तमिते ॥ २४८ ॥

अग्नीषोमीयग्रहणम् त्वाष्ट्रेण व्यवहितत्वात् । तद्वपामार्जनान्ते वसतीवरीणां ग्रहणम् । वसतीवर्यश्च सोमार्था आप उच्यन्ते ता वै स्यन्दमानानां गृह्णीयादिति वचनात् । स्यन्दमानानामनस्तमित इत्युक्तम् ॥ २४८ ॥

अस्तामितश्चेन्निनाह्यात्पुरे जानश्चेत् ॥ २४९ ॥

स यस्या गृहीता अभ्यस्तमियात्तत्र प्रायश्चित्तिः क्रियते यदि पुरेजानः स्यान्निनाह्याद्गृह्णीयादिति श्रुतेः । निनाह्यशब्देन च मणिकोभिधीयते ॥ २४९ ॥

अनीजानोन्यस्यापि समीपावसितस्य पुरेजानस्य ॥ २५० ॥

निनाह्याद्गृह्णाति ॥ २५० ॥

उभयाभाव [1]उल्कुषीं हिरण्यं वोपर्युपरिधारयन्हविष्मतीरित्यनेन मन्त्रेण गृण्हाति ॥२५१॥

अग्नेर्व इति निदधाति शालाद्वार्यमपरेण ॥२५२॥

वसतीवरीः ॥ २५२ ॥

सुब्रह्मण्यां च प्रेष्यति पैतापुत्रीयाम् ॥ २५३ ॥

चशब्दान्निधानकाल एव ॥ २५३ ॥

आदित्या[2]भ्यये ऽहुतायामपि ॥ २५४ ॥

प्राग्वपाहोमादादित्याभ्यये अहुतायामपि गृह्णाति ॥ २५४ ॥

दक्षिणाग्निहोमान्तमग्नीषोमीयमस्तमिते संस्थाप्य व्युत्क्रामतेत्याह त्रिः ॥ २५५ ॥

वसतीवरीभिर्व्यवधानादग्नीषोमीयग्रहणम् । यद्वाग्नीषोमीयकर्मैव दक्षिणाग्निहोमान्तमितरे पशवः समिष्टयजुरन्ताः । विहितानि हि तेषां समिष्टयजूंषि । त्रीणि समिष्टयजूंषि जुहोति ।

---

१ उल्कुषीमुल्कामित्यर्थः ।

२ अभ्ययो ऽस्तसमयस्तत्रेत्यर्थः ।

पशौ च यां आवह इति वा पशाविति । अग्नीषोमीयस्य तु प्रतिषिद्धानि तत्तूपवसथेग्नीषोमीयं पशुमालेभिरे इति प्रकृत्य तस्मात्तस्य पशोः समिष्टयजूꣳषि न जुह्वतीत्याह । अतोग्नीषोमीयवर्जं पश्वन्तरे त्रीणि समिष्टयजूꣳषि भवन्ति । दक्षिणाग्निहोमश्चाग्नीषोमीयाविकारत्वात् सर्वपशूनामस्तमित एवेति सम्प्रदायः ॥ २५५ ॥

व्युत्क्रामतेति त्रिरुक्ते—

शालाद्वार्यमपरेणास्ते पत्न्युत्तरवेदिमपरेण यजमान उपस्थे सोमं कृत्वा ॥ २५६ ॥

आस्ते इत्यनुवर्त्तते ॥ २५६ ॥

शालाद्वार्यमपरेण वसतीवरीः परिहरति ॥२५७॥

दक्षिणेन द्वारेण ॥ २५७ ॥

निहृत्य दक्षिणस्यामुत्तरवेदिश्रोणौ निदधातीद्राग्न्योः ॥ २५८ ॥

इत्यनेन मन्त्रेण ॥ २५८ ॥

आहृत्य स्थाने निदधाति ॥ २५९ ॥

स्थानं च शालाद्वार्यमपरेण ॥ २५९ ॥

कलशं पत्न्यालभते ॥ २६० ॥

कलशशब्देन च तत्संस्काराद्द्रव्योपलक्षणम् ॥ २६० ॥

उत्तरेण परिक्रम्योत्तरस्यां पूर्ववत् ॥ २६१ ॥

उत्तरेणाग्नीन्परिक्रम्योत्तरस्यामुत्तरवेदिश्रोणौ निदधाति । पूर्ववदिन्द्राग्न्योरिति ॥ २६१ ॥

मित्रावरुणयोरिति वा ॥ २६२ ॥

विश्वेषां देवानामित्याग्नीध्रे ॥ २६३ ॥

वसतीवरीर्निदधाति ॥ २६३ ॥

सोमं चासन्द्याम् ॥ २६४ ॥

चशब्दादाग्नीध्र एव ॥ २६४ ॥

दीक्षितश्च तत्र तां रात्रिं सोमं रक्षति ॥२६५॥

चशब्दाभिधानसमनन्तरमेव रक्षणम् ॥ २६५ ॥

सुब्रह्मण्यां च प्रेष्यति परिवाप्यायै दोहनम् ॥२६६॥

परिवाप्यशब्देन गवामपाकृतावस्थोच्यते । या या परिवापावस्था तस्यास्तस्या दोहनमित्येकवचनम् । बह्व्यो हि ता दध्यर्थतया ॥ २६६ ॥

आवसथोन्मर्दनालङ्करणदन्तप्रक्षालनान्यध्वर्योरदीक्षितस्याध्वर्योरदीक्षितस्य ॥ २६७ ॥

आवसथो वसत्यर्थं गृहम् । उन्मर्दनं चन्दनादि । अलङ्करणं स्रक्मालादि दन्तप्रक्षालनदन्तधावनम् । ताम्बूलमित्यपरे । एतान्यध्वर्योरदीक्षितस्य देयानि । अदीक्षितग्रहणाच्च नैषाङ्गदक्षिणासंस्कारमात्रमेतदित्य तश्चावसथस्यादानं वसातिमात्रार्थत्वात् ॥ २६७ ॥

इत्युपाध्यायकर्कविरचिते कात्यायनसूत्रभाष्ये
अष्टमोऽध्यायः समाप्तः ।

# नवमोऽध्यायः ।

१अपरराते ऋत्विजः प्रबोधयन्ति ॥ १ ॥

बहुवचनोपदेशाच्च यजमानेन सह केचनाप्राकृतास्तान् सम्प्रबोधयन्ति ते ऽप उपस्पृश्याग्नीध्रमुपसमायन्ति त आज्यानि गृह्णत इति श्रुतेः । आज्यग्रहणेन च परिस्तरणाद्याक्षिप्तमत्राभिधीयते ॥ १ ॥

अप उपस्पृश्य शालाद्वार्ये परिस्तरणपात्रसंसादनप्रोक्षणाज्यनिर्वपणाधिश्रयणस्रुक्सम्मार्जनोद्वासनावेक्षणानि कृत्वाग्नीध्र उत्पूय पश्वाज्यग्रहणम् ॥ २ ॥

शालाद्वार्यग्रहणं च श्रपणनियमार्थम् । आहवनीये मा भूदिति । पश्वाज्यग्रहणमिति । कुत एतत् । पशौ हि चोदनोपरिष्टादिहैव कस्मात्पशुर्न चोदितः । ब्राह्मणे ह्याश्विनान्ते विहितःआश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं पशुमुपाकरोतीति तदर्थमेतदिति पश्वाज्यग्रहणमित्युक्तम् ॥ २ ॥

आज्यान्यादाय सोमं चार्थवच्चाहवनीय इध्मप्रोक्षणादि करोति ॥ ३ ॥

अर्थवद्ग्रहणेन च ग्रावद्रोणकलशादीन्युच्यन्ते । तानि हि तत्र निहितानि । आहवनीय एव यदिध्मप्रोक्षणं तदादि करोति । आहवनीयग्रहणात् । एवं च कृत्वा यदधस्तनमिध्मप्रोक्षणम् तन्न भवति । सकृत्प्रोक्षित एवेध्मः सवनीये तद्विकारे च ॥ ३ ॥

---

१ उक्तमौपवसथ्यं कर्म इदानीं सौत्यमुच्यते ।

अग्नीषोमीयवत्स्तरणम् ॥ ४ ॥

प्राप्त एवैतस्मिन् पुनर्वचनमुपसंहारार्थं प्रस्थितशब्दवत् । यथा प्रस्थितशब्दः सौत्रामण्यामुपसंहृत इति । ततश्चान्येषां पशूनां त्रिवृद्देवस्तरणं नैकवृदिति ॥ ४ ॥

आज्यासादनात्कृत्वेषान्तरेणार्द्धसोमम-
द्रिषु सम्मुखेषु निदधाति हृदे त्वेति ॥ ५ ॥

आज्यासादनान्तत्वेपि सत्यात्मालम्भनान्ते एव सोमोपावहरणं कर्त्तव्यम् । व्यवादेशसामर्थ्यादासाद्य हवींषिसम्मृशतीति । निपाताच्चार्द्धशब्दस्य समविभक्तस्यार्द्धं द्रष्टव्यम् । अद्रीणां च समुखतासहकारिणां पठ्यते स्ववीयाऽस्याभ्यन्तराणि तानि मुखानीति ॥ ५ ॥

विश्वास्त्वामिति विसृज्योपतिष्ठते ॥ ६ ॥

विसर्गस्यालम्भपूर्वकत्वाद्याजमानमुपस्थानम् । आलम्भस्य याजमानत्वात् ॥ ६ ॥

एतेनाहरणꣳ सोमार्थस्याभिषवे ॥ ७ ॥

एतेनेतीषान्तरालमभिधीयते । तेनाहरणं सोमार्थस्याभिषवे वर्त्तमाने ॥ ७ ॥

नोद्धरणं ततो बहिर्द्धाभावात् ॥ ८ ॥

तेनोद्धरणं न कर्त्तव्यम । बहिर्द्धा मा भूदिति ॥ ८ ॥

अभिषुतस्य चानवहरणं कृतत्वात् ॥ ९ ॥

अभिषुतस्य सतः शुष्काभिषवे तेन मार्गेणावहरणं[१] न कर्त्तव्यम । कृतत्वात्संस्कारस्य ॥ ९ ॥

प्राग्वाचं प्रवदितोः प्रातरनुवाकोपाकरणं

---

१ अवहरणमधिषवणे प्रक्षेप इत्यर्थः ।

देवेभ्यः प्रातर्यावभ्यो ऽनुब्रूहीति समिध-
मादधत् ॥ १० ॥

वयसां वाचः प्रवदनात्पूर्वं प्रातरनुवाक्यस्योपाकरणं देवेभ्यः प्रातर्यावभ्योनुब्रूहीति सामिधमादधत् ॥ १० ॥

देवेभ्य इत्येके ॥ ११ ॥

प्रातरनुवाकमुपाकुर्वन्ति ॥ ११ ॥

सुब्रह्मण्यां च प्रेष्यति ॥ १२ ॥

चशब्दादनन्तरम् ॥ १२ ॥

प्रातरनुवाकं जाग्रदुपासीताध्वर्युः ॥ १३ ॥

जाग्रद्वै वाध्वर्युरुपासीतेति वचनात् ॥ १३ ॥

स्वप्याद्वा ॥ १४ ॥

तस्मादु काममेव स्वप्यादिति श्रुतेः । वचनाद्विकल्पः ॥१४॥

अग्नीदैन्द्रमेकादशकपालं निर्वपति हरि-
भ्यां धानाः पूष्णे करम्भं सरस्वत्यै दधि
मित्रावरुणाभ्यां पयस्याम् ॥ १५ ॥

इन्द्रस्य पुरोडाशो हयोर्धानाः पूष्णः करम्भः सरस्वत्यै दधि मित्रावरुणयोः पयस्या इति वचनात् ॥ १५ ॥

इन्द्राय वा हरिपषसस्वतिमित्रावरुणवते धा-
नादीनि यथासंख्यम् ॥ १६ ॥

वाशब्दः पक्षव्यावृत्तौ । इन्द्राय चैतद्गुणविशिष्टाय धानादीनि

भवन्ति। कुत एतत्। सर्वं ऐन्द्रा भवन्तीति वचनात्। यत्तु हर्योर्धाना इति, तद्गुणेन देवताभिधानं लक्षणया। यथाश्विष्टकृते समवद्यनीति। एवं च प्रैषवचनम् इन्द्रो हरिवान् धाना अत्तु पूषण्वान् करम्भं सरस्वतीवान्दधि मित्रावरुणवान्पयस्यामिति। तस्मादिन्द्राय हरिवदादिविशिष्टाय धानादीनि ॥ १६ ॥

उन्नेतुः पात्रयोजनम् ॥ १७ ॥

वचनाद्भवति ॥ १७ ॥

खरोत्तरपूर्वार्द्धे उपांश्वन्तर्यामयोः ॥ १८ ॥

पात्रयोजनम् ॥ १८ ॥

तयोश्च—

दक्षिणमुपांशोः ॥ १९ ॥

पात्रं भवति ॥ १९ ॥

तदपरेण द्विदेवत्यानि प्रत्यञ्चि ॥ २० ॥

रीत्या ॥ २० ॥

तेषां च—

रास्नावमैन्द्रवायवम् ॥ २१ ॥

रास्ना च मेखलोच्यते ॥ २१ ॥

अजकावं मैत्रावरुणम् ॥ २२ ॥

अजकावशब्देन अजागलस्तनावुच्येते। अजागलस्तनाविव स्तनौ यस्य तत् आजकावम्। संज्ञत्यपरे। गाण्ड्यजगात्संज्ञायामिति ॥ २२ ॥

औष्ठमाश्विनम् ॥ २३ ॥

ओष्ठवदित्यर्थः ॥ २३ ॥

दक्षिणपूर्वार्द्धे शुक्रामन्थिनोः ॥ २४ ॥

तयोः—

दक्षिणः शुक्रस्याग्रयणस्थाली मध्ये ॥ २५ ॥

खरस्य ॥ २५ ॥

तस्याश्च—

दक्षिणोक्थ्यस्थाली सपात्रा ॥ २६ ॥

तथादित्यस्थाल्युत्तरा ॥ २७ ॥

सपात्रा ॥ २७ ॥

तस्या एव—

ऋतुपात्रे पूर्वे स्रुक्पुष्कराकृती उभयतो मुखे काष्मर्यमये आश्वत्थे वा ॥ २८ ॥

आग्रयणस्थाल्याः पूर्वे २८ ॥

ऊर्ध्वानीतराणि प्रादेशमात्राणि मध्यसङ्गृहीतानि ॥ २९ ॥

आग्रयणादपरां १परिप्लवाः स्रुक्पुष्करामधोधोक्षं प्रत्यञ्चं द्रोणकलशमत्युह्यो पर्युपर्यक्षं पवित्रमस्मिन्करोति ॥ ३० ॥

अधोधोक्षमित्यक्षस्याधस्तात् उपर्युपर्यक्षमित्युपरिष्टादक्षस्य नीत्वा पवित्रमस्मिन्करोति ॥ ३० ॥

शुक्लं जीर्णोर्णानाम् ॥ ३१ ॥

---

१ परि समन्तात्प्लुवते गच्छतीति परिप्लुवा, चञ्चला' तया च द्रोणकलशाद्ग्रहणं क्रियते । अथवा परिप्लुवेत्यस्या यौगिकी सञ्ज्ञा संव्यवहारार्था, एषा च द्रोणकलशमध्ये निहिता सती लघुत्वात्परिप्लुवते इति याज्ञिकदेवः ।

शुक्लं जीवोर्णानामित्यनैडकीनामूर्णानाम ॥ ३१ ॥

उभयतो दशं परिप्लवायाम् ॥ ३२ ॥

पवित्रं करोति । अन्यतरतो दशं द्रोणकलशे ॥ ३२ ॥

पूर्वेणोपस्तम्भनमुत्तरं ध्रुवस्थालीमनन्तर्हिते ॥३३॥

उत्तरस्यानस उपस्तम्भनस्य पुरस्तात् अनन्तर्हिते ध्रुवस्थालीं स्थापयति । तां हि प्रकृत्य श्रूयते अथैतं व्युह्य न तृणं च नान्तर्धायेति ॥ ३३ ॥

धुरि प्रचरणीम् ॥ ३४ ॥

धूःशब्दश्च शम्यान्तरालवाचक इत्युक्तम् । तत्र प्रचरणीं स्थापयति ॥ ३४ ॥

पूर्वेणाक्षमुपरि पूतभृतम् ॥ ३५ ॥

उत्तरस्यैवानसोऽक्षस्य पुरस्तादुपरि पूतभृतं करोति ॥३५॥

तस्यैव—

परेणाधवनीयम् ॥ ३६ ॥

प्रागक्षाद्दशचमसान्त्सवृन्तानधः प्रत्यगेकधनानयुग्मानुदहरणांस्त्रिप्रभृत्यापञ्चदशभ्यो भूदुषा रुशत्पशुरित्युच्यमाने चतुर्गृहीतं प्रचरण्या जुहोति शृणोत्वग्निरिति ॥ ३७ ॥

अभूदुषा रुशत्पशुरित्यस्मिन्मन्त्रवाक्ये होत्रोच्यमाने चतुर्गृहीतं प्रचरण्या जुहोति शृणोत्वग्निरिति । स चायं कालार्थः संयोगः । कर्तृभेदात् पृथगर्थत्वाच्च । नाङ्गाङ्गिलक्षण इति ॥ ३७ ॥

अपरं गृहीत्वोदङ्गच्छन्नाहाप इष्य होतरिति॥३८॥

अथापरं चतुर्गृहीतमाज्यं गृहीत्वोदङ्ङुप्रयन्नाहाप इष्य होतरिति श्रुतेः ॥ ३८ ॥

प्रेष्यति च मैत्रावरुणस्य चमसाध्वर्यवेहि नेष्टः पत्नीरुदानयैकधनिन एताग्नीध्रात्वाले वसतीवरीभिः प्रत्युपतिष्ठासै होतृचमसेन चेति ॥ ३९ ॥

अर्थभेदाच्चत्वारः प्रैषाः । प्रयोजनं सावसानमुच्चारणम् । चशब्दाद्गच्छन्नेव ॥ ३९ ॥

अपो गत्वा देवीराप इत्युप्सु जुहोति ॥ ४० ॥

चतुर्गृहीतम् ॥ ४० ॥

कार्षिरसीति मैत्रावरुणचमसेनाज्यमपोहति ॥४१॥

अथ मैत्रावरुणचमसेनैतामाहुतिमपप्लावयति कार्षिरसीति वचनात् ॥ ४१ ॥

समुद्रस्य त्वेति तेन गृह्णाति ॥ ४२ ॥

मैत्रावरुणचमसेनापः ॥ ४२ ॥

एकधनांश्चोन्नयन्ति ॥ ४३ ॥

बहुवचनोपदेशात् एकधनिन एव क्रियापदस्य स्वशब्दाभिधानाच्चशब्दो मन्त्रानुकर्षणार्थः ॥ ४३ ॥

पान्नेजनांश्च पत्न्यो द्वौ द्वौ ॥ ४४ ॥

चशब्दादुन्नयन्ति । तथा च मन्त्रस्याप्रवृत्तिः । पत्नीशब्दे च बहुवचनमुच्चारणार्थम् । बहुत्वस्यैकान्ततोऽभावात् ॥ ४४ ॥

प्रत्येत्य चात्वालस्योपरि मैत्रावरुणचमसं

वसतीवरीश्च सꣳस्पर्शयति समाप इति ॥ ४५ ॥

मैत्रावरुणचमसस्था अपो वसतीवरीश्च संलगयति समाप इत्यनेन मन्त्रेण । प्रत्येत्यत्यवाच्यम् । अर्थप्राप्तत्वा दुच्यते च । तत् किमर्थं सर्वेष्वागतेषु नाध्वर्यावेवेति ॥ ४५ ॥

इतरे तस्मिन्व्यानयन्त्येके मैत्रावरुणचमसे प्रथमम् ॥ ४६ ॥

संस्पर्शो व्यानयनयोर्विकल्पो मन्त्रस्तु प्रवर्त्तत एव ॥ ४६ ॥

होतृचमसे वसतीवरीः कृत्वा यजमानाय प्रयच्छति निग्राभ्याः ॥ ४७ ॥

ताः संज्ञा संव्यवहारार्थः । निग्राभ्यास्तु वाचयति निग्राभ्यास्थासिञ्चतीति चैवमर्थाः ॥ ४७ ॥

होता पृष्टः प्रत्याहोतेव नंनमुरिति ॥ ४८ ॥

अवेरपोध्वर्यों इत्येवं होत्रा पृष्टोध्वर्युः प्रत्याहोतेव नंनमुरिति ॥ ४८ ॥

प्रचरणीसꣳस्रवमग्निष्टोमे जुहोत्यभावे चतुर्गृहीतं यमग्न इति ॥ ४९ ॥

प्रचरणीसꣳस्रवमग्निष्टोमसंस्थे क्रतौ जुहोति यमग्न इति । तदभावे चतुर्गृहीतम् । यद्यु नालꣳहोमाय स्यादपरं चतुर्गृहीतमाज्यं गृहीत्वा जुहोतीति ॥ ४९ ॥

उक्थ्ये प्रथमं परिधिमालभते ॥ ५० ॥

अनेनैव मन्त्रेण ॥ ५० ॥

प्रविशत्येवान्यत्र ॥ ५१ ॥

एवकारकरणादमन्त्रकं प्रवेशनम् । षोडशिन्यतिरात्रे चातावेव हि प्रकृत्योच्यते समुद्यैव तूष्णीमेत्य प्रपद्येतेति ॥ ५१ ॥

रराट्यालम्भनं वा षोडशिनि ॥ ५२ ॥

अनेनैव मन्त्रेण ॥ ५२ ॥

छदिरतिरात्रे ॥ ५३ ॥

मन्त्रेण आलभ्यते । वाशब्दो विकल्पार्थः । षोडश्यतिरात्रयोः तूष्णीं वा प्रविशति रराट्याच्छदिषी वा मन्त्रेणालम्भत इति ॥५३॥

अतीत्यदक्षिणेन होतारं मैत्रावरुणचमसमाधवनीयेवनयति वसतीवरितृतीयं चाग्निः प्रातः सवने पात्वस्मान्वैश्वानरो महीनां विश्वशम्भूः स नः पावको द्रविणं दधात्वायुष्मन्तः सहभक्षाः स्यामेति ॥ ५४ ॥

अनेन मन्त्रेण ॥ ५४ ॥

तावच्चैकधनानाम् ॥ ५५ ॥

अवनीयते । अयुगपदवनयनम् अशक्यत्वात् । भेदेनेत्यपरे ॥ ५५ ॥

एकधनस्थान उभयशेषन्निधायाधिषवणे पर्युपविशन्ति ॥ ५६ ॥

वसतीवरीशेषमेकधनशेषं च एकधनस्थाने निधाय अधिषवणफलकयोः समन्तादुपविशन्ति ॥ ५६ ॥

उत्तरतोध्वर्युयजमानौ ॥ ५७ ॥

तयोरूर्ध्वं—

पूर्वोऽध्वर्युरपरेण परीत्येतरे त्रयः ॥ ५८ ॥

अध्वर्युपुरुषा हविर्द्धानापरान्त उपविष्टानामुन्नातॄणामध्यप-रेण प्रतिप्रस्थातुः प्रतिहर्त्तारमन्तरेण । उक्तो ह्यन्तर्बहिर्भाव ऋत्विजां च यथापूर्वमिति ॥ ५८ ॥

देवस्य त्वेत्यद्रिमादाय वाचं यच्छति प्रा-
ग्घिङ्कारात् ॥ ५९ ॥

स उपा꣡ꣳशुसवनः ॥ ६० ॥

तस्य उपाꣳशुसवन इति वैदिकी संज्ञा संव्यवहारार्था, तमु-पाꣳशुसवनेन मेक्ष्यतीत्येवमाद्यर्था ॥ ६० ॥

निग्राभ्यासु वाचयत्युरस्येना निगृह्य निग्रा-
भ्यास्थेति ॥ ६१ ॥

निग्राभ्यास्वित्यधिकरणासम्भवादालम्भसप्तमीयम ॥ ६१ ॥

उपाꣳशु सवने सोमं मिमीत इन्द्राय त्वा व-
सुमते रुद्रवत इति पञ्चकृत्वः प्रतिमन्त्रम् ॥ ६२ ॥

मिमीते प्रक्षिपति ॥ ६२ ॥

यत्त इति मितालम्भनम् ॥ ६३ ॥

यत्त इत्यनेन मन्त्रेण मितस्य सोमस्यालम्भनं करोति । अयं म-न्त्रश्चोदितार्थाभिधायी ॥ ६३ ॥

प्रतिप्रस्थाताꣳशून्षडादत्तेऽङ्गुल्यन्तरेषु द्वौ
द्वौ कुरुते ॥ ६४ ॥

मितात् सोमात् । स चायमुपदेशो ग्रहणार्थः ॥ ६४ ॥

श्वात्रास्थेत्यासिञ्चति निग्राभ्याः ॥ ६५ ॥

मिते सोमे ॥ ६५ ॥

प्रहरिष्यन्द्वेष्यं मनसा ध्यायेदमुष्मा अहं प्रहरामि न तुभ्यं सोमेति ॥ ६६ ॥

अथ प्रहरिष्यन्यं द्विष्यात्तं मनसा ध्यायेदमुष्मा अहं प्रहरामि न तुभ्यमिति वचनात् ॥ ६६ ॥

अभावे तृणम् ॥ ६७ ॥

मनसाध्यायेत्। यद्यु न द्विष्यादपि तृणमेव मनसा ध्यायेदिति वचनात् । स चायं पदार्थः क्रत्वर्थः तृणाभिध्यानविधानात् ॥६७॥

मा भेरिति प्रहरति ॥ ६८ ॥

अनेन मन्त्रेण प्रहरति सोमे ॥ ६८ ॥

एवं त्रिरभिषुणात्यासेचं निग्राभ्याः ॥ ६९ ॥

एवमभिषवं त्रिःकृत्वः करोत्यासिच्यासिच्य निग्राभ्याः ॥६९॥

अष्टकृत्व एकादशकृत्वो द्वादशकृत्वः ॥ ७० ॥

प्रहारसंख्येयम् ॥ ७० ॥

सर्वे पञ्चवर्गाः पशुकामस्याष्टवर्गा ब्रह्मवर्चसकामस्य ॥ ७१ ॥

गुणफलसम्बन्धोयम् ॥ ७१ ॥

प्रतिवर्गं निग्राभं वाचयति होतृचमसेऽल्पानंशूनवधाय प्रागपागिति ॥ ७२ ॥

प्रतिप्रहारप्रवर्गं होतृचमसेऽल्पानंशूनवधाय प्रागपागिति निग्राभं वाचयति ॥ ७२ ॥

अद्रिणा चतुर्थम् ॥ ७३ ॥

अद्रिणा होतृचमसे प्रक्षिप्ते न चतुर्थे वाचनम् ॥ ७३ ॥

तूष्णीं वा ॥ ७४ ॥

वाशब्दो विकल्पार्थः । तथा चाद्रिप्रक्षेपमात्रं भवति ॥ ७४ ॥

उपांशुं च गृह्णाति वाचस्पतये देवो देवेभ्यो मधुमतीरिति ॥ ७५ ॥

चशब्दात्प्रतिवर्गम् ॥ ७५ ॥

प्रतिप्रस्थातोपगृह्णाति पात्रम् ॥ ७६ ॥

प्रतिप्रस्थातोपांशु पात्रं गृह्णाति ॥ ७६ ॥

गृह्यमाणे—

आत्तानां च द्वौ द्वावन्तर्दधाति ग्रहण-भेदात् ॥ ७७ ॥

आत्तानामंशूनां चशब्दात्प्रतिप्रस्थाताङ्गुल्यन्तरेषु द्वौ द्वावन्तर्दधाति गृह्यमाणे ग्रहे द्वौ द्वाविति । कुत एतत् । भिन्नानि हि त्रीणि ग्रहणानि । षडंशवः । अतो द्वौ द्वावित्युक्तम् ॥ ७७ ॥

किं च—

मन्त्रलिङ्गाच्च ॥ ७८ ॥

अंशुभ्यां गभस्तिपूत इति ॥ ७८ ॥

षड्वा श्रुतिसामर्थ्यात् ॥ ७९ ॥

षडपि वान्तर्दधाति । षड्भिः पावयतीति श्रुतिसामर्थ्यात् । एवं श्रुतिः समर्था सङ्गतार्था भवति । एवं च पक्षद्वयोपन्यासेऽपि पूर्व एव पक्षः सम्प्रदाये अङ्गीकृतः । उक्तहेतुत्वात् । षड्भिः पावयतीत्यत्र कथम् । प्रत्यवयवे ग्रहणे द्वाभ्यां द्वाभ्यामन्तर्धाय मानाभ्यां षड्भिः पूत एव भवति ॥ ७९ ॥

यत्त इत्यात्तान्त्सोमे निदधाति ॥ ८० ॥

यत्त इत्यनेन मन्त्रेणात्तानंशूंल्लुतान्सोमे निदधाति ॥ ८० ॥

परिमृज्यासादनमुपांश्वन्तर्यामयोः ॥ ८१ ॥

ग्रहेषु यत्परिमृज्य-सादनमुक्तम् तदिह प्रतिषिध्यते ॥ ८१ ॥

अभिचरन्त्सादयेदविसृजन्नमुष्य त्वा प्राणं सादयामीत्युदानमित्यन्तर्यामम् ॥ ८२ ॥

अभिचरन्त्सादयत्यविमुञ्चन्नमुष्य त्वा प्राणं सादयामीत्यनेन मन्त्रेण । अमुष्येति चाभिचर्यमाणस्य षष्ठ्यन्तेन नामादेशः ॥ ८२ ॥

पाणिना चापिदधात्यमुष्य त्वा प्राणमपि दधामीत्युदानमित्यन्तर्यामम् ॥ ८३ ॥

चशब्दादभिचरन्नेव ॥ ८३ ॥

स्वाहेत्युक्त्वोर्वन्तरिक्षमिति निष्क्रमणम् ॥ ८४ ॥

हविर्धानात् ॥ ८४ ॥

अन्वारभेतेन्यस्मै प्रदाय होतृचमसम् ॥ ८५ ॥

यजमानोऽध्वर्युम् ॥ ८५ ॥

वरं वृत्वा ददाति च ॥ ८६ ॥

वरवरणं च यज्ञसमाप्तिप्रार्थनम् । यद्यपि च श्रूयते तस्मा एवं वरं समर्धयन्ति क्षिप्रेन इमं ग्रहं जुहवादिति । तथापि यागपरिसमाप्तिरेवास्मिन्ग्रहे आशंसितेति । उत्तमप्रयाजवत् । एवं श्रूयते प्रातः सवन एव सर्वं यज्ञं समस्थापयन्निति । ददातिचवरम् ॥ ८६ ॥

स्वां कृत इति हुत्वा पात्रमुन्मार्ष्टि ॥ ८७ ॥

स्वां कृत इति हुत्वा ग्रहं तत्पात्रमूर्ध्वमुन्मार्ष्टि ॥ ८७ ॥

प्रथमे परिधा उत्तानं पाणिं प्रागुपमार्ष्टि

देवेभ्यस्त्वेति ॥ ८८ ॥

उत्तानग्रहणादधः परिधि भवति ॥ ८८ ॥

वासउरोबाहुषु श्लिष्टमꣳशुमभिचरन् जुहुयाद्देवाꣳशविति ॥ ८९ ॥

आग्रयणस्थाल्याꣳ शेषैकदेशमासिच्याꣳशुं प्रास्यति तृतीयसवनाय ॥ ९० ॥

उपाꣳशुपात्रशेषश्चासावेकदेशश्चेति शेषैकदेश इति सम्प्रदायः। उपाꣳश्वंतर्यामयोः शाखान्तरे शेषभक्षप्रतिषेधात् ॥ ९० ॥

प्राणाय त्वेति पात्रसादनम् ॥ ९१ ॥

प्राणाय त्वेत्युपाꣳशुपात्रासादनम। सादयामीत्यध्याहारः ॥९१॥

उपाꣳशुसवनं पाणिना प्रमृज्योदञ्चं व्यानाय त्वेति सꣳस्पृष्टम् ॥ ९२ ॥

उदञ्चमुदङ्मुखम। मुखं चास्य येनाभिषव कृतः। उपाꣳशु पात्रसꣳस्पृष्टं सादयति व्यानाय त्वेत्यनेन मन्त्रेण ॥ ९२ ॥

उपाꣳश्वभिषवोभि हितः। इदानीं महाभिषवविशेषव्याचिख्यासयेदमुच्यते—

उपविष्टयोरभिषुण्वन्ति चत्वारः पर्युपवेशनसामर्थ्यात् ॥ ९३ ॥

उपाꣳश्वभिषवे ह्येकोभिषोता अष्टौ कृत्वोभिषुणोत्येकवचननिर्देशात। इह चत्वारो भिषुण्वन्ति। कुत एतत्। अधिषवणे पर्युपविशन्तीति। एतद्बवचनं समर्थं सङ्गतार्थं भवति। परि समन्तादुपविशन्ति पर्युपविशन्तीति ॥ ९३ ॥

आप्यायनान्तोभिषवस्त्रिपर्यायः ॥ ९४ ॥

पर्यायत्रयान्ते आप्यायनं भवति ॥ ९४ ॥

मत्या ॥ ९५ ॥

तत्रामतिरुक्ता इहमत्या प्रहरणम् । मतिशब्दश्चेच्छा वाची । यावता रसप्रच्युतिर्भवति ॥ ९५ ॥

पर्यायादिषु निग्राभ्यासेचनम् ॥ ९६ ॥

रसप्रच्युत्यर्थं क्रियते ॥ ९६ ॥

प्रथमे वा प्रभुत्वात् ॥ ९७ ॥

वाशब्दः पक्षान्तरपरिग्रहे । प्रभवति हि प्रथमपर्याये सिक्तमुदकं रसप्रच्युत्यै । उपांशवभिषवे तु प्रतिपर्यायमासेको युक्तः, प्रतिपर्यायमेव हि तत्र ग्रहणमिति । इह पुनर्न तथा ॥ ९७ ॥

निग्राभान्ते सरसान्ꣳशून्त्सम्भरण्याधवनीयेवधायावधूयाहरति ॥ ९८ ॥

निग्राभावाचनान्ते सम्भरण्या सरसनाꣳशूनादायाधवनीये वधायाधूयाहरति ॥ ९८ ॥

एवं द्विरपरम् ॥ ९९ ॥

एवमेवद्विरपरमभिषवकर्म कर्त्तव्यम् ॥ ९९ ॥

पूर्ववन्निग्राभ्याः ॥ १०० ॥

निग्राभान्त उक्तेऽपि पुनर्निग्राभ्यां वचनमद्रिणा चतुर्थप्रतिपत्त्यर्थम् ॥ १०० ॥

इदानीं लाघवायाभिषवयोरुभयोरर्थैक्यप्रतिपादनायेदमाह—

पूर्वे वोपाꣳशुं गृहीत्वा गृहीत्वाप्यायनसम्भरणे कृतत्वात् ॥ १०१ ॥

पूर्वाभिहित एवोपांशवभिषवः । उपांशवभिषवे उपांशुं गृही-

त्वा गृहीत्वाप्यायनसम्भरणे क्रियेते । न हि तत्र ते कृते इति । एवं चाभिषवयोर्युगपदनुष्ठाने लाघवमिति ॥ १०१ ॥

धर्ममात्रं पर्युपवेशनम् ॥ १०२ ॥

नन्वेवं सति पर्युपवेशनमसमर्थं, सोमक्रयणीपदपर्युपवेशनवद्धर्ममात्रमित्यदोषः ॥ १०२ ॥

अभिषवविपर्यासो वाभिमृष्टादंशूनपकृष्य निग्राभ्याश्चानुपूर्व्ययोगादनात्तस्य चाभिमानसामर्थ्यात् ॥ १०३ ॥

अभिषवद्वित्वं वा भवति । द्वित्वे च सति विपर्यासोऽभिषवयोः । कुत एतत् । आनुपूर्व्ययोगात् । आनुपूर्व्येण हि क्रमेण द्वावप्याम्नातौ । अध्वरान्त्ये हि ब्राह्मणे महाभिषवो ग्रहाद्यनुपांश्वभिषव इति । मन्त्राणामप्येवमेवानुपूर्व्ययोगो भवति । उत्तरो ह्युपांशुग्रहणमन्त्रपाठः । अत एव चाभिमृष्टादंश्वपकर्षो निग्राभ्याणां च कर्त्तव्यः । न ह्यन्यथा द्वित्वानुपूर्व्ये सम्भवतः । अपि चानात्तरसे सोमे सोमाभिमानो भवति । सोमबुद्धिर्भवति तस्मादप्यंश्वपकर्षः । अथवाभिमानसामर्थ्यादिति । मीङ् हिंसायाम् । अनात्तरसे सोमे हिंसा क्रियमाणा समर्था भवति । उपांशुग्रहणात्तरकाले हि हिंसा क्रियमाणा असमर्थिका ॥ १०३ ॥

ऋजीषभावाच्च ॥ १०४ ॥

प्रत्युतद्रव्यान्तरबुद्धिर्भवति । तस्मादप्यंश्वपकर्षः । अतो भिषवद्वित्वम् । द्वित्वं च विपर्यास इति ॥ १०४ ॥

प्रोह्य द्रोणकलशमृजीषमुखेष्वद्रिषु निदधत्युद्गातारः ॥ १०५ ॥

प्रपूर्वस्य वहेः कृतसम्प्रसारणस्यैतद्रूपं प्रोह्येति । अधिषवणफलकप्रदेशमुह्येत्यर्थः । ऋजीषमुखेष्वद्रिषु निदधत्युद्गातारः ॥१०५॥

पवित्रं च वितन्वन्त्युदक् ॥ १०६ ॥

पवित्रमन्यतरतो दशामुदगग्रं अवाङ्नाभि वितनुयुः । एवमेव हि छान्दोग्ये श्रूयत इति ॥ १०६ ॥

स्वयं वाकुर्वत्सु ॥ १०७ ॥

स्वयमध्वर्युः करोत्यकुर्वत्सूद्गातृषु ॥ १०७ ॥

आधवनीयादुन्नेता निग्राभ्यास्वासिञ्चति ताः पविते यजमानः ॥ १०८ ॥

आसिञ्चति ॥ १०८ ॥

ततो ग्रहणमाध्रुवान्माध्यन्दिने च पञ्च प्रथमान् ॥ १०९ ॥

तत एव धारायां गृह्णाति ॥ १०९ ॥

शुक्रो द्रोणकलशे ॥ ११० ॥

द्रोणकलशे यः सोम आपतति तस्य शुक्र इतीयं संज्ञा संव्यवहारार्था ॥ ११० ॥

ततोऽन्येऽनादेशे ॥ १११ ॥

ततः शुक्रादन्ये ग्रहा गृह्यन्ते । येषां यानिर्निर्दिष्टा ॥ १११ ॥

सावित्रपात्नीवतहारियोजनोपक्षीणानाग्रयणात् ॥ ११२ ॥

उपक्षीणांश्च गृह्णाति ॥ ११२ ॥

पूतभृतश्चमसान् ॥ ११३ ॥

गृह्णाति ॥ ११३ ॥

तृतीयसवने वैश्वदेवम् ॥ ११४ ॥

पूतभृत एव। अन्याभावादवाच्यमिति चेत्। स्यान्न्यायोपप्रदर्शनार्थत्वात् ॥ ११४ ॥

अनादिष्टांश्चेदोन्नयनश्रुतेः ॥ ११५ ॥

अनादिष्टयोर्नीश्च पूतभृत एव गृह्णाति । अतो हि देवेभ्य उन्नयन्त्यतो मनुष्येभ्योतः पितृभ्यस्तस्माद्वैश्वदेवः पूतभृदिति श्रुतेः ॥ ११५ ॥

दशापवित्रेण परिमृज्य परिमृज्यैष ते योनिरिति ग्रहसादनम् ॥ ११६ ॥

दशापवित्रमुभयतो दशं तेन परिमृज्य परिमृज्यैष ते योनिरिति ग्रहसादनम् ॥ ११६ ॥

नायोनिकेषु ॥ ११७ ॥

येषां ग्रहाणां सन्निधौ योनिर्न पठ्यते तत्र योन्यासादनं न भवति। कुत एतत् । समाम्नायाभावात् ॥ ११७ ॥

सर्वेष्विति वात्स्यो विशेषोपदेशात् ॥ ११८ ॥

वात्स्य आचार्यः सर्वेष्वेव योन्यासादनं मेने । अविशेषेण हि ग्रहमात्रमुद्दिश्य योन्यासाद्यत इति पठ्यते ॥ ११८ ॥

किं च—

सावित्रर्तुग्रहप्रतिषेधाच्च ॥ ११९ ॥

सावित्रर्तुग्रहेषु च प्रतिषेधो दृश्यते । तत्र सादयत्यसन्नो ह्येष सवितेति । ऋतुग्रहेषु च न सादयति तस्मादयमसन्नः संवत्सरः परिप्लवते तच्च योन्यासादनस्य सर्वग्रहविषयत्व उपपद्यते ॥११९॥

प्रतिवषट्कारं हुत्वा वषट्कर्तुर्भक्षहरणम् ॥ १२० ॥

यत्रानुवषट्कारोस्ति तत्र प्रतिवषट्कारं होमः । हुत्वा च वषट्कर्त्रे भक्षणम् । वषट्कर्तुर्भक्षमवनयेदिति शाखान्तरात् । स्वश्रुतावपि वषट्कर्तुर्भक्ष इति ॥ १२० ॥

यथास्वं चमसान् ॥ १२१ ॥

भक्षहरणं भवति समाख्यानात् ॥ १२१ ॥

यत्रैकपात्रे वषट्कारनिमित्तः समाख्यानिमित्तश्च भक्षस्तत्र कस्य पूर्वं भक्ष इत्यनियमे प्राप्त आह—

वषट्कर्तुर्वा पूर्वं श्रुतिसामर्थ्यात् ॥ १२२ ॥

वषट्कर्तैव पूर्वो भक्षयेत् । श्रुतिप्रपादितो ह्यसौ । इतरस्तु समाख्यानात्कल्प्यते ॥ १२२ ॥

उन्नतोन्नयति समाख्यानात् ॥ १२३ ॥

उदितेन्तर्यामग्रहणमुपयामगृहीत इति ॥१२४॥

रात्रिं सन्तमन्तर्यामं तमुदिते जुहोतीति श्रुतेः ॥१२४॥

उपांशुवदनाम्नातवरशेषासेचनवर्जम् ॥१२५ ॥

उपांशुवत्क्रिया । कियांस्तु विशेषः । अनाम्नातो यो मन्त्रः वरवरणप्रदानेशेषासेचनं च न भवति । सर्वंहुतः क्रियते । भक्षस्य शाखान्तरे प्रतिषेधात् । अनाम्नातश्च मन्त्रः । स्वाहाकार उर्वन्तरिक्षमन्वेमीति च ॥ १२५ ॥

अपमार्ष्टर्यत ॥ १२६ ॥

नोन्मार्ष्टि ॥ १२६ ॥

प्रथमे च न्युब्जेन पाणिना प्रत्यक् ॥ १२७ ॥

प्रथमे च परिधौ न्युब्जेन पाणिना प्रत्यगुपमार्ष्टि ॥ १२७ ॥

उपांशुसवनसंस्पृष्टस्योदानाय त्वेति

पात्रासादनम् ॥ १२८ ॥

उपांशुसवनपात्रसंस्पृष्टस्य पात्रस्योदानायत्वेनत्यनेन मन्त्रेणासादनम् ॥ १२८ ॥

ऐन्द्रवायवं गृह्णात्या वायविति ॥ १२९ ॥

अनेन मन्त्रेण ॥ १२९ ॥

अपगृह्य पुनरिन्द्रवायू इति ॥ १३० ॥

गृह्णाति ॥ १३० ॥

मैत्रावरुणमयं वामिति ॥ १३१ ॥

पयसा श्रीणात्येनं कुशावन्तर्धाय राया वयमिति ॥ १३२ ॥

एनं ग्रहं कुशावन्तर्धाय पयसा श्रीणाति राया वयमित्यनेन मन्त्रेण । तं च पयसा श्रीणातीति द्वितीया । तन्निर्देशात् प्रधानभूतो ग्रहः । गुणविभक्तिनिर्देशात् पयसो गुणभूतता । अतो ग्रहसंस्कारत्वादप्रदेयं पयः । अतश्च प्रदेयधर्मा न प्रवर्त्तन्ते ॥ १३२ ॥

एवं सर्वत्र श्रयणेषु ॥ १३३ ॥

कुशान्तर्धानम् ॥ १३३ ॥

शुक्रं बैल्वेन वा तं प्रत्नथेति ॥ १३४ ॥

शुक्रं गृह्णाति बैल्वेन वा पात्रेण वैकङ्कतेन वा तं प्रत्नथेति॥१३४॥

अयं वेन इत्येके ॥ १३५ ॥

मन्थिनमयं वेन इति ॥ १३६ ॥

सक्तुभिः श्रीणात्येनं मनो न येष्विति ॥ १३७ ॥

एनं मन्थिनम् ॥ १३७ ॥

आग्रयणं द्वयोर्धारयोर्ये देवास इति ॥ १३८ ॥

आग्रयणं गृह्णाति धाराद्वयात् ये देवास इति मन्त्रेण । सा-चैका धारोन्नेतृकर्तृकी अपरा याजमानेति१ ॥ १३८ ॥

दशापवित्रेणायग्रयणमुपगृह्य त्रिर्हिंकृत्य सोमः पवत इति सकृच्छेषम् ॥ १३९ ॥

दशापवित्रेणाग्रयणं गृहीत्वा त्रिर्हिं कृत्य सोमः पवत इति च त्रिरुक्त्वा मन्त्रशेषं सकृदाह । मन्त्रश्चोदितार्थाभिधायी ॥ १३९ ॥

प्रथमस्थानेन प्राग्देवतादेशात् ॥ १४० ॥

देवतादेशात्पूर्वं प्रथमस्थानं यजुषः उपांशुत्वापवादोयम् ॥१४०॥

प्रातः सवने चोच्चैःकर्माणि ॥ १४१ ॥

उच्चैः कर्माणि यान्यैष्टिकपाशुकानि । च शब्दात्तेषामपि प्र-थमं स्थानम् ॥ १४१ ॥

मध्यमेन माध्यन्दिने ॥ १४२ ॥

माध्यन्दिने यानि नीचैर्यानि चोच्चैस्तेषां मध्यमस्थानम् ॥१४२॥

उत्तमेन तृतीयसवने ॥ १४३ ॥

यानि नीचैरिति ॥ १४३ ॥

उक्थ्यमुपयामगृहीत इति ॥ १४४ ॥

उक्थ्यं गृह्णाति उपयामगृहीत इति । तच्चैतत्प्रकल्पन-

---

१ अन्ये त्वाहुः आग्रयणस्थाल्यां य उपांशुग्रहशेषस्तं पात्रान्तरे कृत्वा पृथगासेचनं तस्य कार्यम्, सा चैका धारा । द्वितीया तु प्राकृत्येव यजमानो यामासिञ्चति, तदपि समूलम् इति देवभाष्ये ।

मात्रम । अतो वाग्यमप्रदक्षिणावर्त्तने अत्र न भवतः । उक्थ्यविग्रहणेषु भविष्यतः ॥ १४४ ॥

ध्रुवं मूर्धानं दिव इति ॥ १४५ ॥

गृह्णात ॥ १४५ ॥

आहोमादस्य सुत्वन्न मूत्रपुरीषे कुर्यात् ॥ १४६ ॥

एतस्य होमान्न सर्पेन्न प्रस्रावयेतेति ॥ १४६ ॥

वैश्वानरं च जानन् ॥ १४७ ॥

गृह्णाति । जानच्छब्दो विकल्पार्थः । ज्ञानार्थं एवेत्यपरे । स यदि तं चरकेभ्यो वाचयतीवानुब्रुवतेति वचनात् ॥ १४७ ॥

पूर्णान् स्थालीग्रहानर्धपूर्णं द्रोणकलशं कृत्वा सर्वमासिञ्चति सुन्वन् ॥ १४८ ॥

पूर्णान् स्थालीग्रहान् कृत्वा सम्पातसोमेनार्धपूर्णं च द्रोणकलशं कृत्वा सर्वं होतृचमसमासिञ्चति यजमानः ॥ १४८ ॥

अध्वर्युप्रतिप्रस्थातृप्रस्तोतुद्गातृप्रतिहर्तृसुन्वन्तः समन्वारब्धा निष्क्रामन्ति ॥ १४९ ॥

अध्वर्य्वादयः समन्वारब्धा निष्क्रामन्ति हविर्धानात् । उत्तर उत्तरः पूर्वमन्वारभते । समासोक्तानां क्रमाभावात् ॥ १४९ ॥

अध्वर्युः प्रथमो यथासंख्यमितरे ॥ १५० ॥

इत्युक्तम ॥ १५० ॥

हुत्वा वा समन्वारभेरन् ॥ १५१ ॥

विप्रुड्ढोमोत्तरकालं वा समन्वारभन्ते । आदौ वेति विकल्पः । शास्त्रस्य तुल्यत्वात् ॥ १५१ ॥

यस्त इति विप्रुषां होमं जुह्वति ॥ १५२ ॥

अध्वर्य्वादयः । विप्रुड्ढोम इति संज्ञा ॥ १५२ ॥

अध्वर्युर्वा जुहोति ॥ १५३ ॥

जुहोति सर्वे वेति विकल्पः ॥ १५३ ॥

वेदितृणे अध्वर्युरादत्ते प्रह्वा उदञ्चो गच्छन्ति ॥ १५४ ॥

नीचैर्व्यवस्थिता उदञ्चो गच्छन्ति ॥ १५४ ॥

अन्यतरत्तृणं चात्वाले प्रास्यति देवानामिति ॥ १५५ ॥

उद्गातॄणां पुरस्तादितरत्तूष्णीम् ॥ १५६ ॥

प्रास्यति ॥ १५६ ॥

जपत्सु सोमः पवत इति पवमानोपाकरणं प्रस्तोत्रे तृणे प्रयच्छन् ॥ १५७ ॥

जपत्सूद्गातृषु पवमानमुपाकरोति सोमः पवत इत्यनेन मन्त्रेण प्रस्तोत्रे तृणे प्रयच्छन् । पवमानमिति च स्तोत्रसंज्ञा ॥ १५७ ॥

सर्वेषु ॥ १५८ ॥

पवमानेष्वेवमुपाकरोति । अतिदेशात्तत्प्राप्तेरवाच्यमेति चेत् । अतिदेशो हि भवति माध्यन्दिने समन्वारब्धनिष्क्रमणादि करोति । आग्नीदग्नीनिति प्रैषात् । तथा तृतीयसवने समन्वारब्धनिष्क्रमणादि करोति माध्यन्दिनवदिति । सत्यमेवम् ॥ १५८ ॥

अतृणो वा कुशमुष्टिं वा ॥ १५९ ॥

प्रयच्छन्नुपाकरोतीति । अनयोरप्युत्तरत्र प्राप्तिर्मा भूदितिसर्वे-

ष्वित्युक्तम् अतृणो वा कुशमुष्टिं वा प्रयच्छन् बहिष्पवमान एवोपाकरोति ॥ १५९ ॥

प्रत्यङ्मुखा उपविशतः पुरस्ताद्दक्षिणो यजमानः ॥ १६० ॥

प्रत्यङ्मुखा उपविशतोध्वर्युप्रतिप्रस्थातारौ द्वित्वोपदेशात् । पुरस्तादुद्गातॄणां तयोश्च दक्षिणो यजमान उपविशति ॥ १६० ॥

स्तूयमान उन्नेताधवनीयं पवित्रमन्तर्धाय पूतभृत्यासिञ्चति ॥ १६१ ॥

स्तूयमाने बहिष्पवमाने उन्नेता पवित्रमन्तर्धायाधवनीयम् सोमं पूतभृत्यासिञ्चति ॥ १६१ ॥

स्तोत्रान्ते प्रेष्यत्यग्नीदग्नीन्विहर बर्हिस्तृणीहि पुरोडाशाँ३ अलङ्कुरु प्रतिप्रस्थातः पशुनेहीति ॥ १६२ ॥

विहरणस्तरणालङ्करणेषु अग्नीदुपदेशात् । पश्वानयने तु प्रतिप्रस्थाता । अयं च प्रैषः सवनीयपश्वर्थत्वात् सवनीयविकारेष्वपि प्रवर्त्तते । अत्र पाशुकानां पदार्थानां अवटहोमान्ते चषालेक्षणान्ते वा प्रैषदानम्।सवनीयविकारेष्वप्ययमेवावसरः।तेन ऋतुपश्वादावेकयूपावटहोमान्ते चषालेक्षणान्ते वा भवति। अनेकयूपे त्ववटहोमान्त एव। न हि चषालेक्षणान्ते सर्वयूपानामवस्थानम्। श्वो वा दक्षिणोत्तराणामवगूहानान्तमित्युक्तत्वात् । प्रतिप्रस्थातः पशुनेहीत्ययमेकवचनान्तः प्रैषोग्निष्टोमे समाम्नात एकादशिनि पक्षेपि किमयमेकवचनान्त एव प्रयुज्यते उतानभिधायकत्वादप्रयोग इति । किं तावत्प्राप्तमप्रयोगो न ह्येकवचनान्तः शक्नोति बहून्वदितुमिति । न चायमप्रयुज्यमानो ऽनर्थको भवति । एकपशुपक्षेस्य प्रकरणे समाम्नातमर्थवदेवेत्येवं प्राप्त उच्यते । अनेकपशुपक्षेप्येकवचनान्त एव प्रयुज्यते । किं कारणम् ।प्रातिपदिकार्थः प्रधानभूतो वचनार्थश्च गुणभूतः ।

न च प्रधानार्थाभिधाने सम्भवति गुणार्थाभिधानं न सम्भवतीत्यप्रयोगो युक्तरूपस्तस्मादनेकपांशुकंष्याविकृत एव प्रयुज्यत इति ॥ १६२ ॥

यथान्युप्तं धिष्ण्येष्वाग्नीध्रादङ्गारान्निवपति ॥ १६३ ॥

अग्नीदग्नीन्विहरेत्यस्यार्थः । येन क्रमेण धिष्ण्यनिर्वापः कृतः तेनैव क्रमेणाग्नीध्रादङ्गारान्निवापं करोति ॥ १६३ ॥

अनु पृष्ठ्यां बर्हिस्तृणाति ॥ १६४ ॥

अपरत आरभ्यापूर्वान्तात् । पुरोडाशालङ्करणं तु चोदकपरिप्राप्तत्वात् नाभिहितमाचार्येण ॥ १६४ ॥

आश्विनं गृह्णात्यन्वारब्धे वा या वामिति॥१६५॥

आश्विनं ग्रहं गृह्णाति अन्वारब्धेनन्वारब्धे वा शुक्रात्पूतभृतो वा यावामित्यनेन मन्त्रेण ॥ १६५ ॥

ग्रहानवेक्षयति यथागृहीतमवकाशान्वाचयन्प्राणाय म इति प्रतिमन्त्रम् ॥ १६६ ॥

वाचयन्नवेक्षयतीत्युभयत्र कारितत्वादध्येषणा । वर्चोदा वर्चसे पवस्वेति ध्रुवन्नीक्षस्वेत्येवमिति सम्प्रदायः ॥ १६६ ॥

अग्रहत्वादुच्यते—

उपांशुसवनं द्वितीयम् ॥ १६७ ॥

यथागृहीतमित्यस्यापवादः ॥ १६७ ॥

आश्विनं षष्ठं शुक्रामन्थिनौ युगपत् पूतभृदाधवनीयौ च विश्वाभ्यो म इति ॥ १६८ ॥

चशब्दात् युगपदेव ॥ १६८ ॥

कोऽसीति द्रोणकलशम् ॥ १६९ ॥

वाचयन्दीक्षयति ॥ १६९ ॥

भूर्भुवः स्वारिति जपति ॥ १७० ॥

यजमानः ॥ १७० ॥

ज्ञातप्रियानूचानानावकाशयेत् ॥ १७१ ॥

स वै न सर्वमिवावकाशयेदिति प्रकृत्यैव श्रूयत इति ॥१७१॥

ध्रुवगोपं कृत्वा परिव्ययणादि करोति रशना-मुदुह्य पूर्वाम् ॥ १७२ ॥

ध्रुवगुप्तिश्च कटपंटादीनामन्यतमेनावघट्टनम् । ध्रुवगोप्तृराज-पुत्रस्य निरूपणमित्यपरे । भवति हि शाखिनां वचनम् । कः कुभो राजपुत्रः प्राप्नोति ध्रुवस्य गोप्तेति । न पुनरादृतमाचार्येणैतत्केना-प्याभि प्रायेण । पूर्वां रशनामुदुह्य परिव्ययणादि करोति । अस्मिन्नेव ह्यवसरे पशुचोदना शाखान्तरे आश्विनग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोतीति । माध्यन्दिनीयायामप्या-ग्नेयमग्निष्टोम आलभेतेति ॥ १७२ ॥

आग्नेयोग्निष्टोमे सवनीयः पशुरैन्द्राग्नश्चो-क्थ्यो द्वितीयः ॥ १७३ ॥

चशब्दात्सवनीय एव ॥ १७३ ॥

ऐन्द्रो वृष्णिः षोडशिनि तृतीयः सरस्वत्यै चतुर्थोतिरात्रे मेषी वा ॥ १७४ ॥

आग्नेयमग्निष्टोम आलभेतेति प्रकृतसर्वमेतच्छ्रूयत इति ॥१७४॥

एतत्स्तोमायनम् ॥ १७५ ॥

स्तोमायनमिति संज्ञा व्यवहारार्था । स्तोमायनं वैकादशिनावे-त्येवमाद्यर्था ॥ १७५ ॥

होतृनामग्रहणान्तं कृत्वेतरांश्चाश्राव्याश्राव्य प्रवृणीते यथालिङ्गम् ॥ १७६ ॥

होतृनामग्रहणान्तं पाशुकं कृत्वा इतरांश्चाश्राव्याश्राव्य प्रवृणीते । चशब्दाद्धोतारं च यथालिङ्गमिति यो यो येन लिङ्गेन लिङ्ग्यत इति । होतुरनभिहितमपीन्द्रं होत्रादिति वरणम् । इन्द्रं हि होता ऋतुग्रहेषु यजत इति ॥ १७६ ॥

अश्विनाध्वर्यू आध्वर्यवात् ॥ १७७ ॥

अत्र चाध्वर्योर्द्वितीयः प्रतिप्रस्थाता । वरणं च नेष्टा करोति ॥ १७७ ॥

मित्रावरुणौ प्रशास्तारौ प्राशास्त्रात् ॥ १७८ ॥

अत्र द्वितीयोच्छावाकः ॥ १७८ ॥

इन्द्रो ब्रह्मा ब्रह्मणादिति ब्राह्मणाच्छंसिनम् ॥ १७९ ॥

ब्राह्मणाच्छंसिग्रहणम् लिङ्गेन । भूमात् ब्रह्मणो वरणमपि ॥१७९॥

मरुतः पोत्रादग्नावो नेष्ट्रादग्निराग्नीध्रात् अग्निर्हदैवीनामिति यजमानम् ॥ १८० ॥

वृणीते । अत्र चोक्तमाचार्येण सुन्वन्निति सुत्ये। अयं च मन्त्रश्चोदितार्थाविधायी । बहुयजमानके विपरिणम्यते । पाशुकमपि यजमानवरणमन्त्रैर्वर्तेत सम्प्रदायः। प्रवृत्तहोमानामुपरिष्टत्पाशुकं यजमानवरणमित्यनुरूपम् ॥ १८० ॥

१यथाप्रवृतं प्रवृत्तहोमौ जुह्वति जुष्टो वाचे

---

१ यथावृत्तं येनक्रमेण प्रवरणं तेन होत्रादयः सर्वे द्वे द्वे आहुती जुह्वति सामिदाधानं कृत्वा प्रचरण्याज्येन ।

भूयासं जुष्टो वाचस्पतये देवि वाग्यत्ते वाचो मधुमत्तमं जुष्टतमं तस्मिन्मा धाः स्वाहा सरस्वत्या इति ॥ १८१ ॥

पावकान इति द्वितीयाम् ॥ १८२ ॥

आहुतिं जुहोति ॥ १८२ ॥

वपामार्जनान्तं कृत्वा सयजमाना धिष्ण्यानुपतिष्ठन्ते विभूरसीति प्रतिमन्त्रम् ॥ १८३ ॥

सयजमाना ऋत्विजः ॥ १८३ ॥

उत्करान्तं कृत्वा वागसीति सदोभिमर्शनमृतस्य द्वाराविति द्वार्ये ॥ १८४ ॥

अभिमृश्येते येन द्वारेण प्रवेशनम् । मन्त्रलिङ्गान्मा मा सन्तासमिति ॥ १८४ ॥

अभिमन्त्रणमुत्तरैः ॥ १८५ ॥

मन्त्रैः ॥ १८५ ॥

अध्वनामध्वपत इति सूर्यम् ॥ १८६ ॥

अभिमन्त्रयते ॥ १८६ ॥

मित्रस्य मेत्यृत्विजः ॥ १८७ ॥

अभिमन्त्रयते । अतश्च याजमानमभिमन्त्रणम् ॥ १८७ ॥

अग्नयः सगरा इति धिष्ण्यान् ॥ १८८ ॥

एतत्सर्पणम् ॥ १८९ ॥

अस्य कर्मणः सर्पणामितीयं सञ्ज्ञा। अभिमन्त्रणानि याजमानानीति सम्प्रदायः। एवं च सूर्याभिमन्त्रणे धिष्ण्याभिमन्त्रणे च ऊहः प्रवर्त्तते। अध्वर्युकर्तृकाणीत्यपरे। ऋत्विगभिमन्त्रणमेव याजमानमिति ॥ १८९ ॥

सदोभिमर्शनादि वोत्तरयोः सवनयोः ॥ १९० ॥

सर्पणं भवति धिष्ण्योपस्थानादि वा ॥ १९० ॥

पुरोडाशैश्चरति ॥ १९१ ॥

ये ते अलङ्कृताः पुरोडाशास्तैः। तत्र चैकपुरोडाशे छत्रिन्यायेन बहुवचनम् ॥ १९१ ॥

एकं प्रदानम् ॥ १९२ ॥

देवतागुणभेदेपि वचनसामर्थ्यात् ॥ १९२ ॥

एकापात्र्यामासाद्य मध्ये पुरोडाशः पुरस्ताद्धानाः प्रतिदिशमितराणि यथासंख्यं प्रदक्षिणम् ॥ १९३ ॥

येषामेव पात्र्युचिता तेषामेकत्वं विधीयते दध्नः पयस्यायाश्च उखास्थयोरत्र प्रतिदिशमासादनम्। यथासंख्यातानां च प्रदक्षिणमिति ॥ १९३ ॥

प्रातः प्रातः सवस्येन्द्राय पुरोडाशानामनुवाचयति ॥ १९४ ॥

एवमनुवाचनं कारयति ॥ १९४ ॥

आश्राव्याह प्रातः प्रातः सवस्येन्द्राय पुरोशान्प्रस्थितान्प्रेष्येति ॥ १९५ ॥

प्रैषविशेषार्थमिदमुक्तम् ॥ १९५ ॥

एवं यथासवनमनुवाचनप्रैषौ ॥ १९६ ॥

माध्यन्दिनस्य सवनस्य तृतीयस्य सवनस्येति ॥ १९६ ॥

उपभृति वावद्यति पशुपुरोडाशवत् ॥ १९७ ॥

अवदानग्रहणसमनन्तरमेव वत्युपदेशात् ॥ १९७ ॥

उभयꣳ हुत्वा होतृधिष्ण्ये पुरोडाशान्नि-
दधाति ॥ १९८ ॥

उभयमिति प्रधानं सौविष्टकृतं च हुत्वा होतृधिष्ण्ये पुरोडाशान्निदधातीति च । कुत एतत् । एवं हि श्रूयते होतृधिष्ण्यादिडामादधातीति । पुरोडाशेषु च निहितेषु होतृधिष्ण्यादिडा ऽहिताभवति ॥ १९८ ॥

निरवत्तां वेडाम् ॥ १९९ ॥

वाशब्दः पक्षव्यावृत्तौ न पुरोडाशान्निदधाति निरवत्तामेवेडाम्। निरवत्ता च प्राशित्रादिभिरपि गृहीतैर्भवति । एवं च होतृधिष्ण्यादिडामादधातीति यथाश्रुतमेतद्भवति । इतरथा दधातिना ग्रहणं लक्षयेत तच्चायुक्तं, श्रुतार्थसम्भवे सति ॥ १९९ ॥

द्विदेवत्यैश्चरति ॥ २०० ॥

अवसरार्थमिदमुच्यते ॥ २०० ॥

वायव इन्द्रवायुभ्यामनुवाचयति प्रतिप्रस्था-
तादित्यपात्रेण द्रोणकलशादुपयामगृहीतो-
सीति गृहीत्वा गृहीत्वा द्विदेवत्यानन‌ु जुहो-
ति उत्तरार्धे ॥ २०१ ॥

द्विदेवत्याननु जुहोतीति त्रयाणामपि द्विदेवत्यानामनु होमः

क्रियते । ऐन्द्रवायवस्य वषट्कारद्वयम् । तत्र द्वितीयस्य वषट्कारस्य पश्चादनुशब्दोपदेशात् ॥ २०१ ॥

उत्तरार्द्धाधिकारोपाजिजीविषयेदमुच्यते—

अनुवषट्कृतेपि ॥ २०२ ॥

उत्तरार्द्ध एव जुहोति । येषां ग्रहणमनु वषट्कारोस्ति । द्विदेवत्यानां तु नैवानु वषट्कारं अनु वषट्कारार्थमेवेदमुच्यते ॥ २०२॥

आश्रुतप्रत्याश्रुतप्रैषाश्च समत्वात् ॥ २०३ ॥

आश्रावणादयोनुवषट्कारेपि प्रवर्त्तन्ते । कुत एतत् समत्वात् । समो ह्ययमनुवषट्कारोद्विदेवत्याननु जुहोतीति यागेन । द्वावपि हि सोमयागाभ्यासौ, सोमयागोद्देशेन च विहिता आश्रावणादयः । तेनानुवषट्कारेपि प्रवर्त्तन्त इति ॥ २०३ ॥

एवं प्राप्त उच्यते—

नानन्तर्यात् ॥ २०४ ॥

नैतेषामनुवषट्कारे प्रवृत्तिः । कुत एतत् । आनन्तर्यात् । वषट्कृत्यानवानमनुवषट्करोतीत्यानन्तर्यं विरुध्यते ॥ २०४ ॥

स्यादविरोधात् ॥ २०५ ॥

स्यादाश्रावणादि यदि विरोधो न स्यात् । अस्ति तु विरोधः । तस्मादप्रवृत्तिरिति । अपरे त्वैन्द्रवायवविषयमेवेदमधिकरणं व्याचर्णयन्ति ॥ २०५ ॥

प्रतिप्रस्थातादित्यपात्रेण द्विदेवत्याननुजुहोतीति प्रक्रान्तम् । तत्रेदमुच्यते—

शेषः शेषमादित्यस्थाल्यामासिञ्चत्यादित्येभ्यस्त्वेति ॥ २०६ ॥

प्रतिहोमं शेषमादित्यस्थाल्यामासिञ्चत्यादित्येभ्यस्त्वेत्यनेन मन्त्रेण । प्रतिप्रस्थातैवाधिकारात् । आसिञ्चामीति चाध्याहारः ॥ २०६ ॥

समासिच्य तेनापिदधाति विष्ण उरु गायेति ॥ २०७ ॥

समासिच्यान्ते मैत्रावरुणाश्विनाभ्यामपि कृते यागे तेनैव पात्रेणादित्यस्थालीमपिदधाति विष्णु उरु गायेत्यनेन मन्त्रेण ॥ २०७ ॥

उन्नीयमानेभ्योनुवाचयति ॥ २०८ ॥

उन्नीयमानायनुवचनं कारयत्युन्नेतैव । स हि समाख्ययोन्नयनं करोति तच्छेषमनुवाचनम् । अतोत्रापि तस्यैव कर्तृत्वम् । लिङ्गाच्च । यो वाव कर्म करोति स एव तस्योपचारं वेदेति ॥ २०८ ॥

चमसेषून्नयति नवस्त्रपरेणोत्तरवेदिं निधाय ॥२०९॥

नवस्त्विति दशमभ्युदासार्थम् । तस्य हि पश्चादुन्नयनाम्नानमिति ॥ २०९ ॥

शुक्रादुपस्तरणाभिघारणे ॥ २१० ॥

क्रियेते । मध्यमन्तु पूतभृतश्चमसानिति पूतभृतः । एकैकश्च त्रिरवत्तः क्रियते । पदार्थस्यैतावत्वात् ॥ २१० ॥

होतृचमसे प्रथमम् ॥ २११ ॥

प्रथमं होतृचमस उन्नयनम् । तस्य हि प्रथमः पाठः प्रैतु होतुश्चमस इति ॥ २११ ॥

शुक्रामन्थिभ्यां चरतः ॥ २१२ ॥

द्विवचनोपदेशात् प्रतिप्रस्थाता च । स हि सन्निकर्षाद्गृह्यते ॥ २१२ ॥

विभागार्थमाह—

शुक्रेणाध्वर्युर्मन्थिना प्रतिप्रस्थाता ॥ २१३ ॥

प्रोक्षितौ यूपशकलावादायापिधानं प्रोक्षिताभ्यामपमार्जनमप्रोक्षिताभ्यामपमृष्टः शण्ड

इत्यध्वर्युरपमृष्टो मर्क्क इति प्रतिप्रस्थाता॥२१४॥

प्रोक्षिताभ्यां शकलाभ्यामपिधानं ग्रहयोरपमार्जनमप्रोक्षिताभ्यामपमृष्टः शण्ड इत्यध्वर्युरपमृष्टो मर्क इति प्रतिप्रस्थाता ग्रहयोरेव कुरुतः ॥ २१४ ॥

देवास्त्वेति निष्क्रामतो यथालिङ्गम् ॥ २१५ ॥

यथालिङ्गग्रहणं मन्त्रविभागार्थम् ॥ २१५ ॥

अपरेणोत्तरवेदिमरत्नी सन्धायोत्तरवेदिश्रोण्योर्निधत्तोऽविसृजन्तौ दक्षिणस्यामध्वर्युरुत्तरस्यां प्रतिप्रस्थातानाधृष्टासीति ॥ २१६ ॥

अध्वर्युप्रतिप्रस्थातारौ अपरेणोत्तरवेदिं परस्परतोरत्नी सन्धायोत्तरवेदिश्रोणयोर्निधत्तोऽविसृजन्तौ ग्रहौ दक्षिणस्यामध्वर्युरुत्तरस्यां प्रतिप्रस्थातानाधृष्टासीत्यनेन मन्त्रेण । स चायमुत्तरवेदिसंस्कारो वाक्यशेषात् तद्रक्षोभिरेवैतदुत्तरवेदिमनाधृष्टां कुरुत इति । मन्त्रलिङ्गाच्चानाधृष्टासीति । प्रयोजनम् यत्रोत्तरवेद्यकरणं तत्रैतन्न भवति । प्रयोजनवद्ग्रहसंस्कार इत्यपरे । अपिधानापमार्जनसंस्कारमध्येऽभिधानात् । प्रयोजनत्वाच्च ग्रहयोः । तस्माद्ग्रहसंस्कार एवायम् । मन्त्रलिङ्गवाक्यशेषावर्थवादप्रायौ ॥ २१६ ॥

सुवीर इति दक्षिणं यूपदेशं गच्छत्यध्वर्युः सुप्रजा इति प्रतिप्रस्थातोत्तरम् ॥ २१७ ॥

मन्त्रद्वयमपि चोदितार्थाभिधायी ॥ २१७ ॥

अपरेण यूपमरत्नी सन्धत्तः सङ्गमान इति यथालिङ्गम् ॥ २१८ ॥

पूर्वेणाशक्तौ ॥ २१९ ॥

अप्रोक्षितौ यूपशकलौ ॥ २१९ ॥

निरस्यतो निरस्तः शण्ड इत्यध्वर्युर्निरस्तो मर्क्क इति प्रतिप्रस्थाता ॥ २२० ॥

शण्डग्रहणे मर्कग्रहणं चासुरत्वादुदकोपस्पर्शनं भवति ॥ २२० ॥

आहवनीये प्रोक्षितौ प्रास्यतः शुक्रस्याधिष्ठानमित्यध्वर्युर्मन्थिन इति प्रतिप्रस्थाता ॥ २२१ ॥

आच्छिन्नस्येति जपित्वाश्राव्याह प्रातः प्रातः सवस्य शुक्रवतो मधुश्चुत इन्द्राय सोमान्प्रास्थितान्प्रेष्येति ॥ २२२ ॥

जपोऽध्वर्योरेव ॥ २२२ ॥

उभयतो यूपं प्राङ्मुखौ जुहुतः सा प्रथमेत्यध्वर्युः प्रथमम् ॥ २२३ ॥

ग्रहं जुहोति ॥ २२३ ॥

तमनुप्रतिप्रस्थाता ॥ २२४ ॥

अनेनैव मन्त्रेण । जुहुत इति द्विवचनोपदेशात् ॥ २२४ ॥

चमसाध्वर्यवश्च ॥ २२५ ॥

चशब्दात्समन्त्रिति । मन्त्रस्तु ग्रहविषय एव । तौ वै वषट्कृतौ सन्तौ मन्त्रेण हूयेते इति श्रुतेः ॥ २२५ ॥

प्रेष्यति च ॥ २२६ ॥

चशब्दादनन्तरम् ॥ २२६ ॥

प्रैतु होतुश्चमसः प्रब्रह्मणः प्रोद्गातॄणां प्रयजमानस्य प्रयन्तु सदस्यानाᳶ होत्राणां च

मसाध्वर्यव उपावर्त्तध्वꣳ शुक्रस्याभ्युन्नय-
ध्वमिति ॥ २२७ ॥

प्रैतु होतुश्चमस इति सर्वत्र केचिदनुषङ्गमिच्छन्ति । आद्याये-
व व्यवस्थितः सर्वेषां द्योतक इति सम्प्रदायः । होत्राश्च प्रशास्तृब्रा-
ह्मणाच्छंसिपोतृनेष्ट्रग्नीधः । तेषां चमसानामुपावर्त्तनम् । प्रैषितं
शुक्रस्याभ्युन्नयध्वमिति ॥ २२७ ॥

आगम्य प्रतिप्रस्थाता शेषꣳ शुक्रपात्रेवनयति॥२२८॥

पत्य जुहोतिस्थानात् प्रतिप्रस्थाता मन्थिशेषं शुक्रपात्रेवन-
यति ॥ २२८ ॥

तꣳ स होतृचमसे ॥ २२९ ॥

अवनयति तमध्वर्युर्होतृचमसे ॥ २२९ ॥

पञ्चसून्नयन्ति ॥ २३० ॥

होत्राणां, चमासाध्वर्यव उपावर्त्तध्वꣳ शुक्रस्याभ्युन्नयध्वमि-
त्युक्तत्वात् ॥ २३० ॥

तानाश्राव्याश्राव्य प्रेष्यति नामग्राहं यज य-
जेति प्रशास्त्रादीन् ॥ २३१ ॥

नाम गृहीत्वा गृहीत्वा प्रेष्यत्यसौ यजेति ॥ २३१ ॥

ब्रह्मन्यजेति ब्राह्मणाच्छꣳसिनम् ॥ २३२ ॥

प्रेष्यति ॥ २३२ ॥

प्रथमं हुत्वोत्तमं वा तृपन्त्वित्वति जपति ॥ २३३ ॥

प्रथमं चमसमुत्तमं वा हुत्वा तृपन्त्वित्वति जपति ॥ २३३ ॥

होतारं प्रत्यङ्ङुपसीदत्ययाडग्नीदिति ॥ २३४ ॥

अनेन मन्त्रेण ॥ २३४ ॥

द्विदेवत्यान् भक्षयति पूर्वः प्रथमचोदनाद्धो-
माभिषवकारी भक्षयेदिति श्रुतिः ॥ २३५ ॥

द्विदेवत्यशेषान् भक्षयत्यध्वर्युः । कुत एतत् । होमाभिषवकारिणो हि भक्षः श्रूयते । हविर्धाने ग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यञ्चः प्रतिपरेत्य सदसि सोमान्भक्षयन्तीति । एतदत्र विधीयते । अत्र वाक्ये हविर्धाने ग्रावभिरभिषवो वाक्यान्तरपरिप्राप्तोऽनूद्यते । यदाहवनीये जुहोतीति होमश्च । तथोदरमेवास्य सदस्तस्मात्सदसि भक्षयन्तीति सर्वमनूद्यते । होमाभिषवनिमित्तो भक्षो भवतीत्येतदत्र विधीयते । अतश्च होमाभिषवकारिणो भक्षो भवतीति । स च भक्षयन्पूर्वो भक्षयतीति । कुत एतत् । प्रथमचोदनात् । प्रथमभक्षचोदनात् । एवं प्राथम्यमवगम्यते । अभिषुत्य हुत्वा भक्षयतीति । असन्निधानाच्च । वषट्कर्तृभक्षस्य ह्यसन्निहितः सोमस्तस्माद्वषट्कारनिमित्तात्पूर्वोऽभिषवनिमित्तो भक्षः ॥ २३५ ॥

होता वा वचनमन्त्रवर्णकारणेभ्यः ॥ २३६ ॥

होता वा पूर्वो भक्षयेत् । कुत एतद्वचनात् । वचनं हि भवति । वषट्कर्त्ता प्रथमो भक्षयतीति । प्रथमश्चैवं भक्षयति यावदन्यो न भक्षयति ॥ २३६ ॥

किञ्च—

मन्त्रवर्णाच्च ॥ २३७ ॥

एते वदन्ति शतवत्सहस्रवदभिक्रन्दन्ति हरितेभिरासभिः विष्ट्वी ग्रावाणः सुकृतः सुकृत्यया होतुश्चित्पूर्वे हविरद्य माशतेति । चिच्छब्दः अप्यर्थे । ग्रावाणो वदन्ति । होतुरपि पूर्वं हविरद्यम्भक्षितवन्तो वयमिति । यदि च होतुः पूर्वं भक्षणमुचितम् तदैतदुपपद्यते । किंच कारणानुपूर्व्याच्च । वषट्कृते जुहोतीति पूर्वं कारणं होतुः पश्चादध्वर्योरिति । ननु च पूर्वतरमभिषवः कारणम् । नेत्युच्यते ।

न ह्यभिषव एव कारणं किं तर्हि होमश्चाभिषवश्च । कथं ज्ञायते एकवाक्यत्वात् । अभिषुत्येत्यपरिसमाप्तं वाक्यं हुत्वा भक्षयतीत्यत्र परिसमाप्यते । तस्मादुभयोः समुदितयोर्निमित्तभावो भक्षं प्रति नैकैकस्येति । यत्रत्वेवं विधैकवाक्यता न भवति तत्र व्यस्तयोरपि निमित्तता भवति । यथा यस्य पिता पितामहः सोमं न पिबेदिति । तस्माद्धोतुरेव पूर्वं कारणमिति ॥ २३७ ॥

एवं प्राप्ते ब्रूमः—

## नाध्वर्युः समभिव्याहारात् ॥ २३८ ॥

नैतदेवं वषट्कर्तुः पूर्वो भक्ष इति । किं तर्हि अध्वर्योः पूर्वतरं समभिव्याहृतत्वात् भक्षस्य । तत्प्रातरभिषुत्याग्नौ जुहोति तदग्रावमृतं दधात्यथ भक्षयतीति । अभिषुत्याग्नौ हुत्वेत्यनुवादोयम् केवलमथशब्दार्थोऽत्राप्राप्त आनन्तर्ये स विधीयत इति । तस्मादध्वर्योः पूर्वतरं भक्षः ॥ २३८ ॥

यत्तूक्तं वषट्कर्त्ता प्रथमो भक्षयतीति । तत्परिह्रियते—

## मन्त्राणां चाविधायकत्वात् ॥ २३९ ॥

चशब्दाद्वचनस्य चाविधायकत्वात् । कथमविधायकत्वमिति चेत् । सौम्येक्षणविधिपरत्वाद्वाक्यस्य । सौम्यं चरुमुद्रात्रे ह्रियमाणं होता पूर्वतरमवेक्षते । वषट्कर्त्ता हि प्रथमः सर्वभक्षान् भक्षयतीत्यनुवादोयम् । कुतः प्राप्तिरिति चेत् । समाख्याभक्षापेक्षया प्राप्तिः ॥ २३९ ॥

यच्चोक्तं कारणानुपूर्व्यादित्यत्र ब्रूमः—

## कारणस्य च समत्वात् ॥ २४० ॥

समं हि कारणमुभयोः । सह वै वषट्कारेण जुहुयात् वषट्कृते वेति । तस्मादध्वर्युरेव पूर्वो भक्षयेदिति ॥ २४० ॥

## ऐन्द्रावायवं प्रतिगृह्णात्पैतु वसुः पुरुवसुरिति होतृवद्भक्षणम् ॥ २४१ ॥

होतृशास्त्रातिदेशोयम् । स चैन्द्रवायवं मुखस्य ढौकयित्वा चक्षुषोर्मैत्रावरुणं श्रोत्रयोराश्विनमिति भक्षणं च ॥ २४१ ॥

वाग्देवी जुषाणा सोमस्य तृप्यतु सह प्राणेन स्वाहे त्येवं; सर्वत्र सोमानां भक्षणम् ॥ २४२ ॥

द्विदेवत्यव्यतिरेकेणापि । मन्त्रश्चोदितार्थाभिधायी ॥ २४२ ॥

वचनादन्यत् ॥ २४३ ॥

वचनादन्यदपि भवति । यथैन्द्रश्च सम्राडिति ॥ २४३ ॥

भक्षे हि मेति वा यथालिङ्गम् ॥ २४४ ॥

भक्षे हि मेति वानुवाकेन सोमभक्षणं भवति तत्र च यथालिङ्गं ग्रहणादि कर्त्तव्यम । अनुवाकश्च शाखान्तरसमधीतोपि कथञ्चिन्नाभिहित आचार्येण ॥ २४४ ॥

एवमितरौ प्रतिमन्त्रमैतु वसुविंदद्वसुरैतु वसुः संयद्वसुरिति ॥ २४५ ॥

मैत्रावरुणाश्विनौ ग्रहौ प्रतिगृह्णाति ॥ २४५ ॥

शेष; शेष; होतृचमसेवनयति ॥ २४६ ॥

प्रतिग्रहम् ॥ २४६ ॥

पुरोडाशमात्रामैन्द्रवायवे प्रास्यति पयस्यां मैत्रावरुण आश्विने धानाः ॥ २४७ ॥

पयस्या धाना अपि मात्रा एव । पुरोडाशमात्रा अनुदका इति बहुवचनोपदेशात् । मात्राशब्दश्चैकादशवाची । अतश्च न सर्वप्रासनमिति ॥ २४७ ॥

तानि प्रतिप्रस्थाता दक्षिणस्य हविर्धानस्यो-

त्तरे वर्त्मनि निदधाति ॥ २४८ ॥

तानीति द्विदेवत्यपात्राणि ॥ २४८ ॥

इडामादधाति ॥ २४९ ॥

होतृधिष्ण्यात् ॥ २४९ ॥

चमसांश्चाध्यच्छन्ति ॥ २५० ॥

चशब्दाद्युगपत् ॥ २५० ॥

मार्जिते वाजिनेन चरन्ति सूक्तवाकसंयोर्वा-
कयोरन्यार्थत्वात् ॥ २५१ ॥

इडामादधातीतीडोपक्रान्ता ऽतस्तन्मार्जनान्ते वाजिनेन चरन्ति । अधस्ताद्विकृत्यवधिकाः । पौरोडाशिकाः पदार्थाः । प्रातरनुवाककाले निर्वापः । बहिष्पवमानोत्तरकाले ऽलङ्करणम् । वपान्ते च प्रचारः । इडाधानोत्तरकालं च नैवावधिविधानम् । अतः पौरोडाशिका वाजिनयागादयः सर्वे एवात्र कर्त्तव्याः । वाजिनग्रहणमुपलक्षणार्थम् । ननु च सूक्तवाकोत्तरकालं वाजिनयागः प्रकृतौक्तः । प्रहृत्य तृणन्तेन चरतीति । इहापि तत्रैव करिष्यते । नैतदेवम् । सूक्तवाकशंयोर्वाकयोरन्यार्थत्वात् । पश्वर्थाः सूक्तवाकादयः । ते चाग्निमारुतादूर्ध्वमनुयाजैश्चरन्तीत्यनुयाजोत्कर्षेणोत्कृष्टाः । निःसन्दिग्धं च पाशुकानामनुयाजानामुत्कर्षः । येनाचार्येणोक्तमाग्नीध्र उत्पूय पश्वाज्यग्रहणमिति । पाशुकान्याज्यानि तत्साध्यत्वाच्चानुयाजा अपि पाशुका एवेति प्रसङ्गेन च पाशुकान्यङ्गानि सवनीयानामुपकुर्वन्ति । न च तैरुत्कृष्यमाणैः पौरोडाशिकानामुत्कर्षो युक्तः । कुत एतदसम्बन्धात् । न हि पौरोडाशिकानां च सम्बन्धोऽस्ति तस्माद्वाजिनयागादीनामिहैवानुष्ठानं युक्तरूपमिति ॥ २५१ ॥

एवं प्राप्ते ब्रूमः—

यथोक्तं वा प्रसङ्गात् ॥ २५२ ॥

वाशब्दः पक्षव्यावृत्तौ । न हि वाजिनयागादयः कर्त्तव्याः । किं तर्हि प्रहृत्य तृणं तेन चरतीत्यत्रैव । ननु प्रासङ्गिकत्वादनुत्कर्षे

इत्युक्तम् । अत्रोच्यते । अप्रसङ्गात् । न हि पाशुकान्यङ्गानि पुरोडाशेषु प्रसज्यन्ते । कुतः । साधारणत्वात्तन्त्रस्य । साधारणं हि तन्त्रमुभयोरपि सोमतन्त्रमध्य आम्नानात् । तत्र न ज्ञायते किं पाशुकं तन्त्रं पुरोडाशेषु प्रसज्यते पौरोडाशिकं वा पशाविति । न च परस्परतो ऽनयोरङ्गाङ्गिभावः । यथा पशोः पशुपुरोडाशस्य च । उभयोरपि हि प्रकरणात्सोमाङ्गतेति । तस्मात्तत्र साधारण्यात्साधारणानामेवानुयाजानामुत्कर्ष इति । यत्तूक्तम् । पश्वाज्यग्रहणमाचार्येण न तत्पश्वर्थतयैव सपाशुकचातुर्मास्यन्यायेन । सहत्वात्पशुतन्त्रस्य । साधारण्येपि सति तत्तन्त्राभ्युपगमात् पश्वाज्यग्रहणमित्युक्तम् । तस्मात्स्वकाल एव वाजिनयागादयो नेहेति । अपि च व्यूहने पशुदेवतायाः सवनीयदेवतानां च युगपदभिधानं दृश्यते। अग्नेर्वनस्पते रिन्द्रस्य वसुमते रुद्रवत इत्येवमादि । तच्च तन्त्रस्य साधारण्य उपपद्यते । इतरथा प्रति सवनं सवनीयेषु परिसमाप्यमानेषु युगपदुच्चारणं न साधारणं । भवति च तस्मादपि साधारणं तन्त्रम् । ननु वसुमदादिगुणक इन्द्रोभिधीयते । न च सवनीयेष्वेतद्गुणत्वमत्रोच्यते । वचनसामर्थ्यात् । सवनीयनिर्वापे हरिवदादिगुणक इन्द्रः प्रातः प्रातः सवस्येन्द्राय पुरोडाशानामिति च निर्गुणोयागे । व्यूहने तु वसुमदादिगुणक इति । नास्तिवचनस्यातिभारः। व्यूहनं हि प्रकृत्य वचनं भवति। अग्नेर्वनस्पतेरिन्द्रस्य वसुमत इत्येवमादि ॥ २५२ ॥

होतृचमसेन सोमं भक्षयतः ॥ २५३ ॥

द्विवचनोपदेशात् प्रतिप्रस्थाता च ॥ २५३ ॥

हिन्व मे गात्राणि हरिवः शित्रोमे सप्तर्षीनुपतिष्ठस्वोर्द्ध मे नाभेः सीद मा मेषाङ्नाभिमतिगा इति गात्राणि स्ःस्पृशन्ते ॥ २५४ ॥

भक्षणोत्तरकालं सर्वभक्षेषु । होतृचमसे च शुक्रशेषस्य होमाभिषवनिमित्तमध्वर्योर्भक्षणम् । मन्थिशेषस्य च प्रतिप्रस्थातुः । शुक्रामन्थिनोर्होतृचमस्य च वषट्कारनिमित्तम् । होतुस्तन्त्रेण भक्ष-

णम् । पुनर्ब्रह्मोद्गातृयजमानचमसेषु होतुर्वषट्कारनिमित्तो भक्षः । इतरेषां समाख्यानिमित्तम् । प्रशास्त्रादिष्वप्येवम् । विशेषस्त्वध्वर्युरत्र प्रष्टव्यः । स च पश्चात्पश्चात्कालीनत्वात् । पुनर्होताहोतृचमसे समाख्यानिमित्तं भक्षयत्यध्वर्युप्रतिप्रस्थातारौ पृष्ट्वा । ततः पुनरभ्युन्नीतेषु अध्वर्युर्होमाभिषवनिमित्तं भक्षयेत्प्रशास्त्रादयश्च वषट्कारसमाख्यानिमित्तं तन्त्रेण । प्रस्थितयागनिमित्तं तु होता साक्षिभूतः अत्र प्रष्टव्य एव ॥ २५४ ॥

आप्यायस्वेति द्वाभ्यां चमसानालभन्ते ॥२५५॥

चमसिनः ॥ २५५ ॥

सोमं वा सिञ्चन्ति मन्त्रेणासम्भवात् ॥२५६॥

आप्यायनस्य । वाशब्दोवधारणे । पूर्वमाशङ्कितमुपसत्स्वालम्भमात्रेणाप्यायनस्य दृष्टत्वात् ॥ २५६ ॥

असर्वभक्षास्तान् ॥ २५७ ॥

आप्याय्य ॥ २५७ ॥

दक्षिणस्य हविर्द्धानस्य पश्चादक्षन्निदधति चमसानधः ॥ २५८ ॥

पश्चादक्षमित्यक्षस्य पश्चात् अधश्च नोपरिष्टादिति ॥ २५८ ॥

ते नाराशंसा आ वैश्वदेवात् ॥ २५९ ॥

तेषामावैश्वदेवात् नाराशंसा इति संज्ञा संव्यवहारार्था । अथ यदि नाराशंसेषु सन्न इत्येवमाद्यर्था ॥ २५९ ॥

पुरोडाशशकलमादाय समुपहूताःस्म इत्युक्त्वोत्तिष्ठति ॥ २६० ॥

अच्छावाकायैनत्प्रयच्छन्नाहाच्छावाक वदस्व यत्ते वाद्यमिति ॥ २६१ ॥

एतदिति सफलम् ॥ २६१ ॥

उपो अस्मानिति ब्रुवति होतारमाहोपहवमयं ब्राह्मण इच्छतें तं होतरुपह्वयस्वेति ॥२६२॥

उपो अस्मानीति ब्रुवत्यच्छावाके होतारमाहोपहवमयं ब्राह्मण इच्छते तं होतरुपह्वयस्वेत्येवम् ॥ २६२ ॥

उपहूत उन्नीयमानायानुवाचयति ॥ २६३ ॥

उपहूत होत्रा उन्नीयमानायानुवाचनं कारयत्युन्नेता ॥ २६३ ॥

अच्छावाकचमसमुन्नयति होत्रा चमसवत्सर्वम् ॥ २६४ ॥

होत्राः प्रशास्त्रादयः । तेषां च चमसानां यथोन्नयनं द्रोणकलशात्कृतं तद्वत् । सर्वग्रहणाच्च तृपन्त्विवति जपो लभ्यते ॥ २६४ ॥

आनिधानात्कृत्वा ॥ २६५ ॥

अच्छावाकचमसम् ॥ २६५ ॥

पूर्वश्चाग्नीध्रादतः ॥ २६६ ॥

अग्नीध्र स सात्वपूर्वो भवत्यतः परमच्छावाकचमसः ॥ २६६॥

आग्नीध्रे हविर्यज्ञर्त्विज इडां प्राश्नन्ति ॥२६७॥

ऋत्विग्ग्रहणं यजमानव्युदासार्थम् । हविर्यज्ञग्रहणं च शेषर्त्विजामिति ॥ २६७ ॥

पत्नी चान्यच्छालायाम् ॥२६८ ॥

पत्नी चान्यदोदनादि शालायां भक्षयति ॥ २६८ ॥

उपविष्टेच्छावाके ॥ २६९ ॥

ऋतुग्रहैश्चरतो द्रोणकलशादुपयामगृहीतोसि मधवे त्वेति द्वादश प्रतिमन्त्रम् ॥ २७० ॥

चरत इति द्विवचनोपदेशात् प्रतिप्रस्थाता च । द्रोणकलशादिति नियमो वचनात् । द्वादशग्रहणाच्चः द्वादशानामुत्तमयोर्यौगपद्यम् न तु त्रयोदशस्य । मधवे त्वेत्येवमादिभिर्मन्त्रैःप्रतिमन्त्रम् । मधवे त्वेत्येवाध्वर्युर्गृह्णाति मधवाय त्वेति प्रतिप्रस्थाता ॥ २७० ॥

अध्वर्योः पूर्वः पूर्वो मन्त्रः ॥ २७१ ॥

उत्तर उत्तरः प्रतिप्रस्थातुः ॥२७२ ॥

मन्त्रः ॥ २७२ ॥

युगपत्प्रथमौ गृह्णीत उत्तमौ च व्यत्यासं मध्ये प्रचरणं च सर्वेषाम् ॥ २७३ ॥

व्यत्यासेन ॥ २७३ ॥

निष्क्रामत्येकः प्रविशतीतरः ॥ २७४ ॥

हविर्धानात् । अध्वर्युप्रतिप्रस्थातारौ ॥ २७४ ॥

उत्तर उत्तरः प्रतिप्रस्थातापरकालत्वात् ॥२७५॥

तयोश्चोत्तरः प्रतिप्रस्थाता भवति देशतः कालतश्चापरकालत्वात् ॥ २७५ ॥

उभयतोध्वर्युं पात्रेण परिप्रगृह्णाति ॥ २७६ ॥

प्रतिप्रस्थाता प्रविशन्तं निष्क्रामन्तं च ॥ २७६ ॥

सर्वहुताः प्रागुत्तमाभ्याम् ॥ २७७ ॥

उत्तमग्रहयोः पूर्वे सर्वहुताः कर्त्तव्याः ॥ २७७ ॥

ऋतुनेति षट् प्रेष्यतः ॥ २७८ ॥

ऋतुना प्रेष्येत्येवं षट्सु प्रैषः ॥ २७८ ॥

ऋतुभिरिति चतुरः पात्रमुखे विपर्यस्य ॥२७९॥

ऋतुभिः प्रेष्येत्येवं चतुर्षु प्रेष्यति । पात्रमुखविपर्यासेन च ग्रहणं होमश्च ॥ २७९ ॥

षड्वदुत्तमौ ॥ २८० ॥

उत्तमौ तु षड्वद्भवतः । पात्रमुखविपर्यासेन प्रेषणेन च ॥ २८० ॥

यजमानः प्रेषितो होतरेतद्यजेति ब्रूयात् ॥२८१॥

गृहपते यजेत्येवं प्रेषितो यजमानो होतरेतद्यजेति ब्रूयात् । ततश्च होतुस्तद्याज्यापाठः ॥ २८१ ॥

अध्वर्यू च ॥ २८२ ॥

प्रेषितौ सन्तावेवमेवाहतुर्होतरेतद्यजेति । एक एवाहेत्यपरे । परार्थत्वात् ॥ २८२ ॥

त्रयोदशं गृह्णीयादिच्छन्नुपयामगृहीतोऽस्य; हसस्पतये त्वेति ॥ २८३ ॥

अनेन मन्त्रेण । यदि त्रयोदशं गृह्णीयादिति विकल्पः ॥ २८३ ॥

तं च—

प्रतिप्रस्थातारमनुजुहोति ॥ २८४ ॥

अध्वर्युः ॥ २८४ ॥

अन्यतरस्मिञ्छेषौ कृत्वा वशिनैन्द्राग्नं गृह्णाति प्रतिप्रस्थातेन्द्राग्नी इति ॥ २८५ ॥

अन्यतरस्मिन्पात्रे ग्रहणशेषौ कृत्वा वशिना रिक्तेन पात्रेणैन्द्राग्नं ग्रहं गृह्णाति प्रतिप्रस्थातेन्द्राग्नी इत्यनेन मन्त्रेण ॥ २८५ ॥

आहरति भक्षं होतृपोतृनेष्ट्रग्नीद्ब्राह्मणा-
च्छंसिप्रशास्तृभ्यः ॥ २८६ ॥

यो यस्य वषट् कर्त्ता स तेन सह भक्षयेत् । उपहवप्रार्थनं तु साधारण्यात्सर्वेभ्यः ॥ २८६ ॥

विपर्यस्य पात्रं होतृपोतृनेष्ट्रच्छावाकानाम् ॥२८७॥

भक्षाहरणम् । भक्षाहरणाम्नानाच्चासर्वहुतत्वम् । अतश्च विकल्पः । सर्वहुताः प्रागुत्तमाभ्यामसर्वहुतावेति ॥ २८७ ॥

होतरेतद्यजेत्यत्र चिन्त्यते । किं याज्यामात्रमपनीतम् उत वषट्कारोपीति । किं चातः । यदि याज्यामात्रपपनीतं यजमानस्यैव वषट्कारो भक्षश्च । अथोभयं ततो होतुरेव भक्षः । किं तावत्प्राप्तम्—

यावदुक्तं होतुर्यजमानयोगाद्वरणवत् ॥२८८॥

होतरेतद्यजेत्यनेन याज्यामात्रमपनीयते न वषट्कारः । कुत एतत् । यजमानयोगाद्वरणवत् । यथा वरणं यजमानयोगि एवं वषट्कारोपि । वषट्कारायैव हि वरणम् । अतो यजमानस्यैव वषट्कारः । तन्निमित्तं च भक्षणम् । अथवा वरणवदिति मतुबयम् । एवं वरणवद्वषट्करणं भवतीति ॥ २८८ ॥

एवं प्राप्त उच्यते—

कारणाद्वा होतृभक्षः ॥ २८९ ॥

वाशब्दः पक्षव्यावृत्तौ । होतुर्वा भक्षो भवति । किं कारणम् । वषट्कारनिमित्तत्वाद्भक्षस्य । होतरेतद्यजेत्यनेन न याज्यामात्रमपनीतम् किं तर्हि वषट्कारोपि । एवमेव हि होत्रा इष्टं भवति । अपि च श्रूयते याज्यायाः अनवानं वषट्करोतीति । तस्मादुभमपनीयते याज्या वषट्कारश्च तन्निमित्तश्च भक्ष इति ॥ २८९ ॥

यतूक्तं वरणवदिति । अत्रोच्यते—

अप्राप्तेर्वरणम् ॥ २९० ॥

वरणं भक्षप्राप्तेर्न निमित्तं भवति । वषट्कारनिमित्तता हि भक्षस्योक्ता । विभक्तिव्यत्ययेन वा सूत्रं व्याख्येयम् । वरणादप्राप्तिर्भक्षस्य ॥ २९० ॥

त्रिपर्यस्य पात्रꣳ होतुर्हि भक्षणम् ॥ २९१ ॥

होतरेतद्यजेत्यनयोर्ग्रहयोः ॥ २९१ ॥

तावद्वा सर्वहुतत्वात्पूर्वेषाम् ॥ २९२ ॥

तावदेव वा भक्षणं भवति यतोन्ये सर्व हुता इति ॥ २९२ ॥

निर्हृत्य पात्रꣳ होतुः पुरस्तात्प्राङास्ते ॥ २९३ ॥

मार्जालीये प्रक्षाल्य पात्रꣳ होतुः पुरस्तात्प्राङुपविशत्यध्वर्युः ॥ २९३ ॥

अभिहुतः शोꣳसावेत्यावृत्योथामोदैवेति प्रतिगृणाति प्रणवावसानयोः ॥ २९४ ॥

शोꣳसावेत्यनेन होत्राहूताध्वर्युरावृत्योथामोदैवेति प्रतिगृणाति ऋचः प्रणवे ऽवसाने च ॥ २९४ ॥

ओमिति वा ॥ २९५ ॥

प्रतिगृणाति ॥ २९५ ॥

शस्त्रान्ते नित्यम् ॥ २९६ ॥

ओमिति प्रतिगरः ॥ २९६ ॥

वागन्तो वा पूर्वः ॥ २९७ ॥

पूर्वः प्रतिगरो वागन्तो वा भवति । वाशब्दो विकल्पार्थः ॥ २९७ ॥

ऐन्द्राग्नमादायाश्राव्याहोक्थशा यज सोमस्येति ॥ २९८ ॥

ऐन्द्राग्नं ग्रहमादायाश्राव्याहोक्थशा यज सोमस्येति प्रेष्यति ॥ २९८ ॥

एष प्रैषः सशस्त्राणाम् ॥ २९९ ॥

ग्रहाणामेष प्रैषो भवति ॥ २९९ ॥

नाराशंसानां च कम्पनं हूयमाने ॥ ३०० ॥

नाराशंसचमसानां च कम्पनं हूयमाने सशस्त्रे ॥ ३०० ॥

निहितेषु चेद्धोमः सशस्त्रस्य ॥ ३०१ ॥

अपरेणोत्तरवेदिं निहिताः निहिता उच्यन्ते । तेषु चेत्सशस्त्रस्यस्य होमः तदाचमसानामपि होमो भवति ॥ ३०१ ॥

भक्षप्रभृत्यानिधानात्कृत्वा वैश्वदेवं गृह्णाति ॥ ३०२ ॥

ऐन्द्राग्नस्य भक्षप्रभृत्यापात्रनिधानात्कृत्वावैश्वदेवं गृह्णाति ॥ ३०२ ॥

शुक्रपात्रेण द्रोणकलशादन्वारब्धे वौमास इति ॥ ३०३ ॥

वैश्वदेवं ग्रहं गृह्णाति द्रोणकलशाच्छुक्रपात्रेणान्वारम्भे कृते वा ओंमास इत्यनेन मन्त्रेण ॥ ३०३ ॥

शुक्रं पूतभृत्यासिच्य द्रोणकशपवित्रयोजनम् ॥ ३०४ ॥

शुक्रस्य पूतभृत्यासेकं कृत्वा द्रोणकलशपवित्रयोः स्वस्थाने योजनं क्रियते ॥ ३०४ ॥

पशुपुरोडाशप्रथमान्त्सवनीयान्निर्वपति पयस्यावर्जम् ॥ ३०५ ॥

देवा मरुत इन्द्रो अस्मानस्मिन् द्वितीये सवने न जह्युरायुष्मन्तः प्रियमेषां वदन्तो वयं देवानाꣳ सुमतौ स्यामेति ॥ ३२० ॥

अनेन मन्त्रेण ॥ ३२० ॥

एकधनार्धं च ॥ ३२१ ॥

चशब्दादनेनैव मन्त्रेणाधवनीय एवासिञ्चति ॥ ३२१ ॥

चरिते सर्वैः प्रशास्तः प्रसुहीति ब्रूयात् ॥ ३२२ ॥

स सर्वैर्ग्रहैश्चरितैः प्रशास्तः प्रसुहीति ब्रूयात् ॥ ३२२ ॥

प्रसृतानाꣳसर्पणम् ॥ ३२३ ॥

प्रसूतानाꣳ सर्पणमिति ॥ ३२३ ॥

इति कर्कोपाध्यायकृतौ कात्यायनसूत्रभाष्ये
नवमोऽध्यायः ।

# दशमोऽध्यायः ।

सर्पणादि माध्यन्दिनम् ॥ १ ॥

सर्पणमादौ कृत्वा माध्यन्दिनꣳ सवनं प्रतिपत्तव्यम् । किमर्थमिदमुच्यते । ये माध्यन्दिनगता विशेषास्तेऽत्र यथा प्रवर्त्तिष्यन्त इति ॥ १ ॥

होतृचमसे वसतीवरीः कृत्वा यजमानाय प्रयच्छत्युष्णीषं ग्रावस्तुते ॥ २ ॥

उष्णीषश्च शिरोवेष्टनार्थं वासोभिधीयते तद्ग्रावस्तुते प्रयच्छति ॥ २ ॥

अद्र्यादानप्रभृतित्रिपर्यायानभिषवान्करोति ॥ ३ ॥

यथा प्रातः सवनेभिहिताः ॥ ३ ॥

अत्र विशेषमाह—

आत्तमभिंमिमीते ॥ ४ ॥

य आत्तो ग्रावा तमभिसोमं मिमीते प्रक्षिपति ॥ ४ ॥

कुत एतत्—

उपाꣳशुसवनस्यानिङ्गनश्रुतेः ॥ ५ ॥

उपाꣳशुसवनोपाꣳशुपात्राणां अनिङ्गनमचालनं श्रूयते । तानि वा अनिङ्गचमानानि शेर आ तृतीयसवनादिति । न चाचाल्यमाने तस्मिन्नधिषवणे सोममानं शक्यते कर्तुमिति ॥ ५ ॥

इहा३ इहा३ इति प्रथमः पर्यायः ॥ ६ ॥

अभिषवस्य ॥ ६ ॥

अविलम्बितो द्वितीयस्तूर्णस्तृतीयः ॥ ७ ॥

अविलम्बितग्रहणाच्च प्रथमो विलम्बितः । स चायं वृत्तिधर्मः । वृत्तिधर्माश्चैते विलम्बितादयः । तथा चाह अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम् । शिष्याणां तु हितार्थाय कुर्याद्वृत्तिं विलम्बितामिति । प्रयोजनमविलम्बिततूर्णयोर्मात्रालोपो न भवति । इहा इहा इति च वीप्सोपदेशात् प्रतिप्रहारमभ्यासः । अत्र च केचिन्मन्त्रान्तरोपदेशात् मा भेरित्यस्याप्रवृत्तिमिच्छन्ति । नेत्युपाध्यायपादाः । येन पूर्वमन्त्रमबाधमानस्यापीहेत्यस्य निवेशो भवत्येव ॥ ७ ॥

अविलम्बितस्थान उत्तमे बृहद्बृहदिति ॥ ८ ॥

उत्तमेऽभिषवे अविलम्बितपर्यायस्य स्थाने बृहद्बृहदिति प्रयोगः शाखान्तरात् ॥ ८ ॥

अर्धं वाविशेषोपदेशात् ॥ ९ ॥

अभिषवार्धं वा बृहद्बृहदित्यनेन कर्तव्यम् । कुत एतदविशेषोपदेशात् । अविशेषेण हि माध्यन्दिनानां पठ्यते इहा३ इहा३ इत्यभिषुणोतीन्द्रमेवैतदाच्यावयति । बृहद्बृहदितीन्द्रमेवैतदाच्यावयतीति । यद्येवमविशेषात् विशेषो बलवानिति विशेषाङ्गीकरणमेव युक्तरूपम् । तस्मादविलम्बितस्थाने उत्तमे बृहद्बृहदित्येवं सिद्धान्तः । अविशेषोपदेशस्तु यथाप्राप्तस्यानुवादकः ॥ ९ ॥

शुक्रप्रभृतिचतुर्णां ग्रहणम् ॥ १० ॥

ग्रहाणाम् ॥ १० ॥

आग्रयणः स्वतृतीयाभ्यो धाराभ्यः ॥ ११ ॥

गृह्णाति । धाराद्वयमस्त्येव आग्रयणं तु प्रतिप्रस्थाता आसिञ्चति ॥ ११ ॥

प्रागुक्थ्यान्मरुत्वतीयमृतुपात्रेणेन्द्रमरुत्वत

इति ॥ १२ ॥

गृह्णाति ॥ १२ ॥

उत्तरमेके ॥ १३ ॥

मरुत्वतीयं गृह्णन्ति । यदा त्वन्तराग्रयणोक्थ्यो षोडशी गृह्यते तदा मरुत्वतीयो मुष्टिग्रहः । धारां हि प्रकृत्योच्यते माध्यन्दिने च पञ्च प्रथमानिति ॥ १३ ॥

समन्वारब्धानिष्क्रमणादि करोत्यग्नीदग्नीनिति प्रैषात् ॥ १४ ॥

प्रातः सवनिकमात्रोपदेशात् अतिदिष्टम ॥ १४ ॥

सदसि पवमानोपाकरणम् ॥ १५ ॥

भवति ॥ १५ ॥

अहर्गणे च सर्वत्र प्रायणीयोदयनीयवर्जम्॥ १६॥

अहर्गणे च सदसि पवमानोपाकरणं भवति । सर्वत्र ग्रहणात् सर्वपवमानेषूपाकरणं सदसि भवति । ततश्च बहिष्पवमानमपि अहर्गणे सदस्येव भवति । प्रायणीयोदयनीयौ वर्जयित्वा ॥ १६ ॥

पशुनेहीत्यपकृष्य दधिघर्माय दध्याहर दक्षिणा उपावर्त्तयेति प्रैषोपचयः ॥ १७ ॥

अग्नीदग्नीनिति प्रैषे पशुनेहीत्येतदपकृष्य दधिघर्माय दध्याहर दक्षिणा उपावर्त्तयेति प्रैषोपचयो भवति ॥ १७ ॥

सप्रवर्ग्ये दधिघर्मः ॥ १८ ॥

ततश्चाप्रवर्ग्ये दधिघर्माय दध्याहरेति न भवति ॥ १८ ॥

उपविश्य सदसः पुरस्तात्सपवित्रायामग्निहोत्रहवण्यां ग्रहणं यथोक्तम् ॥ १९ ॥

सदसः पुरस्तादग्निहोत्रहवण्यां सपवित्रायां दधिघर्मस्य ग्रहणम् । यथोक्तग्रहणं च मन्त्रप्रवृत्त्यर्थम् । अवान्तरसामान्याच्च सपवित्रता शाखापवित्रेण ॥ १९ ॥

होतर्वदस्व यत्ते वाद्यमित्याह वाद्यान्ते श्रातꣳ हविरित्युत्तिष्ठन्नाह ॥ २० ॥

होतुर्यद्वाद्यं तदन्ते श्रातꣳ हविरित्युत्तिष्ठन्नाह ॥ २० ॥

दधिघर्मस्य यजेति प्रेष्यति ॥ २१ ॥

अत्र चोदकपरिप्राप्तेन्द्रं दधि घर्मस्य यजेति प्रैषः ॥ २१ ॥

हुतशेषं घर्मर्त्विजः सयजमानाः समुपहावं भक्षयन्ति यथोक्तम् ॥ २२ ॥

हुतशेषग्रहणाच्च स्रुच्यः शेषः । तथा च श्रूयते अनुवषट्कृत आहरति भक्षमिति । घर्मर्त्विग्ग्रहणं चेतरर्त्विग्व्युदासार्थम् । समुपहवमित्युपहूयोपहूय भक्षणम् । यथोक्तग्रहणं च मन्त्रप्रवृत्त्यर्थम् ॥ २२ ॥

[1]प्राणभक्षं वादीक्षिताः ॥ २३ ॥

कुर्वन्ति । वाशब्दो विकल्पार्थः । दीक्षितास्तु नियोगतः प्रत्यक्षभक्षमिति ॥ २३ ॥

पशुपुरोडाशेन प्रचर्य पुरोडाशादि करोत्याधिष्ण्यनिधानात् ॥ २४ ॥

पशुपुरोडाशेन भागपरिहरणान्तेन प्रचर्य सवनीपुरोडाशादि करोत्या धिष्ण्यनिधानान्तम् । तत्प्रैषे तूक्तो विशेषः ॥ २४ ॥

उन्नीयमानेभ्यश्चानुवाचनभृत्या चमसानि-

---

१ प्राणेन भक्षः प्राणभक्षः, नासिकयाऽवघ्राणमित्यर्थः ।

धानात् ॥ २५ ॥

चशब्दात्करोति ॥ २५ ॥

दशसून्नयति ॥ २६ ॥

चमसेषु ॥ २६ ॥

माध्यन्दिनस्य सवनस्य निष्केवल्यस्य भागस्य शुक्रवतो मधुश्चुत इन्द्राय सोमान्प्रस्थितान्प्रेष्येति ॥ २७ ॥

प्रस्थितप्रैषः ॥ २७ ॥

मन्थीवत इति वा मधुश्चुतस्थाने ॥ २८ ॥

वाशब्दो विकल्पार्थः ॥ २८ ॥

इडां भक्षयित्वा शालाद्वार्ये दाक्षिणहोमः वासःप्रबद्धं हिरण्यं हवन्यामवधाय चतुर्गृहीतमुदुत्यमिति ॥ २९ ॥

शालाद्वार्यग्रहणमाहवनीयव्युदासार्थम् । दक्षिणा सम्बन्धश्च होमो दाक्षिणहोमः । दक्षिणा च क्रतुदक्षिणोच्यते नात्रेयादीनां । उपचारवृत्तो हि तत्र दक्षिणा शब्दः । वाससि बध्वा हिरण्यं हवन्यामवधाय चतुर्गृहीतमुदुत्यमिति जुहोति ॥ २९ ॥

चित्रं देवानामिति द्वितीयाम् ॥ ३० ॥

आहुतिं जुहोति । द्वितीयग्रहणाच्चतुर्गृहीतं सहिरण्यता च प्राप्यते ॥ ३० ॥

आग्नीध्रीयेऽग्ने नयेति ॥ ३१ ॥

जुहोतीत्यनुवर्त्तते । अत्र हिरण्यचतुर्गृहीते न स्तोऽनुपदेशात् ॥ ३१ ॥

अयन्न इत्यपरामश्वं चेद्युक्तं दद्यादयुक्तं वा ॥ ३२ ॥

अथ यद्यश्वं युक्तं वायुक्तं वादास्यन्स्यादथ द्वितीयां जुहुयाद्यद्यु न नाद्रियेतेति वचनात् । यद्यपि दक्षिणायोगेन न युक्तोऽश्वः अथाप्ययुक्तोऽङ्गदक्षिणा भवति तथापि होतव्या । यथा शताश्वरथमध्वर्यवे ददातीति । तत्र चाश्वाहुतेरपकर्षः दास्यन्निति वचनात् । ननु चेह श्रूयते चतस्रो वै दक्षिणा हिरण्यं गौर्वासोऽश्व इत्यश्वनियमार्थश्चेच्छब्दो यद्यर्थः । एवं चेद्विकृत्यर्थो भविष्यति । यथा उल्मुकमुद्धृत्यनुयाजाश्चेदिति ॥ ३२ ॥

वासोहिरण्ये ददाति ॥ ३३ ॥

दक्षिणाम् ॥ ३३ ॥

सहिरण्यो यजमानः शालां पूर्वेण तिष्ठन्नभिमन्त्रयते दक्षिणा बहिर्वेदितिष्ठतीर्दक्षिणतो रूपेण व इति ॥ ३४ ॥

दृष्टार्थत्वात्प्रदेयहिरण्येन यजमानः शालां पूर्वेण तिष्ठन् दक्षिणतो बहिर्वेदितिष्ठतीर्दक्षिणतो रूपेण व इत्यनेन मन्त्रेण । एतच्चाभिमन्त्रणं गवामृतस्य यथा प्रेतेति मन्त्रलिङ्गात् । अयं च मन्त्रश्चोदितार्थाभिधायी ॥ ३४ ॥

गवां शतं द्वादशं वातिक्रामति ॥ ३५ ॥

तां शतेनैव दक्षयतीति वचनात् । द्वादशं तु शाखान्तरात् ॥ ३५ ॥

मन्थौदनतिलमाषाश्च ॥ ३६ ॥

चशब्दाद्गृह्यन्ते । एते च पुरुषसंस्कारार्थाः न दीक्षणेति सम्प्रदायः । तथा च श्रूयते चतस्रो वै दक्षिणा हिरण्यं गौर्वासोऽश्व इति । दानं त्वेषां पुरुषसंस्काराय न दक्षिण्याय । मन्थौदनादिसंस्कृताः पुरुषाः कर्मानुष्ठास्यन्तीति । प्रयोजनं सत्त्रेषु प्रवर्त्तन्ते । एतेषामपि दक्षिणासम्बन्ध इत्यपरे ॥ ३६ ॥

अन्तरा शालासदसी दक्षिणेनाग्नीध्रं तीर्थेन ॥ ३७ ॥

गवादीनामतिक्रमणम् ॥ ३७ ॥

सुब्रह्मण्यां च प्रेष्यति वा ॥ ३८ ॥

न वेति विकल्पः ॥ ३८ ॥

आग्नीध्रादनु गच्छति सुन्वन् ॥ ३९ ॥

आग्नीध्रं यावद्यजमान अनुगच्छति गवादीन् ॥ ३९ ॥

प्रागनुवाचनाच्च ॥ ४० ॥

इन्द्राय मरुत्वतेनुब्रूहीत्यतः प्राक्सुन्वन्नेव प्रत्येतव्यः ॥ ४० ॥

सदो गच्छति त्रि स्वरिति ॥ ४१ ॥

प्रेक्षते यतस्व सदस्यैरिति सदस्यान् ॥ ४२ ॥

ब्राह्मणमद्येत्याग्नीध्रगमनम् ॥ ४३ ॥

तच्च दक्षिणादानायाऽतश्च सत्त्रे न भवति । सदो गमनं तु भवत्येव ॥ ४३ ॥

उपविश्य हिरण्यमस्मै ददात्यस्मद्राता इति ॥ ४४ ॥

उपविश्याग्नीध्रे हिरण्यमस्मै ददात्यस्माद्राता इत्यनेन मन्त्रेण । हिरण्यग्रहणं च दक्षिणाद्रव्योपलक्षणार्थम् । एवं हि श्रूयते तद्यदग्नीध्रे प्रथमाय दक्षिणां नयन्तीति । समस्तानां च दक्षिणात्वं न हि-

रययस्यैवेति ॥ ४४ ॥

आत्रेयाय चाग्नीध्रवत्सदसः पुरस्तादुपविष्टाय क आत्रेयं क आत्रेयमिति त्रिरुक्त्वा सकृच्छेषमहालेयमवालेयमकौद्रेयमशौभ्रेयमवामरथ्यमगौपवनमिति ॥ ४५ ॥

चशब्दादात्रेयाय च सदसः पुरस्तादुपविष्टाय हिरण्यं ददाति। आग्नीध्रवदिति मन्त्रो लभ्यते। इयांस्तु विशेषः। क आत्रेयं क आत्रेयमित्युक्त्वा ततो ददाति ॥ ४५ ॥

ऋत्विग्भ्यो दक्षिणां ददाति ॥ ४६ ॥

ऋत्विग्ग्रहणं चमसाध्वर्युव्युदासार्थम् ॥ ४६ ॥

पृथक् शतानि पुरुषभेदात् ॥ ४७ ॥

प्रत्यृत्विजꣳ शतꣳ शतं देयम्। कुत एतत्। ऋत्विग्भेदात् ॥ ४७ ॥

प्रतिविभागो वा कर्मप्राधान्यात् ॥ ४८ ॥

प्रतिविभागेन वा दानम्। कुत एतत्। कर्मप्राधान्यात्। कर्मप्रधाना हि दक्षिणा न सम्प्रदानप्रधाना, अतश्च प्रतिविभाग इति ॥ ४८ ॥

यथारम्भं द्वादशद्वादशाद्येभ्यः षट् द्वितीयेभ्यश्चस्रस्तृतीयेभ्यस्तिस्र इतरेभ्यः ॥ ४९ ॥

ऋत्विजः प्रकृत्यैव हि श्रूयते। अर्धिनस्तृतीयिनः पादिन इति। यथारम्भमिति ब्रह्मादिभ्यो वक्ष्यमाणक्रमेण ॥ ४९ ॥

ब्रह्मोद्गातृहोतृभ्यः ॥ ५० ॥

अध्वर्युभ्यां च ॥ ५१ ॥

हविर्धान उपविष्टाभ्यां ददाति ॥ ५२ ॥

अग्नये त्वेति हिरण्यं प्रतिगृह्णीतः ॥ ५३ ॥

द्विवचनोपदेशात् अध्वर्युप्रतिप्रस्थातारौ ॥ ५३ ॥

रुद्राय त्वेति गां बृहस्पतये त्वेति वासो यमाय त्वेत्यश्वम् ॥ ५४ ॥

प्रतिगृह्णीत इत्यनुवर्त्तते ॥ ५४ ॥

कोदादित्यन्यत् ॥ ५५ ॥

प्रतिगृह्णीतः । अन्यच्च दक्षिणाद्रव्यव्यतिरिक्तम् । एवं हि श्रूयते अथ यदन्यद्ददाति कामेनैव तद्ददातीदं मय्यमुत्रासदिति तस्मात्कोदादिति ॥ ५५ ॥

इच्छतो मन्त्रवचनम् ॥ ५६ ॥

प्रतिग्रहमन्त्रवचनमिच्छया ॥ ५६ ॥

प्रत्येत्य प्रस्तोतृप्रशास्तृब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकोन्नेतृग्रावस्तुत्सुब्रह्मण्येभ्यः ॥ ५७ ॥

हविर्धानात्प्रत्येत्य सदसि व्यवस्थितेभ्यो ददाति ॥ ५७ ॥

प्रसृप्तेभ्यश्चान्यत् ॥ ५८ ॥

प्रासर्पकेभ्यश्चान्यद्ददाति ॥ ५८ ॥

कण्वकश्यपयाचमानवर्जम् ॥ ५९ ॥

कण्वकश्यपौ गोत्रतः । याचमानः प्रार्थयिता । एतेभ्यो न देयम् ॥ ५९ ॥

ज्ञातये चाश्रोत्रियाय ॥ ६० ॥

न देयम् । श्रोत्रियाय तु ज्ञातयेपि दीयत एव ॥ ६० ॥

न रजतं दद्याद्बर्हिषि पुरास्य संवत्सराद्गृहे रुदन्तीति श्रुतेः ॥ ६१ ॥

बर्हिःशब्देन कर्मोपलक्ष्यते । तत्र रजतं न देयम् निन्दार्थवादात् ॥ ६१ ॥

पत्नी च ददाति ॥ ६२ ॥

दीयमानमनुजानाति । द्रव्यासाधारण्यात् ॥ ६२ ॥

सर्वेभ्यो दत्वा प्रतिहर्त्रे पश्चात् ॥ ६३ ॥

सर्वेभ्यः प्रतिषिद्धेभ्य इति केचित् । तन्न, प्रतिषेधवैयर्थ्यप्रसङ्गात् । तस्मात्सर्वेभ्यो येभ्य एव दानमप्रतिषिद्धमिति । पश्चात्प्रतिहर्त्रे ददाति । प्रतिहर्त्रे उत्तमाय ददातीति वचनात् ॥ ६३ ॥

इन्द्राय मरुत्वते ऽनु वाचयति ॥ ६४ ॥

अथाहेन्द्राय मरुत्वते ऽनु ब्रूहीति इति वचनात् ॥ ६४ ॥

अदानमतः ॥ ६५ ॥

अतः परमदानम् । पूर्वं तु यावदिच्छं दानम् ॥ ६५ ॥

ऋतुपात्रेण मरुत्वतीयग्रहणमुपयामगृहीतोसि मरुत्वतां त्वौजस इति ॥ ६६ ॥

अनेन मन्त्रेण ॥ ६६ ॥

अध्वर्युमनु जुहोति ॥ ६७ ॥

एनं ग्रहं प्रतिप्रस्थाता ॥ ६७ ॥

सशस्त्रे त्वानुपूर्व्ययोगात् ॥ ६८ ॥

तु शब्दः पक्षव्यावृत्तौ । सशस्त्रे मरुत्वतीये ऽध्वर्युमनु हूयते

न प्रथमे, एवं मन्त्राणामानुपूर्व्ययोगः कृतो भवति ॥ ६८ ॥

तृतीयश्रुतेश्च ॥ ६९ ॥

तेभ्य एतं तृतीयं ग्रहमगृह्णीतुपयामगृहीतोसि मरुत्वतां त्वौजस इति । पूर्वं तु मुख्यत्वादध्यवसितं तच्चोक्तेन न्यायेनानुपपन्नमिति ॥ ६९ ॥

वशिना मरुत्वतीयग्रहणं मरुत्वन्तमिति ॥ ७० ॥

वशिना रिक्तेन पात्रेण मरुत्वतीयं गृह्णाति मरुत्वन्तमित्यनेन मन्त्रेण । तच्च ऋतुपात्रेण मरुत्वतीयं गृह्णातीति वचनात् ॥ ७० ॥

निर्हृते पात्रे होता शंसति ॥ ७१ ॥

पूर्वमरुत्वतीयस्य भक्षोत्तरकालं पात्रनिर्हरणे कृत इत्यर्थः । होता शंसतीति यदुक्तं भवति । होतुः पुरस्तात्प्राङ्ङास्त इति । गतस्तोत्रो ह्ययं माध्यन्दिनेन पवमानेन ॥ ७१ ॥

जनिष्ठा उग्र इत्येतस्यां मदामोदैवेति प्रतिगरः सकृत् ॥ ७२ ॥

जनिष्ठा उग्र इत्यस्यामृचि पादशः शस्यमानायां यत्र क्वचन प्रदेशे मदामादवेति सकृत्प्रतिगरः ॥ ७२ ॥

तत्स्थाने विकृतौ ॥ ७३ ॥

तस्याः स्थाने विकृतौ या भविष्यति तस्यामपि मदामोदैवेति सकृत्प्रतिगरः ॥ ७३ ॥

आ निधानात्कृत्वा माहेन्द्रं गृह्णाति वैश्वदेववन्महां इन्द्र इति ॥ ७४ ॥

महामरुत्वतीयस्या पात्रनिधानात्कृत्वा माहेन्द्रं गृह्णाति वैश्वदेववदिति यदुक्तं भवति । शुक्रपात्रेणा द्रोणकलशादन्वारब्धे चेति

च। महाँ इन्द्र इत्यनेन मन्त्रेण ॥ ७४ ॥

शुक्रं पूतभृत्यासिच्य पृष्ठमुपाकृत्य प्रेष्यत्य-भिषोतारोभिषुणुतौलूखलानुद्वादयताग्नीदा-शिरं विनय सौम्यस्य वित्तादिति ॥ ७५ ॥

पूतभृति शुक्रासेकं कृत्वा पृष्ठस्तोत्रमुपाकृत्य प्रेष्यत्यभिषोतारो ऽभिषुणुतेति। चत्वारः प्रैषार्थाः ॥ ७५ ॥

ऋजीषमिश्रमꣳशुमभिषुण्वन्ति यथाकथाचा नुदकम् ॥ ७६ ॥

उदकस्यानाम्नानात् ॥ ७६ ॥

आधवनीये करोति ॥ ७७ ॥

तत एव हि पावनं श्रूयत इति ॥ ७७ ॥

त्रिपर्यायान्वाभिषवोपदेशात् ॥ ७८ ॥

वाशब्दः पक्षव्यावृत्तौ। त्रिपर्यायान्वाभिषवान्करोति न यथा कथा च। अभिषोतारो ऽभिषुणुतेति ह्यभिषवोपदेशो भवति। स च यथा भूतो दृष्टस्तथा भूत एव कर्त्तव्य इति। उदकस्य त्वनाम्नानात्वादेवाभावः ॥ ७८ ॥

मानाभिमर्शनवर्जं कृतत्वात् ॥ ७९ ॥

मानाभिमर्शने तु कृतत्वादेव न क्रियेते ॥ ७९ ॥

पूतभृतिपावनꣳ शुक्राभावात् ॥ ८० ॥

सोमस्य पावनं पूतभृति कर्त्तव्यम्। न ह्यत्र शुक्रो विद्यते। अथैतन्निर्द्धीतं शुक्रं यत्तृतीयसवनमिति ॥ ८० ॥

स्तूयमाने कुम्भे चर्जीषस्यावधानम् ॥ ८१ ॥

चशब्दात्पूतभृति च पावनम् ॥ ८१ ॥

सवनीया अपयस्याः ॥ ८२ ॥

प्रातः सवन एवैषामैत्रावरुणीपयस्यावक्लृप्ता भवति नेतरयोः सवनयोरिति ॥ ८२ ॥

सौम्यश्चरुर्वारुणश्चैककपालोऽधिकौ ॥ ८३ ॥

अधिकग्रहणात्सवनीयैः सहत्वं गम्यते । ततश्चाग्नीध एव कर्तृत्वम् ॥ ८३ ॥

आ पात्रप्रक्षालनात्कृत्वोक्थ्यं विगृह्णाति पूर्ववदिन्द्राय त्वेति सर्वेभ्यः ॥ ८४ ॥

माहेन्द्रस्तोत्रादिपात्रप्रक्षालनान्तं कृत्वोक्थ्यं विगृह्णाति । पूर्ववदिति त्रेधम् । इन्द्रायत्वेति सर्वेभ्यः । इन्द्राय त्वेन्द्राय त्वेत्येष माध्यन्दिने सवन ऐन्द्रꣳ हि माध्यन्दिनꣳ सवनमिति ॥ ८४ ॥

वसतीवरीश्चासिञ्चतीदं तृतीयꣳ सवनं कवीनामृते न ये चमसमैरयन्त ते सौधन्वनाः स्वरानशानाः स्विष्टिं नोभि वसीयो नयन्त्विति ॥ ८५ ॥

अनेन मन्त्रेण । चशब्दात्प्रागच्छावाकविग्रहात् ॥ ८५ ॥

एकधनशेषं च ॥ ८६ ॥

चशब्दादनेनैव मन्त्रेणासिञ्चति ॥ ८६ ॥

प्रसूतान्तं भवति ॥ ८७ ॥

सर्पणस्योत्तरत्राभिधानात् ॥ ८७ ॥

एहि यजमानेत्याह हविर्धानं प्रविशन्त्यध्वर्यु-

यजमानप्रतिप्रस्थात्रग्नीदुन्नेतारः ॥ ८८ ॥

वचनसामर्थ्यात् । ते सम्प्रापद्यन्ते ऽध्वर्युश्च यजमानश्चेत्ये-वमादि ८८ ॥

पत्नी चापरेण ॥ ८९ ॥

द्वारेण । चशब्दात्प्रविशति ॥ ८९ ॥

अपिहितद्वार आदित्यम्पात्रमादाय स॒ꣳ-स्रवांश्चोपरिपूतभृतस्तत आदित्यग्रहं गृह्णाति स॒ꣳस्रवेभ्यः कदा चनेति ॥ ९० ॥

अपिहितद्वारे हविर्धाने आदित्यपात्रं गृहीत्वा संस्रवांश्च ये आदित्यस्थाल्यामासिक्ताः उपरि पूतभृतः संस्रवेभ्य आदित्य-ग्रहं गृह्णाति कदा चनेत्यनेन मन्त्रेण । अपगृह्य पुनः कदा चनेति द्वितीयग्रहणम् ॥ ९० ॥

दध्ना श्रीणात्येनं पश्चिमेन्ते मध्ये वा यज्ञो देवा-नामिति ॥ ९१ ॥

एनं आदित्यग्रहं दध्ना श्रीणाति मध्ये पश्चिमे वान्ते यज्ञो देवानामित्यनेन मन्त्रेण ॥ ९१ ॥

उपा॒ꣳशुसवनेन मिश्रयति विवस्वन्नादित्येति॥ ९२॥

उपांशुसवनेन मिश्रयति ग्रहं विवस्वन्नादित्येति ॥ ९२ ॥

उपा॒ꣳशुसवनमुन्नेत्रे प्रयच्छत्यासृजग्राव्ण इति चाह ॥ ९३ ॥

चशब्दात्प्रयच्छन्नासृज ग्राव्ण इत्याह ॥ ९३ ॥

आधवनीये चमसे वा सोमवति ग्राव्णो-
वधाय स्थाने निदधाति ॥ ९४ ॥

तानाधवनीये वा सृजति चमसे वा राजानमुन्नीयेति वचना-
त् । तत्स्थानं चाधिषवणग्रोरुपरि ॥ ९४ ॥

अपावृतद्वारे निष्क्रामतो ग्रहमपिधाय पाणि-
ना स्थाल्या वा ॥ ९५ ॥

अर्थप्राप्तत्वादपावरणमवाच्यमिति चेत् । वाच्यं च द्वयोरपि
यथा स्यात् । अथ प्राप्त्या ह्येकस्यापावरणं निष्क्रामत इति वचनो
पदेशात् । प्रतिप्रस्थाता द्वितीयः ॥ ९५ ॥

अन्वारब्ध आदित्येभ्योऽनु ब्रूहीत्याह
प्रैषानुवाचनयोरन्यतरस्मिन्नाह प्रियेभ्यः
प्रियधामभ्यः प्रियव्रतेभ्यो मह स्वसरस्य
पतिभ्य उरोरन्तरिक्षस्याध्यक्षेभ्य इति ॥ ९६ ॥

अथाहादित्येभ्योऽनु ब्रूहीत्यत्र सम्पश्येद्यदि कामयेताश्राव्यत्वे-
व सम्पश्येदादित्येभ्यः प्रेष्येत्येव मादि । अत्र केचित् ब्रूहीति प्रेष्येति
च क्रियापदयोरनन्तरमेव विशेषणपदोच्चारणं कुर्वन्ति । एवमेव
हि ब्राह्मणपाठः आदित्येभ्यः प्रेष्यति प्रियेभ्यः प्रियधामभ्य इति ।
नैतदेवमिति सम्प्रदायः । येन प्रियेभ्यः प्रियधामभ्यः प्रियव्रतेभ्य
इत्येवमादीनि देवताविशेषणानि । विशिष्टदेवतापदोत्तरकालं चानु
ब्रूहि प्रेष्येति च युक्तम् । इन्द्राय मरुत्वते ऽनु ब्रूहीति यथा, यथा च
देवाय सवित्रेऽनु ब्रूहीति । तस्मादुत्तरकालीनमेव क्रियापदमिति ।
यस्तु ब्राह्मणपाठः स विशेषेण पदविधानार्थो न क्रमार्थः ॥ ९६ ॥

हुत्वा प्रतिप्रस्थात्रे प्रयच्छति शेषौ ॥ ९७ ॥

ग्रहशेषं स्थालीशेषं च । अत एव स्थालीतः स शेषग्रहणं स-

शेषश्च ग्रहहोमः ॥ ९७ ॥

अत्र सर्पणमादित्यग्रहस्य प्राक्तृतीयसवनश्रुतेः ॥ ९८ ॥

अस्मिन्नवसरे सर्पणं भवति । तस्मादादित्यग्रहः प्राक्तृतीयसवनात् श्रूयते संस्थित एव माध्यन्दिने सवने पुरातृतीयसवनादेतमजुहवुरिति । सर्पणं च तृतीयसवनादि । ततोपि पुरास्य होमः । पुराशब्दश्चात्र प्राथम्यवाची माध्यन्दिनसवनस्य संस्थाश्रुतेः। संस्थित एव माध्यन्दिने सवन इति । न चान्यत्सवनान्तरमस्ति । तस्मात्पुरा तृतीयसवनात् प्रथमं तृतीयसवनादिति द्रष्टव्यम् । यच्च तुरीयादित्यसवनमिति तत्प्राक् सर्पणात् क्रियमाणस्योपचारवृत्त्या द्रष्टव्यम् । प्रयोजनं तृतीयसवनधर्म एवास्येति ॥ ९८ ॥

आग्रयणमादायासिञ्चति पवित्रेधिपूतभृतम्॥९९॥

आग्रयणं गृहीत्वा पूतभृत उपरिष्टात् पवित्र आसिञ्चति नेष्टा ॥ ९९ ॥

प्रतिप्रस्थाता च संस्रवौ ॥ १०० ॥

चशब्दादासिञ्चति ॥ १०० ॥

आधवनीयादुन्नेतोदञ्चनेन चमसेन वा ॥ १०१॥

आसिञ्चति । ततो धाराचतुष्टयम् ॥ १०१ ॥

तत आग्रयणं गृह्णाति ॥ १०२ ॥

तं चतसृणां धाराणामाग्रयणं गृह्णातीति वचनात् ॥ १०२ ॥

उक्थ्यं चोत्तरेष्वेकया ॥ १०३ ॥

चशब्दादुक्थ्यं च गृह्णात्युत्तरेषु संस्थाविशेषेषु एकया धारया । सा चाधवनीयादुन्नेतृकर्तृका । निष्ठितत्वादितरासां धाराणाम् ॥ १०३ ॥

पूतभृत्या शिरमासिञ्चत्याशीर्म ऊर्जमुत सुप्रजास्त्वमिषं दधातु द्रविण; सुवर्चसम् सञ्जयन् क्षेत्राणि सहसाहमिन्द्र कृण्वानो ऽन्यानधरान्त्सपत्नानिति ॥ १०४ ॥

दधि विनीतं यत्तदा शिरम् ॥ १०४ ॥

अदस्मै नर इत्येनमवेक्षते पत्नी ॥ १०५ ॥

पूतभृतम् ॥ १०५ ॥

समन्वारब्धनिष्क्रमणादि करोति माध्यन्दिनवत् ॥ १०६ ॥

इयांस्तु विशेषः । प्रतिप्रस्थातः ॥ १०६ ॥

पशौ संवदस्वेत्युपचयस्थाने ॥ १०७ ॥

प्रातः सवनप्रभृत्या संवादाच्छ्रुतेः ॥ १०८ ॥

श्रुतिग्रहणात्प्रतिज्ञोत्प्रेक्ष्यते । स प्रातः सवन आलब्ध आ तृतीयसवनात् श्रप्यमाण उपशेत इति ॥ १०८ ॥

शमित्रनुशासनप्रभृतीडान्तं कृत्वा पुरोडाशादि चेडाभक्षात् ॥ १०९ ॥

शमित्रानुशासनं त्रिः प्रच्यावयतादित्येकम् । यत्वा पृच्छादिति द्वितीयम् । तत्प्रथममर्थात्प्रातः सवन एव गतम् । इह तु द्वितीयशामित्रनुशासनप्रभृति द्रष्टव्यम् । शमित्रानुशासनप्रभृतिपश्विडान्तं कृत्वा चशब्दात्पुरोडाशादि करोति आ इडाभक्षात् ॥ १०९ ॥

अत्रविशेषः—

चमसैरेव ॥ ११० ॥

अतिदेशसूत्रेण पुरोडाशादि सर्वं प्राप्तम्। तत्र शुक्रामन्थिप्रचारनिवृत्त्यर्थः चमसैरेवेत्येवकारकरणम् ॥ ११० ॥

होतृचमसं गृहीत्वाश्राव्याह तृतीयस्य सवनस्य ऋभुमतो विभुमतो वाजमतो बृहस्पतिमतो विश्वदेव्यावतस्तीव्रां३ आशीर्वत इन्द्राय सोमान्प्रस्थितान्प्रेष्येत्याशीर्वत इति शुक्रस्थाने ॥ १११ ॥

यत्र शुक्रस्याभ्युन्नयध्वमिति तत्राशीर्वतोऽभ्युन्नयध्वमिति प्रयोगः ॥ १११ ॥

प्रागिडाभक्षाद्धविर्धाने यथास्वं चमसेषूपास्यन्ति पुरोडाशमात्रा अनुदकाः पिण्डपितृयज्ञवद्दानप्रभृतिप्रागवघ्राणात् ॥ ११२ ॥

इडाभक्षात् पूर्वं हविर्धाने यथास्वं चमसेषु पुरोडाशपात्रानुपक्षिपन्ति उदकवर्जं पिण्डपितृयज्ञवत् प्रागवघ्राणात् ॥ ११२ ॥

पितृशब्दस्य सम्बन्धिशब्दत्वात् स्वपितृभ्यो दानप्राप्तौ इदमाह—

यजमानपितृभ्यो वा तस्य फलाधिकारात् ॥ ११३ ॥

वाशब्दः पक्ष व्यावृत्तौ। यजमानपितृभ्य एव दद्युर्न स्वपितृभ्यः। तदीयं च द्रव्यमत्र त्यज्यते यागावशिष्टं अतस्तत्पितृभ्य एव प्राप्नोति। येषां चर्त्विजां चमसा न विद्यन्ते। यथासन्नचमसेषु दद्युर्यथा नेष्टृचमसेऽध्वर्यव[1] इति ॥ ११३ ॥

भक्षयित्वेडामुपांश्वन्तर्यामपात्रयोरन्यतरेण

[1] अध्वर्यवश्चमसाध्वर्यव इत्यर्थः।

सावित्रग्रहणं वाममद्येति काले पात्नीव्रतमितरेण ॥ ११४ ॥

एवमेव हि श्रूयते । पात्नीवतं प्रकृत्य यदि सावित्रमुपांशुपात्रेण गृह्णीयादन्तर्यामपात्रेणैतं यदि सावित्रमन्तर्यामपात्रेण गृह्णीयादुपांशुपात्रेणैतमिति ॥ ११४ ॥

देवाय सवित्रे ऽनुवाचयति ॥ ११५ ॥

अथाह देवाय सवित्रे ऽनुब्रूहीति वचनात् ॥ ११५ ॥

अभक्षितेन महावैश्वदेवग्रहणमुपयामगृहीतोसि सुशर्मासीति ॥ ११६ ॥

अभक्षितेनेति । तेनैव पात्रेण भक्षश्चात्र न भवति अभक्षितेनेति तत्प्रतिषेधात् ॥ ११६ ॥

होताशंसति ॥ ११७ ॥

किमर्थमिदमुच्यते होतुः पुरस्तात्प्राङ्ङास्त इति यदुक्तं भवति गतस्तोत्रोयमिति च ज्ञापनाय ॥ ११७ ॥

एकया च दशभिश्चेति शस्यमाने द्विदेवत्यानि प्रतिप्रस्थाता प्रक्षाल्य खरे निदधाति॥ ११८॥

एकया च दशभिश्चेत्यस्मिन्मन्त्रवाक्ये शस्यमाने द्विदेवत्यपात्राणि प्रतिप्रस्थाता प्रक्षाल्य खरे निदधाति ॥ ११८ ॥

प्रद्यावा यज्ञैरित्येतासु मदामोदैवेति त्रिः प्रतिगरः ॥ ११९ ॥

प्रद्यावा यज्ञैरित्येतासु यत्र क्वचन प्रदेशे शस्यमानासु मदामोदैवेत्यव्यवहितः त्रिः प्रतिगरो भवति । अव्यवहिते संख्या प्रवर्त्तते ॥ ११९ ॥

१स्वादुष्किलीयासु चेच्छन् ॥ १२० ॥

त्रिः प्रतिगृणाति ॥ १२० ॥

आ पात्रप्रक्षालनात्कृत्वा सौम्येन चरति ॥१२१॥

महावैश्वदेवस्य आ पात्रप्रक्षालनान्तं कृत्वा सौम्येन चरुणा प्रचरति ॥ १२१ ॥

आज्येनोभयतः परियजति ॥ १२२ ॥

अधस्ताच्चोपरिष्टाच्च ॥ १२२ ॥

अन्यतरतो वा ॥ १२३ ॥

वेति विकल्पः ॥ १२३ ॥

घृतस्य यजेत्याह घृतशब्दउपांशु॥ १२४ ॥

वचनादुपांशुद्रव्योच्चारणम् मन्त्रलिङ्गाच्चाग्नेर्देवतात्वम् घृताहवनो घृतपृष्ठो अग्निरिति । तस्य चोपांशुयाजविधयन्तेभोपांशुत्वम् ॥ १२४ ॥

सौम्यस्य यजेति सौम्येन चरन् ॥ १२५ ॥

वचनाद्द्रव्योच्चारणम् । देवतापदोच्चारणं तु चोदकेनैव । उपरिष्टादपि च वैष्णवो घृतयागः । मन्त्रलिङ्गादवोरु विष्णोविक्रमस्वेति । अन्यतरश्चेति घृतयागो मन्त्रलिङ्गादेवाग्नावैष्णवो भवति॥१२५॥

यावदुक्तं सौम्यस्य पुनर्ग्रहणात् ॥ १२६ ॥

सौम्यचरोर्यावदुक्तं भवति । शेषकार्याण्यपि न प्रवर्त्तन्ते । पुनर्ग्रहणं हि भवति । स आज्यस्योपस्तीर्य द्विश्चरोरवद्यत्यथोपरिष्टादाज्यस्याभिघारयत्याश्राव्याह सौम्यस्य यजेति वषट्कृते जुहोतीति । एवं च व्यूहने वचनात् सोमस्योच्चारणम् ॥ १२६ ॥

---

१ आग्निमारुतशस्त्रमध्ये स्वादुष्किलीयानामिकाः काचनऋचः तास्वित्यर्थः ।

आज्यमासिच्योद्गात्रे सौम्यं प्रयच्छति चतुर्गृहीतं प्रचरण्याधिष्ण्येषु जुहोति यथान्युप्तं प्रभावयञ्छालाकान्प्रदीप्य प्रदीप्य विभूरसीति प्रतिमन्त्रम् ॥ १२७ ॥

चतुर्गृहीतं प्रचरण्या धिष्ण्येषु जुहुयात् येन क्रमेण न्युप्ताः प्रभावयं जुहोति न पुनर्गृह्णाति शालाकान्प्रदीप्य धिष्ण्येषु जुहोति विभूरसीत्येभिर्मन्त्रैः प्रतिमन्त्रम् । त्रिभिः शलाकाभिः शालाको भवेति । ते च प्रतिधिष्ण्यं त्रयस्त्रयो भवन्ति ॥ १२७ ॥

आग्नीध्रीये पुनः पश्चादिच्छन् ॥ १२८ ॥

जुहोति । तच्च तूष्णीं काण्वशाखापाठात् ॥ १२८ ॥

उपयामगृहीतोसि बृहस्पतिसुतस्येति प्रतिप्रस्थाता पात्नीवतं गृह्णाति ॥ १२९ ॥

उपयामगृहीतोसि बृहस्पतिसुतस्येत्यनेन मन्त्रेण प्रतिप्रस्थाता पात्नीवतं गृह्णाति ॥ १२९ ॥

प्रचरणीशेषेण श्रीणात्येनमहं परस्तादिति ॥ १३० ॥

अथ यः प्रचरण्यां संस्रवः परिशिष्टो भवति तेनैनं श्रीणातीति ॥ १३० ॥

अग्नीत्पात्नीवतस्य यजेत्याह ॥ १३१ ॥

एतावानेव प्रैष इति सम्प्रदायः ॥ १३१ ॥

अग्ना ३ इ पत्नीवन्नित्युत्तरार्धे जुहोति ॥ १३२ ॥

आहवनीयस्य ॥ १३२ ॥

प्रेष्यति चाग्नीन्नेष्टुरुपस्थमासीद नेष्टः पत्नी-

मुदानयोद्गात्रा संख्यापयोन्नेतर्होतुश्चमसमनू-
न्नय सोमं मातिरीरिच इति ॥ १३३ ॥

प्रेष्यति चेति चशब्दादग्नीध्रे भक्षमाहृत्योपहवप्रत्युपहवौ करोति ततः प्रेष्यति । एवं हि श्रूयते आहरत्यध्वर्युरग्नीधे भक्षꣳ स आहाध्वर्य उपमाह्वयस्वेति तन्न प्रत्युपह्वयेत को हि ह तस्य निरष्टस्य प्रत्युपहवस्तं वै प्रत्येवोपह्वयेत जुह्वत्यस्याग्नौ वषट्कुर्वन्ति तस्मात्प्रत्येवोपह्वयेताथ सम्प्रेष्यति तं होतुश्चमसमनून्नयेति। होतृचमसग्रहणं सर्वचमसोपलक्षणार्थम । सोमं मातिरीरिच इत्यतिरेकप्रतिषेधार्थम ॥ १३३ ॥

प्रभात्रयेत्युक्थ्यादिषु ॥ १३४ ॥

प्रैषः तत्र हि सोमेनार्थः ॥ १३४ ॥

आग्नीध्रे भक्षणं वषट्कारोपह्वानाभ्याम् ॥ १३५ ॥

आग्नीध्रे पात्नीवतस्य भक्षणम । तत्र ह्येतेन हि वषट्कारः कृतः उपहवप्रत्युपहवौ च ॥ १३५ ॥

सपात्र आसीदति नेष्टुरुपस्थम् ॥ १३६ ॥

सह पात्रेणाग्नीन्नेष्टुरुपस्थमासीदति स बिभ्रदेवैतत्पात्रमग्नीन्नेष्टुरुपस्थमासीदेति वचनात ॥ १३६ ॥

अत्र वा भक्षणं पात्रहरणसामर्थ्यात् ॥ १३७ ॥

अत्र वा भक्षणम्भवति यत्र नेष्टोपविष्टः । कुत एतत । पात्रहरणं ह्येवमर्थवद्भवति । इतरथादृष्टार्थता स्यात । न च दृष्टेसत्यदृष्टार्थता युक्ता ॥ १३७ ॥

अग्नीत्प्रक्षाल्य पात्रं खरे करोति ॥ १३८ ॥

पात्नीवतसम्बन्धि ॥ १३८ ॥

यज्ञायज्ञियं स्तोत्रमुपाकरोति होतृचमस-
मुपस्पृश्य ॥ १३९ ॥

होतृचमसोपस्पर्शनं शाखान्तरात् ॥ १३९ ॥

प्रोर्णुते चेच्छन्नुद्गातृवत् ॥ १४० ॥

लोकवत्सकर्णकं उद्गातृवदकर्णकम् ॥ १४० ॥

पत्नीं सदः प्रवेश्यापरेणोत्तरत उपविष्टा-
मुद्गात्रा समीक्षयति प्रजापतिर्वृषासीति ॥ १४१॥

नेष्टा पत्नीं सदः प्रवेश्य अपरेण द्वारेण उद्गातृणामुत्तरत उपविष्टामुद्गात्रा सह समीक्षणं कारयति । कारिते चाध्येषणा। पन्युद्गातारमीक्षस्वेति । प्रजापतिर्वृषासीत्यनेन मन्त्रेण समीक्षते पत्नी ॥ १४१ ॥

पान्नेजनीभिरभिषिञ्चति विवृत्य दक्षिणो-
रुम् ॥ १४२ ॥

विपरावृत्य दक्षिणमूरुं पान्नेजनीभिरभिषिञ्चति पत्नी । अत्र छान्दोग्ये वचनं प्रतिहिङ्कारमीक्षणम् प्रतिनिधनं चोर्वासेकः ॥१४२॥

उद्गात्रानुज्ञाता गच्छति ईक्षिता वा त्रिः ॥१४३॥

पत्नी । त्रिः उद्गात्रेक्षणोर्वासेकौ भवतः ॥ १४३ ॥

एवान इन्द्रो मघवेति शस्यमाने ध्रुवं हो-
तृचमसेऽवनयति ध्रुवं ध्रुवेणेति ॥ १४४ ॥

एवान इत्यस्मिन्मन्त्रवाक्ये शस्यमाने ध्रुवं होतृचमसेऽवनयति ध्रुवं ध्रुवेणेत्यनेन मन्त्रेण ॥ १४४ ॥

अवनयामि-स्थाने गृह्णामीति वा ॥ १४५ ॥

अवनयामीत्यस्य स्थाने गृह्णामीति वाक्यशेषः ॥ १४५ ॥

वैश्वानरं यजमानस्य गृहीतश्चेत् ॥ १४६ ॥

गृहीतश्चेद्वैश्वानरो यजमानचमसेऽवनयेत् ॥ १४६ ॥

पात्रप्रक्षालनान्तेऽनुयाजाः समिदादि ॥ १४७ ॥

आग्निमारुतादूर्ध्वमनुयाजैश्चरन्तीति वचनात् । समिदादीनि च समिद्ग्रहणस्य यदादौ तदादि उल्मुकसमासादीत्यर्थः। अनुयाजार्थो ह्युल्मुकसमास इति ॥ १४७ ॥

उक्थ्यविग्रहणमुत्तरेष्विन्द्रावरुणाभ्यामिन्द्राबृहस्पतिभ्यामिन्द्राविष्णुभ्यामिति ॥ १४८ ॥

उत्तरेषु संस्थाविशेषेषूक्थ्यविग्रहणमिन्द्रावरुणाभ्यामित्येवमादिभिर्मन्त्रैः ॥ १४८ ॥

स्तुतशस्त्रे अधिके षोडशी चेत् ॥ १४९ ॥

अषोडशिन्यपि षोडशिनो ग्रहणं विहितम् अप्यग्निष्टोमे प्रहीतव्य अप्युक्थ्ये ग्रहीतव्य इति । अग्निष्टोमसंस्था च यज्ञायज्ञियाग्निमारुतान्ता उक्थसंस्था चोक्थ्यविग्रहणान्ता । तदन्ते षोडशियागो विकल्पेन । तत्र च स्तोत्रशस्त्रमात्रमेवाधिकं भवति । न यथा षोडशिसंस्थे तृणहिरण्यकृष्णोश्व इत्येवमादि । एवमेव शाखान्तरेस्य विधानमिति ॥ १४९ ॥

तृतीयसवने प्रसवः ॥ १५० ॥

अप्रसव इति केचित् । तदनुपपन्नं प्राप्तिपूर्वकत्वात्प्रतिषेधस्य । न चास्य प्राप्तिरुक्ता । तस्मात्तृतीयसवनेऽत्र प्रसव इति सूत्रं व्याख्येयम् । विहितं च शाखान्तरेषु । सवनीये सर्पन्तीति । यत्सवनान्ते सर्पणं तदत्र भवतीति सूत्रार्थः ॥ १५० ॥

स्रुग्व्यूहनमग्नेर्वनस्पतेरिन्द्रस्य वसुमतो रुद्रवत आदित्यवत ऋभुमतो विभुमतो वा-

जवतो बृहस्पतिमतो विश्वदेव्यावतः सोमस्योज्जितिमित्यग्निर्वनस्पतीरिन्द्रो वसुमान्रुद्रवानादित्यमानृभुमान्विभुमान्वाजवान् बृहस्पतिमान्विश्वदेव्यावान्त्सोमस्तमपनुदन्त्विति ॥ १५१ ॥

शाखान्तरोपदेशात् ॥ १५१ ॥

पशुदेवतावनस्पतिभ्यां वा सोमोपदेशादितरासाम् ॥ १५२ ॥

पशुदेवतावनस्पतिभ्यामेव वा स्रुग्व्यूहनमभिसम्बध्यते न वसुमदादिदेवताभिः । कुत एतत् । सोमोपदेशात्तासाम् । सोमे हि वा उपदिश्यते इन्द्रायत्वा वसुमते रुद्रवत इन्द्राय त्वादित्यवत इत्येवमादिनेति ॥ १५२ ॥

एवं प्राप्त उच्यते—

सर्वा वा सवनीयसौम्यभावात् ॥ १५३ ॥

सर्वा वा वसुमदाद्या अपि व्यूहनेनाभि सम्बध्यन्ते । कुत एतत् । सवनीयेषु सौम्ये च भावात्तासाम् । कथं कृत्वा । सर्वत्र हीन्द्रोभीज्यते । सवनीयान्प्रकृत्य हि श्रूयते सर्व ऐन्द्रा भवन्तीति । ननु च गुणभेदोत्र । किं क्रियतां वचनमत्र । निर्वापे हि हरिवदादिविशिष्ट इन्द्रो यागेच निर्गुणो व्यूहने च वसुमदादिविशिष्ट इति वचनेन हि विधानम् । नास्ति वचनस्यातिभारस्तस्मात्साधूक्तं सर्वा वा सवनीयसौम्यभावादिति । सौम्ये निःसन्दिग्ध एव सद्भावः ॥ १५३ ॥

विमुच्य स्रुचौ द्रोणकलशे हारियोजनग्रहणमुपयामगृहीतोसि हरिरसीति ॥ १५४ ॥

चोदकपरम्परापरिप्राप्तं स्रुग्विमोकं कृत्वा द्रोणकलशे हारियोजनग्रहणमुपयामगृहीतोसि हरिरसीत्यनेन मन्त्रेण ॥ १५४ ॥

धानाश्चावपति हर्योर्धाना इति ॥ १५५ ॥

चशब्दादनन्तरम् । श्रयणं चैतत् । शाखान्तरश्रवणात् । धानाभिर्हारियोजनं श्रीणातीति । प्रयोजनं श्रयणधर्मोत्र भवति ॥१५५॥

उन्नेतानुवाचयति मूर्धनि कृत्वा धाना सोमेभ्यो ऽनुब्रूहीति ॥ १५६ ॥

एतावनेष प्रैष इति सम्प्रदायः । इन्द्राय धाना सोमेभ्य इत्यपरे । तत्पुनर्युक्तमयुक्तं वेति विचारणीयम् । न ह्यत्र चोदकप्राप्तिरस्ति । अनुवाचनप्रैषो यथा देवतमित्येतद्दर्शपूर्णमासविषयम् । अतोत्र दुर्लभा प्राप्तिर्देवतापदोच्चारणस्य । एवं च कृत्वेन्द्राय मरुत्वतेनुब्रूहीति वचनात् देवाय सवित्रेनुवाचयतीति वचनाद्देवतापदोच्चारणम् । आश्राव्याह दधिघर्मस्य यजेति तत्र चोदकपरिप्राप्त्या देवतापदोच्चारणम् । इह पुनर्न तथा धर्म इवेति सम्प्रदायः ॥ १५६ ॥

आश्राव्याह धानासोमान्प्रस्थितान्प्रेष्येति ॥१५७॥

उन्नेतैवाभिप्रवृत्तत्वात्तथा च लिङ्गाद्द्वौ वोन्नेतारौ कुर्वते तयोर्यतरो नाश्रावयेदित्युन्नेतुराश्रवणं दर्शयति ॥ १५७ ॥

भक्षं हरेदिच्छन् ॥ १५८ ॥

इच्छन्सर्वहुतं करोति धानावर्जम् ॥ १५८ ॥

उत्तरवेदौ वा निधाय विलाभम् ॥ १५९ ॥

उत्तर वेदौ वा निधाय द्रोणकलशं विलाभ्यधानाः । वा सदसि विलाभः ॥ १५९ ॥

यस्ते अश्वसनिरिति प्राणभक्षं भक्षयित्वोत्तरवेदौ निवपन्ति ॥ १६० ॥

धानाः । उत्तरवेदावपि विलाभे सदस्येव प्राणभक्षः । तत्र

हि सर्वभक्षाणां विधानमुदरमेवास्य सदस्तस्मात्सदसि भक्षयन्तीति । धानाभक्षणं सर्वेषाम् । अथैतस्य हारियोजनस्य सर्व एव लिप्सन्त इति ॥ १६० ॥

शाकलाधानं देवकृतस्येति प्रतिमन्त्रम् ॥ १६१॥

तच्च सर्वेषां सहकारिणामपि विधानसामर्थ्यात् ॥ १६१ ॥

अपरेण चात्वालं यथास्वं चमसान्पूर्णपात्रानवमृशन्ति हरितकुशानवधाय संवर्चसेति ॥ १६२ ॥

चात्वालमपरेण चमसान्पूर्णपात्रान्कृत्वा हरितकुशानवधाय यथास्वमवमृशन्ति संवर्चसेति । बहुवचनोपदेशात् अधिकाराच्च सहकारिवचनाच्च सर्वर्त्विजः । येषामपि चमसा न सन्ति तेपि यथाख्यया सन्निहितानां चमसानवमृशन्ति ॥ १६२ ॥

मुखान्यालभन्ते दधिक्राव्ण इत्याग्नीध्रे दधिभक्षणम् ॥ १६३ ॥

सर्वे कुर्युरधिकारात् सहकारिप्रत्ययाच्च ॥ १६३ ॥

पत्नीसंयाजाः पशुवत् ॥ १६४ ॥

पशुवदिति किमर्थमुच्यते । बहवो ह्यत्र सवनीयाः पुरोडाशाः समानतन्त्राः । भूयसां सधर्मत्वन्यायात्तद्धर्मा मा भूवन्निति । यद्येवमस्तु तथेति । नैतदेवम् । पशुतन्त्रं ह्यत्र महत् लघु पौरोडाशिकम् । तेन बृहद्घोषकटकन्यायेन पाशुकतन्त्राभ्युपगम एव युक्तरूप इति साधूच्यते पशुवदिति ॥ १६४ ॥

समिन्द्र ण इति नव समिष्टयजूंषि जुहोति प्रतिमन्त्रम् ॥ १६५ ॥

साभ्यासमिदमेकं कर्मेत्युक्तमेव । नवसंख्या तु पाशुकी । त-

स्त्राभ्युपगमात्। तथा च पशुगणे सवनीयपशुविकारत्वान्नैव भवन्ति ॥ १६५ ॥

आसन्द्युदुम्बर्यौ चात्वाल१ँ हरति सोमलिप्तं च ॥ १६६ ॥

हरन्ति ॥ १६६ ॥

कृष्णविषाणा मेखले चात्वाले प्रास्यति मा हिर्भूरिति ॥ १६७ ॥

अहिपृदाकुशब्दयोरुपमानार्थत्वात् बहुत्वेऽप्यनूहः ॥ १६७ ॥

प्रतिप्रस्थाता च शङ्कुयोक्त्रे तूष्णीम् ॥ १६८ ॥

चशब्दाच्चात्वाले प्रास्यति ॥ १६८ ॥

उरु१ँहीति वाचयति यजमानम् ॥ १६९ ॥

साम प्रेष्यति गाय ब्रूहीति वा ॥ १७० ॥

वेति विकल्पः ॥ १७० ॥

व्यध्वोदकान्तयोश्च ॥ १७१ ॥

सामप्रेष्यति। व्यध्वशब्देनार्धपथ उच्यते ॥ १७१ ॥

सर्वे निधनमुपयन्ति ॥ १७२ ॥

सर्वशब्दो निरवग्रहः सर्वर्त्विग्विषयः ॥ १७२ ॥

आहृतमादायावभृथं गच्छन्ति स्यन्दमानाना१ँ स्थावराः ॥ १७३ ॥

यच्चात्वालमाहृतमासन्द्यौदुम्बर्यादि तदादायावभृथं कर्तुं यन्ति स्यन्दमानानामपां या स्थावरा आपः। स यः स्यन्दमानाना१ँ स्थावरो ह्रदः स्यादिति वचनात् ॥ १७३ ॥

तदभावेऽन्याः ॥ १७४ ॥

यद्यु तान्न विन्देदपि या एव काश्चापोऽभ्यवेयादिति ॥ १७४ ॥

नमो वरुणायेति वाचयत्यपोऽवक्रमयन् ॥ १७५ ॥

नमो वरुणायेत्यमुं मन्त्रं वाचयति । बाहुगृहीतं यजमानमपोऽवतारयन् ॥ १७५ ॥

प्रास्य समिधं चतुर्गृहीतेनाभिजुहोत्यग्नेरनीकमिति ॥ १७६ ॥

समिधमप्सु प्रास्य चतुर्गृहीतेनाभिजुहोत्यग्नेरनीकमित्यनेन मन्त्रेण ॥ १७६ ॥

अपरेण प्रयाजान्बर्हिर्वर्जम् ॥ १७७ ॥

अपरेण चतुर्गृहीतेन बर्हिर्वर्जं प्रयाजान्करोति । अपरग्रहणं पूर्वं चतुर्गृहीतहोमस्यावसरप्रज्ञप्त्यर्थम् । न हि तस्यावसरोऽभिहित इति । किं च समानयनव्युदासार्थं च ॥ १७७ ॥

अप्सु जुहोति ॥ १७८ ॥

आहवनीयकार्ये विधानम् । अतश्च तद्धर्मसम्बन्धो भवति ॥ १७८ ॥

एककपालेनावदायं चरतीति ॥ १७९ ॥

वारुणेनैककपालेनावभृथमभ्यवयन्तीति वचनात् । स च पूर्वमेवाभिहितः सौम्यश्चरुर्वारुणश्चैककपालोऽधिकाविति । एककपालानां हि सर्वहुतत्वमुक्तमाचार्येण तेनोच्यतेऽवदायावदाय चरतीति ॥ १७९ ॥

ऋजीषस्येच्छन्नवद्येदग्नीवरुणाभ्यां सर्वहुतं

शेषम् ॥ १८० ॥

करोति ॥ १८० ॥

ऋजीषस्य च सकृत्पर्वे चेत् ॥ १८१ ॥

स यद्यमुत्रर्जीषस्य द्विरवद्येदथात्र सकृदिति वचनात् ॥१८१॥

वश एतत्कुर्यात् ॥ १८२ ॥

वशशब्दो हीच्छावचनः । इच्छयैतत्षड्ढाहुतिकं करोति । इच्छयान्यत्प्रकारान्तरम् ॥ १८२ ॥

तचाह—

यजमानोक्तावाज्यभागौ बर्हिर्वर्जं चानुयाजौ ॥१८३॥

इच्छयैतद्दशाहुतिकं करोति यजमानोक्ताविति । सहकारिवचनाद्यावा यजमानो ब्रूयादिति ॥ १८३ ॥

अन्यतरत्कृत्वा समुद्रे त इत्यृजीषकुम्भं प्लावयति ॥ १८४ ॥

अत्र पक्षद्वयस्यान्यतरदेकं कर्तव्यम् । नान्ये पदार्थाः । येन प्रयाजाज्यभागानुयाजानामेव पुनर्विधानम् । अतो यावदुक्ततास्य । प्रतिपत्तयस्तु क्रियन्ते । समुद्रे त इत्यनेन मन्त्रेण ऋजीषकुम्भं प्लावयत्युदके ॥ १८४ ॥

देवीराप इति विसृज्योपतिष्ठते ॥ १८५ ॥

विसृज्यर्जीषकुम्भमुपतिष्ठते देवीराप इति ॥ १८५ ॥

अवभृथेति मज्जयति ॥ १८६ ॥

ऋजीषकुम्भं प्लावयतीत्यर्थः ॥ १८६ ॥

कृष्णाजिनान्तं च मा मैद्यं ज्यैष्ठ्यं श्रैष्ठ्यं

व्यौषीरिति ॥ १८७ ॥

चशब्दान्मज्जयति कृष्णाजिनान्तं च प्रकृतत्वादासनकृष्णाजिनम् ॥ १८७ ॥

पुत्रायैनत्प्रदाय वरुणप्रघासवत्स्नानप्रभृत्या समिदाधानात्॥ १८८ ॥

एनदिति कृष्णाजिनम् । वारुणप्रघासिकावभृथवत्स्नानं कृत्वा समिदाधानात्करोति । तदीयोपदेशस्यातिदेशोयम् । न हि तद्धर्मप्रवृत्तिरत्रेति । इत एव हि तत्र धर्माः प्रवृत्ताः ॥ १८८ ॥

सोमलिप्तं प्रास्यति ॥ १८९ ॥

चरितार्थत्वात्प्रतिपत्तिः ॥ १८९ ॥

अदानं पूर्वयोः ॥ १९० ॥

वाससोः । अतिदेशापवादोयम् ॥ १९० ॥

उद्वयमित्युन्नेत्रोन्नीता आमहीयां जपन्तो गच्छन्त्यपाम सोमममृता अमूमागन्मज्योतिरविदाम देवान् किं नूनमस्मान्कृणवदरातिः किमुधूर्तिरमृत मर्त्यस्येति ॥ १९१ ॥

जपश्च सर्वेषां बहुवचनोपदेशात् । सहकारिणामपि विधानसामर्थ्यात् । अस्मिंश्चावसरे व्रतग्रहणं भवत्युन्मुक्तदीक्षत्वात् । ततो बर्हिर्होमादि ॥ १९१ ॥

शालाद्वार्यमपरेणास्ते यजमानः कृष्णाजिनमङ्के कृत्वा स्रुवाहुतिं जुहोति मैद्रयं ज्यैष्ठ्य; श्रैष्ठ्यमग्निर्दधातु स्वाहेति ॥ १९२ ॥

स्रुवाहुतिं जुहोति अध्वर्युः आहवनीये मैत्र्यं ज्यैष्ठ्याय श्रैष्ठ्य-अग्निर्दधातु स्वाहेत्यनेन मन्त्रेण ॥ १९२ ॥

कृष्णाजिनं निधायोदयनीयाप्रायणीयावत् ॥१९३॥

वतिः प्रायणीयधर्मातिदेशार्थः । तथा चाह ॥ १९३ ॥

पथ्यास्वतिश्च चतुर्थीति ॥ १९४ ॥

शालामुखीये उदयनीयया चरन्तीति च शाखान्तराच्छाला-द्वार्ये कर्त्तव्या ॥ १९४ ॥

पात्रप्रोक्षणाद्याज्यासादनात्सवनीयवत्परिव्य-यणादि मैत्रावरुणीवशानूबन्ध्या ॥ १९५ ॥

पात्रप्रोक्षणग्रहणं शालाद्वार्ये श्रपणनियमव्युदासार्थम् । सवनीये हि पात्रासादनविधानेन शालाद्वार्ये श्रपणनियमो ज्ञापितः । तद्वदत्रापि मा भूदिति पात्रप्रोक्षणादीत्युक्तम् । सा च सवनीयवदिति यदुक्तं भवति सकृत्प्रोक्षित इध्ममाग्नीध्र उत्पवनं पकवृत्स्तरणमिति । परिव्ययणस्य पश्वङ्गत्वेन विधानात्तदपवर्गे चापवर्ग्यमाशङ्क्य परिव्ययणादीत्युक्तम् । मैत्रावरुणदेवत्या वशा रिक्ता सा च गौर्भवति । गौरनुबन्ध्येति वचनात् ॥ १९५ ॥

स्वर्वगूहनादि वा कृतत्वात् ॥ १९६ ॥

स्वर्गवगूहनादि वा कर्त्तव्यं न परिव्ययणादीति । कुत एतत् । कृतत्वात्परिव्ययणसंस्कारस्य । यूपसंस्कारो ह्ययम् । स च यूपः सर्वपश्वर्थः । संस्कारोपि तद्वदेवेति । अत एव स्वर्गवगूहनादीत्युत्तरपदप्रधानो बहुव्रीहिः । स्वर्वगूहनं यस्यादौ तदादि । तच्चोपाकरणम् । एवं सत्युपाकरणमन्थनयोरत्र नियम इति ॥ १९६ ॥

वशाभाव उक्षा ॥ १९७ ॥

यदि वशां न विन्देदप्युक्षवश एव स्यादिति ॥ १९७ ॥

उभयाभावे पयस्या ॥ १९८ ॥

कर्त्तव्या ॥ १९८ ॥

असाद्यैतामाज्यभागप्रभृतीडान्तामेके ॥ १९९ ॥

एके आदितो ब्राह्मणतर्पणान्ताम् । विकल्प एवायम् ॥१९९॥

उदवसानीयाग्नेयः पञ्चकपालः समारूढनिर्मथिते ॥ २०० ॥

उदवसानीयेष्टिरुच्यते । तत्र चाग्नेयः पञ्चकपालो भवति । समारोपश्च प्राजहिते कर्त्तव्यः । गार्हपत्यो हि स इति ॥ २०० ॥

हिरण्यं दक्षिणाऽनड्वान्वा ॥ २०१ ॥

वेति विकल्पः ॥ २०१ ॥

पशुवद्वाहुतिः ॥ २०२ ॥

अथो चतुर्गृहीतमेवाज्यं गृहीत्वेति श्रुतेः ॥ २०२ ॥

तदन्ते सायमाहुतिः ॥ २०३ ॥

सोमाङ्गं सन्निधिविरोधाभ्याम् ॥ २०४ ॥

सा च सोमाङ्गं भवति । सोमसन्निधौ विधानात् । अथ यदेवैषोदवसानीयेष्टिः सन्तिष्ठतेऽथ सायमाहुतिं जुहोतीति । अपि च नित्यत्वे सति कालो विरुध्यते ॥ २०४ ॥

नित्या वा प्रातराहुति श्रुतेः ॥ २०५ ॥

अथ वा नित्यैषा न सोमाङ्गम् । कुत एतत् । प्रातराहुतिश्रवणात् । काल एव प्रातराहुतिमिति । सोमयागनिमित्तः सायमाहुतेरपकर्ष इति ॥ २०५ ॥

नियतक्रियातः ॥ २०६ ॥

अतः परं नित्यानां क्रिया न प्रागतः । उन्मुक्तदीक्षत्वेऽप्यवभृथादूर्ध्वमिति ॥ २०६ ॥

एष प्रथमः सोमः ॥ २०७ ॥

एष वा व प्रथमो यज्ञानां यज्ज्योतिष्टोम इति। सर्वविकाराणामयं प्रथमः सोमः ॥ २०७ ॥

आदीप्य प्रविशन्ति ॥ २०८ ॥

आदीपनं च बर्हिषः। तद्धि प्रकृत्य श्रूयते यदनुप्राप्य प्रयायात् ग्रीवाबद्धमेनं यजमानं स्वर्गिधीयेरन्निति निन्दार्थवादोयमनुपोषस्य ॥ २०८ ॥

षडुत्तरेऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोतिरात्रोप्तोर्यामः ॥ २०९ ॥

अत्रात्यग्निष्टोमवाजपेयाप्तोर्यामाणां ज्योतिष्टोमप्राथम्यविधानेनोत्तरकालता सिद्धा। उक्थ्यषोडश्यतिरात्राणामप्याचार्येणैव ज्ञापितोत्तरकालता। उक्थ्यं चोत्तरेष्वेकयेति। उक्थ्यविग्रहणमुत्तरेष्विन्द्रावरुणाभ्यामिति च। तेनात्र विकारप्रज्ञप्त्यर्थं षडुत्तर इत्युच्यते न क्रमार्थम्। षडुत्तरे षट् विकारा इत्यर्थः। उत्तरो हि विकारो भवति प्रकृत्यपेक्षया प्रकृतिश्च पूर्वेति। ननु चात्यग्निष्टोमवाजपेयाप्तोर्यामाणां ज्योतिष्टोमधर्मा एकाहद्वादशाहयोरित्यनेनैव विकारत्वं ज्ञापितम्। ज्योतिष्टोमप्रकरणसमधीतानामपि चोक्थ्यादीनामसमानविधानता। नित्यानित्यसंयोगविरोधात्। अतस्तेपि विकारा एव। तेन क्रतुविकारत्वस्यावाच्यत्वात्संस्थाविकारार्थोऽयमारम्भः। षडुत्तरे षट् संस्था विकारा इति। तत्रोक्थ्यषोडश्यतिरात्राणामग्निष्टोमविकारत्वम्। अत्यग्निष्टोमस्याप्यग्निष्टोमसंशब्दनात् अग्निष्टोमविकारत्वम्। वाजपेयस्य षोडशिविकारत्वं कथं ज्ञायते। येन क्रतुपशूंस्तत्र दर्शयति। आग्नेयमग्निष्टोम आलभते अग्निर्वा अग्निष्टोमोऽग्निष्टोममेवैतेनो जयत्यैन्द्राग्नमुक्थ्येभ्य आलभत ऐन्द्राग्नानि वा उक्थ्यान्युक्थ्यान्येवैतेनो जयत्यैन्द्रं षोडशिन आलभते इन्द्रो वै षोडशिनमेवैतेनो जयतीत्येवमभिधाय सारस्वतं सप्तदशाय स्तोत्रायालभते तदेतदनतिरात्रे सति रात्रे रूपं क्रियत इति षोडशिक्रतुपशूनानामिह दर्शनं भवति। अतिरात्रेप्येते भवन्तीति चेत्। नानतिरात्रे सति रात्रे रूपं क्रियत इति श्रुतेः। तस्मात्षोडशिविकारो

वाजपेय इति । आप्तोर्यामेऽपि तिरोह्नी येभ्यो रात्रिपर्याय उत्तम इति तिरोन्ह्यानां दर्शनं भवति । तेनातिरात्रविकारोप्तोर्याम इति गम्यते । षडुत्तरे षोडशिविकारा इति विकारत्वज्ञापनस्य प्रयोजनं किमिति चेत् । स्वप्रकृत्यपेक्षया क्रतुकरणं यथा स्यादिति। तेनात्यग्निष्टोमे आग्निष्टोमिकं क्रतुकरणं वाजपेये षोडशिन आप्तोर्यामे च आतिरात्रिकं उक्थ्यादिषु तूक्तमेवेति । अत एव च सूत्रकारेण अत्यग्निष्टोमोग्निष्टोमानन्तरं पठितः । षोडश्यनन्तरं वाजपेयोतिरात्रममनन्तरमप्तोर्याम इति। तथा च धर्मसूत्रकारेण गौतमेनाप्युक्तम अग्निष्टोमोत्यग्निष्टोम इत्येवमाद्यभिधाय सप्तसोमसंस्था इति । तस्मात् षडुत्तरे षट्संस्था विकारा इति सूत्रार्थः । अत्यग्निष्टोमादयो विकृताभिः संस्थाभिः संस्थिता इति ॥ २०९ ॥

तेषामुक्थ्योच्छावाकभि सन्तिष्ठते होतारमितरे ॥ २१० ॥

तेषां संस्थाविशेषाणां उक्थ्योच्छावाकमभि सन्तिष्ठते होतारं चेतरेभि सन्तिष्ठन्ते।किमर्थमिदमुच्यते । वाजपेयेहि श्रूयते षोडश्यन्ते स्तोत्रश्चमसैरेवेति । स्तुतमनुशंसतीति वत्तच्छस्त्रं होतुर्यथा स्यादिति । तथा सोमातिरेके क्वचिदुक्तमैन्द्रावैष्णवं होता शंसतीति तथा पूर्ववच्छंसेति । क्वचिच्च नोक्तमाचार्येण यथातिरात्राश्वेत् बृहन्महाव्रतमेके यथोक्तमिति । अत्रापि स्तुतमनुशंसतीति होतुः शस्त्रं यथा स्यादिति । अनुक्तसङ्ग्रहार्थं होतारमितर इत्युक्तम ॥ २१० ॥

वैश्यराजन्ययोः सोमे न्यग्रोधस्तिभीनुपनह्येच्छन् भक्षाय क्रयणप्रभृत्यनुसोममावृता समानमासादनं प्रागभिषवात् ॥ २११ ॥

सोमयागे कर्त्तव्ये १न्यग्रोधस्तिभीनुपनह्येच्छं भक्षाय इच्छं हो-

---

१ तथाच शाखान्तरं ' यदि राजन्यं वैश्यं वा याजयेत्स यदि सोमं बिभक्षयिषेन्न्यग्रोधस्तिभिनीराहृत्य ताः सम्पिष्य दध्यनुन्मृद्य तस्मै भक्षं प्रयच्छेन्न सोमम् ' इति । ' स्तिभिन्योङ्कुराः फलानि वा, इति तद्भाष्यकारः ।

मायापि। भक्षो हि हुतशेषस्यैव भवति । तस्माद्धोमायापीत्येव होमदर्शनं च भवति । यदान्यांश्चमसानुन्नयन्त्यथैनमुन्नयन्ति यदैतां जुहोत्यथैनं कुशतरुणेनोपहत्य जुहोतीति । क्रयणप्रभृति सह सोमेन सोमाभृता समानमासादनादि कर्त्तव्यम् । सोमद्रव्यविकाराच्च प्रकृतावप्यूहः प्रवर्त्तत एव ॥ १११ ॥

चमसोन्नयनकाले वाहृत्य दध्नोन्मृद्य तच्चमसमनून्नयेत् ॥ ११२ ॥

विकल्प एवायम् । तुल्यशास्त्रत्वात् ॥ ११२ ॥

हूयमानेषु कुशतरुणेन जुहोत्यहं त्वदस्मीति ॥ ११३ ॥

इति कर्कोपाध्यायकृतौ कात्यायनसूत्रभाष्ये
दशमो ऽध्यायः ।

# एकादशोऽध्यायः ।

ब्रह्मत्वमतः ॥ १ ॥

आध्वर्यवमनुविहितम् । अतः परं ब्रह्मत्वं व्याख्यायत इति ॥ १ ॥

वाग्यतः कर्मणि वर्त्तमाने ॥ २ ॥

तच्च सौमिके । ऐष्टिकपाशुकेषु तूक्तमेव ॥ २ ॥

हिरण्यवत्याꣳ हुतायां दक्षिणानुगच्छत्याक्रयात् ॥ ३ ॥

हिरण्यवत्यामाहुतौ हुतायां दक्षिणतो व्यवस्थितो ऽनुगच्छत्याक्रयात् ॥ ३ ॥

क्रीते प्राङतीत्य पूर्वेणानः परीत्यापरेण वा दक्षिणतो ऽनुगच्छत्यानिधानात् ॥ ४ ॥

क्रीते सोमे पदार्थतया प्राङ्गत्वाद क्षिणतो व्यवस्थितमनः पूर्वेणापरेण वा गत्वा अनुगच्छत्यासोमनिधानात् ॥ ४ ॥

दक्षिणाग्निं वा परेण घर्मे ॥ ५ ॥

दक्षिणाग्निमपरेण वा प्रवर्ग्ये । वा दक्षिणेनेति सम्प्रदायः । अन्ये त्वाहवनीयं दक्षिणेनेति विकल्पमिच्छन्ति । दर्शपूर्णमासयोर्हष्टत्वात् । तत्पुनर्नातीव युक्तरूपम् । न ह्यत्र दर्शपूर्णमासिकी धर्मप्रवृत्तिरपूर्वत्वात् ॥ ५ ॥

स्तम्बयजुर्हरिष्यत्याहवनीयदेशं दक्षिणेनास्ते

वेदिसहितः ॥ ६ ॥

स्तम्बयजुर्हरिष्यत्यध्वर्यो आहवनीयदेशं दक्षिणेनास्ते वेदिसंलग्नः ॥ ६ ॥

एवꣳ सर्वत्र प्रागग्नीषोमप्रणयनात् ॥ ७ ॥

आहवनीयदेशं दक्षिणेनास्ते । सर्वत्र ग्रहणात्पूर्ववत् स्वपूर्वेषु च ॥ ७ ॥

कर्मणः कर्मणो वा सहितस्तत्तदेवान्वेत्य ॥ ८ ॥

दक्षिणत आस्ते । अत्र चैके तत्वाद्देवान्वेति बहिर्वेदावेवेच्छन्ति । अपरेत्वन्तर्वेदावपीति विप्रतिपत्तिः ॥ ८ ॥

आहवनीये प्रणीयमानेऽप्रतिरथस्य द्वादश-ब्रुवन्नग्नौ ॥ ९ ॥

अनुगच्छति ॥ ९ ॥

सर्वत्रैके ॥ १० ॥

प्रणयनोद्देशेन विधानात् । तत्पुनरयुक्तम् । प्रणयनविशेषे विहितत्वात् । तस्मादग्नावेव ॥ १० ॥

स्तीर्णायां यथार्थमेत्य ॥ ११ ॥

आस्ते दक्षिणतः । नियमार्थमिदमुक्तम् ॥ ११ ॥

अग्नीषोमप्रणयनायोत्तरेण धिष्ण्यान्छाला-द्वार्यं पूर्वेणेत्यास्ते दक्षिणतः ॥ १२ ॥

शालाद्वार्यस्यैव ॥ १२ ॥

हुते च सोममादायाग्निमन्वेति ॥ १३ ॥

हुते च वैसर्जिते सोमं गृहीत्वा चशब्दात् शालाद्वार्ये पूर्वेणाग्निमन्वेति ॥ १३ ॥

यजमानो वा सोमं हरेत् ॥ १४ ॥

तुल्यशास्त्रत्वात् ॥ १४ ॥

अन्यस्मै प्रदायानिहिते यथेतमेत्यास्ते दक्षिणतः ॥ १५ ॥

अन्यस्मै प्रदाय सोमं अनिहित आग्नीध्रे अग्नौ उत्तरेण धिष्ण्यानेत्यास्ते तस्यैव दक्षिणतः ॥ १५ ॥

हुते च सोममादायाहवनीयं चातीत्य ॥ १६ ॥

हुते वैसर्जने सोममादाय चशब्दादन्यस्मै प्रदाय सोममाहवनीयमतीत्य चशब्दादास्ते दक्षिणतः ॥ १६ ॥

अपररात्रेऽग्नीषोमप्रणयनवदिच्छन् ॥ १७ ॥

यदुक्तं भवति उत्तरेण धिष्ण्याञ्छालाद्वार्ये च पूर्वेणेत्य तस्यैव दक्षिणत आस्ते । इच्छन्नाहवनीयस्य दक्षिणतः ॥ १७ ॥

विप्रुषां होमं हुत्वा प्रतिहर्त्तारमन्वारभेत वादीक्षितः ॥ १८ ॥

विप्रुड्ढोमकाले अदीक्षितः प्रतिहर्त्तारमन्वारभेत न । वा न वेति विकल्पः । दीक्षितस्य तु नियमतो विहितोन्वारम्भः ॥ १८ ॥

प्रस्तोत्रामन्त्रित एतं ते देवसवितःस्तुत सवितुः प्रसव इत्युक्त्वा प्रसौति ॥ १९ ॥

प्रस्तोत्रामन्त्रितो ब्रह्मा प्रसौति । ब्रह्मन् स्तोष्याम इत्येवं प्रस्तोत्रामन्त्रित एतं ते देवसवितरित्युक्त्वा स्तुतसवितुः प्रसव इति प्रस्तौ-

ति । अस्य प्रसवार्थत्वात् ॥ १९ ॥

देवसवितरेतत् बृहस्पते इति वा ॥ २० ॥

उक्त्वा स्तुतसवितुः प्रसव इति प्रस्तौति ॥ २० ॥

रश्मिना सत्यायेति वा प्रतिमन्त्रम् ॥ २१ ॥

प्रतिस्तोत्रं प्रतिमन्त्रं स्तुतसवितुः प्रसव इत्यनेनैव प्रसौति । अस्मिंश्च पक्षे अप्तोर्यामेऽन्त्यस्यैवावृत्तिः । मन्त्रान्तराभावात् ॥ २१ ॥

येन प्रवेशनं तस्मिन्त्सर्पणम् ॥ २२ ॥

सदसि येन द्वारेण प्रवेशनमङ्गीकृतं तस्मिन्नेव सर्पणम् । यदुक्तं भवति द्वार्ययोरभिमर्शनम् ॥ २२ ॥

पूर्वेण यूपं परीत्यापरेण चेत् ॥ २३ ॥

अपरेण प्रवेष्टुमिच्छति ततः पूर्वेण यूपमेति । पूर्वेण चेदपरेण ॥ २३ ॥

प्रशास्तुर्दक्षिणत आस्ते ॥ २४ ॥

अपरेण धिष्ण्यानितरे ॥ २५ ॥

अधिकारद्ब्रह्मपुरुषा आसते ॥ २५ ॥

नेष्टा च ॥ २६ ॥

चशब्दादपरेण धिष्ण्यमास्ते । अध्वर्युपुरुषत्वात् पृथक्त्वेनोक्तः ॥ २६ ॥

विसृ्थितसञ्चरः प्रशास्तृधिष्ण्यं वोत्तरेणा-

पवमाने ॥ २७ ॥

विसंस्थितसञ्चरः । अपरिसमाप्तसञ्चरः । अपवमाने प्रशास्तृधिष्ण्यं वोत्तरेणेति वा दक्षिणेन । पवमानार्थे त्वपरिसमाप्ते च सवने दक्षिणेनैवेति ॥ २७ ॥

स्वा; स्वमितरे ॥ २८ ॥

इतरे पुरुषा स्वधिष्ण्यानेवमेव गच्छन्ति ॥ २८ ॥

इति कर्कोपाध्यायकृतौ कात्यायनसूत्रभाष्ये
एकादशो ऽध्यायः समाप्तः ।

# द्वादशोऽध्यायः ।

श्रुत्यर्थमनुविधित्सताचार्येण ज्योतिष्टोमोऽनु विहितः इदानीं श्रुतिमन्त्रपाठावसरप्राप्तो द्वादशाहोऽनु विधीयते । तत्र श्रुतिपाठः सर्वे ह वै देवा अग्रे सदृशा आसुरित्यतिग्राह्यग्रहविधानं द्वादशाहे तान्वै पृष्ठ्ये षडहे गृह्णीयात्पूर्वेऽयह इत्येवमादि । मन्त्रपाठोऽपि च अग्ने पवस्व स्वपा उत्तिष्ठन्नोजसेत्येवमाद्यतिग्राह्यग्रहमन्त्राः । ततो द्वादशाहस्य श्रुतिमन्त्रापाठावसर इति । तत्र तद्धर्मप्राप्त्यर्थमधिकरणमारभ्यते—

## ज्योतिष्टोमधर्मा एकाहद्वादशाहयोस्तद्गुणदर्शनात् ॥ १ ॥

ज्योतिष्टोमस्य धर्मा ज्योतिष्टोमधर्मा ज्योतिष्टोमशब्देन उपांश्वादिहारियोजनपर्यन्तो ग्रहयागाभ्यासोऽभिधीयते । ज्योतींषि यस्य स्तोमाः स ज्योतिष्टोमः । स्तौमैर्ह्यसौ द्योत्यत इति । ते च सोमयागस्य स्तोमाः ग्रहं गृहीत्वा चमसान्वोन्नीय स्तोत्रमुपाकरोतीति । तस्माज्ज्योतिष्टोमशब्देन सोमयागोऽभिधीयते । नन्वेवं सति ऐन्द्रवायवादीनामप्रवृत्तिर्विकारेषु भवति । नैष दोषः । उद्भिदा यजेत बलभिदा यजेतेति चाऽव्यक्तत्वसामान्यात् ज्योतिष्टोमिको विध्यन्तः प्रवर्त्तते । उद्भिदादिषु च यागमात्रं श्रूयते । न च द्रव्यदेवतमन्तरेण यागः सम्भवति । अतो द्रव्यदेवतस्यापि प्रवृत्तिरिति । यत्र पुनर्द्रव्यदेवतासहितस्य यागस्य विधानम् । यथैन्द्राग्नमेकादशकपालं निर्वपेदिति तत्र तद्व्यतिरिक्तस्य प्रवृत्तिर्युक्ता । इह पुनर्न तथा । इह हि यागमात्रमेव श्रूयते । तच्च द्रव्यदेवतमन्तरेण न भवति । द्रव्यदेवतमपि साधनत्वाद्धर्मो भवति । तेन तस्यापि प्रवृत्तिर्युक्तरूपेति । तस्य च धर्मा एकाहेषु द्वादशाहे च प्रवर्त्तन्ते । एकाहजात्यपेक्षया च द्विवचनम् । य एवैकस्मिन्नेकाहे धर्मप्रवृत्तिहेतुः स एव सर्वेष्वेकाहेष्वपि । कश्चासौ । धर्माणामनाम्नानम् । अव्यक्तसामान्येन च ग्रहणम् । द्वाद-

शाहे त्वेकस्मिन्नेव ज्योतिष्टोमिकधर्मप्रवृत्तिः। ततोन्यत्राहर्गणेषु धर्मप्रवृत्तिं वक्ष्यति। तद्गुणाश्चात्र दृश्यन्ते। वाजपेयेऽगृहीते माहेन्द्रे रथावहरणादिकरोति रथावहरणावसरविधिपरे वाक्ये माहेन्द्रं दर्शयति। तथा तं वै प्रातः सवने गृह्णीयादाग्रयणं गृहीत्वेति षोडशिनोवसरविधानपरे आग्रयणं दर्शयति। तथा माध्यंदिने वैतान्त्सवने गृह्णीयादुक्थ्यं गृहीत्वेति अतिग्राह्यावसरविधिपरे वाक्ये उक्थ्यं दर्शयति। एकत्र चावस्थितं लिङ्गं स्थालीपुलाकन्यायेन सर्वत्र गमकम। न्यायस्य तुल्यत्वात्। तुल्यो हि न्यायो धर्माणामनाम्नानमपेक्षया चाव्यक्तत्वसामान्येन ग्रहणमिति। न्यायस्तु पूर्वाभिहित एव। सामर्थ्यादिति एवमेताश्चोदना वैकृत्यः समर्था भवन्ति। इतरथा सापेक्षाः सन्त्योनर्थका एव स्युरिति ॥ १ ॥

आनुमानिकस्याप्यतिदेशापवादत्वेनेदमधुनोच्यते—

## प्रथमस्य व्रात्यस्तोमसाद्यःक्रेषु वचनात् ॥ २ ॥

व्रात्यस्तोमादिषु प्रथमस्य धर्मा उत्तरेषु प्रवर्त्तन्ते। न ज्योतिष्टोमिकाः। कुतः। वचनात्। उच्यतेनेनेति वचनं, नामधेयं, नामधेयादित्यर्थः। तुल्यनामत्वात्तत्रैव प्रवृत्तिर्भवति। प्रतीत्या च धर्मसम्बन्धो भवति नान्यश्चेति। साद्यःक्र सोमक्रयणं त्रिवृत्त्यं साण्डमभिधाय साद्यःक्रान्तरे स्त्रीगौः सोमक्रयणीत्याह। तच्चैवमेवोपपद्यते। वचनातिदेशं तु वक्ष्यति। इषुश्येनवादिति। नन्वेतत्पूर्वमभिहितमेव दर्शपूर्णमासधर्मा इष्टिपशुषु सामार्थ्यादित्यत्रानुमानिकवचनातिदेशः। वैश्वदेवधर्माश्चातुर्मास्येष्विति प्रत्यक्षवचनातिदेशः। सोमाच्चावभृथ इति नामातिदेशः। त्रिः प्रकारोप्यतिदेश उक्तः। किमर्थं पुनरिहोच्यते। सत्यमेतदेवम्। तत्र व्यक्तचोदनाविषयम। इहाव्यक्तचोदनाविषयं लिङ्गोपन्यासार्थोयमारम्भः। न हि व्यक्तचोदनालिङ्गोक्तिरिह गमिका भवति। तस्मादपुनरुक्तता ॥ २ ॥

## अग्निष्टुत्सु च ॥ ३ ॥

चशब्दात्प्रथमस्य धर्म्मा प्रवर्तन्ते नामधेयादेव। न त्वग्निष्टुद्बहुत्वमेव नास्ति। एक एवाग्निष्टुत् त्रिवृदग्निष्टुदग्निष्टोमस्तस्य वायव्यास्वेकविंशमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो यजेतेत्यभिधा-

याह । एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो-ह्येतेन यजतेति । एतस्यैवेति सर्वनामशब्देन स एवाग्निष्टुत्कार्यान्तरे विधीयते । तस्मादेक एवाग्निष्टुदिति ॥ ३ ॥

एवं प्राप्त आह—

एके ॥ ४ ॥

तन्नेच्छन्ति । प्राप्तकर्म्मानुवादेनानेकगुणविधानासम्भवात् । न हि पूर्वस्याग्निष्टुतो रेवत्यः सन्ति । ता विधातव्याः । तासु च वारवन्तीयम् तच्चाग्निष्टोमसाम्नः कार्ये । पशुकामो वेति वाक्यभेदः । कर्मान्तरपक्षे तु सगुणकर्मविधानान्नैषदोषो भवति । तस्मात्प्रतिफलमग्निष्टुतां बहुत्वम् ॥ ४ ॥

प्रकृतमिदानीमभिधीयते—

[1]द्वादशाहः सत्त्रमहीनश्च ॥ ५ ॥

अत्र विशेषमाह—

आसत उपयन्तीति सत्त्रलिङ्गं यजत इत्यहीनस्य ॥ ६ ॥

द्वादशाहमृद्धिकामा उपेयुरिति । तथा त्रयोदशरात्रमासीरन्निति सत्त्रलिङ्गम् । द्वादशाहेन प्रजाकामं याजयेदित्यहीनलिङ्गम् । अस्यानुकथनप्रयोजनम् सत्त्रे सत्त्रात्मको धर्म दातृत्वेन प्रवर्त्तते अहीने·चाहीनात्मकः ॥ ६ ॥

[2]उभयतोतिरात्रं सत्त्रमुपरिष्टादहीनस्य ॥ ७ ॥

यजमानाः सर्वे सत्त्रेषु ॥ ८ ॥

यजमाना एव सर्वे सत्त्रेषु कर्त्तारो भवन्ति । ये ऋत्विजस्ते

---

१ द्वादशाहयागः सत्त्रात्मक अहीनात्मकश्चेति सूत्रार्थः ।

२ सत्त्रस्यादावन्ते चाऽतिरात्रो भवति अहीनस्यान्ते एवेति सूत्रार्थः ।

यजमाना इत्यनेनार्त्विजीनान्पदार्थाल्लक्षणयाऽनूद्य यजमानाः कर्तृत्वेन विधीयन्ते ॥ ८ ॥

अदक्षिणानि च स्वामियोगात् ॥ ९ ॥

तानि च सत्राण्यदक्षिणानि भवन्ति। न हि कश्चिदात्मनैवात्मानं परिक्रीणाति ॥ ९ ॥

गृहपतिर्याजमानमयुक्तत्वात् ॥ १० ॥

याजमानं यत्कर्म तद्गृहपतिः करोति कर्मान्तरे तस्यायुक्तत्वात्। इतरेषां चाध्वर्वादिषु योगात् ॥ १० ॥

दर्शनाच्च ॥ ११ ॥

दृश्यते चायमर्थो यथा गृहपतेर्याजमानं कर्मेति। तस्माद्यदि बहवो दीक्षेरन् गृहपतय एव व्रतमभ्युत्सिच्य प्रयच्छेयुरिति ॥११॥

सर्वे संस्कारात् ॥ १२ ॥

हेतुश्चायमुपदेशश्च। यत्संस्कारकं कर्म तत्सर्वैरभ्युपेयम्। कस्य चित्संस्कारपरिलोपो मा भूदिति ॥ १२ ॥

दर्शने वचनात् ॥ १३ ॥

यत्तु दर्शनमुक्तं तद्वचनम् ॥ १३ ॥

अविभवति गृहपत्यन्वारम्भः ॥ १४ ॥

यत्र पुनः पदार्थबहुत्वस्याविभवः पुरुषार्थरूपतापि गम्यते। यथाग्न्यन्वाधाने ममाग्ने वर्चो विहवेष्वस्त्वित्येवमादि। तत्र गृहपतेः कुर्वतोन्वारम्भः कर्त्तव्यः। सर्वैरेव हि तत्कृतो भवतीति ॥ १४ ॥

परार्थेष्वेकः कृतत्वात् ॥ १५ ॥

यत्पुनः क्रत्वभिनिर्वृत्त्यर्थमेव कर्म। यथा पात्रासादनमाज्यावेक्षणं वा तत्रैकस्यैव कर्तृत्वम्। कृतत्वात्पदार्थस्य ॥ १५ ॥

अग्निं चेष्यमाणः समारोह्य गृहपतिर्मध्ये

मन्थत्यर्द्धश इतरे दक्षिणोत्तराः ॥ १६ ॥

ते यद्यग्निं चेष्यमाणा भवन्तीति वचनाच्चेष्यमाणा इत्युक्तम । समारोह्येति च पूर्वकालता मात्रे ल्यबादेशो न समानकर्तृकतायां चोदको मा बाधीति । गृहपतिर्मध्ये मन्थनं करोति । अर्द्धश इतरे दक्षिणोत्तरा मन्थन्ति ॥ १६ ॥

१ गृहपत्याहवनीयेऽङ्गारप्रासनम् ॥ १७ ॥

तत्र प्रजापत्यः पशुः ॥ १८ ॥

तत्र विहारे प्राजापत्यः पशुर्भवति । पुनर्ग्रहणाच्चाहर्गणे प्राजापत्यस्य नियमः । तथा चाश्वमेधे नियमदर्शनं भवति । प्राजापत्यमालभ्योत्सीदन्तीष्टय इति ॥ १८ ॥

आज्येन पत्नीसंयाजा गृहपतिवर्जम् ॥ १९ ॥

गृहपतेरेव गार्हपत्ये जाघन्या पत्नी संयाजयन्त्याज्येनेतरे प्रतियजन्त आसत इति वचनात् ॥ १९ ॥

तदहर्दीक्षा ॥ २० ॥

दीक्षायाः पशोश्चैककालतोच्यते । तत्र दीक्षकाले पशुः कर्त्तव्यः । न पशुकाले दीक्षा । एवं सोमकालावरोधो न भवति इतरस्याविरोधात् ॥ २० ॥

अशक्तौ नियतक्रिया समारूढनिर्मथि-
तेषु सर्वत्र ॥ २१ ॥

पशुदीक्षयोरेककालता ऽशक्तौ स्वकालेपशुं कृत्वा समारोपनिर्मथनपूर्विका नियतानां क्रियाः । सर्वत्रग्रहणाच्च त्रिष्वपि मन्थपक्षेषु ॥ २१ ॥

दीक्षाकालउदग्वंशायां पूर्ववमन्थनम् ॥ २२ ॥

---

१ आहवनीयेग्नौ गृहपतिरङ्गारान् क्षिपतीत्यर्थः ।

उदग्वंशायामिति नियमः । पूर्ववदिति यथा पशावुक्तम् ॥ २२॥

गार्हपत्ये प्रासनमत्र ॥ २३ ॥

अङ्गारस्य भवति ॥ २३ ॥

आहवनीयस्ततः ॥ २४ ॥

उद्ध्रियते दक्षिणाग्निश्च तुल्यन्यायत्वात् ॥ २४ ॥

तत्र दीक्षा ॥ २५ ॥

भवति ॥ २५ ॥

उपवसथप्रभृति प्रागग्नीषोमप्रणयनादुपशमय्य चिनोत्येनाञ्छालाद्वार्याद्दक्षिणोत्तरान्धिष्ण्यवत् ॥ २६ ॥

अग्नीषोमप्रणयनात् प्राग्दक्षिणोत्तरान् गार्हपत्यानुपशमय्य शालाद्वार्याद्दक्षिणोत्तरांश्चिनोति गार्हपत्यान्धिष्ण्यवत् ॥ २६ ॥

श्रुतेः ॥ २७ ॥

अथेतरेभ्य उपवसथे धिष्ण्यानिति । धिष्ण्यानित्यसत्यपि वतिप्रत्यये वत्यर्थो गम्यते । अतस्मिंस्तच्छब्दस्य तद्वदतिदेशार्थत्वात् ॥ २७ ॥

वा यथोक्तं गृहपतेः ॥ २८ ॥

वाशब्दात्पक्षो विपरिवर्त्तते । न धिष्ण्यवच्चिनोति । किं तर्हि-यथोक्तं गृहपतेः गार्हपत्यस्य चयनं तथेतरेषामपि । गार्हपत्याविशेषात् । धिष्ण्यशब्दस्तर्हि कथम् । संज्ञावचन इत्यदोषः ॥ २८ ॥

आग्नीध्रीय उद्यतेङ्गारमेकैकः हरन्ति प्रतिचिति शालाद्वार्यात् ॥ २९ ॥

उद्यत एवैष आग्नीध्रीयोग्निर्भवत्यथैतं एकैकमेवोल्मु-

कमादाय यथा धिष्ण्यं विपरायन्तीति । तच्च यजमाना एव ॥२९॥

प्रत्यग्नी सवनीयपुरोडाशा भूयो हविरुच्छि-
ष्टमसत्समाप्त्या इति श्रुतेः ॥ ३० ॥

नाना पुरोडाशता च द्वादशाहिको धर्मः सूत्राम्नानात् । प्रयोजनं विकारेष्वैकाहिकेषु न भवति ॥ ३० ॥

पत्नीसंयाजाश्च पूर्ववत् ॥ ३१ ॥

भवन्ति ॥ ३१ ॥

गृहपतिं वा पर्युपविश्य मन्थन्ते ॥ ३२ ॥

वाशब्दो विकल्पार्थः[१] ॥ ३२ ॥

गृहपतिः प्रथमः प्रथमः सर्वत्र ॥ ३३ ॥

सर्वपक्षेषु ॥ ३३ ॥

जातं जातं गृहपतिगार्हपत्ये प्रास्यन्त्युभयत्र ॥३४॥

पर्युपवेशनपक्षे पशौ दीक्षायां चोभयत्र प्रहरणात् ॥ ३४ ॥

उपवसथप्रभृति तुल्यं सर्वेषु ॥ ३५ ॥

उपवसथप्रभृति यदुक्तं तत्पक्षत्रयेपि तुल्यं भवति नाना गार्हपत्या इति यदुक्तं भवति ॥ ३५ ॥

तृतीयं पक्षान्तरमुच्यते—

अरण्योर्बाहुर्गृहपतेर्य इतोऽग्निर्जनिष्यते स नः
सह यदनेन यज्ञेन जेष्यामोऽनेन पशुब-

---

१ इतरे सत्त्रिणो गृहपतिं सर्वतो वेष्टयित्वा पर्युपविश्य मन्थन्त इत्यर्थः ।

न्धेन तन्नः सह सह नः साधुकृत्या नाना पापकृत्या य एव पापं करवत्तस्यैव तदित्युक्त्वा गृहपतिः समारोहयते स्वौ प्रथमम् ॥ ३६॥

अथेदं तृतीयं गृहपतेरेवारण्योः स्संवदन्त इति वचनात्। गृहपतिः समारोहयते स्वावग्नी प्रथमम ॥ ३६ ॥

यथास्वं वेतरे ॥ ३७ ॥

गृहपतिर्वेति विकल्पः। गृहपतिं हि प्रकृत्य श्रूयते। अथेतरेऽथ: समारोहयति:स्ववैव समारोहयन्ति ॥ ३७ ॥

अस्मिन्नेव पक्षे अयमपरो विशेषः—

दीक्षाकाले संवादप्रभृति पशुबन्धस्थाने सत्त्रेणेति ॥ ३८ ॥

पशौ अरण्योर्बाहुः गृहपतिरित्येतस्मिन्पशुबन्धेनेति यत्तत्स्थाने सत्त्रेणेति प्रयोगः ॥ ३८ ॥

एकाहवद्वोत्तमे शालागार्हपत्यपुरोडाशपत्नीसंयाजाः ॥ ३९ ॥

एकाहवदिति उत्तमे पक्षे वा प्राग्वंशा शाला भवति वोदग्वंशेति विकल्पः। उपवसथप्रभृति नानागार्हपत्येषु प्राप्तेषु विकल्पेन गार्हपत्यैकत्वमुच्यते। पुरोडाशपत्नीसंयाजानामप्येवमेव ॥ ३९ ॥

एकपुरोडाशेषु वृत्यासम्भवादैन्द्रं पञ्चशरावमोदनं निर्वपेत्पुरोडाशं वा यद्योदनीयन्ति यद्यपूपीयन्तीति श्रुतेः ॥ ४० ॥

एकपुरोडाशपक्षे कथं नाम व्रत्यस्य सम्भवः स्यादिति ऐन्द्रं पञ्चसरावमोदनं निर्वपेत् पुरोडाशं वा। यद्योदनीयन्ति विकल्पेनो-

वनमिच्छन्ति । यद्यपूपीयन्त्यपूपमिच्छन्ति । तस्य चास्य यागशेषस्य पुरुषार्थता । न पुरुषार्थस्य यागार्थता । अदृष्टार्थत्वात् ॥ ४० ॥

बार्हस्पत्यमेके ॥ ४१ ॥

कुर्वन्ति नैन्द्रम् ॥ ४१ ॥

दीक्षा द्वादशोपसदश्च ॥ ४२ ॥

भवन्ति ॥ ४२ ॥

अध्वर्युर्गृहपतिं दिक्षयति ब्रह्मादींश्चाध्वर्य्योदीन्प्रतिप्रस्थाता प्रतिप्रस्थात्रादीन्नेष्टा नेष्ट्रादीनुन्नेता उन्नेतारं ब्रह्मचारी स्नातको ऽन्यो वा ब्राह्मणो न पूतः पावयेदिति श्रुतेः ॥ ४३ ॥

१अनुपति पत्नीरुत्तर उत्तरः ॥ ४४ ॥

त एवोन्नेतुः ॥ ४५ ॥

ब्रह्मचर्यादयः पत्नीं दीक्षयन्ति ॥ ४५ ॥

दक्षिणाकाले कृष्णाजिनानि धून्वाना दक्षिणापथेन जयन्तो गच्छन्ति यन्मे गदायुषः परागितो ऽगाचां तेऽगद दक्षिणां नयामीतीदमहममुमामुष्यायणममुष्यपुत्रममुष्याः पुत्रं कामाय दक्षिणां नयामीति ॥ ४६ ॥

अमुमामुष्यायणममुष्यपुत्रममुष्याः पुत्रमिति यथास्वमुच्चार-

---

१ उत्तर उत्तरो दीक्षाकर्ता पतिसमीपे तत्पत्नीर्दीक्षयतीत्यर्थः ।

णम् । स चायं सत्र धर्मः । अतश्चाहीने न भवति ऐकाहिकेषु च न भविष्यति ॥ ४६ ॥

पृष्ठ्यः षडहः प्रथमोऽग्निष्टोमश्चतुर्थः षोडश्युक्थ्या इतरे ॥ ४७ ॥

षण्णामह्नां पृष्ठ्य इतीयं संज्ञा । सा च वैदिकी दृश्यते च तया संव्यवहारः । अभिप्लवं पूर्वं पुरस्ताद्विषुवत उपयन्ति पृष्ठ्यमुत्तरमित्येवमादि ॥ ४७ ॥

तत्रातिग्राह्यग्रहणं त्र्यहे पूर्वेऽग्ने पवस्वोत्तिष्ठन्नदश्रमित्यन्वहमेवैकम् ॥ ४८ ॥

अतिग्राह्यान्हि प्रकृत्य ब्रूयात् तान्वै पृष्ठ्ये षडहे गृह्णीयात्पूर्वे त्र्यह आग्नेयमेव प्रथमहन्यैन्द्रं द्वितीये सौर्यं तृतीय इति ॥ ४८ ॥

उत्तरे वा ॥ ४९ ॥

अतिग्राह्यग्रहणमेवमेवान्वहम् । तानु हैक उत्तरे त्र्यहे गृह्णन्तीति श्रुतेः ॥ ४९ ॥

उभयोर्वा ॥ ५० ॥

त्र्यहयोर्ग्रहणम् । एवमपि हि श्रूयते । पूर्व एवैनांस्त्र्यहे गृहीत्वाथोत्तरे त्र्यहे गृह्णीयादिति । पक्षत्रयं विकल्पेन । सम्प्रदाये तु पक्षद्वयम् । पूर्वे वा त्र्यहे उभयोर्वेति ॥ ५० ॥

माहेन्द्रमनुहोमः ॥ ५१ ॥

अतिग्राह्याणाम् ॥ ५१ ॥

अग्ने वर्चस्विन्निन्द्रौजिष्ठ सूर्यभ्राजिष्ठेति भक्षणं यजमानैः ॥ ५२ ॥

सह होमाभिषवकर्तृयजमानानामपूर्वभक्षविधानम् । न हि तत्प्रत्याम्नायः ॥ ५२ ॥

पृष्ठकाले रथसꣳसारणं प्रथमे दक्षिणेन वेदिम् ॥५३॥

माहेन्द्रग्रहयाज्याभ्यासस्तोत्रं पृष्ठम् । तत्काले दक्षिणेन वेदिं रथसंसारणं पृष्ठ्यस्य प्रथमे ऽहनि ॥ ५३ ॥

द्वितीये दुन्दुभिशब्देनोपाकरणम् ॥ ५४ ॥

द्वितीये ऽहनि दुन्दुभिशब्देन पृष्ठ्योपाकरणम् ॥ ५४ ॥

तृतीय औपवाजनैः ॥ ५५ ॥

उपवाजना व्यजनका उच्यन्ते१ ॥ ५५ ॥

चतुर्थे ऽरणिभ्यां मन्थनं चोद्गातुरूरौ होमश्च ॥५६॥

चतुर्थे ऽहनि अरणिभ्यां मन्थनं चोद्गातुरूरौ होमश्चाहवनीये ॥ ५६ ॥

पञ्चमे २सावकयोदपात्र्या ॥ ५७ ॥

उपाकरणम् ॥ ५७ ॥

षष्ठे सांवाशिनेन ॥ ५८ ॥

सांवाशिनशब्दार्थो ऽप्रसिद्ध इत्यत आह—

मातृभिर्वत्सान्त्सꣳसृज्य सदः पूर्वेण व्यावर्त्तयन्ति ॥ ५९ ॥

स्वयमृतुयाजेज्याऽर्वाञ्चमद्य यय्यं नृवाहरणꣳ रथं युञ्जाथामिह वां विमोचनं पृङ्क्तꣳ हवीꣳषि मधुना हि कं गतमथा

१ तैस्तृतीये ऽहनिपृष्ठ्योपाकरणमिति शेषः ।
२ शेवालसंयुक्तया पात्र्येत्यर्थः ।

सोमं पिबतं वाजिनीवसू इति ॥ ६० ॥

सा चाध्वर्युप्रतिप्रस्थात्रोः । ताभ्यां हि प्रेषिताभ्यां प्रकृतावुक्तं होतरेतद्यजेति । तेन चाश्विनाविष्टौ इयमपि द्विवचनान्तत्वात् आश्विनयाग एवेति गम्यते ॥ ६० ॥

१होतृप्रत्ययः प्रतिगरः ॥ ६१ ॥

माहेन्द्रग्रहशस्त्रे ॥ ६१ ॥

प्राकृतं चान्यार्थत्वादितरेषाम् ॥ ६२ ॥

प्राकृतं च प्रतिगरपदं प्रवर्त्तते । अन्यार्थत्वादितरेषां होतृकाणां प्रतिगरपदानामदृष्टार्थत्वात् । एवं च कृत्वा स्तोत्रोपाकरणमपि प्राकृतं प्रवर्त्तते । अदृष्टार्थत्वाद्रथसंसारणादीनाम् ॥ ६२ ॥

षडहान्ते न बहु वदेत् नान्यं पृच्छेत् नान्यस्मै प्रब्रूयात् ॥ ६३ ॥

तच्च क्रत्वर्थस्वाध्यायविषयमिति सम्प्रदायः । तत्र हि प्रश्नप्रत्याख्यानानि सम्भवन्ति । षडहान्तग्रहणाच्च तदन्त एव भवति न विकृते षडहे ॥ ६३ ॥

मधोः प्राशनं घृतस्य वा ॥ ६४ ॥

तच्चैतद्धर्ममात्रं दृष्टार्थासम्भवात् ॥ ६४ ॥

उक्थ्याश्छन्दोमास्त्रय उत्तरे ॥ ६५ ॥

उत्तरे छन्दोमास्त्रय उक्थ्याः ॥ ६५ ॥

अत्यग्निष्टोमो ऽविवाक्यं दशमम् ॥ ६६ ॥

अत्यग्निष्टोमसंस्थमविवाक्यसंज्ञं दशममहर्भवति ॥ ६६ ॥

---

१ अस्मिन् पृष्ठ्ये षड़हे होतृवेदे यत्र यत्र यादृशो विहितः प्रतिगरस्तत्र तत्र तथा भवतीत्यर्थः ।

पत्नीसंयाजान्तान्यहान्यन्त्यवर्जम् ॥ ६७ ॥

तत्रैतत्पदार्थपर्यवसानं न तदन्ताङ्गरीतिविधानम् । अवभृथस्य दीक्षोन्मोचनार्थत्वात्सर्वान्ते ऽवभृथः । तत्र समिष्टयजुरन्तपर्यवसाने प्राप्ते पत्नीसंयाजान्तान्यहानि सन्तिष्ठन्त इति वचनादिह पर्यवसानम् । द्वादशाहमृद्धिकामा उपेयुरिति युगपत्परिसमाप्तिरित्यत इदमुच्यते अन्त्यवर्जमिति ॥ ६७ ॥

एकैको वाग्यतः सोमं रक्षत्या बोधनात् ॥६८॥

तेषामेकैक एव वाचं यम आस्ते वाचमाप्यायय स्तया पीनया यातयाम्न्योत्तरमहस्तन्वत इतरुत्तराहः शेषभावं दर्शयति ॥ ६८ ॥

वसतीवरिपरिहरणादि वा ॥ ६९ ॥

यतवाक्त्वं भवति उत्तराहः शेषभूतत्वात् ॥ ६९ ॥

इतरे विसृज्यन्ते स्वाध्यायाय समिद्भ्यो वा ॥७०॥

इतरे दीक्षिताः स्वाध्यायार्थं समिदर्थं च गच्छन्ति । अथेतरे विसृज्यन्ते समिद्द्वारा वा स्वाध्यायाय वा। स्वाध्यायश्चोत्तराहः शेषभूतो नित्यः प्रतिषेधात् । वाशब्दश्चार्थे द्रष्टव्यः । सोमरक्षितात्विहस्य एव स्वाध्यायं करोति । समिधश्चाप्यानीयन्ते । कार्यार्थत्वादुभयोः ॥ ७० ॥

तत्राप्यशनम् ॥ ७१ ॥

अशनमपि तत्र गतानां भवति तत्राप्यश्नन्तीति वचनात्॥७१॥

दशमे वा सन्निधेः ॥ ७२ ॥

दशमेव वा ऽहनि समित्स्वाध्यायोपगमो भवति । तत्सन्निधौ हि शिष्यते सर्वत्र प्रकरणात् सन्निधिः क्रमः स प्रकरणेन बाध्यते। तस्मात्सर्वत्रैव ॥ ७२ ॥

अस्तमिते समिदाधानं सर्वेषु ॥ ७३ ॥

सर्वेष्वहःसु यजमानेषु अग्निषु च प्रतिपत्तव्यम् शाखान्तरात्॥७३॥

दशमे ऽपराह्णे ऽप उपस्पृश्य शालाप्रवेशनम् ॥७४॥

दीक्षितानाम् ॥ ७४ ॥

शालाद्वार्येऽन्वारब्धेष्विह रतिरिति जुहोति ॥७५॥

तेषु समन्वारब्धेष्वेते आहुती जुहोतीति श्रुतेः ॥ ७५ ॥

अपरामुपसृजन्निति ॥ ७६ ॥

आहुतिं जुहोति ॥ ७६ ॥

उत्तरेण परिक्रम्यापरेण हविर्धानं प्रविश्यो-त्तरस्य हविर्धानस्यापरकूबरीमालभ्य सत्रस्य-र्द्धिंगायन्ति सत्रस्य ऋद्धिरिति ॥ ७७ ॥

शालाद्वार्यादुत्तरेणपरिक्रम्यापरेण द्वारेण हविर्धानम्प्रविश्य उत्तरस्य हविर्धानस्य दक्षिणामपरकूबरीमालभ्य सत्रस्यर्धिं गायन्ति सत्रस्यऋद्धिरित्याहुः सर्व एव दीक्षिताः ॥ ७७ ॥

उत्तरवेदिश्रोण्यां वोत्तरस्याम् ॥ ७८ ॥

सत्रस्यर्धिगानं कुर्वन्ति । वाशब्दाद्विकल्पः । शा स्त्रस्य तुल्यत्वात् ॥ ७८ ॥

युवं तमिति दक्षिणस्याधोक्षं प्राञ्चो निष्क्रामन्ति ॥ ७९ ॥

युवं तमित्यनेन मन्त्रेण दक्षिणस्य हविर्धानस्य अधोऽक्षं प्राञ्चो निष्क्रामन्ति । सदः प्रविश्य पूर्वेण स्वासनेषूपविशन्ति । पूर्वेण द्वारेण सदः प्रविश्य धिष्ण्याऽव्यवायेन स्वासनेषूपविशन्ति ॥ ७९ ॥

ग्रहं गृह्णाति प्रजापत्यं वायुं पृथिव्या पात्रे-ण ग्रहणसादनस्तोत्रोपाकरणहोमभक्षाहरण-

भक्षणानि मनसा ॥ ८० ॥

कर्त्तव्यानि ॥ ८० ॥

चतुर्होतृव्याख्यानं हेतुः ॥ ८१ ॥

शस्त्रं भवति ॥ ८१ ॥

गृहपतिरजानति ॥ ८२ ॥

होतर्यजानति गृहपतिर्व्याचक्षीत ॥ ८२ ॥

प्रतिगृणात्परात्सुरिमे यजमाना भद्रमेभ्यो यजमानेभ्यो ऽभूदिति ॥ ८३ ॥

चतुर्होतृव्याख्याने प्रतिगरः ॥ ८३ ॥

ब्रह्मोद्यं वदन्ति ॥ ८४ ॥

तत्र ज्ञायते किमित्यत आह—

प्रजापतेरगुणाख्यानम् ॥ ८५ ॥

तत्कुतो ऽर्थवादात् प्रजापतिमेव तत्परिवदन्ते ॥ ८५ ॥

अप्रतिभायां वा तद्वादः ॥ ८६ ॥

प्रजापतिं परिवदितुं प्रतिभैव नास्ति तस्य विधिप्रतिषेधाभावात् । तस्मादसदेतत् ॥ ८६ ॥

आश्वमेधिकं वा नामधेयात् ॥ ८७ ॥

आश्वमेधिकं वा ब्रह्मोद्यम् । कुत एतत् । नामधेयात् । नामधेयं हि ब्रह्मोद्यमिति । तत्रैव प्रतीतिं जनयति ॥ ८७ ॥

अनस्तमिते गृहीत्वौदुम्बरीं वाचं यच्छन्ति ॥ ८८ ॥

तत्र प्रतिपत्तिपरिसमाप्त्युत्तरकालम् पत्नीसंयाजान्ते हि सत्त्रोत्थानम् । दशमेहनि सत्त्रोत्थानं क्रियत इति ॥ ८८ ॥

अस्तमिते निष्क्रम्यापरेणोत्तरवेदिमासते प्रतिप्रस्थाता वसतीवरीः परिहरति ॥ ८९ ॥

वचनात् ॥ ८९ ॥

वाग्विसर्जनं सत्रकामेन ॥ ९० ॥

येन कामेन सत्रमारब्धं तेन वाग्विसर्जनं असौ नः कामः समृध्यतामिति ॥ ९० ॥

पृथक्कामेषु भूर्भुव इति ॥ ९१ ॥

वाग्विसर्जनम् । य उ अनेककामाः स्युर्लोककामा वा प्रजाकामा वा पशुकामा वा ऽनेनैव वाचं विसृजेरन् भूर्भुवः स्वरिति ॥ ९१ ॥

१सुब्रह्मण्याह्वानं गृहपतेर्यं वाह सुब्रह्मण्य उपा मा ह्वयस्वेत्युक्त्वा समिदाधानम् ॥ ९२ ॥

यस्य यस्य सुब्रह्मण्याह्वानं स सुब्रह्मण्य उप माह्वयस्वेत्युक्त्वा समिदाधानं करोति ॥ ९२ ॥

अप उपस्पर्शनाद्येतत्सत्त्रोत्थानम् ॥ ९३ ॥

सत्त्रोत्थानमिति नामधेयम् । तच्च संव्यवहारार्थम् । दशरात्रो ऽसत्त्रोत्थान इति ॥ ९३ ॥

अतिग्राह्यषोडशिप्रसङ्गेनेदमुच्यते—

अन्तराग्रयणोक्थ्या वागन्तुस्थानं ग्रहाणाम् ॥ ९४ ॥

आग्रयणोक्थ्यावन्तरेणागन्तवो ग्रहा ग्राह्याः ॥ ९४ ॥

प्रातःसवनेतिग्राह्यान्गृहीत्वा षोडशिनं खा-

---

१ अथवा गृहपतिर्यं ब्रह्मादिकं सत्त्रिणं प्रत्याह स करोतीत्यर्थः ।

दिरेण चतुस्त्रक्तिनातिष्ठ युक्ष्वा हीति वा ॥९५॥

तं वै प्रातः सवने गृह्णीयादाग्रयणं गृहीत्वेति वचनात् । ततः षोडशिनं गृह्णाति । खादिरेण चतुःस्रक्तिना तिष्ठ युक्ष्वा हीति वा मन्त्रविकल्पः । अतिग्राह्यबहुत्वस्याभावाच्च बहुवचनमुच्चारणार्थम् । अतिग्राह्यषोडशिनोः पौर्वापर्यं शाखान्तरात् । अस्यापि हि ग्रहणमाग्रयणादुत्तरमेव तं वै प्रातःसवने गृह्णीयादाग्रयणं गृहीत्वेति ॥ ९५ ॥

माध्यन्दिने वाग्रयणादुत्तराः ॥ ९६ ॥

षोडशी गृह्यते । एवमपि हि श्रूयते । माध्यन्दिनेवैनꣳ सवने गृह्णीयादाग्रयणं गृहीत्वेति ॥ ९६ ॥

धाराग्रहान्ते वाऽतिग्राह्यान् ॥ ९७ ॥

माध्यन्दिने वैनान्त्सवने गृह्णीयादुक्थ्यं गृहीत्वेति श्रुतेः ॥९७॥

पूतभृतो वोपाकरिष्यन्पृष्ठम् ॥ ९८ ॥

षोडशिनं गृह्णाति । पृष्ठ्यमुपाकरिष्यन्नतिग्राह्यान्गृह्णातीति योगविभागः । एवं चातिग्राह्याणां कालत्रयम् । षोडशिग्रहस्य तु चत्वारः कालाः । अन्तराग्रयणोक्थ्यौ तृतीयसवने कण्वपाठाच्चतुर्थः कालः ॥ ९८ ॥

अपो निधायाꣳश्वदाभ्यग्रहणमौदुम्बरेण चतुःस्रक्तिना ॥ ९९ ॥

अंशुग्रहणे वाच्ये ऽदाभ्यग्रहणोक्तिः सन्नियोगशिष्टार्था ॥९९॥

अꣳशोस्तूष्णीꣳ सर्वम् ॥ १०० ॥

वक्ष्यमाणकं पदार्थजातम् ॥ १०० ॥

अनुच्छ्वसंश्चेच्छन् ॥ १०१ ॥

वक्ष्यमाणकमेव ॥ १०१ ॥

अध्यादानांशुनिवपनोपमार्जनसकृत्प्रहरण-
ग्रहणहोमाद्धिरण्यं चोपजिघ्रति ॥ १०२ ॥

अथ हिरण्यमभिव्यनक्तीति वचनात् ॥ १०२ ॥

उद्यम्य वा प्रहरणम् ॥ १०३ ॥

स चायं विकल्पः । शास्त्रस्य तुल्यत्वात् ॥ १०३ ॥

सत्रसहस्रसर्ववेदसवाजपेयराजसूयविश्वजि-
त्सर्वपृष्ठयेषु ग्रहणमवकाश्यश्चेत् ॥ १०४ ॥

यजमानः ॥ १०४ ॥

द्वादशवत्सतर्यो गर्भिण्यो दक्षिणाऽसत्त्रे ॥ १०५ ॥

अदक्षिणत्वात्सत्राणामसत्त्र इत्युक्तम् ॥ १०५ ॥

बुभूषतोऽदाभ्यं गृह्णाति ॥ १०६ ॥

सन्नियोगशिष्टत्वाददाभ्यस्य भूतिरिच्छयेष्यते ॥ १०६ ॥

आसिच्य निग्राभ्याः पात्रे तस्मिंस्तूष्णीं त्री-
नंशूनवधायाग्नये त्वा गायत्रच्छन्दसमि-
ति प्रतिमन्त्रम् ॥ १०७ ॥

अंशुपात्रे निग्राभ्यास्तूष्णीमासिच्य त्रीनंशूनवधायाग्नये त्वा गायत्रच्छन्दसमिति प्रतिमन्त्रम् । मन्त्राभावात् तूष्णीमिति लौकिकवागुच्चारणप्रतिषेधः ॥ १०७ ॥

उपयामः सर्वत्राविशेषात् ॥ १०८ ॥

सर्वेष्वेवांश्ववधानेषूपयामो भवति । कुत एतत् । सर्वैर्हि योगोविशिष्टः । यथाद्ये तथोपरितनयोरपि । तस्मादुपयामस्यानुषङ्गः ॥ १०८ ॥

किं च—

विग्रहादित्यग्रहप्रतिषेधाच्च ॥ १०९ ॥

विग्रहादित्यग्रहेषु च प्रतिषेधो भवति । तं वै नोपयामेन गृह्णीयान्न योनौ सादयेदिति । तथा आदित्यग्रहे तं वै नोपयामेन गृह्णीयादग्रे ह्येवैष उपयामेन गृहीतो भवतीति । तस्मादंश्ववधाने प्रत्युपयाम इति । अन्ये पुनरन्यथा वर्णयन्ति । उपयामः सर्वग्रहेष्वेव भवति यत्राप्यनाम्नातः । कुत एतत् । अविशेषेण हि श्रूयते । तद्य उपयामेन ग्रहा गृह्यन्त इति । विग्रहादित्यग्रहप्रतिषेधाच्च । एवं च सति वाजपेये सप्तदशसु सोमग्रहेषु उपयामः सिद्धो भवति । सम्प्रदाये पुनर्यत्रैवोपयामाम्नानं तत्रैव भवति नान्यत्र । नन्वनेनैव सर्वविषयता भवतु । नेत्युच्यते । न ह्येष विधिः यच्छब्दाभिसम्बन्धात्प्राप्तानुवादोयम् । अंश्ववधाने तु विद्यमानत्वादनुषङ्गो ऽनुमन्यते । विग्रहादित्यग्रहे अनुषङ्गस्य प्रतिषेधः तत्रोपयामो विद्यत एवेत्यभिप्रायः । उपयामगृहीतोसीन्द्राय त्वा बृहद्वते वयस्वत इत्युच्यते । आदित्यग्रहेष्वपि उपयामगृहीतोसीति गृहीत्वा गृहीत्वा द्विदेवत्याननु जुहोति इति सर्वविषयो ऽयमुपयाम इत्ययमेवोद्यतरः पक्षः । न हि विग्रहादित्यग्रहेष्वनुषङ्गप्रतिषेधो युज्यत इति । तस्मात्सर्वविषयतोपयामस्येत्येवं बोध्यमेव ॥ १०९ ॥

अनुष्टुप्त इत्युक्त्वा धूनोत्यꣳशुभिर्वैशीनां त्वेति गच्छन्नाहवनीयं तस्मै त इति जुहोति ॥११०॥

तस्मै त इत्यनेन मन्त्रेण जुहोत्युदकम् ॥ ११० ॥

अꣳशून्त्सोमे निदधात्युशिक्त्वमिति प्रतिमन्त्रम् ॥ १११ ॥

ईषान्तरेणाबृहतार्द्धसोमे ततो हि गृहीतो इति ॥ १११ ॥

अंशुवद्दक्षिणा ॥ ११२ ॥

भवति ॥ ११२ ॥

उक्थ्यान्ते षोडशिचरणमुपस्थायैनं यस्मान्न

जात इति चमसानुन्नीय ॥ ११३ ॥

उक्थ्यप्रचारान्ते षोडशिचरणम् । यस्माज्ञ जात इत्युपस्थायैनं चमसानुन्नीय पूर्वतरम ॥ ११३ ॥

तृणहिरण्यै स्तोत्रोपाकरणमुपास्तमय; सोमोऽत्यरेच्युपावर्त्तध्वमिति कृष्णेऽश्व उपतिष्ठति ॥ ११४ ॥

तृणहिरण्यैः षोडशिनस्तोत्रोपाकरणम् । अस्तमनसमये सोमोऽत्यरेच्युपावर्त्तध्वमित्यनेन मन्त्रेण कृष्णेऽश्व उपतिष्ठति ॥ ११४ ॥

इन्द्रश्च सम्राडिति भक्षणम् ॥ ११५ ॥

भवति ॥ ११५ ॥

आ पात्रप्रक्षालनात्कृत्वा ऽतिरात्रश्चेत्सौम्येन सहाश्विनो द्विकपालः सर्वत्र ॥ ११६ ॥

आ पात्रप्रक्षालनात्कृत्वा षोडशिनः । अत्रैव च षोडशिसंस्था परिसमाप्तिः । उत्तरं आतिरात्रे विशेष उच्यते । सौम्येन सहाश्विनो द्विकपालः कर्त्तव्यः । सर्वत्र ग्रहणात्मातो ऽन्यत्राप्याश्विनो द्विकपाल एव भवति ॥ ११६ ॥

अतिरात्र एवापरो विशेष उच्यते—

त्रयः पर्यायाश्चमसैश्चतुस्तोत्रः पर्यायः ॥११७॥

चमसैर्यागपर्यायास्त्रयः चतुःस्तोत्र एकैकः पर्यायः ॥११७॥

तत्रच—

होतुः प्रथमं प्रथममुक्थ्यवदितरेषु ॥ ११८ ॥

शस्त्रकर्त्तारः ॥ ११८ ॥

तदन्ते चमसानुन्नीय स्तोत्रोपाकरण;

सन्धेः ॥ ११९ ॥

तेषां पर्यायाणामन्ते चमसानुर्धीय सन्धिस्तोत्रोपाकरणम्॥११९॥

होता शꣳसत्याश्विनम् ॥ १२० ॥

पर्यायान्तेष्वप्रवृत्याऽच्छावाको मा भूदिति होतेत्युच्यते ॥१२०॥

शास्त्रान्त आश्विनेन सर्वहुतेन चरति ॥१२१॥

एकप्रदानश्चमसैः ॥ १२२ ॥

आश्विनो भवति वचनसामर्थ्यात्सर्वहुतश्च ॥ १२२ ॥

अश्विभ्यान्तिरोन्ह्यानांꣳ सोमानामनुवाच-नप्रैषौ ॥ १२३ ॥

अत्र भवतः । ज्योतिष्टोमे षोडश्यतिरात्रयोः क्रतुपशवः क्रतु-करणं चोक्तम् । शेषः संस्थाशेषो ऽत्राभिहित इति ॥ १२३ ॥

ऐन्द्राग्नः सवनीयोऽन्वहम् ॥ १२४ ॥

भवति । स चायमन्हां गणधर्मः । तथा च विकृतावैकाहिके-ष्वपि भवति ॥ १२४ ॥

स्तोमायनं वा ॥ १२५ ॥

यथाख्यं भवति ॥ १२५ ॥

एकादशिना वा विहताः ॥ १२६ ॥

भवन्ति ॥ १२६ ॥

अस्मिंश्च पक्षे—

द्वादश आद्यः ॥ १२७ ॥

भवति ॥ १२७ ॥

सर्वसमासो वैन्द्राग्नो वा ॥ १२८ ॥

वेति विकल्पः ॥ १२८ ॥

यावच्छेषमुत्तरेषु ॥ १२९ ॥

उत्तरेष्वहर्गणेषु एकादशिनि यावच्छेषमालब्धव्यम् ॥ १२९॥

काम्यं सत्त्रम् ॥ १३० ॥

नित्यवचनाभावात् । काम्यत्वे प्राप्ते काम्यग्रहणं पृथक्कामानामप्यधिकारप्रज्ञानार्थम् ॥ १३० ॥

अहीने व्यूढच्छन्दसि दशरात्रस्य चतुर्थनवमयोरन्ह्योराग्रयणग्रहणं प्रथमम् ॥ १३१ ॥

तद्यत्रैतद्द्वादशाहेन व्यूढच्छन्दसा यजत इति । व्यूढच्छन्दश्चाहीनोस्ति यमङ्गीकृत्य तद्धातुर्होतुश्छन्दसां व्यूहनमाम्नातम् । तत्र विशेषव्याचिख्यासयेदमाह । दशरात्रस्य चतुर्थनवमयोराग्रयणग्रहणं प्रथमम् ॥ १३१ ॥

शुक्रस्य षष्ठसप्तमयोः ॥ १३२ ॥

प्रथमं ग्रहणं भवति । प्राथम्यं चैन्द्रवायवापेक्षया नोपांश्वन्तर्यामापेक्षया । येनैवमाह । अथैतत्प्रज्ञातमेव पञ्चममहर्भवति तदैन्द्रवायवाग्रान् गृह्णातीति प्रज्ञात एवाहन्यैन्द्रवायवाग्रतान् दर्शयति १३२ ॥

असादनमा पर्वेषां ग्रहणात् ॥ १३३ ॥

पूर्वेषां ग्रहणादर्वागासादनं तस्य ॥ १३३ ॥

परिमार्जनभृति काले हिङ्कृत्य सादनम् ॥१३४॥

यस्य हिङ्कारो विहितः । इतरस्य त्वहिङ्कृत्यैव ॥ १३४ ॥

अव्यूढो वा ॥ १३५ ॥

छन्दसां व्यूहनपक्षेपि वाव्यूढो भवति द्वादशाहः । एवमपि श्रूयत इति ॥ १३५ ॥

उभयतोऽतिरात्रः ॥ १३६ ॥

अयं द्वादशाहो भवति । यात्वन्यतरतोतिरात्रतोक्ता सा विकृतिविषया ॥ १३६ ॥

अतिप्रेषितेऽग्नीदाह श्वः सुत्यामिन्द्राग्निभ्यां प्रब्रवीमि विश्वेभ्यो ब्राह्मणेभ्यः सोमपेभ्यो ब्रह्मन्वाचं यच्छेति ॥ १३७ ॥

सर्वान्प्रैषानतीत्य वर्त्तत इत्यतिप्रेषितो हारियोजनोत्तरकाल इत्यर्थः । तत्राग्नीदाह श्वः सुत्यामिन्द्राग्निभ्यां प्रब्रवीमीत्येवमादि । अयं च श्वस्तनाऽहः शेषभूतः ब्रह्मन्वाचं यच्छेत्ययं त्वऽद्यतनस्यैव । प्रयोजनमैकाहिकेषु विकारेषु द्वादशाहिकेषु च यथार्थ प्रयोगः ॥१३७॥

प्रायणीयेऽद्य सुत्यामेके प्राप्तकालत्वात् ॥१३८॥

प्रायणीयोतिरात्रो द्वितीयेऽहनि परिसमाप्यते । तत्रपार्ष्टिकं प्रथममहर्भवति । तेनैतदुच्यते ऽद्य सुत्यामिति वक्तव्यम् । प्राप्त एव हि काल इति ॥ १३८ ॥

एवं प्राप्त आह—

न पूर्वशेषात् ॥ १३९ ॥

पूर्वस्यैवाह्नः शेषभूतोऽयमतिप्रेषितः । ततश्च श्वःशब्देन कर्मान्तरमुच्यते नाऽहरन्तरम् ॥ १३९ ॥

तस्माच्च श्वोभावात् ॥ १४० ॥

तस्माच्च कर्मणः । श्वःशब्देन कर्मान्तरमुच्यते ॥ १४० ॥

अचोदितत्वाच्च १४१ ॥

न चैवं विधा चोदना विद्यते प्रायणीयेऽद्य सुत्यामिति वक्तव्यमिति ॥ १४१ ॥

अग्निमद्येति च लिङ्गात् ॥ १४२ ॥

अद्यशब्दः कर्मविषयः । अग्निमद्य होतारमवृणीतायं यजमान इति । अन्यस्मिन्नेवाऽहरन्तरे वृतो होता ऽद्यशब्देनोच्यते । तद्य कर्मविषये ऽद्यशब्द उपपद्यते नान्यथेति ॥ १४२ ॥

इदमेव तावद्विचार्यते । किं प्रायणीयात् उत्तरमहस्तस्मिन्नेवाहन्यारब्धव्यमुत द्वितीय इति । किं तावत्प्राप्तम् । सूत्रेणैवोपक्रमः—

प्रायणीयादुत्तरमहः श्वः कालाभावात् ॥ १४३ ॥

प्रायणीयादवसितादुत्तरमहः उत्तरङ्कर्म श्व आरब्धव्यं न तस्मिन्नेवाहनि । कुत एतत् । कालो हि न सम्भवेत् । अत्र प्राग्वाचः प्रवदनात्प्रातरनुवाककालः । तथोपांश्वन्तर्यामयोस्तयोरुदिते ऽन्यतरं जुहोत्यनुदितेन्यतरमिति कालो न सम्भाव्यते । श्वः पुनः क्रियमाणे सम्भवति ॥ १४३ ॥

एवं प्राप्त प्राह—

न सम्पच्छ्रुतेः ॥ १४४ ॥

नैतदेवं श्व आरब्धव्यमिति अद्यैवारभ्यते । कुत एतत् । सम्पच्छ्रुतिर्हि भवति । षट्त्रिꣳशदहो वा एष यद् द्वादशाहः षट्त्रिꣳशदक्षारा वै बृहती तद् बृहतिमभिसम्पद्यत इति । तच्चैवमुपपद्यते। श्वस्तने ऽहन्यारम्भे न षट्त्रिंशद्भिर्व्यवतिष्ठेत । तत्र सम्पच्छ्रुतिर्विरोधः ॥ १४४ ॥

कालो वचनात् ॥ १४५ ॥

यः पुनः कालबाधः स वचनादिति ॥ १४५ ॥

इति श्रीकर्कोपाध्यायकृते कात्यायनसूत्रभाष्ये
द्वादशाहो द्वादशाध्यायश्च समाप्तः ।

# त्रयोदशोऽध्यायः ।

उक्तो द्वादशाहः । तत्सन्निधावेव गवामयनस्य परामर्शोऽस्ति । सौर्यं द्वितीयं पशुमालभते वैषुवते हन्प्राजापत्यं महाव्रत इति गवामयनमेव तावदारभ्यते । पूर्वं धर्मप्राप्त्यर्थमधिकरणम् ।

द्वादशाहधर्माः सत्त्रेषु तद्गुणदर्शनात् ॥ १ ॥

द्वादशाहिका धर्माः सत्त्रेषु प्रवर्त्तन्ते । सत्रात्मकात्सत्त्रेषु तद्गुणा ह्यत्र दृश्यन्ते । अभिप्लवं पूर्वं पुरस्ताद्विषुवत उपर्यन्ति पृष्ठ्यमुत्तरमिति । तथा पृष्ठ्यमुपरिष्टाद्विषुवतः पूर्वमुपन्तीति चेति । पौर्वापर्यविधिपरे वाक्ये द्वादशाहिकं पृष्ठ्यं दर्शयति । न्यायस्तु पूर्वमुक्त एव सामर्थ्यात् गुण एव गुणमनुग्रहीतुं समर्थो नान्यः ॥ १ ॥

गवामयनायैकाष्टकायां दीक्षा ॥ २ ॥

एकाष्टकायां दीक्षेतेति वचनात् ॥ २ ॥

फाल्गुनीपौर्णमासे ॥ ३ ॥

अत्रापि हि वचनम् । फाल्गुनीपौर्णमासे दीक्षेतेति ॥ ३ ॥

चैत्र्याम् ॥ ४ ॥

पौर्णमासे दीक्षेतेति वचनादेव ॥ ४ ॥

चतुरहे वा पुरस्तात्प्राक्पौर्णमास्याः ॥ ५ ॥

पौर्णमासी च फाल्गुनी सा ह्यत्र पूर्वमभिहिता । तस्याः पुरस्ताच्चतुरहे दीक्षेत । एवमपि हि श्रूयते । प्राक्पौर्णमास्याश्चतुरहे दीक्षेतेति ॥ ५ ॥

चैत्र्यानन्तर्यात् ॥ ६ ॥

चैत्री वा चतुरहविशेषणत्वेन प्रतिपत्तव्या सा ह्यनन्तरमेव श्रूयते ॥ ६ ॥

सर्वा वाविशेषात् ॥ ७ ॥

सर्वाः पौर्णमास्यश्चतुरहविशेषणत्वेन प्रतिपत्तव्याः विशेषानवगमात् । एवं च पौर्णमासीशब्दः सर्वत्र प्रवर्त्तमानो न सङ्कोचितः स्यात् ॥ ७ ॥

माघी वा क्रयश्रुतेः ॥ ८ ॥

वाशब्दः पक्षान्तरविग्रहे । माघी वा चतुरहविशेषणम् न पौर्णमासीमात्रम् । एवं हि श्रूयते । प्राक्पौर्णमास्याश्चतुरहे दीक्षितानामेकाष्टकायां क्रयः सम्पद्यत इति । एकाष्टकानाम माघकृष्णाष्टमी ॥ ८ ॥

कुत एतत्—

लोकप्रत्यायात् ॥ ९ ॥

एषा हि लोके एकाष्टकेति प्रसिद्धा ॥ ९ ॥

किं च—

अर्थवादाच्च ॥ १० ॥

अर्थवादश्च भवति । ता उत्तिष्ठन्त ओषधयो वनस्पतयोनूत्तिष्ठन्ति । तान्दीक्षितानुत्तिष्ठन्त ओषधिवनस्पतीनां प्ररोहो भवति । तच्चैवमुपपद्यते । तथा तद्यपोभिनन्दमाना अवभृथमभ्यवयन्ति । एतदप्येवमेव घटते । वनस्पतिप्ररोहोऽपामभिनन्दनं चैत्रोद्देश एव भवति । तस्मान्माघीचतुरहविशेषणम् ॥ १० ॥

पवमानेषूद्गातारमन्वारभेरञ्श्येनोऽसि गायत्रच्छन्दा अनु त्वारभे स्वस्ति मा सम्पारय सुपर्णोऽसि त्रिष्टुप्छन्दा ऋभुरसि जगच्छन्दा इतीतरयोः सवनान्तेषु जयन्ति मयि भर्गो

मयि महो मयि यशो मयि सर्वमिति ॥ ११ ॥

बहुवचनोपदेशात्सर्वे यजमानाः उद्गात्रालम्भसवनान्तजपान् कुर्वन्ति ॥ ११ ॥

सर्वत्रैके ॥ १२ ॥

सर्वत्रैवैक एतदिच्छन्ति ॥ १२ ॥

कुत एतत्—

जयतिशब्दात् ॥ १३ ॥

पुरुषऽह नारायणं प्रजापतिं ह वा च यजस्व यजस्वेत्येवमुक्त्वैतत्सर्वमभिहितमिति ॥ १३ ॥

न प्रकरणात् ॥ १४ ॥

नैतदेवं सर्वत्रैतदिति । येन गवामयनं प्रकृत्यैतच्छ्रूयते । यजतिशब्दोऽप्यत्र गृह्यते प्रकरणमपि । तस्मान्न सर्वत्रैतदुद्गात्रालम्भः सवनान्तजपश्च । गवामयनधर्मत्वादेकाहिकेष्वपि प्रवर्त्तते ॥ १४ ॥

अभिप्लवः षडहोऽग्निष्टोमौ प्रथमान्त्या

उक्थ्या इतरे ॥ १५ ॥

षण्णामन्हामभिप्लव इतीयं वैदिकी संज्ञा। संस्थामात्रनिर्देशश्चाऽत्र संस्थास्त्वैकाहिकाः। एवं ह्याहाऽभिप्लवस्त्र्यहः स्याद्वृद्धिर्ज्योतिर्गौरायुरिति। ज्योतिरादय एव प्रतिलोमानुलोमाः । तथा चाग्निष्टोमौ प्रथमान्त्यौ भवतः उक्थ्या इतरे । एवं चात्र नाम्ना धर्मा एकाहिका भवन्ति न द्वादशाहिकाः। सत्त्रगणधर्मास्तु प्रवर्त्तन्त एव ॥ १५ ॥

अतिरात्राच्चतुर्विंशमहरग्निष्टोम उक्थ्यो वा ॥१६॥

अतिरात्रादवसिताच्चतुर्विंशमहः संज्ञको ऽग्निष्टोम उक्थ्यो वा भवति । गवामयनिकश्चायम् । ततश्च द्वादशाहिका अपि धर्माः प्रवर्त्तन्ते ॥ १६ ॥

चत्वारोभिप्लवाः पृष्ठ्यश्च मासः ॥ १७ ॥

एवं चत्वार उत्तरे ॥ १८ ॥

मासा भवन्ति ॥ १८ ॥

षष्ठे त्रयोभिप्लवाः पृष्ठ्यः ॥ १९ ॥

षष्ठे मासेऽभिप्लवाः त्रयः पृष्ठ्यश्च ॥ १९ ॥

अभिजिदग्निष्टोमः ॥ २० ॥

ननु चायमग्निष्टोमसंस्थ एवाभिजित् किमुच्यते अग्निष्टोम इति । उच्यते । अग्निष्टोमग्रहणादभिजिदन्तरं तत्संज्ञकं गवामयनिकमेतत् । अतश्चात्र द्वादशाहिका अपि धर्माः प्रवर्त्तन्ते ॥ २० ॥

त्रयः स्वरसामानो ऽग्निष्टोमा उक्थ्या वा ॥२१॥

स्वरसामसंज्ञकास्त्रयो भवन्ति अग्निष्टोमा उक्थ्या वा ॥२१॥

अग्निष्टोमो विषुवान् ॥ २२ ॥

विषुवत्संज्ञको ऽग्निष्टोमो भवति ॥ २२ ॥

प्रातरनुवाकः सन्धिवेलायामुदितं यथोक्तं वा ॥२३॥

दिवाकीर्त्यमेतदहर्भवतीति श्रूयते तेनैतदुच्यते सन्धिवेलायामिति । यद्येवम् नेयता चोदकपरिप्राप्तकालबाधः शक्योभ्युपेतुम् । दिवाकीर्त्यता हि ब्राह्मणविषया । अस्य ब्राह्मणं दिवा कीर्त्येत इति । दिवा कीर्त्येत इति दिवा कीर्त्यम् । कीर्त्तनशब्दश्चोच्चारणार्थो नानुष्ठानार्थः । एवं चेद्यथोक्तमेवेत्यवधार्यते ॥ २३ ॥

सौर्य उपालम्भ्यः ॥ २४ ॥

सौर्यं द्वितीयं पशुमालभते वैषुवतेहनीति वचनात् ॥ २४ ॥

उदुत्यमिति ग्रहग्रहणमतिग्राह्यवद्भक्षवर्जम् ॥ २५॥

अतिग्राह्यवच्च विधिर्भवति भक्षवर्जमस्य ॥ २५ ॥

पूर्वपक्षं प्रातिलोमम् ॥ २६ ॥

पूर्वपक्षः प्रातिलोम्येनोत्तरो भवति ॥ २६ ॥

अत्र विशेषमाह—

अभिजित्स्थाने विश्वजिदग्निष्टोमः ॥ २७ ॥

स च—

सर्वपृष्ठश्चेत्सर्वेऽतिग्राह्याः ॥ २८ ॥

भवन्ति । एतदपि चाग्निष्टोमग्रहणाद्विश्वजिदन्तरं नैकाहिक इति । एकाहिकत्वे हि अग्निष्टोमग्रहणं न करोत्याचार्यः कृतं च । तस्माद्विश्वजिदन्तरं गवामयनिकमेतत् । अतश्च द्वादशाहिका अप्यत्र धर्म्मा भवन्ति ॥ २८ ॥

षष्ठे मासे त्रयोभिप्लवा गोऽआयुषी दशरात्रो महाव्रतमग्निष्टोमः ॥ २९ ॥

अत्र दशरात्रे द्वादशाहिको महाव्रतं गवामयनिकं शेषा एकाहिकाः ॥ २९ ॥

महाव्रते विशेषमाह—

प्राजापत्य उपालम्भ्यः ॥ ३० ॥

भवति । प्राजापत्यं महाव्रत इति वचनात् ॥ ३० ॥

ग्रहं गृह्णाति त्रि न इन्द्र वाचस्पतिं विश्वकर्मन्निति वाऽतिग्राह्यवत् ॥ ३१ ॥

गृहीतस्य विधिर्भवति ॥ ३१ ॥

उप मा यन्तु मज्जयस्सनीडा उप मा जुक्षरुप मा मनीषा प्रियामहं तन्वं पश्यमानो मयि रमो देवानां तेजसे ब्रह्मवर्चसायेति भक्षणं यज-

मानैः, पृष्ठ्योपाकरणं १बाणेन शततन्तुना॥३२॥

२मौञ्जास्तन्तवो वैतसं वादनम् ॥ ३३ ॥

वशीषूपविशन्ति प्रेङ्खे होता फलके ऽध्वर्युः प्रतिगृणाति ॥ ३४ ॥

प्रेङ्खशब्देन दोलोच्यते ॥ ३४ ॥

उद्गातासन्द्यां प्रादेशपाद्यां सोमासन्दीवत्॥३५॥

अन्यदन्तर्वेदि ॥ ३६ ॥

वक्ष्यमाणं कर्म भवति ॥ ३६ ॥

अभिगराऽपगरौ ॥ ३७ ॥

अभिगरो दीक्षितस्तुतिः । अपगरश्च निन्दा ॥ ३७ ॥
तदेवमुक्तम्—

३आक्रोशत्येकः प्रशंसत्यपरः ॥ ३८ ॥

पुंश्चलूब्रह्मचारिणावन्योन्यमाक्रोशतः ॥ ३९ ॥

पुंश्चलूर्जघनचपला स्त्री४ ॥ ३९ ॥

शूद्रार्यौ चर्म्मणि परिमण्डले व्यायच्छेते ॥४०॥

---

१ बाणो महति वीणा शतं तन्तवो यस्यासौ शततन्तुः, तेनोपाकरणम् ।

२ अस्मिन् बाणे मौञ्जास्तन्तवो वेतसवृक्षसम्बन्धि वादनमित्यर्थः ।

३ एकः सत्त्रिणो निन्दामपरश्च स्तुतिं करोतीत्यर्थः ।

४ पुमांसं पुमांसं प्रति चलतीति पुंश्चलू वेश्या, सा च ब्रह्मचारी च परस्परं निन्दां कुरुतः ।

निमित्तसप्तमीयम् । चर्म्मणि निमित्तभूते[1] ॥ ४० ॥

[2]जयत्यार्यः ॥ ४१ ॥

[3]मार्जालीयं दक्षिणेन परिवृत्ते मिथुनौ सम्भवति ॥ ४२ ॥

क्षत्रियौ सन्नाहयति दक्षिणां वेदिश्रोणिमपरेण ॥ ४३ ॥

सन्नहनक्रियां कारयति । कारिते चाध्यषेणा क्षत्रियौ सन्नह्यस्वेति ॥ ४३ ॥

मर्माणि त इति कवचं प्रयच्छति ॥ ४४ ॥

क्षत्रियाय ॥ ४४ ॥

तूष्णीमन्येभ्यः ॥ ४५ ॥

बहुवचनोपदेशात्त्रिभ्यः । अन्यशब्दस्य समानजातीयन्याया-त्क्षत्रियेभ्यः ॥ ४५ ॥

त्रिः समन्तं परियन्ति शालामपरेण चात्वालं वशाचर्मकटे विशाख्यां वा स्तीर्णमुच्छ्रितां वा विध्यन्त्यनिष्पत्तम् ॥ ४६ ॥

कटे आस्तीर्णे विशाख्यां वा अनिःसृतपत्रं विध्यन्ति क्षत्रियाः ॥ ४६ ॥

---

[1] शूद्रत्रैवर्णिकौ वर्तुले चर्मणि व्यायच्छेते विरुद्धमात्माभिमुखं आकर्षणां कुर्वाते, मदीयमिदं मदीयमिदमिति स्पर्धया स्वाभिमुखं बलादाकर्षणं कुर्वात इति यावत् ।

[2] तयोस्त्रैवर्णिको जयतीत्यर्थः ।

[3] वर्तुले चर्मणि मार्जालीयं दक्षिणेन स्त्रीपुमांसावित्यर्थः ।

दक्षिणेन चर्मयन्ति त्रिर्विद्ध्वा पुरस्ता-
द्विमोचनम् ॥ ४७ ॥

वितानस्य ॥ ४७ ॥

१सदः स्रक्तिषु दुन्दुभीन्वादयन्ति ॥ ४८ ॥

२अग्नीध्रमपरेण श्वभ्रं सवालधानेन चर्मणाऽवनह्य वालधानेनाहन्ति ॥ ४९ ॥

वालधानं पुच्छमुच्यते ॥ ४९ ॥

३गोधावीणाकाः कांण्डवीणाश्च पत्न्यो वादयन्ति ॥ ५० ॥

उपगायन्ति ॥ ५१ ॥

स्तोत्रस्योपगानं कुर्वन्ति ॥ ५१ ॥

अन्यांश्च शब्दान् कुर्वन्ति ॥ ५२ ॥

ये केचन गानप्रसिद्धा मूर्च्छनादयः४ ॥ ५२ ॥

उदकुम्भान् शिरस्सु कृत्वा मार्जलीयं दास्यः

---

१ चतुः स्वपि स्रक्तिषु ये केचन पुरुषाः सन्ति ते दुन्दुभीन्वादयन्तीत्यर्थः ।

२ आग्नीध्रस्थानस्यापरेण गर्तं खात्वा सपुच्छेन चर्मणा बद्ध्वा पुच्छेनाहन्तीत्यर्थः ।

३ गोधाचर्मणा नद्धा वीणा गोधावीणाकाः, काण्डः शर इत्युच्यते, तन्मय्यो वीणाः, ता उभयविधावीणाः सर्वाः पत्न्यो वादयन्ति, स्तुभिः साम्नृणस्ता उपयागयन्तीत्यर्थः ।

४ मर्दलभेरीपटहादिजन्यानन्यानपि शब्दान् लोकाः कुर्वन्तीतिभावः ।

परियन्ति ॥ ५३ ॥

वाचयत्येनाः पर्यायादिषु ॥ ५४ ॥

एनादास्यः पर्यायादिषु वाचयति ॥ ५४ ॥

हैमहा३ हैमहा३ इति ॥ ५५ ॥

पर्यायानिदानीमाह—

गावो हारे सुरभय इदं मधु गावो गुल्गुलु-
गन्धय इदं मधु गावो घृतस्य मातर इदं
मधु ता इह सन्तु भूयसीरिदं मधु तकात्वयं
प्लवामय इदं मधु शम्या प्रतरतामि वेदं मधु
न वै गावो मन्दारस्य गङ्गाया उदकं पपुः
पपुः सरस्वतीनदीं ताः प्राच्य उज्जिगा-
हीर इदं मधु निगीर्य सर्वा आधीरिदं मधु
मध्वित्याकर्षैः कुशैर्यथेदं मध्विति ॥ ५६ ॥

एवं मध्वित्याकर्षैः कुशैरिति सर्वत्रानुषङ्गः ॥ ५६ ॥

अपसव्यं प्रदक्षिणं चास्तोत्रान्तात् ॥ ५७ ॥

दास्यः परियन्ति१ ॥ ५७ ॥

त्रिस्त्रिर्वा ॥ ५८ ॥

अपसव्यं प्रदक्षिणं च परिगमनम् ॥ ५८ ॥

---

१ अप्रदक्षिणं सकृत्परियन्ति ततः प्रदक्षिणं सकृत्परियन्ति महाव्रतस्य स्तोत्रस्य समाप्ति यावत् ।

निषिच्य मार्जालीये पूर्णां निदधाति ॥ ५९ ॥

निषिच्य यत्र क्वचन प्रदेशे मार्जालीये पूर्णां निदधाति दास्यः ॥ ५९ ॥

अभिगरादिस्तूयमाने सर्वं क्रियते ॥ ६० ॥

स्तूयमाने महाव्रतस्तोत्रे । महाव्रतशब्दश्च एकः क्रतुप्रतिपादकः महाव्रतमग्निष्टोम इति । अपरः स्तोत्रपर्यायः महाव्रतेन स्तुवीतेति अत्र च श्रूयत इति । स एष संवत्सरस्त्रिमहाव्रतश्चतुर्विंशे महाव्रतं विषुवति महाव्रतं महाव्रतएव महाव्रतमिति । त्रिष्वपि क्रतुषु महाव्रतस्तोत्रं भवतीति संप्रदायः । महाव्रत एव महाव्रतमित्यपरे । एवं हि श्रूयते । त्रिमहाव्रतं प्रकृत्य ते तेजस्विन आसुः सत्यवादिनः संशितव्रताः यैस्तु त्रिमहाव्रतत्वमनुष्ठितमन्ये आचार्या इति । अथ य उ हैनमप्येतर्हि तथापेर्युर्यथा तैरनुष्ठितम् । एषां दोषमाह । यथा अपात्रमुदकं अभिक्तौ विमृत्येदेवं हैव ते विमृत्येयुः । अतश्च उपर्युपयन्ति महाव्रतक्रतौ महाव्रतं स्तोत्रमिति अमहाव्रते दोषमुद्भाव्य महाव्रते महाव्रतस्तोत्रं विदधाति । अतश्च विकल्पो न महाव्रत एव महाव्रतमिति ॥ ६० ॥

अतिरात्रः श्वः ॥ ६१ ॥

प्राप्तत्वादवाच्यमिति चेत् । उच्यते । संवत्सरसत्रत्वात्पूर्णे संवत्सरे ऽतिरात्राभावो मा भूदित्यतिरात्रग्रहणम् । यद्येवमतिरात्रः किमिति भवति । अथैतदहरत्येति यद्वैषुवतमिति वचनात् ॥ ६१ ॥

तिस्रोऽनूबन्ध्या मैत्रावरुणी वैश्वदेवी बार्हस्पत्याः॥ ६२॥

अत्र च द्रव्याभ्यासो न कर्मबहुत्वम् । अभ्यस्तरूपमेकं कर्म प्रकृतावेकत्वात् ॥ ६२ ॥

संवत्सरावरेषु सत्त्रेष्वसारस्वतेषु सहस्रदाक्षिणावरेषु च ॥ ६३ ॥

क्रतुषु तिस्रोनूबन्ध्या भवन्ति । एवं श्रूयते स यः सहस्रं वा भूयो वा दद्यात्स एताः सर्वा आलभतेति । तथा अथो ये दीर्घसत्र-

मासीरं संवत्सरं वा भूयो वा त एनाः सर्वा आलभेरन्निति ॥६३॥

अनूबन्ध्यावपाहोमान्ते दक्षिणस्यां वेदिश्रोणौ सर्वकेशश्मश्रुलोमवपनम् ॥ ६४ ॥

भवतीति सूत्रशेषः ॥ ६४ ॥

पत्न्यश्च ॥ ६५ ॥

वपने नाभिसंबध्यन्ते ॥ ६५ ॥

त्रैधातव्युदवसानीया सर्वत्र ॥ ६६ ॥

सर्वत्र ग्रहणेन संवत्सराणि असारस्वतानि सहस्रदक्षिणावराश्च क्रतवो गृह्यन्ते । तुल्यं हि ब्राह्मणमत्रानूबन्ध्या विधायकं त्रैधातवीया विधायकं च ॥ ६६॥

अवभृथादुदेत्य ज्योतिष्टोमोऽग्निष्टोमः पृष्ठ्यशमनीयः ॥ ६७ ॥

अवभृथग्रहणं समाप्त्युपलक्षणार्थम् । ननु चात्राग्निष्टोम एव भवति संस्थान्तरस्यानुक्तत्वात् व्यर्थमग्निष्टोमग्रहणम् । उच्यते । गुणकामानां प्रवृत्तिज्ञानार्थमित्यदोषः । पृष्ठ्यशमनीय इति च संज्ञा ॥ ६७ ॥

सहस्रदक्षिणो वा ॥ ६८ ॥

वा प्राकृतदक्षिणः ॥ ६८ ॥

एकाहमेके ॥ ६९ ॥

इच्छन्ति ॥ ६९ ॥

सत्त्राङ्गं प्रकरणात् ॥ ७० ॥

स च पृष्ठ्यशमनीयः सत्त्रस्याङ्गं भवति । तद्धि प्रकृत्य श्रूयते

भवभृथादुदेत्य ज्योतिष्टोमाऽग्निष्टोमः पृष्ठ्यशमनीय इति ॥ ७० ॥
किं च—

फलाऽश्रुतेश्च ॥ ७१ ॥

न चात्र फलं श्रूयते । तस्मादपि सत्त्राङ्गम ॥ ७१ ॥

न फलं न्यायात् ॥ ७२ ॥

नैतदेवं सत्त्राङ्गमिति । न्यायेन हि फलमत्र परिकल्प्यते ॥७२॥

कालप्राधान्याच्च ॥ ७३ ॥

अपि चाऽस्य कालः प्रधानः शब्दः सत्त्रादुदवसायेति । एवं प्राप्ते पुनर्व्यावर्त्तते । सत्त्राङ्गमेव प्रकरणात् । फलवत्सत्त्रसन्निधौ तदङ्गतैव न्याय्या एवं च फलं न कल्पयितव्यं भवति । पृष्ठशमनीय इति चार्थानुगता संज्ञा । पृष्ठानां सत्र नियुक्तानामुपज्ञातश्रमाणां शमनं करोतीति पृष्ठशमनीयः । सारस्वतेषु च प्रतिषेधात् । अपृष्ठशमनीयानि सारस्वतानीति ॥ ७३ ॥

सहस्रदक्षिणे त्रिरात्रे प्रतिविभज्य नयन्रोहिणीमुपध्वस्तामप्रवीतामतिरेचयति त्रिरूपां वा ॥ ७४ ॥

अहीनः सहस्रदक्षिणस्त्रिरात्रस्तत्र प्रतिविभागेन प्रत्यहं दक्षिणापथेन दक्षिणानयन्रोहिणीं वर्णान्तरोपध्वस्तां अप्रवीतामतिरेचयति । त्रिरुपां वेति विकल्पः । एवमेव हि श्रूयत इति ॥ ७४ ॥

आद्येहन् प्रथमां नयेदन्त्ये वा पश्चात् ॥ ७५ ॥

आद्येऽहनि पक्षे गवां प्रथमां नयेत् । अन्त्ये वाऽहनि पश्चादिति ॥ ७५ ॥

हविर्धानाग्नीध्रान्तरे द्रोणकलशमेनामाघ्रापयत्याजिघ्रेति ॥ ७६ ॥

हविर्धानाग्नीध्रान्तरव्यवस्थितामेतां रोहिणीं द्रोणकलशमाघ्रापयत्याजिघ्रेत्यनेन मन्त्रेण ॥ ७६ ॥

इडे रन्त इति दक्षिणेऽस्याः कर्णे यजमानो जपति ॥ ७७ ॥

प्रत्यगाशीर्योगेपि सति यजमानग्रहणं क्रियते । रोहिणीसंस्कारोऽय मिति अध्वर्युर्मा भूदि ॥ ७७ ॥

वोचेरिति वान्ते ॥ ७८ ॥

मन्त्रस्य ब्रूतादिति विकल्पः ॥ ७८ ॥

सर्वतो नवसु दशमीं कृत्वा होत्रे दद्यात् ॥ ७९ ॥

त्रिभ्योथ होतृभ्यस्तिस्रस्तिस्र उपादाय रोहिणीं दशमीं कृत्वा होत्रे दद्यात् ॥ ७९॥

उन्नेतारौ वाकृत्वानाश्रावयते ॥ ८० ॥

द्वौ चोन्नेतारौ, कुर्वीतेति वचनात् । तयोश्च यतरोऽनाश्रावयेत् तस्मा एनां दशमीं दद्यात्, होत्रे वेति विकल्पः। उन्नयनन्तु विभागेन कुर्वाते ॥ ८० ॥

दशदशाऽभेदन दक्षिणा दद्यात् ॥ ८१ ॥

अन्यूना दशतो नयेदिति वचनात् । अत्र च चोदकाबाधेन दशतीनां दानमनुष्ठेयम् ॥ ८१ ॥

अनूबन्ध्यवपाहोमान्ते दद्यादेनाम् ॥ ८२ ॥

दशमीमिति सूत्रशेषः ॥ ८२ ॥

उदवसानीयायां वा ॥ ८३ ॥

वेतिविकल्पः ॥ ८३ ॥

अन्यदिच्छन् ॥ ८४ ॥

विकल्पः ॥ ८४ ॥

अहर्गणे व्युत्क्रामताद्यन्वहम् ॥ ८५ ॥

कर्त्तव्यमिति सूत्रशेषः ॥ ८५ ॥

वसतीवरिग्रहणं च ॥ ८६ ॥

अन्वहमेव कर्त्तव्यम् ॥ ८६ ॥

एके माध्यन्दिने ऽवनीय ॥ ८७ ॥

वसतीरविग्रहणं च अन्वहमेवं कर्त्तव्यम् । एके माध्यन्दिनेऽवनीय वसतीवरिग्रहणं कुर्वन्ति । एके परिहारकाल एवेति विकल्पः । माध्यन्दिनेऽवनीय ॥ ८७ ॥

इति श्रीउपाध्यायकर्ककृतौ कात्यायनभाष्ये
त्रयोदशो ऽध्यायः समाप्तः ॥

# चर्तुदशोऽध्यायः ।

वाजपेयः शरद्यवैश्यस्य ॥ १ ॥

गवामयनमभिहितमिदानीमवसरप्राप्तो वाजपेयोऽनुविधेयः । वाजपेयः इति कर्मनामधेयम् न हि द्रव्ये गुणो वा प्रसिद्धिरस्य । स च शरदि भवति । शरदि वाजपेयेन यजेतेति वचनात् । अवैश्यस्येति शाखान्तरात् । लिङ्गाच्च । अथ यदि ब्राह्मणो यजेत यदि वा राजन्यो यजेतेति विशेषविधानम् ॥ १ ॥

उभयतः शुक्लपक्षौ बृहस्पतिसवेन यजते ॥ २ ॥

यावुत्तरौ शुक्लपक्षौ तयोर्बृहस्पतिसवः ॥ २ ॥

ज्योतिष्टोमेन वा ॥ ३ ॥

यजतेति विकल्पः ॥ ३ ॥

द्वादशवा ॥ ४ ॥

उतयतः शुक्लपक्षान्यजते ॥ ४ ॥

तत्र च—

१ पुरस्तादयुक्षु ज्योतिष्टोमः पार्ष्ठिकानीतरेषु ॥ ५ ॥

अयुक्षु पक्षेषु पार्ष्ठिकानीति ॥ ५ ॥

प्रतिलोमं पार्ष्ठिकान्युपरि ॥ ६ ॥

उपरिष्टात्प्रातिलोम्येन । अयुक्षु पार्ष्ठिकानि । युक्षु च ज्योतिष्टो-

---

१ शुक्ले पक्षे ऽयुग्मेषु प्रथमतृतीयपञ्चमसप्तमनवमैकादशेषु षट्सु दिनेषु ज्योतिष्टोमः, युग्मेषु द्वितीयचतुर्थषष्ठाष्टदशमद्वादशेषु च, पृष्ठे भवान्यहानि भवन्तीत्यर्थः ।

मः । पार्ष्ठिकान्यपि प्रातिलोम्येन त्रयस्त्रिंशारम्भणानि भवन्ति ॥ ६ ॥

[१]सर्वाग्निष्टोमैर्वा राजसूयसोमैः ॥ ७ ॥

उभयतो यजते, तेषां च संस्थामात्रापनयः ॥ ७ ॥

प्रतिलोममुपरि ॥ ८ ॥

उपरिष्टात्प्रातिलोम्येन ज्योतिष्टोमादारभ्येति । अत्रांश्वदाभ्यग्रहणं राजसूयसोमापदेशाद्भवति । पार्ष्ठिकेष्वसत्त्वान्न भवति । अतिग्राह्यग्रहणमपि त्र्यहसंयोगान्न भवतीति सम्प्रदायः ॥ ८ ॥

[२]नानादीक्षाः परियज्ञाः कालभेदात् ॥ ९ ॥

पार्ष्ठिकानां तन्त्रेण दीक्षाः कृताः । इहापि तथैव मा भूवन्निति नानादीक्षात्वमुच्यते । तत्कुतः । कालभेदात् । भिन्नो ह्यत्र काल इति ॥ ९ ॥

सप्तदशदीक्षाः ॥ १० ॥

परियज्ञानां दीक्षाः प्राप्ता एव । एतास्तु वाजपेयस्य ॥ १० ॥

देवसवितरिति जुहोति यजत्यादिषु ॥ ११ ॥

स कर्मणः कर्मणः पुरस्तादेतां सावित्रीमाहुतिं जुहोतीति वचनात् । कर्मशब्दः प्रायशो यजतिष्वेव वर्त्तत इत्यभिप्रायः । तेन यजत्यादिष्वित्युक्तम् ॥ ११ ॥

सकृद्दीक्षारम्भे कर्मैकत्वात् ॥ १२ ॥

अप्सु दीक्षाद्यारम्भे सकृदेव होतव्या । कुत एतत् । कर्मैकत्वात् । कार्यैकत्वादित्यर्थः । एकं हि कार्यं दीक्षाणां पुरुषसंस्का-

---

१ अथ वोभयतो राजसूयान्तर्वर्तिभिः पवित्राभिषेचनायादिभिः सप्तभिर्नवभिर्वा सोमयागैर्यजेताग्निष्टोमसंस्थैरित्यर्थः ।

२ उभयतो विहिताः परियज्ञा बृहस्पतिसवादयः पृथग्दीक्षा भवन्तीत्यर्थः ।

र इति । यजत्यादिषु पुनर्ये वाजपेयाङ्गभूता यजतयो दीक्षणीयादयः तेष्वेव न तदङ्गेष्वपि प्रजादिषु । न हि ते साक्षाद्वाजपेयस्य ॥ १२ ॥

क्रयणवेद्यारम्भणप्रवर्ग्योत्सादनाग्निप्रणयनहविर्धानाग्नीषोमाणां सदआग्नीध्रधिष्ण्यनिवपनवसतीवरिग्रहणपरिहरणेषु च कर्मान्तरत्वात्प्राक्सुत्यायाः ॥ १३ ॥

क्रयणादीनि प्रागेव सुत्याया भवन्ति । यजतिविशेषणमेतत् प्राक्सुत्याया इति । अथाग्नीषोमीयेण पशुना चरित्वैतामाहुतिमुत्सृजन्तीति वचनात् ॥ १३ ॥

सोमात्क्रीयमाणात्सहितं दक्षिणतः सीसेन परिस्रुतः क्रयणं केशवात् ॥ १४ ॥

भवतीति सूत्रशेषः । केशवो दीर्घकेशः षण्ढ इति केचित् । परिस्रुत्सुरोच्यते ॥ १४ ॥

तद्द्रव्याणां वा ॥ १५ ॥

परिस्रुद्द्रव्याणां[१] वा क्रयणं परिस्रुतो वेति विकल्पः ॥ १५॥

पर्युह्यमाणेऽनुहरणम् ॥ १६ ॥

पर्युह्यमाणे सोमे परिस्रुतस्तद्द्रव्याणां वाऽनुप्रहरणम् ॥१६॥

दक्षिणेन प्रवेश्य दक्षिणाग्नौ पक्त्वाऽपरेन्ते नेष्टा सुरां करोति ॥ १७ ॥

दक्षिणेन द्वारेण विमिते प्रवेश्य दक्षिणाग्नौ पक्त्वा सुरामपरेन्ते नेष्टा करोति । यदि न पक्का ततः पच्यते ॥ १७ ॥

---

१ तानि च ' शष्पतोक्मलाजानग्नहु ' संज्ञानि ।

खरं कृत्वा नाराशꣳसस्थाने ऽपरम् ॥ १८ ॥

१करोतीति वाक्यशेषः ॥ १८ ॥

दक्षिणतः सन्धिं करोति ॥ १९ ॥

दक्षिणतो हविर्धानस्य कुद्वारं करोतीत्यर्थः ॥ १९ ॥

यूपवेष्टनꣳ सप्तदशभिर्वस्त्रैर्व्युद्ग्रन्थनं वा परिव्ययणकाले ॥ २० ॥

सप्तदशभिर्वासोभिर्यूपो वेष्टितो वा विग्रथितो वा भवतीति वचनात् । व्युद्ग्रन्थनं च अवचूलकरणम् । तच्च परिव्ययणकाले परिव्ययणादूर्ध्वं परत, आगन्तुकत्वात् ॥ २० ॥

श्वो वा सवनीयेषु ॥ २१ ॥

यूपवेष्टनं भवति । तत्र हि वाजपेयशब्दो वर्त्तते । वा अग्नीषोमीय एव व्युद्ग्रन्थनं कर्त्तव्यम् । यूपसंस्कारत्वात्तस्य तदुद्देशेन विहितत्वात् ॥ २१ ॥

उत्कीर्णसमाग्रो गौधूमचषालः ॥ २२ ॥

यूपो भवतीति वाक्यशेषः । गर्त्तत्वाद्यूपो तीक्ष्णाग्रो भवतीति।तथा गौधूमं चषालं भवतीति श्रुतेः । गौधूमं गोधूमविकारमयं चषालं भवति ॥ २२ ॥

सुत्यादौ हिरण्यस्रजोऽपिनह्यन्ते ऽधिकृता यजमानः पत्नी च सुत्यस्य तच्छब्दात् ॥ २३ ॥

हिरण्यमालिनो वाजपेयेन चरन्तीति श्रूयते । सुत्या च वाजपेयशब्दस्य वाच्या ॥ २३ ॥

---

१ ग्रहसादनार्थं प्राकृतं खरं कृत्वाऽध्वर्युरेव नाराशंससंज्ञानां चमसानां निधाने द्वितीयं खरमिति; करोतीत्यस्य पूर्वं शिष्यते ।

सर्वत्राविशेषात् ॥ २४ ॥

सर्वत्र वा हिरण्यमालित्वं सर्वो ह्ययं वाजपेय इति ॥ २४ ॥

एकधनप्रवेशनकाले सुरां नेष्टाऽपरेण प्रवेश्य खरे करोति सन्धिना पात्राण्याहृत्य पात्रे वालेन पुनाति ॥ २५ ॥

नेष्टैवाभिप्रवृत्तत्वात् ॥ २५ ॥

प्रातःसवनेतिग्राह्यान्गृहीत्वा षोडाशिनं पञ्च चैन्द्रान् ॥ २६ ॥

ग्रहान् गृह्णाति ॥ २६ ॥

ध्रुवसदमिति प्रतिमन्त्रमतिग्राह्यवद्धोमः ॥२७॥

पञ्चानामैन्द्राणाम् ॥ २७ ॥

सप्तदशापरान् ॥ २८ ॥

सोमग्रहान् गृह्णाति ॥ २८ ॥

नेष्टा च तावतः सौरान् ॥ २९ ॥

चशब्दात् गृह्णाति ॥ २९ ॥

व्यत्यासं ग्रहणम् ॥ ३० ॥

सोमग्रहमेवाध्वर्युर्गृह्णाति सुराग्रहं नेष्टैवमेवैनान्व्यत्यासं गृह्णीत इति वचनात् ॥ ३० ॥

१अक्षानतिक्रमणं ग्रहाणाम् ॥ ३१ ॥

---

१ सोमग्रहाणां सुराग्रहाणां च अक्षाणमुल्लङ्घनं न कर्त्तव्यमित्यर्थः ।

कर्त्तव्यमिति शेषः ॥ ३१ ॥

उपर्युपर्यक्षमध्वर्युर्धारयत्यधोधो नेष्टा सम्पृचाविति ॥ ३२ ॥

अनेन मन्त्रेण ॥ ३२ ॥

विपृचावित्याहरतः ॥ ३३ ॥

अध्वर्युर्नेष्टाच ॥ ३३ ॥

ततः—

हिरण्येन मधुग्रहं गृहीत्वा खरमध्ये सादयति उक्थ्यादि ॥ ३४ ॥

अतिरात्रपशूनुपाकृत्य वशापृश्निं मरुद्भ्य उज्जेषेभ्यः ॥ ३५ ॥

उपाकरोति । वशारिक्ता । पृश्निश्चित्रा ॥ ३५ ॥

तदभावेऽपृश्निम् ॥ ३६ ॥

पृश्न्यभावे अपृश्निमुपाकरोति ॥ ३६ ॥

प्राजापत्यांश्च सप्तदश [1] श्यामतूपरान् बस्तान् ॥ ३७ ॥

उपाकरोति ॥ ३७ ॥

तद्गुणाभावे सर्वेषामेकदेशोऽपि ॥ ३८ ॥

तद्गुणः स्यात् । एवं हि श्रूयते । यद्येवꣳ समृद्धान्न विन्देदपि कतिपया एवैवꣳ समृद्धाः स्युरिति ॥ ३८ ॥

---

१ श्यामश्चासौ तूपरश्चेति विग्रहः । तूपरः शृङ्गरहितो, बस्तः साण्डः प्रजनयितेति यावत् ।

वाच उत्तममेके ॥ ३९ ॥

तस्मैके वाच उत्तममालभन्त इति वचनात् । सप्तदशं पशुमेके वाच आलभन्ते । एके प्राजापत्यमिति विकल्पः । तस्य च नोपांशुत्वमप्राजापत्यत्वात् । अत्रैतच्चिन्त्यते । किं सप्तदशपशुगणसाधनकमेकं कर्म, उत सप्तदशैतानि कर्माणीति । कुतः सन्देहः । यदि कृतैकशेषाणां तद्धितः अयं चायश्चेत्येकशेषीकृत्य तद्धितोत्पत्तिस्तदैकं कर्म । अथ तद्धितोत्तरकालमेकशेषः प्राजापत्यश्च प्राजापत्यश्च प्राजापत्या इति । तदा सप्तदशकर्माणि । अत्र च चोदकाबाधेन वाक्यव्याख्यानं कर्तव्यम् । प्रकृतावेकपशुनिष्पन्नेन हृदयादिगणेन यागाभिनिर्वृत्तिः कृता । इहापि तथैव क्रियेत चेत् । षोडशानामालम्भवैयर्थ्यम् । अथैकैकमवदानं गृहीत्वा एकादशसंख्या पूर्यते । तथा सति षण्णामालम्भवैयर्थ्यप्रसङ्गः । न च चोदकानुग्रह इति । तस्मान्नैकशेषीकृतानां तद्धितोत्पत्तिर्युक्तरूपा । कृततद्धितानां त्वेकशेषत्वे नैष दोषो भवति । तस्मात्सप्तदशैतानि कर्माणीति । तेषां च सम्प्रतिपन्नदेवतैकत्वात्सकृत्प्रक्षेपः । नन्वेवमपि अवदानप्रदानान्तता न सम्भवति । तत्र चोदकाबाध एव । नैषदोषः । अवदानस्य प्रदानान्ततानुग्रहे सति प्रधानस्यावृत्तिः प्राप्नोति । न चैषा गुणानुरोधेनेष्टेति । तस्मात्सकृत्प्रक्षेप इति । सकृत्प्रक्षेपं च दर्शयति प्रजापतय इत्युपा꣡ꣳशुक्त्वा छागाना꣡ꣳ हविषोनुब्रूहीति प्रजापतय इत्येवोपा꣡ꣳशूक्त्वा छागाना꣡ꣳ हविः प्रस्थितं प्रेष्येति वषट्कृते जुहोतीति । एतदाचार्येणापि प्रदर्शितमेव । न द्रव्यभेदे गुणयोगादिति वात्स्य इति ॥३९॥

माहेन्द्रान्ते वशावपाचरणम् ॥ ४० ॥

माहेन्द्रग्रहयाज्याभ्यासान्ते वशाया वपाप्रचारः ॥ ४० ॥

अवदानैश्च द्वैधꣳ शृतैः ॥ ४१ ॥

वशावदानैश्चद्वैधꣳ शृतै प्रचारः । द्वेधावदानानि श्रपयन्तीति वचनात् । चशब्दाद्वपाप्रचारोत्कर्षे द्वेधा श्रपणम् । स्वकाल एव प्रधानयागः ॥ ४१ ॥

पूर्वेभ्यो देवतास्विष्टकृद्भ्यामवद्यत्युत्तराणि त्रिशे ददाति ॥ ४२ ॥

पूर्वाणि हृदयादीनि । उत्तराणि त्र्यङ्गानि ॥ ४२ ॥

वामदेव्यग्रहान्ते प्राजापत्यानाम् ॥ ४३ ॥

वपाप्रचारः ॥ ४३ ॥

स्रुग्व्यूहनात्प्राग्घविषा ॥ ४४ ॥

प्राजापत्यानां प्रचारः ॥ ४४ ॥

यथान्यायं वोभयोः ॥ ४५ ॥

यथान्यायं वा उभयोः वपाहविषोः प्रचारो भवति । यथान्यायशब्देन चोदकानुसरणमुच्यते ॥ ४५ ॥

वशायाश्च ॥ ४६ ॥

चोदकानुसार एव नोत्कर्ष इति । वाशब्दो विकल्पार्थः । विकल्पेन ह्येतच्छ्रूयत इति ॥ ४६ ॥

ऐकध्यं च श्रपणम् ॥ ४७ ॥

ऐकध्येन श्रपणमवदानानामस्मिन्पक्षे ॥ ४७ ॥

अदानं च विशे ॥ ४८ ॥

त्र्यङ्गानाम् । विट् शब्देन प्रजोच्यते ॥ ४८ ॥

माध्यन्दिनीयैः सह नैवारश्चरुः सप्तदशशरावपरिमाणो बार्हस्पत्यः कर्त्तव्यः ॥ ४९ ॥

माध्यन्दिनीयैः सवनीयैः सह नैवारश्चरुर्बार्हस्पत्यः सप्तदशशरावः ॥ ४९ ॥

अत्र चोदकप्राप्तेन चतुर्मुष्टिना निर्वापेन सप्तदशशरावो न भवतीति अवश्यं भवति संख्यामुष्टिबाध इदमाह—

संख्यामुष्टिनिवृत्तिः सामान्यात् ॥ ५० ॥

संख्यासामान्येन सप्तदशसंख्यया चतुः संख्यानिवर्त्यते शरावैश्चमुष्टयः । कुत एतत् । सामानं हि समानस्य निवर्त्तकं भवति । यथा तैलं घृतस्येति ॥ ५० ॥

एवं प्राप्त आह—

न यजतिशब्दात् ॥ ५१ ॥

नैतदेवं संख्यामुष्टयोरुभयोरपि निवृत्तिरिति । किं कारणम् । यजतिशब्दात् । यागे हि सप्तदशसंख्यशरावाणि श्रूयन्ते । चतुःसंख्यामुष्टयश्च निर्वापे । न चान्यत्र श्रुतं सत्यपि सामान्येऽन्यस्य निवर्त्तकं भवति । न हि शिरोऽभ्यङ्गे श्रुतं तैलं भोजने घृतस्य निवर्त्तकं भवति । कथं तर्हि चतुर्मुष्टिके निर्वापे सति सप्तदशशराव ओदनो भवति । उच्यते । अर्थादत्रान्यतरस्य निवृत्त्या भवितव्यम् । संख्याया मुष्टीनां वा नह्यनिवृत्त्या सप्तदशशरावो भवति । तत्रापि संख्याया मुष्टीनां वा निर्वृत्तिर्नोभयोः । तत्र मुख्यत्वात्संख्यानुग्रहः जघन्यत्वान्मुष्टिलोप इति । सपादचतुःशरावपरिमाणेन पात्रेण निर्वापे क्रियमाणे सप्तदशशराव ओदनो भवति । एवं मुष्टीनां लोपः संख्यानुग्रहश्च भवति । ननु च मुष्टयः प्रधानभूताः संख्यागुणभूता तदवश्यं कर्त्तव्ये बाधे वरं गुणो बाधितो न प्रधानमिति । अत्रोच्यते । न हि संख्यामुष्टयोरत्र गुणप्रधानभावः । उभयोरपि हि निर्वापसम्बन्धः । संख्याया मुष्टिसम्बन्धविधाने मुष्टीनां च निर्वापसम्बन्धविधौ वैरूप्यलक्षणो वाक्यभेदः प्राप्नोति । तस्मादुभयोर्निर्वापसम्बन्धः । यश्च गुणयोः परस्परतो व्यवच्छेद्यव्यवच्छेदकभावः सोर्थान्न शब्दादिति । न हि व्यवच्छेद्यमन्तरेण संख्याया निर्वापसम्बन्धो भवति । तस्मात्संख्यानुग्रहो मुष्टिलोपश्चेति सिद्धम् ॥ ५१ ॥

सप्तदशसप्तदश शतानि ददाति गोवस्त्राजावीनाम् ॥ ५२ ॥

प्रत्येकम् ॥ ५२ ॥

सप्तदशवृषल्यो निकण्ठ्यः ॥ ५३ ॥

चतुःसौवर्णिको निष्कः कण्ठे यासां ता निष्ककण्ठ्यः ॥५३॥

हस्तिवह्यकमहानसानाम्१ ॥ ५४ ॥

सप्तदशसंख्याविशिष्टानां दानम् ॥ ५४ ॥

२जातेर्जातेश्चा सप्तदशगणपूरणात् ॥ ५५ ॥

कुत एतत् । सप्तदशानि ददातीति श्रुतेः । भिन्नजातीयत्वे चैतद्भवतीत्यभिप्रायः ॥ ५५ ॥

द्रव्येषु वा सप्तदशता सप्तदशसप्तदशानि ददातीति ॥ ५६ ॥

न भिन्नजातीयेषु । एवं श्रूयते सप्तदशसप्तदशानि ददातीति । गोदानं च दक्षिणा सूचितं महाभागा हि गाव इति तस्माद्गोव्र-द्रव्येषु सप्तदशता ॥ ५६ ॥

मरुत्वतीयान्त इन्द्रस्य वज्र इति रथा-वहरणम् ॥ ५७ ॥

तत्र रथावहरणात् तस्य प्रदेशान्तरे दृष्टार्थत्वात् रथा वरहरणं करोतीति । अवपूर्वश्च हरतिरवतारणे प्रवर्त्तते ॥ ५७ ॥

दक्षिणेन चात्वालमावर्त्तयति वाजस्येति धूर्गृहीतम् ॥ ५८ ॥

दक्षिणेन चात्वालमावर्त्तयति वाजस्येति धूर्गृहीतम् । रथमावर्त्तयति चात्वालस्य दक्षिणतोः वाजस्येत्यनेन मन्त्रेण ॥ ५८ ॥

---

१ महानसोरथ उच्यते ।

२ यावद्गवाश्वाजाविजातीयसप्तदशगणाः पूर्यन्ते तावद्ददातीति भावः

अश्वान्प्रोक्षत्यपोवनीयमानान्त्स्नातान्वागता-
नप्स्वन्तरिति ॥ ५९ ॥

अनेन मन्त्रेण । देवीराप इति वा ॥ ५९ ॥

समुच्चयो वा ॥ ६० ॥

मन्त्रयोर्भवति । एवमपि हि श्रूयते ॥ ६० ॥

दक्षिणं युनक्ति वा तो वेति ॥ ६१ ॥

अनेन मन्त्रेण रथे ॥ ६१ ॥

उत्तरं वा तर॒ह्या इति ॥ ६२ ॥

युनक्तीति वर्त्तते ॥ ६२ ॥

दक्षिणाप्रष्टिं १ जवो यस्त इति ॥ ६३ ॥

दक्षिणाप्रष्टि दक्षिणस्य द्वितीय उच्यते ॥ ६३ ॥

२ अयुक्तश्चतुर्थोनुगच्छति सर्वयन्त्री ॥ ६४ ॥

यन्त्रीति कविकापर्याणाद्युपेतः ॥ ६४ ॥

बार्हस्पत्यमेनानाघ्रापयति वाजिन इति ॥ ६५ ॥

अनेन मन्त्रेण। बार्हस्पत्योनैवारचरुस्तम् । अश्वानवघ्राणं चाश्वसंस्कारो वाक्यशेषात् । तद्यदश्वानवघ्रापयति वीर्यमेवैष्वेतद्दधातीति । स चायमाजिधावनार्थः संस्कारः । ततश्च विस्मरणं तदुत्तरकालं न भवति ॥ ६५ ॥

---

१ धुर्यापेक्षया प्रकृष्टं देशमश्नातीति पृष्टिर्बाह्यो युग्य इत्यर्थः ।

२ मुखरीवल्वाचतुःकटपल्याणादिसर्वयन्त्रोपेतः सर्वयन्त्रीत्युच्यते ।

चतुर्युजो युनक्त्यपरांस्तूष्णीं बहिर्वेदिषोडश ॥६६॥

रथान्। योजनक्रियाशेषत्वात् मन्त्रप्राप्तिर्मा भूदिति तूष्णीमित्युच्यते ॥ ६६ ॥

देवस्याहमिति ब्रह्मा रथचक्रमारोहत्युत्करे नाभिमात्रे स्थाणौ स्थितम् ॥ ६७ ॥

स्थाणुःखडकमुच्यते ॥ ६७ ॥

ऐन्द्राः क्षत्रियस्य चक्रदुन्दुभ्याः ॥ ६८ ॥

क्षत्रियस्य चक्रारोहणदुन्दुभिवादमन्त्रा ऐन्द्रा भवन्ति ॥६८॥

सप्तदश दुन्दुभीनासजत्यनुवेदि पश्चादाग्नीध्रात् ॥६९॥

आग्नीध्रमपरेण सप्तदशदुन्दुभीनवगलयन्ति अनुवेदि ॥६९॥

बृहस्पते वाजमित्येकं दुन्दुभिमाहन्ति तूष्णीमितरान् ॥ ७० ॥

आहन्तीतिं वर्त्तते। तत्र च तूष्णीमिति मन्त्रनिवृत्त्यर्थमाह॥७०॥

क्षत्रियः सप्तदशेषुप्रव्याधानस्यति तीर्थादुदीचः ॥ ७१ ॥

इषुप्रव्याध इषुप्रक्षेप उच्यते। तीर्थादारभ्य सप्तदशेषुप्रक्षेपान्प्रक्षिपतीत्यर्थः ॥ ७१ ॥

अन्त्ये मिनोत्यौदुम्बरीं शाखाम् ॥ ७२ ॥

अन्त्ये प्रक्षेपे शाखामौदुम्बरीं निखनाति ॥ ७२ ॥

देवस्याहमिति यजुर्युक्तमारोहति यजमानः ॥७३॥

यजुर्युक्तं रथं यजमानो देवस्याहमित्यनेन मन्त्रेण आरोहति ॥७३॥

अध्वर्योश्च तूष्णीं ब्रह्मचार्यन्तेवासी वा वाचनाय ॥ ७४ ॥

चशब्दाद्यजुयुक्तं रथन्तरमध्वर्योर्ब्रह्मचारी अध्वर्युणा य उपनीतः तस्य यान्ते वासी शिष्यो यजमानवाचनायारोहति ॥ ७४ ॥

इतरेषामेकस्मिन्राजन्यो वैश्यो वा सौरप्रतिग्रहाय ॥ ७५ ॥

आरोहतीति वर्त्तते । इतरेषां रथानां राजन्यवैश्ययोरन्यतर एकस्मिन्नारोहति सौरग्रहणाय ॥ ७५ ॥

आजिं शीघ्रं यन्ति ॥ ७६ ॥

आजिशब्देन स्पर्धोच्यते । स्पर्धया अहमहमिकया शीघ्रं धावन्ति ॥ ७६ ॥

वाजिन इति वाचयति ॥ ७७ ॥

ब्रह्मचार्यन्तेवासी वा यजमानम् ॥ ७७ ॥

ब्रह्मा त्रिः साम गायति ॥ ७८ ॥

त्रिस्सामगानं करोतीत्यर्थः ॥ ७८ ॥

दुन्दुभीन्वादयन्ति ॥ ७९ ॥

बहुवचनोपदेशात् प्रकृता अप्रकृताश्च ॥ ७९ ॥

एष स्य इति प्रत्यृचं जुहोति ॥ ८० ॥

धावत्स्वेवैष स्य इति प्रत्यृचमाहुतीर्जुहुयात् ॥ ८० ॥

अनुमन्त्रयते वा ॥ ८१ ॥

आयतोऽश्वान् ॥ ८१ ॥

उत्तरणे च त्रिचेन ॥ ८२ ॥

चशब्दाज्जुहोति अनुमन्त्रयते वा । अथोत्तरेण त्रिचेन जुहोति वानुवामन्त्रयत इति वचनात् । असंनियोगार्थं पृथग्योगकरणम् ॥ ८२ ॥

सुन्वन् जयति ॥ ८३ ॥

सुन्वन्यजमानो जिनातीतरान् रथान् ॥ ८३ ॥

शाखां प्रदक्षिणं कृत्वा यन्ति ॥ ८४ ॥

औदुम्बरीं शाखाम्प्रदक्षिणां कृत्वा आगच्छन्ति रथैः ॥ ८४ ॥

आगतेषु ब्रह्मावरोहति देवस्याहमिति ॥ ८५ ॥

सर्वेष्वागतेषु रथचक्रात् ब्रह्मावरोहति देवस्याहमित्यनेन मन्त्रेण ॥ ८५ ॥

एषाह व इति मन्त्राहतमवहरते ॥ ८६ ॥

दुन्दुभिम् ॥ ८६ ॥

तूष्णीमितरान् ॥ ८७ ॥

यजमानो अवरुह्य रथात् ॥ ८७ ॥

अवरुह्य नैवारमालभते तीर्थे स्थितमा मा वाजस्येति ॥ ८८ ॥

चात्वालोत्करावन्तरेण स्थितं नैवारं चरुं आमावाजस्येत्यनेन मन्त्रेणालभते ॥ ८८ ॥

यजुर्युक्तानाघ्रापयति वाजिन इति ॥ ८९ ॥

यजुर्युक्तांस्त्रीनश्वांस्त्रैवारमाघ्रापयति वाजिन इत्यनेन मन्त्रेण ॥ ८९ ॥

चतुर्थं युक्त्वाऽध्वर्यवे ददाति ॥ ९० ॥

चतुर्थमश्वं युक्त्वाऽध्वर्यवे रथं ददाति ॥ ९० ॥

सर्वेभ्यः षोडश ॥ ९१ ॥

सर्वेभ्य ऋत्विग्भ्यः षोडशरथान् ददाति ॥ ९१ ॥

अध्वर्युयजमानौ मधुग्रह्ँ सौरप्रतिग्रहाय प्रयच्छत उत्तरस्यां वेदिश्रोणा उपविष्टाय ॥९२॥

सौरप्रतिग्रहीता च राजन्यो वैश्यो वा योसौ रथमारूढः ॥९२॥

नेष्टा च सौरान्पश्चिमेन निर्हृत्य शालामपरेण हृत्वैकं सौरप्रतिग्रहाय प्रयच्छन्नाहानेन त इमं निष्क्रीणामीति ॥ ९३ ॥

ततः सर्वानेव सौरान्प्रयच्छति मधुग्रहं चादत्ते ॥ ९३ ॥

ब्रह्मणे मधुग्रहं ददाति सपात्रम् ॥ ९४ ॥

ग्रहशब्दस्य द्रव्यविषयत्वात् सपात्रमित्युच्यते ॥ ९४ ॥

त्ँ स यथेष्टं कुरुते ॥ ९५ ॥

ददातीति वान्यत्रासिञ्चति वा पिबति वेति ॥ ९५ ॥

द्वादश स्रुवाहुतीर्जुहोत्यापये स्वाहेति प्रतिमन्त्रं वाचयति वा ॥ ९६ ॥

वाचनपक्षेपि द्वादशसंख्या यथा स्यादिति द्वादशग्रहणम् । यद्योत्तरां जुहोति वाचयति वा । अथ कलशीर्जुहोति वा वाचयति वेति श्रूयते ॥ ९६ ॥

नेष्टा पत्नीमानेष्यन्कौशं वासः परिधापयति चण्डातकं दहरं वा ॥ ९७ ॥

परिधापयतीति कारितत्वादध्येषणात्र भवति । चण्डातकं चलनक उच्यते । एवं ह्यभियुक्तोपदेशः । अर्धोरुकं विलासिन्या वासश्चण्डातकं विदुः । दहरं तु कौपीनं दहरशब्दस्य अल्पवाचकत्वात् ॥ ९७ ॥

अन्तरं दीक्षितवसनात् ॥ ९८ ॥

परिधापयति कौशम् ॥ ९८ ॥

निश्रयणीं यूप उच्छ्रयत्युत्तरां दक्षिणां वा ॥९९॥

स दक्षिणत उदङ्रोहेदुत्तरतो वा दक्षिणेति वचनात् ॥९९॥

आरोक्ष्यन् जायामामन्त्रयते जाय एहि स्वो रोहावेति रोहावेति प्रत्याह प्रजापतेरित्यारोहतः ॥ १०० ॥

जायापती ॥ १०० ॥

स्वरिति गोधूममालभते ॥ १०१ ॥

चषालम् ॥ १०१ ॥

शिरसा यूपमुज्जिहीते ऽमृता इति ॥ १०२ ॥

अनेन मन्त्रेण यूपोच्छ्रयमुज्जिहीते ॥ १०२ ॥

अस्मे व इति दिशो वीक्षते ॥ १०३ ॥

यजमानः ॥ १०३ ॥

१सप्तदशाश्वत्थपत्रोपनद्धानूषपुटानुदस्यन्त्य-

---

१ यजमानपुत्रादयो यजमानाय क्षारमृत्तिकायाः पुटान् सप्तदशाश्वत्थपत्रैर्बद्धानूर्ध्वं क्षिपन्तीत्यर्थः ।

स्मै विशः ॥ १०४ ॥

प्रजाः ॥ १०४ ॥

प्रतिगृह्णात्येनान् ॥ १०५ ॥

ताश्च यजमानः प्रतिगृह्णाति ॥ १०५ ॥

नमो मात्र इति भूमिमवेक्षते, सरुक्मे बस्तचर्मण्यवरोहति, भूमौ वा ॥ १०६ ॥

भूमिग्रहणं सरुक्मार्थमेव न ह्यन्यथावाच्यमर्थप्राप्तत्वात् ॥ १०६ ॥

उत्तरवेदिमपरेणौदुम्बरीमासन्दीं बस्तचर्मणा स्तृणातीयं त इति ॥ १०७ ॥

अनेन मन्त्रेण ॥ १०७ ॥

सुन्वन्तमस्यामुपवेशयति यन्तासीति ॥ १०८ ॥

बाहुगृहीतं यजमानमासन्द्यामुपवेशयति यन्तासीत्यनेन मन्त्रेण ॥ १०८ ॥

निवारेण प्रचरति ॥ १०९ ॥

अस्मिन्नवसरे ॥ १०९ ॥

प्राक्स्विष्टकृत औदुम्बरे पात्रेऽप आसिच्य पयश्च ॥ ११० ॥

सप्तानां षड्वर्गाणां पयोऽत्रासिच्यते ॥ ११० ॥

सप्तदशान्नान्यावपति ॥ १११ ॥

यावत्स्मृति वा ॥ ११२ ॥

तत्र—

एकवर्जम् ॥ ११३ ॥

एकमन्नं वर्जयित्वा ॥ ११३ ॥

अभोजनं तस्योच्छ्वासात् ॥ ११४ ॥

तस्य चाभोजनं उच्छ्वासात् यावज्जीवमित्यर्थः ॥ ११४ ॥

स्रुवेण सम्भृताज्जुहोति वाजस्येममिति प्रतिमन्त्रम् ॥ ११५ ॥

सप्तैतानि जुहोतिकर्माणि ततश्च सप्तानां षड्वर्गाणां पयोऽभिषिच्यते । सप्त च औषधचतुर्मुष्टिकानि भवन्ति । चोदकानुग्रहाय अपां चाज्यधर्मो भवति वर्णसामान्यात् ॥ ११५ ॥

शेषेणाभिषिञ्चति यजमानं देवस्य त्वेति ॥ ११६ ॥

मन्त्रेण । शेषश्च हुतशेषः ॥ ११६ ॥

सरस्वत्यै वाचस्थाने विश्वेषां त्वा देवानाम् ॥ ११७ ॥

प्रयोगः ॥ ११७ ॥

सरस्वत्यै त्वेति वा ॥ ११८ ॥

सम्राडयमसावित्याह नामग्रहं त्रिरुच्चैः ॥ ११९ ॥

त्रिरुच्चैः ॥ ११९ ॥

अग्निरेकाक्षरेणेत्यनुवाकं द्वादशवत्कृत्वा नैवारस्विष्टकृदिडं करोति माहेन्द्रादि च ॥ १२० ॥

द्वादशवदिति जुहोति वा वाचयति वा । अत्रापि हि श्रूयते । अथोज्जितीर्जुहोति वाचयति वा ॥ १२० ॥

अवरुह्य गच्छति स्तोत्राय प्रहितः ॥ १२१ ॥

तत् स्तोत्राय प्रमीवति स उपावरोहति सोन्ते स्तोत्रस्य भवत्यन्ते शस्त्रस्येति ॥ १२१ ॥

उज्जितिभ्यो वोत्तरो माहेन्द्रः ॥ १२२ ॥

भवति । ततः स्विष्टकृदिडम ॥ १२२ ॥

षोडश्यन्ते स्तोत्रं चमसैरेव ॥ १२३ ॥

षोडशिग्रहयागान्ते स्तोत्रं चमसैरेव भवति। ग्रहो न भवत्येवकारकरणात् ॥ १२३ ॥

ऋत्विक्चमसेषु सप्तदशावनयति द्वौ द्वौ ॥ १२४ ॥

सप्तदशसोमग्रहान् ऋत्विक्चमसेष्ववनयति। इयांस्तु विशेषः द्वौ द्वौ अवनयति ॥ १२४ ॥

एकन्नेष्टुः ॥ १२५ ॥

चमसेऽवनयति ॥ १२५ ॥

उदवसानीयान्ते यूपवेष्टनानध्वर्यवेददाति॥१२६॥

वासांसि ॥ १२६ ॥

यथोपयुक्तं हिरण्यस्रजः ॥ १२७ ॥

दीयते । या यस्य हिरण्यस्रक् उपयुक्ता ॥ १२७ ॥

इति श्रीउपाध्यायकर्कविवरणे कात्यायनसूत्रभाष्ये
चतुर्दशोऽध्यायो वाजपेयश्च समाप्तः ।

# पञ्चदशोऽध्यायः ।

श्रुतिमन्त्रपाठानुसारिणाऽऽचार्येण वाजपेयोऽनुविहित इदानीमवसरप्राप्तो राजसूयोऽनुविधेयः तदर्थं सूत्रम् ।

राज्ञो राजसूयः ॥ १ ॥

भवतीति सूत्रशेषः । स चायं राजशब्दः क्षत्रियजातिनिमित्तः प्रदेशान्तरे दृश्यते । तस्य यत्कर्म स्मृतिविहितं तद्राज्यमित्युच्यते । किं च तत् । जनपदपुरपरिपालनादि । ननु च राज्ययोगाद्राजशब्दप्रयोगः सार्वभौमः । तद्युक्ते ह्यक्षत्रियेऽपि राजशब्दं प्रयुञ्जते जना इति । राज्यं यः करोति स राजेति । एवं च कृत्वा राजसूय एवावेष्ट्यां दर्शनं भवति । यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वाभिघारयेत् यदि राजन्य ऐन्द्रं यदि वैश्यो वैश्वदेवमिति त्रयाणामपि वर्णानामधिकारं दर्शयति । तत्कथम् । यदि राज्यस्य कर्त्ता राजा तदैवमुपपद्यते । अत्रोच्यते । न राज्यकर्त्ता राजेति शक्यते वक्तुम् । न ह्यत्र प्रत्ययलोपः प्रातिपदिकस्य प्रत्यापत्तिर्वा स्मर्यते । राजशब्दात्तु कर्मणि ष्यञ्प्रत्ययो विधीयते । तेन राज्ञः कर्म राज्यमिति शक्यते वक्तुं राज्यस्य कर्त्ता राजेति । यत्त्ववेष्ट्यां ब्राह्मणादीनां दर्शनमुक्तं तद्राजसूयाद्बहिरन्नाद्यकामस्यावेष्टिर्विहिता तद्विषयमिति । यत्त्वेकदेशे जातौ राजशब्दप्रयोगो योगात्सार्वभौम इत्यत्र ब्रूमः । एकदेशेपि शब्दशक्तिमन्तरेण प्रयोगोनुपपन्न एव । सार्वभौमस्तु प्रयोगः स उपचारवृत्त्या राज्ञः कर्म कुर्वन् राजेव राजेत्युच्यत इति । तथा च समानचोदनायां दृश्यते तस्माद्राष्ट्र्यश्वमेधेन यजेत क्षत्रिययज्ञ उ वा एष यदश्वमेध इति । तथा तस्माद्ब्राह्मणक्षत्रियमधस्तादुपास्ते राजसूये यजमानं सन्तमृत्विक्त्वेनेति क्षत्रियस्य राजसूयं दर्शयति ॥ १ ॥

अनिष्टिनो वाजपेयेन ॥ २ ॥

तस्माद्वाजपेयेनेष्ट्वा न राजसूयेन यजेतेति श्रुतेः ॥ २ ॥

इष्टिसोमपशवो भिन्नतन्त्राः कालभेदात् ॥ ३ ॥

अनुमत्यादय इष्टयः पवित्रादयः सोमाः मल्हादयश्च पशव एते भिन्नतन्त्रा भवन्ति । कुत एतत् । कालभेदात् । भिन्नकालीनं ह्येषां विधानमिति । ननु च कालभेदात् भेद उक्त एव । किमुच्यते कालभेदादिति । सत्यमेवं, फलैक्यप्रज्ञापनार्थमिदमुच्यते कालभेदाद्भेदो न फलभेदेनेति । तत्कुतः । राजसूयेन स्वाराज्यकामो यजेतेति राजसूयस्य फलसम्बन्धः । राजसूयशब्दश्च यजतिशब्दसामानाधिकरण्याद्यजातिषु वर्त्तते । तेन च सर्वयजतीनामेकं फलमिति ॥ ३ ॥

पवित्रश्चतुर्दीक्षः ॥ ४ ॥

स च सोमयागो दीक्षासम्बन्धात् ॥ ४ ॥

सहस्रदक्षिणः ॥ ५ ॥

एवं चांश्वदाभ्यग्रहणं तिस्रोनूबन्ध्याश्चैधातवी चात्र भवन्ति ॥ ५ ॥

माघीपक्षयजनीये दीक्षा ॥ ६ ॥

माघपौर्णमास्या उपरिष्टात्पक्षे गते यद्यजनीयं तत्र दीक्षा । फाल्गुनप्रतिपदीत्यर्थः ॥ ६ ॥

तदन्ते पूर्णाहुतिर्गृहेष्विच्छतो वरदक्षिणा ॥७॥

स यदि कामयेत जुहुयादेतां यद्यु कामयेताभिनाद्रियेतेति वचनादिच्छत इत्युक्तम ॥ ७ ॥

श्वः प्रभृत्यन्वहं पञ्चोत्तराणि हवींषि ॥ ८ ॥

भवन्तीति शेषः । अथ श्वो भूत इति वचनात् । अन्वहमेकैकम ॥८॥
ताभ्याह—

अष्टाकपालो ऽनुमत्यै ॥ ९ ॥

पुरोडाशो भवतीति शेषः ॥ ९ ॥

शम्यायाः पश्चाद्धविष्यशन्न्ँ स्रुवे कृत्वा दक्षिणाग्न्युल्मुकमादाय दक्षिणा गत्वा स्वयं प्रदीर्ण इरिणे चाग्नौ जुहोत्येष ते निर्ऋत इति ॥ १० ॥

शम्यायाः पश्चाद्धविष्येषु यदवसीयन्ते तण्डुला वा पिष्टं वा तत् स्रुवे कृत्वा दक्षिणाग्न्युल्मुकं गृहीत्वा दक्षिणां दिशं गत्वा स्वयं प्रदीर्णे कुत्सारे ईरिणे वोषरे अग्नौ जुहोत्येष ते निर्ऋत इति मन्त्रेण। अग्निग्रहणाच्चेतिकर्त्तव्यताव्युदासः ॥ १० ॥

अनपेक्षमेत्यानुमतस्य संवपनादि करोति ॥ ११ ॥

संवपनादिग्रहणाच्च ईक्षणान्त एतद्भवति ॥ ११ ॥

वासो देयम् ॥ १२ ॥

आनुमतस्य दक्षिणा ॥ १२ ॥

हिरण्यमाग्नावैष्णवे ॥ १३ ॥

पुनरुत्सृष्टो गौरग्नीषोमीये ॥ १४ ॥

अनड्वान् साण्ड ऐन्द्राग्ने ॥ १५ ॥

देयः ॥ १५ ॥

गौराग्रयणे ॥ १६ ॥

देयः। गौरेवाग्रयणे भवति। अतश्च गवाग्रयणं यवाग्रयणं व्रीह्याग्रयणं विशेष्यते न सौम्याग्रयणमिति ॥ १६ ॥

चातुर्मास्यप्रयोगः फाल्गुन्याम् ॥ १७ ॥

भवतीति शेषः । चातुर्मास्यशब्दो धर्मातिदेशार्थो नैतानि चातुर्मास्यानि । चातुर्मास्यवद्राजसूययागा एते । अतश्च नित्यानामपि क्रिया भवति । नैतैः कृतत्वमचातुर्मास्यत्वात् ॥ १७ ॥

पौर्णमासेन कृष्णपक्षानेत्यामावास्येन शुक्लाना शुनासीरीयात् ॥ १८ ॥

अत्रापि दर्शपौर्णमासवद्राजसूये एवायं न दर्शपौर्णमासाविति ॥ १८ ॥

पवित्रदीक्षास्थाने शुनासीरीयम् ॥ १९ ॥

भवतीति सूत्रशेषः ॥ १९ ॥

१पञ्चवातीयमाहवनीयं प्रतिदिशं व्युह्य मध्ये च स्रुवेणाग्निषु जुहोत्यग्निनेत्रेभ्य इति प्रतिमन्त्रम् ॥ १९ ॥

पञ्चवातीयमिति कर्मणो नामधेयम् । होममन्त्राणां लिङ्गेन व्यवस्था ॥ १९ ॥

२उत्तराः समस्य ये देवा इति प्रतिमन्त्रम् ॥ २० ॥

जुहोतीति शेषः । समस्य चाग्नीनिति ॥ २० ॥

---

१ फाल्गुनशुक्लप्रतिपद्येव पञ्चवातीयसंज्ञकं वक्ष्यमाणं कर्म भवति । खरमध्यस्थं हस्तप्रेरितं एव खरमध्य एव प्राच्यादिदिक्षु स्थापयित्वा मध्ये चावशिष्य पञ्चस्वग्निषु जुहोतीत्यर्थः ।

२ प्रतिदिशं व्यूढमाहवनीयमेकत्र कृत्वा उत्तराः पञ्चाहुतीर्जुहोतीत्यर्थः ।

त्रियुक्तोऽश्वरथो दक्षिणा ॥ २१ ॥

त्रिभिरश्वैर्युक्तो रथो दक्षिणा ॥ २१ ॥

व्याधितस्याप्येवम् ॥ २२ ॥

व्याधिगृहीतस्यापि पञ्चवातीयं भवति ॥ २२ ॥

इन्द्रतुरीयम् ॥ २३ ॥

व्याख्यास्यत इति शेषः । एतच्च काण्वानां श्वो भूतेषु पठ्यते ॥ २३ ॥

आग्नेयः ॥ २४ ॥

वारुणो यवमयश्चरुः ॥ २५ ॥

अन्यत्रापि ॥ २६ ॥

वारुणो यवमय एव भवति ॥ २६ ॥

रौद्रश्च गात्रेधुकः ॥ २७ ॥

चशब्दादन्यत्रापि रौद्रो गावेधुको भवति ॥ २७ ॥

वहिनि दध्यैन्द्रम् ॥ २८ ॥

या गौर्वहति स्कन्धेन सा वहिनीत्युच्यते । तदीयं दध्यैन्द्रं भवति ॥ २८ ॥

अपामार्गहोमः ॥ २९ ॥

व्याख्यास्यत इति सूत्रशेषः । इन्द्रतुरीयाच्च श्वो भूते काण्वानां पठ्यते ॥ २९ ॥

स्रुवे पालाशे वैकङ्कते वापामार्गतन्दुलान् कृत्वा ॥ ३० ॥

तेनैव सर्वहोमः कर्त्तव्यः ॥ ३० ॥

त्र्यम्बकवद्दिगग्नी ॥ ३१ ॥

अग्निर्दक्षिणाग्निर्दिगुदीची ॥ ३१ ॥

प्राची वा ॥ ३२ ॥

स यदि प्राङित्वा जुहोति प्राचः स्रुवमस्यति यद्युदङित्वा जुहोत्युदञ्चं स्रुवमस्यतीति श्रूयते। अत्र च गमनमात्रे विकल्पः। वितानं तु प्राङ्मुखमेव ॥ ३२ ॥

अग्ने सहस्वेत्युल्मुकादानम् ॥ ३३ ॥

अन्वाहार्यपचनात् ॥ ३३ ॥

देवस्य त्वेति जुहोति ॥ ३४ ॥

प्राङुदङ्वा गत्वा ॥ ३४ ॥

रक्षसां त्वेति स्रुवमस्यति तां दिशं यस्यां जुहोत्यबाधिष्म रक्ष इत्यायन्त्यनपेक्षम् ॥ ३५ ॥

अभिचर्यमाणापि तान्दिशं गत्वाभिचरतो नामादिशेद्धोमः स्रुवप्रासनागमनेषु। स चायं नामादेशो रक्षः शब्दस्य स्थाने भवति। अमुमसाविति च ॥ ३५ ॥

त्रिषंयुक्तेषु ॥ ३६ ॥

कर्मोच्यते ॥ ३६ ॥

अग्नावैष्णव ऐन्द्रावैष्णवौ वैष्णवो वामनो दक्षिणा ॥ ३७ ॥

लिङ्गग्रहणे गौः सर्वत्र॥ ३८ ॥

भवति ॥ ३८ ॥

आग्नापौष्ण ऐन्द्रापौष्णः पौष्णः श्यामो दक्षिणा ॥ ३९ ॥

अस्यापि श्वो भूते काण्वपाठात् ॥ ३९ ॥

अग्नीषोमीय ऐन्द्रासौम्यः सौम्यो बभ्रुर्दक्षिणा ॥ ४० ॥

अस्यापि श्वो भूत एव काण्वीयायां पठ्यते ॥ ४० ॥

एकादशकपालः प्रथमः प्रथमश्चरव इतरे ॥ ४१ ॥

भवन्ति ॥ ४१ ॥

वैष्णवस्त्रिकपालो वा ॥ ४२ ॥

भवति चरुर्वा ॥ ४२ ॥

श्वो वैश्वानरो द्वादशकपालो वारुणश्चैकतन्त्रे ॥ ४३ ॥

भवत इति शेषः ॥ ४३ ॥

श्वो वैकः ॥ ४४ ॥

भवतीति विकल्पः ॥ ४४ ॥

ऋषभः पूर्वस्य दक्षिणा कृष्णं वास उत्तरस्याभावे ऽकृष्णम् ॥ ४५ ॥

तन्त्रभेदे चैतद्भवति । ऐकतन्त्र्ये तु चोदकपरिप्राप्त्याग्वाहार्यं इति ॥ ४५ ॥

द्वादशोत्तराणि रत्नहवींषि ॥ ४६ ॥

भवन्ति । द्वादशग्रहणं क्रियते । चतुर्गृहीतस्यापि श्वो भूतेऽनुष्ठानं यथा स्यादिति ॥ ४६ ॥

प्रतिगृहमैकैकꣳ श्वः श्वः ॥ ४७ ॥

कर्त्तव्यम् ॥ ४७ ॥

समारूढानिर्मथिते ऽग्नये नीकवते सेनान्यः ॥ ४८ ॥

गृहे ॥ ४८ ॥

बार्हस्पत्यश्चरुः पुरोहितस्य॥ ४९ ॥

गृह इति सर्वत्रानुवर्त्तते ॥ ४९ ॥

ऐन्द्रो यजमानस्य ॥ ५० ॥

एकादशकपालो यजमानस्य ॥ ५० ॥

अदित्यै महिष्याः ॥ ५१ ॥

अदित्यै चरुर्महिष्याः ॥ ५१ ॥

वारुणः सूतस्य ॥ ५२ ॥

सूतश्चाश्वसारथिः ॥ ५२ ॥

मारुतो ग्रामण्यः ॥ ५३ ॥

सप्तकपालः । ग्रामणीर्महत्तरः ॥ ५३ ॥

सावित्रः क्षत्तुः ॥ ५४ ॥

अष्टाकपालो द्वादशकपालो वा । क्षत्ता प्रतीहारो दूतो वा ॥५४॥

आश्विनः सङ्ग्रहीतुः ॥ ५५ ॥

सङ्ग्रहीता रथयोजयिता ॥ ५५ ॥

पौष्णो भागदुघस्य ॥ ५६ ॥

भागदुघो भोजयिता ॥ ५६ ॥

रौद्रो यजमानस्याक्षावापगोविकर्त्तगृहेभ्यो

गवेधुकानाम् ॥ ५७ ॥

आहरणं कृत्वा । अक्षावापोक्षक्षेप्ता । अक्षगोप्तेत्यपरे । गोविकर्त्ता हालिकः ॥ ५७ ॥

चतुर्गृहीतं जुषाणोऽध्वाज्यस्य वेत्विति दूतस्य ॥५८॥

निर्ऋतः परिवृत्त्यै कृष्णव्रीहीणां नखनिर्भिन्नानां दार्विहोमे एष ते निर्ऋत इति जुहोति वषट्कृते वा ॥ ५९ ॥

ततश्च विकल्पोयम् ॥ ५९ ॥

यथासंख्यं दक्षिणा हिरण्य; शितिपृष्ठर्षभो धेनुरश्वः पृषञ्छ्येतोनड्वान्यमात्रभावेनुपूर्वजौ श्यामस्त्रिदक्षिणो रौद्रः शितिबाहुशितिबालयोरन्यतरः ॥ ६० ॥

सितीबाहुः श्वेतसक्थिः सितबालः श्वेतपुच्छः तयोरन्यतरः ॥ ६० ॥

असिर्नखरः ॥ ६१ ॥

नखरोपरिवारः ॥ ६१ ॥

वालदामबद्धमक्षावपणम् ॥ ६२ ॥

अक्षा उप्यन्ते यस्मिंस्तदक्षावपणम् ॥ ६२ ॥

उत्तरस्याऽप्युक्षणवेष्टितं धनुः ॥ ६३ ॥

अप्युक्षणशब्देन स्नाय्वभिधीयते। अजगरचर्मेत्यपरे ॥ ६३ ॥

चर्मतूण्य :सेषुकाः ॥ ६४ ॥

सहेषुभिः। चर्मतूणयश्चर्ममय्यो भस्त्रा उच्यन्ते ॥६४॥

लोहित उष्णीषः ॥ ६५ ॥

कृष्णापरिमूर्य्यपहतोत्तमस्य ॥ ६६ ॥

जीर्णा अपहता अपस्तरी कृष्णा गौरुत्तमस्यदक्षिणा ॥ ६६ ॥

परिवृत्तीं चाह माऽमेचे शायां वात्सीदिति ॥६७॥

मत्स्वाम्ये मा वात्सीरित्येतदुक्तं भवति। ततश्चासौ ब्राह्मणगृहं प्रविशति। तत्र राज्ञो न स्वाम्यमिति ॥ ६७ ॥

सौमारौद्रोतश्चरुः शुक्लापयसि शुक्ल-

वत्सायाः ॥ ६८ ॥

सैव दक्षिणा ॥ ६९ ॥

अनूचानोप्ययशा यजेत ॥ ७० ॥

अनेन ॥ ७० ॥

किलासाबाधन्तु ॥ ७१ ॥

किलासाशब्देन व्याधिविशेष उच्यते। तद्बाधमिच्छंश्च य-जते। तुशब्दश्चार्थः ॥ ७१ ॥

मित्राबार्हस्पत्यश्चरुः ॥ ७२ ॥

श्वो भूते भवतीति शेषः ॥ ७२ ॥

बार्हस्पत्यमाधिश्रित्याश्वत्थी या स्वयं भग्ना प्रा-

च्युदीची वा शाखा तत्पात्रेणापिदधाति ॥ ७३ ॥

बार्हस्पत्यं चरुम् ॥ ७३ ॥

त्रिनाटाद्रथपर्यूढां नवनीतं स्वयं जातमा-
ज्यमासिच्य पात्रे तस्मिंस्थविष्ठांस्तण्डुलानभि-
न्नायावपति ॥ ७४ ॥

विनाटो इतिरुच्यते। ततो रथपर्यूढात् स्वयं जातं नवनीतमाज्यं भवति। अत्र च तण्डुलेष्वाज्यमासिच्यते। नाज्ये तण्डुलांश्चोदकानुग्रहाय। तण्डुलानां चाध्वर्यूपायेन तक्रादिना स्पन्दनं पक्ष्यर्थतया कार्यम् ॥ ७४ ॥

उष्मणा शृतो भवति ॥ ७५ ॥

मैत्रः ॥ ७५ ॥

अणिष्ठानितरस्मिन्नेकं प्रदानम् ॥ ७६ ॥

इतरस्मिन्बार्हस्पत्ये चरौ। स चायमेक एव यागः। मैत्राबार्हस्पत्य इति समुदायात्तद्धितोत्पत्तेः। अतश्च एकं प्रदानम्। अर्धार्धिकया चावदानग्रहणम् ॥ ७६ ॥

गौर्दक्षिणा ॥ ७७ ॥

भषेचनीयदशपेययोर्दक्षिणोत्तरे देवयजने ॥७८॥

भवतः ॥७८॥

दाक्षिणमभिषेचनीयस्य ॥ ७९ ॥

तयोश्च दक्षिणमभिषेचनीयस्य भवति ॥ ७९ ॥

फाल्गुनीपक्षयजनीये भिषेचनीयाय दीक्षते ॥८०॥

फाल्गुन्योः पक्षेतीते यद्यजनीयं तत्र दीक्षा। चैत्रशुक्लप्रतिपदीत्यर्थः ॥ ८० ॥

भार्गवो होता ॥ ८१ ॥

भृगुगोत्रो होता भवति अभिषेचनीयदशपेययोरेव न सर्वत्र। तत्रैव हि श्रूयत इति ॥ ८१ ॥

पञ्चापवर्गः ॥ ८२ ॥

पञ्चभिरहोभिरपवर्गश्च। यदुक्तं भवत्येकादीक्षेति ॥ ८२ ॥

सोमं क्रीत्वा द्वैधमुपनह्य पर्युह्यैकं ब्रह्मा-
गारे निदधाति ॥ ८३ ॥

स च दशपेयार्थः ॥ ८३ ॥

अग्नीषोमीयस्य पशुपुराडाशमनु देवसूहवी-
ꣳषि निर्वपति यजप्रैषाणि ॥ ८४ ॥

देवसूहवीꣳषीति नामधेयम्। यज प्रैषाणीति कुतः। चोदकेन। यद्येवं किमर्थमिदमुच्यते यजप्रैषाणीति। मुख्यत्वात्पशुपुरोडाशधर्माशङ्कानिवृत्त्यर्थम् ॥ ८४ ॥

प्लाशुकानाꣳ सवित्रे सत्यप्रत्यसवाय ॥ ८५ ॥

प्लाशुकाः पुनः प्ररूढाव्रीहयः ॥ ८५ ॥

आशूनामग्नये गृहपतये ॥ ८६ ॥

आशवः पक्षत्रयपाकिनो व्रीहयः ॥ ८६ ॥

उत्तरे चरवः ॥ ८७ ॥

श्यामाकः सोमाय वनस्पतये ॥ ८८ ॥

नैवारो बृहस्पतये वाचे ॥ ८९ ॥

हायनानामिन्द्राय ज्येष्ठाय ॥ ९० ॥

हायनारक्तलशायः ॥ ९० ॥

रुद्राय पशुपतये ॥ ९१ ॥

नाम्बो मित्राय सत्याय ॥ ९२ ॥

स्वयं जाता व्रीहयो नाम्बाः ॥ ९२ ॥

वरुणाय धर्मपतय इति ॥ ९३ ॥

अष्टौ ॥ ९३ ॥

उत्तमेन चरित्वा सविता त्वेत्याह यजमानबाहुं दक्षिणं गृहीत्वा नामास्य गृह्णाति मन्त्रे यथास्थानम् ॥ ९४ ॥

यस्मिन्स्थाने अमुमिति सर्वनाम तत्र नामग्रहणम् । तत्संस्कारात् ॥ ९४ ॥

मातापित्रोश्च ॥ ९५ ॥

यथास्थानं नामग्रहणम् ॥ ९५ ॥

काण्वानां पठ्यते । एष वः कुरवो राजा पाञ्चालो राजेति च । तदुच्चारणार्थमेव मा भूदत आह—

यस्याश्च जाते राजा भवति ॥ ९६ ॥

जातिग्रहणं जनपदोपलक्षणार्थम् । यस्मिञ्जनपदे राजा भवति तस्य च नामगृह्णातीत्यर्थः ॥ ९६ ॥

कुत एतत्—

देशस्यानवस्थितत्वात् ॥ ९७ ॥

न हि शास्त्रे देशव्यवस्था कुरुपञ्चालजातीयैरेव राजसूयः कर्त्तव्य इति । सर्वस्य विहितत्वात् । कुरुपञ्चालग्रहणमत्र देशोपलक्षणार्थम् । अङ्गावङ्गास्सुह्मा इति चैवमादीनाम् ॥ ९७ ॥

पशुपुरोडाशतन्त्रं प्राधान्यात् ॥ ९८ ॥

देवसूहविषां पशुपौरोडाशिकं तन्त्रं भवति । कुत एतत् । प्राधान्यात् मुख्यत्वादित्यर्थः । न हि पशुपुरोडाशः प्रधानभूत इति ख्यानित्वात्प्राधान्यमुक्तम् ॥ ९८ ॥

इतरेषां वा भूयस्त्वात् ॥ ९९ ॥

इतरेषां वा तन्त्रं भवति । न पशुपुरोडाशिकम् । कुत एतत् । भूयस्त्वात् । बहूनि ह्येतानि देवसूहवींषि । एवं च विकल्प एवायम् । मुख्यत्वाद्वापौरोडाशिकम् । भूयस्त्वेन चेतरेषामिति ॥ ९९ ॥

किं च—

स्विष्टकृच्छ्रुतेश्च ॥ १०० ॥

उभयरूपा हि स्विष्टकृच्छ्रुतिः काण्वानां यजप्रैषः स्विष्टकृन्माध्यन्दिनानां प्रेष्यप्रैष इति । तेनात्र विकल्प एवानुरूपतर इति ॥ १०० ॥

इडान्तेऽपो गृह्णाति ॥ १०१ ॥

इडान्तग्रहणेन देवसूहविषां शेषकार्योपलक्षणम् । ततश्च तद्भागपरिहरणान्ते ग्रहणम् । श्रुतौ तु तत्स्विष्टकृत्समनन्तरमपां ग्रहणं पठ्यते । तत्रापि स्विष्टकृता शेषकार्योपलक्षणम् ॥ १०१ ॥

यूपमुत्तरेण नैमित्तिकीरसम्भवात् ॥ १०२ ॥

या आपो निमित्तेन प्राप्यन्ते यथा गोरुल्व्या आतपवर्ष्यास्तासामस्मिन्काले ग्रहणासम्भवादतः पूर्वं गृहीत्वा यूपमुत्तरेण पुनर्ग्रहणं तच्च वचनात् ॥ १०२ ॥

गत्वेतराः पृथक्पात्रेष्वौदुम्बरेषु सारस्वतीः॥१०३॥

अपो गृण्हाति ॥ १०३ ॥

अत्रगाह्यावगाढात्पशोः पुरुषाद्वा पूर्वापरा ऊर्मीः ॥ १०४ ॥

अवतीर्यावतीर्णात्पशोः पुरुषाद्वा पूर्वापरौ ऊर्मीगृह्णाति॥१०४॥

स्यन्दमानाः ॥ १०५ ॥

गृह्णाति ॥ १०५ ॥

प्रतिलोमाः ॥ १०६ ॥

गृह्णाति ॥ १०६ ॥

अपयतीः ॥ १०७ ॥

याः स्यन्दन्त्य पत्रापयन्ति ता अपयतीः ॥ १०७ ॥

नदीपतिं सूद्याः ॥ १०८ ॥

नदीपतिः समुद्रः । तत्रापि याः सुषूद्यन्तिताः सूद्याः वीचिस्था इत्यर्थः । ता गृह्णाति ॥ १०८ ॥

काष्ठं वोच्छ्रितोढम् ॥ १०९ ॥

अथवा समुद्राभिरवाद्भिः काष्ठमुच्छ्रितमूढं याभिस्ता गृह्णाति ॥ १०९ ॥

निवेष्येन ॥ ११० ॥

गृह्णाति । निवेष्य आवर्त्तः ॥ ११० ॥

स्यन्दमाननां स्थावराः प्रत्यातापे ॥ १११ ॥

यत्रोपरिष्टात्स्थित आदित्यस्तपति ता गृह्णाति ॥ १११ ॥

अन्तरिक्षात्प्रतिगृह्या आतपवर्ष्याः ॥ ११२ ॥

अन्तरिक्षात्प्रतिग्रहीतव्याः आतपवर्षणः ॥ ११२ ॥

सरस्याः कूप्याः प्रष्वा मधुगौरुल्व्याः

पयो घृतम् ॥ ११३ ॥

उक्ता आपस्तासां ग्रहणमाह—

सरस्वतीर्गृह्णात्यपो देवा इति ॥ ११४ ॥

जुहोत्युत्तरासु चतुर्गृहीतानि वृष्ण ऊर्म्यादिभिः स्वाहाकारान्तैः पूर्वैः पूर्वैः प्रतिमन्त्रमुत्तरैरुत्तरैर्गृह्णाति ॥ ११५ ॥

काण्वानां च यथाश्रुति विनियोगक्रमेण च आपो ग्रहीतव्याः ॥ ११५ ॥

आपः स्वराज इति मरीचीर्गृहीत्वा गृहीत्वाञ्जलिना सर्वासु सꣳसृजति ॥ ११६ ॥

सारस्वतीषु च मरीचिषु च न होमः प्रतिषेधात् ॥ ११६ ॥

औदुम्बरे पात्रे समासिञ्चत्येना मधुमतीरिति ॥ ११७ ॥

अनेन मन्त्रेण ॥ ११७ ॥

मैत्रावरुणधिष्ण्यस्य पुरस्तान्निदधाति अनाधृष्टाः सीदतेति पात्राणि च तूष्णीं पालाशौदुम्बरनैयग्रोधपादाश्वत्थान्यभिषेकाय ॥ ११८ ॥

चशब्दात्पुरस्तान्निदधाति ॥ ११८ ॥

उक्थ्यः श्वः ॥ ११९ ॥

भवति ॥ ११९ ॥

पयस्या मैत्रावरुणी माध्यन्दिनीयैः सह ॥ १२० ॥

भवति ॥ १२० ॥

शतं सहस्राणि दक्षिणा ॥ १२१ ॥

मरुत्वतीयान्ते पात्राणि पूर्वेण व्याघ्रचर्मा-
स्तृणाति सोमस्य त्विषिरिति ॥ १२२ ॥

अनेन मन्त्रेण । अगृहीते माहेन्द्र इति वचनात् सर्वमरुत्व-
तीयानामन्ते ॥ १२२ ॥

अपरेन्ते सीसं निदधाति ॥ १२३ ॥

व्याघ्रचर्मणः ॥ १२३ ॥

पार्थानामग्नये स्वाहेति षड्जुहोति प्रति
मन्त्रम् ॥ १२४ ॥

पार्थानि हि प्रकृत्याह षट् पुरस्तादभिषेकस्य जुहोतीति ॥१२४॥

पवित्रे कृत्वा हिरण्यमेनयोः प्रवयति ता-
भ्यामुत्पुनात्यपः सवितुर्व इति ॥ १२५ ॥

ताभ्यां पवित्राभ्यामभिषेचनीया अप उत्पुनाति सवितुर्व इ-
त्यनेन मन्त्रेण। पौर्णमासिकेन विधिना पवित्रकरणम् । तुल्यं हि शा-
स्त्रमत्र ॥ १२५ ॥

अभिषेचनीयेष्वेना व्यानयति सधमाद इति ॥१२६॥

अभिषेचनीयानि च पालाशौदुम्बरादीनि॥ १२६ ॥

तार्प्यं परिधापयति ॥ १२७ ॥

तच्च—

क्षौमम् ॥ १२८ ॥

तार्प्यमुच्यते ॥ १२८ ॥

त्रिपाणं वा ॥ १२९ ॥

त्रिःकृत्वः पायितम् । वा सकृदिति विकल्पः ॥ १२९ ॥

घृतोन्नमेके ॥ १३० ॥

एके आचार्याः घृतोन्नन्तार्प्यमभिवदन्ति । घृतोन्नं घृतशोचितम् ॥ १३० ॥

यज्ञरूपस्यूतम् ॥ १३१ ॥

तस्मिन्सर्वाणि यज्ञरूपाणि निष्यूतानि भवन्तीति वचनात् । यज्ञरूपाणि च स्रुक्चमसादीनि ॥ १३१ ॥

पाण्ड्वं च निवस्ते ॥ १३२ ॥

पाण्ड्वः कम्बलः । तं च निवस्ते उपरि तार्प्यस्य ॥ १३२ ॥

अधीवासं प्रतिमुच्योष्णीषं संवेष्ट्य निवीतेऽवगूहते नाभिदशे परिहरते वा ॥ १३३ ॥

अधीवासः कञ्चुकः प्रतिमोकवचनाद्गम्यते । उष्णीषः शिरो वेष्टनं तत्सम्वेष्ट्य निवीते निवीतं च कण्ठेवसञ्जनं ततोऽवगूहते नाभिदेशे परिहरते वा ॥ १३३ ॥

तार्प्यप्रभृतीनि क्षत्रस्येति प्रतिमन्त्रम् १३४ ॥

परिधत्ते ॥ १३४ ॥

दीक्षितवसननिवृत्तिर्विरोधान्माहेन्द्रादौ वा पुनः परिधानं निधायैतानि ॥ १३५ ॥

तार्प्यादीनि ॥ १३५ ॥

इन्द्रस्य वार्त्रघ्नमिति धनुरातनोति ॥ १३६ ॥

आरोपयति ॥ १३६ ॥

मित्रस्य वरुणस्येत्यस्य बाहू विमार्ष्टि ॥ १३७ ॥

बाहू धनुःकोट्यावुच्येते । मन्त्र द्वयोपदेशात् प्रतिमन्त्रमिति गम्यते ॥ १३७ ॥

धनुः प्रयच्छति त्वयायमिति ॥ १३८ ॥

अनेन मन्त्रेण यजमानाय ॥ १३८ ॥

दृबासीति प्रतिमन्त्रमादाय तिस्र इषूः प्रयच्छति पातैनमिति प्रतिमन्त्रम् ॥ १३९ ॥

यजमानायैव ॥ १३९ ॥

आविर्मया इति वाचयति ॥ १४० ॥

केषांचित्प्रतिमन्त्रं नेति सम्प्रदायः ॥ १४० ॥

अवेष्टा इति लोहाय समाविध्यति केशवास्ये सदोन्त उपविष्टाय ॥ १४१ ॥

लोहाय सत्यमुं लिङ्गात् । अथ यल्लोहाय सम्भवति लोहिता इव हि दन्दशूका इति ॥ १४१ ॥

सुन्वन्तमाक्रमयं दिशः प्राचीमारोहति वाचयति प्रतिमन्त्रं प्रतिदिशं यथालिङ्गम् ॥ १४२ ॥

सुन्वन्तं यजमानं बाहुर्गृहीतमाक्रमयन् । दिशां चाक्रमणमाभिमुख्यगमनमात्रेणैव । न ह्यन्यथा सम्भवः । आक्रमयंश्च वाचयति ॥ १४२ ॥

आक्रम्य पादेन सीसं निरस्यति प्रत्यस्तमिति ॥ १४३ ॥

यच्छार्दूलचर्मणो जघनार्धे सीसं निहितं तत्पदा प्रतिक्षि-

पति प्रत्यस्तमिति मन्त्रेण ॥ १४३ ॥

व्याघ्रचर्मारोहयति सोमस्य त्विषिरिति ॥ १४४ ॥

यजमानमारोहयति बाहुगृहीतम् । मन्त्रस्तु यजमानस्यैव ॥१४४॥

रुक्ममधः पदं कुरुते मृत्योरिति ॥ १४५ ॥

रुक्म आभरणविशेषः तं पदस्याधस्तात्कुरुते मृत्योरिति मन्त्रेण ॥ १४५ ॥

शिरसि च नवतद्दर्म; शततद्दर्म वौजोसीति ॥१४६॥

चशब्दाद्रुक्ममेव ॥ १४६ ॥

बाहू उद्गृह्णाति हिरण्यरूपाविति ॥ १४७ ॥

यजमानः ॥ १४७ ॥

मित्रोसि वरुणोसीति वा ॥ १४८ ॥

बाह्वोरुद्ग्रहणम् ॥ १४८ ॥

स्थितं प्राञ्चमभिषिञ्चति पुरोहितोध्वर्युर्वा पुरस्तात्पालाशेन प्रथमं पश्चादितरे द्वितीयन स्त्रस्तृतीयेन मित्र्यो राजन्यो वैश्यश्चतुर्थेन सोमस्य त्वा द्युम्नेनेति प्रतिमन्त्रम् ॥ १४९ ॥

स्थितं प्राञ्चमभिषिञ्चति पुरस्ताद्व्यवस्थितः । पुरोहितोऽध्वर्युर्वा पालाशेन पात्रेण पश्चादितरे व्यवस्थिताः । द्वितीयेनौदुम्बरेण भ्राताऽभिषिञ्चति । तृतीयेन नैयग्रोधपादेन राजन्यो यो मित्रत्वेनागतः । वैश्यश्चतुर्थपात्रेण । सोमस्य त्वा द्युम्नेनेति प्रतिमन्त्रम् ॥१४९॥

अभिषिञ्चामीति सर्वत्र साकाङ्क्षत्वात् ॥ १५० ॥

क्षत्राणां क्षत्रपतिरेधीरिति च ॥ १५१ ॥

सर्वत्रैव शेषः ॥ १५१ ॥

इममुष्येति च प्रथमो देवसूवत् ॥ १५२ ॥

अभिषिञ्चति ॥ १५२ ॥

पार्थानामिन्द्राय स्वाहेति षड्जुहोति प्रति-
मन्त्रम् ॥ १५३ ॥

शौनःशेपञ्च प्रेष्यति ॥ १५४ ॥

शौनः शेपं शंसत्येवम् । च शब्दादनन्तरपदार्थसमन्त-
रमेव ॥ १५४ ॥

घूतां ते वा ॥ १५५ ॥

प्रेष्यति । तदा तत्रैव शस्यते ॥ १५५ ॥

ओ३मित्यृचां प्रतिगरस्तथेति गाथानाम् ॥ १५६ ॥

ऋचो ह्यायन्त एव गाथा छन्दो विशेषेण ॥ १५६ ॥

होताध्वर्यू हिरण्मय्योः कशिपुनोरुपविष्टौ ॥ १५७ ॥

[1]कशिपुनस्तरकौ ॥ १५७ ॥

शौनःशेपान्ते पृथक् शते ददाति ॥ १५८ ॥

पृथग्वचनाच्छतं शतं गवामेकैकस्य ददाति ॥ १५८ ॥

सहस्रे वा ॥ १५९ ॥

विकल्पः ॥ १५९ ॥

आसने च ॥ १६० ॥

ददाति यो यत्रोपविष्टः ॥ १६० ॥

---

१ मसूरकाविति यावत् ।

कण्डूयन्याभिषेण प्रलिम्पते प्रपर्वतस्येति ॥१६१॥

कण्डूयनी कृष्णविषाणा तया शरीरसंलग्नोदकाभिषेकेण प्रलिम्पते प्रपर्वतस्येति ॥ १६१ ॥

चर्मणि त्रिर्विक्रमयति विष्णोरिति प्रतिमन्त्रम् ॥ १६२ ॥

विक्रमणं कारयत्यध्वर्युर्मन्त्रस्तु यजमानस्यैव क्रमणशेषत्वात् ॥ १६२ ॥

पालाशे शेषानासिच्य पुत्राय प्रयच्छति प्रियतमायेदं मे कर्मेदं वीर्यं पुत्रो ऽनुसन्तनोत्विति ॥ १६३ ॥

शेषा अभिषेकशेषाः ॥ १६३ ॥

शालाद्वार्ये जुहोति पुत्रेन्वारब्धे प्रजापत इति पुत्रयजमानयोर्नामगृह्णाति पितृशब्दं पुत्रे कृत्वा यथायथं पश्चात् ॥ १६४ ॥

अयमभिमन्युरर्जुनस्य पितेत्येवं पितृशब्दः पुत्रे कृतो भवति । यथायथं पश्चादिति । अर्जुनोभिमन्योः पितेत्येवम । अयममुष्य पिता सावस्य पितेति मन्त्रे पाठः। ब्राह्मणेपि च यः पुत्रस्तं पितरं करोति यः पिता तं पुत्रमिति ॥ १६४ ॥

आग्नीध्रीये पालाशेन शेषान् जुहोति रुद्र यत्त इत्युत्तरार्धे ॥ १६५ ॥

अभिषेकशेषान् ॥ १६५ ॥

गवा; शतमधिकं वा स्वस्याहवनीयस्योत्त-
रत स्थापयति ॥ १६६ ॥

स्वशब्देनात्र भ्रातोच्यते ॥ १६६ ॥

पूर्वाग्निवहनं च साग्निम् ॥ १६७ ॥

शान्तिकपौष्टिकार्थोऽग्निर्येनानसोह्यते तच्च साग्निस्थापयति ॥ १६७ ॥

वाजपेयवद्रथमवहृत्य दक्षिणस्यां वेदिश्रोणौ
युनक्ति पूर्ववन्मित्रावरुणयोरिति चतुर्भिः ॥ १६८ ॥

वाजपेयवदिति रथाद्रथावहरणम् धूर्गृहीतस्य चावर्त्तनं कृत्वा दक्षिणस्यां वेदिश्रोणौ व्यवस्थितं युनक्ति पूर्ववन्मित्रावरुणयोरित्यनेन मन्त्रेण । चतुर्भिरश्वरथैरुत्तरा पृष्टिश्चतुर्थः ॥ १६८ ॥

दक्षिणापथेन यात्वापरेण चात्वाल; स्था-
पयति ॥ १६९ ॥

रथम् ॥ १६९ ॥

अव्यथायै त्वेति सुन्वन्नारोहति ॥ १७० ॥

तमेव रथम् ॥ १७० ॥

मरुतामिति दक्षिणधुर्यं प्राजति ॥ १७१ ॥

यन्ता ॥ १७१ ॥

गवां मध्ये स्थापयत्यायामेति ॥ १७२ ॥

अनेन मन्त्रेण रथं यन्तैव ॥ १७२ ॥

धनुरात्न्योपस्पृशति गां यजमानः स-

मिन्द्रियेणेति ॥ १७३ ॥

अनेन मन्त्रेण ॥ १७३ ॥

जिनामीमाः कुर्व इमा इति चाह ॥ १७४ ॥

चशब्दाद्यजमानः ॥ १७४ ॥

तावद्भूयो वा गो स्वामिने दत्वा पूर्वेण यूपं परीत्यान्तःपात्यदेशे स्थापयति मात इति ॥ १७५ ॥

अनेन मन्त्रेण ॥ १७५ ॥

अग्नये गृहपतय इति चत्वारि रथविमोचनीयानि जुहोति प्रतिमन्त्रं पशूना॑ रसोसीति वराहोपानहा उपमुञ्चते ॥ १७६ ॥

यजमानः ॥ १७६ ॥

भूमिमवेक्षते पृथिवि मातरिति ॥ १७७ ॥

अनेन मन्त्रेण यजमान एव ॥ १७७ ॥

अवरोहति ह॑सः शुचिषदिति ॥ १७८ ॥

रथाद्यजमानः ॥ १७८ ॥

विमुच्यसयन्तृक॑ रथवाहणे करोत्यनस्तत्कर्म शालाया दक्षिणतः ॥ १७९ ॥

विमुच्य रथं सह यन्तारं रथवाहने करोति। तस्य चानसस्तदेव कर्म रथवाहणम् ॥ १७९ ॥

अपप्रवते यन्ता ॥ १८० ॥

रथादवतरति ॥ १८० ॥

रथवाहणस्य दक्षिणेन्तेॆ शतमानावास-
जति वृत्तौ ॥ १८१ ॥

वृत्ताकारौ रक्तिकाशतमानौ ॥ १८१ ॥

अनुवर्त्ममौदुम्बरीं शाखामुपगूह्त्युपस्पृश-
ति शतमानावियदसीति ॥ १८२ ॥

इयदसीत्येकं युङ्ङसीति चापरम् ॥ १८२ ॥

तौ ब्रह्मणे दत्त्वोर्गसीति शाखामुपस्पृशति ॥ १८३ ॥

ताविति शतमानौ ॥ १८३ ॥

इन्द्रस्य वामित्यवहरते बाहू पयस्यायां
व्याघ्रचर्मदेशे स्थितायाम् ॥ १८४ ॥

इन्द्रस्य वां इत्यनेन मन्त्रेण पयस्यायामवहरति बाहू यजमानो व्याघ्रचर्मदेशे स्थितायाम ॥ १८४ ॥

सेषुकं धनुःप्रयच्छति ॥ १८५ ॥

धनुर्धराय ॥ १८५ ॥

उत्तरवेदिं हृत्वा पयस्यया प्रचरति प्राक्
स्विष्टकृतः ॥ १८६ ॥

खादिरीमासन्दीं रज्जूतां व्याघ्रदेशे नि-
दधाति स्योनासीति ॥ १८७ ॥

अनेन मन्त्रेण ॥ १८७ ॥

अधीवासमस्यामास्तृणाति क्षत्रस्य योनिरिति॥१८८॥

अस्यामित्यासन्द्याम् वास आस्तृणाति क्षत्रस्य योनिरिति॥१८८॥

सुन्वन्तमस्यामुपवेशयति स्योनामासीदेति॥१८९॥

बाहुगृहीतं यजमानमासन्द्यामुपवेशयति । मन्त्रश्चाध्वर्योरेव ॥ १८९ ॥

निषसादेत्युरोस्यालभते ॥ १९० ॥

यजमानस्य हृदयम्॥ १९० ॥

अभिभूरित्यस्मै पञ्चाक्षान्पाणावाधाय पश्चादेनं यज्ञियवृक्षदण्डैः शनैस्तूष्णीं घ्नन्ति ॥ १९१ ॥

अभिभूरित्यनेन मन्त्रेण पञ्चाक्षान्यजमानस्य पाणावाधाय पश्चादेनं यजमानस्य यज्ञियवृक्षदण्डैः शनैस्तूष्णीं घ्नन्त्यध्वर्य्वो बहुवचनोपदेशात् ॥ १९१ ॥

पाप्मानं ते ऽपहन्मोति त्वा वधं नयामीति वा ॥१९२॥

अनेन मन्त्रेण घ्नन्ति । तूष्णीं वेति विकल्पः ॥ १९२ ॥

वरं वृत्वा ब्रह्मन्नित्यामन्त्रयते पञ्चकृत्वः ॥ १९३ ॥

यजमानः ॥ १९३ ॥

प्रत्याह व्यत्यासं सविता वरुण इन्द्रो रुद्र इति त्वं ब्रह्मासीत्यादिभिः ॥ १९४ ॥

त्वं ब्रह्मासीत्यादि सविता वरुण इत्येवमादि व्यत्यासेन ब्रह्मा प्रवचनं ददाति यजमानाय ॥ १९४ ॥

आदिनैवान्त्यम् ॥ १९५ ॥

त्वं ब्रह्मासीत्यनेनैवान्त्यं पञ्चमं प्रतिवचनम् ॥ १९५ ॥

बहुकारेति च व्हयत्येवं नामानम् ॥ १९६ ॥

चशब्दाद्यजमानः । स हि पूर्वामन्त्रणाभिहितः । बहुकारेत्येवं-नामानं शब्दयति । एवमपि हि श्रूयते एवं नामा भवति कल्याण-मेवैतन्मानुष्यं वाचो वदतीति ॥ १९६ ॥

स्फ्यमस्मै प्रयच्छति पुरोहितोऽध्वर्युर्वेन्द्रस्य

वज्र इति ॥ १९७ ॥

अनेन मन्त्रेण यजमानाय ॥ १९७ ॥

राजा राजभ्राता सूतस्थपत्योरन्यतरो ग्राम-

णीः सजातश्चैवं पूर्वः पूर्वउत्तरस्मै ॥ १९८ ॥

स्फ्यम्प्रयच्छति सजातश्च ग्रामणीः सजातः ॥ १९८ ॥

प्रत्तेन सजातः प्रतिप्रस्थाता च पूर्वाग्निस-

हिताः शुक्रपुरोरुचा द्यूतभूमिं कुरुतः ॥१९९॥

प्रत्तेन वज्रेण सजातः प्रतिप्रस्थातारौ पूर्वाग्निवहनसंलग्नां शुक्रपुरोरुचा द्यूतभूमिं कुरुतः ॥ १९९ ॥

मन्थिनो विमितम् ॥ २०० ॥

पुरोरुचा विमितं कुरुत इति वर्त्तते ॥ २०० ॥

द्यूतभूमौ हिरण्यं निधायाभिजुहोति चतुर्गृ-

हीतेनाग्निः पृथुरिति ॥ २०१ ॥

अनेन मन्त्रेण हिरण्यमभिजुहोति ॥ २०१ ॥

अक्षान्निवपति स्वाहाकृता इति ॥ २०२ ॥

द्यूतभूमावक्षान्निवपति स्वाहाकृता इत्यनेन मन्त्रेण ॥ २०२ ॥

गां दीव्यध्वमित्याह ॥ २०३ ॥

द्यूतप्रकरणे प्रैषोयम् ॥ २०३ ॥

कृतादि वा विदध्याद्राजप्रभृतिभ्यः ॥ २०४ ॥

कृतादिभिर्वा द्यूतं भवति राजप्रभृतिर्वा द्यूतान्तरम् ॥२०४॥

सजाताय कलिङ्गाम् ॥ २०५ ॥

अस्य सजातस्य सम्बन्धिनी या तां घ्नन्ति । हन्तिश्च आहनन-मात्रे न मारणार्थः ॥ २०५ ॥

पूर्वाग्निवाहो दक्षिणा ॥ २०६ ॥

सा च द्यूतस्य यागाङ्गमभिधानात् ॥ २०६ ॥

पयस्यास्विष्टकृदिडं करोति माहेन्द्रादि च॥२०७॥

करोतीत्यनुवर्त्तते । मरुत्वतीयान्ते वैकृतं कर्मविहितमतः प्राकृतानुवृत्त्यर्थं माहेन्द्रादीत्युक्तम् ॥ २०७ ॥

अवरुह्य गच्छति स्तोत्राय प्रहितः॥ २०८ ॥

आसन्द्या अवरुह्य प्रहितः सन् स्तोत्राय गच्छति । यजमान-स्य सोन्ते स्तोत्रस्य भवत्यन्ते शस्त्रस्येति वचनात् ॥ २०८ ॥

अवभृथमेकेन ताप्यादीनि चेत् ॥ २०९ ॥

यदि माहेन्द्रादौ दीक्षितवसने न परिहिते तदा ताप्यादीना-मेकेनावभृथमभ्यवतरन्ति ॥ २०९ ॥

उदैत्येकेन ॥ २१० ॥

उत्तरत्येकेनो देति अन्येनोदेतीतिपाठः । अथ माहेन्द्रादौ दीक्षि-तवसनं परिहितं ततस्तेनैवावतरणमुत्तरणं च ॥ २१० ॥

दीक्षितवसनं च प्रास्यति॥ २११ ॥

ताप्यावतरणपक्षे ॥ २११ ॥

अनूबन्ध्यवपाहोमान्ते दद्यादेनानि॥ २१२ ॥

ताप्यादीनि ॥ २१२॥

उदवसानीयायां वा ॥ २१३ ॥

दद्यात् आगन्तुत्वात्तदन्ते निवेशः ॥ २१३ ॥

त्रैधातव्युदवसानीया ऐन्द्रावैष्णवो द्वादश-
कपालो व्रीहियवाणाम् ॥ २१४ ॥

तमुभयेषां व्रीहियवानां गृह्णातीति वचनात् ॥ २१४ ॥

तृतीयं यवानां मध्ये ॥ २१५ ॥

तृतीयभागो यवानां मध्ये ॥ २१५ ॥

अधिश्रयणं च ॥ २१६ ॥

एवमेव । व्रीहिमयमेवाग्रे पिण्डमधिश्रयति । अथ यवमयमथ व्रीहिमयमिति वचनात् । अवदानं तु धातुत्रयादपि ग्राह्यम् ॥ २१६ ॥

तिस्रस्तिस्रो दक्षिणा ददाति शतमानानि ब्र-
ह्मणे धेनूर्होत्रे वासांस्यध्वर्यवे गामग्नीधे ॥ २१७॥

तिस्रस्तिस्र इत्यवाच्यं बहुवचनोपदेशात् । आदिसामर्थ्याच्च तत्प्राप्तेः । वाच्यं वा । अग्नीधोपि गावस्तिस्र एव यथा स्युरिति । ता वा एता द्वादश वा त्रयोदश वा दक्षिणा भवन्तीति श्रुतेः । ननु चैवं द्वादशैव भवन्ति न त्रयोदश।उच्यते । काण्वपाठाङ्गीकरणेन त्रयोदश भविष्यन्ति । तत्राध्वर्योः पठ्यते त्रीणि वासांसि त्रयश्चातद्व्राहो गां वाजं वाग्नीध इति च त्रयोदश भवन्ति।वचनात्त्रैधातवी उदवसानीया कार्येभिषेचनीयस्य भवति । प्रकृतौ चोदवसानीया समारूढनिर्मथिते दृष्टा इह च तथा न सम्भवति येनाभिषेचनीयदशपेययोश्च प्राक्क्रयादेकतन्त्रतां वक्ष्यति । तेनात्र भवति सन्देहः किमतिप्रणीते क्रियतामुतापराग्न्याहवनीय इति । तत्र केचिदाहुरभिषेचनीयस्यैवेष्टिरिति तदाहवनीय एवातिप्रणीते प्राप्नोति । अपराग्नयो दाशपेयिका इति । अतोतिप्रणीत इति । नेच्छन्त्येतदपरे । न हीयं प्रकृतावतिप्रणीते दृष्टेति । ननु चापराग्न्याहवनी-

येपि नैव प्रकृतौ दृष्टा समारूढमन्थनविधानात् । सत्यमेवं समारोपमन्थने दशपेयेन विभृथे । अतो न क्रियते । अपराग्निसम्बन्धश्चाभिषेचनीयस्यानपनीत एव । केवलं मन्थनं न क्रियते । तस्मादिहैव युक्तरूपमनुष्ठानम् । अपि च निवृत्तप्राकृतकार्योऽतिप्रणीतो नोदवसानीयापेक्ष्यते । ननु चापराग्नयो दाशपेयिका इत्युक्तम् । सत्यमेवं तथाप्याहवनीयापेक्षायां स एव प्रसज्यते नातिप्रणीतो निवृत्तकार्यत्वाद्दिति ॥ २१७ ॥

भैषज्याभिचारयोरप्येषा ॥ २१८ ॥

त्रिधा दक्षिणा भवति त्रैधातवी ॥ २१८ ॥

दशोत्तराणि सꣳसृपाहवीꣳषि निर्वपति ॥२१९॥

नामधेयं तस्मात्सꣳसृपां नामेति । दशानामपि षष्ठ्यामनुष्ठानं यथा स्यादित्येवमर्थं दशग्रहणमिति सम्प्रदायः । काण्वास्तु षण्णां प्रवृत्तिः श्वो भूत इति मन्यन्ते । न त्वाचार्येण सूत्रितम् । अन्यत्र चोक्तं प्रतिग्रहमेकैकꣳ श्व इति । तेनाचार्याभिप्रायादेकस्मिन्नेवाहनीति गम्यते । काण्वपाठाद्वा प्रत्यहमिति ॥ २१९ ॥

देवयजनान्तरमकैकेनोत्सर्पति ॥ २२० ॥

हविषा ॥ २२० ॥

शालायामन्त्यम् ॥ २२१ ॥

अन्त्यं हविर्दशपेयशालायां भवति । शालाग्रहणं चोपलक्षणार्थम् ॥ २२१ ॥

सावित्रसारस्वतत्वाष्ट्रपौष्णैन्द्रबार्हस्पत्यवारुणाग्नेयसौम्यवैष्णवानि यथोक्तम् ॥ २२२ ॥

यथा प्रदेशान्तरं आचार्येणोक्तानीति यथोक्तग्रहणम् ॥ २२२ ॥

प्रतीष्टि पुण्डरीकाणि प्रयच्छति ॥ २२३ ॥

प्रयच्छतिग्रहणाद्दक्षिणार्थे तथा च काण्वपाठः सा दक्षिणा॥२२३॥

हिरण्मयानि वा ॥ २२४ ॥

पुण्डरीकाणि । स चायं विकल्पः ॥ २२४ ॥

उत्तमासु तिसृषु पञ्च ॥ २२५ ॥

द्वे द्वे द्वयोरन्त्यायामेकम् ॥ २२५ ॥

तेषाꣳ स्रजं प्रतिमुञ्चते ॥ २२६ ॥

तेषां पुण्डरीकाणाꣳ स्रजं मालां कृत्वा प्रतिमुञ्चते यजमानः ॥ २२६ ॥

तद्दीक्षो भवति ॥ २२७ ॥

सास्य दीक्षेति वचनात् ॥ २२७ ॥

एकतन्त्रौ क्रयैकत्वात् ॥ २२८ ॥

इदं विचार्यते । किमेतानि हवीꣳषि दशपेयाङ्गभूतानि उत पृथगर्थत्वमिति । पृथगत्वर्थमिति ब्रूमः । एवं ह्यत्र श्रूयते । एभिर्मे पीष्टमसदेभिरपि सूया इति । तेन त्रिषंयुक्तादिवत् पृथगत्वर्थमिति केचित् । नैवमित्यपरे । एतैर्हि दशपेयार्थानामग्नीनां तद्देवयजनप्रतिनयनं क्रियते । अतस्तदर्थमिति गम्यते । तथा च मन्त्रलिङ्गं सवित्रा प्रसवित्रेत्युपक्रम्य विष्णुना दशम्या देवतया प्रसूतः प्रसर्पामीति सर्पणार्थतां दर्शयति । एभिर्मेपीष्टमसदेभिरपि सूया इत्यर्थवादप्रायम् । प्रयोजनं दशपेयाङ्गत्वेऽग्न्यन्वाधानाभावः । वाजपेये च सर्पणाभावादप्रवृत्तिः ॥ २२८ ॥

इदं विचार्यते । किमभिषेचनीयदशपेयौ एकतन्त्रावुत पृथक्तन्त्राविति । एकतन्त्राविति ब्रूमः । कुत एतत् । क्रयप्रतिकर्षात् । एवं ह्यत्र श्रूयते सह सोमौ क्रीणाति । तत्प्रतिकर्षाच्चाधस्तनस्यापि प्रतिकर्ष इति । एवं प्राप्त आह—

नाना वावभृथदीक्षाश्रुतिभ्याम् ॥ २२९ ॥

नाना तन्त्रौ वा भवतः । कुत एतत् । अवभृथदीक्षाश्रुतिभ्याम् । अभिषेचनीयस्य ह्यवभृथः श्रूयते । स यत्रावभृथम-

भ्यवेति तदेतदप्यभ्यवहरन्तीति दीक्षितवसनप्रासनविधिपरे वाक्ये अवभृथं दर्शयति। तथा च दीक्षा श्रूयते। पुण्डरीकस्रजं प्रतिमुञ्चते सोस्य दीक्षेति। यदि ह्येकतन्त्रौ स्यातांनावभृथ श्रूयेत। तथा दीक्षा इति ॥ २२९ ॥

एवं प्राप्त आह—

एकं त्वानुपूर्व्ययोगात् ॥ २३० ॥

तु शब्दः पक्षव्यावृत्तौ। एकमेव तन्त्रन्न भिन्नतन्त्रता। कुत एतत्। एवं हि पदार्था आनुपूर्व्येण युज्यन्ते। क्रयमात्रे पुनः प्रतिक्रष्यमाणे दीक्षणीयादीनां पश्चादनुष्ठानानुपूर्व्यं स्यात् तत्र चोदकबाधः। दीक्षावभृथग्रहणं तद्वचनेनेत्यदोषः ॥ २३० ॥

तदुक्तम्—

अवभृथदीक्षाभ्यासो वचनादिति ॥ २३१ ॥

यथाश्वमेधे वभृथदीक्षाभ्यासः ॥ २३१ ॥

सप्तम्यां ब्रह्मागारात्सोममाहृत्यासन्द्यभिमर्शनादि करोत्युपसद्देवताहवींषि निर्वपत्युपसदन्त इच्छन्यथोक्तम् ॥ २३२ ॥

एवमेव हि श्रवणमिति ॥ २३२ ॥

पितामहदशगणाः सोमपानाः संख्यासर्पणम् ॥ २३३ ॥

यजमानस्य पितामहदशगणं सोमपानामुच्चार्य १ सर्पणं कर्त्तव्यम् ॥ २३३ ॥

सवित्रेति वानुवाकमुक्त्वा ॥ २३४ ॥

सर्पणं भवतीति विकल्पः ॥ २३४ ॥

दश दशैकैकं चमसमनु भक्षयन्ति ॥ २३५ ॥

---

१ अमुकः प्रथमः सोमपः असौ द्वितीयः असा तृतीयः एवं दशमपर्यन्तं सोमपान् गणयित्वेत्यर्थः।

दश दशैकैकं चमसमनु प्रसृप्ता भवन्तीति वचनात् ॥ २३५ ॥

यजमानस्य राजन्यः ॥ २३६ ॥

तत्र च राजन्यचमसे राजन्या भक्षयन्ति । संख्या हि समानजातीयेषु भवति । ननु च शतं ब्राह्मणास्सोमं भक्षयन्तीत्यत्र श्रूयते । तत्र कथं राजन्या भवेयुः । उच्यते । भूयस्त्वात् । ब्राह्मणेषु चाब्राह्मणेषु शतसंख्येत्यदोषः । एवं च सह पानविरोधो न भवति ॥ २३६ ॥
एवं प्राप्त आह—

ब्राह्मणा वा श्रुतेः ॥ २३७ ॥

वाशब्दः पक्षव्यावृत्तौ । ब्राह्मणा एव भवन्ति न क्षत्रियाः । शतं ब्राह्मणा इति हि श्रूयते । ननु च ब्राह्मणेषु च भूयस्त्वाच्छतशब्द इत्युक्तम् । नैतदेवम् । शतं ब्राह्मणाः सोमं भक्षयन्तीति विधिरयं विधौ च न परः शब्दार्थो भवति । एवं कृत्वा दश दशैकैकं चमसमनु भक्षयन्तीति विभागविधानम् ॥ २३७ ॥

तुल्याः संख्यायोगात् ॥ २३८ ॥

शतसंख्या च तुल्येषूपपद्यते नातुल्येषु । अतो यजमानचमसेऽपि ब्राह्मणा एवेति । सहपानाविरोधस्तु वचनात् ॥ २३८ ॥

ब्रह्मणे ददात्यꣳशुवद्दक्षिणा ॥ २३९ ॥

अꣳशुवदिति तुल्यशास्त्रत्वात् ॥ २३९ ॥

हिरण्मयीꣳ स्रजमुद्गात्रे रुक्मꣳ होत्रे हिरण्मयौ प्राकाशा[1]वध्वर्युभ्यामश्वं प्रस्तोत्रे वशां मैत्रावरुणायर्षभं ब्राह्मणाच्छꣳसिने वाससी

---

1 प्राकाशौ दर्पणौ । कर्णवेष्टकावित्यपरे ।

नेष्टापोतृभ्यामन्यतरतो१ युक्तं यवाचितम-
च्छावाकाय गामग्नीधे ॥ २४० ॥

ददातीति सर्वत्रानुषङ्गः। गौश्चानडुद्धवति काण्वपाठात् ॥२४०॥

अभिषेचनीयान्ते केशवपनार्थे निवर्त्तनः
संवत्सरम् ॥ २४१ ॥

अभिषेचनीयान्तग्रहणेन दशपेयान्तो लक्ष्यते । अभिषेचनीयेनेष्ट्वा केशान्न वपत इति श्रुतेः । तच्च संवत्सरं न वपत इति श्रुतेः । वपनं मुण्डनं केशानामवखण्डनम् । येनैवमाह स वैन्यैव वर्त्तयते केशान्न वपत इति ॥ २४१ ॥

भूम्यनभिष्ठानं च ॥ २४२ ॥

चशब्दात्संवत्सरमेव ॥ २४२ ॥

अनुपानत्कस्य यावज्जीवम् ॥ २४३ ॥

पुनर्यावज्जीवमेव भूम्यनभिष्ठानम् । संवत्सरं तु सोपानत्कस्यापि भूम्यनभिष्ठानमिति ॥ २४३ ॥

उत्तरे शुक्ले पञ्चबिलः ॥ २४४ ॥

पञ्चबिल इति नामधेयम् । तस्माच्चरुः पञ्चबिलो नामेति । उत्तरग्रहणमनन्तरव्युदासार्थं उत्तरानन्तरार्थं च । वैशाखशुक्ल इत्यर्थः ॥ २४४ ॥

आग्नेय ऐन्द्रः सौम्यो वा वैश्वदेवश्चरुः
पयस्या मैत्रावरुणी बार्हस्पत्यश्चरुः ॥ २४५ ॥

तेषां च—

---

१ एकस्मिन् पार्श्वे बलीबर्देन युक्तं, यवैराचितं पूर्णं शकटमित्यर्थः ।

प्रतिदिशमासादनमाग्नेयं पुरस्तात्प्रदक्षिणमितराणि मध्येऽन्त्यम् ॥ २४६ ॥

हविर्भवति ॥ २४६ ॥

पूर्वैश्चरित्वा चरित्वा मध्यमे सꣳस्रवासेचनम् ॥ २४७ ॥

स च तत्संस्कारः अतश्च संस्रवाभावेऽप्यन्येन कार्यः ॥२४७॥

आग्नेयो हिरण्यदक्षिणोऽग्नीधे ददात्यैन्द्रस्य ऋषभः सौम्यस्य बभ्रुर्ब्रह्मणे वैश्वदेवस्य पृषन्होत्रे पयस्याया वशाभावे ऽप्रवीता ध्वर्युभ्यां बार्हस्पत्यस्य शितिपृष्ठो ब्रह्मणे ॥ २४८ ॥

ददातीत्यनुवर्त्तते । वसाऽरिक्ता । अप्रवीता अकामिका । अध्वर्युभ्यामिति । द्वितीयोग्नीत् ॥ २४८ ॥

अन्नाद्यकामस्याप्येषा ॥ २४९ ॥

राजसूयाद्बहिरिष्टिर्भवति ॥ २४९ ॥

द्वादशोत्तराणि प्रयुग्घवीꣳषि ॥ २५० ॥

निर्वपति ॥ २५० ॥

मासान्तराणि ॥ २५१ ॥

प्रयुग्घवीꣳषीति नामधेयम । स वै प्रयुजाꣳ हविर्भिर्यजत इति श्रुतेः । द्वादशग्रहणं वा मासान्तरपक्ष एकस्मिन्नेवाहनि क्रियेतेत्येवमर्थः । तथा च काण्वानां षट् षट् श्वो भूत इति पठ्यते । यद्वा द्वादशानामेव प्रयुग्घविष्ट्वमुत्तरेषां नेति द्वादशग्रहणम ॥ २५१ ॥

आहवनीयाद्वा पुरस्ताच्छम्याप्रासे शम्याप्रा-

सं आग्नेयसौम्यसावित्रबार्हस्पत्यत्वाष्ट्रवैश्वानरा यथोक्तम् ॥ २५२ ॥

यथा प्रदेशान्तर उक्तम् ॥ २५२ ॥

एवमावृत्तस्य चरवः सारस्वतमैत्रक्षैत्रपत्यवारुणादित्याः ॥ २५३ ॥

एवमेव प्रत्यावृत्तस्य शम्याप्रासे भवति ॥ २५३ ॥

षट् षड्वैकतन्त्रे ॥ २५४ ॥

भवन्तीति सूत्रशेषः ॥ २५४ ॥

पूर्वाग्निवाहौ द्वौ द्वौ षण्णां षण्णां दक्षिणा ॥ २५५ ॥

इतरत्र तु चोदकेनान्वाहार्यः ॥ २५५ ॥

अष्टापदीवत्पशुबन्धौ गर्भिणीभ्यां स्वगुणदक्षिणौ ॥ २५६ ॥

अष्टापदीशब्देनानूबन्ध्योच्यते । लक्षणया तद्वत्पशुबन्धौ । तावेतौ गर्भिणीभ्यां भवतः स्वगुणदक्षिणौ । तद्गुणदक्षिणाविल्यर्थः ॥ २५६ ॥

श्येन्यादित्येभ्योदित्यै वा ॥ २५७ ॥

भवति ॥ २५७ ॥

वैश्वदेवीपृषती मारुती वा ॥ २५८ ॥

भवति ॥ २५८ ॥

तदन्ते केशवपनीयोऽतिरात्रः पौर्णमास्यांसुत्यः ॥ २५९ ॥

तदन्तग्रहणाच्चानन्तरपौर्णमास्यां केशवपनीयो भवति ॥ २५९ ॥

उत्तरे च मासान्तराः ॥ २६० ॥

उत्तरे च क्रतवो मासान्तराः । चशब्दात्पौर्णमासीं सुत्याश्च भवन्ति ॥ २६० ॥

व्युष्टिर्द्विरात्रः ॥ २६१ ॥

अग्निष्टोमातिरात्रौ ॥ २६२ ॥

अग्निष्टोमग्रहणमपार्ष्टिकत्वज्ञापनार्थम् ॥ २६२ ॥

क्षत्रधृतिः ॥ २६३ ॥

अपरः क्रतुर्भवति ॥ २६३ ॥

तमुभयत एके त्रिष्टोमज्योतिष्टोमौ ॥ २६४ ॥

कुर्वन्त्येके उपरिष्टात् । अत्र च वैशाखामावास्यायां पशुबन्धौ । ज्येष्ठपौर्णमास्यां केशवपनीयः । आषाढ्यां व्युष्टिर्द्विरात्रः । श्रावण्यां क्षत्रधृतिः । भाद्रपदाश्वयुजयोस्त्रिष्टोमज्योतिष्टोमौ कार्त्तिक्याᳲ सौत्रामणीति ॥ २६४ ॥

अभिषेचनीयाद्वा संवत्सरात्केशवपनीयोऽतिरात्रः सोमापवर्गः ॥ २६५ ॥

सोमापवर्ग इति सोमानामपवर्गो भवति । वा तदपवर्गे सोमाः ॥ २६५ ॥

उत्तरे शुक्ले सौत्रामणी ॥ २६६ ॥

सोमानन्तरे शुक्ले सौत्रामणी भवति ॥ २६६ ॥

व्रीहीन्विरूढाविरूढान्क्षौम उपनह्य क्रीणाति क्लीबात्सीसेन ॥ २६७ ॥

ऋजुः ॥ २६७ ॥

पक्त्वौदनं विरूढांश्चूर्णीकृत्याश्विभ्यां पच्यस्वेति सᳲसृजति ॥ २६८ ॥

ओदनपाको विरूढैः स चतुर्मुष्टिकग्रहणपूर्वकश्चोदकानुग्रहाय। तस्य च विरूढचूर्णैरश्विभ्यां पच्यस्वेति संसर्गः॥ २६८॥

सिंहवृकव्याघ्रलोमानि चावपति॥ २६९॥

चशब्दात्तत्रैव॥ २६९॥

पशुषु वा॥ २७०॥

आवपति तुल्यशास्त्रत्वात्॥ २७०॥

पुरोडाशधर्मा द्रव्यसामान्यात्॥ २७१॥

अत्र च सुरायां पुरोडाशधर्माः प्रवर्त्तन्ते। द्रव्यं हि तेषां पर्युपस्थापकमिति। ननु च ग्रहग्रहणपुरोरुगुपयामादीनां दर्शनात्सौमिका भवन्तीति गम्यते। नेत्याह॥ २७१॥

यावदुक्तं सौमिका गुणत्वात्॥ २७२॥

यावदुक्तं ते भवन्ति। न हि सौमिकधर्मप्रवृत्तिरत्र व्यक्तत्वात्। न च गुणप्रवृत्त्या गुणान्तरप्रवृत्तिर्युक्ता। गुणत्वादेव॥ २७२॥

त्रिपशुः पशुबन्धश्चश्चतुर्थ्याम्॥ २७३॥

चतुर्थे वाहनि॥ २७३॥

पक्वायाम्॥ २७४॥

सुरायाम्॥ २७४॥

आश्विनोजः श्येतः॥ २७५॥

श्येत आरक्तगौरः[१]॥ २७५॥

मल्हाविः सारस्वती॥ २७६॥

रजो मलं हन्तीति मल्हाविः सा सारस्वती॥ २७६॥

---

१ आलोहितोऽज इति हरिस्वामी। शुक्लवर्ण इति माधवाचार्याः।

ऋषममिन्द्राय सुत्राम्णे तद्गुणाभावेजाः ॥ २७७ ॥

तद्गुणानामभावे अजा भवन्ति ॥ २७७ ॥

प्रथमो लोहितः ॥ २७८ ॥

तदा च लोहितः प्रथमो भवति ॥ २७८ ॥

त्रियूपो वैकादशिनि लिङ्गात् ॥ २७९ ॥

त्रियूपो वा भवति एकयूपो वा एकादशिनि लिङ्गात्। एकादशिन्यां ह्युभयं दृष्टम् । एकयूपतानेकयूपत्वं च । एकादशिनि लिङ्गं चात्र गणत्वमिति । अत्रोच्यते । सौत्रामणीसंशब्दनादेकयूपतैव नियन्तुं युज्यते । तत्र हि श्रूयते । तद्यदेतं सौत्रामणिकं यूपमेतौ यूपावभितो भवत इति । अपि च सूत्रारम्भसामर्थ्यादयमर्थोऽवगम्यते सूत्रारम्भमन्तरेणापि विकल्पः सिध्यत्येव । तस्मादेकयूपता नियम इति ॥ २७९ ॥

अग्नी वरुणप्रघासवत् ॥ २८० ॥

अवेदिर्दक्षिणः ॥ २८१ ॥

भवति ॥ २८१ ॥

वपामार्जनान्ते कुशैः परिस्रुतं पुनाति

वायुः पूत इति ॥ २८२ ॥

अनेन मन्त्रेण ॥ २८२ ॥

कुवलकर्कन्धुबदरचूर्णानि चावपति ॥ २८३ ॥

[1]कुवलादयो बदरजातिविशेषाः । वयोवस्थाविशेषा इत्यपरे ॥ २८३ ॥

---

१ बदराणि निरुपपदबदराणि चणकबदराणि च कुवलादिवाच्यानीति याज्ञिकाः। सूक्ष्मतरस्थूलमध्यमपरिणामानि बदरजातिफलानीति माधवाचार्याः ।

ग्रहं गृण्हाति कुविदङ्गेति त्रीन्वा प्रतिदे-
वतमेतयैव ॥ २८४ ॥

पुरोरुचा। स चायं विकल्पः एकं वा त्रीन्वेति श्रुतत्वात् ॥२८४॥

समस्यानुवाचनं यजेति च ॥ २८५ ॥

समासश्चतुर्थ्यन्तानामेव पदानां न विभक्तिलोपेन ॥ २८५ ॥

प्रथमस्यानुहोममितरौ ॥ २८६ ॥

ग्रहौ ॥ २८६ ॥

परिस्रुद्धोमो दक्षिणेऽग्नौ ॥ २८७ ॥

तत्र चाहवनीयसंस्काराः कर्त्तव्याः चोदकपरिप्राप्तत्वात्॥२८७॥

भक्षमाहृत्य परिस्रुच्छेषमासिच्य रुक्मव-
च्छिद्रं कुम्भꣳ शिक्ये कृत्वोपरि दक्षिणस्य धार-
यन्त्स्रवन्तमुपतिष्ठते त्रिचैः सोमवतां बर्हिष-
दामग्निष्वात्तानामिति ॥ २८८ ॥

भक्षाहरणमात्रोपदेशाद्विशेषानुपदेशाच्च यथान्यत्र भक्षणं तथेहापीति ॥ २८८ ॥

हवीꣳषि निर्वपति सावित्रवारुणैन्द्राणि यथो-
क्तं पशुपुरोडाशोर्थे ॥ २८९ ॥

देवतान्यत्वात्पशुपुरोडाशार्थ इत्युक्तम् ॥ २८९ ॥

नपुंसको दक्षिणा रथवाही वा वडवा ॥२९०॥

विकल्पः ॥ २९० ॥

सोमातिपूतस्याप्येषा ॥ २९१ ॥

सौत्रामणी भवतीति शेषः ॥ २९१ ॥

अनुयाजान्ते पशुपुरोडाशार्थैश्चरत्याश्विनेन
प्रागवदानेभ्यः ॥ २९२ ॥

आश्विनस्य चानेनोत्पत्तिः पूर्वमनभिधानात् ॥ २९२॥

हविर्भिर्वा ॥ २९३ ॥

प्रागवदानेभ्यश्चरति । अस्मिंश्च पक्षे ॥ २९३ ॥

आश्विनाभावस्तु ॥ २९४ ॥

सौत्रामणीं त्रैधातवीं च प्रकृत्य श्रूयते । सैषा राजसूययाजिन उदवसानीयेष्टिर्भवतीति। अतः क्रमार्थमिदमाह—

राजसूययाजिनः कर्मापवर्गे वा सौत्रामणी ॥२९५॥

त्रैधातवी वेति विकल्पमाशङ्क्याह—

त्रैधातव्यानुपूर्व्ययोगात् ॥ २९६ ॥

त्रैधातव्येवान्ते भवति । आनुपूर्व्ययोगात् । त्रैधातव्येवान्ते पठ्यत इति । न चानयोर्विकल्पः । आम्नानसामर्थ्यात् । तेन सौत्रामण्यां उदवसानीयत्वमुच्यते । उदवसानीयासन्निधौ पाठात् । उदवसानीयेवोदवसानीयेति उपचारवृत्त्या।तथा च पाठः अनया मेऽपीष्टमसदनयापि सूया इति ॥ २९६ ॥

इति श्रीउपाध्यायकर्ककृतौ कात्यायनविवरणे
पञ्चदशोऽध्यायः समाप्तः ।